५०८

शब्दकल्पद्रुम

ॐगणेशायनमः

छ छकारः। सप्तव्यञ्जन सप्तम
वर्णः। चवर्गद्वितीयवर्णश्च। अस्योच्चा
रणस्थानं तालु। इतिव्याकरणं ॥ अ
स्योत् पत्तिर्यथा। विसर्गस्तालुगः
सोष्मा शं चवर्गश्च य स्तथा। इति
प्रपञ्चसारः॥ अत्रोत्तरत्रापि व
र्गस्य द्वितीयादि वर्णोच्चारणे ॥
स्वर स्पर्शनादिति लोक गम्भीरसं
स्पर्शादितिच यथास्थानमस्वती
तिनङ्गीकाकारो विसर्गरूपः॥ तस्य
लेखन प्रकारो यथा। ऊर्द्ध्वार्थः
कुञ्चितारेखाभासस्वस्वप्रासस्थितः
वाग्देवी कमलानित्याद्वियामात्रा
कीर्त्तिता। इतिवर्णोद्धारतन्त्रः॥
अस्य स्वरूपं यथा। छकारं
परमाश्चर्यं स्वयं परम कुण्डली
सततं कुण्डलीयुक्तं पञ्चदेवमयं
सदा॥ पञ्चप्राण मयं वर्णं पञ्च
प्राणात्मकं सदा। त्रिबिन्दु सहितं
वर्णं सदा ईश्वर संयुतं ॥
पीत विद्युल्लताकारं छकारं प्र
णमाम्यहं। इतिकामधेनुतन्त्रं॥
छं त्रि निर्मलं। इति मेदिनी॥
तरलं। इत्येकाक्षरकोषः ॥
छः पुं छेदनं। इत्येकाक्षरकोषः
छगः पुं स्त्री छागः। इति हेम
॥ चन्द्रः ॥

छगणं क्ली पुं करीषः इतिहेमचंद्रः
छगलं क्ली नीलवस्त्रं इति मेदिनी॥
छगलः पुंस्त्री छागः इति मेदिनी
छगलकः पुं स्त्री छागः इत्यमरः॥
छगला स्त्री वृद्धदारकवृक्षः इति
शब्दरत्नावलीमेदिनीच॥
छगलाङ्घ्री स्त्री छगलान्त्री इत्यम
र टीकायां रायमुकुटः॥
छगलाण्डी स्त्री छगलान्त्री इत्यमर
टीकायांमुकुटः ॥
छगलान्त्रिका स्त्री छगलान्त्री इ
ति शब्दरत्नावली ॥
छगलान्त्री स्त्री वृद्धदारकवृक्षः
इत्यमरः॥ वृकः। इतिराजनिर्घण्टः
छगली स्त्री छागमाता वृद्धदा
रकवृक्षः। इतिविश्वः॥
छटा स्त्री दीप्तिः। यथा सटाच्छ
टा भिन्नघनेनविभ्रता नृसिंहसैंही
मतनुं तनुं त्वया। इति माघः॥
छटाफलः पुं गुवाकवृक्षः इति
त्रिकाण्डशेषः ॥
छटाभा स्त्री विद्युत्। इतिहाराव
ली छत्रं क्ली रौद्रवृष्टिवारणार्थ
मावरणविशेषः। छातिइतिभाषा
तत् पर्यायः आतपत्रं २। इ
त्यमरः॥ छायामित्रं ३ पटो
॥ ॥ दजं ४ ॥ इति॥

शाहरत्नावली तस्यगुणाः कृष्णा
तपधूलि वात हिम नाशित्वं वर्ण
दृष्टिकारित्वं । गुप्तावरण सकल
कारित्वञ्च । इतिराजवल्लभः ॥
तस्योत्पत्ति र्यथा । एकदा ।
ज्यैष्ठ मासे जमदग्नि मुनि र्धनु
र्विबाणान् सन्धाय प्रचिक्षेपत
त् पत्नीरेणुका तान्बाणानानी
यानीय तस्मै प्रादात् सा मध्या
ह्नकाले रौद्रेण पीडिता वृक्षच्छा
यामवलम्ब्य किञ्चित् कालं स्थि
त्वा तानानिनाय ऋषि स्तदा क्रुद्ध
स्तामाह किं चिरेणागता साब्र
वी सूर्य्यतेजसा मे शिरः पादौच
सन्तप्तौ तेन वृक्षच्छायामा
श्रित्यस्थिता तस्मात् चिरायेतत्
श्रुत्वा मुनिराह अद्य सूर्य्यम
स्त्राग्नितेजसा निपातयिष्यामि इत्यु
क्त्वाथ धनु र्विबाणान् सन्धायसूर्य्या
भिमुखो ऽतिष्ठत् सूर्य्यस्तं दृष्ट्वाभी
तो द्विजरूपेण आगत्य आह सूर्य्यो
दन्नादिभवति तेनान्नेन भवद्भिः
कर्म्माणि क्रियन्ते कथमेनं हनि
ष्यसि एवंमाकार्षी स्तथापि मुनिः
शमं नजगाम अथ सूर्य्यः शिर
स्त्राणं छत्रं निर्म्माय तस्मै दत्वा
अद्य प्रभृति ॥ ॥

एतत् लोके प्रचरिष्यति अतो दिव्यश्च
स दानं महाफलं इत्युक्त्वा सगतः
॥ तस्य दान फलं यथा ॥
छत्रं हि भरत श्रेष्ठ यः प्रद
द्याद्द्विजातये । शुभ्रं शतशला
कं वैस प्रेत्य सुखमेधते ॥ स
शक्रलोके वसति पूज्यमानो द्वि
जातिभिः अप्सरोभिश्च सततं दे
वैश्च भरतर्षभ ॥ इतिमहाभार
ते दान धर्म्मः अथ छत्र युक्तिः
विशेषश्चाथ सामान्यं छत्रस्य हि
विधाभिदा । राजच्छत्रं विशेषा
ख्यं सामान्यञ्चान्य इच्यते ॥
तत्र विशेष च्छत्रोद्देशः । स
दण्डञ्चाथ निर्द्दण्डं तज्ज्ञेयं
द्विविधं पुनः । सदण्डं तत्र विज्ञेयं
सारणाकुञ्चनात्मकं ॥ दण्डकन्द
शलाकाश्च रज्जुर्वस्त्रञ्च कीलकः
षड्भिरेतैः समन्दिष्टं छत्रमित्य
भिधीयते ॥ दिगष्ट षट् चतु
र्हस्तदीर्घो दण्डो नृपक्रमात् ।
षड्वाण वेदनयन विभक्त्या कन्द
उच्यते शतान्यशीतिः षष्टिश्च
त्वारिंशद्युगक्रमात् । शलाकाः
षट् पञ्च वेद त्रि हस्तैः स
म्मिताः क्रमात् ॥ नवभिस्तन्तुभिः
सूत्रं सूत्रैस्तु ॥ ॥

नवभि र्गुणः । गुणैस्तु नवभिः
पाशो रश्मिस्तै र्नवभिर्भवेत् ॥
नवाष्ट सप्त षट् संख्यै रश्मिभी
रज्जवः क्रमात् । वस्त्रं शलाका
द्विगुणमायामेन प्रतिष्ठितं भानु
दिग् गुह वसुभि रङ्गुलीभिस्तु
कीलकः । षण्णां षण्मान सादि
तं तद्राज्ञामेव भूतये ॥ यादौ तं
युवराजस्य अन्येषान्तु तदर्द्धतः
एतेन राज्ञो दशोदश हस्तः
युवरास्य तत् । अन्येषां तत् ॥
विशुद्ध काष्ठस्य तु दण्डकन्दौ त
था शलाका अपि शुद्ध वंशजाः
रज्जुश्च रक्ता वसनञ्च रक्तं छत्र
प्रसादं नृपते र्वदन्ति प्रसादमि
ति प्रमादार्हं नीलो दण्डश्च व
स्त्रञ्च शिरः कुम्भ स्तु कानकः ।
सौवर्णः युवराजस्य प्रभापं नाम
विश्रुतं चान्दनो दण्डकन्दौ चे
त् सम्पुक्ते रज्जु वाससी । छत्रं
मनोहरं राज्ञां स्वर्णकुम्भोपशो
भितं मुक्तानिरज्जुवासांसि स्व
र्णकुम्भ स्तथोपरि । इदं कनक
दण्डाख्यं छत्रं सर्वार्थ साधकं
दण्डकन्द शलाकाश्च शुद्ध स्वर्णे
न निर्म्मिताः । कीलकं स्वर्णचटितं

अयुक्ते रज्जुवाससी ॥ कुम्भादि
थ हंसादि श्चामरादि र्यथा क्रमं
कुम्भादावथ हंसादौ नव रत्ना
नि रत्नयेत् ॥ द्वात्रिंशन्मौक्तिकी
माला द्वात्रिंशन्नत्र दापयेत् ।
सर्वोपरि ब्रह्मजातिं विशुद्धं ही
रकं न्यसेत् ॥ दण्डान्ते कुरुवि
न्दांश्च पद्मरागांश्च विन्यसेत् ॥
स्वासिहस्तैकमानेन चामरः सि
त इष्यते ॥ इत्ययं नवदण्डाख्य
श्छत्रराजो महीभुजां । अभिषेके
विवाहेच गृहाणां प्रीतिवर्द्धनः
पताकानवदण्डाग्रे राज्ञोष्टाङ्गुलि
संमिताः । अयं दिग्विजयी ना
मच्छत्रराजो महीभुजां ॥ इति
भोजराजकृतयुक्तिकल्पतरुः
छत्रः पुं मूलेन पात्रेणच वचा
कारवृक्षः छातारियाविष छात
। खरविष इतिच भाषा । तत्
पर्य्यायः । अभिच्छत्रः २ कटुः
२ इति रत्नमाला भूतृणं । इ
तिराजनिर्घण्टः ॥
छत्रकः पुं मत्स्यरङ्गपक्षी इ
तिशब्दचन्द्रिका ॥ अभिच्छत्रं रा
जकुलेखाड़ा इति भाषा इति
रत्नमाला ईश्वरगृहविशेषः इति

शब्दरत्नावली ॥

छत्रगन्धः पुं गुन्द्रतृणं । इति राजनिर्घण्टः ॥

छत्रचक्रं क्ली चक्रविशेषः यथा यश्विनी मच्च मूलाद्यं चक्रं छत्रत्रयात्मकं प्रतीची मध्य रेखाया ईशानान्तं हयाधिपः आग्नेयान्तं नराधीशो नैरृतान्तंगजाधिपः। त्रयं छत्रविभेगेन ज्ञातव्यञ्च शुभाशुभं ॥ अन्यस्य राज्ञोनाम र्द्धं यत्र छत्रे ततः कलं चामरं कलशं वीणा छत्रं दण्डः पतद्ग्रहः ॥ आसनं कीलकं रज्जुर्नवभेदाः प्रकीर्त्तिताः यत्र छत्रे स्थितः सौरि भङ्गं तस्य विनिर्द्दिशेत् ॥ चामरे चण्डता वायो रनावृष्टिः प्रजायते । दुर्भिक्षञ्च भवेत् घोरं प्रजापीडा न संशयः ॥ कलसस्य भवेद्वृद्धं भङ्गो वातादिकं ध्रुवं वीणास्थ नार्कपुत्रेण पट्टराज्ञी विनश्यति चलचित्तो भवेद्राजा भयभीताच मेदिनी यदा ऋत त्रये सौरि। छत्रे दण्डे पतद्ग्रहे ॥ तदातस्य भवेद्भङ्गः छत्रस्यास्य नसंशयः । आसनस्य भवेन्नाश

आसनस्थे शनैश्चरे युवराजस्तथः कीले वन्धनं रज्जुसंस्थिते सौम्य युक्तोतिचारस्थः शनिः क्रूरफलो नहि ॥ वक्रगः क्रूरयुक्तश्चसर्वं क्रूरंकरोति सः शनिराहुकुजादित्या यदा जीवेन्दुसंयुताः उत्तरा धीशराज्ञो वै निश्चितं भङ्गदाः । क्रूरं चतुष्टयञ्चैव बुधच न्द्रेणसंयुतं सर्वं छत्रविनाशाय तथा पाप चतुष्टयं । शुक्रेन्दुसंयुतं छत्रेदक्षिणेशस्य भङ्गदं एवमन्येषु राज्येषु नामर्त्तात् फलमादिशेत् । यथा दुष्टः फलः सौरि स्तथा सौम्य फलो गुरुः भौमज्ञोगुरुराहुश्च रविचन्द्रौवलेसमौ । यथाहानिकराः क्रूरास्तथा सौम्याः शुभङ्कराः नृपनेत्राष्टौग्रहाश्छात्रमरचक्रेणभङ्गदाः नृपनामर्द्दगोराहुः केन्द्रवीयस्थसंस्थितः छत्रभङ्गो भवेत्तस्य विषदानेन भूपतेः । मृगयासारसंयात्रां दुष्टहस्त्यश्ववाहनं ॥ विग्रहञ्चत्यजेद्राजा छत्रस्थेक्रूरखेचरे ज्ञात्वेवं शान्तिकं कुर्य्यात् ॥ ग्रहाणां जायते शुभं इतिसमयामृते छत्रचक्रं ॥ ॥

छत्रधारः त्रि छत्रधरः छातिध इति भाषा । तत्पर्य्यायः छत्राकरः २ । इतिहेमचन्द्रः ॥

छत्रपत्रं क्ली स्थलपद्मं इति त्रिकाण्डशेषः ॥

छत्रपत्रः पुं भूर्जवृक्षः इतिरत्नमाला मानकचुः इतिकेचित् ॥ सप्तपर्णवृक्षः इति केचित्

छत्रभङ्गः पुं वैधव्यं ॥ स्वातन्त्र्यं । ॥ नृपनाशः इति मेदिनी ॥

छत्रा स्त्री मिषिः मौरीइति भाषा शतच्छत्रा । शालुफा इति भाषा उत्तम्बुरु धन्या इति भाषा शिलीन्ध्रं । कौँडकछाता इति भाषा इति मेदिनी मञ्जिष्ठा । इतिराजनिर्घण्टः ॥

छत्राकं क्ली किम्पाकुः छत्रिका इति प्रायश्चित्तविवेकः ॥

छत्राकः पुं जालवर्बुरक वृक्षः इति राजनिर्घण्टः ॥

छत्राकी स्त्री रास्ना इत्यमरः । ।

छत्रातिच्छत्रः पुं छत्राकारजलोद्भव सुगन्धाख्य तृणविशेषः तत् पर्य्यायः छत्रातिच्छत्रा २ पालघ्नः ३ अतिच्छत्रा ४ सुगन्धा ५ छत्रकः ६ कटूकः ७ कटू ८ इतिशब्दरत्नावली ॥

छत्राधान्यं क्ली धन्याकं । इति राजनिर्घण्टः ॥

छत्रिका स्त्री शिलीन्ध्रं कौँडकछाताइतिभाषा । तत् तत्पर्य्यायः गोमयच्छत्रिका २ दिलीरं ३ शिलीन्ध्रकं ४ उद्भिज्जं ५ वमोरहं ६ गोलामं ७ इतिहारावली छत्राकं ८ इतिस्मृतिः उच्छिलीन्ध्रं ९ इतिश्रीभागवतं करीषवेत्रपलाल पृथ्वी वेणुज छत्रिकायाः सामान्यगुणाः शीतत्वं कषायत्वं स्वादुत्वं पिच्छिलत्वं गुरुत्वं छर्द्यतीसार ज्वर श्लेष्म रोगकारित्वञ्च ॥ पलालज छत्रिकागुणाः पाकेस्वादुरसत्वं रुक्षत्वं दोषकारित्वञ्च शुचिस्थान काष्ठवंश गोष्ठजन्मेत छत्रिकायाः गुणाः अतिदोष कारित्वं । अन्य छत्रिकास्तेभ्याविगर्हिताः इति राजवल्लभः ॥

छत्री न पुं नापितः इतिशब्दरत्नावली छत्रविशिष्टेत्रि यथा गवेहर्षातपेच्छत्रीदण्डी राज्यटवीषु च इति स्मृतिः ॥

छत्वरः पुं गृहः कुञ्जः । इति सिद्धान्तकौमुद्या मुणादि वृत्तिः

छद न क संहतौ। इति कविकल्पद्रुमः॥

छद म कि न ऊर्ज्जने ऊर्ज्जनं बलंजीवनञ्च इति कविकल्पद्रुमः छद कि न संहतौ। इति कविकल्पद्रुमः॥

छदः पुं पत्रं पत्तः ग्रन्थिपर्णवृक्षः तमालवृक्षः इतिमेदिनी। छदनं क्ली पत्रे पक्षः पिधानं इति मेदिनी॥ तमालपत्रं। तेजपात इति भाषा। इतिराजनिर्घण्टः॥

छदपत्रः पुं भूर्जपत्रवृक्षः इति क्वचित् रत्नमाला॥

छदिसः क्ली पटले चालइति भाषा। इत्यमरः॥

छद्म क्ली व्याजः कपटः अपादेशः स्वरूपाच्छादनं इतिमेदिनी

छद्मतापसः पुं छलतपस्वी तत्पर्य्यायः सर्व्वाभिसन्धी २ वैडालव्रतिकः ३ वेशधारी ४ इति शब्दरत्नावली॥

छद्रिका स्त्री गुडूची। इति राजनिर्घण्टः छन्दः पुं अभिप्रायः वशः इत्यमरः अभिलाषः इतिभरतः विषं इतिशब्दचंद्रिका॥ रहसि त्रि। इत्यमरटीका सारसुन्दरी॥

छन्दसः क्ली पद्यं वेदः स्वैराचारः अभिलाषः इति मेदिनी आद्यस्य लक्षणं यथा पाद्यं चतुष्पदी तच्च वृत्तं जाति रिति द्विधा। वृत्त मक्षर संख्यातं जातिर्मात्रा कृता भवेत् सममर्द्धसमं वृत्तं विषमञ्चेति तत्त्रिधा सं समसमचतुष्पादं भवत्यर्द्धसमंपुनः आदिस्तृतीयवद्यस्य पादस्तुर्य्योद्वितीयवत् भिन्नचिह्न चतुष्पादंविषमंपरिकीर्त्तितं एषामर्थः अक्षर संख्यातं अक्षर गणनयापरिमाणं वृत्तमुच्यते मात्राकृतामात्रा गणनया निर्णीता जातिर्जातिसंज्ञिका भवति॥ समं समचतुष्पादं अर्द्धसमंयस्यप्रथमपादः तृतीयेन पादेन तुल्यः चतुर्थः पादो द्वितीयेन पादेन तुल्यः विषमं पृथक् लक्षणं चतुष्पादं इतिगङ्गादासः तत्र नानाविधं तस्य ग्रन्थाः छन्दो विचिति पिङ्गल छन्दो मञ्जरी श्रुतबोधादयः सन्ति तेषुछन्दो मञ्जर्युक्त लक्षणोदाहरणादी निलिख्यन्ते॥

छन्दसां वृत्तिनामानि	तेषांमात्राः ६गुरु लघु	तेषामुदाहरणानि
एकाक्षरा वृत्तिः उक्था या श्रीः	६	श्रीस्ते। सास्तो॥
द्व्यक्षरावृत्तिः अत्युक्था स्त्री	६६	गोपस्त्रीभिः कृष्णोरेमे॥
त्र्यक्षरा वृत्तिः। मध्या नारी	६६६	गोपानांनारीभिः श्लिष्टोव्यात् कृष्णोवः॥
मृगी	६६	सामृगीलोचना राधिकास्त्रीपते
चतुरक्षरावृत्तिः प्रतिष्ठा कन्या	६६६६	भास्वत्कन्यासैका धन्या यस्याः कूले कृष्णो ऽखेलत्॥
सती	।।।६	मधुरिपोतवपदं। नमतिसानतुसती
पञ्चाक्षरावृत्तिः सुप्रतिष्ठा पङ्क्तिः	६।।६६	कृष्णसनाथा तर्णक पङ्क्तिः यामुनकच्छे चारु चचार॥
प्रिया	।।६।६	व्रजमण्डवो विलसत् कलाः प्रभवन् प्रियामुर वैरिणः॥
षडक्षरा वृत्तिः गायत्री तनुमध्या	६६।।६६	मूर्त्तिर्मुरशत्रो रत्यद्भुत रूपाप्रास्तां ममचित्तेनित्यंतनुमध्या
शशिवदना	।।।।६६	शशिवदनानां व्रजतरुणीनां अधर सुधोर्म्मिं मधुरिपुरैच्छत्॥
सोमराजी	।६६।६६	हरेसोमराजीसमानेयशाःश्रीः। जगन्मण्डलस्य छिनत्त्वन्धकारं॥
सप्ताक्षरा वृत्तिः उष्णिक् मधुमती	।।।।।।६	रविदुहितृतटेनवकुसुम ततिः रचित मधुमती मधुमथन मुदं

छन्दसां वृत्तिनामानि	तेषांमात्राः ऽ गुरु लघु	तेषामुदाहरणानि
कुमारललिता	।ऽ।।।ऽऽ	मुरारितनुवल्लीकुमारललि ता सा व्रजेणनयनानां ततान मुदमुच्चैः रङ्गेवाङ्कविलग्नद्
सदालेखा	ऽऽऽ।।ऽऽ	नीद्धान्मदलेखा लग्नाभून्मुर शौ कस्तूरी रसचर्च्चा यामुन
अष्टाक्षरावृत्तिः। अनुष्टुप्		
चित्रपदा	ऽ।।ऽ।।ऽऽ	शैकतदाशगोपवधू जलके लौ कंसरिपोर्गतिलीलाचि त्रपदा जगदव्यात् ॥ यच्च
माणवकं। माणवकक्रीडमिति केचित्	ऽ।।ऽऽ।।ऽ	ल चूडश्चपले वैन सङ्ग लैः केलिपरं। ध्याय सोवे स्मेरमुखं नंदसुतं माणवकं
विद्युन्माला	ऽऽऽऽऽऽऽऽ	वासो वल्ली विद्युन्माला वर्ह श्रेणीशाक्रश्चापः यस्मिन्नास्तां तापोच्छित्त्यै गोमध्यस्थः कृ ष्णाम्भोदः ॥
समानिका	ऽ।ऽ।ऽ।ऽ	यस्यकृष्णपा दपद्म मस्ति हृत्तडागसद्म। धीः समानिका परेणनो चि तात्र मत् सारेण ॥
प्रमाणिका :	।ऽ।ऽ।ऽ।ऽ	पुनातुभक्ति रच्युता सदा च्युतांघ्रिपद्मयोः श्रुति स्मृ ति प्रमाणिका भवाम्बुरा
नवाक्षरावृत्तिः बृहती		शितारिका ॥
भुजगशिशुसृता। सृतेत्यत्र भृता इतिपुता इतिच केचित्	।।।।।।ऽऽऽ	स्फुरदुरु निकट द्रोणी भुज गशिशुसृता यामीत्। मुर रिपुदलितेनागे व्रजजनस्त त्वदासाभूत् ॥

छन्दसां वृत्तिनामानि	तेषांमात्राः ऽ गुरुलघु	तेषामुदाहरणानि
मणिमध्यं	ऽ।ऽऽऽऽ।ऽ	कालिय भोगाभोगगतस्मम्मणि मध्यस्फीतरुचा चित्रपदाभोनंद सुतश्चारुननर्त स्मेरमुखः ॥
भुजङ्गसङ्गता	।।ऽऽऽ।ऽ	तरला तरङ्गरिङ्गिते यमुना भुजङ्ग सङ्गता। कथमेत्र वत् सचारकम्पलः सदैवतांहरिः
दशाक्षरावृत्तिः पङ्क्तिः		
रुक्मवती रुपवतीत्यक्वचित् चम्पकमालेति क्वापि	ऽ।ऽऽऽऽ।।ऽऽ	कायमनोवाक्यैः परिपुष्टैर्यस्य सदार्कसहिविभक्तिः राज्यपदे हम्म्पीलि रुदारा रुक्मवती वि। चपल तस्य ॥
मत्ता	ऽऽऽऽ।।।।ऽऽ	पीत्वामत्तामधुमधुपालीकालि न्दीयेतटवनकुण्डे उद्दीव्यस्तीव्र जजनवामाः कामासक्तामधु। जितिचक्रे ॥
त्वरितगतिः	।।।ऽ।।।ऽ	त्वरितगतिर्व्रजयु वतिस्तरणिसुता विपिनगता मुरविपुणारतिंगुरुणापविरमि ता ममदमिता ॥
मनोरमा	।।ऽ।ऽ।ऽ।ऽ	तरणिजातटेविहारिणीव्रजवि लासिनीविलसतः। मुररिपोस्त नुः पुनातुवः सुकृतशालिनोम
एकादशाक्षरावृत्तिः त्रिष्टुप्		नोरमागोष्ठे गिरिं सव्य करेणधृ ता रुषेन्द्रवज्रा इति युक्तदृष्टो योगोकुलं गोपकुलञ्चसस्य च
इंद्रवज्रा ॥	ऽऽ।ऽऽ।।ऽ।ऽऽ	केसवोरक्षतुचक्रपाणिः ॥

986

छन्दसांवृत्तिनामानि	तेषांमात्राः ऽगुरु।लघु	तेषामुदाहरणानि
उपेन्द्रवज्रा उपेन्द्रवज्राया इन्द्रवज्रायाश्चचरणे चटिताउपजातयः ताश्चचतुर्दशप्रस्ता रभेदात् आद्यन्तौत्य क्ता चतुर्दशप्रका रा भवन्ति	।ऽ।ऽऽ।।ऽ।ऽऽ	उपेन्द्रवज्रादि मणि छटाभिर्वि भूषणानांछुरितंवपुस्ते स्मरामि गोपीभि रुपास्यमानं सुरद्रुमू लेमणि मण्डपस्थं ॥
सुमुखी	।।।ऽ।।ऽ।।ऽ	तरणिसुता तटे कुञ्जगृहे वदन विधु स्मित दीधितिभिः तिमिरमु दस्य मुखं सुमुखी हरिमवलो का चुचुम्बचिरं ॥
शालिनी अस्याश्चतुर्थैर्नतः सप्तमेचयतिः	ऽऽऽऽऽ।ऽऽ। ऽऽ	स्नेहो हन्ति ज्ञान वृद्धिं विधत्ते य स्मिं यत्ने काम मर्थश्च सूते मुक्तिं दत्ते सर्वदोपास्यमाना पुंसो श्र द्धाशालिनीविष्णुभक्तिः ॥
वातोर्मी	ऽऽऽऽ।।ऽऽ। ऽऽ	ध्याता मूर्त्तिः क्षणमप्यच्युतस्य श्रेणी नाम्ना गदिता हेलयापि संसारे ऽस्मिन् दुरिते हन्ति पुं सांवातोर्मी पोतमिवाम्भोधि मध्ये ॥
भ्रमरविलसिता भ्रमरविलसितं । मिति केचित्	ऽऽऽऽ।।।।।ऽ	मुग्धे मानं परिहर नचिरात्तारु ण्यन्तेसफलयतुहरिः फुल्ला वल्ली भ्रमर विलसिता भावे शोभांकलयति किमु तां ॥

987

छन्दसांवृत्तिनामानि	तेषांमात्राः ऽगुरु।लघु	तेषामुदाहरणानि
अनुकूला	ऽ।।ऽऽ।।।।ऽऽ	वल्लव वेशा मुरविषु मूर्त्ति र्गोप मृगाक्षी कुतरति पूर्त्तिः वाञ्छित सिद्धौ प्रणति परस्य स्यादनुकूला जगति नकस्य ॥
रथोद्धता	ऽ।ऽ।।।ऽ।ऽ।ऽ	राधिका दधि विलोडनस्थिता कृ ष्णवेणु निनदै रथोद्धता यामुनं तट निकुञ्ज मञ्जसा सा जगाम सलिलाहृतिच्छलात् ॥
स्वागता	ऽ।ऽ।।।ऽ।।ऽऽ	यस्यचेतसिसदामुरवैरीवल्लवी । जन विलास विलोलः । तस्यनून ममरालय भाजः स्वागतादरकराः सुरवर्गाः ॥
दोधकं	ऽ।।ऽ।।ऽ।।ऽऽ	देवसदोध कदम्बतलस्थ श्रीधर तावकनामपदं मे कण्ठतले ऽस्तु विनिर्गम काले स्वल्पमपि क्षण मेष्यतियोगं ॥
मोटनकं	ऽ।।ऽ।।ऽ।।ऽ	रङ्गेखलुमल्लकला कुशल श्चाणू रस्सहातट मोटनकं । यः केलि लवेन चकार स्याम संसार विपं मतिमोटयतु ॥
श्येनी	ऽ।ऽ।ऽ।ऽ।ऽ।ऽ	यस्यकीर्त्तिरिन्दुकुन्दचन्दनप्रभा शेषालोकपावनीसदा । जाह्नवी वविश्ववंद्य विभ्रमा तंभजामि भा वगम्यमच्युतं ॥

छन्दसां वृत्तिनामानि	तेषां मात्राः ऽ गुरु । लघु	तेषामुदाहरणानि
द्वादशाक्षरावृत्तिः जगतीचन्द्रवर्त्म	ऽ।ऽ।।ऽ।।।ऽ	चंद्रवर्त्मपिहितं घनतिमिरैराज वर्त्म रहितं जन गमनैः इष्टवर्त्म तदलंकुरु सरमेकुञ्जवर्त्मनि हरिरुत्तवकुतकी ॥
वंशस्थविलं वंशस्तनितमिति क्वापि	।ऽ।ऽऽ।।ऽ।ऽ।ऽ	विलास वंशस्थविलं मुखानिलैः प्रपूर्य यः पञ्चम राग मुद्गिरन् व्रजाङ्गनानामपि गान शालिनां जहार मानं सहरिः पुनातु वः
इंद्रवंशा वंशस्थविलेन्द्रवंश चरणोभयघटितास्त्रयोदशप्रस्तरीया य त्र व्यतिरिक्त चतुर्दश प्रकारा उपजातयो भवन्ति	ऽऽ।ऽऽ।।ऽ।ऽ।ऽ	दैत्येन्द्रवंशाग्निरुदीर्णदीधितिः पीताम्बरोऽसौ जगतीतमोहरः यस्मिन्मग्नाः शलभा इवस्वयं तेकंसचाणूरमुखा मखद्विषः ॥
जलोद्धतगतिः	।ऽ।।ऽ।ऽ।।।ऽ	यदीयहलतो विलोक्य विपदं कलिन्दतनया जलोद्धतगतिः विलास विपिनं विवेश सहसा करोतु कुशलं हली स जगतां
भुजङ्गप्रयातं	।ऽऽ।ऽऽ।ऽऽ।ऽऽ	सदारात्मजस्त्वाति भृत्योविहाय स्वमेतं ह्रदं जीवनं लिप्समानः मया क्रोधितः कालियेत्यं । कुरुत्वं भुजङ्गप्रयातं कृतं ॥ सागराय ॥ ॥

छन्दसां वृत्तिनामानि	तेषां मात्राः ऽ गुरु । लघु	तेषामुदाहरणानि
तोटकं	।।ऽ।।ऽ।।ऽ।।ऽ	यमुनातटमच्युतकेलिकलालसदङ्घ्रिसरोरुह सङ्गरुचिं मुदितोऽटकले रपनेतुमघंयदि चेच्छसिजन्म । निजं सफलं ॥
स्रग्विनी	ऽ।ऽऽ।ऽऽ।ऽऽ।ऽ	इन्द्रनीलोपलेनेव या निर्मिता शातकुम्भ द्रवालंकृता शोभते । नव्यमेघच्छविः पीतवासा हरेर्मूर्त्तिरास्तां ममैवोरसि स्रग्विनी ॥
वैश्वदेवी	ऽऽऽऽऽऽ।ऽऽऽऽ	अर्च्चा मन्येषां त्वं विहायामराणा मद्वेतेनैकं कृष्ण मभ्यर्च्च भक्त्या तत्राशेषात्मन्यर्च्चिते भाविनी ते भ्रातः सम्पन्नाराधना वैश्वदेवी ॥
प्रमिताक्षरा	।।ऽ।ऽ।।।ऽ।।ऽ	प्रमदस्य शीकरमिवोद्गिरती रदमौक्तिकोत्पुलहरीच्छुरिभा प्रमितांक्षरा मुरविपो भणिति र्व्रजसुभ्रुवामभिजहार मनः ॥
द्रुतविलम्बितं	।।।ऽ।।ऽ।।ऽ।ऽ	तरणिजा पुलिने नवबल्लवी परिषदा सह केलि कुतूहलात् द्रुतविलंबित चारु विहारिणं हरिमहं हृदयेन सदा वहे ॥
मन्दाकिनी	।।।।ऽ।ऽऽ।ऽ	बलिदमनविधौवभौ सङ्गतापद जलरुहि यस्य मन्दाकिनी स्वर निहितसिताम्बुज स्रग्विभा हरतु जगदघं स पीताम्बरः ॥ ॥

छन्दसां वृत्तिनामानि	तेषां मात्राः ऽ गुरु। लघु	तेषामुदाहरणानि
कुसमविचित्रा	।।।ऽऽ।।।ऽऽ	विपिन विहारे कुसुम विचित्रा कुतुकित गोपी सहित चरित्रा। मुररिपु मूर्त्तिर्मुखरित वंशा चिर मवताद्व स्सरल वतंसा
तामरसं	।।।ऽ।ऽ।ऽऽ	स्फुट सुषमा मकरंद मनोज्ञं व्रज ललना नयनालि निपीतं तव मुख तामरस मुरशत्रो हृदय तडाग विकाशिममास्तु ॥
मालती यमुनेति क्वापि	।।।।ऽ।ऽ।ऽ।ऽ	इह कलयाच्युतकेलि कानने मधु रस सौरभ सार लोलुपः कुसुम। कृत स्मित चारुविभ्रमा मलिरपि चुम्बति मालतीं मुहुः ॥
मणिमाला अस्याः षड्भिर्यतिः	ऽऽ।ऽऽऽऽ।। ऽऽ	प्रक्षामर मौलौ रत्नोपल क्लृप्ते जात प्रतिबिम्बा शोणमणिमाला गोविन्द पदाब्जे राजी नखराणा मास्तां मम चित्ते ध्वान्तं शमयन्ती ॥
जलधरमाला अस्याश्चतुर्भिरष्टाभिश्च यतिः। त्रयोदशाक्षरा वृत्तिः अतिजगती।	ऽऽऽऽ।।।।ऽ ऽऽऽ	या भक्तानां कलि दुरितोत्तप्तानां तापोच्छेदे जलधरमाला नव्या भव्याकारा दिनकरपुत्रीकूले केली लोला हरितनु रव्यात् सा वः ॥
प्रहर्षिणी त्रिभिर्दशभिश्च यतिः	ऽऽऽ।।।।ऽ।ऽ।ऽ ऽऽ	गोपीनां मधुर सुधा रसस्य पाने रुद्धुद्धं स्तन कलसोपगूहनेश्च आश्चर्यैरपि रति विभ्रमैर्मुरारेः संसारेमतिरभवत् प्रहर्षिणीह ॥

छन्दसां वृत्तिनामानि	तेषां मात्राः ऽ गुरु। लघु	तेषामुदाहरणानि
रुचिरा चतुर्भिर्नवभिश्च यतिः।	।ऽ।।।।ऽ।ऽ ।ऽ	पुनातु वो हरि रतिराश विभ्रमो परिभ्रमद्व्रजरुचिराङ्गनान्तरो समीरणोल्लसितलतान्तरालगोयथा मरुत्तरल तमाल भूरुहः ॥
मत्तमयूरः चतुर्भिर्नवभिश्च यतिः।	ऽऽऽऽ।।ऽऽ।। ऽऽ	लीला नृत्यन् मत्त मयूर ध्वनि कान्ते नृत्यन्तीपामोदि पयोदानिल रम्ये काम क्रीडाकृष्ट मना गोप वधूभिः कंसध्वंसी निर्जन कुञ्जव नमाप ॥
चण्डी	।।।।।।।।ऽ।। ऽऽ	जयति दितिज रिपु ताण्डव लीला कुपित कवलकर कालिय मौलौ चरण कमल युग चापल चण्डी पद नख रुचि जितभोगि मणि श्रीः ॥
मञ्जुभाषिणी	।।ऽ।ऽ।।।ऽ।ऽ। ऽ	अस्तनोर्म्मि शीतल करेण लालयं स्तनुकान्ति चोरित विलोचना हरे नियतं कलानिधि रस्तोति वल्लवी मुदमञ्जुनेव्यथित मञ्जुभाषिणी शरदम्बररुचश्चन्द्रिकाञ्चालिते दिन कर तनया तीर देशे हरिः ॥
चंद्रिका उत्पलिनीति क्वापि। सप्तभिः षड्भिश्च यतिः।	।।।।।।ऽऽ।ऽऽ ।ऽ	विहरति रसहृद्वल्लवीभिः समं त्रिदिवयुवतिभिः कोपिदेवो यथा यमुना विहार कृतके
कलहंसः सिंहनादः क्वापि	।।ऽ।ऽ।।।ऽ।। ऽऽ	कलहंसोव्रज कामिनी कमलिनी कृतकेलिः जनचित्तहारिकलकण्ठनिनादः प्रमुदं तनोतु नवनंदतनुजः

छन्दसांवृत्ति नामानि	तेषामात्राः ऽगुरुलघु	तेषामुदाहरणानि
प्रबोधिता	।।ऽ।ऽ।।।ऽ	शयिता सखी चटुल माननिद्रयारति केलि कुञ्ज निलय विलासिनी मुर वैरिणा वदन चुम्बनादिना स्मित मातनानसपदि प्रबोधिता
मृगेंद्रमुखं	।।।।ऽ।।ऽ। ऽ।ऽऽ	गुरु भुज वीर्य्य भरं हरिं मदान्धा युधि समुपेत्य न दानवा जिजीवुः क्षधित मृगेंद्रमुखं मृगा उपेत्य क्व नु खलु बिभ्रति जीवनस्य योगं
चतुर्द्दशाक्षरावृत्तिः शार्करी		वीर्य्याग्नौ येन ज्वलति रणरसात्प्रति मैदैत्येंद्रज्ञाता धरणिरिव मसंबाधा धर्म्मस्थित्यर्थं प्रकटित तनु सम्बंधः साधूनां बाधां प्रशमयतु सकंसारिः
असंबाधा पञ्चभिर्नवभिश्च यतिः।	ऽऽऽऽऽ।।।।। ऽऽऽ	फुल्लं वसंततिलकं तिलकं वनाली लीलापरं पिककुलं कलमत्र रौति। वात्येष पुष्प सुरभि र्मलयाद्रि वातो यातो हरिः समधुरो विधिना हताः स्मः ॥
वसन्ततिलकं सिंहोद्धताख्यापि अष्टाभिःषड्भिश्च यतिः।	ऽऽ।ऽ।।।ऽ।। ऽ।ऽऽ	यदनवधिभुजप्रताप कृतास्पदा॥ यदु निचयचमूः परैरपराजिता व्यजयत समरे समस्त रिपु व्रजं स जयति जगतांगति र्गरुडध्व जः ॥
अपराजिता सप्तभिर्यतिः	।।।।।ऽ।ऽ।। ऽ।ऽ	

छन्दसांवृत्तिनामानि	तेषांमात्राः ऽगुरु लघु	तेषामुदाहरणानि
प्रहरणकलिका सप्तभिर्व्वर्णैर्यति	।।।।ऽ।।।।। ऽ	व्यथयति कुसुम प्रहरणकलि का प्रमदवनभवा त्वयनुचितता विरहविपदि मे शरण मिह ततो मधु मथन गुणस्मरणमविरतं ॥
वासन्ती	ऽऽऽऽऽ।।।।ऽऽ ऽऽऽ	भ्राम्यद्भृङ्गीनिर्भरमधुरालापोद्गीतैः श्रीखण्डाद्रेरङ्गतपवनैर्मन्दान्दोला लीला लोला पल्लव विलसद्धस्ता ल्लासैः कंसारातेर्न्नृत्यति सदृशी वासन्तीयं ॥
लोला अस्याःसप्तभि र्यतिः	ऽऽऽ।।ऽऽऽऽ ऽ।ऽऽ	मुग्धे यौवन लक्ष्मीर्व्विद्युद्विभ्रमेला लात्रैलोक्याद्भुतरूपो गोविंदोति दुरापः तद्वृन्दावन कुञ्जे गुञ्जद्भृङ् सनाथे श्रीनाथेन समेता स्वच्छंद कुरु केलिं ॥
नान्दीमुखी अस्याःसप्तभि र्यतिः	।।।।।।ऽऽ।ऽऽ ।ऽऽ	सरस खगकुलालाप नान्दीमुखीयं लहरिभुजलता चारुफेन स्मितश्रीः मुरहरं कलयासत्रि मासाद्य किंते प्रमुदित हृदया भानुजान्त्यतीह
पंचदशाक्षरा वृ त्तिः अतिशार्करी। शशिकला	।।।।।।।।।।।।।।ऽ	मलयज तिलक समुदित शशि कला व्रजयुवति लसदलिक ग गणगता सरसिजनयन हृदय सलिल निधिं व्यतनुत वितत रभस परितरलं ॥

छंदः		छंदः
छंदसां वृत्ति नामानि	तेषांमात्राः ऽ गुरु । लघु	तेषामुदाहरणानि
स्रक् अस्याः षड्भिर्नवभिश्च यतिः।	।।।।।।।।।।।ऽ	अय सहचरि रुचिरतर गुणमयी मृदिम वसति रतपगत परिमला स्रगिवनिवसविलसदनुपमरसा समुरसि मुदित दनुजदलनहृदये
मणिगुणनिकरः अष्टभिःसप्तभिश्चय तिः	।।।।।।।।।।।।।ऽ	नरकरिपु रवतु स निखिला सुगति रमितमहिम भर सहज निवसतिः अनवधि मणिगुणनिकर परिचितः नदिदधिपतिरिव धृततनु विभवः
मालिनी अष्टभिःसप्तभिश्च यतिः	।।।।।ऽऽऽ। ऽऽ।ऽऽ	मृगमद कृतचर्चा पीतकौशेयवासा रुचिरशिखिशिखण्डा बद्धध । म्मिल्लपाशा अनृजुनिहितमंशे र श्मुत् क्वार्णयन्ती धृतमधुरिपुली ला मालिनी पातु राधा ॥
लीलाखेल	ऽऽऽऽऽऽऽऽऽ ऽऽऽऽऽऽऽ	पायाद्वो गोविन्दः कलिन्दी कुल । द्रोणीचक्रे रासोल्लासः क्रीडन्गोपी भिः सार्द्ध लीलाखेलः मन्दाकि न्या स्त्रीरोयात्रे स्वैर क्रीडाभिर्लो । लोयद्वद्देवानामीशः स्वर्वेश्याभिः खेलन्तीभिः ॥
विपिनतिलकं	।।।।।ऽ।।ऽ।ऽऽ ।ऽ	विपिनतिलकंविकसितंवसन्तागमे मधुकृतमदे र्मधुकरै रणद्भिर्वृतं। मलय मरुता रचितलास्य मालो कयन् ब्रजयुवतिभि र्विहरतिस्म मुग्धोहरिः ॥

छंदः		छंदः
छंदसां वृत्तिनामानि	तेषांमात्राः ऽ गुरु लघु	तेषामुदाहरणानि
तूणकं	ऽ।ऽ।ऽ।ऽ।ऽ। ऽ।ऽ।ऽ	सास्तुवर्णकेतकंविकाशिभृङ्गधरि तंपंचवाण वाणजाल शर्णि हेमतूर्ण कं राधिका वितर्क्य माधवाद्य मा सि माधवे मोहमेति निर्भरं त्वया विना कलानिधे ॥
चंद्रलेखा सप्तमेऽष्टमेचयतिः	ऽऽऽऽ।ऽऽऽऽ। ऽऽ।ऽऽ	विच्छेदे ते मुरारे पाण्डु प्रकाशा कृशाङ्गी म्लानच्छायं उल्लंलनभाज ने विभ्रती सा राधांभोदस्य गर्वे लीना यथा चंद्रलेखा किंचान्तीं त्वां स्मरन्ती धत्ते धुरं जीवयोगं ॥
चित्रा	ऽऽऽऽऽऽऽऽऽ ऽ।ऽऽ।ऽऽ	गोपाली लीला लोला यद्वत् क लिन्दात्मजाते खेलंमुक्ताहाराविम्र स्वगलसमर्द्धचित्रा कंसारातेर्मूर्त्ति । स्तद्वन्मेहृदि क्रीडतीयं कोऽन्यः स्व र्गीमोदावास्मादियते तन्नजाने
षोडशाक्षरावृत्तिःअ ष्टिः चित्रं	ऽ।ऽ।ऽ।ऽ। ऽ।ऽ।ऽ।ऽ।	विद्रुमारुणाधरोष्टशोभि वेणु वा द्य हृष्ट बल्लवीजनाङ्ग सङ्ग जात मुग्ध कण्टकाङ्गं त्वां सदैव वासु देव पुण्यलभ्य पादसेव वन्यपु ष्पचित्रकेशसंस्मरामि गोपवेश॥
ऋषभगजविलसि तं गजतुरगविलसि त मितिपर्णभो। स प्तभि र्नवभिश्चय ति ॥	ऽ।।ऽ।ऽ ।।।।।।।ऽ	यो हरिरुच्चथानथ्यरतर नथर धोरैर्जयदैत्यसिंहसुविकट हृद यतटं। किन्निहचित्रमेषयदथि लमपहृतवान कंसनिदेशाद्द य्यहृषत गजविलसितं ॥

छंदः छंदसांवृत्तिनामानि	तेषांमात्राः ऽ गुरु लघु	छंदः तेषामुदाहरणानि
चकिता अस्याअष्टमेयतिः	ऽ।।।।ऽऽऽऽ	दुर्जयदनुजश्रेणी दुश्चेष्टा शत चकितायतजपरिच त्राता याता साध्वस विरामं दीव्यतिदिवि यन्माला स्वच्छं नंदन विपिने गच्छत शरणं कृस्न। भो भीता भवरिपुतः ॥
पञ्चचामरं	।ऽ।ऽ।ऽ।ऽ ।ऽ।ऽ।ऽ।ऽ	सुरद्रु मूल मण्डपे विचित्र रत्ननिर्म्मितेल्लसद्वितान भूषिते सलील वभ्रमालसं सुराङ्गनानवल्लवी कर प्रपंच चामर स्फुरत् समीर वीलितं सदाच्युतंभजामितं ॥
मदनललिता चतर्थेषष्टेचयतिः	ऽऽऽऽ।।।।।ऽ ऽऽ।।।ऽ	विभ्रष्टस्रग्गलितचिकुराधौताधर पुटाम्लायत् पत्रावल्लि कुचतटोच्छासोर्म्मितरला राधात्यर्थं मदनललितान्दोले ऽलसवपुः कंसाराते रतिरभस महो चक्रे ऽतिचटुलं ॥
वाणिनी	।।।।ऽ।ऽ।।। ऽ।ऽ।ऽऽ	स्फुरतममाननेद्यनतुवाणि नीतिरंग तवचरण प्रसाद परिपाकतः कवितं भवजलराशि पारकरण त्तमंमुकुन्दं सतत महं स्तवैः स्तवविनैः स्तवानिनित्यं ॥
प्रवरललितं	।ऽऽऽऽऽ।।। ।।ऽऽ।ऽऽ	तन्जोतत्स्तेमःप्रस्ने चलवलय फंकारयुक्तोमुथा पादन्यासः प्रकटित तलाकोटिनादः स्मितं वक्रे ऽकस्मादृष्टिपटूकटाक्षोर्म्मिलीला हरो जीयादीदृक्प्रवरललितंवल्लवीनां ॥

छंदः छंदसांवृत्ति नामानि	तेषांमात्राः ऽ गुरु लघु	छन्दः तेषामुदाहरणानि
अचलधृतिः	।।।।।।।।।।।।।।।।	तरणि दुहितृतट रुचिरतर वसति रमर मुनिमुख जन विहित धृतिरिह मधुरिपु रभिनव जलधर रुचि तनुरचलधृतिरुदयति सुकृतिष्ठदिखिल भ्रमर मधुरमानसमदे पयोद ध्वनिर्गरुडरुतं सुरारि भुजंगेद्गमंत्रासने धरणि भरावतार विधिडिण्डिमाडम्बरः स जयति कंस रंग भुवि सिंहनादो हरेः
गारुडरुतं	।।।।ऽ।ऽ।।।ऽ ।ऽऽ।ऽ	
सप्तदशाक्षरावृत्तिः अत्यष्टिः		
शिखरिणी षष्टे एकादशेचयतिः	।ऽऽऽऽऽ।।।। ऽऽ।।।ऽ	करादस्य भ्रष्टेन तु शिखरिणी दृष्टनिशिशा विलीनाः स्मः सत्यं नियतमवधेयं तदखिलैः इतिव्रस्य ज्ञो पातुचितनिभृतालापजनितं स्मितं बिभ्राद्देवोजगदवतु गोवर्द्धनधरः
पृथ्वी अष्टमेनवमेचयति	।ऽ।।।ऽ।ऽ। ।।ऽ।ऽऽ।ऽ	दुरन्तदनुजेश्वरप्रकरडःस्थपृथ्वीभरंजहार निजलीलयायदुकुलेवतीर्य्यास्वयः सएष जगतीगति ईवितभारमस्मादृशां हरिष्यति हरिः स्तुतिस्मरणचाटुभि स्तोषितः ॥
वंशपत्रपतितं वंशदलमितिशोभौ वंशपत्रपतिता इतिकेचित् अस्यदशमेसप्तमेचयतिः।	ऽ।।ऽ।ऽ।ऽ। ।।।।।ऽ	तुतनवंशपत्रपतितंरजनिजल्लवं पश्य मुकुंद मौक्तिकमिवोन्नममरं कनगं एषच तं चकोर निकरः प्रपिबति मुदितो वान्तं मवेत्य चंद्रकरोणेरमतकणमिव ॥

छंदसांवृत्ति नामानि	तेषांमात्राः ऽ गुरु लघु	तेषामुदाहरणानि
मंदाक्रान्ता अस्याश्चतुर्थे षष्टे सप्तमेच यतिः ॥ इयंदैत्यवर्णीनोय योगिनीग्रस्ता ।	ऽऽऽऽ।।।।।	प्रेमप्रलापैः प्रियविनरणैः प्रीणिता लिङ्गनाद्यैर्मन्दाक्रान्ता तदनु नियतं वश्यतामेतिबाला पूर्वंशिक्षावच न सधया राधिकायाः सखीनां प्री तः पायात् स्मितसवदनो देवकीनं दनो वः ॥
हरिणी षष्टेचतुर्थे सप्तमेच यतिः	।।।।।ऽऽऽऽऽ ।ऽ।।ऽ।ऽ	व्यथित सविधि नेत्रं नीता ध्रुवं ह रिणी गणाद्वज मृगदृशां संदोह स्योल्लसन्नयन श्रियां । यदयमति प्रा हर्षीश्यामेमुरारि कलेवरे व्यकि रथिकं वक्त्राकांक्षो विलोलवि । लोचनं ॥
मर्द्दटकं	।।।।ऽ।ऽ।।। ऽ।।ऽ।।ऽ	व्रजवनितावसंततितिलकाविलसंमधु पं मधुमथनं प्रणम्रजन वांछित क ल्पतरुं विभ्रमभिनौतिकोपिसहृती मुदितेन हृदा रुचिर पदावली चरि तनर्द्दटकेन कविः ॥
वनकोकिलकं अस्यसप्तमे षष्टे चतुर्थेचयतिः ॥	।।।।ऽ।ऽ।।। ऽ।।ऽ।।ऽ	लसदरुणोत्पलं मधुर भाषण मो दकरं मधुसमयागमे सरस केलि भि रुल्लसितं अलि ललितद्युतिं रविसुता वनकोकिलकं नतुक लयामितं सधिसदा हृदिनंदसु । तं ॥

छंदसांवृत्तिनामानि	तेषांमात्रा ऽ गुरु लघु	तेषामुदाहरणानि
हारिणी अस्याश्चतुर्थे षष्टे सप्तमेच यति	ऽऽऽऽ।।।।।ऽ ऽऽ।ऽऽ।ऽ	यस्यानित्यंप्रकृतिकुवलये श्रीशा लिनी लोचने रागः स्वीयोऽधर किसलयेलाक्षा रसारंजनं गौरी कांतिप्रकृति रुचिरा रम्याङ्गरा ग छटासा कंसारे रजनि नकथं राधामनोहारिणी ॥
भाराक्रान्ता चतुर्थे षष्टे सप्तमे चयतिः ।	ऽऽऽऽ।।।।।ऽ ।ऽ।।ऽ।ऽ	भाराक्रान्ता मम तनु रियं गिरीन्द्र विधारणात् कम्पं धत्तेप्रमजल कणं तथापरिसिंचति इत्याहृत्वन् जपति जलद स्वनाकुल वल्लवी संश्लेषोत्थं स्मरविलसितं विलोक्य
अष्टादशाक्षरावृत्तिः धृतिः ।		गुरुंहरिः क्रीडन् कालिन्दी ललित लहरी वारिभिर्दीप्तिणास्येवीतैः खे
कुसुमितलतावेल्लि ता पंचम षष्टे सप्तमे चयतिः ।	ऽऽऽऽऽ।।।। ऽऽ।ऽऽ।ऽऽ	लद्भिः कुसुमितलतावेल्लितामन्द मन्दं भृङ्गालीगीतैः किसलयक रोल्लासितोल्लासलक्ष्मीं तन्वाना चेतो रभसतरलं चक्रपाणेश्च कार ॥ तरणि सुता तरङ्ग पव नैः सलोलमान्दोलितं मधुरिपु
नन्दनं एकादशे सप्तमेच यतिः ॥	।।।ऽ।ऽ।।। ऽ।ऽ।ऽऽ।ऽ	पादपंकजरजः सुशत पृथ्वीतले मुरहर चित्र चेष्टित कला कला प संस्मारकंदिति तल नंदन व्र जसखे सदाय वृन्दावनं ॥

छंदसां वृत्तिनामानि	तेषां मात्राः ऽ गुरु लघु	तेषामुदाहरणानि
नाराचं	।।।।।।ऽ।ऽऽ	दिनकर तनया तटी कानने वा रुसंचारिणी श्रवण निकट मेणाक्ष्णाक्रूरराधा त्वयि ननु विकिरति नेत्रनाराचमेषामिहच्छेदनं तदिह
चित्रलेखा	ऽऽऽऽ।।।।। ऽ।ऽऽ।ऽऽ	मदनविभ्रमोद्भ्रान्तचित्ताव यत्सह तं शंके ऽस्मिन् जगति मृगाक्षीणां सारस्वरूपं यदासीदाकृष्येदं व्रज युवति सभा वेधसा सा व्यधायि। नैमाद्दृक्चेत् कथ मुदयिसता मल्लरेणाच्युतस्य प्रीतं तस्यान यनयुगमतश्चित्रलेखाङ्गनायां ॥
शार्दूलललितं द्वादशेवरणेनेच यतिः।	ऽऽऽ।।ऽ।ऽ ।।ऽऽऽ।।।ऽ	कृत्वार्कसमस्य परारूम विधिं शार्दूललितं यश्च क्रेदिति भारकारिपुस्य राति ष्ठतिदरं सन्तोषं परमंभदेव निवहे त्रैलोक्य शरणं श्रेयोवः सनेनोत्वपारमहिमा लक्ष्मीप्रियतमः
ऊनविंशत्यक्षराकृतिः अतिधृतिः मेघविस्फूर्जिता षष्ठे षष्ठे सप्तमेच यतिः	।ऽऽऽऽऽ।।।।। ।।ऽऽऽ।।ऽ	कदम्बामोदाढ्या विपिन पवनाः केकिनः कांत केका विनिद्राः करम्बोद्दिपि मुदा ददुराद्मनादाः निशान्तस्यद्वियुद्विलसितलसान्मे च विस्फूर्जिता श्रेन प्रियः स्वाधीनोसौ दनुज दलना राज्य मस्मात् किमन्यत् ॥

छंदसां वृत्तिनामानि	तेषां मात्राः ऽ गुरु लघु	तेषामुदाहरणानि
छाया षष्ठे द्वादशोष्टमेच यतिः।	।ऽऽऽऽऽ।।।।।	अभीष्टं जुष्टो वो वितरतिलसद्दोस्सारु शाखोज्वलः स्फुरन्नानारत्नस्तवकित ननु स्निग्धांशुकलसितः नयस्यां चिच्छाया मुपगतवतां संसारतीव्रातप स्तनोति प्रोत्तापं सजगद्वनात् कंसारि कल्पद्रुमः॥
शार्दूलविक्रीडितं द्वादशऊनविंशती	ऽऽऽ।।ऽ।ऽ ।।ऽऽऽ।ऽऽ ।ऽ	गोविन्दं प्रणमोत्तमाङ्ग रसने तं घोषयाहर्निशं पाणी शृणयतं मनः स्मरपदे तस्यालयं गच्छतं एवं चेत् कुरुथाखिलं ममहितं शीर्षादयस्तत्ध्रुवं नभेदो भवतां कृतेभवमहा शार्दूलविक्रीडितं ॥
सुरसा सप्तमेचतुर्दशेष्टमे चयतिः।	ऽऽऽऽऽ।ऽऽ ।।।।।।ऽऽ।।।ऽ	कामक्रीडासतृष्णोमधुसमयसमारंभरभसात्र कालिन्दीकूलकुञ्जे विहरणकुतकाकृष्टहृदयः गोविन्दो वल्लवीनामधररस सुधां प्राप्य सुरसां शंकेपीयूष पान प्रभव कृतसुखं व्यस्मरदसौ ॥
फुल्लदाम पंचमेद्वादशेष्टमे चयतिः।	ऽऽऽऽऽ । ।।।।।ऽऽ।ऽ ऽ।ऽऽ	शम्भल्लोकान्तप्रकटितकदनं धूस्तमालोकाकं संहृष्यत्रैतो भिस्त्रिदिववसतिति व्योम संस्थे विमुक्तं। सुगन्धामोदेन स्थगित दशदिगाभोगमाकृत भृङ्गं मौलौ दैत्यारेर्प्यपतत्दनुपमं स्वस्तरोः फुल्लदाम ॥

छंदसांवृत्तिनामानि	तेषांमात्राः ऽगुरु ।लघु	तेषामुदाहरणानि
विंशत्यक्षरावृत्तिः कृतिः		
सुवदना सप्तमे चतुर्दशे विंशतौ यतिः	ऽऽऽऽ।ऽऽ ।।।।।।ऽऽऽ।।। ऽ	प्रत्याहृत्येंद्रियाणि त्वदितरविषयां मासाद्य नयना त्वां ध्यायन्ती निकुंज परमतर रुचं हर्षोत्थ पुलका । आनंदाश्रु स्रुताक्षी वसति सुव दना योगैकरसिका कामार्त्ति त्य क्तकामा ननु नरकरिपो राधा मम सखी ॥
गीतिका	।।ऽ।ऽ।।ऽ। ऽ।।ऽ।ऽ।। ऽ।ऽ	करताल चंचल कं कण स्वन मिश्रणेन मनोरमा रमणीय वेणु निनाद रङ्गिमसङ्ग मेन सुखावहा वल्लवानुराग नि वास रास समुद्भवा भव रागिणां विदधौ हरिं खलु वल्लवी जन वा रु चामर गीतिका ॥
वृत्तं	ऽ।ऽ।ऽ।ऽ ।ऽ।ऽ।ऽ ।ऽ।ऽ।ऽ।	चित्र वृत्त लीलया निसर्ग रम्य दे ह रूपविभ्रमेण राजमान सहयोवि लाससंपदा कला कुतूहलेन यः स मंजुजाड्गनाजनैः सुराङ्गनानिसेस्तु खंसमेत्य विस्फुरल्लासविभ्रम कोषषट्पदः समे सदास्तु ॥
शोभा षष्ठे त्रयोदशे अन्ते च यतिः	।ऽऽऽऽऽ ।।।।।ऽऽ। ऽऽ।ऽऽ	सपीयूषोन्मीलत् सरसिजमुखाला मधुनम्रा फलाभ्यां नतो रूढं रा जत्तरलकिशलयाश्लिष्ट सुस्निग्धशा खा लसन्मुक्तारकोत्पल कुवलयवक्ष इविसंवाविश्वा महा शोभा मौलौमिल दलियदलैः कस्य साकापि वल्ली ॥

छन्दसांवृत्तिनाम्नानि	तेषांमात्राः ऽगुरु ।लघु	तेषामुदाहरणानि
एकविंशत्यक्षरावृत्तिः प्रकृतिः सप्तमे चतुर्दशे एकविंशतौ च यतिः	ऽऽऽऽ।ऽऽ ।।।।।।ऽऽ।ऽऽ ।ऽऽ	आकोषेंदीवराभा कनककषलसत् पीनवासाः सुहासा बर्हैरुच्चन्द्रकान्तै र्वेल्लयित विकुरा चारु कर्णावतंसा श्रेसव्यासक्त वंशध्वनि सुथितजग द्वल्लवीभिर्लसन्ती मूर्त्तिर्गोपस्य विष्णो रवतु जगन्ति वः स्रग्धरा हारिहारा ॥
सरसी सिंहकमिति क्वापि	।।।।ऽ।ऽ।।। ऽ।।ऽ।।ऽ। ऽ।ऽ	चिकुरकलापशैवलकृतप्रमदासल सद्दसोर्मिषु स्फुटवदनाम्बुजा सुवि लसद्भुजवालमृणालवल्लिषु कुच युगचक्रवाक मिथुनानुगता सुकाला कुतूहलीश्वरचषट्च्युतो व्रजमृगी नयना सरसीषु विभ्रमं ॥
द्वाविंशत्यक्षरावृत्तिः आकृतिः ।		
हंसी अष्टमे द्वाविंशतौ च यतिः ।	ऽऽऽऽऽऽऽऽ ।।।।।।।।।।।।ऽऽ	सांद्रं कान्तेनैकान्तेऽसौ विकच कम ल मधु सुरभि पिबन्तीकामक्रीडा कृतस्फीतप्रमदसभर मलघु रसन्ती कालिन्दीये पद्मारण्ये पवन पतन प रि तरल परागे कंसाराते पश्यस्वे च्छं स रभस गति रिह विलसति । हंसी ॥
मदिरा	ऽ।।ऽ।।ऽ।। ऽ।।ऽ।।ऽ ।।ऽ।।ऽ	माधवमासिविकस्वरकेशरपुष्पलस न्मदिरा मुदितै भृङ्गकुलै रुपगीतव ने वनमालिनि मालि कला निलयं कुंजगृहोदर पल्लवकल्पित तल्पमन ल्पमनोज रसं त्व भज माधविका मरु न्नर्तकयामनुवात कृतोपगमा ॥

छंदसांवृत्तिनामानि	तेषांमात्राः ऽगुरु लघु	तेषामुदाहरणानि
त्रयोविंशत्यक्षरावृत्ति विकृतिः अद्रितनया अश्वललितमित्य न्यत्र ।	।।।।ऽ।ऽ।।। ऽ।ऽ।।।ऽ। ऽ।।।ऽ	खरतर शौर्यपावक शिखा पत ङ्ग निभ मग्न दृप्त दनुजो जलधिसु ता विलास वसतिः सतांपतिरशेष मान्य महिमा भुवनहितावतारचतु रश्चराचरधरोऽवतीर्ण इह हि क्षितिव लयेऽस्ति कंस शमन स्तवेति नमदेव दद्रितनया ॥
मत्ताक्रीडं अष्टमेत्रयोदशे त्रयोविंशतौच यतिः ।	ऽऽऽऽऽऽऽऽ ।।।।।।।।।।।।।।ऽ	मुग्धोन्मीलन्मत्ताक्रीडं मधुसमयसु लभ मधुरं मधुरसान् गाने याने किंचित् स्पन्दत् पद मरुण नयन युगल सरसिजे रासोल्लास क्रीडत् कम्र व्रजयुवतिवलय रचित भ्रम र सं सान्द्रानंद वृन्दारण्ये स्मरत हरि मनघ चरणपरिचयं ॥
चतुर्विंशत्यक्षरावृत्तिः संकृतिः । तन्वी पंचमेद्वादशेचतु र्विंशतौच यतिः ।	ऽ।ऽऽ।।।।। ऽऽ।ऽ।।।।।। ऽऽ	माधवमुग्धैर्मधुकरविरुतैः कोकि लकूजित मलय समीरैः कम्पमु पेतामलयज सलिलैः प्लावनतो प्यधिगत ननु दाहा पद्म पलाशै र्विरचित शयने देहज संज्वर भ रं परिहृते निःश्वसती सा सुल्ह रति यदुपं ध्यान लये तव निव सतितन्वी ॥

छंदसांवृत्तिनामानि	तेषांमात्राः ऽगुरु लघु	तेषामुदाहरणानि
पंचविंशत्यक्षरावृत्तिः अतिकृतिः । क्रौंचपदा पंचमेदशमेअष्टाद शे पंचविंशतौ चयतिः	ऽ।।ऽऽऽ।। ऽऽ।।।।।।।।। ।।।।ऽ	क्रौंचपदाली चित्रिततीरामद कलखगकुलकलकलरुचिराफु ल्लसरोजश्रेणि विलासा मधु मुदि त मधुपरवरमस करी फेनविला स मौज्ज्वलहासा ललित लहरि भर पुलकित सतनुः पश्यप्रहरेः सैकतसानचेतो हरतिनरलगति रहिमकिरणजा ॥
षड्विंशत्यक्षरावृत्तिः उत्कृतिः । भुजङ्ग विजृम्भितं अष्टमेऽनविंशतौ षड्विंशतौ च यतिः	ऽऽऽऽऽऽऽऽ ।।।।।।।।।।।।।ऽ।ऽ ।।ऽ।ऽ	हेलोदंचद्वंचन पाद प्रकट वि कटनटनभरोरणत् करताल क स्फारमेंखचूडा बर्हः स्फतित रलनव किसलयस्तरंगितहारप्र कृ त्रस्यन्नागस्त्रीभिर्भक्त्या मुकु लित कर कमल युगं कृतस्त तिरच्युतः पायाद्वस्छिन्दन् का लिंदीह्रद कृत निज वसति वृह द्भुजङ्ग विजृम्भितं ॥
अर्णदण्डकाः सप्तविंशत्यक्षरावृत्तिः चण्डवृष्टिप्रपातः	।।।।।।ऽ।ऽऽ ।ऽऽ।ऽऽ। ऽऽ।ऽऽ।ऽ ऽ।ऽ	प्रलय घन घटा महारंभ मेघाव लीचण्डवृष्टिप्रपाताकुले गोकुले सपदिसमवलोक्य सव्येन हस्तेन गोवर्द्धनंनाम शैलं दधल्लील या कमलनयन रक्ष रक्षेति गर्जत्समन्तुष्टगोपाङ्गनालिङ्ग ना नंदितो गलदतिनव धारा धारा विचित्राङ्गः रागोसुरारा ति रत्नप्रमोदाय वः ॥

छन्दसां वृत्ति नामानि	तेषां मात्राः ऽ गुरु । लघु	तेषामुदाहरणानि
त्रिंशदक्षरावृत्तिः । अर्णः	।।।।।।ऽ।ऽऽ ।ऽऽ।ऽऽ। ऽऽ।ऽऽ ऽऽ।ऽऽ। ऽ	जय जय जगदीश विष्णो हरे रा। म दामोदर श्रीनिवासाच्युतानन्तना रायण त्रिदशगणगुरो मुरारे मुकुं दासुरारे हृषीकेश पीतांबर श्री पते माधव । गरुडगमन कृष्ण वै कुण्ठ गोविंद विश्वंभरोपेंद्र च क्रायुधाधोक्षज श्रीनिधे बलिदमन नृसिंह शौरे भवांभोधि घोरार्णसि त्वं निमज्जंत मभ्युद्धरोपेत्य मां ॥
त्रयस्त्रिंशदक्षरावृत्तिः। अर्णवः	।।।।।।ऽ।ऽऽ ।ऽऽ।ऽऽ। ऽऽ।ऽऽ। ऽऽ।ऽऽ। ऽऽ।ऽ	
षट्त्रिंशदक्षरावृत्तिः व्यालः	।।।।।।ऽ।ऽऽ। ऽऽ।ऽऽ। ऽऽ।ऽऽ। ऽऽ। ऽऽ। ऽऽ।ऽऽ। ऽ	एवमर्णवादीनामप्युदाहरणानि बोद्ध व्यानि ॥
ऊनचत्वारिंशदक्षरा वृत्तिः। जीमूतः	।।।।।।ऽ।ऽऽ ।ऽऽ।ऽऽ।ऽ ऽ।ऽऽ।ऽऽ ।ऽऽ।ऽऽ ।ऽऽ।ऽऽ।ऽ	

छंदसां वृत्तिनामानि	तेषां मात्राः ऽ गुरु लघु	तेषामुदाहरणानि
द्वाचत्वारिंशदक्षरा वृत्तिः । लीलाकरः	।।।।।।ऽ।ऽऽ ।ऽऽ।ऽऽ।ऽ ऽ।ऽऽ।ऽऽ ।ऽऽ।ऽऽ।ऽ ऽ।ऽऽ।ऽऽ ।ऽ	
पञ्चचत्वारिंशदक्षरा वृत्तिः ॥ उद्दामः	।।।।।।ऽ।ऽऽ ।ऽऽ।ऽऽ। ऽऽ।ऽऽ। ऽऽ। ऽऽ। ऽऽ। ऽऽ।ऽ	एवमर्णवादीनामप्युदाहरणानि बोद्धव्यानि ॥
अष्टचत्वारिंशदक्ष रावृत्तिः । शंखः इत्यादयः	।।।।।।ऽ।ऽऽ ।ऽऽ।ऽऽ। ऽऽ। ऽऽ। ऽऽ। ऽऽ। ऽऽ।ऽऽ। ऽऽ।ऽऽ। ऽऽ।ऽऽ।ऽ	

छंदसांवृत्तिनामानि	तेषांमात्राः ऽगुरु लघु	तेषामुदाहरणानि
सप्तविंशत्यक्षरावृत्तिः प्रचितकः	।।।।।।ऽऽ।ऽ ऽ।ऽऽ।ऽऽ ।ऽऽ।ऽऽ। ऽऽ	मुरहर यदुकुलांभोधिचंद्र प्रभोदे वकी गर्भ रत्न त्रिलोकैक नाथ प्रचितकपट मुरारिव्रजोद्दाम दंता वलंतोम विद्रावेणकेशरींद्र चरण नखर सुधांशु छटोस्मेष निःशेषि तध्वापि चेतो निविष्टांधकारश्रण तजनपरितापोग्र दावानलो छेद मेघप्रसीद प्रसी प्रसीद ॥
अष्टविंशत्यक्षरावृत्तिः अशोकपुष्पमंजरी	ऽ।ऽ।ऽ। ऽ।ऽ।ऽ। ऽ।ऽ।ऽ। ऽ।ऽ।ऽ। ऽ।ऽ	स्फुर्द्विचारुचम्पकस्रजा सलील वेष्ट ने लसल्लवङ्ग चारुचंद्रिका कचेषु कर्णयोरशोक पुष्पमंजरीवतंसको गलेति कान्तकेशरोपल्लमदाम फुल्लनाग केशरादि पुष्परेण रूव रंग तनौ विचित्रमित्यपात्तवेश एष के शवः पुनातुवः सपुष्प भूषितः स मूर्त्तिमानिवागतो मधुर्विहर्त्तुमत्र ॥
सप्तविंशत्यक्षरावृत्तिः कुसुमस्तवकं	॥ऽ॥ऽ॥ऽ ॥ऽ॥ऽ॥ऽ ॥ऽ॥ऽ॥ऽ	विरराज्ञ वदीयकरः कनकद्युतिवस्त्र रवामहृषाः कुचकुडलगो भ्रमरप्रक रेण यथाहत मूर्त्ति रशोकलता वि लसत् कुसुमस्तवकः स नवीन तमालदलप्रतिमच्छवि विभ्रदती वधिलोचनहारि वपुश्चपला रु चिरांशुक वल्लि धरोत्तरिरत्नम दीय हृदस्तुजमध्यगतः ॥

छंदसांवृत्ति नामानि	तेषांमात्राः ऽ गुरु लघु	तेषामुदाहरणानि
सप्तविंशत्यक्षरावृत्तिः मत्तमातङ्गलीलाकरः	ऽ।ऽऽ।ऽऽ ।ऽऽ।ऽऽ। ऽऽ।ऽऽ।ऽ ऽ।ऽऽ।ऽ	हेमगौरंवसानोऽम्बकंशकनीला सितेवर्ष्मणि स्पष्टदिव्यानुलेपांकि तो हार तारांशु वक्षो नभ श्चित्रमा लांचितो भव्य भूषोज्ज्वलाङ्गः समं सीरिणा अञ्जनाभास्वरेणेन्दु कुंदा वदातेन देहेन लीला परीहासहा सोर्म्मिकौतूहलैः कंसरंगाद्विपः पातु व श्चक्रपाणि र्प्रतिक्रीडया मत्तमातङ्गलीलाकरः ॥
अष्टविंशत्यक्षरावृत्तिः अनङ्गशेखरः	।ऽ।ऽ।ऽ। ऽ।ऽ।ऽ। ऽ।ऽ।ऽ। ऽ।ऽ।ऽ। ऽ।ऽ	उदेत्यसौ सुधाकरः पुरो विलोक यात्य प्रथिके विजृंभमाण गौर दी धिती रति स्वहस्त निर्मितः कला कुतूहलेन चारुचम्पकैरनङ्गशेखरः किमु । इति प्रमोद कारिणी प्रिया प्रमोद लक्षणं गिरे समुच्चिरन् मुरा रिरद्भुतां प्रदोषकाल संगमोल्लसन्म नो मनोज केलि कौतुकी करोतु वः कृतार्थतां ॥
इति समवृत्तानि समाप्तानि ॥		
अथार्द्धसमवृत्तानि उपचित्रः ॥ वृत्तिः		मुरवैरि वपुस्तनुतां मुदं हेम नि भां शुक चंदन लिप्तं । गगणे चपला मिलितं यथा शारद नी रधरै रुपचित्रं ॥
प्रथमपादे तृतीय पादे च	॥ऽ॥ऽ॥ऽ ।ऽ	
द्वितीय पादे चतु र्थ पादे च ।	ऽ॥ऽ॥ऽ ॥ऽऽ	

छंदसांवृत्तिनामानि	तेषांमात्राः ऽगुरु।लघु	तेषामुदाहरणानि
वेगवती ९।११ वृत्तिः		
प्रथमपादे तृतीय पादेच	॥ऽ॥ऽ॥ ऽऽ	स्मर वेगवती व्रजरामा केशव वंशरवैरतिमुग्धा रभसान्नगुरुन् गणयन्तीकेलि निकुञ्जगृहायज गाम ॥
द्वितीयपादेचतुर्थ पादेच	ऽ॥ऽ॥ऽ॥ ऽऽ	
हरिणप्लुता ११।१२वृत्तिः		
प्रथमपादे तृतीय पादेच	॥ऽ॥ऽ॥ ऽ।ऽ	स्फुट फेन चया हरिण प्लुता वलि मनोज्ञतटा तरणेः सुता कलहं स कुला रव शालिनी विहरता हरति स्महरेर्म्मनः ॥
द्वितीयपादेचतुर्थ पादेच	।॥ऽ॥ऽ॥ ऽ।ऽ।	
अपरवक्त्रं ११।१२वृत्तिः		
प्रथमेतृतीयेच पादे	।॥॥ऽ।ऽ।ऽ	स्फुट समधुर वेणु गीतिभि स्तम परवक्त्र मवेत्य माधवं मृगयुवतिग णैः समं स्थिता व्रजवनिता धृत चित्तविभ्रमा ॥
द्वितीये चतुर्थेचपादे	।॥ऽ॥ऽ। ऽ।ऽ	
पुष्पिताग्रा १२।१३ वृत्तिः		
प्रथम पादे तृतीय पादेच	।॥॥ऽ।ऽ। ऽऽ	कर किसलय शोभया विभान्ती कु च फल भार विनम्र देह यष्टिः स्मि तरुचिर विलास पुष्पिताग्रा व्रजयु वति ब्रतती हरेर्मुदे ऽभूत् ॥
द्वितीयपादेचतुर्थ पादेच	।॥ऽ॥ऽ। ऽ।ऽऽ	
सुंदरी ९।११ वृत्तिः		
प्रथमेतृतीये पादेच	॥ऽ॥ऽ।ऽ ।ऽ	पदवोचदवेत्य सुंदरी पतिः स्ने ह मयेन चक्षुषा। अपि कंस हरस्य दुर्व्वचं वचनन्नहि दर्थीत विस्मये ॥
द्वितीये चतुर्थेपादे च	॥ऽऽ॥ऽ। ऽ।ऽ	
इत्यर्द्धसम वृत्तानि समाप्तानि ॥		

छंदसांवृत्तिनामानि		तेषांमात्राः ऽ गुरु।लघु	तेषामुदाहरणानि
अथविषमवृत्तानि			
उद्गता		॥ऽ।ऽ।॥ऽ।	विलसन्नास गोप रमणीषु तरणि त नयाप्रभोद्गता कृष्ण नयन चकोर यु गेदयती सुधांशुकिरणोर्म्मि विभ्रमं अथवासवस्यवचनेनरुचिरवदन स्त्रिलोचनमित्यादिभारवावुद्गताभे दः ॥
प्रथमेपादे	१०	।॥॥ऽ।ऽ।ऽ	
द्वितीये	१०	ऽ।॥।ऽ॥ऽ	
तृतीये	९	॥ऽ।ऽ।॥ऽ	
चतुर्थे	१३	।ऽ।ऽ	
सौरभकं		॥ऽ।ऽ।॥ऽ।	परिभूतफुल्लशतपत्रवनविसृत ग न्धविभ्रमा। कस्य हृन्नहरतीह रुरे मुखपद्मसौरभकला नवाद्भुता ॥
प्रथमेपादे	१०	।॥॥ऽ।ऽ।ऽ	
द्वितीये	१०	ऽ।ऽ।॥ऽ॥	
तृतीये	९	॥ऽ।ऽ।॥ ऽ	
चतुर्थे	१३	।ऽ।ऽ	
ललितं			
प्रथमेपादे	१०	॥ऽ।ऽ।॥ऽ।	व्रजसुंदरी समुदायेन मुदित म नसास्म पीयते हिमकर गलित मिवा मृतकं ललितं मुरारि मु खचंद्र विच्युतं ॥
द्वितीये	१०	।॥॥ऽ।ऽ।ऽ	
तृतीये	१२	।॥॥॥ऽ॥ऽ	
चतुर्थे	१३	॥ऽ।ऽ।॥ ऽ ।ऽ।ऽ	
वक्त्रं			
प्रथमेपादे	८	ऽऽऽऽ।ऽ ऽऽ	वक्त्रांभोजंसदास्मेरं चक्रन्नीलोत् पलं फुल्लं। वल्लवीनां मुरारातेः स्मेनो भृङ्ग जहारोभ्वेः ॥ ॥
द्वितीये	८	ऽऽऽऽ।ऽ ऽऽ	
तृतीये	८	ऽ।ऽऽ।ऽ ऽऽ	
चतुर्थे	८	ऽऽऽऽ।ऽ ऽऽ	

छंदसांवृत्ति नामानि	तेषांमात्राः ऽ गुरुलघु		तेषामुदाहरणानि
पथ्यावक्रं			
प्रथमेपादे	८	ऽ।ऽ।।ऽऽ।	राम केलि सत्स्लस्य कुस्लस्य
द्वितीय	८	ऽऽ।।।ऽ।ऽ	मधुवासरे आसीत्रोप स्मातीणं
तृतीय	८	ऽऽऽ।।ऽऽऽ	पथ्यावक्रं मधु स्तुतिः ॥
चतुर्थे	८	ऽऽऽ।।ऽ। ऽ	
अनुष्टुप्			
प्रथमेचरणे	८	ऽ।ऽ।।ऽऽ।	पंचमं लघु सर्वत्र सप्तमं द्वि
द्वितीये	८	ऽ।ऽ।।ऽ।ऽ	चतुर्थयोः। गुरु षष्टंत्न पादा
तृतीये	८	।।ऽऽ।ऽऽऽ	नांशेषेषुनियमोमतः ॥
चतुर्थे	८	ऽऽ।।।ऽ।ऽ	

इतिविषमवृत्तानि समाप्तानि ॥
अथमात्रावृत्तानि
आर्य्याअर्य्यान्तगाथा

प्रथमेपादे	१२	ऽऽ।ऽ।ऽऽ	कृत्स्नः शिशुः स्ततोमेवत्सव क्रलदा
द्वितीये	१८	ऽ।।।।ऽ।ऽ। ऽ।।ऽ	भिराहृतो नगृहे तृणमपिवत्सत्यसा
			वितिजगाद गोष्टां यशोदार्य्या ॥
तृतीये	१२	।।।।ऽ।ऽ।।	
चतुर्थे	१५	।ऽ।ऽऽ।ऽ ऽऽ	
प्रकारांतरो यथा			
प्रथमेपादे	१२	ऽऽ।ऽ।ऽऽ	वृंदावने सलीलं वल्लाडम काएु
द्वितीये	१८	ऽऽ।ऽ।।।।।।	निद्दित ननु यशिः स्मेर मुखार्पि
तृतीये	१२	ऽ।।ऽ।।ऽऽ	तंवएः कृत्स्नोयदिमनसिकः स्वर्गः
चतुर्थे	१५	ऽऽ।।।।ऽऽऽ	

1013

छंदसांवृत्तिनामानि	तेषांमात्राः ऽ गुरुलघु		तेषामुदाहरणानि
नवधा आर्य्यायथा			
पथ्या			
प्रथमेपादे	१२	।।।ऽ।।ऽऽ	जयजयनाथमुरारेकेशवकंसांतका
द्वितीये	१८	ऽ।।ऽऽ।ऽ।	च्युतानन्त करुकरुणामितिविन
तृतीये	१२	।।।ऽ।।।ऽ	तिः पथ्या भव रोगदुःस्थानां ॥
चतुर्थे	१५	ऽऽ।।ऽ।ऽ ऽऽ	अत्र द्वितीय पादान्त लघो गुरुत्वे
			पूर्व परार्द्धयो द्वादश मात्रायां।
			यतिः
विपुला			
प्रथमेपादे	१८	ऽऽ।।ऽऽऽ	पुंसांकलिकाल व्याल हतानां
द्वितीये	१२	।।ऽऽ	नास्त्युपहृति रल्पापि वीर्य्य विपु
तृतीये	१४	ऽ।।।ऽऽऽ	ला मुखेचेत् स्याद्गोविंदाख्यमस्त्र
		ऽ।।ऽ।ऽऽ ऽ	कला अत्र द्वितीय चरणान्त लघो
चतुर्थे	१३	ऽऽऽ।ऽ।।ऽ	गुरुत्वे पूर्व परार्द्धयो द्वादश मात्रा
			संलंघ्य यतिः ॥
चपला			
प्रथमेपादे	१२	।।ऽ।ऽ।ऽऽ	चपलान चेत् कदाचिद्रमणं भवेद्भ
द्वितीये	१८	।ऽ।ऽऽ।ऽ। ऽऽऽ	क्तिभावना कृत्से धर्म्मार्थ काम मो
तृतीये	१२	ऽऽ।ऽ।ऽऽ	क्षास्तदा करस्था न संदेहः ॥
चतुर्थे	१५	।ऽ।ऽऽ।ऽ ऽऽ	
मुखचपला			
प्रथमेपादे	१२	ऽ।।।ऽ।ऽऽ	नंदसुत वत्सकस्त्वं दृष्टुं न ते प्रेम
द्वितीये	१८	।ऽ।ऽ।।ऽ। ऽऽऽ	गच्छ तत्रैव यत्र भवति ते रागः
तृतीये	१२	ऽ।।।ऽऽऽ	कापिजगादेतिमुखचपला ॥
चतुर्थे	१५	ऽ।ऽऽ।।।। ऽ	अत्रद्वितीयपदान्तलघोर्गुरुत्वं ॥

छंदसांवृत्तिनामानि		तेषांमात्राः ऽ गुरु । लघु	तेषामुदाहरणानि
जघनचपला			
प्रथमेचरणे	१२	ऽऽऽऽ।।ऽ	कृस्नः शृंगारपटु यौवन मद चञ्चलः
द्वितीये	१८	ऽ।।।ऽ।ऽ।।। ऽऽ	सल्ललिताङ्गः आसीद्व्रजाङ्गनानां
तृतीये	१२	ऽऽ।ऽ।ऽऽ	मनोहरो जघनचपलानां ॥
चतुर्थे	१५	।ऽ।ऽऽ।ऽ। ऽऽऽ	
गीतिः			
प्रथमेचरणे	१२	ऽ।।ऽऽ।।ऽ	केशव वंशध्वनि गीति र्लोक मनो
द्वितीये	१८	ऽ।।ऽ।।ऽऽ	हरा हरिणीजयति गोपीमान ग्र
तृतीये	१२	ऽऽऽऽऽऽ	न्थिविमोचनी दिव्यगायनार्य्या
चतुर्थे	१८	।ऽ।ऽऽ।ऽ। ऽऽऽ	अत्रद्वितीयचरणांत लघो र्गुरुत्वं
उपगीतिः			
प्रथमेचरणे	१२	।ऽ।ऽ।ऽऽ	नव गोप सुंदरीणां रासोल्लासे ॥
द्वितीये	१५	ऽऽऽऽऽ।ऽऽऽ	मुरारातिं । असारयदुपगीति स्वर्ग
तृतीये	१२	ऽऽ।।।।ऽऽ	कुरङ्गी दृशां गीतिं ॥
चतुर्थे	१५	ऽ।।ऽऽ।ऽऽ ऽ	
उद्गीतिः			
प्रथमेचरणे	१२	ऽऽ।ऽ।ऽ।।	नारायणस्य सन्तत मुद्गीतिः सस्म
द्वितीये	१५	ऽऽऽऽ।ऽऽऽ	तिर्भक्त्या । अर्च्चया मासक्ति तु
तृतीये	१२	ऽऽऽऽऽऽ	त्तरं संसार सागरे तरणिः ॥
चतुर्थे	१८	ऽ।।ऽऽ।ऽ ।ऽ।।ऽ	

1015

छंदसांवृत्तिनामानि		तेषांमात्राः ऽ गुरु । लघु	तेषामुदाहरणानि
आर्य्यागीतिः			
प्रथमेचरणे	१२	ऽऽऽ।।।।ऽ	सर्वाङ्गस्तिमितदृशः प्रमोद रोमा
द्वितीये	२०	।ऽ।ऽऽ।ऽ ।ऽ।।ऽऽ	ञ्चकञ्चुकाञ्चित देहाः आर्य्यागी
तृतीये	१२	ऽऽऽऽऽऽ	तिं भक्ता गायन्ति श्रीपते रविरत
चतुर्थे	२०	ऽऽऽऽ।ऽ।।। ऽ।ऽ	संवहाः अत्र चतुर्थ पादान्त गुरो । लघुत्वं ॥

पृथ्वीर्द्दे विंशत्यात्रुतर्वि शन्त्यावामात्राणांपरार्द्धे षोडशमात्राणांपरेलघु वर्णचतुष्टयेसतिप्रथमं द्वितीयंवा लघ्वक्षरं या स्यआर्य्यायाः मामासेनय ति नियमः ॥

लघु गुरु विपर्य्यय रूप प्रस्तारभे देनबहुविधा आर्य्या भवन्ति ॥

छंदसांवृत्तिनामानि		तेषांमात्राः	तेषामुदाहरणानि
वैतालीयं अपरवक्त्र मित्येके ।			
प्रथमेचरणे	१४	।।ऽ।।ऽ।ऽ	मसृणेन मदेनचर्च्चितं तव यत्रिंदति
द्वितीये	१६	।ऽ ।।ऽऽ।।ऽ।ऽ	राधिके कुचं मुद मातनुते ऽत्र
तृतीये	१४	।ऽ ।।ऽ।।ऽ।ऽ	पक्षिम तद्वैतालीयं फलं हरेः ॥
चतुर्थे	१६	।ऽ ऽऽऽऽऽ।ऽ ऽ	लघु गुरु व्यत्ययेनापि बहुधा भवति ॥
औपच्छंदसकं			
प्रथमेचरणे	१६	ऽऽऽऽ।ऽऽ ऽ	आनन्दानं मुरारि कान्ता सौपच्छंद
द्वितीये	१८	ऽऽऽ।।ऽ।ऽ ऽ	सकं हृदा विनोदं कंसं योनिर्ज
तृतीये	१६	ऽऽऽऽ।ऽ।ऽ	घान देवो वंदे तं जगतां स्थितिं दधा
चतुर्थे	१८	ऽऽऽ।।ऽ।ऽ ।ऽऽ	नं ॥

एतद्वैतालीयभेदः ॥

छंदसांहृत्तिनामानि	तेषांमात्राः ऽगुरु लघु	तेषामुदाहरणानि
पज्झटिका		
प्रथमेचरणे	१६ ।।।।ऽऽऽऽऽऽ	तरलवतंसाश्लिष्टस्कंधश्चलतरपज्झ टिकाकटिबंधः। मौलिचपल शिखि चंद्रक हृन्दः कालिय शिर नर्त्तन मु कुंदः इयं प्रतिपद यमकित षो डशमात्रा लघु गुरु व्यत्ययेनापि बल्हृधा अस्या नवमी मात्राच कदाचित् लघ्वी भवति ॥
द्वितीये	१६ ।।।।ऽ।।ऽ।।	
तृतीये	१६ ऽ।।।।।ऽ।।	
चतुर्थे	१६ ऽ।।।।।ऽ।ऽ ऽऽ ऽ	
दोहडिका		
प्रथमेचरणे	१३ ऽऽऽ।।।।।।।	राई दोहडि पढण सुणिण हासिउ कान्ह गोआल वृंदावणचण कुंज चलिउ कमल रसाल अस्यार्थः हेमातः दोहडिका पाठं श्रुत्वा कृ ष्णो गोपालो हसित्वा कमपि र सालं चलितः कुत्र वृंदावनवनकुञ्जे वृंदावनस्य निविड निकुंजे। माई इति क्वचित् पाठः तन्मतेनराधिका यादोहडिकापाठंश्रुत्वा ॥ गुरुलघु व्यत्ययेन बल्हृधा भवति ॥
द्वितीये	१३ ऽ।ऽऽ।ऽऽ	
तृतीये	११ ऽऽ।।।।ऽ।	
चतुर्थे	११ ।।ऽ।।।।ऽ।	

अस्या अस्या मात्रा लघ्वी अपभ्रंशभाषया प्रचारः इतिमात्राहृत्तानि समाप्तानि ॥॥

अत्र समहृत्तानि त्रयस्त्रिंशादधिकं शतं अर्द्धसम हृत्तानि षट् विषम हृत्तानिच षट् मात्रा हृत्तानि पंचदश समुदायेन षष्ट्यधिक शत संख्या कानि छंदांसि लिखितानीति ॥ ॥

छंदकपातनः पुं छद्मतापसः इति जटाधरः

छंदोगः पुं सामगः सामवेदी इतिजटाधरः ॥

छंदोगपरिशिष्टं स्त्री कात्यायन मुनि कृतं सामवेदि कर्म्मबोधक गोभिल सूत्राणां परिशेषशास्त्रं इतिस्मृतिः ॥

छंदोविचितिः स्त्री कृतिच्छन्दसां प्रत्यायकंशास्त्रं इत्यमरटीकायां भरतः ॥

छन्नं क्ली रहः निर्जनस्थानं इति मेदिनी ॥

छन्नः त्रि छादितः इति मेदिनी रहः। इत्यमरः ॥

छप ईक सर्पे गतौ । इति कविकल्पद्रुमः ॥

छम उ भदे इति कविकल्पद्रुमः

छमण्डः पुं मृतपितृकः छेमण्ड इति भाषा इत्युणादिकोषः ॥ बंधुहीनः। इति संक्षिप्तसारे उ णादिहत्ति ॥ छर्द क वमने इति कविकल्पद्रुमः छर्द क्ली वमनं इतिहेमचंद्रः छर्दनं क्ली वमनं इति हेमचंद्रः छर्दनः पुं अलम्बु षावृक्षः ॥

निम्बवृक्षः इति हेमचंद्रः ॥ मदनवृक्षः इति भावप्रकाशः ॥

छर्द्दापनिका स्त्री कर्क्कटी इति राजनिर्घण्टः

छर्द्दिः स्त्री रोगविशेषः वाँति इतिभाषा तत् पर्य्यायः प्रच्छर्द्दि का २ छर्द्द ३ वमथुः ४ वमनं ५ वमिः ६ इति हेमचन्द्रः ॥ छर्द्दिका ७ छर्द्दीका ८ वान्तिः ९ उद्गारः १० इति राजनिर्घण्टः ॥ उत्कासिका ११ छर्द्दनं १२ इति शब्दरत्नावली तस्या निदानादि यथा दुष्टै दोषैः पृथक् सर्वै र्वीभ त्सालोकनादिभि छर्द्दयः पंचविज्ञेया स्तासांलक्षणमुच्य ते अतिद्रवै रतिस्निग्धै रहृद्यै र्लवणैरति। अकाले चाति मात्रैश्च तथासात्म्यैश्च भोजनैः ॥ श्रमाद्भयात्तथोद्वेगादजीर्णात् क्रिमि दोषतः। नार्य्याश्चापन्न सत्वायास्तथातिद्रुतमश्नतः बीभ त्सैर्हेतुभिश्चान्यै र्द्रुतमग्न् क्लेशि तोवलात् छादयन्नाननं वेगै र्दयन्नङ्गभंजनैः निरुच्यते छर्द्दि रितिदोषोवक्त्रं प्रधावितः तस्याः पूर्व्वरूपं यथा।

हृल्लासोद्गार रोधौच प्रसेकोल
वणास्तनु । मर्षो हेदो न्नपाने
च वमीनां पूर्व लक्षणं ॥ ॥
वातजाया स्तस्या रूपं यथा।
हृत् पार्श्व पीडा मुख शोष शीर्ष
नाभ्यर्त्तिकास स्वरभेद तोदैः।
उद्गार शब्द प्रबलं सफेन विछि
न्न कृष्णं तनुकं कषायं कृच्छ्रेण
चाल्पं महता च वेगेनार्त्तोऽनिला
च्छर्द्दयतीह दुःखं । । तस्याः
पित्तजाया रूपं यथा मूर्च्छा
पिपासा मुखशोष मूर्द्ध ताल्व
क्षि सन्ताप तमो भ्रमार्त्तः पीतं
भृशोष्णं हरितं सतिक्तं धूम्रं
च पित्तेन वामेत् सदाहं ॥ ॥
तस्याः श्लेष्मजाया रूपं यथा
तन्द्रास्य माधुर्य्य कफ प्रसेक
सन्तोष निद्रारुचि गौरवार्त्तः
स्निग्धं घनं स्वादु कफविमिश्र
द्द सलोमहर्षोऽल्परुजं वमेच्च॥
तस्यास्त्रिदोषजाया रूपं यथा
शूलाविपाकारुचि दाह तृष्णा
श्वास प्रमोहप्रबलाप्रसक्तं छ
र्द्दिस्त्रिदोषाल्लवणाम्ल नील सा
न्द्रोष्णरक्तं वमतां नृणां स्यात् ॥
असाध्याया लक्षणं यथा विट् स्वेद

मूत्राम्बुवहानि वायुः स्रोतांसि
संरुध्य यदोर्द्ध्वमेति उत् सन्न
दोषस्य समाचितं तं दोषं समु
द्धूय नरस्य कोष्ठात् विण्मूत्रयो
स्तत् सम गंध वर्णं तृट् श्वा
सकासार्त्तियुतं प्रसक्तं प्रच्छर्द्द
येद्दुष्टमिहातिवेगात्तयार्दित श्वाशु
विनाशमेति ॥ आगन्तुजाया
लक्षणं यथा वीभत्सजा दौर्हृद
जामजा च श्वासात्म्यजाया कि
जाच या हि । सा पंचमी तांच
विभावयेच्च दोषोच्छ्रयेणैव य
थोक्तमादौ क्रिमिजायालक्षणं
यथा । शूल हृल्लास वल्लला
क्रिमिजाच विशेषतः क्रिमिहृ
द्रोगतुल्येन लक्षणेनचलक्षिता
क्षीणस्य या छर्द्दि रति प्रसक्ता
सोपद्रवा शोणित पूय युक्ता
सचन्द्रिकां तां प्रवदेदसाध्यां ॥
साध्यास्त्रिकित्सेन्निरुपद्रवाञ्च
तस्या उपद्रवा यथा त्वकोम
श्वासो ज्वरो हिक्का तृषा वैचित्त्य
मेवच हृद्रोगस्तमकश्चैव ज्ञेयाश्छ
र्द्दे रुपद्रवाः इतिमाधवकरः ॥
छर्द्दिः स स्त्री वमिः इत्युणादिकोषः
छर्द्दिका स्त्री छर्द्दिः विष्णुक्रान्ता

। इतिराजनिर्घण्टः
छर्द्दिकारिपुः पुं सूक्ष्मैला इति
शब्दचन्द्रिका
छर्द्दिघ्नः पुं निम्बवृक्षः इति
रत्नमाला
छलं क्ली स्खलितं शाठ्यं इति
मेदिनी ॥
छल्लिः स्त्री त्वक् । छाल इतिभाषा
इतिशब्दरत्नावली
छल्ली स्त्री वीरुत् सन्तानः
वल्कलं कुसुमविशेषः इति
मेदिनी
छविः स्त्री शोभा ॥ दीप्तिः
इत्यमरः ॥
छष ञ वधे । इति कविकल्पद्रु
मः छा स्त्री आच्छादने इतिमेदिनी
छाः पुं शावकः इत्येकाक्षरकोषः
छागः पुं स्त्री पशुविशेषः तत्
पर्य्यायः वस्तः २ छगलकः ३ अजः
४ स्तभः ५ इत्यमरः ॥ छागः ६
छागलः ७ छागलः ८ तभः ९ स्तभः
१० स्तुभः ११ इति तट्टीका लघुकामः
१२ क्रयसदः १३ बर्करः १४ पर्णभोज
नः १५ लम्बकर्णः १६ मेनादः १७ बुक्कः
१८ अल्पायुः १९ शिवाप्रियः २० इति
शब्दरत्नावली ॥

अवुकः २१ मेध्यः २२ पशुः २३
पयस्वलः २४ तन्मांस गुणाः
लघुत्वं । स्निग्धत्वं । नातिशीत
त्वं रुचिवल पुष्टिदात्वं निर्द्दोष
त्वं वात पित्त नाशित्वं । मधुरत्वञ्च
। इतिराजनिर्घण्टः शुक्र धातु
साम्यकारित्वं । हेहरणत्वं । स्निग्धत्वं
मृदुत्वं । अनभिष्यन्दित्वं । नातिस्र
त्वञ्च इति राजवल्लभः ॥ छाग
पोतमांसगुणाः लघुत्वं शीतत्वं
प्रमेहनाशित्वञ्च तरुणावृषणस्त
स्यमांसस्य गुणाः ईषल्लघुत्वं ब
लदातृत्वञ्च तन्मूत्रगुणाः कटुत्वं ।
उष्णत्वं तुच्छत्वं नाडीविषार्त्ति प्ली
होदरकफ श्वास गुल्म शोफनाशि
त्वं लघुत्वञ्च इति राजनिर्घण्टः
छागणः पुं करीषाग्निः घुंटेश्वा
गुन इतिभाषा इतित्रिकाण्डशेषः
छागभोजी पुं स्त्री वृकः इति
राजनिर्घण्टः छागभक्षके त्रि
छागरथः पुं अग्निः इतिहेमचन्द्रः
छागलः पुं स्त्री छागः इति
राजनिर्घण्टः ॥
छागलकः पुं मृग सविशेषः
यथाश्वेत स्तपाकं सम दीर्घ हेते
निःपाल्कल छागलकं वदन्तिगले

हिकाण्डः किल तस्य एष्व कं
दः स्वपथ्यारुचिदो बलप्रदः इ
तिराजनिर्घण्टः छागलस्य ॥
छागलाञ्चिका स्त्री वृद्धदारकवृक्षः
इतिराजनिर्घण्टः ॥
छागलान्त्री स्त्री वृकः इति
राजनिर्घण्टः ॥
छागवाहनः पुं अग्निः इति
त्रिकाण्डशेषः
छागिका स्त्री छागी इतिहेमचं
द्रः छागी स्त्री छागस्य ना बक
री इतिपाटी इतिच भाषा तत्पर्या
यः अजा २ पयस्विनी ३ भीरुः ४
मध्या ५ गलेस्तनी ६ इतिराजनिर्घ
ण्टः छागिका ७ मेज ८ सर्वभक्षा
९ गलस्तनी १० इति हेमचंद्रः
चलंपा ११ इतित्रिकाण्डशेषः
अस्याः क्षीरस्य गुणाः मधुरत्वं
शीतलत्वं ग्राहित्वं दीपनत्वं
रक्त पित्त विकार क्षय काम
नाशित्वंच अजानां लघुकायत्वा
त्तानाद्रव्यनिषेवणात् नात्यम्बु
पानात् व्यायामात् सर्वव्याधिह
रं पयः इतिराजनिर्घण्टः कषाय
त्वं लघुत्वं अतीसारज्वरनाशि
त्वंच तद्दधिगुणाः उत्तमत्वं ग्राहित्वं

लघुत्वं दोषत्रयापहत्वं श्वास
कासार्शः क्षय कार्श्येषु शस्तत्वं
दीपनत्वंच इति भावप्रकाशः
कफ वात नेत्रदोष दुर्नाम श्वास
कास नाशित्वं उग्रत्वं रुच्यत्वं ।
पाचनत्वंच ॥ तन्नवनीत गुणाः
लघुत्वं मधुरत्वं कषायत्वं ।
त्रिदोष नाशित्वं चक्षुष्यत्वं दी
पनत्वं बल्यत्वं सदाहितत्वंच ॥
तत्तक्रोत्यनवनीतगुणाः क्षयका
सनेत्रामय कफनाशित्वं बल्यत्वं
परमदीपनत्वंच तद्घृत गुणाः
चक्षुष्यत्वं दीपनत्वं बलवर्द्धनत्वं
काम श्वास कफ नाशित्वं रा
जयक्ष्मणि शस्तत्वंच । इति
राजनिर्घण्टः ॥
छातः त्रि छिन्नः दुर्बलः इत्यमरः
छात्रं क्ली वरटीक्षुद्रसंभवंमधु ।
तस्यागुणाः श्वित्रक्रिमिरोगरक्त
पित्त नाशित्वं गुरुत्वंच । इतिरा
राजवल्लभः ॥
छात्रः पुं शिष्यः । इत्यमरः ॥
छात्रकं क्ली छात्रंमधु यथा ।
छत्राकारैस्तु पटलैः सरघाः पीतपि
ङ्गलाः येऽर्ज्जयन्तितदुत्पन्नं मधुच्छा
त्रकमीरितं श्वित्र मेह क्रमि ॥

त्रघ्नविधाच्छात्रं गुणोत्तरं इति
राजनिर्घण्टः
छात्रगण्डः पुं पदार्थवित् विभक्ता
स्तस्य श्लोक चरणस्य वा आदि
मात्रवेत्ता इतिहारावली ॥
छात्रदर्शनं क्ली हैयङ्गवीनं इति
शब्दचन्द्रिका शिष्यावलोकनञ्च
छाद क्ली पटल छात इतिवाल
इतिच भाषा इतिजटाधरः ॥
छादनं क्ली छदनं अन्तर्द्धानं
पत्रं इत्यमरटीकायांभरतः ॥
आच्छादनञ्च ॥
छादनः पुं नीलाम्लानवृक्षः
इतिराजनिर्घण्टः ॥
छादितः विच्छिन्नः इतिजटाधरः
आच्छादितः । यथा घनतर
घनवृन्दैश्छादितौ पुष्पवन्तौ ।
इत्युद्भटः ॥
छान्दसः पुं वेदाध्येता इत्यमरः
छान्दोग्यं क्ली सामवेदोपनिष
त् इतिवैदिकसम्प्रदायः
छाया स्त्री रौद्रशून्यं तत्पर्याय
भाषाकुआ २ अपाना ३ अनातपः ४
भीरुः ५ अनातपः ६ अभीति ७
आतपाभावः ८ भावालीना ९
अस्यागुणाः मधुरत्वं शीतलत्वं ।
दाहश्रमहरत्वञ्च इतिराजनिर्घण्टः

॥ चर्म्मनाशित्वं मेघच्छायागुणाः
श्रमभ्रम मूर्च्छा संताप नाशित्वं
इति राजवल्लभः ॥ छाया ।
विशेषदोषो यथा दीप खट्वा
तनु छाया छिन्नकेश नखादि
कं अज मार्जार रेणुश्च हन्ति पुण्यं
पुराकृतं इतिकर्म्मलोचनं ॥ ॥
प्रतिबिम्बं सूर्य्यपत्नी सा संज्ञा
प्रतिकृतिः पालनं उत्कोचः
कान्तिः सच्छोभा पङ्क्तिः ॥
इति मेदिनी कात्यायनी इतिश
ब्दरत्नावली तमः । इतिहे ।
मचंद्रः ॥
छायाकरः त्रि छत्रधार छाता
बरदार इतिभाषा इतिहेमचंद्रः
छायातनयः पुं शनिः इतिहला
छायातरुः पुं स्थिरच्छायवृक्षः
इतित्रिकाण्डशेषः ॥
छायात्मजः पुं शनिग्रहः इति
त्रिकाण्डशेषः
छायापथः पुं देवपथः आकाशः
इतित्रिकाण्डशेषः ॥
छायाभृत् पुं चंद्रः इतिहेमचंद्रः
छायामित्रं क्ली छत्रं इतिशब्दरत्ना
वली ॥
छायाम्बरधरः पुं चंद्रः इतित्रि
काण्डशेषः ॥

छायासुतः पुं शनिः इतिहेमचंद्रः
छिः पुं गर्ह्ये इत्येकाक्षरकोषः
छिक्कनी स्त्री वृक्षविशेषः छि
क्कनी इति नाकछिक्कनी इति हाँ
चोटी इतिच भाषा तत्पर्यायः
क्षवकृत् २ तिक्ता ३ छिक्किका
४ घ्राणदुःखदा ५ अस्या गुणाः क
टुत्वं रुच्यत्वं तीक्ष्णत्वं उष्णत्वं वह्नि
पित्तकारित्वं वात रक्त कुष्ट
कृमि वात कफ नाशित्वंच इ
तिभावप्रकाशः ॥
छिक्का स्त्री क्षुतं छिँक इतिहि
न्दी भाषा इतिशब्दरत्नावली ॥
छिक्काका स्त्री छिक्कनी इति
भावप्रकाशः
छिते त्रि छिन्ने इत्यमरः ॥
छिन्तिः पुं करजवृक्षः इति
शब्दचंद्रिका छेदश्च ॥
छित्वरः त्रि छेदनद्रव्यं धूर्त्तः
वैरी इत्युणादिकोषः ॥
छिद इर ध डो त्र छेदे इति
कविकल्पद्रुमः
छिद त्रि छेदनकर्त्ता छिनत्ती
ति कर्त्तरिक्विप् प्रत्ययः ॥
छिदकं क्ली वज्रं इत्युणादिकोषः
छिदा स्त्री छेदनं इति मुग्धबो
धे छिदिः स्त्री कुठारः छिदयातोनेन
दिकेन इ प्रत्ययेन निष्पन्नः ॥
छिदिरः पुं पावकः रज्जुः करे
वालः परस्वधः इतिमेदिनी ॥
छिदुरः त्रि छेदनद्रव्यं धूर्त्तः ॥
वैरी इतिमेदिनी ॥
छिद्र नक भेदे इतिकविकल्पद्रुमः
छिद्रं क्ली भेदः छेँदा इतिभाषा
तत्पर्यायः कुहरं २ शुषिरं ३
विवरं ४ विलं ५ निर्व्यथनं ६
रोकं ७ रंध्रं ८ श्वभ्रं ९ वपा १०
शुषिः ॥ इत्यमरः खं ११ ॥
शुषी १२ इतितट्टीका हूषणं ॥
इतिमेदिनी
छिद्रवैदेही स्त्री राजपिप्पली इति
राजनिर्घण्टः
छिद्रांशः पुं नलः इतिराजनिर्घण्टः
छिद्राफलं क्ली मायाफलं इति
राजनिर्घण्टः
छिद्रितः त्रि कृतछिद्रः तत्पर्या
यः वेधितः २ विद्धः ३ इत्यमरः
छिन्नं त्रि कृतछेदनं छेँदा इति
काटा इतिच भाषा तत्पर्यायः
छातं २ लूनं ३ कृत्तं ४ दातं ५
दितं ६ छितं ७ वृक्णं ८ इत्यमरः
कृष्टं ९ छादितं १० इतिजटा
धरः छेदितं ११ खण्डितं १२
इतिहेमचन्द्रः ॥ ॥

छिन्नग्रन्थिनिका स्त्री त्रिपर्णिका
इतिराजनिर्घण्टः
छिन्नपत्री स्त्री अम्बष्ठा इतिराज
निर्घण्टः ॥
छिन्नरुहः पुं तिलकवृक्षः इति
राजनिर्घण्टः
छिन्नरुहा स्त्री गुडूची इत्यमरः
स्वर्णकेतकी शल्लकी इति
राजनिर्घण्टः
छिन्नवेशिका स्त्री पाठ शाक
नाडी इतिभाषा इतिशब्दचंद्रिका
छिन्ना स्त्री गुडूची पुंश्चली इ
तिविश्वः ॥
छिन्नोद्भवा स्त्री गुडूची इतिरा
जनिर्घण्टः ॥
छिल्लिहिण्डः पुं पातालगरुडवृ
क्षः इतिभावप्रकाशः ॥
छुछुन्दरी स्त्री जन्तुविशेषः छुँ
छा इति भाषा तत्पर्यायः
गन्धमूषा २ इति हेमचंद्रः ॥
चिक्का ३ वेश्मनकुलः ४ [illegible]
५ गन्धमूषिकः ६ इतित्रिकाण्डशे
षः गन्धमूषिका ७ इतिहलायु
धः राजपुत्री ८ मतिमूषिका ९
सुगन्धिमूषिका १० गंधशुण्डिनी ११
शुण्डिमूषिका १२ इतिराजनिर्घण्टः
गंधाखुः १३ गंधनकुलः १४ चुच्चु
इतिहारावली ॥
छुट क छेदे इतिकविकल्पद्रु
मः छुटः क्ली प्रतीकरणं रश्मिः
इतिसंक्षिप्तसारे उणादिवृत्तिः ॥
छुप श ड स्पर्शे इतिकविकल्पद्रु
मः छुपः पुं क्षुपः ॥ स्पर्शनं इ
तिमेदिनी चपलः युद्धं इति ।
विश्वः ॥
छुर शि लोपे इतिकविकल्पद्रुमः
छुर छेदे इतिकविकल्पद्रुमः
छुरा स्त्री सुधा चूर्णं इतिहा
रावली ॥
छुरिका स्त्री अस्त्रविशेषः छुरी
इति ख्याता तत्पर्यायः शस्त्री
२ असिपुत्री ३ असिधेनुका ४ ।
इत्यमरः छुरी ५ इतिभरतः ॥
खुरी ६ छूरी ७ कृपाणिका ८
धेनुपुत्री ९ इति हेमचंद्रः ॥
छुरिका १० इति शब्दरत्नावली
छुरितं त्रि खचितं इतिजटाधरः
छिन्नञ्च ॥
छुरी स्त्री छुरिका इतिभरतः ॥
छुरिकापत्री स्त्री सेना इतिरा
जनिर्घण्टः ॥
छूरी स्त्री छुरिका इति हेमचंद्रः
छूद कि सन्दीपने इतिकविकल्पद्रु
छूद घईर उभ क्रीडने दीप्तौ ॥

वमने। इति कविकल्पद्रुमः॥
छेकः त्रि गृहासक्तपक्षिमृगौ
तत्पर्य्यायः गृह्यकः २ इत्यमरः
नागरः इति मेदिनी॥
छेकोक्तिः स्त्री वक्रोक्तिः इतिज
टाधरः॥
छेदनक छेदे इतिकविकल्पद्रु
मः छेदः पुं छेदने इति हेमचंद्रः
खण्डे इतित्रिकाण्डशेषः॥
छेदनं क्ली अस्त्रेणाद्विधाकरणं
तत्पर्य्यायः वर्द्धनं २ इत्यमरः॥
कर्त्तनं ३ कल्पनं ४ छेदः ५ इति
हेमचंद्रः भेदः इतिमेदिनी ॥
छेदनीयः पुं कतकवृक्षः इति
राजनिर्घण्टः छेद्येत्रि ॥
छेदिः त्रि छेदनकर्त्ता इत्युणादि
कोषः॥
छेदितं त्रि छिन्नं इतिहेमचंद्रः
छेमण्डः पुं पितृहीनः हेमण्ड
इतिभाषा इत्युणादिकोषः॥
छेलुः पुं सामराजी इति
शब्दचंद्रिका॥
छो य स्तेनो इति कविकल्पद्रुमः
छोटिका स्त्री तर्जन्यङ्गुष्ठाङ्गुलिध
निः यथा छोटिकाभिर्दशादिग्वं
धनं कृत्वा भूतशुद्धिं कुर्य्यात् इति
तंत्रसारः॥

छोटी पुं कैवर्त्तः इतित्रि
काण्डशेषः॥
छोरणं क्ली परित्यागः छोड़न
इति हिन्दी भाषा इतित्रिकाण्डशे
षः छोलङ्गः पुं मातुलुङ्गः टा
बालेबु इतिभाषा इतिशब्दरत्ना
वली छ्यु ङ. गत्यां इतिकविक
ल्पद्रुमः॥

ज जकारः सर्व्वनत्वाष्टम वर्णः
चवर्ग तृतीय वर्णश्च अस्योच्चार
ण स्थानं तालु इति व्याकरणं॥
अस्योत्पत्तिर्यथा विसर्गस्तालुगः
सोऽप्राप्तो चवर्गश्च यत्तया इति
प्रपंचसारः अस्य लेखन प्रकारो
यथा ऊर्द्धाधः कुंचिता रेखाभा
स्वत्क्लेशा संविभुः वामदेवी कम
लानित्या द्विधा मात्रा प्रकीर्त्तिता
इतिवर्णोद्धारतंत्रं अस्यस्वरूपं
यथा जकारं परमेशानि या स्व
यं मध्य कुण्डली शरच्चंद्रप्रती
काशं सदा त्रिगुणसंयुतं पंचदेव
मयंवर्णं पंचप्राणमयंसदा त्रिश
क्ति सहितं वर्णं त्रिविंदु सहि
तंप्रिये इतिकामधेनुतंत्रं ॥
जः पुं मृत्युंजयः॥ जनिः
जातमात्रे जनार्द्दनः इतिमेदिनी

125

विषं भुक्तिः॥ तेजः॥ पि
शाचः इति शब्दरत्नावली॥
वेगः इत्येकाक्षरकोषः
जः त्रि वेगितः जेता इति
शब्दरत्नावली॥
जकुटः क्ली वार्त्ताकुपुष्पः इ
जकुटः पुं मलयपर्व्वतः कुक्कु
रः इतिमेदिनी॥
जगच्चक्षुः[२] पुं सूर्य्यः इतिहेम
चंद्रः जगत् क्ली विश्वं तत्पर्य्यायः
जगती २ लोकः ३ पिष्टपं ४
भुवनं ५ इत्यमरः विष्टपं ६
इति तट्टीका॥ वायौ पुं
जङ्गमेत्रि इति मेदिनी
जगत्कर्त्ता[२] पुं ब्रह्मा इतिहेम
चंद्रः जगत्प्राणः पुं वायुः इत्य
मरः जगत्साक्षी[२] पुं सूर्य्यः इ
तिहेमचंद्रः॥
जगती स्त्री भुवनं पृथ्वी जनः
छन्दोविशेषः इतिमेदिनी॥
जम्बूवपे इतिहेमचंद्रः
जगदंबा स्त्री दुर्गा यथा अह
रे जगदम्बायाः शारदीयोमहो
त्सवः इत्युद्भटः
जगदाधारः पुं वायुः इति।
शब्दचंद्रिका जगदाश्रयः यथा

कालोहिजगदाधारः इतिस्मृतिः
जगदीशः पुं विष्णुः इतिश
ब्दरत्नावली॥
जगद्गौरी स्त्री मनसादेवी इति
शब्दरत्नावली॥
जगद्बलः पुं वायुः इतित्रि
काण्डशेषः॥
जगद्योनिः पुं शिवः इतित्रिका
ण्डशेषः विष्णुः इतितस्य सहस्र
नाम ब्रह्मा इति कुमारः॥
पृथिव्यां स्त्री इतिशब्दचंद्रिका
जगद्वहा स्त्री पृथिवी इति
त्रिकाण्डशेषः
जगद्विनाशः पुं युगान्तः इ
तिहलायुधः॥
जगन्नाथः पुं विष्णुः इतिहे
मचंद्रः पुरुषोत्तम क्षेत्रं य
था मनयऊचुः पुरुषोत्तमा
ख्यं सुमहत् क्षेत्रं परम पाव
नं यत्रास्ते दारवतनुः श्रीशो
मानुषलीलया दर्शनान्मुक्ति
दः साक्षात् सर्व्वतीर्थफलप्रदः
तन्नो विस्तरतो ब्रूहि तत् क्षेत्रं
केन निर्म्मितं ज्योतिः प्रकाशो
भगवान्साक्षान्नारायणः प्रभुः
कथं दारुमयस्तस्मिन्नास्ते पर
म पूरुषः जैमिनि रुवाच।

एतत् क्षेत्रवरं ब्रह्मन् वपुर्भूतं
महात्मनः स्वयं वपुष्मान्यत्रास्ते
स्वनाम्नाख्यापितं हि तत् यथा
चानुदिनं देवाः सिद्धा ब्रह्मर्षय
स्तथा समर्च्चितुमिहायान्ति देवेशं
न तथान्यतः अहो तत् परमं क्षे
त्रं विस्तृतं दश योजनैः ती
र्थराजस्य सलिलादुत्थितं वालु
काचितं नीलाचलेन महता म
ध्यस्थेन विराजितं एकं तन्नमि
वहृष्याःसहृतान्यविभावितं ॥
ब्रह्मणो प्रतिविम्बाको सागर
स्यान्तरे तीरे महानद्यास्तु दक्षिणे
सप्रदेशः पृथिव्यांहि सर्व्वतीर्थ
फल प्रदः एकाम्रकाननाद्याव
द्दक्षिणोदधि तीरभूः पदात्
पदात् श्रेष्ठतमः क्रमेण परिकी
र्त्तितः सिंधु तीरेच या ब्रह्मन्
राजते नीलपर्व्वतः पृथिव्या
गोपितं स्थानं तच्चापि सुदुर्लभं
सुरासुराणां दुर्ज्ञेयं मायया छा
दितं मम सर्व्वसंग परित्यक्तस्त
त्र तिष्ठामि देहभृत् सृष्टालाय
नवाकान्तं क्षेत्रं मे पुरुषोत्तमं ।
नीलाद्रे रंतर्भुवि कल्पन्यग्रो
धमूलतः वारुण्यां दिशियत्
कुंडं रोहिणं नाम विश्रुतं तत्तीरे

निवसन्तो मां पश्यन्तश्चर्म्मचक्षुषा
तदम्भसा क्षीणपापा मम सा
युज्यमाप्नुयुः ब्रतेषु तीर्थेषुच
यज्ञदानयोः पुण्यं यदुक्तं विमला
त्मनां हि अह निवासात्लभते
च सर्व्वं निमेषवासात् खल्वा
श्रमेषिकं जैमिनिरुवाच उद
कान्तः समागत्य कृतस्त्रिहाय
सोम्मनः कारणोदक संश्लो
तस्मिन्कुण्डे निमज्जितः विलो
कयामाथवनीलरत्नकान्ति कृपा
निधिं काकदेहं समुत्सृज्य लेव
मानं मुहुः स्थितो शंख चक्रग
दापाणिस्तस्य पार्श्वे ह्यवस्थितः
यमेश्वरं लक्ष्मीवाको पंचक्रोश
मिदं क्षेत्रं समुद्रान्तर्व्ववस्थितं ।
त्रिक्रोशं तीर्थराजस्य तटभूमौ
सुनिर्म्मलं सुवर्ण वालुकाकी
र्णं नीलपर्व्वत शोभितं । योसौ
विश्वेश्वरो देवः साक्षान्नारायणा
त्मकः संयम्य विषयग्रामं समुद्र
तटमास्थितः उपासितुः जगन्ना
थं चतः ष्ठुन्नमः प्रभुः । यमे
श्वरइति ख्यातो यम संयमनाश
नः यं दृष्ट्वा पूजयित्वातु कोटिलि
ङ्ग फलं लभेत् सीमा मतीवीक्ष
स्य शांखाकारस्य मूर्द्धनि ॥

शांखोग्रे नीलकण्ठः स्यादनन्तक्रो
शेसदुर्लभं । परमं पावनं क्षेत्रं
साक्षान्नारायणस्यवै शंखस्यान्त
र्भागस्तु समुद्रोदक संस्नुतः ।
यत् संपर्कात्समुद्रोऽत्र तीर्थ
राजत्व मागतः । यथाः ये[illegible]
भगवान्मुक्तिप्रदोहृदिपध्यगतः
तथेदंमरणान्तेत्रं सिंधुस्नानाद्धि
मुक्तिदं । विच्छेद ब्रह्मणः पूर्व्वं
रुद्रःक्रोधात्पंचमं । तच्छिवो
दुस्त्यजेत् हस्ताग्रे परिवभ्रम
तत्राप्तो यदा ब्रह्म कपालेप
रिमुक्तवान् कपाल मोचनं ।
तीर्थं द्वितीयावर्त्तसंस्थितं तस्य
दक्षिणपार्श्वेत्वमरणांभवमेचनं
तृतीयावन्नसीमायां शक्तिं मेवि
मलाह्वयां जानीहि धर्म्मराजत्वभु
क्तिमुक्तिफलप्रदां नाभिदेशेस्थि
तं क्षेत्र त्रयं कुण्डं वदो विभुः
कपाल मोचनं यावद्दीपानी
प्रतिष्ठिता मध्यं शंखस्यजानीया
त् सुगुप्तं चक्रपाणिना । तां दृ
ष्ट्वा प्रणमेयस्तु भोगान् सोऽश्ना
ति शाश्वतान् । सिंधुराजस्यस
लिलात् यावन्मूलं वटस्य वै
कीट पतिमनुष्याणांमरणान्मु
क्तिदो मतः अन्तर्वेदीतियं पुण्या

वोच्यते त्रिदशै रपि । अत्र ।
स्थितान्हि पश्यन्ति सर्व्वाश्च
कान्नथारिणः । कामाख्यादेव
पालश्च विमला चात्रस्थिता ।
साक्षाद्ब्रह्म स्वरूपो ऽसौ नृसिंहो
दक्षिणे विभोः ॥ अन्तर्वेद्यार
क्षणार्थं शक्रयो ऽसौ प्रकल्पिताः
उग्रेण तपसा पूर्व्वं मह सर्व्वेण
भाविता ॥ पद्माक्षे सा मयास
सा गौरी तस्याश्च भाविनी ।
सर्व्वसौन्दर्य्य वसति वपुषा मेवि
निर्गता तदा दृष्टा मया भद्रे
वचनं मे प्रियं कुरु अन्तर्वेदीर
क्षमम पतितस्त्वं स्वमूर्त्तिभिः ॥
सात्र तिष्ठति मत्प्रीत्या अष्टधादि
क्षु संस्थिता मंगला वटमूले
तु पश्चिमे विमलातथा शं
खस्य पूर्व्वभागेतु संस्थितासर्व्व
मंगला अर्द्धाशनी तथा लं
वा कुवेरदिशि संस्थिता कालरात्रि
र्द्दक्षिणस्यां पूर्व्वस्यान्तमरीचिका
कालराज्या स्तथा पश्चात् चण्डरू
पात्रावस्थिता । रुद्राणपाक्राष्टधा
भेदं दृष्ट्वा रुद्रोपि शंकरः स्था
नानि महधाभिज्ञा उपास्तेपरमे
श्वरं कपालमोचनं नाम क्षेत्रपालं
यमेश्वरं मार्कण्डेयं तथेशानं ।

विश्वेशं नीलकण्ठकं । वटमूले
वटेशं च लिङ्गान्यष्टौ महेशितुः
यानि दृष्ट्वा तथा स्पृष्ट्वा पूजयि
त्वा विमुच्यते । तत्र जगन्नाथस्या
विर्भाव कारणं जैमिनिरुवाच
इंद्रद्युम्नस्य नृपतेः तेनैव श्रीपुरु
षोत्तमे । जगदीश प्रसादायापि
तामहनिदेशतः एकोनेकम
ग्नः संस्थामवाप पृथिवीपतेः
सहस्रं हयमेधस्य यथावद्वि
चोदितं तं समाप्य सत्र दिनाः सर्व
या रात्रि रभवद्द्विजाः । तस्या
स्तुरीय प्रहरे ध्यायतो विभुम् ।
वायं । ध्यानेन तस्मिन् दर्शी सोम
हाभाग्य वशान्नृपः । पश्यत्तामि
व सश्वेत द्वीपं स्फाटिक निर्मितं
तन्मध्ये ददृशे देवं शंखचक्रग
दाधरं ॥ नीलजीमूत संकाशं
वनमाला विभूषितं दक्षपार्श्वस्थि
तेनस्य ह्यनंत धरणीधरं । हल
लाङ्गल शंखाब्ज स्फुरद्दाफचत
प्रदं दक्षपार्श्वस्थितो विश्वोल
क्ष्मीं तां प्रसुमलक्षणां वराभयाब्ज
हस्तां वै कुंकुमाभां सलोचनां
दर्पण पद्मासन गां लावण्यांचा
थिपुत्रिकां पितामहं च ददृशे
पुरतो ऽप्यकृतांजलिं ॥ ।

वामपार्श्वस्थितं चक्रं सर्वज्ञान म
यं विभोः ॥ ततः प्रवहते मस्मा
न्नृपते वाजिमेधिका । शास्त्रैः ।
स्तोत्रैर्दिव्य दृग्भिः वर्णक्रमस
मुज्ज्वलैः दक्षिणेन तदभूद्देशो वि
श्वेश्वर समीपतः । नियुक्ताः
सेवका राज्ञा ससंभ्रम मुपस्थिताः
न्यवेदयंस्तु नृपतिं कृतांजलिपुटा
द्विजाः देवहेम्नो महावल्लतट
भूमौ महोदये ॥ प्रविष्टाग्रसमु
द्रान्त कल्लोल सव मूलकः ।
मांजिष्ठवर्णः सर्वत्र शंखचक्रां
कितः स्रवन् । नरहप्रवौ ह्रदोः
यमुद्यत्सूर्यनिभांशुना । नियु
क्तानां वचः श्रुत्वा राजा नारदमब्र
वीत् तत् किं निमित्त यदृष्टं तदृश्ये
वं वदमिते । नारदः प्रहसन् वा
क्यमुवाच नृपसत्तमं । उपस्थित
न्ते भाग्यं स्तमे यदृष्ट वा स्वरा स्वे
तद्वीपे विश्वमूर्त्तिर्दृष्टो योऽ विश्व
व्ययः तदङ्गःमवलिते लोम तरु
त्वमुपपद्यते तन्नाम्य वषागः
सर्वा लोकानां नयनातिथिः ॥
भविष्यन्ति महाराज सर्व कल्म
षनाशनः समाप्यावभृथ स्ना
नं तदान्ते सविता यतेः उक्तं व
समहत्वा कृतकौतक मंगलं

महावेद्यां स्थापयात्र यत्नेशं
तरु रूपिणं विचार्थ्यैत्थं म
दा युक्तो तेच नारद भूभृतो स
सम्हृष्टो ततो यातो यत्रासौ भ
गवान् द्रुमः पुनः पुनः प्र
णम्यैनं हर्षाश्रु नयनो नृपः
द्विजेराहारयामास तरुं कंक्षो
लले हिते स्वगंधा लेपने दिव्य
महावेदी विनिम्यतः वचना
न्नारदस्यैतं पूजयामास पार्थिवः
पूजावसाने पप्रच्छ नारदं मुनि
सत्तमं कीदृशी प्रतिमा विष्णो
र्भविष्यति कः पुनः विचार
यन्तौ तावित्थं यावन्नारद पार्थि
वौ अशरीरा ततो वाणीः प्रश्रा
वयांतरीक्षतः सर्वेषां हृषयोर्भ
गवान् सद्विचार पथे स्थितः ।
सगुप्तायां महावेद्यां स्वयं सोऽत्र
स्थास्यति । सप्ताहयतो दिनान्येव
यावत् स चक्षुपानिव । उपस्थितो
ऽयं योहद्दः शास्त्रपाणिस्त्व वर्द्धकी
पिनमस्तः प्रवेश्यैव द्वारं बध्नन्
यत्नतः । बहिर्वाद्यानि कुर्वन्नयाव
त्तु चरना भवेत् ॥ श्रुत्वा स्तदद्य
ना शाह्वो वाणीर्थ्यान्यतदायकः
नवके वसति श्चैव कर्ष्यान्स्मानतना
प्राप्ते तान्तः प्रवेशानें कर्ष्यात्रपष्प
च्छ ।

कदाचन नियुक्तान्यः प्रपश्येत्त्व
द्राज्ञो राष्ट्रस्यैव वहि दृष्ट्वापि
महाभीति रच्यतां च युगे युगे
तच्छ्रुत्वा नारदाद्यास्ते यथोक्तं
विस्मितास्तयं चिकीर्षितितथा
कर्तुं तत्रायातस्तु वर्द्धकी प्रोवाच
नृपतिं सो ऽथ स्वमे दृष्टोस्त्व यो
स्तथा तापवाहं चट्टिष्यामि दारु
णा दिव्यरूपिणा इत्युक्तो महेत्थे
वेद्यां हृद्ध वर्द्धकि रुपश्च क वेच
नार्थैमनुष्याणां साक्षान्नारायणो
विभुः ततः स पृथिवीपाल स्तथा
कृत्वान्तरीक्षगा । यदुवाच गिरां
देवी तेनत्परिचचारच । निर्वाणा
ह स्वयं देवः क्रमात् पंचदशो
दिने चतुर्मूर्त्तिः स भगवान् यथा
पूर्वं मयोदितः दिव्य सिंहासन ग
तो बलभद्र सुदर्शनैः शंखचक्र
गदापद्मलसद्बाहुर्जनार्दनः ।
हलं मुषल चक्राब्जं धारयन्
पन्नगाकृतिः । छत्रीकृत फणा
सप्त मुकुटोज्ज्वल कुण्डलः सुभ
द्राचारुवदना वराभय धा
रिणी । लक्ष्मीः प्रादुर्बभूवेयं
सर्व चैतन्य रूपिणी । सुदर्शन
स्तु यच्चक्रं सदा विष्णोः करे स्थि
तं शाखाप्र स्तंभमध्यस्थतद्रूपन्त
तीयकं । निर्देतेभगवद्रूपे चव

ष्टौ दिव्यरूपिणी लोकानाम्
पकाराय पुनर्दारुमयी त्वया प
टैराच्छाद्य सद्रूपं त्वयैते प्रति
मास्तिमाः स्वस्ववर्णप्राप्याश्च
वर्णकैश्चित्रकर्मणा अमूर्हि रू
स्वरूपेण दृष्टाः पापाय हेतवः
गोपनीयाः प्रयत्नेन पट्टनिर्यास
वल्कलैः शिल्पिभिः कर्मकुशलै
र्दृढमाच्छादयेत्ततः वर्षे वर्षे च
सत्कार्य्यः पूर्वसंस्कारमोचनात्
अते वल्कललेपन्तु सत्वदिव्याश्च
रन्ततः प्रमादाद्यदि न लेपमपनीये
तकश्चन । दुर्भिक्षं मरकं राजो स
न्नतिश्चास्य हीयते नेक्षितव्या
स्त्वया राजन्कदाचिद्यवारणाः
मनुष्याणाञ्च राजेन्द्र दृष्टाः स्युर्भ
यहेतवः तस्मात् सविद्युद्दृष्ट
व्यावकलेप विलेपिताः नीला
द्रौ कल्पवृक्षस्य वायव्यां शान्त
स्ततः प्रदेशे समहत्स्थाने प्रासा
दस्य दक्षिणे उत्तरे नरसिंहस्य
सहस्रकरसम्मिते कारयित्वा
प्रतिष्ठाप्य तत्रैव विनिवेशय
पुरा स्थितः पर्वते ऽस्मिन् यो
म्पद्वीपप्रतिमाधवं नाम्नाविश्वा
वसुर्नाम शावरो वैखवान्नमः
तस्य सन्तति देवास्य लेपनस्थान

कर्मणि नियुज्यतां महाराज
भविष्यत्सूत्सवेषु च ततः स
नृपतिः श्रीमाञ्छिल्पशास्त्रवि
शारदान् सत्कारैर्दानमानैश्च
योजयामास सादरं दिने दिने
सप्रदितः प्रासादो वह्नये द्विजाः
पवितः पूर्य्यमानस्तु शुक्लपक्षे
यथा शशी नारद उवाच प्रवर्ष
वक्रराजेन्द्र स्थित्वावाश्मिन् चिरं भु
वि आराधय जगन्नाथमुपचारैर्म
होत्सवैः पितामहं द्रष्टुकामो गत्वा
चेदान्तिकं विभोः उपदेक्ष्यति सो
ऽप्यस्य यात्रास्नानमहोत्सवाः
उभौ तौ दिव्ययानेन जग्मतुर्म
निभ्रभुञ्जौ प्रदक्षिणीकृत्य हरिं
व्योममण्डलमध्यगो दृष्ट्वा पितामहं
द्वृतात् स्वद्वारं जगतां तन्नपः ॥
अग्रम्यत द्विजश्रेष्ठाः साक्षाद्दारु
मयं हरिं शनैः शनैर्ययौ भूपः
प्रणाममकृताञ्जलिः स्तुवन् प्र
णिपतन् भूमौ साश्रुस्सवलि
तेक्षणः जानन्नपिहितं तत्कार्य्य
मानयद्रूप सतमे । उवाच पर
मप्रीत इन्द्रद्युम्नं पितामहः किम
र्थमागतोस्य त्वन्तद्ब्रूहि हृदयं ।
स्थिते इन्द्रद्युम्न उवाच आविर्बभू
व भगवान् भूतभव्य भव प्रभुः

1031

गत्वा देवं जगन्नाथं स्थापयिष्यामि
च प्रभो ब्रह्मोवाच त्वमग्रतो धरां
गत्वायात्सम्भारमद्भिमन् । करि
ष्यामि महाभाग तावदेव व्रजाम्य
हं इन्द्रद्युम्नोपि संहृष्टात्मा दृष्ट्वाञ्ज
लौ श्रियं द्विजाः । आजगाम भुवं
विप्रा विधिनावानुमोदितः आ
गत्य च जगन्नाथं चिरादृक्केव
मानसः । दारुब्रह्मणा नामासौ
चनरोमाञ्चकञ्चुकः ततः क्रमात्
सन्दृशे विमानाग्रं प्रजापतेः
स्वर्णहंसशतैः स्कन्धे रुह्यमानं
समन्ततः । प्रणिपत्य जगन्नाथं
त्रिः परीत्य पितामहः । आनंद
सिंधुसंमग्नः सरोमाञ्चवपुः स्वयं
समुत्तस्थौ ततो ब्रह्मा कृतस्वस्त्य
यनः स्वयं ऋषिभिर्नारदाद्यैश्च वि
दद्भिर्ब्राह्मणैस्तथा प्रासादद्वारि
रचिते रत्नस्तम्भे च मण्डपे वास
यित्वाभिषेकाय संभृत्य दर्शमण्ड
ले । सुवासिते रत्नकुम्भे स्तीर्थ
वारिपु पसंभृतैः । पुरुकाभ्यासी
पुरुषयोरभिषेकं पितामहः
चकार भगवान् लोकसंग्रहा
र्थं द्विजोत्तमाः । ततो भ्यलंकृता
न्देवान् गन्धमाल्योपशोभिता
न् नीराजयित्वा विधिवत् सस्वयं

लोकभावनः रत्नसिंहासने रा
मे स्थापयामास मंत्रतः स्थाप
यित्वा जगन्नाथं स्पृष्ट्वा तस्य दर
श्रुते आनुष्टुभे मंत्रराजं सहस्रं
शृज्जापहृ वेशानस्त्यमलेपये
अष्टम्यां पुष्ययोगतः कृता प्र
तिष्ठा भो विप्राः शोभने शुक्रवा
सरे । तन्महाप्रसादमाहात्म्य
यथा । वह्निं नियोजयेन्न चलोका
न् त्रैवर्गिकान्नृत लौकिकश्च व
हारोयं प्रवर्ततिश्रीः स्वयं भुवं ।
भुङ्क्ते नारायणो नित्यं तथा
पक्वं शरीरवान् । अस्मात् नहि
नैवेद्यं पापघ्नं मूर्ध्नि धारणात्
भक्षणान्मद्यपानादि महादुरि
तनाशनं आघ्राणात्मानसं पा
पं दर्शनाद्दृष्टिजन्तथा आस्वाद
नात् कृतं पापं श्रावणं च व्यपोह
ति स्पर्शनात् कृतं पापं मिथ्या
लापं तथा द्विजाः । गात्रलेपा
द्दहेत् पापं शरीरं वै न
संशयः । महापवित्रं हि
हरेर्निवेदितं नियोजयेद्यः पि
तृदेव कर्मसु । तृप्यन्ति तस्मै
पितरः सुराश्च प्रयान्ति लो
कं मधुसूदनस्य नातः परं हि व
सलिलं वा कदाचिद्भो द्विजाः नराणां

कूपमास्यायतनदक्षिणदिग्विभोक
वस्थालयमानेनबहिर्निर्मल्यप
तितादयः स्पृशन्ति चेन्नदुष्टं
हि यथा विस्मृत्यैव नतन्निंद
न्ति ये नरस्तन्मूढाः पतितमा
निनः स्वयंदण्डधरस्तेषुसहते
नापराधिनः येषामन्ननदण्डेषु
क्ष्वानेषां हि दुर्गतिः कुंभीपाके
महाघोरे पच्यन्ते ते निदाहणो
चिरस्यमपिसंस्पृष्टंनीतेवाहर
देशतः यथा तथोपयुक्तं तत्
सर्वपापापनोदनं नैवेद्यान्न
जगन्नाथस्य गीङ्गवारिसमं हयं द
ष्टिस्पर्शनचिन्ताभिर्दत्तमादय
नाशनं इत्युत्कलखण्डे सक
लेदृशा सहस्रवर्षपर्यन्तं दृष्य्
यास्तिष्ठति यथा शालग्रामोद्
देशर्विनि जगन्नाथस्य भारते क
लेदृशसहस्राब्दे ययौ स्वर्गा
द्दरिपदं इति ब्रह्मवैवर्ते प्रकृ
तिखण्डे ॥

जगन्नुः पुं अग्निः जन्तुः इति
विश्वः शब्दरत्नावलीच जगा
नुरपिपाठः ॥

जङ्गः पुं कवचः इतिहेमचन्द्रः

जगलः पुं सुराकल्क मेदा इ
तिभाषा तत्पर्यायः मेदकः २
इत्यमरः मदनद्रुमः पिष्टमद्ये
पुंसित्रि इति मेदिनी कवचः
रलयोरैक्यात् गोमये क्ली इ
तिरत्नमाला ॥

जग्धं त्रि भुक्ते इत्यमरः ॥

जग्धिः स्त्री सहभोजनं इत्यमरः
भक्षणं इतिहेमचन्द्रः ॥

जग्मिः पुं वायुः इतिकेचित्

जघनं क्ली स्त्रीकट्याः पुरोभागः
कटिः । इतिमेदिनी ॥

जघनकूपकौ पुं कुकुन्दरौ ।
इति हलायुधः द्विवचनान्तोयं
शब्दः ॥

जघनेफला स्त्री काकोडुम्बरि
का इत्यमरः ॥

जघन्यः त्रि चरमः गर्हितः ॥
मेहने क्ली इति मेदिनी ॥
शूद्रे पुं । इतिशब्दरत्नावली ॥

जघन्यजः पुंस्त्री शूद्रः कनिष्ठः
इतिमेदिनी ॥

जघ्निः पुं हननयोग्यास्त्रं इति
संक्षिप्तसारः ॥

जघ्नुः त्रि हन्ता । हननकर्त्ता
इत्युणादिकोषः ॥

जङ्गमः त्रि अस्थावरः गतिशक्ति
विशिष्टः तत्पर्यायः चरिष्णुः २
चरः ३ त्रसः ४ इङ्गं ५ चराचरः ६

इत्यमरः ॥

जङ्गमकुटी स्त्री छत्रं । इति
त्रिकाण्डशेषः ॥

जङ्गलं त्रि निर्जलदेशः इति
शब्दरत्नावली निर्जनस्थानं
पिशिते स्त्री । इतिमेदिनी ॥

जङ्गालः पुं सेतुविशेषः जा
ङ्गाल इतिभाषा तत्पर्यायः आ
लिः २ पंक्तिः ३ सेतुः ४ संवरः
५ इतिजटाधरः ॥

जेगुलं क्ली विषं इतित्रिकाण्डशे
षः

जङ्घा स्त्री गुल्फोर्द्ध्वजान्वधो
भागः जाङ् इतिभाषा तत्पर्या
यः प्रसृता २ इत्यमरः ॥

जङ्घाकरिकः त्रिधावकः तत्पर्या
यः जाङ्घिकः २ इत्यमरः ॥

जङ्घात्राणं क्ली जङ्घासन्नाहः त
त्पर्यायः । मङ्गत्राणं २ इति
त्रिकाण्डशेषः ॥

जङ्घालः त्रि अतिवेगवान् तत्प
र्यायः अतिजवः २ इत्यमरः
हरिणः ॥ एणः कुरङ्गः ॥
ऋष्याः पृषतः न्यङ्कुः शम्बरः
राजीवः मुण्डी चवो मांसगु
णाः जङ्घालाः प्रायशः सर्वे
पित्त श्लेष्म हराः स्मृताः किंचि
द्वातकराश्चापिलघवो बलवर्द्ध
नाः इतिभावप्रकाशः ॥

जज्ज युद्धे इतिकविकल्पद्रुमः

जञ्ज युद्धे इतिकविकल्प
द्रुमः

जञ्जपूकः त्रि पुनःपुन
र्जपकर्त्ता इतिमुग्धबोधं ॥

जट संहतौ इतिकविकल्पद्रुमः

जटा स्त्री लग्नकचः तत्पर्यायः
शटा २ इत्यमरः मूलं मांसी
इति मेदिनी ॥ रुद्रजटा ॥
शतावरी इति राजनिर्घण्टः
कपिकच्छुः इतिरत्नमाला ॥

जटाजूटः पुं जटासमूहः यथा
जटाजूट ग्रन्थिं द्रढयति रघू
णांपरिवृढः इति महानाटके
शिवजटाच ॥

जटाज्वालः पुं प्रदीपः । इति
हारावली ॥

जटाटङ्कः पुं शिवः । इति
त्रिकाण्डशेषः ॥

जटाटीरः पुं शिवः । इति
त्रिकाण्डशेषः ॥

जटाधरः पुं शिवः । इति
शब्दरत्नावली बुद्धभेदः इति
त्रिकाण्डशेषः अभिधानतन्त्र
कारश्च ॥

ऊपमास्थाय तदश्नन्ति दिवौकसः
वस्यालयगतेनहि निर्म्माल्यं पति
तादयः स्पृशन्ति चेच्चतुष्टं हि यथा
विष्णुस्तथैवतत् निंदन्ति ये तद
स्तते मूढाः पंडितमानिनः स्वयं
देवपरस्तेषु सहतेनापराधिनः
येषामत्रतदण्डश्चैकुण्वा तेषां हि
दुर्गतिः कुंभीपाके महाघोरे प
च्यन्ते नेतिदारुणे चिरस्थमपि
संस्पृष्टं नीतंवा हर देशतः
यथातथोपयुक्तंतत् सर्वपापा
पनोदनं नैवेद्यान्नं जगन्नाथंगा
कुंवादिसमंहयं दृष्टिस्पर्शन
चिंताभिर्भक्षणादव नाशनं
इत्युत्कलखण्डे ॥ सकलेर्द
शा सहस्रवर्षं पर्य्यन्तं स्थि
ता तिष्ठति यथा शालग्रामा
हरेर्मूर्त्तिं जगन्नाथस्य भारते
कलेर्दशसहस्रान्तेययौत्य ।
क्त्वा हरेः पदं इति ब्रह्मवैवर्त्ते
प्रकृतिखंडः ॥
जगन्नः पुं अग्निः जन्तु इति
विश्वः शब्दरत्नावलीच जगत्
रपिपाठः ॥ जगरः पुं कवचः
इतिहेमचंद्रः जगलः पुं सुराक
ल्कः मेधा इतिभाषा तत्पर्यायः
मेदकः २॥

इत्यमरः मदनवृक्षः पिष्टमद्यं
धूर्त्तेत्रि इति मेदिनी कवचः
रलयोरैक्यात् गोमये क्ली इ
तिरत्नमाला ॥
जग्धं त्रि भुक्तं इत्यमरः
जग्धिः स्त्री सहभोजनं इत्यमरः
भक्षणं इतिहेमचंद्रः ॥
जग्मिः पुं वायुः इतिकेचित्
जघनं क्ली स्त्रीकट्याः पुरोभागः
कटिः इतिमेदिनी ॥
जघनकूपकौ पुं कुकुन्दरौ इ
तिहलायुधः द्विवचनान्तोयं ।
शब्दः ॥
जघनेफला स्त्री काकोदुम्बरि
का इत्यमरः ॥
जघन्यः त्रि चरमः गर्हितः ॥
मेहने क्ली इति मेदिनी ॥
शूद्रेपुं इतिशब्दरत्नावली ॥
जघन्यजः पुं स्त्री शूद्रः कनिष्ठः
इतिमेदिनी ॥
जघ्निः पुं हननयोग्यास्त्रं इति
संक्षिप्तसारः ॥
जघ्नुः त्रि हन्ता हननकर्त्ता ।
इत्युणादिकोषः । जंगमः त्रि अ
स्थावरः गति शक्ति विशिष्टः
तत्पर्यायः चरिष्णुः २ चरः ३ ज
सः ४ इङ्गः ५ चराचरः ६

1035

जटी पुं प्लक्षवृक्षः इत्यमरः
जटाविशिष्टेत्रि ॥
जटुलः पुं जतुकं जरुउ इति
भाषा तत्पर्यायः कालकः २
पिप्लुः ३ इत्यमरः
जठरं त्रि बद्धं कठिन इति
शब्दरत्नावली ॥
जठरः पुं क्ली उदरं इति मे
दिनी ॥
जठरनुत् पुं आरग्वधवृक्षः
इतिशब्दचंद्रिका ॥
जठरामयः पुं जलोदररोगः
इतिराजनिर्घण्टः ॥
जडं क्ली जलं । इत्यमरटीका
यां रायमुकुटः सीसकं इति
राजनिर्घण्टः ॥
जडः त्रि हिमग्रस्तः ॥ मूकः
अप्रज्ञः इति मेदिनी ॥
जडक्रियः त्रि दीर्घसूत्री चिरक्रि
यः इतिहलायुधः ॥
जडता स्त्री जाड्यं तत्पर्यायः ।
स्तैमित्यं २ शीतलत्वं ३ अपा
टवं ४ इति राजनिर्घण्टः वि
रहदुःखेनजीवनमात्रस्थितिः
इतिरसमंजरी ॥
जडा स्त्री शूकशिम्बी इत्यमरः ।

भूम्यामलकी इति रत्नमाला
जडिमा[न] पुं जडता तस्यलक्ष
णं यथा इष्टानिष्टापरिज्ञानं यत्र
प्रश्नेष्वनुत्तरं दर्शनश्रवणाभा
वोजडिमा सोऽभिधीयते इत्यु
ज्ज्वलनीलमणिः ॥
जडुलः पुं देहस्थिततिलकः इ
ति हेमचंद्रः ॥
जतु क्ली वृक्षनिर्यासविशेषः
जौ इति लाहा इति च भाषा तत्पर्या
यः राक्षा २ लाक्षा ३ यावः ४ अ
लक्तः ५ द्रुमामयः ६ इत्यमरः
रक्ता ७ इतिरभसः कीटजा ८
क्रिमिजा ९ जतुका १० जन्तुका ११
गन्धाविका १२ इतिरत्नमाला ।
जतुकं क्ली हिङ्गु लाक्षा इति
मेदिनी ॥
जतुका स्त्री जनीनामगन्धद्रव्यं
इत्यमरटीकायां भरतः चर्मच
टिका इति शब्दरत्नावली ॥
पर्पटी इति भावप्रकाशः ॥
लताविशेषः सा तु मालवेप्र
सिद्धा तस्याः पर्यायः जतुका
री २ जननी ३ चक्रवर्त्तिनी ४
तिर्य्यक्फला ५ निशान्धा ६
वक्रगुञ्जी ७ सपुत्रिका ८ राजह
ता ९ जनेष्टा १० ॥

कपिकच्छुफलोपमा ११ रंजनी
१२ सूक्ष्मवल्ली १३ भ्रमरी १४ कृष्ण
वल्लिका १५ विक्तूलिका १६ कृष्ण
रुहा १७ ग्रंथिपर्णी १८ स्ववर्द्धिका
१९ जतुवल्ली २० दीर्घफला २१ अस्या
गुणाः शिशिरत्वं तिक्तत्वं रक्त
पित्त कफ दाह तृष्णा विषना
शित्वं रुचिकारित्वं दीपनत्वंच
इतिराजनिर्घण्टः जतुकापि
पाठः निशांधाकृष्णरुहयोरिमे
त्वकमेणनिशाकृष्णरुहाचपा
ठः जतुकारी स्त्री जतुकालता
इति राजनिर्घण्टः ॥
जतुकृत् स्त्री जनीनामगंधद्रव्यं
इत्यमरः ॥
जतुकृष्णा स्त्री पर्पटी । इति
भावप्रकाशः
जतुनी स्त्री चर्मचटिका इति
त्रिकाण्डशेषः
जतुपुत्रकः पुं नयः पाशकस्य
टिका इतित्रिकाण्डशेषः
जतुमणिः पुं क्षुद्ररोगविशेषः
तस्यनिदानं यथा सममुत्सन्नं
मरुजं मण्डलं कफरक्तजं सह
जं लक्ष्म चैकेषां लक्ष्मा जतुमणि
श्चसः इतिमाधवकरः ॥

जतुरसः पुं अलक्तकः इति
राजनिर्घण्टः ॥
जतुका स्त्री जनी नामगंध द्र
व्यं इत्यमरः ॥ चर्मचटी इति
शब्दरत्नावली ॥
जत्रु क्ली स्कंधसंधिः पाखुरा
इतिभाषा इत्यमरः ॥
जत्रुकं क्ली जत्रु इतिशब्दरत्ना
वली जतुपत्रकं क्ली शिलाजतु
इतिराजनिर्घण्टः
जन म ल इर जनो जनने इति
कविकल्पद्रुमः ॥
जन ई म च य जनो जनने इ
ति कविकल्पद्रुमः
जनःपुं लोकः महर्लोकादू
र्ध्वलोकः पामरः । इति मे
दिनी ॥
जनकः पुं पिता राजभेदः ।
सतु मिथिलाधिपतिः इति
मेदिनी इक्ष्वाकुराजपुत्रो निमि
र्वशिष्ठं त्यक्त्वा यज्ञं कृतवान्
वशिष्ठस्तद्यज्ञस्थान मागत्य रा
जानमाह्वायामास राजा तदा नि
द्रितः मुनिक्रोधात्तंशशाप तेनवि
देहोऽभव दृष्ट्वा विदेहंराजानमृष
यः सर्वपवने तत्रैनेयाजयामास

यावद्दीक्षां मनीषिणः नरेन्द्र
स्यापितं देहमरक्षन्नृषिपुङ्ग
वाः वस्त्रैर्माल्यैश्च गंधैश्च शम
मानंममन्थुः ऋषयोपिमहा
त्मानो निमिदेहं मम स्थिरे अर
णिं तस्य देहात् मन्थानेवापि च
क्रिरे मंत्रहोमै महात्मानः पुत्र
हेतोर्निमे स्तदा अरण्यां मथ्य
मानायां प्रादुर्भूतो यतस्ततः ।
यतो मिथिरिति ख्यातो जनना
ज्जनकोऽभवत् । विदेहस्त्वभव
द्यस्मान्महात्मा सुमहातपाः त
स्माद्विदेहाः प्रोच्यन्ते सर्वे तद्वंश्या
जातयः एवं विदेहराजस्तु पूर्व
कोजनकोभवत् ॥ मिथिर्नाममहा
वीर्यो येन सा मिथिला भवत् ।
इतिरामायणं । तत्पादके त्रि ॥
जनकतनया स्त्री सीता इति
रामायणं ॥
जनकनंदिनी स्त्री सीता । इति
रामायणं ॥
जनकसुता स्त्री सीता । इति
रामायणं ॥
जनकात्मजा स्त्री सीता । इति ।
शब्दरत्नावली ॥
जनकारी पुं अलक्तकः । इति
राजनिर्घण्टः ॥

जनङ्गमः पुं चाण्डालः इत्यमरः
जनता स्त्री जनसमूहः इत्यमरः
जनत्वंच ॥
जनने क्ली वंशः जन्म । इतिमे
दिनी ॥
जननिः स्त्री जनी नाम गंध द्रव्यं
इतिशब्दरत्नावली ॥
जननी स्त्री माता ॥ दया इति
मेदिनी जनीनाम गंध द्रव्यं
चर्मचटी इति शब्दरत्नावली ॥
यूथिका । इति शब्दचंद्रिका ॥
कटुका मंजिष्ठा अलक्तकः
जटामांसी इति राजनिर्घण्टः
जनपदः पुं देशः जनः इति
मेदिनी ॥
जनप्रवादः पुं लोकापवादः
तत्पर्य्यायः । कौलीनं १ विगा
नं २ वचनीयता ४ इतिहेमचं
द्रः जनप्रियः पुं धान्यकं शो
भांजनवृक्षः इतिराजनिर्घण्टः
जनमेजयः पुं परीक्षितराजपु
त्रः तत्पर्य्यायः राजर्षिः १ पारी
क्षितः २ इति त्रिकाण्डशेषः
पुरुराजपुत्रः । इतिश्रीभागव
ते । जनयिता पुं पिता इतिहेम
चंद्रः जनयित्री स्त्री माता इत्यमरः
जनरवः पुं लोकवादः । यथा ।

परीवादस्तथ्यो भवति वितथो
वापि महतां तथाप्युच्चैर्धाम्नो ह
रति महिमानं जनरवः इतिल १
क्ष्मणसेनः ॥
जनलोकः पुं महर्लोकोपरि
भुवनं यथा अयं सहि महर्लोकः
स्वर्लोकात् परमाद्भुतः कल्पायु
षोवसंत्यत्र तपसा धूतकल्मषाः
इत्थं कथां कथयतोर्भगवद्गणा
योःप्रिये तूर्णाद्येन विमानतूर्ज
नलोकं निनाय तात् निवसंत्य
मला यत्र मानसा ब्रह्मणः सु
ताः सनंदनाद्या योगीन्द्राः सर्वे
तेस्युर्द्धरेतसः अस्मिन्न योगिनो
येवैद्यम्यलङ्घ्यब्रह्मचारिणः सर्व
द्वंद्वविनिर्मुक्ता स्तेवसंत्यत्र नि
र्मलाः महर्लोकः स्थितेत्रद्वे मे
क कोटिप्रमाणतः कोटिद्वयेति
साव्यातोजनो भूर्लोकतो जनैः
इतिस्कांदे काशीखंडे ॥
जनवल्लभः पुं श्वेतरोहितद्रुः
इतिराजनिर्घंटः लोकप्रिये
त्रि जनवादः पुं जनप्रवादः
इतिहलायुधः ॥
जनश्रुतिः स्त्री सत्य मसत्यं
वा लोकप्रवादः तत्पर्यायः
किंवदंती २ इत्यमरः ॥

जनस्थानं क्ली दण्डकारण्यं
इतिजटाधरः दंडकारण्यसमीप
स्थानविशेषः यथा इक्ष्वाकुराज
पुत्रोदंडः शुक्राचार्यकन्यामरजां
बलाद्गृहीत्वा मैथुनं कृतवान्सशु
निस्तत्कृतेराजानं शशाप स
मरोषेणराजासौ सभृत्य बलवा
हनः पापकर्म समाचारोवधंप्रा
प्स्यति दुर्मतिः सर्व सत्वानि यानी
ह जंगमानि स्थिराणि च सर्वेषां
पांसुवर्षेणाक्षयः क्षिप्रंभविष्यति
दण्डस्य विषयो यावत् तावत्
सवनमाश्रमं पांसुभूतमिवाक
स्मात् सप्तरात्राद्भविष्यति इत्यु
क्त्वा क्रोधसंतप्त स्तदाश्रमनिवा
सिनं जनं जनपदस्यांते स्थीय।
तामित्यवोचत सप्तहाद्भस्मसात्
तः सचापि बलतेजसा तस्य दण्ड
स्य विषयो विंध्यशैलस्य सानुषु
तदा प्रभृति काकुत्स्थ दण्डकार
ण्यमुच्यते तपस्विनः स्थिता यत्र
तज्जनस्थानमुच्यते ॥ इति
रामायणं ॥
जनाशी उत्पत्तिः । इति
मुग्धबोधं ॥
जनाजः पुं देशः जेला इति
पारस्य भाषा इति धनंजयः ॥

जनान्तिकं क्ली अप्रकाशः इति
त्रिकाण्डशेषः ॥
जनार्द्दनः पुं विष्णुः इत्यमरः ॥
आरोग्यं भास्करादिच्छेद्धनमिच्छे
द्धुताशनात् ज्ञानंच शंकरादिच्छे
न्मुक्तिमिच्छेज्जनार्दनात् इतिक
र्मलोचने ॥
जनाशनः पुं वृकः । इति
राजनिर्घण्टः
जनाश्रयः पुं मण्डपः इत्यमरः।
जनिः स्त्री उत्पत्तिः इत्यमरः ॥
नारी माता इतिशब्दरत्नावली
जनीनामगंधद्रव्यं इत्यमरटीका
यां रायमुकुटः ॥
जनिका स्त्री स्नुषा इतिशब्दरत्ना
वली जननकर्त्रीच ॥
जनितं त्रि उत्पादितं यथा से
नाचरी भवदिभानन दानवारि
वासेन यस्य जनिता सुरभी रणा
श्रीः इतिनैषधं ॥
जनिता पुं पिता इतिशब्दरत्नावली
जनित्रीस्त्रीमाता इतिशब्दरत्नाव
ली जनित्वः पुंपिता इत्युणादिको
षः जनिनीलिका स्त्री महानाली
इतिराजनिर्घण्टः
जनिमा पुं जन्म इत्युणादिकोषः

जनितास्त्रीमा
ता इत्युणादिकोशः

जनी स्त्री सीमंतिनी वधूः उत्प
त्तिः औषधीभित् इतिमेदिनी
शोषस्य पर्यायः जतुका १ र
जनी २ जतुकृत् ४ चक्रवर्त्ति
नी ५ संस्पर्शा ६ इत्यमरः जतु
का ७ जनिः ८ जननी ९
इति भरतः राजनिर्घण्टोक्त
गुणपर्यायोजतुकाशब्दे द्रष्ट
व्यः। जनुः क्ली जन्म इत्यमरः
जनुः स्त्री जन्म इत्युणादिकोषः
जनुः स्त्री जन्म इतिशब्दरत्नाव
ली जनेष्टः पुं मुद्गरवृक्षः इति
राजनिर्घण्टः ॥
जनेष्टा स्त्री जतुका वृद्धिना
मौषधिः जातीपुष्पं हरिद्रा इ
तिराजनिर्घण्टः
जनोदाहरणं क्ली यशः इतिध
नंजयः जनौः पुं जनरत्नकः इति
मुग्धबोधं जन्तुः पुं प्राणी इत्यम
रः जन्तुकम्बुः पुं क्रमिशावः
इतिराजनिर्घण्टः ॥
जन्तुका स्त्री नाडीहिङ्गुः लाक्षा
इति राजनिर्घण्टः
जन्तुघ्नं क्ली विडङ्गं इतिशब्दरत्ना
वली हिंगु इतिरत्नमाला जन्तु
घ्नः पुं वीजपूरः इतिराजनिर्घण्टः
जन्तुघ्नी स्त्री विडङ्गं । इति।

राजनिर्घण्टः
जन्तुनाशनं क्ली हिङ्गु इति
राजनिर्घण्टः
जन्तुपादपः पुं कोषाम्रवृक्षः इ
ति राजनिर्घण्टः ॥
जन्तुःफलः पुं उडुम्बरः इत्यमरः
जन्तुमारी स्त्री निम्बुकः इति
राजनिर्घण्टः
जन्तुला स्त्री काशतृणं इति
त्रिकाण्डशेषः ॥
जन्तुहन्त्री स्त्री विडङ्गं इतिरा
जनिर्घण्टः ॥
जन्म क्ली आद्यक्षणसंबन्धः
तत्पर्य्यायः जनुः २ जननं ३
जनिः ४ उत्पत्तिः ५ उद्भव ६ इत्य
मरः जन्म ७ जनी ८ इतिभरतः
तच्च शुभाशुभ कर्म्मणा भवति
यथा शुभानामशुभानांच क
र्म्मणांजन्मजायते पुण्यदेहेषुच
देवजन्मास्वच भुंजते जनाः इतिब्र
ह्मवैवर्त्ते प्रकृतिखण्डः ॥ तस्य
क्रमो यथा । ऋतौ विकाशी
भवति योनिः कमलवत्सदा
गर्भाशयस्ततः शुक्रं धत्ते र
क्तं समन्वितः अन्यस्य कालेषु
कुलायोनि भवति योषितां स
ह शुक्रमतोयोनौनैतिगर्भाशये।
शनैःशनैः ॥ ऋतावपिच योनिश्चे
द्वात पित्त कफावृता भवेत्तदा
विशेषत्वं नैवतस्याः प्रजायते ॥
ऋतु काले यदा शुक्रं निर्दोषं
योनिसंस्थितं तदा तद्वायुनास्पृ
ष्टं स्त्रीरक्तेनैकतां व्रजेत् ॥
निषेकं मानवं स्त्रीणां बीजं।
प्राप्तं रजस्यथ शुक्रं मात्रोपि
नरकात् स्वर्गाद्वापि प्रपद्यते ॥
विसर्गकाले शुक्रस्य जीवः करणं
संवृतः प्रत्यक्षविशते योनिं क
र्म्मभिः स्वैर्नियोजितः ॥ तच्छु
क रक्त मेकस्थ मेकाहात्
कललंभवेत् पंचरात्रेण कललं
बुद्बुदाकारतां व्रजेत् बुद्बुदः स
प्तरात्रेणमांसपेशी भवेत्ततः ।
द्विसप्ताहाद्भवेत् पेशी रक्तमां
साचिताद्दृढा बीजस्येवांकुराः
पेश्याः पंचविंशति रात्रतः भ
वन्तिमासमात्रेणपंचधाजायते
पुनः ग्रीवाशिरश्चस्कंधपृष्ठवं
शास्तथोदरं पाणिपादंतथापार्श्वं
कटिमात्रं तथैवच मासद्वयेन
सर्वाणि क्रमशः सम्भवन्ति हि।
त्रिभि र्म्मासैः प्रजायन्ते सर्वाङ्गाङ्कु
रसंधयः मासेश्चतुर्भिरंगुल्यः प्र
जायन्तेयथाक्रमं स्थैर्य्यंचतुर्थे ॥

व
चाङ्गानांपंचमेशोणितोद्भवः ॥
मुखंनासाचकर्णौजायन्तेमासिपं
चमे षष्ठे बलस्य वर्णस्य नख
लोम्नांचसंभवः दन्तपंक्तिस्तथा
गुह्यं जायन्तेचनखाःपुनः कर्णौ
योश्चभवेच्छिद्रंसप्तमासात्यनन्तरे
णच ॥ पायुर्मेढ्रमुपस्थंचनाभि
श्चैवोपजायते । सन्धयो येचगा
त्रेषुजायन्तेमासिसप्तमे मनस्तचे
तनायुक्तो नाडी स्नायु सिरास्ततः
सप्तमेचाष्टमेचैवत्वङ्मांसस्मृति
मानपि ॥ अङ्ग प्रत्यङ्ग सम्पूर्णः
शिरःकेश समन्वितः । विभक्ता
वयवः स्पष्टः पुन र्म्मासाष्टमेन च
नवमेदशमे मासि प्रबलैः सूति
मारुतैः । निःसार्य्यते बाण इवज
न्तुश्छिद्रेण सज्वरः ॥ मनस
श्चेचलत्वेन यदागर्भस्थिति र्भवेत्
तदा विकृति रूपेण पापात्मादि
प्रजायते पुटद्वयंसमासाद्य
यदावहतिमारुतः तदाप्रसूते
पापिष्ठान् षण्डान् कर्म्म वहिष्कृ
तान् ॥ मातृरक्तोत्तरानारीपितृः
शुक्रोत्तरो नरः उभयो र्बीजसा
म्ये जायते वै नपुंसकं ॥
अन्यच्च विषमायां तिथौ दिनं।
ऊर्ध्वाद्दीजन्त कन्यका समायां
पुरुषंत्वनंकेचिदाहुर्मनीषिणः ॥
वामाङ्गेन भवेन्नारी दक्षिणेनपु
मान् भवेत् । रक्ताधिकेमात
रूपंरेतोधिकोत्वपैतृकं शुक्रशो
णित संघाते वायुनाच द्विधा
कृते । यमौ स्यातां त्रिधा चेति
चतुर्धा वहुधापिवा ॥
ततो हीनाधिकव्यङ्ग कुब्जवामन
कादयः । जायते सर्प कूष्माण्ड
विकृताम्याश्चयोनयः तथाच
स्मारकलिकायां । गर्भान्तकोटिपु
ण्डुःखं योनियंत्र निपीडने सं
मूर्छा तस्य जठराज्जायमानस्य
देहिनः जायमानःपुरीषासृङ्मू
त्रशुक्राविलाननः प्राजापत्येन
वातेन पीड्यमानास्थि बंधनः
अधोमुखो वै क्रियते प्रबलैः
सूतिमारुतैः क्लेशान्निष्क्रान्ति
माप्नोतिजठरान्मातुरातुरः त
तस्तं वैष्णवी माया समास्कन्दति
मोहिनी तयाविमोहितात्मा
सौज्ञानभ्रंशमवाप्नुयात् स्पृष्ट
मात्रस्यबाह्येन ज्वरःसमुपजाय
ते [illegible] छिन्नाङ्कुरक
र्त्तनज्वरेणमहता महामोहः प्र
जायते कर्णकेरिवच्छिन्नाङ्कुरक
चैरिवदारितः इति ब्रह्मानिपति
तोधरण्यांक्रिमिकोयथा तद्वुभ्रता

परीताङ्गः क्वचित्तिष्ठति वा रटन्
विण्मूत्र भक्षणाद्यञ्च गतज्ञानः
समाचरेत् कण्डूयनेऽपिचाश
क्तः परिवर्त्तेऽप्यनीश्वरः स्नानपा
नादिकाहार मप्याप्नोति परेच्छया
अशुचिः संस्तरे सुप्तः कीटदंशा
दिभि स्तथा भक्ष्यमाणोऽपि नै
वैषां समर्थो विनिवारणे ॥ के
नवेयं नवहोहं कारणं किमका
रणं किं कार्य्यं किमकार्य्यं वा
किं वाच्यं किंच नोच्यते कोः
धर्मः कश्च वै धर्मः कस्मिन्
वा वर्त्तते कथं । किं कर्त्तव्यम
कर्त्तव्यं किं वा किं गुण दोषवत्
सेम्फस्य स्मृति भ्रंशः शीघ्रंस
जायते पुनः रतिसंजायते तृ
ष्णा जन्तोस्तत्रैव जन्मनि रक्तोमू
ढश्च लोकोऽयमकार्य्ये संप्रव
र्त्तते देही देहे परित्यज्य नैं
दृस्थान मपीच्छति ॥ तस्मात्
कीटोऽपि जन्तुनां सम्मोहो जाय
ते भृशं नचात्मानं विजानाति
नपरं नच दैवतं न शृणोति प
रं श्रेयः सति चक्षुषि नेक्षते तु
द्धो सत्यं न जानाति बुध्यमानो
बुधैरपि संसारे क्लिश्यते तेन तृ
लोभवशानुगः इति स्वबोधः

जन्म क्ली उत्पत्तिः इत्यमरः ॥
टीकायां भरतः ॥
जन्मकीलः पुं विष्णुः इति त्रिका
ण्डशेषः ॥
जन्मदः पुं पिता इति शब्दरत्ना
वली जन्मवर्त्म न क्ली योनि इति
त्रिकाण्डशेषः ॥
जन्मान्तरं क्ली परलोकः इति
भरतः तत्पर्य्यायः भवान्तरं प्रे
त्य २ अमुत्र २ इत्यमरः ॥
जन्माष्टमी स्त्री श्रीकृष्णजन्मति
थिः सा तु मुख्यचान्द्रेण श्रावण
स्य कृष्णाष्टमी गौणचान्द्रेण भाद्र
स्य तत्र श्रीकृष्णस्य जन्मकालो य
था ब्रह्मपुराणे अथ भाद्रपदे मा
सि कृष्णाष्टम्यां कलौ युगे अष्टावि
शतिमे जातः कृष्णोऽसौ देवकी
सुतः विष्णुपुराणे महामाया
प्रति भगवद्वाक्यं प्रावृट्काले च
नभसि कृष्णाष्टम्यां महानिशि
उत्पत्स्यामि नवम्यान्तु प्रसूतिं
त्वमवाप्स्यसि श्रावणे वा नभस्ये
वा रोहिणीसहिताष्टमी यदा कृ
ष्णनरैर्लब्धा सा जयन्ती प्रकीर्त्ति
ता अग्निपुराणे रोहिणी सहि
ता कृष्णा मासि भाद्रपदेऽष्टमी
सप्तम्यामर्द्धरात्राधः कलयापि यदा

भवेत् तत्र जातो जगन्नाथः कौ
स्तुभी हरि रीश्वरः तमेवोपवसेत्
कालं तत्रकुर्य्याच्च जागरं ॥ अ
विद्धायांच सर्वायां जातो देवकी
नन्दनः इति समस्तवेधे जन्म श्र
वणं कल्पभेदादविरुद्धं ॥ नव
म्यादि योगस्य प्रशंसा यथा ॥
ब्रह्मवैवर्त्ते उदये चाष्टमी किञ्चि
नवमी सकला यदि भवेत्तु बु
धसंयुक्ता प्राजापत्यर्क्षसंयुता ॥
अपि वर्षशतेनापि लभ्यते वा न
वा विभो पद्मपुराणे । प्रेतयो
नि गतानान्तु प्रेतत्वं नाशितं त
नैः यैः कृता श्रावणे मासि
अष्टमी रोहिणीयुता किं पुनर्बु
धवारेण सोमेनापि विशेषतः ।
किं पुनर्नवमीयुक्ता कुलकोट्यास्तु
मुक्तिदा उपवासादि फलं यथा
भविष्य पुराणे । एकेनैवोप
वासेन कृतेन कुरुनन्दन । स
प्तजन्मकृतात् पापान्मुच्यते नात्र
संशयः ॥ ब्रह्मवैवर्त्ते मन्वादि
दिवसप्राप्ते यत्फलं स्नानपूजनैः
फलं भाद्रपदेऽष्टम्यां भवेत् को
टिगुणं द्विज ॥ तस्यां तिथौ वा
रिमात्रं पितृणां यः प्रयच्छति ॥
गयाश्राद्धं कृतं तेन शताब्दं ना ॥

त्र संशयः ॥ उपवासाकरणे दो
षो यथा भविष्योत्तरे । श्रावणे
ऽबहुले पक्षे कृष्णजन्माष्टमीव्रतं
न करोति नरो यस्तु स भवेत् क्रू
र राक्षसः वर्षे वर्षे च या नारी कृ
ष्णजन्माष्टमीव्रतं न करोति महा
क्रूरा व्याली भवति कानने स्कान्दे
न करोति यदा विष्णो र्जयन्ती
सम्भवं व्रतं । यमस्य वशमापन्नः
सहते नारकीं व्यथां । भविष्य
त्पुराणे देवकीसूनो र्जयन्ती
सम्भवं व्रतं कर्त्तव्यं वित्तमाने
न भक्त्या भक्तजनैः सह अकुर्व्व
न्नरकं याति यावदिन्द्राश्चतुर्द
श तत्रोपवासक्रमः भविष्यपु
राणे । पार्थ्य तद्दिवसे प्राप्ते द
न्तधावन पूर्वकं । उपवासस्य
नियमं गृह्णीयाद्भक्तिभावतः ॥
वासुदेवं समुद्दिश्य सर्वपापप्र
शान्तये । उपवासं करिष्यामि
कृष्णाष्टम्यां नभस्यहं ॥ अद्य
कृष्णाष्टमीं देवीं नभश्चन्द्रस
रोहिणीं । अर्च्चयित्वोपवासेन
भोक्ष्येऽहमपरेऽहनि ॥ एनसो
मोक्षकामोऽस्मि यद्गोविन्द त्रि
योनिजं तन्मे मुञ्चतु मां त्राहि प
तितं शोकसागरे ॥ आजन्म

मरणं यद्वियन्मया दुष्कृतं कृतं
तत् प्रणाशाय गोविन्द प्रसीद
पुरुषोत्तम ॥ गृहस्यैकदेशे त
त्स्वच्छे प्रतिमास्थाप्याः काञ्चनादि
विनिर्मिता प्रतप्तकाञ्चनाभा
सा देवकी सुतपस्विनी मञ्चा
पिबालकं स्तनं प्रसक्तानीरदच्छ
वि वसुदेवोऽपि तत्रैव खड्गचर्मध
रस्थितः यशोदा चापि तत्रैव
प्रसूत वरकन्यका बलभद्रस्त
थानन्दो दक्षो गर्गश्चनमेखः प
वैसं पूजयेद्भक्त्या गंध पुष्पाक्ष
तैः फलैः स्थण्डिले स्थापयेद्देवीं
सचेन्द्रां रोहिणीं तथा देवकीं
वसुदेवञ्च यशोदां नन्दमेवच
चण्डिकां बलदेवञ्च पूज्य पापैः
प्रमुच्यते अर्द्धरात्रे वसोर्धारापा
तयेद्गुडसर्पिषा ततो षष्ठी पने
षष्ठी नामादेः करणं मम ॥
कर्त्तव्यं तत्क्षणाद्रात्रौ प्रभाते
नवमी दिने यथा मम तथा
कार्योभगवत्या महोत्सवः ब्रा
ह्मणान् भोजयेद्भक्त्या तेभ्यो
दद्याद्दक्षिणां सुवर्णं काञ्चनं
गाश्च वासांसि कुसुमानि च यद्यदि
ष्टतमं लोके कृष्णो मे प्रीयतामि
ति यं देवं देवकी देवी वसुदेवाद

जीजनत् भौमस्य ब्रह्मणो गुप्त्यै
तस्मै ब्रह्मात्मने नमः सुब्रह्म
वासुदेवाय गोब्राह्मणहिताय च
शान्तिरस्तु शिवं चास्तु इत्युक्त्वा तान्
विसर्जयेत् एवं यः कुरुते देवादे
वक्याः सुमहोत्सवं वर्षे वर्षे भग
वता मद्भक्त्या धर्मनन्दन ॥ नरो
वा यदि वा नारी यथोक्तफलमा
माप्नुयात् पुत्रसन्तानमारोग्य
धनधान्यर्द्धि मद्गृहे सम्यक् ।
एणाप्रियः कुर्यात् कश्चिज्जन्माष्ट
मीव्रतं विष्णुलोकमवाप्नोति नरो
नास्त्यत्र संशयः सुताच मथुरा
चेनारूढे कृष्णाष्टम्यास्तु रोहि
ण्यामर्द्धरात्रेऽर्चनं हरेः व्रतपा
रणायो काल नियमः एकदि
ने जयन्ती लाभे तत्रैवोपवासः
उभय दिने चेत्तदा परदिने ॥
जयन्त्यलाभे तु रोहिणी युक्ताष्ट
म्यां उभयदिने रोहिणीयुक्ताष्ट
मी लाभे परदिने तदलाभेतु नि
शीथ संबन्धिन्या सप्तम्या उभयदिने
निशीथ संबन्धे तदसम्बन्धे वा
परदिने इति ॥ उपवास
परदिने तिथि नक्षत्रयो ।
रवसाने पारणं यदा म
हानिशायाः पूर्वमेकतरं ॥

स्यावसानमन्यतरस्य महानिशा
यां तदनन्तरं वा तदेकतरावसाने
पारणं यदा महानिशायामुभय
स्थितिस्तदा उत्सवान्ते पारणं इ
ति तिथ्यादितत्त्वं ॥ हरिभक्ति
विलासमते तूपवास कालो य
था जन्माष्टमी पूर्वविद्धा न क
र्त्तव्या कदाचन पलवेधेनु विप्रे
न्द्र सप्तम्याष्टमीं त्यजेत् सुराया
विन्दुनास्पृष्टं गङ्गाम्भः कलसं य
था विना ऋक्षेण कर्त्तव्या नवमी
संयुताष्टमी सऋक्षापि न कर्त्त
व्या सप्तमी संयुताष्टमी तस्मा
त्सर्वप्रयत्नेन त्याज्यमेवाशुभं बु
धैः वेधे पुण्यक्षयं याति तमः सू
र्योदये यथा पद्म वह्नि पुराणा
दौ प्रोक्ते विद्धाष्टमीव्रते अवैष्णव
परं तच्च कृतं वा देव मायया ॥
पारण कालो यथा यदा ति
थ्य र्क्षयो रेव द्वयो रन्ते तु पारणं
समर्थानां मशक्तानां द्वयोरेक
वियोगतः ॥ केचिच्च भगव
ज्जन्ममहोत्सवदिनेप्युभे भक्तो
त्सवान्ते कुर्वन्ति वैष्णवा व्रतपार
णं जम्मीनं पुं शाली इत्यमरः
जन्मेजयः पुं जनमेजयराजः

इतिश्रीभागवतं ॥
जन्यं क्ली हट्टः परीवादः संग्रामः
इतिमेदिनी ॥
जन्यः पुं जनकः इतिमेदिनी ॥
जन्यः त्रि उत्पाद्यः यथा जनकस्य
स्वभावोहि जन्येतिष्ठति निश्चितं
यथा श्रीकृष्ण पादाङ्क कालीय
वंश मस्तके इति ब्रह्मवैवर्त्ते श्री
कृष्णजन्मखण्डे ॥ जनयिता ॥
नवोढा ज्ञातिः नवोढाभृत्यः
वरस्यास्निग्धः सतु जामात्रवत्
सलः इतिमेदिनी जनहितः
इतिव्याकरणं ॥
जन्या स्त्री मातृवयस्या इतिमेदिनी
प्रीतिः इतिहेमचन्द्रः
जन्युः पुं प्राणी अग्निः धाता ।
इतिमेदिनी ॥
जप ऊ उच्चारे वाचि । इतिक
विकल्पद्रुमः ॥
जपः पुं मन्त्रोच्चारणं तस्यानुष्ठा
ने यथा मनः संहृत्य विषयान्मं
त्रार्थगतमानसः न द्रुतं न वि
लम्बं च जपेन्मौक्तिक पङ्क्ति
वत् जपः स्यादक्षरावृत्ति र्मानसो
पांशु वाचिकैः धिया यदक्षर
श्रेणी वर्ण स्वर पदात्मिका ॥
उच्चरेदर्थ ॥

उद्दिश्य मानसः स जपः स्मृतः ।
जिह्वोष्ठौ चालयेत् किञ्चिद्देवता-
गतमानसः । किञ्चिच्छ्रवणयो-
ग्यः स्यादुपांशुः स जपः स्मृतः ॥ म-
न्त्रमुच्चारयेद्वाचा वाचिकः स जपः
स्मृतः । उच्चैर्जपादिविशिष्टः स्या-
दुपांशुर्दशभिर्गुणैः । जिह्वाज-
पः शतगुणः सहस्रो मानसः
स्मृतः । जिह्वाजपः स विज्ञेयः के-
वलं जिह्वया बुधैः ॥ तत्र वर्ज्यं य-
था विष्णुधर्मे । स्नात्वा शोकादियु-
क्तः कर्म करोति च जपार्चना-
दिकं सर्वमपवित्रं भवेत् प्रिये
मलिनाम्बरं केशादि मुखदौर्ग-
न्ध्यसंयुतः । यो जपेत् तं दहन्त्या-
शु देवता गुप्तसंस्थिता ॥
आलस्यं जृम्भणं निद्रां क्षुतं निष्ठी-
वनं भयम् । नीचाङ्गस्पर्शनं कोपं
जपकाले विवर्जयेत् ॥ अथ
करमालाजपनियमो यथा
तर्जनी मध्यमानामा कनिष्ठा
चेति ताः क्रमात् । तिस्रोऽङ्गुल्य-
स्त्रिपर्वाणो मध्यमा चैकपर्वि-
का पर्वद्वयं मध्यमाया मेरुत्वे-
नोपकल्पयेत् अनामा मध्य-
मारभ्य कनिष्ठादित एव च ॥
तर्जनी मूल ॥ ॥

पर्य्यन्तं दश पर्वसु संजपेत्
अनामा मूलमारभ्य कनिष्ठा-
दित एव च तर्जनी मध्यपर्य्यन्त-
मष्टपर्वसु संजपेत् एतद्वचनं
तु अष्टोत्तरशतादि विषये श-
क्तिविषये पुनः अनामिकात्र-
यं पर्व कनिष्ठादि त्रिपर्विका
मध्यमायाश्च त्रितयं तर्जनीमू-
ले पर्वणि तर्जन्यग्रे तथा मध्ये
योजयेत् स न पापकृत् अना-
मा मूलमारभ्य प्रादक्षिण्यक्रमे-
ण च मध्यादिमूलपर्य्यन्तमष्ट-
पर्वसु संजपेत् श्रीविद्याविषये
पुनः अनामामध्यमायाश्च मू-
लाग्रे च द्वयं द्वयं कनिष्ठाया-
श्च तर्जन्यास्त्रयं पर्वसु रेख्यं
दि ॥ अनामा मध्यमायाश्च मे-
रुः स्यात् द्वितयं शुभं प्रदक्षि-
णक्रमाद्देवि जपेत् त्रिपुरसुन्दरीं
कनिष्ठामूलमारभ्य प्रादक्षिण्य-
क्रमेण च तर्जनीमूलपर्य्य-
न्तमष्टपर्वसु संजपेत् इदम-
पि अष्टोत्तरशतादिविषयं अङ्गु-
लीर्न वियुञ्जीत किञ्चिदाकुञ्चिते त-
ले अङ्गुलीनां वियोगाच्च छिद्रे च
स्रवते जपः अङ्गुल्यग्रेण यज्जप्तं
यज्जप्तं मेरुलङ्घने पर्वसन्धिषु

यज्जप्तं तत् सर्वं निष्फलं भवेत्
गणनाविधिमुल्लंघ्य यो जपेत्त-
ज्जपं यतः गृह्णन्ति राक्षसास्तेन
गणयेत् सर्वथा बुधः हृदये हस्त-
मारोप्य तिर्य्यक् कृत्वा कराङ्गुलीः
आच्छाद्य वाससा हस्तौ दक्षिणे-
न सदा जपेत् जपसंख्यायां नि-
षिद्धद्रव्यं यथा नाक्षतैर्हस्तप-
र्वैर्वा न धान्यैर्न च पुष्पकैः न
चन्दनैर्मृत्तिकया जपसंख्यां च
कारयेत् तत्र विहितद्रव्यं यथा
लाक्षाकुशीदसिन्दूरं गोमयं च क-
रीषकं एभिर्निर्माय वटिकां ज-
पसंख्यां तु कारयेत् अथ वर्णमा-
लाजपनियमो यथा सविन्दुं व-
र्णमुच्चार्य्य पश्चान्मन्त्रं जपेद्बुधः
अकारादिक्षकारान्तं विन्दुयुक्तं वि-
भाव्य च वर्णमाला समाख्याता
अनुलोमविलोमतः पञ्चाशल्लि-
पिभिर्माला विहिता सर्वकर्मसु ।
अकारादिक्षकारान्ता वर्णमाला
प्रकीर्तिता । क्षार्णं मेरुमुखं
तत्र कल्पयेन्मुनिसत्तम ।
अनया सर्वमन्त्राणां जपः
सर्वसमृद्धिदः ॥ तस्य फलं
यथा जपनिष्ठो द्विजश्रेष्ठोऽखि-
लयज्ञफलं लभेत् सर्वेषामेव

यज्ञानां जायतेऽसौ महाफलं ॥
जपेन देवता नित्यं स्तूयमाना प्र-
सीदति प्रसन्ना विपुलान् कामान्
दद्यान्मुक्तिं च शाश्वतीं ॥ यक्षर-
क्षः पिशाचाश्च ग्रहाः सर्पाश्च
भीषणाः जापिनं नोपसर्पन्ति
भयभीताः समन्ततः यावन्तः
कर्मयज्ञाः स्युः प्रदिष्टानि तपां-
सि च सर्वे ते जपयज्ञस्य कलां
नार्हन्ति षोडशीं माहात्म्यं वाचि-
कस्यैतत् जपयज्ञस्य कीर्तितं
तस्माच्छतगुणोपांशुः सहस्रो
मानसः स्मृतः इति तन्त्रसारः ॥
जपनः स्त्री जपः इत्यमरटीका
जपपरायणे त्रि जपासक्तः ज-
पनशीलः यथा । शिवरात्रि-
व्रतं देवपूजाजपपरायणः करो-
मि विधिवद्दत्तं गृहाणार्घ्यं महेश्व-
र इति तिथ्यादितत्त्वं ॥
जपा स्त्री जवापुष्पः इति हेमच-
न्द्रः जभ मैथुने । इति कवि-
कल्पद्रुमः ॥ जभ इ मैथुने
इति कविकल्पद्रुमः ॥
भज इङ जृम्भे गात्रशैथि-
ल्य इति यावत् इति कविकल्प-
द्रुमः जभ ङ जृम्भे । इति कविक-
ल्पद्रुमः जभ इ क नशीकरणे इ

तिकविकल्पद्रुमः
जम ३ भदे इतिकविकल्पद्रुमः
जम् ब पत्नी इतिजम्पतीशब्दरी
कायां भरत धृत नामप्रपञ्चः
जमजः त्रि यमजः । इति द्विरूप
कोषः ॥
जमदग्निः पुं यमदग्निमुनिः इ
तिद्विरूपकोषः सतु भृगु वंशो
द्भव ऋचीकमुनिपुत्रः परशुरा
मपिताच इतिश्रीभागवत
जमनं क्ली जेमनं भोजनं इ
त्यमरटीकायां भरतः ॥
जम्पती पुं जायापती इत्यमरः
द्विवचनान्तोऽयंशब्दः ॥
जम्बालः पुं पंकः इत्यमरः
शैवालः इतिमेदिनी केतक
वृक्षः इति शब्दरत्नावली ॥
जम्बालिनी स्त्री नदी इतिहेमचं
द्रः जम्बिरः पुं जम्बीरः इतिशब्दर
त्नावली जम्बीरः पुं फलवृक्षवि
शेषः जामीर इति नेबु इतिच
भाषा तत्पर्य्यायः दन्तशठः २
जम्भः ३ जम्भीरः ४ जम्भ
लः ५ । इत्यमरः ॥
जम्भी ६ रोचनक ७ मुखशो
धी ८ जाड्यारिः ९ तस्यफलस्यगु
णाः अम्लमधुररसत्वं वातनाशि

त्वंपथ्यत्वं पाचनत्वं रोचनत्वं
पित्तवलाग्निवृद्धिकारित्वंच
इतिराजनिर्घण्टः अम्लत्वं
गुरुत्वं सुगंधित्वं दुर्जरत्वं व
न्हि कफ वात विबंध नाशित्वं
च इतिराजवल्लभः पक्वस्य त
स्यगुणाः मधुरत्वं कफार्त्तिपि
त्तास्र दोषनाशित्वं । वर्णवीर्य्य
रुचि पुष्टि तृप्ति कारित्वंच मरु
वकः अर्ज्जकः सितार्ज्जकः इति
राजनिर्घण्टः ॥
जम्बुः स्त्री जम्बुः इत्यमरटीका
यांभरतः ॥
जम्बु क्ली जम्बुफलं तत्पर्य्या
यः जम्बूः २ जाम्बवं ३ इत्यमरः
जम्बुकः पुं शृगालः वरुणः
वृक्षविशेषः गोलापजामइति
भाषा नीचेति इति शब्दरत्नाव
ली श्योणाकप्रभेदः इतिराजनि
र्घण्टः ॥
जंबुद्वीपः पुं पृथिव्याः सप्तद्वीपा
न्तर्गत द्वीपविशेषः अयं द्वीपः
पद्मकोषमध्यवर्त्ति कोष इव
लक्षयोजन विस्तीर्णः पद्म
पत्र इव समवर्त्तुलः लक्ष
योजन विस्तृत लवण स
मुद्रेण वेष्टितः यस्मिन् प्रत्येक

1049

न् सहस्रयोजनायामानिनववर्षा
णितेषां वर्षाणामष्टौ सीमपर्व
ताः सन्ति । नवानांवर्षाणां मध्ये
इलावृत वर्षं मध्यवर्ति यस्यम
ध्यदेशे सुमेरु पर्वतः लक्ष
योजनोन्नत सेधः इलावृत वर्ष
स्यान्तरे नीलपर्वतः द्विसहस्र
योजनविस्तीर्णं अयुतयोजनो
न्नत सेधः पूर्वपश्चिमयोः क्षारस
मुद्रावधिदीर्घः । तदन्तरेरम्यक
वर्षं तदन्तरे श्वेतपर्वतः द्विसह
स्रयोजनविस्तीर्णः अयुतयोज
नोन्नत सेधः पूर्वपश्चिमयोः क्षारस
मुद्रावधि दीर्घः दैर्घ्ये नीलपर्वता
त्किंचिदधिक दशांशेन न्यूनः
तदन्तरेहिरण्मयवर्षंतदन्तरे शृं
गवान्पर्वतः तस्यविस्तारादयः
श्वेत पर्वत वत् दैर्घ्ये श्वेत प
र्वतात् किंचिदधिक दशांशे
नन्यूनः । तदन्तरे कुरुवर्षं तद
न्तरेलवण समुद्रः । इलावृतव
र्षस्यदक्षिणे निषध पर्वतः
द्विसहस्रयोजन विस्तीर्णः अ
युतयोजनोन्नत सेधः पूर्वपश्चि
मयोः क्षारसमुद्रावधि दीर्घः त
द्दक्षिणेहरिवर्षं तद्दक्षिणे हेमकूट
पर्वतः अस्य विस्तारादयोनिष
धवत् दैर्घ्येनिष ॥ ॥

धात् किंचिदधिकदशांशेन न्यूनः
तद्दक्षिणेहिमालयपर्वतः अस्य
विस्तारादयः पूर्ववत् दैर्घ्येहि
हेमकूट पर्वतात् किंचिदधि
कदशांशेन न्यूनः ॥ तद्दक्षि
णेभारतवर्षं तद्दक्षिणेक्षार
समुद्रः इलावृतस्य पश्चिमे मा
माल्यवान् पर्वतः द्विसहस्रयो
जन विस्तीर्णः अयुत योजनोन्नत
सेधः उत्तरदक्षिणयो नील निष
ध पर्वतावधिदीर्घः । तत् पश्चि
मेकेतुमालवर्षं तत्पश्चिमे ल
वणसमुद्रः इलावृतस्यपूर्वे गं
धमादन पर्वतः अस्यविस्तराद
योमाल्यवद्वत् । तत्पूर्वे भद्राश्व
वर्षं तत्पूर्वेलवणसमुद्रः मेरोः
पूर्वादिचतुर्दिक्षु मंदर मेरुमंद
र सुपार्श्वकुमुद नामानः पर्व
ता सन्ति तेषुचूत जंबू कद
म्ब न्यग्रोधाश्चत्वारोवृक्षाः सन्ति
ते सर्वे दैर्घ्ये एकादश शत यो
जन परिमिताः विस्तारे शत
योजन परिमिताः तेषांशाखा
विस्तारः एकादशशतयोजन
पर्य्यन्तं तेषु पर्वतेषु हृदाश्च
त्वारः पयो मधुक्षुरस मृष्टज
लाः एवंतत्रचैत्ररथवैभ्राज
कसर्वतोभद्रसंज्ञकानि चत्वा

रि देवोद्यानानि च सन्ति । मं
दरोपरि स्थितैकादश शत
योजनोच्चचूतमस्तकात् पर्व
तश्रृंगवत् स्थूलानि फलाम
मृतकल्पानि पतन्ति तेषां विशीर्य्य
माणानामतिमधुर सुगंधि बहु
लारुणरसोदेनारुणोदानामन
दीमंदरगिरि शिखरान्निपतन्ती
पूर्वेणेलावृतमुपप्लावयति ए
वंजंबूफलानामत्युच्च निपातवि
शीर्णानामनस्थिप्रायाणामि
भकायनिभानां रसेन जम्बूना
म नदी मेरुमंदरशिखरादव
नितले निपतन्ती दक्षिणेनेला
वृतं वहति तस्या उभयोस्तीरयो
र्मृत्तिका तद्रसेनानुविध्यमाना
वाय्वर्कसंयोगविपाकेन सदामर
लोकाभरणं जाम्बूनदं नामसु
र्णं भवति सुपार्श्वपर्वतस्योयो
कदम्बवृक्षस्तस्य पंचकोटरेभ्यो
विनिःसृताः पंचव्याम स्थूलाः
पंच मधु धाराः सुपार्श्वशिख
रात् पतन्त्यः पश्चिमेनेलावृतम
नुमोदयन्ति । कुमुदपर्वतो
परिस्थितो यो वटवृक्षस्त
स्यस्कंधेभ्यो निर्गताः पयोदधि
घृत मधु गुडान्नाद्यम्बर शय्यास
नाभरणादियुक्ताः कामदुघा नदा

२

कुमुदाग्रात् प्रपतन्त्य उत्तरेणे
लावृत मुपभोजयन्ति । तान्
नदान् सेवमानानां प्रजानां
वली पलित क्लम स्वेद दौर्गंध्य
जरामयमृत्युशीतोष्णवैवर्ण्यो
पसर्गादयस्तापविशेषा न कदा
चित् भवन्ति यावज्जीवं निरतिश
य सुखमेव । कुरंगकुररकुसुम्भ
वैकंकत्रिकूटशिखरापिशिरप
तङ्गरुचकनिषधशितिवासक
पिल शंखवैदूर्यजारुधिहंस
ऋषभनागकालंजरनारदाद
यः पर्वता मेरोः पूर्वदिशि उत्तरस्या
मष्टादश योजन दीर्घौ जठर दे
वकूट पर्वतौ तिष्ठतः तौ द्विसह
स्रयोजन विस्तारौ एवं द्विसहस्र
योजनोच्चौ मेरोः पश्चिमायां दि
शि पवन पारियात्रौ पर्वतौ
उत्तरस्यां अष्टादश योजनदी
र्घौ द्विसहस्रौ अष्टादशयोज
न[illegible] विस्तारौ द्विसहस्रयोज
नोच्चौ एवं दक्षिणस्यां दिशि
कैलास कैलास करवीर पर्व
तौ पूर्वस्यामष्टादश योजन
दीर्घौ द्विसहस्र योजन विस्तारौ
द्विसहस्रयोजनोच्चौ एवमुत्तर
स्यां त्रिशृंगमकर पर्वतौ पू
र्वस्या मष्टादश ॥ ॥

योजन दीर्घौ द्विसहस्र योजन
विस्तारौ द्विसहस्र योजनोच्चौ ए
तेवर्षवर्षे नराः नयुतसंवत्सराः
सन्ति ॥ तत्रापि भारत मेव वर्षं
कर्मक्षेत्रं अन्यान्यष्टानि वर्षा
णि स्वर्गिणां पुण्यशेषोपभोग
स्थानानि भूस्वर्ग नामाख्याना
नि एषु वर्षेषु पुरुषाणां आयु
रयुतवर्षाणि तेदेवकल्पा अयु
तहस्तिबला विशिष्टाः वज्रवद्दृढ
शरीराः सर्वदामोदयुक्ताः सन्तिः
येषु देवपतयः सगणाः सस्त्री
काः नानास्थानेषु स्वैरं विहरन्ति
नवस्ववर्षेषु भगवन्नारायण
स्तत्तत् पुरुषाणां मनुग्रहाय
स्व मूर्त्तिभेदेनाद्यापि सन्निहितो
भवति ॥ इलावृते तु वर्षे भगवा
न् शिव एक एव पुरुषः भवा
नी प्रधानार्वुद सहस्रैः स्त्रीग
णैः परिवृतः नारायणस्य सेक
र्षणसंज्ञा मूर्त्ति ध्यानेन सनि
धाप्य स्तुवन्नास्ते ॥ भद्राश्वे व
र्षे तद्वर्षपति भद्रश्रवानामध
र्मसुतः तत्कुलपतयः पुरुषा
भगवतो हयशीर्षाभिधानां मूर्त्तिं
परम समाधिना सन्निधाप्यस्तुव
न्ति हरिवर्षे भगवान्नरहरिरूपेण
स्तत्र प्रह्लादो दैत्य दानव कुल

तीर्थ स्वरूपः तद्वर्ष पुरुषैः
सहानन्य भक्ति योगेनोपास्ते
केतुमाले भगवान् कामदेव
स्वरूपेण लक्ष्म्याः प्रिय चिकी
र्षया आस्ते तद्भवतो मायाम
यरूपं परम समाधि योगेन र
मादेवी संवत् सरस्यात्रिषु प्रजा
पते ईहिरभिरूपेताः अहः सु तद्
रैभिरूपेता उपास्ते ॥ हिरण्मये
वर्षे भगवान् कूर्मतनुं बिभ्राणो
निवसति तत्रगवन्मूर्त्तिं पितृग
णाधिपति रर्य्यमा तद्वर्ष पुरुषैः
सह उपास्ते ॥ उत्तरकुरुवर्षे भ
गवान् वराहरूपी आस्ते तं
भूमि स्तद्वर्ष पुरुषैः सहास्ख
लित भक्तियोगेनोपास्ते ॥
किंपुरुषवर्षे भगवानदाशरथि
रामरूपेणास्ते तं तच्चरणसंनिक
र्षाभिरतः परम भागवतो हनु
मान् अविरत भक्ति स्तद्वर्ष पु
रुषैरुपास्ते ॥ भारते वर्षे भ
गवान्नरनारायणाख्ययामूर्त्ता
तिना मनुग्रहायानुकंपाया
अव्यक्तगतिस्तपश्चरति त
न्मूर्त्तिं नारदः वर्णाश्रम युक्ता
भि भारतवर्षीय प्रजाभिः
सह भगवदनुभावोपवर्णनं
पंचरात्रं सावर्णि रूपदेक्ष्य ।

माणाः परम भक्तिभावेन सेवन्ते
भारतेऽप्यस्मिन् वर्षे सरिच्छैला
बहवः सन्ति यथा । मलयः
मङ्गलप्रस्थः मैनाकः त्रिकूटः
ऋषभः कूटकः कोल्लः सह्यः
देवगिरिः ऋष्यमूकः श्रीशैलः
महेन्द्रः वारिधारः विन्ध्यः शुक्ति
मान् ऋक्षगिरिः पारियात्रः द्रो
णः चित्रकूटः गोवर्द्धनः रैवत
कः ककुभः नीलः कोकः गो
इन्द्रकीलः कामगिरिः इति चान्ये
च शतसहस्रशः शैलाः तेषां नि
म्बप्रभवा नद्यश्चसंख्याताः ॥
यथा चन्द्रवंशा ताम्रपर्णी
अवटोदा कृतमाला वैहायसी
कावेरी वेणा पयस्विनी शर्क
रावर्त्ता तुङ्गभद्रा कृष्णवेण्या भी
मरथी गोदावरी निर्विन्ध्या पयो
ष्णी तापी रेवा सुरसा नर्मदा चर्म
ण्वती महानदी वेदस्मृतिः ऋषि
कुल्या त्रिसामा गण्डकी बाहुती
कौशिकी मन्दाकिनी यमुना सर
स्वती दृषद्वती गोमती सरयूः
रोधवती सुषोमा शतद्रुः चं
द्रभागा मरुद्वृधा वितस्ता ।
असिक्नी विश्वा इति महानद्यः
अथ शोणश्च नदो अस्मिन् व
र्षे लब्धजन्मभिः पुरुषैः शुक्ललोहि
त

कृष्णवर्णेन स्वारब्धेन कर्मणा
दिव्यमानुषनारकगतयो भवन्ति
जम्बुद्वीपस्य अष्टौ उपद्वीपाः सन्ति
सगरात्मजैरश्वान्वेषण इमां महीं
परितो निखनद्भिरुपकल्पिताः
तद्यथा स्वर्णप्रस्थः चन्द्रशुक्ल आ
वर्त्तनः रमणकः मन्दहरिणः
पाञ्चजन्यः सिंहलः लङ्का इति
इति श्रीभागवते ॥ ज्योतिःशास्त्र
मते लवणसमुद्रस्यान्तरे जम्बु
द्वीपः सतु भूम्यर्द्धभागः तस्यद
क्षिणे द्वितीयार्द्धभागे द्वीपषट्
कस्य सप्तसमुद्रस्य च निवेशः
इति सिद्धान्तशिरोमणिः ॥
जंबुलः पुं जंबूलः केतकद्रु
मः इति विश्वः ॥
जंबुवनजं क्ली श्वेतजवापुष्पं
यथा पारिभद्रे पाटला च बकुले
गिरिशालिनी तिलकं जम्बुवन
जं पीतकं तगरं त्वपि एतानि दि
प्रशस्तानि कुसुमान्यच्युतार्चने
इति वामनपुराणं ॥
जम्बुः स्त्री नागदमनी । इति
राजनिर्घण्टः वृक्षविशेषः ।
जाम इति भाषा तत्पर्य्यायः ॥
सुरभिपत्रा २ नीलफला ३
श्यामला ४ महास्कन्धा ५
राजार्हा ६ राजफला ७ ॥

७ शुकप्रिया ८ मोदमोदिनी ९
तत्फलगुणाः कषायत्वं मधुर
त्वं श्रमपित्तदाहकण्ठार्त्तिशो
षकृमिदोषश्वासातिसारकफ
कासविनाशित्वं । विष्टम्भित्वं ।
रोचनत्वं । पाचनत्वञ्च । इति
राजनिर्घण्टः । गुरुत्वं । स्वादु
त्वं शीतलत्वं अग्निसंदूषणत्वं
रूक्षत्वं वातकारित्वं । इति राज
वल्लभः सा वृहत् क्षुद्रभेदेन द्वि
विधा तत्र वृहत्याः पर्य्यायः
महाजम्बुः १ महापत्रा २ राजजम्बूः
३ वृहत्फला ४ इति रत्नमाला
फलेन्द्रः ५ नन्दः ६ महाफला
७ सुरभिपत्रा ८ तत्फलगु
णाः विष्टम्भित्वं गुरुत्वं रोचनत्वं
इति भावप्रकाशः क्षुद्रायाः प
र्य्यायः सूक्ष्मकृष्णफला १ दी
र्घपत्रा २ मध्यमा ३ वनजम्बूः प
र्य्यायः भूमिजम्बूः १ काकजम्बूः
२ नादेयी ३ शीतपल्लवा ४ इति
रत्नमाला सूक्ष्मपत्रा ५ जलजं
बुका ६ तत्फलगुणाः ।
ग्राहित्वं रूक्षत्वं कफपि
त्तास्रदाहनाशित्वञ्च इति भा
वप्रकाशः तत्फलस्य पर्य्या
यः जंबु १ जाम्बव २ इत्यमरः ।

जम्बूकः पुं स्त्री शृगालः इति
शब्दरत्नावली जंबूकशब्दार्थोऽप्य
त्र जंबूका स्त्री काकलीद्राक्षा इ
ति राजनिर्घण्टः ॥
जंबूलः पुं जंबूद्रः । केतकद्रु
मः इति मेदिनी ॥
जंबूलमालिका स्त्री कन्यावर
योर्मुखचन्द्रिका इत्युद्वाहतत्त्वं ज
म्बूलं वरपत्नीयशोभां परिहास
वचनं तेषां मालिका श्रेणी
इति हरिवंशटीकायां नीलकं
ठः जम्भः पुं दैत्यभेदः दन्तः
जंबीरः भक्षणं इति मेदिनी
अंशः दन्तः तृणः इति हेम
चन्द्रः ॥
जम्भकः पुं जंबीरः इति शब्दच
न्द्रिका जंभका स्त्री जृम्भा इ
ति राजनिर्घण्टः
जम्भद्विट् पुं इन्द्रः इति हेमच
न्द्रः जम्भभेदी न पुं इन्द्रः इत्यमरः
जम्भरः पुं जंबीरः । इति श
ब्दचन्द्रिका ॥
जम्भलः पुं जंबीरः बुद्धदेव
विशेषः इति मेदिनी ॥
जम्भला स्त्री राक्षसीविशेषः
यथा समुद्रस्योत्तरे तीरे जम्भला
नाम राक्षसी तस्याः स्मरणमात्रेण

विशल्या गर्भिणी भवेत् ॥ इति
ज्योतिषतत्त्वेराजमार्तण्डे ॥
जंभा स्त्री जृंभा इतिराजनिर्घंटः
जंभारिः पुं वह्निः वज्रं इति
विश्व ॥ इंद्रः । यथा जंभारि
दंभोलय इत्यत्रनैषधं ॥
जंभी न पुं जंभीरः इतिशब्दचंद्रि
का जंभीरः पुं जम्बीरः इत्यमरः
मरुवकः इति तट्टीकायांभरतः
जयः पुं शत्रुपराभ्नुखीकरण
जित् इति भाषा तत्पर्य्यायः ॥
विजयः २ जयनं ३ इत्यमरः
अग्निमन्थः जयंतः युधिष्ठिरः
इति मेदिनी विजयनंदनराजः
सत्तु इत्वाकुवंशोद्भवः इति
हेमचंद्रः श्रीनारायणपार्षदः
यथा एतौ द्वौ पार्षदौ मह्य
जयो विजय एवच कदर्थी कृ
तौ मया यद्दो वक्रकान्ता मति
क्रमं इतिश्रीभागवतं ॥
जयकोलाहलः पुं पाशकभे
दः इतिशब्दरत्नावली जयध्वनि
श्च जयढक्का स्त्री वाद्यविशे
षः जयढाक इतिभाषा ॥
इतिलोकप्रसिद्धा ॥ जय
दत्तः पुं इंद्रपुत्रः इतिहेमचं
द्रः

जयनं क्ली तुरंगादिसन्नाहः जयः
इति मेदिनी ॥
जयन्ती स्त्री इंद्रकन्या । इतिश
ब्दरत्नावली ॥
जयंतः पुं इंद्रपुत्रः तत्पर्य्यायः
पाकशासनिः २ इत्यमरः ऐंद्रिः
३ इति मेदिनी शिवः चंद्रः ।
इति त्रिकाण्डशेषः ॥ भीमः
इति मेदिनी ॥
जयंतिका स्त्री हरिद्रा । इति
राजनिर्घंटः ॥
जयंती स्त्री गौरी । इंद्रपुत्री ॥
पताका इति मेदिनी वृक्षवि
शेषः । तत्पर्य्यायः । जया २
तर्कारी ३ नादेयी ४ वैजयन्तिका
५ इत्यमरः वला ६ मोटा ७
हरिता ८ विजया ९ सूक्ष्ममूला
१० विक्रान्ता ११ अपराजिता १२
अस्या गुणाः मदगंधयुक्तत्व ।
तिक्तत्व कटुत्व उष्णत्व क्रिमि
भूत नाशित्वं कंठविशोधनत्वं
च तत्र कृष्णा रसायनी इति
राजनिर्घंटः एतच्छाकस्य गुणाः
गरदोष नाशित्वं । चक्षुर्हितत्वं
मधुरत्वं । हिमत्वंच इति राज
वल्लभः ॥ योगविशेषः यथा

जयं पुण्यंच कुरुते जयंती मिति
तांविदुः रोहिणीसहिता कृष्णामा
से च श्रावणेऽष्टमी अर्द्धरात्रादध
श्चोर्द्धं कलयापियदा भवेत् जय
न्ती नाम सा प्रोक्ता सर्वपापप्रणा
शिनी इति तिथ्यादितत्वेस्कान्दे ॥
जयपत्रं क्ली अश्वमेधीययज्ञघो
टककपाले वद्धा लिपिः यथा
त्रैलोक्य विजयी रामो रावणान्त
करः प्रभुः सहोदितो वाजिमेधे
तस्यायं मोचितः पशुः ॥
पालितो लक्ष्मणेनैव सुलक्ष
णविलक्षितः संग्रन्थचपरिस्य
न्यः सर्वे रितिच संस्कृतो इति
वाशिष्ठ रामायणे ॥ विवाद
विषयकजयबोधकलिपिः डिक
रि इतिइङ्गराजीभाषा यथा य
द्वृत्तव्यवहारात्तु पूर्वपक्षोत्तरादि
कं क्रियावधारणोपेतं जयपत्रे
ऽखिलं लिखेत् पूर्वोत्तरक्रिया
युक्तं निर्णयान्तं यदान्नृपः प्रद
द्याज्जयिने लेख्यं जयपत्रं तदुच्य
ते इति व्यवहारतत्वं ॥
जयपालः पुं विधिः ॥
विष्णुः ॥ भूपालः ॥ इति
शब्दरत्नावली ॥ ॥

वृक्षविशेषः जमालगोटा इति
भाषा तत्पर्य्यायः सारकः २
रेचकः ३ तिन्तिडीफल ४ दंती
वीज ५ मलद्रावि ६ वीजरेचनं
७ कुंभीवीजं ८ कुम्भिनीवीजं ९
चेद्रा वीजं १० चोरटनीवीजं ॥
निकुम्भाख्यवीजं १२ शोधनी
१३ चक्रदन्तीवीजं १४ अस्य गु
णाः कटुत्वं उष्णत्वं विरेचन
त्वं दीपनत्वं कृमि कफामज
वरामयनाशित्वंच इतिराज
निघण्टः ॥
जयपुत्रकः पुं पाशकभेदः इ
तिशब्दरत्नावली ॥
जयमंगलः पुं राजवाह्यहस्ती
इतिशब्दरत्नावली ज्वरघ्नौ
षधविशेषः इतिवैद्यकं ॥
जयवाहिनी स्त्री शची इंद्राणी
इतिहेमचंद्रः ॥
जया स्त्री दुर्गा अस्याभ्रुत् प
त्तिर्यथा जयःकल्याणवच
नोह्याकारो दातृवाचकः ज
यं ददाति सा नित्यं सा जया प
रिकीर्त्तिता इतिब्रह्मवैवर्त्ते
श्रीकृष्णजन्मखंडे जयन्तीवृक्षः
तिथिविशेषः सा तृतीयाष्टमी
त्रयोदश्यः हरीतकी दूर्वासखी ।

इतिमेदिनी विजया शाल्मलीवृक्षः
नीलदूर्वा अग्निमन्थवृक्षः इति
राजनिर्घण्टः पताकाविशेषः
इतियुक्तिकल्पतरुः ॥ जयाव
हा स्त्री भद्रदन्तीवृक्षः इति
राजनिर्घण्टः ॥ जयाश्र
या स्त्री जरडीतृणं इतिराज
निर्घण्टः जयाह्वा स्त्री भ
द्रदन्तीवृक्षः इतिराजनिर्घण्टः
जयी त्रि जययुक्तः विजयी
यथा जगति जयिनो यस्य वि
शिखाः इति महिम्नःस्तोत्रं।
जय्यः त्रि जेतुंशक्यः जयक
रणयोग्यः इत्यमरः ॥
जठरः त्रि कर्कशः पाण्डुः
कठिनः इति मेदिनी जीर्णः
इति हेमचन्द्रः जरायां पुं ।
इतिविश्वः ॥
जरडी स्त्री तृणविशेषः तत्प
र्य्यायः गर्म्मोटिका २ सुनाला
३ जयाश्रया ४ अस्यागुणाः मधु
रत्वं शीतत्वं सारकत्वं दाहरक्तदो
षनाशित्वं रुच्यत्वं पशूनां दुग्ध
दातृत्वञ्च इतिराजनिर्घण्टः
जरणं क्ली हिङ्गु कृष्णषधी १
जीर्णेऽपि इतिशब्दरत्नावली॥

जरणः पुं जीरकः कृष्णजीरकः
सौवर्च्चललवणं इतिशब्दरत्नावली
कासमर्द्दः इतिराजनिर्घण्टः
जरणा स्त्री कृष्णजीरकः इति
राजनिर्घण्टः ॥
जरणाद्रुमः पुं अश्वकर्णवृक्षः
इतिराजनिर्घण्टः ॥
जरण्डः त्रि जीर्णः इतिसंक्षि
प्तसारे उणादिवृत्तिः ॥
जरन् त्रि वृद्धः इत्यमरः ॥
पुरातनं इति हेमचन्द्रः ॥
जरत्कारुः पुं मुनिविशेषः
तत्पर्य्यायः यायावरः २ इति
त्रिकाण्डशेषः ॥
जरत्कारुप्रिया स्त्री मनसादे
वी इतित्रिकाण्डशेषः।
जरत्कारुप्रिया स्त्री मनसादे
वी इतिशब्दरत्नावली ॥
जरती स्त्री वृद्धा इतिराजनिर्घण्टः
जरद्गवः पुं जीर्णवृषः तत्पर्य्या
यः वृद्धोक्षः २ इत्यमरः
जरन् पुं वृद्धः इतिराजनिर्घण्टः
जरन्तः पुं महिषः वृद्धः इतित्रि
काण्डशेषः॥
जरसानः पुं मनुष्यः इतिसिद्धान्त
कौमुद्यामुणादिवृत्तिः ॥

1057

जरा स्त्री वयःकृतशरीरमांसाद्य
वस्थाभेदः तत्पर्य्यायः विस्रसा २
इत्यमरः सातु कालकन्या यथा
कालकन्याजरा साक्षात् लोकस्ता
नाभिनन्दति स्वसारं जगृहे मृत्युः
क्षयाय यवनेश्वरः इतिश्रीभाग
वते ॥ एषांभेदप्रभेदेनचतुः
षष्टि रुजः सुताः सुतकन्या
सुताश्चैव जरा तस्याश्च कन्यका
जराच भ्रातृभिः सार्द्धं शश्वद्भ्रम
ति भूतले । एतेचोपाय वेत्तारं न
गच्छन्तिच संमतः पलायन्तेच तं
दृष्ट्वा वैनतेयमिवोरगाः चक्षुर्ज
लं च व्यायामो पादाधस्तैलसेवनं
कर्णतैलं मूर्द्धितैलं जराव्याधि
विनाशकं वसन्ते भ्रमणं वह्निसे
वास्वल्पं करोतियः बालांच सेवते
काले जरा तं नोपगच्छति स्नात
शीतोदकस्नायी सेवते चन्दनद्र
वं नोपयाति जरा तन्तु निदाघे
ऽनिलसेविनं प्रावृट्स्नोदकस्ना
यी घनतोयं न सेवते समयेच
समाहारी जरा तं नोपगच्छति
शरदीन्दुं न शक्ता ति भ्रमणं न च
र्जयेत् स्नात स्नायी समाहारी जरा
तं नोपतिष्ठते स्नातस्नायीच हेम
न्तकाले वह्निं निषेवते भुङ्क्ते ।

नवान्नमुष्णं च जरा तं नोपगच्छ
ति शिशिरे उष्णकवह्निंच नवो
ष्णान्नं च सेवते यश्चोष्णोदक
स्नायी जरा तं नोपगच्छति स
र्व्वमासं नवान्नं च बालस्त्री १
क्षीर भोजनं घृतं च सेवते यो
हि जरा तं नोपगच्छति भुङ्क्ते
सदन्नं तृषितः काले स्वल्पं १
यो पीयते जलं ॥ नित्यंभु
ङ्क्तेच ताम्बूलं जरा तं नोपग
च्छति दधि हैयङ्गवीनं च नव
नीतं तथा गुडं नित्यं भुङ्क्ते सं
यमी योजरा तं नैव गच्छति शु
ष्कमांसं स्त्रियो वृद्धा बालार्कस्त
रुणं दधि तं सेवन्ते जराया नित्य
दृष्टा भ्रातृभिः सह रात्रौ ये दधि
सेवन्ते पुंश्चलीं च रजस्वला तमु
पैति जरा दृष्टा भ्रातृभिः सह सु
दरि इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे
सीरिका वृक्षः इतिशब्दचन्द्रिका
राक्षसी विशेषः यथा अन्यस्या
मपि भार्य्यायां शकले द्वे बृह
द्रथात् जन्माता बहि रुत्स्रष्टे
जरया चाभिसन्धिते ॥ इतिश्री
भागवते ॥ जरातुरः त्रि जीर्णः
जराभिभूतः इतिशब्दमाला॥
जराबुधः पुं जरासन्धः । इति

शब्दरत्नावली
जराभीरुः पुं कामदेवः इ
ति हेमचंद्रः जराभयशीले
त्रि जरायणिः पुं जरासंधः इ
ति शब्दरत्नावली ॥
जरायुः पुं येन वेष्टितो गर्भः
कुक्षौ तिष्ठति सः गर्भवेष्टन
चर्म ओंऊल इति भाषा तत्प
र्यायः गर्भाशयः २ उल्वं ३ क
ललः ४ इत्यमरः यात्तचर्मा
कृतिः सूक्ष्मा जरायुः सा निग
द्यते इति महाभागवते भगव
ती गीता अग्निजार वृक्षः इति
राजनिर्घण्टः जरायुजः त्रि गर्भा
शयजातः मनुष्यगवादिः इ
त्यमरः यात्तचर्माकृतिः सूक्ष्मा
जरायुः सा निगद्यते शुक्रशो
णितयोर्योगस्तस्मिन् संजाय
ते यतः तत्र गर्भो भवेद्यस्मात्ते
न प्रोक्तो जरायुजः इति महा
भागवते भगवती गीता जरा
संधः पुं चेदवंशीयराजविशेषः
स तु बृहद्रथराजपुत्रः कंसश्वशु
रः हंदयुद्धे भीमसेनहतवान् अस्य
नामकारणं यथा अमसामपिभा
र्यायाः शकले देहस्य द्यात् तेमाचा
वदिः रुत्रसेन रयावाभिसंधिते जीव
जीवेति ।

क्रीडंत्या जरासंधोऽभवत् सुतः
इति श्रीभागवते तत्पर्यायः ॥
बार्हद्रथिः २ इति त्रिकाण्डशेषः ॥
जरासंधजित् पुं भीमः इति त्रि
काण्डशेषः ॥
जरी स्त्री त्रि वृद्धः इति हेमचंद्रः ॥
जरूथं क्ली मांसं इति त्रिकाण्डशेषः
जर्च्च श उक्तौ भर्त्से इति कवि
कल्पद्रुमः ॥
जर्छ श उक्तौ भर्त्से इति क
विकल्पद्रुमः ॥
जर्ज्ज श वाचि भर्त्से इति क
विकल्पद्रुमः ॥
जर्त्तिकः पुं शैलजः शाकध्वजः
जरातुरे त्रि इति मेदिनी ॥
जर्त्तरीकः त्रि वक्रच्छिद्रद्रव्यं
जरातुरः इति मेदिनी ॥
जर्फ श भर्त्से उक्तौ इति क
विकल्पद्रुमः ॥
जर्णः पुं चंद्रः वृक्षः इति मेदि
नी जीर्णे त्रि इति हेमचंद्रः ॥
जर्त्तः पुं योनिः हस्ती इति सं
क्षिप्तसारे उणादिवृत्तिः ॥
जर्त्तिलः पुं वनोद्भवतिलः इ
ति राजनिर्घण्टः हेमचंद्रश्च ॥
जर्त्तुः पुं योनिः हस्ती इत्युणा
दिकोषः ॥ ॥

1049

जर्त्स फर्फ ॥ रवे इति कविक
ल्पद्रुमः फर्फः भर्त्सनं उक्ति
श्च इति तट्टीका ॥
जर्हिलः पुं अरण्यतिलः इति
राजनिर्घण्टः ॥
जल ज धान्ये इति कविकल्पद्रु
मः धान्यं तोषणोपयोगि क्रिया आ
च्छादनं कथनस्वभावो धान्यं समृ
द्धिः इति तट्टीका ॥
जल क पिधाने आच्छादन इति
यावत् इति कविकल्पद्रुमः
जलं क्ली गोकलनं ह्रीवेरं इति
मेदिनी पंच भूतान्तर्गतभूतवि
शेषः अस्य धर्माः रूपं द्रवत्वं प्र
त्यक्षयोगित्वं च इदं गुरु रसवि
शिष्टं च अस्य गुणाश्चतुर्दश
यथा स्पर्शः १ संख्या २ परिमितिः
३ पृथक्त्वं ४ संयोगः ५ विभागः
६ परत्वं ७ अपरत्वं ८ वेगः ९
द्रवत्वं १० गुरुत्वं ११ रूपं १२ रसः
१३ स्नेहः १४ अस्य वर्णः शुक्लः र
सो मधुरः स्पर्शः शीतलः स्नेहः
द्रवत्वं स्वाभाविकगुणः परमाणु
जलं नित्यं सावयवजलं अनित्यं अ
नित्यजलं त्रिविधं यथा देहं योनि
ज १ इंद्रियं रसने २ विषयः सिन्धु
रिमादिः ३ इति भाषापरिच्छेदः ॥

तस्योत्पत्तिर्यथा । रूपमात्रा
द्विकुर्वाणात्तेजसो दैवचोदि
तात् रस मात्र मभूत्तस्मादंभो
जिह्वा रसग्रहः ॥ तस्य लक्षणं
यथा क्लेदनं पिण्डनं तृप्तिः प्रा
णनाप्यायनोदनं तापापनोदो
भूय स्त्वम्भसो वृत्तयस्त्विमाः
इति श्रीभागवते ॥ अपां शौन्यंत
या क्लेदो द्रवत्वं स्नेहसौम्यता ।
जिह्वा विस्यन्दनं चापि भौमानां
श्रपणं तथा चतुर्थं साधो
विज्ञेयं जिह्वा घ्राणं प्रवर्तते
अपि भूतं रसस्तत्र सोमस्तत्राधि
दैवतं इत्याश्वमेधिकपर्व ॥
तत्पर्यायः । आपः २ स्त्रीलिङ्गः
बहुवचनान्तोयं वाः ३ वारि ४
सलिलं ५ कमलं ६ पयः ७
कीलालं ८ अमृतं ९ जीवनं १०
भुवनं ११ वनं १२ कबंधं १३ उदकं १४
पाथः १५ पुष्करं १६ सर्वतोमुखं १७
अंभः १८ अर्णः १९ तोयं २० पानी
यं २१ नीरं २२ क्षीरं २३ अंबु २४
संवरं २५ मेघपुष्पं २६ घनरसः २७
इत्यमरः आपः २८ सा त्वस्त्रीवा
ये सलिलं २९ सलं ३० जडं ३१ कं ॥ ३२
अंधं ३३ कमंधं ३४ उदं ३५ दकं ॥ ३६
नारं ३७ शम्बरं ३८ अभ्रपुष्पं ३९ घ

नरसं ४० ह्रुतं ४१ इतिभरतः पी
यलं ४२ कुशं ४३ विषं ४४ कीं
ड ४५ सवरं ४६ सरं ४७ कपीटं
४८ चंद्रोरसं ४९ सदन ५० कर्बुरं ५१
व्योम ५२ सम्वः ५३ सरः ५४ इरा
५५ वाजं ५६ तामरं ५७ इतिज
टाधरः कम्बलं ५८ स्यन्दनं ५९
सम्वलं ६० जलपीयं ६१ दरं ६२
क्षतं ६३ ऊर्जं ६४ कोमलं ६५
सोमं ६६ इति शब्दरत्नावली
तस्य गुणाः ईषत् कषायत्वं म
धुरत्वं क्लेदित्वं शीतलत्वं तृष्णा
नाशित्वं अव्यक्तरसत्वं शारीरेंद्रि
यतर्पणत्वंच सुगंधस्य तस्य गु
णाः अम्बरस्य स्पर्शीतत्वं
तर्पणाशित्वंच स्वच्छस्य तस्य गु
णाः लघुत्वं रुच्यत्वं गुणवत्वं
च पांशुशैवालकर्दमयुक्तजल
गुणाः पिच्छिलत्वं कृमिलत्वं
क्लिष्टत्वं विवर्णत्वं विरसत्वं सां
द्रत्वं दुर्गंधित्वं अहितकारित्वंच
दिवासूर्यकिरणरात्रिचंद्ररश्मि
जुष्ट जलगुणाः अरुक्षत्वं अन
भिष्यन्दित्वं गगणाम्बुतुल्यत्वं
च साधारणजलगुणाः हृष्यत्वं
दीपनत्वं मधुरत्वं लघुत्वंच वर्षा
कालीनजलगुणाः गुरुत्वं अभि
ष्यन्दित्वं मधुरत्वं सारकत्वंच ॥
शारत्कालीन जलगुणाः अनभि
ष्यन्दित्वं लघुत्वंच हैमन्तिक ज
लगुणाः स्निग्धत्वं वल्यत्वं वृ
ष्यत्वं हितकारित्वं गुरुत्वंच ॥
शैशिरजलगुणाः कफवातनाशि
त्वं हैमन्तिकात् किंचिल्लघुत्वं
च वासंतिक जलगुणाः कषा
यत्वं मधुरत्वं वल्यत्वं रूक्षत्वंच
ग्रैष्मिकजलगुणाः अनभिष्य
न्दित्वं शीतलजलगुणाः मद
मूर्च्छाच्छर्दिपित्तज्वरभ्रम क्लम
तृषा दाहमदात्ययविषनाशित्वं
प्रबुनाहत धारापात जलगुणाः
विदाहित्वं कर्जरत्वंच यत्अनर्ध्या
म्यशीतलेनत स्नतशीतेतस्य
गुणाः त्रिदोष नाशित्वं जलस्य
सिद्ध करणप्रकारः हेमन्ते शि
शिरे पादहीनं वसन्ते पादस्थितं
ग्रीष्मशरत्कालयोरर्द्धावशोषितं
वर्षास्वष्टावशोषितं दिवा सिद्ध
जलंरात्रौ गुरु रात्रिसिद्धं दिवा
गुरु पुष्पस्ववासितम्बुक्तवक्क
पूतनूतन मत्याजस्य जलगु
णाः मंगलरुचिकारित्वं अजी
र्णेजलमौषधंजीर्णे वलप्रदंआ
हारकाले आयुर्जनकं भुक्तोपरि

रात्रौ न पेयं ॥ रात्रि शेषेजलपा
नगुणाः कास श्वासातीसारज्व
र वमथुकटी कोठ कुष्ट मूत्राघा
तउदरार्शःश्वयथु गल शिरःक
र्णनासाचक्षुरोग वात पित्त कफ
क्षयजरोगनाशित्वं मेघस्मृतरात्रि
शेषेनासिकाशरणजलपानगुणाः
बुद्धिकारित्वं चक्षुर्हितत्वं वली
पलित सर्वरोग नाशित्वंच ॥
जलंचतुर्विधंप्राकृ रन्तरीक्षोद्भवं
बुधाः धारंचकारकंचैव भौषारं
हैम मित्यपि इतिराजनिर्घण्टः
भूषितायरोगिणोपि जलं देयं
यथा पानीयंप्राणिनोप्राणास्त
दायत्तं हि जीवनं तस्मात् स
र्वास्ववस्थासु न कविद्वारिवार्य
ते अन्नेनापि विना जन्तः प्राणान्
धारयतेचिरं तोयाभावे पिपासा
र्तःक्षणात् प्राणैर्विमुच्यते तृ
षितो मोह मायाति मोहात् ॥
प्राणान् विमुंचति तस्माज्जल
मवश्यंहिदानमौषधैःसमं
इति राजवल्लभः ॥ पादेन घट
मुत्थाप्य भाजने पूरयेज्जलं ।
तज्जलं मदिरा तुल्यं भाण्डस्थं
सुरया समं इति कर्मलोचनं ॥
तस्य दानमाहात्म्यं यथा ॥
अन्नेदत्ते नरोणेह प्राणादत्ताभ
वेन्तुत प्राण दानाद्धि परमंन
दान मिह विद्यते ॥ अन्नं वापिप्र
भवति पानीयात् कुरु सत्तम
नीर जातेन हि विना न किंचित्
संप्रवर्त्तते अन्नौषध्योमहाराज
वीरुधश्चजलोद्भवाः यतःप्रा
णभृतां प्राणाः संभवन्ति विशाम्प व
ते तस्मात् पानीय दानाद्धि नपरं
विद्यतेक्वचित् नचदद्यान्नरोनि
त्यंपदीच्छेद्भूतिमात्मनः धन्यं
यशस्य मायुष्यं जलदान मिहो
च्यते शत्रूंश्चाप्यधिकोप्येयस
दातिष्ठति तोयदः सर्वकामा
नवाप्नोति कीर्त्तिञ्चैवेह शाश्वतीं
प्रेत्यचानन्तमश्नाति पापेभ्यश्च
प्रमुच्यते तोयदो मनुज व्याघ्र
स्वर्गंगत्वा महाद्युते अक्षयान्
समवाप्नोति लोकानित्यःब्रवी
न्मनुः इति महाभारतेदानधर्मः
एकहस्तेधृतंतोयंअभक्ष्यं तु
दसर्वसम्मतं इतिब्रह्मवैवर्त्तेज
न्मखण्डे ॥ उद्धृतं वामहस्तेन य
तोयंपिवतिद्विजः सुरापानेन
तत्तुल्यमित्याह प्रजापतिः ।

इतिमनुः ॥
जलत्रि जडः इतिमेदिनी ॥
जल करङ्कः पुं शृङ्गाटः पा
नीफल इतिभाषा कम्भीरः इति
हारावली ॥
जलकपिः पुं शिशुमारः इति
हारावली ॥
जलकरङ्कः पुं नारिकेलफलं
पद्मं शङ्खः जललता मेघः ।
इतिमेदिनी ॥
जलकल्कः पुं शैवालः इतिहा
रावली जलकाकः पुं पक्षिविशे
षः पानी कौडि इतिभाषा तत्प
र्य्यायः दात्यूहः २ कालकण्ठकः
३ अस्यमांसगुणाः स्निग्धगुरुवृ
ंहत्वंमांसं जल पक्षिनं वातह
रं इतिराजनिर्घण्टः ॥
जलकांतीः पुं स्त्री हस्ती इति
त्रिकाण्डशेषः ॥
जलकांती न् पुं स्त्री हस्ती इ
तिहारावली जलाभिलाषिणि
त्रि जलकान्तारः पुं वरुणः इ
तिहेमचन्द्रः ॥
जलकामुकः पुं कटम्भिनीवृक्षः
इतिराजनिर्घण्टः ॥
जलकिरातः पुं ग्राहः इतिहारव
ली जलकुक्कुटी स्त्री गंगाचिल्ली
इतिहारावली ॥
जलकुक्कुभः पुं जलचरपक्षिवि
शेषः कोडापाखि इति भाषा त
त्पर्य्यायः कोयष्टिः २ शिखरी ३
इतिहेमचन्द्रः ॥
जलकुन्तलः पुं शैवालं इतिभू
रिप्रयोगः ॥
जलकूपी स्त्री कूपगर्तः पुष्क
रिणी इतिमेदिनी ॥
जलकूर्मः पुं शिशुमारः इति
त्रिकाण्डशेषः ॥
जलकेशः पुं शैवालं इतिहारा
वली ॥
जलक्रीडा स्त्रीनद्यादौवयस्यादि
भिः सह जल निःक्षेपादिरूपक्री
डा तत्पर्य्यायः करपात्रं २ वाम
ती ३ करपात्रिका ४ इतिहाराव
ली जलगुल्मः पुं जलावर्त्तः
कच्छपः जलचत्वरं इतिमेदिनी ॥
जलङ्गः पुं महाकालः इतिराज
निर्घण्टः ॥
जलङ्गमः पुं जनङ्गमः चाण्डा
लः इत्यमरटीकायांभरतः ॥
जलचारी न् पुं मत्स्यः इतिशब्द
चन्द्रिका जलचरेत्रि ॥

जलजं क्ली पद्मं शङ्खः इतिमेदिनी
लोणारं इति राजनिर्घण्टः ज
लजः पुं मत्स्यः इतिशब्दचन्द्रिका
जले निवासात् कम्भीर शिशुमा
रादयः पक्षी मांस गुणाः गु
रुत्वं उष्णत्वं मधुरत्वं स्निग्धत्वं
वातनाशित्वं श्लेष्मवर्द्धनत्वंच
इतिराजवल्लभः हिज्जलवृक्षः
शैवलः वानीरवृक्षः शङ्खः
इतिराजनिर्घण्टः कपीलः इति
भावप्रकाशः कर्कटमीन कुम्भ
राशयः मकरशेषार्द्धञ्च इति
दीपिका जलजाते त्रि ॥
जलजन्तुः पुं जलजप्राणी तत्प
र्य्यायः यादः इत्यमरः ॥
जलजन्तुका स्त्री जलौका इतिभ
रतः जलजन्म न् क्ली पद्मं इतिहे
मचन्द्रः जलजम्बूका स्त्री लघुजम्बुः
भूइजाम इति वनजाम इतिच भा
षा इति भावप्रकाशः ॥
जलजिह्वः पुं नक्रः इतिहाराव
ली जलडिम्बः पुं शम्बूकः इति
हारावली जलतापिकः पुं ई ॥
ल्लीशमत्स्यः काकचीमत्स्यः
इतिशब्दरत्नावली जलतापी न् पुं इ
ल्लीशमत्स्यः इतिशब्दरत्नावली ॥
जलतालः पुं इल्लीशमत्स्यः इ
ति त्रिकाण्डशेषः ॥
जलतिक्तिका स्त्री पङ्ककीट
कः इतिराजनिर्घण्टः ॥
जलत्रा स्त्री छत्रं इतिहारावली
जलदः पुं मेघः मुस्तकं इति
मेदिनी जलदानकर्त्तरि त्रि
जलदागमः पुं वर्षाकालः
इति राजनिर्घण्टः ॥
जलदाशनः पुं शालवृक्षः इ
तिशब्दचन्द्रिका ॥
जलधरः पुं मेघः मुस्तकं इत्य
मरः समुद्रः इतिहेमचन्द्रः तिनि
शवृक्षः इतिराजनिर्घण्टः ज
लधारिणि त्रि ॥
जलधिः पुं समुद्रः दशशङ्कु
शंख्या मान शत लक्ष कोटि
यः इति लीलावती
जलधिगा स्त्री नदी इतिहेमचं
द्रः जलधिजा स्त्री लक्ष्मीः इति
त्रिकाण्डशेषः ॥
जलनकुलः पुं जलजन्तुविशे
षः धाडिया इति उद्विडाल इति
चभाषा तत्पर्य्यायः उद्रः २ ज
लमार्जारः ३ जलाखुः ४ ज
लनवः ५ इतित्रिकाण्डशेषः ज
लविडालः ॥

६ नीराखुः ७ इति हारावली पानीयनकुलः ८ वसी ९ इति हेमचन्द्रः ॥
जलनिधिः पुं समुद्रः इत्यमरः ॥ जलनिर्गमः पुं प्राकारशृङ्गमित्यादिषु जलनिःसरणमार्गः इति भरतः देवकुलप्राकारादिषु जलनिःसरणद्वारं इति सर्वानन्दः तत्पर्यायः प्लमः २ इत्यमरः वक्रं ३ पुटभेदः ४ इति स्वामी ॥ जलनीली स्त्री शैवालं इत्यमरः ॥ जलन्धरः पुं असुरविशेषः तस्योत्पत्तिकारणं यथा इन्द्रः शिवं द्रष्टुं शिवलोकं गत्वा तत्र भयानकं पुरुषं दृष्ट्वा पुनः पुनः पप्रच्छ ईश्वरः कुगतः स उत्तरं न ददौ इन्द्रः क्रुद्धस्तं वज्रेण जघान ततो रुद्रस्तेजसा प्रजज्वाल तत इन्द्रो भीतस्तच्छरणमगमत् ततोवरुद्रस्तस्य इन्द्रद्रोहार्थी स्वं भालनेत्रस्य वह्निं गृहीत्वा गंगासागरसंगमे प्रातिपत् ततः स बालरूपो भूत्वा रुरोद तस्य रोदनशब्देन समस्तलोका बधिरीकृतास्ततो ब्रह्मा विस्मितस्तत्रागमत् बालं समुद्रक्रोडे दृष्ट्वा तं पप्रच्छ कस्यायं पुत्रः समुद्रस्तं प्रणम्योवाच मम पुत्रः अस्य जातकर्मादि कुरु इत्युक्त्वा ब्रह्मक्रोडे ददौ स बालस्तस्य श्मश्रु दधार श्मश्रु धुन्वतो ब्रह्मणो नेत्राभ्यां जलमगमत् ब्रह्मा समुद्रमुवाच यस्मादनेन मम नेत्राभ्यां निर्गतं जलं धृतं तस्मादयं जलन्धरो नाम्ना अधुनैव सर्वशास्त्रवेत्ता रुद्रं विना सर्वभूतावध्यश्च भविष्यति इत्युक्त्वा शुक्रमाहूय तमसुरराज्येभ्यषेचयत् स कालनेमिसुतां वृन्दामुपयेमे इति पाद्मोत्तरखण्डे ॥ जलपतिः पुं वरुणः इति हेमचन्द्रः समुद्रः अप्पतिरिति स्वामिदर्शनात् ॥ जलपारावतः पुं पक्षिविशेषः तत्पर्यायः कापी २ जलकपोतः ३ इति राजनिर्घण्टः ॥ जलपित्तं क्ली अग्निः इति शब्दरत्नावली ॥ जलपिप्पली स्त्री पिप्पलीविशेषः जलपिपरी इति हिन्दी भाषा तत्पर्यायः महाराष्ट्री २ शारदी ३ तोयवल्लरी ४ मत्स्यादनी ५ मत्स्यगन्धा ६ लाङ्गली ७ शकुलादनी ८ अग्निज्वाला ९ चित्रपत्री १० प्राणदा ११ तृणशीता १२ बहुशिखा १३ अस्या गुणाः कटुत्वं तीक्ष्णत्वं

कषायत्वं मलशोधनत्वं व्रणकीटादिदोषरक्तदोषनाशित्वं च इति राजनिर्घण्टः ॥
जलपृष्ठजा स्त्री शैवालं इति शब्दचन्द्रिका ॥
जलप्रायं क्ली जलबहुलस्थानं अनूपदेशः इत्यमरः ॥
जलप्रियः पुं चातकपक्षी इति शब्दरत्नावली मत्स्यः इति शब्दचन्द्रिका ॥
जलप्लवः पुं जलनकुलः इति हारावली ॥ जलफलं क्ली शृङ्गाटके इति भावप्रकाशः ॥
जलबन्धकः पुं जलमध्यगस्रोतोभेदकरं दारुशिलादि तत्पर्यायः विदारकः २ कूपकः ३ इति शब्दरत्नावली ॥
जलबन्धः पुं मत्स्यः इति शब्दचन्द्रिका ॥
जलबुद्बुदं क्ली जलविम्बं यथा मानुष्ये कदलीस्तम्भनिःसारे सारमार्गणं यः करोति स वै मूढो जलबुद्बुदसन्निभे इतिम्बद्धितव धृतं ॥ जलवल्ली स्त्री हिलमोची इति हारावली ॥
जलभूः पुं मेघः कञ्चटं इति शब्दचन्द्रिका ॥
जलमद्गुः पुं मत्स्यरङ्गपक्षी इति हारावली ॥
जलमधूकः पुं मधूकवृक्षभेदः जलमहुआ इति भाषा तत्पर्यायः मङ्गल्यः २ दीर्घपत्रकः ३ मधुपुष्पः ४ क्षौद्रप्रियः ५ पतङ्गः ६ कीरेष्टः ७ गैरिकाख्यः ८ अस्य गुणाः मधुरत्वं व्रणवातविनाशित्वं शुक्रबलकारित्वं शीतत्वं रसायनत्वं च इति राजनिर्घण्टः ॥
जलमसिः पुं मेघः इति हारावली जलमक्षिका स्त्री वारिकृमिः इति त्रिकाण्डशेषः ॥
जलमार्गः पुं प्रणाली नर्दमा इति भाषा इति हेमचन्द्रः ॥
जलमार्जारः पुं जलनकुलः इति त्रिकाण्डशेषः ॥
जलमुक् च पुं मेघः इत्यमरः ॥
जलमूर्तिः पुं शिवः तस्याष्टमूर्तिपूजायां निष्पादितत्वं ॥
जलमूर्तिका स्त्री करका इति शब्दचन्द्रिका ॥
जलमोदं क्ली उशीरं इति राजनिर्घण्टः ॥
जलयन्त्रगृहं क्ली जलमध्यक

तगृहं जलहड्डिः इति फोयारार चरइतिचभाषा तत्पर्य्यायः समुद्रगृहं २ इति त्रिकाण्डशेषः जलयन्त्रनिकेतनं ३ इतिहारावली जलयन्त्रमन्दिरं ४ यथा कविदिवसे जलयन्त्रमन्दिरं इतिकालिदासः जलरंकः पुं वकपक्षी इतिहेमचंद्रः जलरंकुः पुं दात्यूहपक्षी इतिहलायुधः ॥

जलरंजः पुं वकपक्षी इतिहेमचंद्रः ॥

जलरण्डः पुं जलावर्त्तः पयोरणः भुजङ्गमः इतिहेमचंद्रः शब्दरत्नावलीच ॥

जलरसः पुं लवणं इतिहारावली जलरुट् पुं पद्मं इतिहेमचंद्रः जलरुहं क्ली पद्मं इतिहेमचंद्रः जलरूपः पुं मकर इतित्रिकाण्डशेषः ॥

जललता स्त्री तरङ्ग इतिहारावली जलवरण्टः पुं जलवसनाख्याव्रणः पानीवसन इति भाषा तत्पर्य्यायः ॥ मोषाः २ इतिहारावली जलवल्कलः पुं कुंभिका पाना इतिभाषा इतिहारावली जलवल्ली स्त्री शृंगाटकः इति राजनिर्घंटः ॥

जलवायसः पुं मद्गुपक्षीपानीकौडि इतिभाषा इतिहेमचंद्रः जलवालकः पुं विंध्यपर्वतः इतिहेमचंद्रः ॥

जलवालिका स्त्री विद्युत् इति हेमचंद्रः ॥

जलवासं क्ली उशीरं इति राजनिर्घण्टः ॥

जलवासः पुं विष्णुकन्दः इति राजनिर्घण्टः ॥

जलवाहः पुं मेघः इतिहेमचंद्रः जलविडालः पुं जलनकुलः इति हारावली ॥

जलविंदुजा स्त्री यावनालीशर्करा इतिराजनिर्घण्टः जलविल्वः पुं कर्कटः पंचाङ्गः जलचत्वरं चातरजल इतिभाषा इतिमेदिनी ॥

जलविषुवं क्ली तुलासंक्रान्ति तत्पर्य्यायः आश्विनविक्रिते २ इतिशब्दरत्नावली चक्रविशेषः यथा मानंशिरेषराम्नुखपंचवेरं वत्सप्तन मे वक्र वित्त लाभः भोगः करे षट्पदयोस्तु षट्के भीति र्द्वंतांस्याद्विषुवस्य चक्रे

यस्मिन्नत्तेवसेज्जन्तुः तस्मात् सः गण्येद्बुधः इतिसमयामृते ॥

जलवृश्चिकः पुं चिङ्गटमत्स्याः इतित्रिकाण्डशेषः ॥

जलवेतसः पुं वानीरवृक्षः इति राजनिर्घंटः ॥

जलव्यधः पुं कंकत्रोटमत्स्याः इतित्रिकाण्डशेषः ॥

जलव्यालः पुं अलगर्दसर्पः इत्यमरः क्रूरकर्मा जलजन्तुः इतिराजनिर्घण्टः ॥

जलशयः पुं विष्णुः इतिहेमचंद्रः जलशयनः पुं विष्णुः इति हलायुधः जलशायी न् पुं विष्णुः यथा जलमध्येवराहेचपावकेजलशायिने इतिशारणं ॥

जलशुक्तिः स्त्री शम्बूकः इत्यमरः शामूकइतिजलसीपीइतिच भाषा तत् पर्य्यायः वारिशुक्तिः २ क्रमिशुक्तिः ३ क्षुद्रशुक्तिका ४ शम्बूका ५ नरशुक्तिः ६ पुटिका ७ तोयशुक्तिका ८ तस्यागुणाः कटुत्वं स्निग्धत्वं दीपनत्वं गुल्मशूल विषदोष नाशित्वं रुच्यत्वं पाचनत्वं वलदातृत्वंच इति राजनिर्घण्टः ॥ जलशूकं क्ली शैवालं इति हेमचंद्रः ॥

जलशूकरः पुं कुंभीरः इतिहेमचंद्रः ॥

जलसर्पिणी स्त्री जलौका इति हेमचंद्रः ॥

जलसूचिः पुं कंकत्रोटमत्स्याः शृंगाटः शिशुमारः जलौकायोस्त्री इतिमेदिनी काकः । इतिहेमचंद्रः ॥

जलस्था स्त्री गण्डदूर्वा इतिराजनिर्घंटः जलहं क्ली स्वल्पजलवस्त्रगृहं इतित्रिकाण्डशेषः जलहासः पुं समुद्रफेनः इतित्रिकाण्डशेषः ॥

जलाका स्त्री जलौकसः इतिशब्दरत्नावली ॥

जलाखुः पुं जलनकुलः इति त्रिकाण्डशेषः

जलांचलं क्ली स्रोतोवारिनिर्गमः शैवाले इतिमेदिनी ॥

जलाटनः पुं कंकपक्षी इति मेदिनी जलाटनी स्त्री जलौका इतिमेदिनी जलाण्टकः पुं नक्रराजः इति हारावली ॥

जलाण्डकं क्ली पोताधानं इतिशब्दरत्नावली ॥

जलालिका स्त्री जलौका इति

शब्दरत्नावली
जलाधारः पुं जलाशयः इत्यमरः
जलाधिदैवतः पुं वरुणः इति
हलायुधः पूर्वाषाढानक्षत्रे
क्ली इति ज्योतिषं ॥
जलाम्बिका स्त्री कूपः इतिहारा
वली जलाम्बिका इति[illegible]
वः जलायुका स्त्री जलौका इति
शब्दरत्नावली ॥
जलार्द्रः पुं आर्द्रवस्त्रं इतिहारा
वली जलार्द्रा स्त्री क्लिन्नवस्त्रं इ
ति हेमचन्द्रः जलार्णवः पुं वर्षा
कालः इति त्रिकाण्डशेषः जल
समुद्रश्च जलालुः पुं पानी
यालुः इति राजनिर्घण्टः ॥
जलालुकं क्ली पद्मकन्दः इति
राजनिर्घण्टः ॥
जलालुका स्त्री जलौका इ
ति शब्दरत्नावली ॥
जलालोका स्त्री जलौका इ
त्यमरटीकायां भरतः ॥
जलावर्त्तः पुं जलभ्रमः
अम्भसां भ्रमाः इति जटाध
रः ॥ जलाशयं क्ली उ
शीरं इत्यमरः लामज्जकं इ
ति राजनिर्घण्टः जलाशयः ।
पुं जलाधारः सतु पुष्करि ।

ण्यादिः इत्यमरः समुद्रः इति
हेमचन्द्रः शृङ्गाटकः इति राज
निर्घण्टः ॥
जलाशया स्त्री गुण्डालाह्वः
इति राजनिर्घण्टः ॥
जलाश्रयः पुं वृत्तगुण्डतृणं इ
ति राजनिर्घण्टः ॥
जलाश्रया स्त्री शूलीतृणं बला
का इति राजनिर्घण्टः ॥
जलाष्ठीला स्त्री पुष्करिणी इति
हारावली ॥
जलाह्वयं क्ली उत्पलं इति राज
निर्घण्टः ॥
जलाढी स्त्री जलपिप्पली इ
ति शब्दरत्नावली ॥
जलिका स्त्री जलौका इत्यमरटी
कायां भरतः ॥
जलुका स्त्री जलौका इति शब्दर
त्नावली जलूका स्त्री जलौका इ
ति हेमचन्द्रः जलेचरः पुं जलचर
पक्षी सतु हंससारसबकादिः तस्य
मांसगुणाः गुरुत्वं उष्णत्वं स्निग्ध
त्वं मधुरत्वं वायुनाशित्वं शु
क्रकारित्वञ्च । इति राजव
ल्लभः ॥
जलेच्छया स्त्री हस्तिशुण्डाह्वः
इति शब्दरत्नावली ॥

1069

जलेजातं क्ली पद्मं इति शब्दरत्ना
वली जलेन्द्रः पुं वरुणः महोदधिः
जम्भलः इति मेदिनी ॥
जलेन्धनः पुं वाडवाग्निः इति श
ब्दप्रयोगः जलेरुहा स्त्री कुटुम्बिनीवृक्षः
इति राजनिर्घण्टः जलेवाऊः पुं जातिविशेषः ॥
डुबरु इति भाषा यथा जलेवा
हानथाहूय वङ्गस्तत्रन्ययोजयत्
तत्कृत्वा परमं यत्नं माधुराभरणं
ननत इति पद्मपुराणे पातालखण्डे ॥
जलेशयः पुं मत्स्यः । इति त्रि
काण्डशेषः ॥
जलेश्वरः पुं वरुणः इति शब्दर
त्नावली समुद्रश्च ॥
जलोका स्त्री जलौका इत्यमर
टीकायां भरतः ॥
जलोच्छ्वासः पुं जलाशयपरिपू
र्णसमधिकजलस्य सर्वतो वहनं
इति केचित् समधिक जलस्य
पायैर्निष्कासनं इति स्वामी ज
लाम्बुपचये पुष्करिण्यादावु
पायेन जलनिष्कासनं इति स
र्वस्वं सेतुभङ्गादि भयेन जला
शयादुपायैः जलबहिष्करणं इ
त्यन्ये पुष्करिण्यादौ जल प्रवे

शार्थमुपायो निर्यानं इति ख्यात
इत्येके इति भरतः तत्पर्या
यः परीवाहः २ इत्यमरः ॥
जलोदरं क्ली जठरामयः तस्य
निदानादि यथा यः स्नेहपीतो
ऽप्यनुवासितो वा वान्तो विरिक्तो
ऽप्यथवा निरूढः पिबेज्जलं शी
तलमाशु तस्य स्रोतांसि दुष्यन्ति
हि तद्वहानि स्नेहोपलिप्तेष्व
थवापि तेषु दकोदरं पूर्ववद
भ्युपैति स्निग्धं महत्तत् परिवृ
त्तनाभि समाततं पूर्णमिवाम्बुना
च यथा दृतिः क्षुभ्यति कम्पते
च शब्दायते चापि दकोदरं तत्
जन्मनैवोदरं सर्वं प्रायः कृ
च्छ्रतमं मतं बलिनस्तदजाता
म्बु यत्नसाध्यं नवोत्थितं इति
माधवकरः ॥
जलोद्भवा स्त्री लघुब्राह्मी इति
राजनिर्घण्टः ॥
जलोद्भूता स्त्री गुण्डालाह्वयः
इति राजनिर्घण्टः ॥
जलोरगी स्त्री जलौका इत्यमर
टीकासारसुन्दरी ॥
जलौकसः स्त्री जलौका सा तु बहु
वचनान्ता यथाह इत्यमरः ॥
जलौकसः त्रि जलौका इत्यमर

टीकायां रायमुकुटः अकारा
न्तोऽयं जलौकाः स्त्री जलौका इ
तिभरतः जलौकास्त्री जलजन्तु
विशेषः जोंक इतिभाषा तत्प
र्यायः रक्तपा २ जलौकसः इ
त्यमरः जलूका ४ जलोका ५
जलौकाः ६ जलोरगी ७ जला
युका ८ जलिका ९ जलास्तका
१० जलजन्तुका ११ वेणी १२ ज
लालोका १३ जलौकसः १४
जलौकसी १५ इति भरतः ज
लोकसः १६ जलौकसा १७
इतिरायमुकुटः रक्तपायिनी १८
रक्तसन्दंशिका १९ तीक्ष्णा २०
वमनी २१ जलजीवनी २२ इति
राजनिर्घण्टः रक्तपाता २३ वेधि
नी २४ जलसर्पिणी २५ जलसू
चिः २६ जलाटनी २७ जलाका २८
जलपद्मात्मिका २९ जलिका ३०
जलालुका ३१ इतिशब्दरत्नाव
ली ॥ जल्प वाचि इतिकविक
ल्पद्रुमः जल्पः पुं विजिगीषोः क
था परमतखण्डनपूर्वकं स्वमत
व्यवस्थापनं इतिजटाधरः गौ
तमस्य कथाच जल्पनं क्ली कथ
नं यथा किं मिथ्या शान्त जल्पने
न सननं रेवज्ञरामं वद इत्युद्भटः

जल्पाकः त्रि वहुकुत्सितभाषी
तत्पर्य्यायः वाचालः २ वाचाटः
३ वहुगर्ह्यवाक् ४ इत्यमरः
जल्पितं त्रि उक्तं । इत्यमरः ॥
कथने क्ली ॥
जवः पुं वेगः वेगवतित्रि । इ
तिमेदिनी ॥
जवनं क्ली वेगः इत्यमरः ॥
जवनः पुं वेगः वेगयुक्ताश्वः ॥
देशविशेषः इउतान इतिपारस्य
भाषा इति हेमचंद्रः श्रीकारीमृ
गः घोटकः इतिराजनिर्घण्टः
म्लेच्छजातिविशेषः एष पूर्वं ज
वनदेशोद्भवः क्षत्रिय आसीत्
सगरराजेनास्य सर्वशिरो मुण्डने
सर्वधर्मवहिष्कृतत्वञ्चचकार इ
तिहरिवंशः वेगयुक्ते त्रि इति ।
मेदिनी ॥
जवनालं क्ली फलविशेषः ज
नार इतिभाषा अस्यगुणाः स्वादु
त्वं शीतत्वं वायुकारित्वं कफपित्त
नाशित्वञ्च इति राजवल्लभः ॥
जवनिका स्त्री व्यवधायकवस्त्रं
कानात् इतिभाषा तत्पर्य्यायः
प्रतिसीरा २ तिरस्करिणी ३ ।
इत्यमरः यवनिका ४ यमनिका

५ तिरस्कारिणी ६ इति तट्टीका
जवनी स्त्री अपटी कानात् इति
भाषा ओषधीभेदः इतिहेमचंद्रः
जवसं क्ली घासः इतिशब्दरत्नावली
जवा स्त्री स्वनामख्यातपुष्पवृक्षः
तत्पर्य्यायः ओड्रपुष्पं २ इत्यमरः
जपा ३ ओड्राख्या ४ रक्तपुष्पी ५
अर्कप्रिया ६ रागपुष्पी ७ प्रतिका
८ हरिवल्लभा ९ अस्या गुणाः क
टुत्वं उष्णत्वं इंद्रलुप्त विनाशकारि
त्वं विस्फोटजन्तुजनकत्वं सूर्य्यारा
धनसाधनत्वंच इतिराजनिर्घण्टः
मलमूत्र स्तम्भन रंजन कारित्वं इ
तिराजवल्लभः ॥
जवादि क्ली सुगंधिद्रव्यभेदः तत्प
र्यायः गंधराजं २ कृत्रिमं ३ मृग
चर्मजं ४ समूहगंधं ५ गंधाढ्यं ६
स्निग्धं ७ साम्राणिकर्द्दमं ८ सुगं
धतैलनिर्यासं ९ कटुमोदं १० अ
स्यलक्षणं नीरसत्वं स्निग्धत्वं ईष
त्पिंगत्वं सुगंधत्वं प्रातपेवरला
मोदत्वं राज्ञोयोग्यत्वंच अस्यगुणाः
सौगंधिकत्वं स्निग्धत्वं उष्णत्व
सुखावहत्वं वातहितत्वं राज्ञा
मोहनाल्हाद कारणत्वंच । इ
तिराजनिर्घण्टः ॥

जवाधिकः पुं वेगाधिकघोट
कः इत्यमरः अतिशयवेगयुक्ते
त्रि जवापुष्पं क्ली ओड्रपुष्पं इति
शब्दरत्नावली ॥
जवी त्रि वेगयुक्तः इति हेमचंद्रः
उष्ट्रः घोटकः इतिराजनिर्घण्टः
जष त्र वधे इति कविकल्पद्रु
मः जष ईर य उ मोदे इतिक
विकल्पद्रुमः ॥
जस क वध अनादरे इतिक
विकल्पद्रुमः ॥
जस इ क रक्षणे इतिकविकल्प
द्रुमः जसुरिः पुं वज्रं इत्युणादि
कोषः जहकः पुं कालः इतित्रि
कांडशेषः त्यागकर्त्तरित्रि इत्युणा
दिकोषः वालः निर्मोहः निर्मोकः
इतिसंक्षिप्तसारेउणादिवृत्तिः
जहा स्त्री मुण्डितिका मुण्डी
इति भाषा इति शब्दचंद्रिका ॥
जहानकः पुं प्रलयः इतिहेम
चंद्रः जह्नुः पुं विष्णुः राजर्षिभे
दः सचंद्रवंशोद्भवकुरुराजपु
त्रः गंगागमनकाले येन गं
गा पीता पुनर्भगीरथप्रार्थ
नेन ऊरुं भित्वा वहिर्निर्गमिता
तेन सा जाह्नवीतिख्याता इतिरा
मायणं ॥

जह्नुतनया स्त्री गंगा इत्यमरः
जह्नुसुता स्त्री गंगा इतिराजनिर्घ
ण्टः जल इम ङ दाने गतौ इति।
कविकल्पद्रुमः ॥
जख दल्ल म भक्षे हासे इति
कविकल्पद्रुमः ॥
जक्षणं क्ली भक्षणं इतिहेमचंद्रः
जक्षः पुं जक्ष्मा इत्यमरटीका ॥
जक्ष्मा पुं यक्ष्मरोगः इत्यमरः
टीकायांभरतः ॥
जा स्त्री याता भर्तृभ्रातृपत्नी।
इत्येकाक्षरकोषः ॥
जागरः पुं स्त्री जागरणं इत्यम
रः कवचे पुं इतितट्टीका ॥
जागरणं क्ली निद्राभावः जागा
इतिभाषा तत्पर्य्यायः जागर्य्या २
जागरा ३ जागर ४ इतिहेमचंद्रः
जागृया ५ जागर्त्तिः ६ इत्यमर
टीका ॥
जागरिता त्रि जागरणशीलः
इत्यमरः जागरी त्रिजागरूकः
इतिहेमचंद्रः जागरूकः त्रि जागर
णशीलः जागरण कर्त्ता तत्प
र्य्यायः जागरिता २ इत्यमरः।
जागरी ३ इतिहेमचंद्रः ॥
जागर्त्तिः स्त्री जागरणं इत्यमर

टीकायां रायमुकुटः ॥
जागर्य्या स्त्री जागरणं इत्यमरः
जागुडं क्ली कुंकुमं इतित्रिकां
डशेषः ॥
जागृदल्लु जागरे इतिकविकल्प
द्रुमः जागृविः पुं अग्निः इतिहेमचंद्रः
जाग्रत् त्रि जागरणविशिष्टः यथा
गंगोत्तुंगतरंगसंगतजटाजूटोग्रजा
ग्रत्फणिस्फूर्जत्फूत्कृति भीति
सम्भ्रमचमत्कारस्फुरत्संभ्रमा
इतिकाव्यचंद्रिका ॥
जाग्रिया स्त्री जागरणं इत्यमरटी
कायां रायमुकुटः ॥
जाघनी स्त्री ऊरुः इतित्रिकाण्ड
शेषः जाङ्गलं क्ली मांसं इतिहेमचं
द्रः जाङ्गलः पुं कपिंजलपक्षी इति
मेदिनी ॥
जांगलः त्रि स्थलजपशुविशेषः य
था हरिणैणकुरङ्गर्ष्यपृषतन्यंकुश
म्बराः राजीवोपिच मुण्डीचेत्याद्या
जांगलसंज्ञकाः हरिणस्ताम्रवर्णः
स्यादेणः कृष्णः प्रकीर्त्तितः कुरङ्ग ई
षत्ताम्रः स्याद्धरिणाकृतिकोमहान्
ऋष्यो नीलाण्डको लोके स रोझ इ
तिकीर्त्तितः पृषतश्चन्द्रविन्दुः स्या
द्धरिणात् किंचिदल्पकः न्यङ्कुः

र्वक्रविषाणो ज्ञेयः शम्बरो गव
योमहान् राजीवस्तु मृगो ज्ञेयो
राजीभिः परितो वृतः यो मृगः
शृंगः हीनः स्यात् स मुण्डीति
निगद्यते तस्य मांसस्य गुणाः
मधुरत्वं रूक्षत्वं कषायत्वं लघु
त्वं बल्यत्वं बृंहणत्वं वृषत्वं दी
पनत्वं दोषहरत्वं मूकत्वमिन्मि
नत्वगद्गदत्वार्दित बाधिर्य्यारुचि
च्छर्दिप्रमेह मुखजरोग श्लीपद
गलगण्ड वायुरोगनाशित्वंच
इतिभावप्रकाशः पीनत्वं मनुष्य
हितत्वं इतिराजवल्लभः निर्वाविदे
षाः इति शब्दरत्नावली अस्थल
क्षणं यथा आकाशशुभ्र उच्चश्च
स्वल्पपानीयपादपः शमीकरी
रबिल्वार्कपीलुकर्कन्धुसंकुलः
हरिणैणर्ष्यपृषत गोकर्ण खर
संकुलः सुस्वादुफलवान्
देशो वातलो जाङ्गलः स्मृतः
इतिभावप्रकाशः। तस्य गुणाः
वातपित्त कारित्वं उष्णत्वं रूक्ष
त्वंच तद्देशीय जलगुणाः अनु
पदेशात् विपरीतत्वं इतिरा
जवल्लभः रूक्षत्वं लवणत्वं
लघुत्वं तनुत्वं पथ्यत्वं बह्नि
कफ वक्र विकार कारित्वंच

इतिभावप्रकाशः जंगलदेशो
द्भवश्च जाङ्गलिः पुं व्यालग्राही
इति शब्दरत्नावली ॥
जंगली स्त्री शूकशिम्बी इतिमे
दिनी जंगुलं क्ली विषं जालिनी
फले इति शब्दरत्नावली ॥
जंगुलिः पुं विषवैद्यः सापुडे
इति भाषा इतिशब्दरत्नावली
जंगुलिकः पुं व्यालग्राही इत्य
मरः जांगुली स्त्री विषविद्या।
इतिहेमचंद्रः
जांघिकः पुं उष्ट्रः श्रीकारीह
तः इति राजनिर्घण्टः जंघा
जीवी धावकादिः तत्पर्य्यायः
जंघाकरिकः २ इत्यमरः ॥
जाज्वल्यमानः त्रि देदीप्यमा
नः यथा जाज्वल्यमानतेजोभी
रविविस्व मिवाम्बरात् इतिवं
शी जाटलिः पुं स्त्री वृक्षविशेषः
इतिलिंगादिसंग्रहे अमरः
जाड्यं क्ली जडता तत्पर्य्या
यः स्तम्भः २ मौर्ख्यं इतिहे
मचंद्रः जाड्यारिः पुं जम्बीरः
इति राजनिर्घण्टः ॥
जातं क्ली व्यक्तं ॥ स
मूहः ॥ जन्म तत् पत्रे वि
इति मेदिनी ॥

जातकं क्ली जातवालकस्य शुभाशु
भनिर्णायकग्रन्थः तस्य भेदाः
जातकदीपिका १ जातकमुक्तं २
जातकतरंगिणी ३ जातककौमु
दी ४ जातकार्णवः ५ जातकचन्द्रि
का ६ लघुजातक ७ बृहज्जातक ८
इत्यादि इति ज्योतिषं ॥ जा
तकः पुं कारणी भिक्षुः ॥
जातेन्द्रि इति धरणिः ॥
जातकं क्ली दशसंस्कारान्तर्गा
तसंस्कार विशेषः तस्य क्रमो
यथा पुत्रे जाते पिता नाभिं माक
र्त्तनस्तनं च मात्रे न दद्यात् अपिधाय
कृतस्नानः कृतवृद्धिश्राद्धः प्र
क्षालितशिलायां वस्त्रवारिणा
कुमार्य्या गर्भवत्या वा कृतस्ना
नया शील वालनेन वा प्र
ताहत लोह पिष्टो व्रीहि यवो
दक्षिण हस्तानामिकाङ्गुष्ठाभ्यां
गृहीत्वा मंत्रेण कुमारस्य जि
ह्वामार्ष्टि ततस्तथैव सुवर्णे
न हुतं गृहीत्वा मंत्रेण तथैव
कुमारस्य जिह्वां मार्ष्टि ततः
पुनरपि सुवर्णेन हुतं गृहीत्वा
मंत्रेणानेनैव कुमारस्य जि
ह्वां मार्ष्टि ततो नाभिकृन्तन
स्तनं च दद्यादिति पिता कुर्यात्

स्नानं पुनः पिता न कुर्यात् इ
ति भवदेवभट्टः ॥
जातवेदाः पुं अग्निः चित्रकवृ
क्षः इत्यमरः ॥
जातरूपं क्ली स्वर्णं धुस्तूरः इ
त्यमरः उत्पन्नरूपेपि यथा तज्जा
तरूपच्छदजातरूपता इति श्री
हर्षः जातापत्या स्त्री प्रसूता इ
त्यमरः जातिः स्त्री गोत्रं जन्म अ
श्मन्तिका आमलकी सामान्यं त
त्र ब्राह्मणक्षत्रियवैश्यशूद्रात्मकं
छन्दः जातीफलं मालती इति मे
दिनी काम्पिल्लः इति विश्वः गोत्वा
दिः तस्य लक्षणं यथा आकृतिग्र
हणा जातिर्लिङ्गानां च न सर्वभा
क् सकृदाख्यातनिर्ग्राह्या गोत्रं
च चरणैः सह इति मुग्धबोधं ॥
अस्यार्थः आक्रियते व्यज्यते अ
नयेति आकृतिः संस्थानं आकृत्या
ग्रहणं ज्ञानं यस्याः सा आकृति
ग्रहणा जातिराकृतिग्रहणा
भवति संस्थानव्यंग्या इत्यर्थः ते
न मनुष्यगो मृग हंसादीनां प्र
त्येकं पृथक् संस्थानैर्व्यंग्यमा
नामनुष्यत्वगोत्वमृगत्वहंसत्वा
दिर्जातिः एवं ब्राह्मणक्षत्रिय
वैश्यशूद्राणां पृथक् ॥

संस्थानाभावात् ब्राह्मणत्वादेर्जा
तित्वं नायातमिति लक्षणान्तरमा
ह लिंगानां च न सर्वभागिति या
सर्वाणि लिंगानि न भजते सा च
जातिरित्यर्थः स्त्री पुंसयोरपत्या
न्तद्विचतुःषट्पदोरगाः जातिभे
दाः पुमाख्याश्च इत्यमरसिंहे जा
तिभेदानां स्त्रीपुंसयोर्वेवति नि
यमे ब्राह्मणादीनां सर्वलिंग
भाजित्वाभावाज्जातित्वं किन्तु
अज्ञात हंसस्य जनस्य हंसेह
ष्टवतोपि तस्य संस्थानेन हंस
त्वं व्यंजितं न शक्यते इति हंस
स्यापि जातित्वं नायातमिति
पूर्वलक्षणस्य दोषः एवं देवद
त्तादिसंज्ञाशब्दस्यापि सर्वलिंग
भाजित्वाभावाज्जातित्वापत्तिरिति
द्वितीय लक्षणस्य दोषः इति दो
षद्वयमपाकर्त्तुं द्वयोर्लक्षणयो
र्विशेषणमाह सकृदाख्यातनि
र्ग्राह्येति सकृदेकवारमाख्याते
नउपदेशेन नि निश्चयेन ग्राह्या
ग्रहीतुं शक्या इत्यर्थः तेन ईदृ
शो हंस इत्युपदेशो हंसे दृष्टएव
तत्तस्य संस्थानेन हंसत्वं व्यं
जितं शक्यत एवेति पूर्वल ।

क्षणस्य न दोषः एवं देवद
त्तादि संज्ञा शब्दस्य एकस्मि
न्नुपदेशेपि अन्यस्मिन् ज्ञाना
भावात् जातित्वं न स्यादिति
परलक्षणस्यापि न दोषः गा
र्ग्यः पुरुषः गार्गी स्त्री गार्ग्यं
कुलमिति सर्वलिंगभाजित्वा
त् संस्थान व्यंग्यत्वाभावाच्च
गार्ग्यादीनां जातित्वानुपपत्तौ
तृतीय लक्षणमाह गोत्रं चेति
पुत्र पौत्र प्रभृतिकमपत्यं गो
त्रमिति पूर्वाचार्य्य परिभाषितं
गोत्रमिह गृह्यते गार्गी वात्सी
त्यादि चतुर्थलक्षणमाह चरणैः
सहेति चरणं च जातिरित्यर्थः
चरणशाखा वेदैक देशवाची
कठादि रूपः स च अध्ययन क्रि
यासंबंधेन प्रवृत्तत्वात् क्रिया
वाचक एव न तु जाति वाचकः
तेनास्य जाति संज्ञार्थं चरणैः
सहेत्युक्तं गार्ग्यादीनां पित्रादी
ति सिद्धेपि जाति संज्ञा फलं
गार्गी भार्य्या यस्यासौ गार्गीभा
र्य्या इत्यादौ नोमाककोडि सा
दिला पुंवद्भाव निषेधः गार्गी
वात्सी भार्य्या चेति गार्ग्यभार्य्या इत्या
दौ कोडादिः पुंवदित्यादिना पुनः

प्रमाज्ञावः इतिदुर्गादासः सा
मान्यं द्विविधं प्रोक्तं परंचापर
मेवच इत्यादि विक इतिस्त
सत्ता परतयोच्यते परभिन्नात
या जातिः सैवापरतयोच्यते
व्यापकत्वात् परापि स्यात्व्या
प्यत्वादपरापिच इत्यत्रादि
कजातिश्चपरापरतयोच्यते इ
तिभाषापरिच्छेदः तल्लक्षणंतु नि
त्यत्वेसत्यनेकसमवेतत्वं इति
सिद्धान्तमुक्तावली ॥
जातिकोशं क्ली जातीफलं इति
भावप्रकाशः ॥
जातिकोषं क्ली जातीफलं इति
हेमचंद्रः ॥
जातिकोषी स्त्री जातीपत्री इ
तिराजनिर्घण्टः ॥
जातिफलं क्ली जातीफलं इ
तिहेमचंद्रः ॥
जातिभ्रंशकरं क्ली नवविध
पापान्तर्गतपापविशेषः यथा
ब्राह्मणस्यरुजः कृत्याघ्रातिर
मेयमद्ययोः जैह्म्यंपुंसिचमैथु
नंजातिभ्रंशकरंस्मृतं इतिमनुः
ब्राह्मणस्यदण्डहस्तादिना पी
डक्रिया अघ्रेयं लशुन पुरीषा
दि जैह्म कुटिलत्वं ॥ ॥

वक्रता इति कुल्लूकभट्टः ॥
जातिवैरं क्ली स्वाभाविकशत्रु
त्वं तत्पंचविधं स्त्रीकृतं १ यथाश्री
कृष्णशिशुपालयोः वास्तुजं २ यथा
कौरवपाण्डवानां वाग्जं ३ यथा
द्रोणद्रुपदयोः सापत्नं ४ यथा
मूषिकनकुलयोः अपराधजं ५
यथा पूजनीब्रह्मदत्तयोः इतिम
हाभारतं ॥
जातिसारं क्ली जातीफलं इति
राजनिर्घण्टः ॥
जाती स्त्री जातीपुष्पं चमेलीइति
हिंदीभाषा तत्पर्यायः सुरभि
गंधा २ सुमना ३ सुरप्रिया ४ चे
तकी ५ सुकुमारा ६ संध्यापुष्पी
७ मनोहरा ८ राजपुत्री ९ मनोज्ञा
१० मालती ११ तैलभाविनी १२
जनेष्टा १३ हृद्यगंधा १४ अस्या
गुणाः तिक्तत्वं शीतत्वं कफ
मुखपाक नाशित्वं इति राजनि
र्घण्टः उष्णत्वं तुवरत्वं लघुदो
ष शिरोऽक्षि दंतरोग विषकु
ष्ठ व्रणरक्तदोषनाशित्वंच इति
भावप्रकाशः तत्कुड्मलस्य
गुणाः नेत्ररोगव्रणविस्फोटकुष्ठ
नाशित्वं इतिराजनिर्घण्टः ॥

जातीकोशं क्ली जातीफलं इति
हेमचंद्रः ॥
जातीकोषं क्ली जातीफलं इति
हेमचंद्रः ॥
जातीपत्री स्त्री जातीफलत्वक् जै
त्री इतिभाषा तत्पर्यायः जाती
कोषी २ सुमनःपत्रिका ३ माल
तीपत्रिका ४ सौमनसायनी ५ जा
तिपत्री ६ अस्या गुणाः कटुत्वं ।
तिक्तत्वं सुरभित्वं कफ जाड्यना
शित्वं वक्त्रवैशद्य जननत्वंच इति
राजनिर्घण्टः लघुत्वं स्वादुत्वं उ
ष्णत्वं रुचिवर्णकारित्वं कफका
सवमिश्वासतृष्णाविषनाशित्वं
इतिराजवल्लभः ॥
जातीफलं क्ली फलविशेषः जा
यफल इति भाषा तत्पर्यायः ॥
जातीकोषं २ इत्यमरः जातीकोशं
३ जातिफलं ४ इति तट्टीका ॥
जातिशस्यं ५ शाल्लकं ६ माल
तीफलं ७ मज्जसारं ८ जाति
सारं ९ पुटं १० सुमनःफ
लं ११ अस्यगुणाः कषायत्वं
उष्णत्वं कटुत्वं कण्ठमयार्त्ति
वातातीसार मेहनाशित्वं वृष्य
त्वं दीपनत्वं ॥ लघुत्वञ्च ॥

इति राजनिर्घण्टः रसेतिक्तत्वं
तीक्ष्णत्वं रोचनत्वं ग्राहित्वं ॥
स्वरहितत्वं श्लेष्मानिलमुख
वैरस्य मलदौर्गन्ध्य कृष्णता
कृमिकास वमिश्वास शोषपी
नसहृद्रुग्नाशित्वंच इति भावप्र
काशः तत्साम्लनाशित्वं इति
राजवल्लभः ॥
जातीयः त्रि तद्धितप्रत्ययविशे
षः सतु प्रकारार्थे भवति यथा
तार्किकजातीया इतिमुग्धबोधः
जातीरसं क्ली बोलः इतिराज
निर्घण्टः ॥
जातु व्य कदाचित् इत्यमरः
संभावितार्थः गर्हार्थः इति
शब्दरत्नावली ॥
जातुकं क्ली हिंगु इतिशब्दचंद्रि
का जातुधानः पुं यातुधानः रा
क्षसः इत्यमरटीकायांरमानाथः
जातुषं त्रि जतुविकारः जतुनि
र्मितं इतिजटाधरः ॥
जातोक्षः पुं उत् पन्नउक्षा इ
त्यमरः उत पन्नो दृष्टस्वभा
वः शामबलीवर्दभावउक्षा
इतिभरतः जात्यः त्रि कुली
नः श्रेष्ठः इति हेमचंद्रः ॥
कान्तः इतिजटाधरः ॥

जात्यन्धः त्रि जन्मान्धः यथा अ
नंशोक्लीव पतितौजात्यन्धवधिरौ
तथा उन्मत्तजडमूकाश्चयेच के
चिन्निरिंद्रियाः इतिमनुः ॥
जादो त्रि जातः इति प्राकृतलं
केश्वरः ॥
जानकी स्त्री सीता इतित्रिकांडशे
षः जानपदः पुं जनः देशः इ
ति मेदिनी ॥
जानु क्ली ऊरुजंघयोर्मध्यभा
गः होंटु इतिभाषा तत्पर्यायः
ऊरु पर्व २ अष्टीवत् ३ अष्टीवान्
४ इतिमरः चक्रिका ५ इतिराज
निर्घण्टः ॥
जापः पुं जपः इतिजटाधरः
जापकः त्रि जपकर्त्ता जपधातोः
कर्त्तरि णकप्रत्ययेन निष्पन्नः
जापनं क्ली निरसनं निर्वर्त्तनं
इति धरणिः ॥
जाबालः त्रि अजाजीवः इत्य
मरः मुनिविशेषः यथा जा
बालोयाज्ञवल्काश्च वैशंपा
यन एवच इति ब्रह्मवैवर्त्तपु
राणं ॥ जाबालिः पुं मुनिवि
शेषः यथासुयज्ञं वामदेवंच
जाबालि मथकाश्यपं । इ
तिरामायणं ॥ ॥

जामदग्न्यः पुं जमदग्निपुत्रः पर
शुरामः इति हेमचंद्रः ॥
जामाता[स्] पुं दुहितृपतिः जामा
इ इतिभाषा इत्यमरः सूर्य्यावर्त्तः
धवः इति मेदिनी ॥
जामिः स्त्री स्वसा कुलस्त्री इत्यमरः
जामी स्त्री जामिः इतिशब्दरत्नाव
ली जामेयः पुं भागिनेयः इति
हेमचंद्रः ॥
जाम्बवं क्ली जम्बुफलं इत्यमरः
सुवर्णं इति राजनिर्घण्टः जाम्ब
वति पुं इति शब्दभेदः ॥
जाम्बवती स्त्री नागदमनी इ
तिराजनिर्घंटः श्रीकृष्णपत्नी जा
म्बवत्कन्या इति श्रीभागवतं ॥
जाम्बवान्[त्] पुं ऋक्षराजः सब्रह्मपु
त्रः यथा ऋक्षराजस्य पुत्रो ऽत्र
महाप्राज्ञः सुदुर्जयः पितामह
सुतश्चात्र जाम्बवानिति विश्रुतः
इतिरामायणं ॥
जाम्बवी स्त्री नागदमनी इतिरा
जनिर्घण्टः ॥
जाम्बुवान्[त्] पुं जाम्बवान् इतिभ
रतो द्विरूपकोषश्च ॥ जाम्बू
नदं क्ली स्वर्णं धुस्तूरः इतिरा
जनिर्घण्टः स्वर्णविशेषः यथा

मेरु मन्दर पर्वतस्य जम्बूफला
नामत्यन्तनिपात विशीर्णानां अन
स्थिप्रायाणां इभकायनिभानां र
सेनजम्बूनामनदी इलावृतंवह
ति तस्या उभयोस्तीरयोर्मृत्तिका
जम्बूरसेनानु विध्यमाना वाय्वर्क
संयोगविपाकेन सदामर लो
काभरणं जाम्बूनदनाम स्वर्णं भ
वति इतिश्रीभागवते ॥
जायकं क्ली कालीयकं कालि
या इतिख्यातं पीतवर्णसुगंधि
काष्ठं इत्यमरः ॥
जायास्त्री भार्य्या इत्यमरः ॥
जायाजीवः पुं नटः इत्यमरः
जायानुजीवीन पुं नटः वकप
क्षी इति मेदिनी ॥ वेश्यापतिः
इति शब्दरत्नावली दुःस्थः इति
हेमचंद्रः ॥
जायापती पुं भार्य्यापती माय
भातार इति भाषा नित्यद्विवच
नान्तो ऽयंशब्दः इत्यमरः ॥
जायुः पुं औषधं इत्यमरः ॥
जारः पुं उपपतिः इत्यमरः
जारजः त्रि उपपति जात सन्ता
नः इत्यमरः ॥
जारणी स्त्री स्थूलजीरकः इतिरा

जनिर्घण्टः ॥
जारी स्त्री औषधीविशेषः जाडीर
तिभाषा इतिमेदिनी ॥
जारूथ्यः पुं त्रिगुणदक्षिणाक
यज्ञः इतिमहाभारतेवनपर्व
जैलक्ली स्वनामख्यातसूत्रादि
निर्म्मितमत्स्यादि धारणोपायः
तत्पर्य्यायः आनायः २ इत्यमरः
जालकं ३ इति शब्दरत्नावली
गवाक्षः क्षारकः सत्त्व अस्फुट
कलिका कुष्माण्डादि लुद्रफलं
च दंभः समूहः इति मेदिनी
इंद्रजालं इतिहेमचंद्रः
जालः पुं कदम्बवृक्षः इतिमे
दिनी जालकं क्ली अस्फुटकलि
का इतिभरतः कुष्माण्डादि क्षु
द्रफलं इति सारसुंदरी तत्पर्यायः
क्षारकः २ इत्यमरः कोरकः
दम्भः ऊलायः आनायः इति
मेदिनी समूहः इति शब्दरत्ना
वली ॥
जालकं क्ली स्त्री मोचकफलं
इतिमेदिनी ॥
जालकः पुं गवाक्षः इतिहेमचं
द्रः जालकारकः पुं मर्कटकः
इतिहेमचंद्रः जालकर्मीर त्रि

जालकिनी स्त्री मेषी इतिहेमचंद्रः ॥
जालगर्द्दभः पुं रोगविशेषः तस्यलक्षणं यथा विसर्पवत् सर्पति यः शोथस्तनु रपाकवान् दाहज्वरकरः पित्तात् सज्ञेयो जालगर्द्दभः इतिमाधवकरः ॥
जालगोणिका स्त्री दधिमन्थनभाण्डविशेषः तत्पर्यायः कंडला २ इतिशब्दरत्नावली ॥
जालन्धरः पुं त्रिगर्त्तदेशः इति हेमचंद्रः तद्देशस्थे पुं भूम्नि ॥
जलपाद पुं हंसः इति त्रिकाण्डशेषः ॥
जालप्राया स्त्री अङ्गरक्षिणी लोहार साजोया इति भाषा इति हेमचंद्रः जालवर्बूरकः पुं वर्बूरवृक्षविशेषः ॥
तत्पर्यायः छत्राकः २ स्थूलकण्टकः ३ सूक्ष्मशाखः ४ तनुच्छायः ५ रन्ध्रकाण्टः ६ अस्यगुणाः चूर्णत्वं वातामयकफनाशित्वं पित्तदाहकारित्वं कषायत्वं उष्णत्वंच इतिराजनिर्घण्टः ॥
जालिकः पुं मर्कटकः इतिहेमचंद्रः कैवर्त्तः इतित्रिकाण्डशेषः वागुरिकः जालेन मृगबंधनकर्त्ता इत्यमरः ॥
जालिकः त्रि ग्रामजाली जालोपजीवी इति मेदिनी ॥
जालिका स्त्री वस्त्रविशेषः गिरिसारः जलौका विधवा भटानामङ्गरचितोगरक्षिणी इतिमेदिनी
जालिनी स्त्री चित्रशाला इतिहेमचंद्रः कोशातकी इतिराजनिर्घण्टः घोषातकी इति रत्नमाला ॥
जाला स्त्री ज्योत्स्नी झिंगा इति ख्याता इत्यमरः पटोलः इति राजनिर्घण्टः ॥
जाल्मः त्रि पामरः क्रूरः असमीक्ष्यकारी इतिमेदिनी ॥
जाषकं क्ली कालीयनाम गंधद्रव्यं इत्यमरटीका सारसुंदरी ॥
जाहकः पुं घोंघः घोंघ इति भाषा मार्ज्जारः खट्वा कारुणिका इतिमेदिनी बिलेशय जन्तुविशेषः तत्पर्यायः गात्रसंकोची २ मण्डली ३ वक्रचूपकः ४ कामचूपी ५ विचूपी ६ बिलवास ७ इतिराजनिर्घण्टः ॥
जाह्नवी स्त्री गङ्गा इतिहेमचंद्रः एतन्नामकारणं यथा जह्नुद्वारा

पुरादत्ता जह्नुः संपीय कोपनः तस्यकन्या त्वरूपा च जाह्नवी तेन कीर्त्तिता इतिब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डं ॥ तस्यां तिथिविशेषे स्नानफलं यथा सामान्यदिवसस्नान संकल्प स्मरण संद द्विगुणं दशगुणं चैव मौषल ॥ स्नानतः परे तत्र त्रिंशद्गुणं पुण्यं रविसंक्रमणे दिने अमायां चापि तत्तुल्यं द्विगुणं दक्षिणायने ततो दशगुणं पुण्यं नराणां चोत्तरायणे चातुर्मास्यां पौर्णमास्यामनन्तं पुण्यमेवच अक्षयायां च तत्तुल्यं नैतद्वेदनिरूपितं असंख्यं पुण्यफलदमेतेषु स्नानदानकं सामान्यदिवस स्नानात् दानात् शतगुणं भवेत् मन्वन्तरायां देवपि युगाद्यायां तथैवच माघस्यासितसप्तम्यां भीष्माष्टम्यां तथैवच ततोपि द्विगुणं पुण्यं नंदायां भवज्जन्मे दशाहारा दशम्यां च युगाद्यादि समफलं नंदासमेचवारुण्यां महत्पर्वं चतुर्गुणं ततस्त्रिगुणं पुण्यं द्विमहत्सर्वके सति पुण्यं कोटिगुणं चैव सामान्य स्नानतो हि यत् चंद्रोपरागसमये सूर्ये दशगुणं ततः पुण्यप्रद्वोदये काले ततः शतगुणं फलं सर्वेषामेव संकल्पवेलवानां विपर्ययः इति ब्रह्मवैवर्त्ते प्रकृतिखण्डं ॥
जि जेषे अभिभवे इति कविकल्पद्रुमः ॥
जिः त्रि जेता पिशाचे पुं इत्येकाक्षरकोषः ॥
जिगत्नुः पुं प्राणवायु इत्युणादिकोषः ॥
जिगमिषा स्त्री गमनेच्छा इतिव्याकरणं ॥
जिगीषा स्त्री जयेच्छा व्यवसायः प्रकर्षः इति मेदिनी ॥
जिघत्सा स्त्री क्षुधा इति हेमचंद्रः जिघत्सुः त्रि क्षुधितः इत्यमरः जिघांसकः त्रि हननेच्छुकः इतिव्याकरणं ॥
जिघांसा स्त्री हननेच्छा इतिव्याकरणं जिघांसुः पुं शत्रुः इति हेमचंद्रः हननेच्छौ त्रि यथा प्रशान्तचेष्टं हरिणं जिघांसुरिति भट्टिः जिघ्रः त्रि घ्राणकर्त्ता यथा स्वामी निश्वसितेप्यसूयति मनोजिघ्रः सपत्नीजनः इतिसा

हित्यदर्पणः जिङ्गिनी स्त्री वृक्षवि
शेषः तत्पर्य्यायः किंगिनी २ कि
ङ्गी ३ सुनिर्यासा ४ प्रमोदिनी ५ अ
स्या गुणाः मधुरत्वं अम्लत्वं कषाय
त्वं योनिशोधनत्वं कटुत्वं व्रणहृ
द्रोगवातातीसार नाशित्वं पटुत्वं
च इतिभावप्रकाशः ॥
जिङ्गी स्त्री मंजिष्ठा इत्यमरः ॥
जितः पुं अर्हद्उपासक विशेषः
इति हेमचंद्रः ॥
जितः त्रि प्राप्तपराजयः तत्पर्य्या
यः पराभूतः २ परिभूतः ३ अभि
भूतः ४ भग्नः ५ पराजितः ६ इति
हेमचंद्रः ॥
जितकाशिः पुं हृष्टपुष्टः इतिभा
रतटीकायांनीलकंठः
जितकाशी त्रि जययुक्तः तत्प
र्य्यायः जिताहवः २ इतिहेमचंद्रः
जितनेमिः पुं अश्वत्थनिर्मितदंडः
तत्पर्य्यायः आश्वत्थ २ इतिहेम
चंद्रः ॥
जितशत्रुः पुं वर्त्मार्हत्पिता इ
ति हेमचंद्रः कृतशत्रु पराजये
त्रि जितामित्रः पुं विष्णुः इतिश
ब्दरत्नावली कृतशत्रुपराजये त्रि
जिताति पुं बुद्धः इतित्रिकाण्ड
शेषः वर्त्मार्हत्पिता इति हे
मचंद्रः जितशत्रौ त्रि ॥
जिताहवः पुं जितकाशी इति
हेमचंद्रः ॥
जितान्तरः त्रि कृतान्तरजयः
वशीभूतान्तरकः दृष्टि मात्रेण
तत्स्वोधेन पावकसमः इतिलोक
प्रसिद्धः ॥
जितेन्द्रियः त्रि वशीकृतेन्द्रियः
तत्पर्य्यायः शान्तः २ दान्तः ३
इति हेमचंद्रः ॥
जितेन्द्रियाह्वः पुं कामहद्धिद्धः
इतिराजनिर्घण्टः ॥
जित्नमः पुं जितमः मिथुनरा
शिः इतिज्योतिषतत्वं जयशीला
नामधेयइत्यमरम्ब ॥
जित्या स्त्री हलिः इतिहेमचंद्रः ।
जित्वरे त्रि जेता इत्यमरः ॥
जित्वरी स्त्री काशी इतित्रिकाण्ड
शेषः जिनः पुं अर्हन् बुद्धः वि
ष्णुः इतिहेमचंद्रः अतिवृद्धः इ
त्युणादिकोषः जित्वरे त्रि इति
मेदिनी ॥
जिनयोनिः पुं मृगः इतिशब्द
रत्नावली ॥
जिनसद्म क्ली जिनगृहं तत्पर्य्यायः

चैत्यः २ विहारः ३ इति हेमचंद्रः
जिनेन्द्रः पुं बुद्धः इति हलायुधः
जिम उ भक्ष इतिकविकल्पद्रुमः
जिवि र न हिंसायां इतिकविकल्प
द्रुमः ॥
जिव ई प्रीणने इतिकविकल्पद्रु
मः जिवाजिवः पुं जीवंजीवपक्षी
इतिशब्दरत्नावली ॥
जिविः पुं समयः पक्षी इति
सिद्धान्तकौमुद्यां मुणादि वृत्तिः
जिष उ सेके इतिकविकल्पद्रुमः
जिष्णुः पुं विष्णुः इति हेमचंद्रः
इंद्रः अर्जुनः जेतरि त्रि इति ॥
मेदिनी ॥
जिह्म क्ली तगरवृक्षः इतिमेदिनी
जिह्मः त्रि कुटिलः मंदः इति
मेदिनी जिह्मगः पुं सर्पः मंदगे
त्रि इतिमेदिनी ॥
जिह्ममोहनः पुं भेकः इति
शब्दरत्नावली ॥
जिह्मशल्यः पुं खदिरः इति
जटाधरः ॥
जिह्मं क्ली तगरमूलं इतिरत्न
माला जिह्वः पुं स्त्री जिह्वा इ
त्यमरटीकायांभरतः ॥ ॥
जिह्वालः त्रि लम्पटः लोलुपः य
था श्राद्धंकृत्वा परश्राद्धे भुंजते
येचजिह्वालाः पतन्ति नरके घो
रेलुप्त पिण्डोदक क्रियाः इति
श्राद्धतत्वं ॥
जिह्वा स्त्री रसज्ञानेन्द्रियं जिब्
इतिभाषा तत्पर्य्यायः रसज्ञा २
रसना ३ इत्यमरः रशना ४
रसन ५ जिह्वः ६ इति तट्टीका
अस्याः परीक्षा यथा शाकपत्र
प्रभारूक्षा स्फुटितारसनानिला
त् रक्ता श्यामा भवेत् पित्तालि
प्ताईधवलाकफात् परिदग्धा ख
रस्पर्शाकृष्णादोषत्रयेःधिके सै
वदोषद्वयाधिकेदोषहितयलक
णा इतिभावप्रकाशः ॥
जिह्वानिर्लेखनं क्ली जिह्वामा
र्जनं जिवछोचडनइति भाषा
जिह्वामार्जनद्रव्यं जिवछोचडा
चोयाडि इतिभाषा तत्स्वर्णांगुलं
कोमलंकृशं स्वर्ण रूप्य ताम्र लो
हनिर्मितंजिह्वामलापकर्षणे
प्रशस्तं तस्यागुणाः वक्त्रवैरस्य
जिह्वाश्रित मलनाशित्वं आरोच
रुचि कारित्वंच इति राजवल्लभः
जिह्वापः पुं कुक्कुरः व्याघ्रः ॥

विशाल: भल्लूक: इति शब्दरत्ना
वली चित्रकव्याघ्र: इति ॥
विश्व: ॥
जिह्वामलं क्ली जिह्वास्थितमलं
तत् पर्य्याय: कुलकं २ इतित्रिका
ण्डशेष: ॥
जिह्वामूलीय: पुं वज्राकृतिर्णी:
वोपदेवेनास्य ह्न इतिसंज्ञाकृता
सतुकावपरेविसर्गस्थाने भव
ति यथाहरि काम्या: अस्या
ञ्चारणविसर्गवत् इतिव्याकरणं
अथोविरेकपुष्कागामात्रवद्धय
त्रूपक: जिह्वामूलीय इत्येव पञ्ज
कुम्भोपम्भोयर: इतिसुपद्मव्याक
रणटीका जिह्वारद: पुंपक्षी इति
हारावली जिह्वालिट् पुं कुक्कु
र: इतिभूरिप्रयोग: ॥
जिह्वाशल्य: पुं खदिरवृक्ष: इ
तिराजनिर्घण्ट: ॥
जिह्वास्वाद: पुं लेहनं इति हे
मचंद्र: ॥
जीन: त्रि वृद्ध: इत्यमर: ॥
जीमूत: पुं पर्वत: मेघ: मुस्ता
देवताड्वृक्ष: इत्यमर: इंद्र: भृ
तिकर: ॥ घोषकलता इ
ति हेमचन्द्र: ॥

जीमूतकूट: पुं पर्वत: इतिहा
रावली ॥
जीमूतमूलं क्ली शटी इतिरत्नमा
ला जीमूतवाहन: पुं इंद्र: मेघवार
न इत्यमरदर्शनात् धर्मरत्ननामक
स्मृतिसंग्रहकर्त्ता च ॥
जीमूतवाही पुं धूम: इतिहेमचंद्र:
जीरा: पुं जीरक: खंग: इति मे
दिनी अनु: इतिसिद्धान्तकौमुद्या
मुणादिवृत्ति: ॥
जीरक: पुं वणिग्द्रव्यविशेष: जी
रा इति भाषा तत्पर्य्याय: जरण:
२ अजाजी ३ कणा ४ इत्यमर:
जीर्ण: ५ जीव: ६ दीप्य: ७ जीर
ण: ८ अजाजिका ९ वह्निशिख: १०
मागध: ११ अस्य गुणा: कटुत्वं ॥
उष्णत्वं दीपनत्वं वातगुल्माध्मा
नातीसार ग्रहणी क्रिमि नाशित्वं
इतिराजनिर्घण्ट: रुचिस्वरकरित्वं
गंधयुक्तत्वं कफवातनाशित्वं पा
के कटुत्वं। तीक्ष्णत्वं। लघुत्वं।
पित्तवर्द्धनत्वंच इतिराजवल्लभ:
जीरण: पुं जीरक: इतिराजनिर्घ
ण्ट: जीरिका स्त्री वंशपत्रीतृणं
इति राजनिर्घण्ट: ॥ जीर्णं क्ली
शैलजं। इति राजनिर्घण्ट: ॥

जीर्ण: पुं जीरक: इतिराजनिर्घण्ट:
जीर्ण: त्रि वृद्धं इत्यमर: पुरातन:
इति हेमचंद्र: ॥
जीर्णदारु: पुं वृद्धदारकभेद: ॥
विधारा विशेष इति लोके तत्प
र्य्याय: जीर्णफञ्जी २ सुपुष्पिका ३
अजरा ४ सूक्ष्मपर्णी ५ अस्य गुणा:
गौल्यत्वं पिच्छिलत्वं कफवातका
सामदोषनाशित्वं बल्यत्वंच इ
तिराजनिर्घण्ट:
जीर्णपत्रिका स्त्री वंशपत्रीतृणं
इतिराजनिर्घण्ट: ॥
जीर्णपर्ण: पुं कदम्ब: इतिराजनि
र्घण्ट:। पुरातनपत्रे क्ली ॥
जीर्णवज्रं क्ली वैक्रान्तमणि: इति
राजनिर्घण्ट: ॥
जीर्णवस्त्रं क्ली पुरातनवस्त्रं त
त्पर्य्याय: पटच्चरं २ इत्यमर: ॥
जीर्णबुध्न: पुं पट्टिकालोध्र: इ
तिराजनिर्घण्ट: ॥
जीर्णबुध्नकं क्ली परिपेलं के
ऊटमुता इतिभाषा इतिराजनि
र्घण्ट: जीर्णा स्त्री स्थूलजीरक: इति
राजनिर्घण्ट:
जीर्णि: स्त्री ज्यानि: जीर्णता इत्यम
र: जीवि: पुं कुंभार: इतिसिद्धान्त

कौमुद्या मुणादिवृत्ति: शाकट
काय: पशु: इतिसंक्षिप्तसारे
उणादिवृत्ति: ॥
जीव ऋ प्राणे प्राणधारण
इति यावत् इतिकविकल्पद्रुम:
जीव: पुं अश्वधारण इत्यमर:
प्राणी वृत्ति: वृक्षविशेष: ॥
वृहस्पति: इतिमेदिनी कर्ण:
इति धरणी क्षेत्रज्ञ: तत्पर्य्या
य: आत्मा २ पुरुष: ३ पुद्गल: ४
अन्तर्यामी ५ ईश्वर: ६ इतित्रि
काण्डशेष: तस्यस्वरूपं यथा क
र्मणा जीवरूपस्य सततं तत्फलप्र
द: कर्मरूपश्च भगवान्श्रीकृष्ण:
प्रकृते: पर: सोपितद्देहरूपस्य
कर्मतेन भवेत्सति जीव: कर्म
फलंभुंक्ते आत्मा निर्लिप्त एवच
आत्मन: प्रतिबिंबश्च देही जीव:
स एवच प्राण देहादि भृद्देहीस
जीव: परिकीर्त्तित: इतिब्रह्म
वैवर्त्तेप्रकृतिखण्ड: वेदान्तम
ते घटावच्छिन्नाकाश वत् शरी
रविनयावच्छिन्नं चैतन्यं केषां
चिन्मते दर्पणस्य मुखप्रतिबि
म्बवत् बुद्धिस्थ चैतन्य प्रतिबि
म्बं जीव: पुंक्ली जीवितं इतिमेदिनी

जीवकः पुं अष्टवर्गान्तर्गतोषध
विशेषः तत्पर्य्यायः कूर्च्चशीर्षः २
मधुरकः ३ शृंगः ४ ह्रस्वांगः ५
इत्यमरः जीवनः ६ दीर्घायुः ७ प्रा
णदः ८ जीव्यः ९ शृंगाह्वः १० प्रि
यः ११ चिरंजीवी १२ मधुरः १३ मं
गल्यः १४ कूर्च्चशीर्षकः १५ ह्र
स्वदः १६ आयुष्मान् १७ जीवदः
१८ वलदः १९ अस्यगुणाः मधुरत्वं
शीतत्वं रक्तपित्तानिलार्त्ति क्षयदा
ह ज्वरनाशित्वं शुक्रश्लेष्मविवर्द्ध
नत्वंच इतिराजनिर्घंटः वलका
रित्वं कार्श्यवातनाशित्वं तत्स्वरू
पंयथा जीवकर्षभकौज्ञेयौहिमा
द्रिशिखरोद्भवौ रसोन कन्दवत्
कन्दौ निःसारौ सूक्ष्मपत्रकौ जी
वकः कूर्च्चकाकारः ऋषभो वृ
षश्रृंगवत् जीवकर्षभकस्थानेवि
दारीमूलं इतिभावप्रकाशः ॥
प्राणकः पीतशालः क्षपणः
इतिमेदिनी ॥
जीवकःत्रि सेवकः वृद्धाशी
जीवी अहितुण्डिकः इतिमेदि
नी जीवजीवः पुं जीवंजीवपक्षी
इतिशब्दरत्नावली ॥
जीवंजीवः पुं चकोरपक्षी इत्यम

रः वृक्षविशेषः इतिमेदिनी ॥
जीवत्तोका स्त्री जीवत्पुत्रिका त
त्पर्य्यायः जीवसूः २ इतिहेमचंद्रः
जीवत्पतिः स्त्री सधवा इति हेम
चंद्रः ॥
जीवत्पितृकः पुं विद्यमानपितृकः
यथा अमा स्नानं गया श्राद्धं द
क्षिणाशुत्व भोजनं न जीवत्पि
तृकः कुर्य्यात् कृतेपि पितृहा
भवेत् इति तिथ्यादितत्वं ॥
जीवथः पुं प्राणः कूर्मः मयूरः
मेघः धार्मिकेचिरायुषिचत्रि ।
इत्युणादिकोषः ॥
जीवदः पुं वैद्यः विद्विट् इतिमे
दिनी जीवनदातरित्रि ॥
जीवदात्री स्त्री ऋद्धिः इति राज
निर्घण्टः ॥
जीवधनं क्ली गवादिकं इति त्रि
त्रिकाण्डशेषः ॥
जीवनं क्ली वृत्तिः जलं प्राणधार
णं इति मेदिनी हैयङ्गवीनं इति
शब्दचंद्रिका मज्जा इति राज
निर्घण्टः ॥
जीवनः पुं जीवकौषधं ॥ वातः इ
तिराजनिर्घंटः क्षुद्रफलक वृक्षः
इति शब्दचंद्रिका पुत्रः इति ॥

हेमचंद्रः ॥
जीवनकं क्ली अन्नं इति हेमचंद्रः
जीवनयोनिः स्त्री यत्नविशेषः
सतु अतीन्द्रियः शरीरे प्राणसं
चारकारणं इतिभाषापरिच्छेदः
जीवनाः स्त्री मेदौषधं इतिमेदिनी
जीवनाघातं क्ली विषं इति शब्द
चंद्रिका ॥
जीवनावासः पुं वरुणः इति
शब्दरत्नावली ॥
जीवन्तिका स्त्री हरीतकी इति
राजनिर्घण्टः ॥
जीवनी स्त्री जीवन्ती काकोली
औषधी मेदा महामेदा इति राज
निर्घण्टः ॥ यूथी इति श
ब्दचंद्रिका ॥
जीवनीयं क्ली जलं इतिहेमचं
द्रः जीवनीयगणः पुं औषधवि
शेषः यथा अष्टवर्गोक्षपर्णिन्यौ
जीवन्ती मधुकन्तथा जीवनीय
गणः प्रोक्तो जीवनस्तपुन स्तथा
इतिवैद्यकपरिभाषा ॥ जीवनी
या स्त्री जीवन्ती इत्यमरः जीवने
त्री स्त्री सैंहली इतिराजनिर्घण्टः
जीवनौषधं क्ली येनम्रियमाणोजी

वतितदौषधं जीवरक्षाकारि
जीवनोपायः तत्पर्य्यायः जी
वातुः २ इत्यमरः ॥
जीवन्तः पुं औषधं प्राणः आ
युविशिष्टे त्रि इत्युणादिकोषः
जीवशाकः इति राजनिर्घण्टः
जीवन्तिकः पुं जीवातकः
इत्यमरटीका सारसुंदरी ॥
जीवन्तिका स्त्री वन्दा वृक्षोप
रिजातवृक्षः गुडूची जीवाख्या
शाकः इति मेदिनी जीवन्तीह
रीतकी इतिराजनिर्घंटः ॥
जीवन्ती स्त्रीलताविशेषः जीव
ई इति जीयाती इतिच भाषा त
त्पर्य्यायः जीवनी २ जीवनीया ३
जीव ४ मधुः ५ इत्यमरः जीवना ६
मधुस्रवा ७ स्रवा ८ इतितट्टीका
पयस्विनी ९ जीव्या १० जीवदा ११
जीवदात्री १२ शाकश्रेष्ठा १३ जी
वभद्रा १४ भद्रा १५ मंगल्या १६
दाङ्जीवा १७ यशस्या १८ शृंगा
टी १९ जीवदृष्टा २० कांजिका २१
शशशिम्बिका २२ सुपिंगला २३
इतिराजनिर्घंटः मधुश्रासा २४ जी
वश्रेष्ठा २५ सुखंकरी २६ मंगला
दिका २७ जीवपत्री २८ जीवपुष्पा

इतिकेचित् अस्यागुणाः मधुर
त्वं शीतत्वं रक्तपित्तवायुक्षय
दाह ज्वर नाशित्वं कफवीर्य्यवि
वर्द्धनत्वंच इति राजनिर्घण्टः
स्वादुत्वं स्निग्धत्वं त्रिदोषनाशि
त्वं रसायनत्वं बलकारित्वं च
चक्षुर्हितत्वं ग्राहित्वं लघुत्वंच
इति भावप्रकाशः श्वास का
स धातुक्षय नाशित्वं स्वरका
रित्वंच सुराष्ट्र देशज स्वर्णवर्ण
हरीतकी सा स्नेह पाके प्रश ८
स्ता जीर्णरोगनाशिनी इतिराजव
ल्लभः शमी गुडूची वंदा इतिमेदि
नी डोडी इतिराजनिर्घण्टः ॥
जीवन्मुक्तः त्रि स्वस्वरूपाखण्डब्रह्म
णिज्ञानात् ज्ञाने अज्ञान तत्कार्य्य
संचितकर्म्मादीनां बाधितत्वादखि
लबन्ध रहितो ब्रह्मनिष्ठः इति
वेदान्तसारः ॥
जीवपुत्रकः पुं इंगुदीवृक्षः इति
शब्दरत्नावली वृक्षविशेषः जीया
पता इतिभाषा इत्यमरटीकायां र
मानाथः ॥ जीवपुष्पा स्त्री वृह
ज्जीवन्ती इति राजनिर्घण्टः ॥
जीवप्रिया स्त्री हरीतकी इति ।
राजनिर्घण्टः ॥ ॥

जीवभद्रा स्त्री जीवन्तीलता वृ
द्धिनामौषधं इतिराजनिर्घण्टः
जीवमंदिरं क्ली शरीरं इतिश
ब्दचंद्रिका ॥
जीववल्ला स्त्री सैंहली इति रा
जनिर्घण्टः
जीववल्ली स्त्री क्षीरकाकोली इ
तिराजनिर्घण्टः ॥
जीवशाकः पुं मालवे प्रसिद्ध
शाकविशेषः तत्पर्य्यायः जीव
नः २ वक्रनालः ३ ताम्रपत्रः ४
प्रवालः ५ शाकवीरः ६ सुमधुरः ७
मेषकः ८ अस्यगुणाः सुमधुर
त्वं बृंहणत्वं वस्तिशोधनत्वं दी
पनत्वं पाचनत्वं बलत्वं वृषत्वं
पित्तापहारकत्वंच इतिराजनि
र्घण्टः ॥ जीवशुक्ला स्त्री क्षीरका
कोली इति राजनिर्घण्टः ॥
जीवश्रेष्ठा स्त्री ऋद्धिनामौषधं
इति राजनिर्घण्टः ॥
जीवसंज्ञः पुं कामवृद्धिवृक्षः
इतिराजनिर्घण्टः
जीवसाधनं क्ली धान्यं इतिराज
निर्घण्टः जीवसूः स्त्री जीवतो
का जीवत्पुत्रिका इतिहेमचंद्रः

जीवस्थानं क्ली मर्म्म इतिहलायुधः
जीवा स्त्री जीवन्तीवृक्षः मौर्वी व
चा शिंजितं भूमिः इति मेदि
नी जीवितं इतिजटाधरः जीवा
तुः पुं क्ली भक्तं जीवितं जीव
नौषधं इति मेदिनी ॥ जीवा
त्मा पुं देही तत्पर्य्यायः पुन
र्भवी २ जीवः ३ असुमान् ४ स
त्त्वं ५ देहभृत् ६ जन्तुः ७ जन्युः
८ इति हेमचंद्रः प्राणी ९ चेत
नः १० जन्मी ११ शारीरी १२ इत्यमरः
जीवाधारः पुं हृदयं इतिहेम ॥
चंद्रः ॥
जीवान्तकः पुं जीवनाशेपक्षिघा
तकः तत्पर्य्यायः शाकुनिकः २
इत्यमरः जीवनाशकेत्रि ॥
जीवाला स्त्री सैंहली इतिराज
निर्घण्टः ॥
जीविका स्त्री जीवनोपायः तत्प
र्य्यायः आजीव २ वार्त्ता ३ वृत्तिः
४ वर्त्तनं ५ जीवनं ६ इत्यमरः ॥
जीवः ७ इतिशब्दरत्नावली जीव
नी इतिमेदिनी ॥
जीवितं क्ली जीवनं इतिहेमचंद्रः
जीवनयुक्तेत्रि ॥
जीवितकालः पुं आयुः इत्यमरः

जीवितज्ञा स्त्री नाडी इति राज
निर्घण्टः ॥
जीवितेशः पुं प्राणनाथः य
मः चंद्रः सूर्य्यः इतिशब्दरत्ना
वली जीवातुः इतिहेमचंद्रः
जीवितेश्वरे त्रि इति मेदिनी
जीवी न् पुं प्राणी यथा जीवि
नादारुणोरोगः कर्म्मभोगः शु
भाशुभः भक्तौ वैद्यस्तं निहन्ति क्ष
स भक्तिरसायनात् इति ब्रह्म
वैवर्त्ते गणेशखण्डे ॥
जीव्या स्त्री गोरक्षदुग्धा जीव
न्ती हरीतकी इतिराजनिर्घण्टः
जु वेहसि इति कविकल्पद्रुमः
जु उ. गत्यां इति कविकल्पद्रुमः
जुग १ त्यागे इति कविकल्पद्रुमः
जुगुप्सनं क्ली निंदा इति हेमचं
द्रः जुगुप्सा स्त्री निंदा इत्यमरः
जुङ्गः पुं वृद्धदारकः इत्यमरः
जुङ्गकः पुं वृद्धदारकवृक्षः
इतिराजनिर्घण्टः ॥
जुङ्गा स्त्री जुङ्गः इत्यमरटीका
यां रमानाथः ॥
जुङ्गितः त्रि त्यक्तः जुग धातोः
कर्म्मणिक्त प्रत्ययेन निष्पन्नः
जुटकं क्ली जटा इतिशब्दरत्नावली

जुटिका स्त्री शिखा जूँटी इति हिंदी इति च भाषा इति शब्दरत्नावली जुड क प्रेरणे इति कविकल्पद्रुमः जुड पि बंधे इति कविकल्पद्रुमः जुड श गतौ इति कविकल्पद्रुमः जुत ङ उ दीप्तौ इति कविकल्पद्रुमः जुन श गतौ इति कविकल्पद्रुमः जुर्व ई वधे इति कविकल्पद्रुमः जुल क पि पिष चूर्णीकरणे इति कविकल्पद्रुमः जुष कि तर्के त्वमौ इति कविकल्पद्रुमः ॥

जुष जि श उ ई हर्षे सेवे इति कविकल्पद्रुमः ॥

जुष्ककः पुं यूषः इति शब्दचंद्रिका जुष्टं क्ली उच्छिष्टे सेविते त्रि इति मेदिनी ॥

जुष्यः त्रि सेव्यः इति मुग्धबोधं

जुहुवानः पुं कठिनहृदयः अग्निः वृक्षः इति संक्षिप्तसारे उणादिवृत्तिः ॥

जुहूः स्त्री पलाशकाष्ठनिर्मितार्द्धचंद्राकृति यज्ञपात्रं जुहोत्यनया जुहूः इत्यमरभरतौ

जुहुराणः पुं अग्निः अध्वर्युः इति विश्वः चंद्रः इत्युणादिकोषः

जुहूवान् पुं अग्निः इति शब्दरत्नावली ॥

जूः स्त्री आकाशः सरस्वती पिशाची जवनं इति शब्दरत्नावली ॥ त्वरागमनं गमनं इति मेदिनी ॥

जूटः पुं शिवजटा इत्यमरटीकायां भरतः जटा इति शब्दरत्नावली

जूटकं क्ली केशबंधः जटा इति भूरिप्रयोगः ॥

जूतिः स्त्री वेगः इत्यमरः ॥

जूतिका स्त्री कर्पूरभेदः इति राजनिर्घंटः ॥

जूर ङ ई य वयोहानौ वधे इति कविकल्पद्रुमः ॥

जूर्णाख्यः पुं तृणविशेषः उलू इति भाषा तत्पर्यायः सूच्यग्रः २ स्थूलकः ३ दर्भः ४ खरच्छदः ५ इति रत्नमाला उलकं ६ उलपः ७ इति केचित् ॥

जूर्णाह्वयः पुं देवधान्यं इति हेमचंद्रः ॥

जूर्णिः स्त्री वेगः इत्युणादिकोषः आदित्यः देहः ब्रह्मा ज्वरः । इति संक्षिप्तसारे उणादिवृत्तिः ॥

जूर्तिः स्त्री ज्वरः इत्यमरः ॥

जूष न वधे इति कविकल्पद्रुमः

जृंभं क्ली पुं सुखे मुखादिविकाशरसः इति लिङ्गादिसंग्रह टीकायां भरतः ॥

जृवणं क्ली हृदविशेषः थारफुल इति भाषा इति शब्दचंद्रिका

जॄ न्यक्कारे इति कविकल्पद्रुमः

जृभ ई ङ जृम्भे गात्रशैथिल्ये इति यावत् इति कविकल्पद्रुमः ॥

जृम्भः त्रि मुखादिविकाशः हाइ इति भाषा तत्पर्यायः जृम्भणं २ जृम्भा ३ जृम्भिका ४ इति शब्दरत्नावली जम्भ ५ जम्भका ६ इति राजनिर्घंटः जृम्भातर्पर्थं समीरणात् इति वैद्यकं त्वडमतन जृम्भे पुञ्जीवो नित्यांगुलिध्वनिः अवश्यमेव कर्त्तव्य अन्यथा ब्रह्महा भवेत् इति कर्मलोचनं विकाशः स्फारितः इति शब्दरत्नावली ॥

जृम्भणं क्ली जृम्भः इत्यमरः

जृम्भा स्त्री जृम्भः इति शब्दरत्नावली जृम्भिका स्त्री जृम्भः इति शब्दरत्नावली जृंभितं क्ली विचेष्टितं प्रवृद्धं जृम्भा स्फुटितं इति हेमचंद्रः ॥

स्त्रीणांकरणं इति मेदिनी ॥

जृम्भिनी स्त्री पलापर्णी इति शब्दचंद्रिका ॥

जॄ य इ र ष म ज्याने गतवयोभावः इति यावत् इति कविकल्पद्रुमः ॥

जॄ कि ज्याने इति कविकल्पद्रुमः

जेता ** त्रि जयशीलः तत्पर्यायः जिष्णुः १ जित्वरः २ जेत्रः ३ इत्यमरः जेत्राकः पुं स्वेदविशेषः यथा अथ जेत्राकं विकीर्षु र्भूमिं परीक्षेत पूर्वस्यान्दिशि उत्तरस्यां वा गुणवति प्रशस्तभूमिभागे देशे कृष्णमधुरमृत्तिके सुवर्णवर्णमृत्तिके वा नदी परीवाप पुष्करिण्यादीनां जलाशयानामन्यतमस्य कूले दक्षिणे पश्चिमे वा सूपतीर्थे समसुविभक्तभागे देशे सप्ताष्टौ वा अरत्नीः अतिक्रम्य उदकात् प्राङ्मुखमुदङ्मुखं वा अभिमुखतीर्थं कूटागारं कारयेत् उत्सेधविस्तारतः परमरत्नीः षोडशसमन्तात् सुवृत्तं मृत्कर्म सम्पन्नमनेक वातायनं अस्य च कूटागारस्यान्तः समन्ततो भित्तिमरत्निविस्तारोत्सेधां पिण्डिकां कारयेत् आकवाटान्मध्ये चास्य च कूटागारस्य चतुष्किष्कुमात्रं द्विपुरुष प्रमाणं

स्मयं कद्रु संस्थाने वकुसत्स
च्छिद्रंश्रंगारकोष्ठकस्तम्भसथि
थानंकारयेत् तंचखादिरेणा
माम्बकर्णिकानां वा मेध्येनका
ष्ठेनापूरयित्वा प्रदीपयेत् स
यदाजानीयात् साधुदग्धानि
काष्ठानिगतधूमानि अथ तमं
केवल मग्निना तदग्निगृहं स्वेद
योग्येनवेत्यवगम्यपुरुषमिति तत्रै
नंवातहराभ्यंगाभ्यक्तगात्रंवस्त्रा
वच्छन्नं प्रवेशयेत् प्रवेशयंश्चैन
मनुशिष्यात् सोम्य प्रविशकल्या
णायारोग्यायचेतिप्रविश्यचैनां
पिंडिकामधिरुह्य पार्श्वापरपा
र्श्वाभ्यांयथासुखंशयीथाः नच
त्वयास्वेदमूर्च्छा परीतेनापिसता
पिंडिकैषा मोक्तव्या आप्राणो
च्छ्वासात् भ्रस्यमानोह्यतःपिंडि
कावकाशात् द्वार मधिगच्छ
न् स्वेदमूर्च्छापरीततया सद्यः
प्राणान् जह्याः तस्मात् पिंडिका
न कथंचन मुञ्चेथाः सयदा जा
नीयाद्विगताभिष्यन्द मात्मानं
सम्यक् प्रसृतस्वेदपिच्छंसर्व
स्रोतो विमुक्तं लघुभूतमपगतवि
वद्धस्तम्भसुप्तिगौरववेदनमितिततस्तां
पिंडिकामनुवसन् द्वारं प्रपद्येतनिष्क्रम्य
च नसहसा चक्षुषोः परिपालनार्थं॥
प्रीतमुदकंस्पृशेत् अपगत क्ल
मसन्तापस्तु मुहूर्तात् सुखोष्णे
नवारिणा यथान्यायं परिषिक्तो
ऽश्नीयात् इति चरकः॥

जेमनं क्ली भोजनं इत्यमरः
जेयः त्रि जेतव्यमात्रकाः इत्यम
रः जेष ऋ ङ गतौ इतिकविकल्प
द्रुमः जेह ऋ ङ यत्ने इतिकविकल्प
द्रुमः जै ङ क्षये इतिकविकल्पद्रुमः
जैत्रं क्ली औषधं इतिराजनिर्घण्टः
जैत्रः त्रि जेता इत्यमरः पारदे पुं
इति राजनिर्घण्टः॥
जैत्ररथः पुं जयशीलः इति ह
लायुधः॥
जैत्री स्त्री जयन्तीवृक्षः इति शब्द
रत्नावली॥
जैनः पुं जिनोपासकः बौद्धः इ
ति हलायुधः
जैपालः पुं जयपालवृक्षः इ
ति द्विरूपकोषः॥
जैमिनिः पुं मुनिविशेषः सवेद
व्यासशिष्यः उत्तरमीमांसाक
र्ताभारतकृत् वज्रवारकश्च।
यथाजैमिनिश्च सुमंतुश्च वैशम्पाय
नएवच पुलस्त्यःपुलहश्चैवपंचैते
वज्रवारकाः इतिपुराणं॥

जैवातृकः पुं चंद्र कर्पूरः इ
त्यमरः पुत्रः इतिसंक्षिप्तसा
रे उणादिवृत्तिः॥ भेषजं इ
तिहेमचंद्रः॥
जैवातृकः त्रि दीर्घायुः कृशः
इति मेदिनी॥
जैह्म्यं क्ली जिह्मता कुटिलता
यथा जैह्म्यं पुंसिच मैथुनं
जातिभ्रंशकरंस्मृतं इतिप्राय
श्चित्तविवेकः॥
जोङ्गकं क्ली अगुरु इत्यमरः
जोङ्गटः पुं गर्भिण्यभिलाषः
स्यादितिभाषा इतिहारावली
जोटिंगः पुं महादेवः महाव्रती
इतित्रिकाण्डशेषः॥
जोन्ताला स्त्री देवधान्यं इति
हेमचंद्रः
जोषं क्ली सुखं इतिशब्दरत्नाव
ली जोषं अ तूष्णीं सुखं इत्यम
रः जोषा स्त्री योषा इतिशब्दर
त्नावली जोषिका स्त्री जालिका
इति शब्दरत्नावली॥
जोषित् स्त्री योषित् इतिशब्द
रत्नावली
जोषिता स्त्री योषित् इतिश
ब्दरत्नावली॥

ज्ञः पुं ब्रह्मा बुधः पण्डितः
महीसुतः इति धरणी॥
ज्ञप क म ज्ञप्तौ इतिकविकल्प
द्रुमः ज्ञप्तिं मारणालोक निशा
न तोषणे स्वत्वयः इति तट्टीका
यां दुर्गादासः॥
ज्ञपितः त्रि ज्ञापितः इत्यमरः
ज्ञप्तः त्रि ज्ञापितः इत्यमरः
ज्ञप्तिः स्त्री बुद्धिः इत्यमरः॥
ज्ञा ग बोधे इतिकविकल्पद्रु
मः ज्ञा कम मारणे आलोके॥
निशाने तोषणे स्तवे इति
कविकल्पद्रुमः॥
ज्ञाक प्रेरणे इतिकविकल्पद्रु
मः ज्ञातं त्रि कृतज्ञानं ज्ञाना इ
तिभाषा तत्पर्यायः विदितं २
बुद्धं ३ बुधितं ४ मितं ५ मतं ६
प्रतीतं ७ अवगतं ८ मनितं ९
अवसितं १० इति जटाधरः॥
ज्ञातव्यं त्रि ज्ञानीयं ज्ञेयं वे
द्यं अवगमनीयं बोध्यं मन्त
व्यं इति व्याकरणं॥
ज्ञातसिद्धान्तः पुं शास्त्रतत्त्व
ज्ञः तत्पर्यायः तांत्रिकः २
इत्यमरः ज्ञातृ त्रि ज्ञानशीलः त
त्पर्यायः विद्वान् १ विंदुः ३ इत्यमरः

ज्ञाति पुं सपिण्डसहोदरादिः
जानाति छिद्रं कुलस्थितिं च ज्ञा
तिः इति भरतः तत्पर्य्यायः
सगोत्रः २ बान्धवः ३ बन्धु ४ स्वः
५ स्वजनः ६ इत्यमरः अंशकः ७
गोत्रः ८ दायादः ९ इति त्रिकाण्ड
शेषः सचतुर्विधः सप्तमपु
रुषपर्य्यन्तं सपिण्डः ततस्त्रि
पुरुषपर्य्यन्तं सकुल्यः ततश्चत
र्दशपुरुषपर्य्यन्तं समानोदकः
जन्म नामस्मृतिपर्य्यन्त मपि स
मानोदकः ततः परं गोत्रजः इ
ति शुद्धितत्त्वं एषां विशेषस्त
त्तत्शब्दे द्रष्टव्यः ज्ञातिद्रोह्रदी
सा यथा यानि कानि च पापानि
ब्रह्महत्यादिकानि च ज्ञातिद्रोह
स्य पापस्य कलां नार्हन्ति षोडशीं
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे
पिता इति मेदिनी ॥
ज्ञातेयं क्ली ज्ञातेर्भावः ज्ञाति
त्वं इत्यमरः ॥
ज्ञानं क्ली विशेषेण सामान्येन
चावबोधः मोक्षे धी ज्ञानं मन्यत्र
विज्ञानं शिल्पशास्त्रयोः इत्यमरः
अस्यार्थः मोक्षे शिल्पे शास्त्रे च
या धीः सा ज्ञानं विज्ञानं चोच्यते

एषा विशेष प्रवृत्तिः अन्यत्र घ
टपटादौ या धीः सापि ज्ञानं वि
ज्ञानं चोच्यते एषा सामान्यप्रवृत्तिः
मोक्षे धी ज्ञानं विज्ञानं च यथा
ज्ञानान्मुक्ति रिति सा या विज्ञा
च विज्ञानं तस्मात् स्फटिकप्रयच्छति
इति अन्यत्र यथा ज्ञानमस्ति स
मस्तस्य जन्तो विषयगोचरे इति
घटत्वप्रकारक ज्ञान मिति ये
चित् प्राणिनो लोके सर्वे विज्ञा
निनो मताः इति ब्रह्मणो नित्य
विज्ञानानन्दरूपत्वादिति एवं चि
त्रज्ञानं व्याकरण ज्ञानं घटपट
विज्ञानमित्यादिकं प्रयुज्यत एव
मोक्ष निमित्तं शिल्पशास्त्रयो र्धी
र्ज्ञानमुच्यते तन्निमित्ततोऽन्यनि
मित्तं या तयो धीः सा विज्ञान मि
ति केचित् मोक्ष विषया मोक्ष
फला धी र्ज्ञानं अन्य धी र्विज्ञानं
क्वान्यत्र इत्याह शिल्पशास्त्रयोरि
ति केचित् अवबोध इत्यध्याह
त्य मोक्ष विषये अवबोधो धीः
अन्यत्र च घटपटादि विज्ञानं शि
ल्पशास्त्र विषये विज्ञानमिति
केचित् इति भरतः योगशास्त्र
मतेन एकत्वबुद्धिमनसोरिंद्रि

याणां च सर्वशः आत्मनो व्यापि
नस्तात ज्ञान मेतदनुत्तमं इति
मोक्षधर्मः एकत्वबुद्धिमात्रेण
वस्थानं बुद्धिवृत्तिनिरोध इति या
वत् इति तट्टीका ॥ अमानित्व
मदम्भित्वमहिंसा क्षान्तिरार्जवं
आचार्य्योपासनं शौचं स्थैर्य्य
मात्म विनिग्रहः इन्द्रियार्थेषु
वैराग्यमनहंकार एव च जन्मम
त्युजरा व्याधि दुःखदोषानुदर्श
नं असक्तिरनभिष्वंगः पुत्रदारगृ
हादिषु नित्यं च समचित्तत्व मिष्टा
निष्टोपपत्तिषु मयि चानन्ययोगे
न भक्तिरव्यभिचारिणी विविक्तदे
शसेवित्वमरतिर्जनसंसदि अध्या
त्म ज्ञान नित्यत्वं तत्त्वज्ञानार्थ द
र्शनं एतज्ज्ञान मिति प्रोक्त मज्ञा
नं यदतोऽन्यथा ॥ सात्त्विक रा
जस तामस भेदेन तत्त्रिविधं
सात्त्विकं यथा सर्वभूतेषु येनै
कं भावमव्यय मीक्षते अविभ
क्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकं
राजसं यथा पृथक्त्वेन तु य
ज्ज्ञानं नाना भावान् पृथग्विधा
न् वेत्ति सर्वेषु भूतेषु तज्ज्ञानं वि
द्धि राजसं तामसं यथा यत्तु कृत

स्न वदेकस्मिन् कार्य्ये सक्त महै
तुकं अतत्त्वार्थ वदल्पं च तत्ताम
स मुदाहृतं इति श्रीभगवद्गीता
न्यायमते तु अप्रमा च प्रमा चेव
ज्ञानं द्विविध मुच्यते तत्शून्ये
तन्मतिर्या स्यादप्रमा सा निरू
पिता तत् प्रपंचो विपर्य्यासः सं
शयोऽपि प्रकीर्त्तितः आद्यो देह
आत्मबुद्धिः शंखे पीतिमा म
तिः भवेन्निश्चय रूपा सा संश
योऽथ प्रदर्श्यते किंस्विन्नरो वा
स्थाणुर्वेत्यादि बुद्धिस्तु संशयः
तदभावा प्रकारा धी स्तत् प्रकारा
तु निश्चयः स संशयो भवेद्याधी
रेकत्राभावभावयोः साधारणा
दिधर्मस्य ज्ञानं संशय कारणं
दोषो प्रमाया जनकः प्रमाया
स्तु गुणो भवेत् पित्त दूरत्वादि
रूपो दोषो नानाविधो मतः गुणः
स्यात्प्रमभिन्नं तु ज्ञानमत्रोच्यते प्रमा
अथवा तत् प्रकारं यज्ज्ञानं तद्धि
विशेष्यकं ज्ञानं यन्निर्विकल्पा
ख्यं तदतीन्द्रिय मिष्यते तत्प्रमा
नाप्रमा नापि ज्ञानं यन्निर्विकल्प
कं ॥ प्रकारत्वादिशून्यं हि संब
धानवगाहनात् इति भाषापरिच्छेदः

ज्ञानदर्पणः पुं पूर्वजिनः इति
त्रिकांडशेषः ॥
ज्ञानलक्षणा स्त्री त्रिविधा
लौकिकसन्निकर्षान्तर्गत सन्नि
कर्षः तस्य लक्षणं यथा विषयी
यस्य तस्यैव व्यापारो ज्ञान लक्ष
णः इति भाषापरिच्छेदः अस्या
र्थः तद्विषयज्ञापक तद्विषय
ज्ञानं यथा पूर्वं घटादि ज्ञाने स
ति पश्चात् घटादिज्ञानं ॥
ज्ञानी स पुं देवज्ञः ज्ञानयुक्ते
त्रि इति मेदिनी तस्य लक्षणं
यथा प्रजहाति यदा कामान्
सर्वान्पार्थ मनोगतान् आत्म
न्येवात्मना तुष्टः स्थितप्रज्ञस्त
दोच्यते दुःखेष्वनुद्विग्नमनाः सु
खेषु विगतस्पृहः वीतरागभय
क्रोधः स्थितधीर्मुनिरुच्यते यः
सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभा
शुभं नाभिनंदति न द्वेष्टि तस्य प्र
ज्ञा प्रतिष्ठिता यदा संहरते चायं
कूर्मोऽङ्गानीव सर्वशः इंद्रियाणी
द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥
ज्ञानिनापि कर्म कर्तव्यं यथा
सक्ताः कर्मण्यविद्वांसो यथा कु
र्वंति भारत कुर्याद्विद्वांस्तथासक्त
श्चिकीर्षुः कर्मसंग्रहं न बुद्धिभे
दं जनयेदज्ञानां कर्मसंगिनां
जोषयेत् सर्वकर्माणि विद्वान्
युक्तः समाचरन् प्रकृतेः क्रि
यमाणानि गुणैः कर्माणि सर्वशः
अहंकारविमूढात्मा कर्त्ताहमिति
मन्यते तत्त्ववित्तु महाबाहो गुण
कर्मविभागयोः गुणा गुणेषु वर्त्त
न्त इति मत्वा न सज्जते ज्ञानिप्रशंसा
यथा चतुर्विधा भजंते मां जनाः
सुकृतिनोऽर्जुन आर्तो जिज्ञासु
रर्थार्थी ज्ञानी च भरतर्षभ ॥
तेषां ज्ञानी नित्ययुक्त एकभक्ति
र्विशिष्यते प्रियो हि ज्ञानिनोऽत्य
र्थमहं स च मम प्रियः उदाराः स
र्व एवैते ज्ञानी त्वात्मैव मे मतं ॥
आस्थितः स हि युक्तात्मा मामेवा
नुत्तमां गतिं बहूनां जन्मनामंते
ज्ञानवान्मां प्रपद्यते वासुदेवः
सर्वमिति स महात्मा सुदुर्लभः
इति श्रीभगवद्गीता ॥
ज्ञानेंद्रियं क्ली बुद्धींद्रियं तत्
षड्विधं मनः १ नेत्रं २ श्रोत्रं ३
घ्राणं ४ जिह्वा ५ त्वक् ६ इति
श्रीभागवतं ॥
ज्ञापनं क्ली बोधनं जानान इति

भाषा इति व्याकरणं ॥
ज्ञाप्तिः स्त्री ज्ञापनं इति मुग्धबोधः
ज्या गि जरायां इति कविकल्पद्रुमः
ज्या स्त्री धनुर्गुणः तत्पर्यायः ॥
मौर्वी २ शिंजिनी ३ गुणः ४
इत्यमरः माता वसुधा इति मे
दिनी ॥
ज्यानिः स्त्री जीर्णता ॥ हानिः
तटिनी इति शब्दरत्नावली ॥
ज्यायान् स त्रि अतिवृद्धः तत्पर्या
यः वर्षीयान् २ दशमी ३ प्रशस्यः
इत्यमरः ॥
ज्युङ् गत्यां इति कविकल्पद्रुमः
ज्युत इर् दीप्तौ इति कविकल्पद्रुमः
ज्युत ऋङ् दीप्तौ इति कविकल्पद्रुमः
ज्येष्ठः त्रि अतिवृद्धः श्रेष्ठः ॥
ज्येष्ठमासि पुं इति मेदिनी ॥
अग्रजः अधिकवयाः इति भरतः
ज्येष्ठतातः पुं पितुरग्रजः ज्येठा
इति भाषा इति शब्दरत्नावली
ज्येष्ठवर्णः पुं ब्राह्मणः इति
शब्दरत्नावली ॥
ज्येष्ठबला स्त्री सहदेवी इति रा
जनिर्घण्टः ॥
ज्येष्ठश्वश्रूः स्त्री पत्न्या ज्येष्ठा भगि
नी बडशाली इति भाषा तत्पर्यायः
कुली २ इति हेमचंद्रः ॥
ज्येष्ठसाम न क्ली सामभेदः तद
ध्यायनो गव्रतं इति मिताक्षरा ॥
ज्येष्ठा स्त्री अश्विन्यादिसप्तविंश
ति नक्षत्रान्तर्गताष्टादशनक्षत्रं
सा त्र्यक्षकरदमाकृतिताराकत्रि
तयात्मिका इति कालिदासः
वलयाकृतिः अस्या देवता इंद्रः
मिश्रगणः इति दीपिका अत्र
जातस्य फलं सत्कीर्तिपुत्रै र्वि
विधैः समेतो विज्ञान्वितो त्यन्त
लसत्प्रतापः श्रेष्ठ प्रतिष्ठो वि
कलस्वभावो ज्येष्ठा भवेद्यस्य च
जन्मकाले इति कोष्ठीप्रदीपः
गृह गोधिका इति मेदिनी मध्य
मांगुलिः इति हेमचंद्रः गंगा
इति राजनिर्घण्टः धीरादिनायि
काभेदः तस्या लक्षणं यथा प
रिणीतत्वे सति भर्तुरधिकस्ने
हा इति रसमंजरी अलक्ष्मीः
यथा भगवतीप्रति महादेव
वाक्यं मामपश्यन् देवा ममंथुः
क्षीरसागरं तस्मिन् प्रमथ्यमाने
तु मया देवैस्सम्भाविनि ज्येष्ठादे
वी समुत्पन्ना रक्तस्रवास्ततो ह
ना उत्पन्ना साब्रवीद्देवान् किंकर्म

ज्येयमेयतिवै नामब्रुवंस्तदादेवीस
र्वैर्देवगणाभूषा येषांगृहान्तरे
नित्यंकलहंसंप्रवर्त्तते तेनेस्या
नंमयस्थामोवासस्तत्रप्रभानेन
यस्यगेहेकपालास्थि भस्म केश
दि चिन्हिते परुषं भाषतेनित्यं
वदंत्यन्तवादिनः संध्याकाले
च ये पापाः स्वपन्ति मलचेत
सः तेषांवेश्मनि संतिष्ठ दुःख
दारिद्र्यदायिनी कपाल केश
भस्मास्थि तुषांगाराणि यत्र त
त्र ते सततंस्थानं भविष्यतिन
संशयः अकृत्वापादयोःशौचं
यस्त्वाचामति दुर्म्मतिः तेभजस्व
सदा देवि कलुषेणाहृता भृशं
तुषांगार कपालास्थि वालुका
यस्चर्मभिः दंतधावन कर्त्ता
रो भविष्यन्ति नराधमाः रमस्व
कलिनादेवि तेषां वेश्मस्व नि
त्यशः तिलपिष्टंच नक्तंच का
लिंग शिग्रुगृंजनं कूष्मांकविट्
राहंच विल्वकोषातकीफलंश्री
लाबुंश्रीफलंयेवैखादयंतिनरा
धमाः तेषांगृहे तवस्थानं देवि
दारिद्र्यदेसदा इत्यादिप्रपस्वराःस
वैतेज्येष्ठा कलिवल्लभा पुनस्त्व
मथनं चक्रुः क्षीराब्धिं ससमाहि
ताः इतिपाद्मे उत्तरखंडे ॥
ज्येष्ठामूलीयः पुं ज्येष्ठमासः इति
त्रिकाण्डशेषः ॥
ज्येष्ठाम्बु स्त्री त लाम्बु चेलुनि
इतिभाषा इति वैद्यकपरिभाषा ॥
ज्येष्ठाश्रमी त्रि पुं गृहस्थः इति हे
मचंद्रः ॥
ज्येष्ठी स्त्री गृहगोधा जेठी इति
टिकुटिकी इतिच भाषा तत्पर्य्या
यः मुषली २ मुसली ३ कुड्यम
त्स्या ४ गृहगोधिका ५ मूली ६
टुट्टुकी ७ शकुनस्ता ८ गृहालिप
का ९ इति शब्दरत्नावली तस्याः
पतन फलं यथा निपतति यदि
पल्लीदक्षिणांगेनराणांस्वजन य
नवियोगो ल्पभद्रा वामभागे ।
उरसि शिरसि पृष्ठे कण्ठदेशेच
राज्यंकरचरणाद्यदिस्था सर्वसौ
ख्यंददाति इतिज्योतिषं दिग
विशेषे तस्य शब्दफलं चिंतव
स्त्वणि कार्य्य सिद्धिरतुला प्राक्
कृताशे भयं यम्या मथि भयं
स्वर्द्विषि कलिर्लाभः समुद्रात्
ये वायव्यां वरवस्त्र गंध सलिलं
दिव्यांगना चोत्तरे पेशान्यां ॥

1089

मरणं ध्रुवं निगदितं दिग्गत
एं स्वजने ज्येष्ठीरुते त्वनेःध्याव
मुच्चुः केचिच्च कोविदाः इति
तिथ्यादितत्वं ॥
ज्येष्ठः पुं मासविशेषः ज्येष्ठा
नक्षत्र युक्ता पौर्णमासी ज्येष्ठी
सायत्र मासे भवति सः वृषस्थ
रविप्रारब्ध शुक्ल प्रतिपदादि द
र्शान्तश्चांद्रः वृषराशिस्थरविकः
सौरः इतिस्मृतिः त त्पर्य्यायः
शुक्र २ इत्यमरः ज्येष्ठः ३ इतिश
ब्दरत्नावली तत्र ज्यातस्य फलं
यथा विदेशावृत्तिः पुरुषः सुती
ब्रः क्षमान्वितः स्यात् स्वल्पदीर्घ
सूत्रः विचित्रबुद्धिर्विङ्षावरिष्ठो
ज्येष्ठाभिधाने जननं हि यस्य इ
तिकोष्ठीप्रदीपः ॥
ज्येष्ठसामा न पुं ज्येष्ठसामा ज्येष्ठ
साम वेदाध्येता इतिमितादरा ॥
ज्येष्ठी स्त्री ज्येष्ठपूर्णिमा इति
शब्दरत्नावली ज्येष्ठीच ॥
ज्या इ नियमे व्रतादेशे ॥
उपनीतो इतिकविकल्पद्रुमः ॥
ज्योतिःस क्ली दृष्टिः नक्षत्र ॥
प्रकाशः इतिमेदिनी ॥
ज्योतिःस पुं अग्निः सूर्य्यः इति
मेदिनी मेथिका इति राज
निर्घण्टः ॥
ज्योतिरिंगः पुं खद्योतः इति
शब्दरत्नावली ॥
ज्योतिरिंगणः पुं कीटविशेषः
ज्योनाकपोका इति भाषा तत्
पर्य्यायः खद्योतः २ ध्वान्तोन्मेषः ३
तमोमणिः ४ दृष्टिबंधः ५ तमो
ज्योतिः ६ ज्योतिरिंगः ७ निमे
षकः ८ इति शब्दरत्नावली
ज्योतिर्वीजं ९ निमेषरुक् १०
इति त्रिकाण्डशेषः ॥
ज्योतिर्वीजं क्ली ज्योतिरिंगणः
इति त्रिकाण्डशेषः ॥
ज्योतिश्चक्रं क्ली चंद्रसूर्य्यादि
ग्रहनक्षत्रमंडलं राशिचक्रं य
थाज्योतिश्चक्रे भुवो मानं सू
र्द्धंप्रोवाच केशवः चान्वलि
द ज्योतिषस्यसारं रुद्रायसर्व
दः इति गरुडपुराणं ॥ अपि
च सप्तविंशति ते ज्योतिश्चक्रं
स्तिमितवायुगा तदर्कांशाभ
वेद्राशि र्नवर्क्ष चरणांकितः
इतितिथ्यादितत्वं ॥
ज्योतिषं क्ली वेदांगशास्त्रविशे
षः तत् ग्रहणादि गणन शास्त्र

इत्यमरटीकायां भरतः पंचमस्कं
धमिदं शास्त्रं होरा गणित संहि
ता केरलिः शकुनंचैवति प्रश्न
रत्नटीका अस्य संबंधादि यथा
अस्य शास्त्रस्य संबंधो वेदांगमि
ति चोदितः अभिधेयंच जगतां
शुभाशुभनिरूपणं इज्याध्य
नसंक्रांति ग्रह षोडश कर्मणा
प्रयोजनंच विज्ञेयं यत्काल
विनिर्णयः इति नारदीये ॥
अस्याध्ययनं द्विजैः कर्त्तव्यं य
था सिद्धांतसंहिताहोरा रूप
स्कंधत्रियात्मकं वेदस्य नि
र्मलं चक्षुर्ज्योतिः शास्त्रमक
ल्मषं विनैतदखिलं श्रौतं स्मा
र्त्तं कर्म न सिध्यति तस्माज्जग
द्धितायेदं ब्रह्मणा निर्मितं पु
रा अतएव द्विजैरेतदध्येतव्य
प्रयत्नतः इति नारदः शूद्रस्य
पाठनिषेधो यथा स्नेहाल्लोभा
च्च मोहाच्च यो विप्रोऽज्ञानतोपि
वा शूद्राणामुपदेशं तु दद्यात्स
नरकं व्रजेत् इति गर्गः अस्य
ज्ञानमावश्यकं यथा वेदा हि
यज्ञार्थमभिप्रवृत्ताः कालानुपू
र्व्या विहिताश्च यज्ञाः तस्मादिदं
कालविधानशास्त्रं यो ज्योतिषं
वेद स वेद यज्ञान् यथा शिखा
मयूराणां नागानां मणयो यथा
तद्वद्वेदांगशास्त्राणां गणितं मू
र्द्धि संस्थितं इति वेदांगज्योतिषं
अस्याध्ययन फलं यथा पवं
विधस्यकृति नेत्र शास्त्र स्वरूप
भर्त्तुः खलदर्शनं वै निहन्त्यशे
षं कलुषं जनानां षडंगजं धर्म
सुखास्पदं स्यात् इति माण्डव्यः अ
स्य ज्ञाने फलं यथा ज्योतिश्चक्रे तु लो
कस्य सर्वस्योक्तं शुभाशुभं ज्यो
तिर्ज्ञानं तु यो वेद स याति परमां
गतिं इति गर्गः ॥

ज्योतिषिकः पुं ज्योतिषिकः इ
त्यमरटीका ॥

ज्योतिषी स्त्री तारा इति हेमचंद्रः
ज्योतिषशास्त्रज्ञे त्रि ॥

ज्योतिष्कः पुं चित्रकवृक्षः मेथि
काबीजं इति राजनिर्घंटः गणि
कारिकावृक्षः इति रत्नमाला ॥

ज्योतिष्काः पुं चंद्रार्कग्रहनक्षत्र
तारकाः इति हेमचंद्रः बहुवच
नांतोऽयं शब्दः ॥

ज्योतिष्का स्त्री ज्योतिष्मती लता
इत्यमरटीकायां स्वामी ॥

ज्योतिष्टोमं क्ली षोडशऋत्विक्
साध्ययज्ञविशेषः तत्र द्वादश श
तानि गोदक्षिणा इति मलमासतत्वं

ज्योतिष्मती स्त्री लताविशेषः
मालकंगनी इति लताफटकरी
इति नयाफटकी इति च भाषा त
त्पर्यायः पारावताङ्घ्रिः २ कट
भी ३ पिण्या ४ इत्यमरः पाराव
तपदी ५ नगणा ६ स्फुटबंधनी
७ इति तैला ८ इङ्गुदी ९ इति र
त्नमाला स्वर्णलता १० अनलप्रभा
११ ज्योतिर्लता १२ सुपिंगला १३
दीप्ता १४ मेध्या १५ मतिदा १६
दुर्जरा १७ सरस्वती १८ अमृता
१९ अस्याः सूक्ष्मायाः गुणाः अति
तिक्तत्वं किंचित्कटुत्वं वातकफा
पहत्वं च अस्याः स्थूलाया गुणाः
दाहप्रदत्वं दीपनत्वं मेधाप्रज्ञा वृ
द्धिकारित्वं च इति राजनिर्घंटः
तीक्ष्णत्वं व्रणविस्फोटनाशित्वं च
इति राजवल्लभः रात्रिः इति
राजनिर्घंटः ॥

ज्योतीरथः पुं ध्रुवः इति त्रि
काण्डशेषः ॥

ज्योत्स्ना स्त्री चंद्रज्योतिः चांद
नी इति हिन्दी भाषा तत्पर्यायः
चंद्रिका २ कौमुदी ३ इत्यमरः
चांदी ४ कामवल्लभा ५ चांद्रा
तपः ६ चंद्रकान्ता ७ शीता ८ अ
मृत तरंगिनी ९ अस्या गुणाः
त्रिदोषशमनत्वं इति राजनिर्घंटः
कषायत्वं मधुरत्वं दाहरक्तपि
त्तनाशित्वंच इति राजवल्लभः
ज्योत्स्नायुक्ता रात्रिः इति मेदिनी
पटोलिका इत्यमरटीकायां स्वा
मी श्वेतघोषा इति रत्नमाला

ज्योत्स्नाप्रियः पुं चकोरः इति
हेमचंद्रः ॥

ज्योत्स्नावृक्षः पुं दीपाधारः इ
ति त्रिकाण्डशेषः ॥

ज्योत्स्नी स्त्री पटोलिका किंवा
इति भाषा चंद्रिकायुक्ता रात्रिः
ज्योत्स्ना रात्रिरिति व्याख्या इत्य
मरः रेणुकानाम गंधद्रव्यं इति
शब्दचंद्रिका ॥

ज्योतिषिकः पुं दैवज्ञः इत्यमरः

ज्योत्स्नः त्रि दीप्तः ज्योत्स्नायुक्तः

ज्योत्स्निका स्त्री ज्योत्स्नान्विता
निशा इति शब्दरत्नावली ॥

ज्यौत्स्नी स्त्री पूर्णिमा युक्तरात्रिः
इति हेमचंद्रः ज्योत्स्नी इत्यमर
टीकायां रायमुकुटः ॥

त्रिं अभिभवे इतिकविकल्पद्रुमः
ज्री गि कि ज्याने गतवक्रुवयोभाव
इतियावत् इतिकविकल्पद्रुमः
ज्वर म रोगे इतिकविकल्पद्रुमः
ज्वरः पु ज्वरणं स्वनामख्यातरोगः
तत्पर्यायः जूर्तिः २ इत्यमरः
ज्वरिः ३ आतंकः ४ रोगश्रेष्ठः ५
महागदः ६ इतिराजनिर्घण्टः
तस्योत्पत्तिर्यथा कालाग्निरु
द्रः कोपेनविक्षेप ज्वरमुल्बणं
बभूवुर्यादवाः सर्वेज्वराक्रान्ताहर
रिंविना तं दृष्ट्वा भगवान्कृष्णः स
सर्जवैष्णवंज्वरं तंचिक्षेपज्वरेहरं
माहेश्वरंरणमुद्धेति माहेशज्वरा
कारो यथा जनकः सर्वरोगाणां
दुर्वारोदारुणोज्वरः शिवभक्त
श्चयोगीचसप्तविकृताकृतिः
भीमस्त्रिपादस्त्रिशिराः षड्भुजोन
वलोचनः भस्म प्रहरणो रौद्रः
कालान्तकयमोपमः तस्य भे
दाः वातजः पित्तजश्चैव श्लेष्मज
स्तथैवच ज्वरभेदाश्च त्रिविधा
स्तत्र्यश्चत्रिदोषजः इतिब्रह्मवैव
र्तपुराणं जातिभेदेज्वरभेदा यथा
श्रीकृष्णउवाच शृणुष्व ज्वर संदे
श यथालोकेचरिष्यसि सर्वजाति

षुविस्पष्टस्तथा स्थावरजंगमे
त्रिधा विभज्य चात्मानं मत्प्रियं
यदिकोतुमि चतुष्पादान् भजे
केनद्वितीयेनच स्थावरान् तृ
तीयोयश्च ते भागो मानुषेषुप
तस्यते त्रिधाभूतं वपुः कृत्वा
पतिष्ठ त्वं भव ज्वर चतुर्थो यु
स्तृतीयस्य भविष्यति च ते ध्रुवं
एकान्तत्र्यंतभागः खोरकश्चच
तुर्थकः मानुषेषु स्थित खेदाय व
सत्त्वप्रविभज्यवै जातिषु यथाविशे
षास्तुनिवस त्वं शृणुष्वमे अस्मा
र्थः मानुषेषु यस्तृतीयो भागः त
स्यचतुर्भागंकृत्वा एकांशेनप
क्षिषु वस द्वितीयेन पकान्नादे
वा स्तेषु तृतीयांशः खोरकःच
तुर्थांशेनमानुषेषु वस हृतेषु
कीटरूपेण तथा संकोच पत्रकः
पांडुपत्रश्चविख्यातः फलेषात्
र्थमेवच आतुर्थ्य निःसारता ॥
पद्मिनीषु हिमो भूत्वा पृथिव्याम
पिचोपरः अपांतनीलिकाविद्या
तं शिखोद्भेदश्च बर्हिणां गैरिकः
पर्वतेष्वेव मत्प्रसादाद्भविष्यसि
गोष्वपस्मारको भूत्वा खोरक
श्च भविष्यसि एवंविविधरूपे
ण भविष्यसि ॥ ॥

महीतले दर्शनात् स्पर्शनाच्चैव
प्राणिनां वधमेष्यसि अद्य ते देवम
नुष्याणामनाथस्त्वां विषहिष्यति इ
ति हरिवंशः वैद्यकमतेशिव
ज्वरस्योत्पत्तिर्यथा दक्षापमा
न संक्रुद्ध रुद्र निश्वाससम्भ
वः ज्वरोऽष्टधा पृथग्द्वंद्वसंघा
तागंतजः स्मृतः तस्य विप्र
कृष्ट कारण कथन पूर्विका
संप्राप्ति यथा मिथ्याहार वि
हारस्य दोषा ह्यामाशयाश्रयाः
बहिर्निरस्य कोष्ठाग्निं ज्वरदाः स्यु
रसानुगाः तस्य सामान्यलक्ष
णं यथा स्वेदावरोधः संतापः स
र्वांग ग्रहणं तथा युगपद्यत्र रो
गेव स ज्वरो व्यपदिश्यते ॥
तस्य पूर्वरूपं यथा श्रमोऽरति
र्विवर्णत्वं वैरस्यं नयनप्लवः इ।
च्छाद्वेषौ मुहुश्चापि शीत वाता
तपादिषु जृंभांगमर्दो गुरुता
रोमहर्षोऽरुचिस्तमः अप्रहर्ष
श्च शीतंच भवत्युत्पत्स्यति ज्वरे
वातिकस्य तस्य लक्षणं यथा
वेपथुर्विषमो वेगः कंठोष्ठपरि
शोषणं निद्रानाशः क्षवस्तंभो गात्रा

णां रौक्ष्यमेवच शिरोहृद्गात्ररु
ग्वक्त्रवैरस्यं गाढविट्कता शू
लाध्मानेजृंभणं चभवत्यनिल
जेज्वरे पैत्तिकस्य तस्य लक्षणं
यथा वेग स्तीक्ष्णोऽतिसारश्च
निद्राल्पत्वं तथा वमिः कंठोष्ठ
मुख नासानां पाकः स्वेदश्च जा
यते प्रलापो वक्त्रकटुता मूर्च्छा
दाहो मद स्तृषा पीतविण्मूत्रनेत्र
त्वं पैत्तिके भ्रमएवच ॥ कफज्व
रस्य तस्य लक्षणं यथा स्तैमि
त्यं स्तिमितो वेग आलस्यं मधु
रास्यता शुक्लमूत्र पुरीषत्वं
स्तंभ स्तृप्ति रथापिच गौरवं
शीतमुत्क्लेदो रोमहर्षोऽति
निद्रता प्रतिश्यायो रुचिकासः
कफजेऽक्ष्णोश्च शुक्लता ॥ वा
तपैत्तिकस्य तस्य लक्षणं यथा
तृष्णा मूर्छा भ्रमो दाहः स्वप्न
नाशः शिरोरुजा कण्ठस्य शोषो
वमथु रोमहर्षोऽरुचिस्तमः पर्व
भेदश्च जृंभा च वातपित्तज्वराकृ
तिः वातश्लैष्मिकस्य तस्य लक्षणं
यथा स्तैमित्यं पर्वणां भेदो ॥
निद्रा गौरवमेवच शिरोग्रहः
प्रतिश्यायः कासः स्वेदा प्र
वर्तनं संतापो मध्यवेगश्च ॥

वातश्लेष्मज्वराकृतिः॥ पित्त
श्लैष्मिकस्य तस्य लक्षणं यथा
लिप्त तिक्तास्यता तंद्रा मोहः
कासोरुचिस्तृषा मुहुर्दाहो मुहुः
शीतं पित्तश्लेष्मज्वराकृतिः॥
सान्निपातिकस्य तस्य लक्षणं य
था क्षणोदाहः क्षणेशीतमस्थि
संधिशिरोरुजा सास्रावे कलुषेर
क्ते निर्भुग्ने चापि लोचने सस्वनौ
सरुजौ कर्णौ कंठः शूकैरिवावृ
तः तंद्रामोहः प्रलापश्च कासः
श्वासोरुचिर्भ्रमः परिदग्धाख
रस्पर्शा जिह्वा स्रस्तांगता परं ष्ठी
वनं रक्तपित्तस्य कफेनोन्मिश्रि
तस्य च शिरसोलोठनं तस्यानि
द्रानाशोहृदि व्यथा स्वेद मूत्र पु
रीषाणां चिराद्दर्शनमल्पशः कृ
शत्वं नातिगात्राणां प्रततं कंठकू
जनं कोठानां श्यावरक्तानां मण्ड
लानां च दर्शनं मूकत्वं स्रोतसां
पाको गुरुत्वमुदरस्य च चिरात्
पाकश्च दोषाणां सन्निपातज्वरा
कृतिः॥ असाध्यस्य सान्नि
पातिकस्य तस्य लक्षणं य
था दोषे विबद्धे नष्टेग्नौ सर्व
संपूर्णलक्षणः सन्निपातज्व
रोऽसाध्यः कृच्छ्रसाध्य स्ततो
ऽन्यथा सप्तमे दिवसे प्राप्ते दशा
मे द्वादशेपि वा पुनर्घोरतरो
भूत्वा प्रशमं याति हन्ति वा॥
सप्तमी द्विगुणा चैव नवम्येका
दशी तथा एषा त्रिदोषमर्यादा
मोक्षाय च वधाय च सन्निपात
ज्वरस्यान्ते कर्णमूले सुदारुणः
शोथः संजायते तेन कश्चिदेव प्र
मुच्यते इति माधवकरः जीर्णज्व
रस्य लक्षणं यथा त्रिसप्ताहव्य
तीतस्तु ज्वरो यस्तनुतां गतः प्लीहा
ग्निसादं कुरुते स जीर्णज्वर उच्यते
अत्र ज्वरागमन दिनं परित्यज्य ग
णनीयः इति वैद्यकं आगन्तुज्व
रो यथा अभिघाताभिचाराभ्याम
भिषंगाभिशापतः आगन्तुर्जा
यते दोषैर्यथास्वं तं विभावयेत्
विषभक्षणजागन्तुकस्य तस्य ल
क्षणं यथा श्यावास्यता विषकृते
तथातीसार एव च भक्तारुचिः पि
पासा च तोदश्च सह मूर्च्छया ओष
धीगंधजस्य कामजस्य च तस्य ल
क्षणं यथा ओषधी गंधजे मूर्च्छा
शिरोरुग्वमथुस्तथा कामजे चि
त्तविभ्रंशस्तंद्रालस्यमभोजनं भ
यात्प्रलापः शोकाच्च भवेत् कोपाच्च

1105

वेपथुः अभिचाराभिशापाभ्यां
मोहस्तृष्णा जायते भूताभिषंगा
दुद्वेगो हास्यरोदन कम्पनं का
म शोक भयाद्वायुः क्रोधात्
पित्तं त्रयोमलाः भूताभिषंगात्
कुप्यन्ति भूतसामान्य लक्षणाः
विषमज्वरस्य संप्राप्तिर्यथा दो
षोऽल्पोऽहित संभूतो ज्वरोत्सृ
ष्टस्य वा पुनः धातु मन्यतमं
प्राप्य करोति विषमज्वरं सन्त
तादिज्वराणां प्रतिनियत हेतु
धातवो यथा संतते रस रक्तस्थः
सोऽन्येद्युः पिशिताश्रितः मेदो
गतस्तृतीयेऽह्नि त्वस्थि मज्जग
तः पुनः कुर्याच्चातुर्थकं घोर
मन्तकं रोगसंकरं सप्ताहं वा दशा
हं वा द्वादशाहमथापि वा सन्त
त्या यो विसर्गी स्यात् संततः स
निगद्यते अहोरात्रे सततको
द्वौ कालावनुवर्तते अन्येद्युष्क
स्त्वहोरात्र एक कालं प्रवर्तते
तृतीयकस्तृतीयेऽह्नि चतुर्थे
ऽह्नि चतुर्थकः केचिद्भूताभिषं
गोत्थं ब्रुवते विषमज्वरं कफपि
त्तात् त्रिकग्राही पृष्ठाद्वात कफात्म
कः वात पित्ताच्छिरोग्राही त्रिविधः
स्यात्तृतीयकः चातुर्थको दर्श
यति प्रभावं द्विविधं ज्वरः जंघा
भ्यां श्लैष्मिकः पूर्वं शिरस्तो नि
लसंभवः विषम ज्वर एवास
ञ्चातुर्थक विपर्ययः मध्ये
अहनी ज्वरयत्यादावन्ते च मुंच
ति वातबलासकज्वरो यथा
नित्यं मंदज्वरो रूक्षः शूनकस्तेन
सीदति स्तब्धांगः श्लेष्मभूयिष्ठो
नरो वातबलासकी प्रलेपक
ज्वरो यथा प्रलिम्पन्निव गात्रा
णि घर्मेण गौरवेण वा मंद
ज्वर विलेपी च सशीतः स्यात्प्र
लेपकः विषमज्वरविशेषाः
विदग्धेन्नरसे देहे श्लेष्म पित्ते
व्यवस्थिते तेनार्द्धं शीतलं देहे
चार्द्धं चोष्णं प्रजायते काये दुष्टं
यदा पित्तं श्लेष्मा चान्ते व्यवस्थि
तः तेनोष्णत्वं शरीरस्य शीतत्वं
हस्त पादयोः उक्तार्थस्य वि
पर्ययेन ज्वरान्तरं काये श्लेष्मा
यदा दुष्टः पित्तं चान्ते व्यवस्थि
ते शीतत्वं तेन गात्राणामु
ष्णत्वं हस्तपादयोः शीतपू
र्वो ज्वरो यथा त्वक्स्थौ श्लेष्मा
निलौ शीतमादौ जनयतो ज्व
रे तयोः प्रशान्तयोः पित्त मन्ते

दाहं करोतिच दाहपूर्वोज्व
रो यथा करोत्यादौ तथा पि
त्ते त्वकस्थे दाह मतीवच त
स्मिन्प्रशान्ते त्वितरो क्रमतः शी
तमन्ततः द्वावेतौ दाह शीता
दी ज्वरौ संसर्गजौ स्मृतौ दाह
पूर्व स्तयोः कष्टः कृच्छ्रसाध्य
तमश्च सः उक्तवातादिज्वराणां
धातु विशेषः दुष्यतया प्रवि
कुलक्षणानि यथा गुरुता हृ
दयोत्क्लेशः सदनं छर्द्य
रोचकौ रसस्थे तु ज्वरे लिंगं दैन्यं
चस्योपजायते १ रक्तनिष्ठीव
नं दाहो मोह छर्दन विभ्रमौ
प्रलापः पिडका तृष्णा रक्तप्रा
प्ते ज्वरे नृणां २ पिडिकोद्वेष्टनं
तृष्णा सृष्टमूत्र पुरीषत उष्मा
न्तर्दाह विक्षेपो ग्लानि स्यान्मां
सगे ज्वरे ३ भृशं स्वेद स्तृष्णा
मूर्छाप्रलाप छर्दिरेवच दौर्ग
न्ध्यारोचकौ ग्लानि मेदःस्थे चा
सहिष्णुता ४ भेदोऽस्थ्नां कूज
नं श्वासो विरेक छर्दि रेव
च विक्षेपणं च गात्राणाम्मे
तदस्थिगते ज्वरे ५ तमः प्र
वेशनं हिक्का कासः शैत्यं
वमि स्तथा ॥ अन्त ॥

र्दाहो महाश्वासो मर्मच्छेदश्च म
ज्जगे ६ मरणं प्राप्नु यात्तत्र शु
क्रस्थान गते ज्वरे शेफसः
स्तब्धता मोक्षः शुक्रस्य तु विशे
षतः ७ ऋतुभेदे ज्वर विशेषो
यथा वर्षाशरद्वसन्तेषु वाताद्यैः
प्राकृतः क्रमात् वैकृतो ऽन्यः
स दुःसाध्यः प्राकृतश्चानिलोद्भ
वः वर्षासु मारुतो दुष्टः पित्त
श्लेष्मान्वितो ज्वरं कुर्यात् पित्तं
च शरदि तस्य चानुबलः कफः
तत्प्रकृत्या विसर्गाच्च तत्र नान
शनाद्भयं कफो वसन्ते तमपि
वातपित्तं भवेदनु काले यथास्व
सर्वेषां प्रहन्ति हेह्वि रेव वा ॥
अनुपशयोपशययोर्लक्षणं
निदानोक्तानुपशयो विपरीतो
पशायिता अन्तर्वेग ज्वरल ८
क्षणं अन्तर्दाहोऽधिक स्तृष्णा
प्रलापः श्वसनं भ्रमः संध्यस्थि
शूलमस्वेदो दोष वर्चो विनिग्र
हः अन्तर्वेगस्य लिंगानि ज्वरस्यै
तानि लक्षयेत् [illegible] बहिर्वेग
ज्वर लक्षणं ॥ संतापो ऽभ्यधि
को बाह्य स्तृष्णादीनां च मार्दवं ॥
बहिर्वेगस्य लिंगानि सुखसा
ध्यत्व मेवच ॥ आमज्वर ॥

लक्षणं लाला प्रसेको हृल्लास
हृदयाशुद्ध्यरोचकाः तन्द्रालस्या
विपाकास्यवैरस्यं गुरुगात्रता
क्षुन्नाशो बहुमूत्रत्वं स्तब्धताव
लवान् ज्वरः आमज्वरस्य लिं
गानि न दद्यात्तत्र भेषजं भेषजं
ह्यामदोषस्य भूयो ज्वलयति ज्वरं
पच्यमान ज्वर लक्षणं ज्वरवे ।
गोऽधिकस्तृष्णा प्रलापः श्वस
नं भ्रमः मलप्रवृत्तिरुत्क्लेशः
पच्यमानस्य लक्षणं पक्वज्वर
लक्षणं क्षुत् क्षामता लघुत्वं च
गात्राणां ज्वरमार्दवं दोषप्रवृत्ति
रष्टाहो निरामज्वर लक्षणं ॥
साध्यज्वर लक्षणं बलवत्स्व
ल्पदोषेषु ज्वरः साध्यो ऽनुपद्र
वः असाध्यज्वर लक्षणं हेतुभि
र्बहुभिर्जातो बलिभिर्बहुलक्ष
णः ज्वरः प्राणान्तकृद्यश्च शी
घ्रमिंद्रियनाशनः ज्वर क्षीण
स्य शूनस्य गंभीरो दैर्घरात्रिकः
असाध्यो बलवान्यश्च केशसी
मन्तकृज्ज्वरः तत्र गंभीरज्वर ल
क्षणं गंभीरस्तु ज्वरो ज्ञेयो ह्यन्तर्दा
हेन तृष्णया आनद्धत्वेन चात्य
र्थं श्वास कासोद्गमेन च आरम्भाद्वि

षमो यस्तु यश्च वा दैर्घरात्रिकः
क्षीणस्य चाति रूक्षस्य गंभी
रो यस्य हन्ति तं विसंज्ञस्त्वा
स्पने यस्तु शेते निपातितो ऽपि
वा शीतार्दितोऽन्तरुष्णश्च ज्व
रेण म्रियते नरः यो हृष्टरो
मा रक्ताक्षो हृदि संघातशू
लवान् वक्त्रेणैवोच्छ्वसिति
तं ज्वरो हन्ति मानवं हिक्का
श्वास तृषायुक्तं मूढं विभ्रा
न्तलोचनं सन्ततोच्छ्वासिनं
क्षीणं नरं क्षपयति ज्वरः ॥
हतप्रभेन्द्रियं क्षाममरोचक
निपीडितं गंभीर तीक्ष्ण वे
गार्त्तं ज्वरितं परिवर्जयेत् ज्वरं
स्योपद्रवा रवितोक्ताः श्वासो
मूर्छा रुचि छर्दि स्तृष्णाती
सार विड्ग्रहः हिक्का कासां
गभेदश्च ज्वरस्योपद्रवा दश
ज्वरमुक्ति पूर्वरूपं दाहः स्वेदो
भ्रमस्तृष्णा कंप विड्भेद सं ९
ज्ञिता कूजनं चास्य वैगन्ध्य
माकृतिर्ज्वरमोक्षणे ज्वर
मुक्तलक्षणं स्वेदो लघुत्वं शिरसः
कण्डुः पाको मुखस्य च क्षवथु
श्चान्नलिप्सा च ज्वरमुक्तस्य लक्ष
णं इति माधवकरः ज्वरघ्नः ७ गुडूची

वास्तकं इतिराजनिर्घंटः ज्वर
नाशके त्रि ज्वरहंत्री स्त्री मंजि
ष्ठा इति राजनिर्घंटः ज्वरघ्नीव
ज्वराग्निः पुं ज्वररूपाग्निः तत्पर्या
यः आधिमन्थः २ इतिहाराव
ली ज्वरांगी स्त्री भद्रदन्तिका
इतिराजनिर्घंटः ॥
ज्वरान्तकः पुं नेपालनिम्बः आ
रग्वधः इतिराजनिर्घंटः औष
धभेदः इतिवैद्यकं ज्वरनाशि
कस्य ज्वरापहा स्त्री बिल्वपत्री
बेलसुंठा इति भाषा इतिशा
ब्दचंद्रिका ज्वरनाशकेत्रि
ज्वरितः त्रि ज्वरी इतिराजनिर्घं
टः ज्वरी ने त्रि ज्वरयुक्तः गर्भे
भिक्षंघकालेवाज्वरीनाद्यात्
कथंचन इतिचक्रपाणिदत्तः
ज्वल जम चले लिषि इतिक
विकल्पद्रुमः ॥
ज्वलः पुं ज्वालः दीप्तिः दीप्ति
विशिष्टे त्रि इति मुग्धबोधं
ज्वलका स्त्री अग्निशिखा
इति हेमचंद्रः ॥
ज्वलनं पुं अग्निः चित्रक
वृक्षः इत्यमरः ॥
दहनेऽक्ली ॥ ज्वलनाश्मा
पुं सूर्यकान्तमणिः इति
राजनिर्घण्टः
ज्वलितः त्रि दग्धः उज्ज्वलः इ
तिमेदिनी ॥
ज्वलिनी स्त्री मूर्वालता इतिरा
जनिर्घण्टः ॥
ज्वालः पुं स्त्री अग्निशिखा इ
त्यमरः दीप्तिविशिष्टे त्रि इतिमु
ग्धबोधं ज्वाला स्त्री दग्धान्नं इति
शब्दचंद्रिका अग्निशिखा इत्यमरः
दाहक्षज्वालागर्दभकः पुं रोग
विशेषः तत्पर्यायः ज्वलारास
भकामयः २ ज्वालाखरगदः ३
गर्दभगदः ४ इतिराजनिर्घंटः
अस्य लक्षणं जालगर्दभशब्दे
द्रष्टव्यं ज्वालाजिह्वः पुं अग्निः इ
तिहेमचंद्रः ज्वालामुखी स्त्री पी
ठस्थानविशेषः तत्रभगवत्यास्ति
कापतिता तत्रअंबिकादेवी उ
न्मत्त नामक भैरवश्च इतिपी
ठमाला ॥

फ

फ फकारः सव्यंजन नवमवर्णः
पवर्गचतुर्थवर्णश्च अस्योच्चारण
स्थानं ताल्व इतिव्याकरणं अस्यो
न मन्निषथा विसर्गस्तालुगः सो
ष्माशंववर्गचयस्तथा इतिप्रपंचसारः

अस्यस्वरूपं यथा फकारं परमे
शानि कुण्डली मोक्षरूपिणी र
क्तविद्युल्लताकार सदात्रिगुण
संयुतं पंचदेवमयं वर्णं पंचप्रा
णात्मकं सदा त्रिबिंदु सहितं व
र्णं त्रिशक्ति सहितं तथा इति
कामधेनुतंत्रे ॥
फः पुं फेफावातः नष्टः अंबुव
र्षणं इति शब्दरत्नावली फेटीशः
सुरगुरुः दैत्यराजः ध्वनिः ॥
तारावाद्यः इति मेदिनी ॥
फेंकारः पुं भ्रमरादिशब्दः य
था मारवो मधुपे रकारण
महोफेंकारकोलाहलः इति
वल्लालसेनः ॥
फंफा स्त्री ध्वनिविशेषः जलक
णावर्षणं इति शब्दरत्नावली
फेफानिलः पुं शाल्मलिजवायुः
फंफावानः इतित्रिकाण्डशेषः
फेफावानः पुं शाल्मलिजवायुः
इति हलायुधः ॥
फट संहतौ इतिकविकल्पद्रु
मः फटिः पुं स्तदहस्तः इत्यणादि
कोषः फटिति वा द्रुते शीघ्रे तत्
पर्यायः स्राक् २ अंजसा ३ अह्ना
य ४ सपदि ५ द्राक् ६ मंक्षु ७ इत्यमरः
फलि वा फटिति इति प्राकृत
भाषायांकाव्यप्रकाशः ॥
फनत् कारः पुं अनुकरणश
ब्दः कंकणादिध्वनिः यथा उद्दे
ल्लद्भुजवल्लिकंकणफनत्कारैः
प्रणवार्थता इतिकालिदासः
फम उ भक्ते इतिकविकल्पद्रुमः
फंपः पुं संपातपतनं लम्फः
इतिजटाधरः ॥
फंपारुः पुं वानरः इति शब्द
रत्नावली ॥
फम्पाशी ने पुं मत्स्यरङ्कपक्षी
इतिजटाधरः ॥
फम्पी ने पुंवानरः इतिशब्दर
त्नावली फरः पुं निर्फरः पर्व
तावतीर्णं जलप्रवाहः इत्यम
रः फरा स्त्री फर इत्यमरटीका
यांभरतः ॥
फरी स्त्री फरः इत्यमरटीकायां
भरतः ॥
फर्च्च श उक्तौ भर्त्से इतिक
विकल्पद्रुमः ॥
फक्क श उक्तौ भर्त्से इतिक
विकल्पद्रुमः ॥
फर्फ श उक्तौ भर्त्से इति
कविकल्पद्रुमः ॥

फर्फरः पुं वाद्यविशेषः इत्यमरः चर्म्मपुटाच्छादित काष्टस्थानं इति तद्दीकासारसुंदरी करडइ। तिख्यातः डिंडिमो डेङ्कुरीप्रोक्तो फर्फरः पटहः स्मृतः इति भरत धृतवैजंत्यः तत्पर्यायः फल्लकी २ फल्ली ३ फलरी ४ फर्फरी ५ इति शाब्दरत्नावली कलियुगं न दभेदः इति मेदिनी ॥

फर्फरकः पुं कलियुगं इति त्रिकाण्डशेषः ॥

फर्फरा स्त्री वेश्या इति त्रिकाण्डशेषः ॥

फर्फरी स्त्री फर्फरवाद्यं इति शाब्दरत्नावली ॥

फर्फरीकः पुं शरीरं इत्युणादिकोषः देशः चित्रं इति संक्षिप्तसारे उणादिवृत्तिः ॥

फलज्झला स्त्री हस्तिकर्णास्फालनं इति त्रिकाण्डशेषः ॥

फलरी स्त्री हुडुक्काः फर्फरवाद्यं वालचक्रं केशवक्रं। इति मेदिनी ॥

फला स्त्री कन्या आतपस्पर्शिः इति मेदिनी ॥

फल्लः पुं वर्णसंकरजातिविशेषः इति जटाधरः सद्विप्रियात् ब्राह्मणात् सवर्ण्णायोज्जातः इति मनुः महासकुः भाँड इति भाषा इति महाभारतं ॥

फल्लकं स्त्री कांस्यनिर्म्मितकरतालकं यथा शिवागारे फल्लकं च सूर्य्यागारेव शंखकं दुर्गागारेवंशिवाद्यंमधुरीं च न वादयेत् इति तिथ्यादितत्व ॥

फल्लकंवः पुं पाशावतः इति हारावली ॥

फल्लरी स्त्री हुडुक्काः फर्फरवाद्यं वालचक्रं वालइतिख्यातं इति मेदिनी स्वेद क्लेदः इत्यजयपालः ॥

फल्लिका स्त्री उद्वर्त्तनपटः स्नानः इति मेदिनी उद्वर्त्तनमलः इति शाब्दरत्नावली ॥

फल्ली स्त्री फर्फरवाद्यं इति शाब्दरत्नावली ॥

फल्लोलः पुं नर्क्कलासकः टेऊयारवॉड्ल इति भाषा इति हारावली

फष वधे इति कविकल्पद्रुमः ॥

फष न ग्रहे पिधाने इति कविकल्पद्रुमः ॥

फषं स्त्री थिले इत्यजयपालः

फषः पुं मत्स्यः इत्यमरः ॥ तापः वनं इति मेदिनी ॥ मीनराशिः यथा सार्द्धसमक्षयेमेषे वसुसार्द्धौ वृषे वृषे ॥ इति समयप्रदीपः ॥

फषकेतनः पुं कन्दर्पः इति हलायुधः ॥

फषा स्त्री नागवला इत्यमरः

फषांकः पुं अनिरुद्धः इति हेमचंद्रः ॥

फषाशनः पुं शिशुमारः इति त्रिकाण्डशेषः ॥

फषोदरी स्त्री व्यासमाता इति त्रिकाण्डशेषः ॥

फांकितं क्ली चरणालंकारविशेषः इतिधरणिः

फाटः पुं निकुंजः कान्तारः ॥ व्रणादीनां मार्ज्जनं इति मेदिनी

फाटलः पुं चण्डपाटलिः इत्यमरः फाटा स्त्री भूम्यामलकी इत्यमरः यूथीवृक्षः इति शाब्दचंद्रिका फाटिका स्त्री भूम्यामलकी इति शाब्दचंद्रिका ॥

फामकं क्ली दग्धेष्टका फामा इति भाषा इति हारावली ॥

फामरः पुं नर्कशाणः टेऊयार। शाण इति भाषा इति शाब्दरत्नावली फर्फरः पुं स्त्री फार्फरिकः फर्फरवाद्यकर्त्ता इति व्याकरणं फालिः स्त्री व्यंजनविशेषः फारि इति ख्याता यथा आम्रमामफलं पिष्टं राजिका लवणान्वितं भृष्टंहिङ्गुयुतं पूतं घोलितं फालिरुच्यते फालिर्हरति जिह्वायाः जडत्वं कंठशोधिनी मन्दमन्दं निपीता सा रोचनी वह्निबोधिनी इति भावप्रकाशः

फावुः पुं वृक्षविशेषः फाउ इति भाषा इति शाब्दरत्नावली

फावुकः पुं वृक्षविशेषः फाउ इति भाषा तत्पर्य्यायः पिचुलः २ फवु ३ फाहः ४ इति शाब्दरत्नावली ॥

फिंगाकं क्ली फलविशेषः। फिंगा इति भाषा अस्य गुणाः तिक्तत्वं मधुरत्वं आमवात मन्दाग्निकारित्वं च इति राजवल्लभः

फिंगीनी स्त्री जिंगिनीवृक्षः इति भावप्रकाशः उल्का इति शाब्दरत्नावली ॥

फिंगी स्त्री जिंगिनीवृक्षः इति भावप्रकाशः ॥

झिंझिमः पुं दावाग्निः इतिहाराव
ली झिंझिरिष्टा स्त्री क्षुपविशेषः
झिंझिरीटा इतिभाषा तत्पर्यायः
कला २ पीतपुष्पा ३ झिंझिरा ४
रोमाश्रयफला ५ ह्रस्वा ६ अस्या
गुणाः कटुत्वं शीतलत्वं कषायत्वं
रक्तातिसारनाशित्वं तृष्णत्वं स
र्पदंशत्वं वल्यत्वं महिषीक्षीरव
र्द्धनत्वंच इतिराजनिर्घंटः
झिंकी स्त्री झिल्ली यथा झिंकीवा
चालमधुरा कूजन्ती मधुराकृ
तिः इत्यागमः ॥
झिण्टी स्त्री पुष्पवृक्षविशेषः
झाँटी इतिभाषा तत्पर्यायः
सैरीयकः २ इत्यमरः झिण्टझिर
ण्टः ३ सैरेयकः ४ झिण्टिका ५
इतिराजनिर्घंटः नीलझिंट्याः
पर्यायः वाणा १ दासी २ आर्त्त
गलः ३ इत्यमरः वाणः ४ आ
र्तगलः ५ इति तट्टीका सह
चरः ६ नीलझिंटकः इतिरत्न
माला अरुणझिंट्याः पर्यायः
कुरवकः १ इत्यमरः पीतझिंट्याः
पर्यायः कुरुण्टकः १ सहचरी २
इत्यमरः सहचरः ३ सहाचरः
४ इतितट्टीका वीरः ५ पीतपुष्पः
६
दासी ७ कुरंटकः ८ इतिरत्न
माला अस्या गुणाः कटुत्वं
तिक्तत्वं दन्तामयशूलवातक
फशोफकासत्वग्दोषनाशि
त्वंच कुंदरत्वं इतिराजनिर्घं
टः झिरिका स्त्री झिल्ली इति
शब्दरत्नावली ॥
झिरी स्त्री झिल्ली इतिशब्दर
त्नावली झिलिः स्त्री वाद्यवि
शेषः यथा घंटाशंखस्तथाभेरी
मृदंगोझिल्लिरेवच पंचानांशब्द
नेवाद्यं देवताराधनेषुच इति गूढा
र्थदीपिका ॥
झिल्लिका स्त्री झिल्ली आतपरु
चिः विलेपनमलं इतिहेमचं
द्रः झिल्लिकारावः उद्वर्तनवस्त्र
रुचिः इतिशब्दरत्नावली
झिल्ली स्त्री कीटविशेषः झिं
झिपोका इतिभाषा तत्पर्यायः
झिल्लीका २ झिल्लिका ३ झिरिका ४
झीरुका ५ झिरी ६ चीलिका ७
चील्लिका ८ चिल्ली ९ भृङ्गारी १०
चीरुका ११ इतिशब्दरत्नावली
चीरी १२ इत्यमरः चीरुका १३
इतितट्टीका आतपरुचिः वंशी
उद्वर्तनांशुके इतिमेदिनी ॥
स्थालीलग्नदग्धान्ने ॥ ॥

इत्यजयपालः ॥
झिल्लीकंठः पुं गृहकपोतः ॥
इतित्रिकाण्डशेषः
झिल्लीका स्त्री झिल्लिका इति
हेमचंद्रः ॥
झीरुका स्त्री झिल्ली इत्यमरः
झुण्टः पुं स्तम्बः अप्रकाण्डस्त
म्बः इतिशब्दचंद्रिका ॥
झुमरिः स्त्री रागिणीविशेषः
यथा प्रायः शृंगार बहुला मा
ध्वीकमधुरा मृदुः एकैव झुमरि
र्लोकवर्णादि नियमोज्झिता अ
तो लक्षण मेतस्या नोदाहारि वि
शेषकोविदैः हिशालगस्त्वम
सिद्धत्वपरंजनं इतिसंगीतदा
मोदरः ॥
झूणिः पुं क्रमुकभेदः इष्टदे
वभक्तिः इतिमेदिनी ॥
झृष यरग्याने गतवक्रवयोभा
व इतियावत् इतिकविकल्प
द्रुमः झोडः पुं गुवाकवृक्षः इ
तिभूरिप्रयोगः
झ्यु ङ गत्यां इतिकविकल्पद्रु
मः ॥

ञ

ञ ञकारः सर्वेजमदशमव
र्णः चवर्गपंचमवर्णश्च अस्योच्चार
णस्थानं तालु इतिव्याकरणं ॥
अस्योत्पत्तिर्यथा विसर्गात्ताल
गः सोष्मा शं चवर्गंच षस्तथा
इतिप्रपंचसारः ॥ अस्यलेखनं
प्रकारो यथा कुंडलीत्रयमा
स्थाय दक्षतो वामतस्ततः अ
नुस्वारो योगतामात्रा वामतः कुंचि
ता पुनः तिष्ठन्ति तासु नित्यासु
सूर्येन्दुवरुणाः सदा कुण्डली
हयरूपा तु यामात्रा मध्यतः स्थि
ता महाशक्तिस्त्वरूपा साध्यान
मस्य प्रवक्ष्यते इतिवर्णोद्धार
तंत्रे अस्यस्वरूपं यथा सदा ई
श्वरसंयुक्तं ञकारं शृणु सुंद
रि रक्तविद्युल्लताकारं यास्वयं
परकुंडली पंचदेवमयं वर्णम
पंचप्राणात्मकं सदा त्रिशक्तिस
हितं वर्णं त्रिविंदुसहितं सदा
इति कामधेनुतंत्रे ञः पुं गा
यनः घर्घरध्वनिः इत्येकाक्ष
रकोषः वलीवर्दः शुक्रः वाम
मतिः इतिमेदिनी ॥
ञिः पुं प्रत्ययविशेषः समेर
णार्थे भवति तस्य इकार स्ति
ष्ति धातोरनुवंधविशेषः स
वर्त्तमानक्तप्रत्ययबोधकः
इति वोपदेवस्वामी ॥

ट टकारः सवंजनैकादशाव
र्णः टवर्ग प्रथम वर्णश्च अस्या
च्चारणस्थानंमूर्द्धा इति व्याकरणं
अस्यस्वरूपं यथा टकारंचंचला
पांगिस्वयंपरम कुंडली कोटि
विद्युल्लताकारं पंचदेवमयं स
दा पंचप्राणयुतंवर्णं गुणत्रय
समन्वितं त्रिशक्तिसहितंवर्णं
त्रिविंदुसहितेसदा इतिकामधे
नुतंत्रे ॥
ट क्ली करंकः इति विश्वः
टः पुं वामनः पादः निस्वनः
इति मेदिनी ॥
टक ई क वंधे इतिकविकल्प
द्रुमः टक्कदेशीयः पुं वाल्हीक
शाकः इतित्रिकाण्डशेषः ॥
टगरः केकराक्षे त्रि इति मे
दिनी ॥
टंकः पुं कोपः कोषः असिः
ग्रावदारणः इति मेदिनी ॥
परिमाणविशेषः सतुच।
तुर्माषकरूप श्चतुर्विंशति
रक्तिका रूपोवा जंघा इ
ति हेमचंद्रः ॥
दर्पः इति हलायुधः ॥
टंकः पुंक्ली नीलकपित्थः ॥
खनित्रं टंकणः इतिमेदि
नी दर्पः इति शब्दरत्नावली
टंककः पुं रजतमुद्रा टाका
इति भाषा इति भाषा इति रू
प्याध्यक्ष शब्दे अमरटीका सा
रसुंदरीमतश्च टंककपतिः
पुं रूप्याध्यक्षः टंकाकशाला
नियुक्तः टांकशालेरअध्यक्ष
इति भाषा इत्यमरटीकासार
सुंदरी ॥
टंककशाला स्त्री रजतमुद्रा
गृहं टाकशाल इति भाषा इ
त्यमर टीका सारसुंदरी ॥
टंकाटीकः पुं शिवः इतित्रि
काण्डशेषः ॥
टंकणः पुं क्षारविशेषः सो
हागा इतिभाषा तत्पर्यायः
पाचनकः २ मालतीतीरजः ३
लोहश्लेषणः ४ रसशोधनः ५
इतिहेमचंद्रः टंकणक्षारः ६
रंगक्षारः ७ रसाधिकः ८ लो
हद्रावी ९ रसघ्नः १० सुभगः ११
रंगदः १२ वर्तुलं १३ कनकं १४
क्षारं १५ मलिनं १६ धातुव
ल्लभं १७ इति राजनिर्घण्टः
मालतीतीरसम्भवः १८ द्रावी
१९ द्रावकः २० लोहसंश्लिष्टकारकः २१ इतिभावप्रकाशः ॥

1115

स्वर्णपाचकः २२ इति रत्नमा।
ला अस्य गुणाः कटुत्वं उष्णत्वं
कफ स्थावरादि विष कास श्वा
सनाशित्वंच इतिराजनिर्घण्टः
अग्निवात पित्त कारित्वं रूक्ष
त्वं इति भावप्रकाशः ॥
टंका स्त्री जंघा इतिमेदिनी
टंकानकः पुं ब्रह्मदारुवृक्षः
इतिशब्दचंद्रिका ॥
टंकारः पुं विस्मयः प्रसिद्धः
शिंजिनीध्वनिः इति मेदिनी
टंकारी स्त्री क्षुपविशेषः टेका
री इति भाषा अस्यगुणाः वात
श्लेष्मशोफोदर व्यथानाशित्वं
तिक्तत्वं दीपनत्वं लघुत्वंच इ
तिराजनिर्घण्टः।
टङ्कः पुंक्ली खनित्रं खड्गभेदः
जङ्घा इतिमेदिनी ॥
टंगः पुं टंकणः सोहागा इति
भाषा इतिशब्दचंद्रिका चत
र्माषकपरिमाणं इतिवैद्यक
परिभाषा ॥
टंगणः पुं क्ली टंकणः सोहा
गा इतिभाषा ॥ अस्यगुणाः श्ले
ष्मवायुनाशित्वं क्षाररसत्वं ती
क्ष्णत्वं उष्णत्वं अग्निवर्द्धकत्वं विरू
क्षणत्वं ॥ ॥
भेदकत्वं वलवर्द्धनत्वंच इति
राजवल्लभः ॥
टंगिनी स्त्री वृक्ष विशेषः आ
कनादि इतिभाषा इतिशब्दचं
चंद्रिका टट्टनीस्त्री ज्येष्ठी इति
त्रिकाण्डशेषः टट्टरीस्त्री मृषावा
दः लम्पावाद्यं पटहवाद्यं इति
मेदिनी टट्टरः पुं भेरीशब्दः
इतिहेमचंद्रः
टल ज विक्लवो विह्वलीभाव
इति यावत् इतिकविकल्पद्रुमः
टलनं क्ली विक्लवः टला इति
भाषा इतिटलधातो र्भावे ऽन
ट टा स्त्री पृथिवी इत्येकाक्षर
कोषः टांकरः पुं नागवीटः इ
तित्रिकाण्डशेषः ॥
टारः पुं लिङ्गः तुरंगः इतिहे
मचंद्रः ॥
टिक ऋ उ. गत्यां इतिकविक
ल्पद्रुमः टिटिभकः पुं टिट्टिभ
पक्षी इत्यमरटीका ॥
टिट्टिभः पुं पक्षिविशेषः टी
वि इतिभाषा तत्पर्यायः टी
टिभकः २ इति शब्दरत्नावली
टिट्टिभकः ३ इत्यमरः टि
टिभकः ४ इतिजटीका ॥

टिट्टिभकः पुं टिट्टिभपक्षी इ
त्यमरः ॥
टिटिणिका स्त्री अम्बुशिरीषि
का इति भावप्रकाशः ॥
टिण्डिशः पुं वृक्षविशेषः डि
ण्डिशा इति जैडशी इति च भा
षा तत्पर्य्यायः रोमशफलः
२ तिन्दिशः ३ मुनिनिर्म्मितः ४
इति राजनिर्घण्टः डिण्डिशः ५
अस्य गुणाः रुचिकारित्वं भेद
कत्वं पित्तश्लेष्मापमरी नाशि
त्वं सुशीतत्वं वातलत्वं रूक्ष
त्वं मूत्रलत्वंच इति भावप्रका
शः ॥
टप क चुरि प्रेरणे इति या
वत् इति कविकल्पद्रुमः ॥
टिप्पनी स्त्री टीका यथा श्री
मत्तंगाननं नत्वा लीलावत्याः
सुटिप्पनी भवेशेन सुबोधा
र्थं क्रियते यद्गुरोः स्फुटं ॥
टीक ऋ ङ गत्यां इति कविकल्प
द्रुमः टीका स्त्री विवरणग्रंथः ॥
इति लिंगादिसंग्रहे अमरः ॥
टुण्टुक पुं श्योणाक वृक्षः इत्य
मरः कृष्णखदिरवृक्षः इति श
ब्दचंद्रिका पक्षिविशेषः टुण्टु
निइति भाषा इति शब्दरत्नाव

ली श्योणाकप्रभेदः इति
राजनिर्घण्टः ॥
टुण्टुकः त्रि नीचः इति मे
दिनी क्रूरः इति विश्वः ॥
टुण्टुका स्त्री टंगिनीवृक्षः इ
ति शब्दचंद्रिका ॥
टुनाका स्त्री तालमूलीवृक्षः
इति शब्दचंद्रिका ॥
टेरकः त्रि वक्रचक्षुः टेरा इ
ति भाषा तत्पर्य्यायः वलिरः २
केकरः ३ केदरः ४ इति श
ब्दरत्नावली ॥
ट्वल ज विक्लवे इति कविकल्प
द्रुमः ॥

ठ

ठ ठकारः स व्यंजनद्वादश
वर्णः टवर्ग द्वितीयवर्णश्च अ
स्योच्चारणस्थानं मूर्द्धा इति व्या
करणं अस्यस्वरूपं यथा ठ
कारं चंचलापाङ्गि कुण्डलीमो
क्षरूपिणी पीतविद्युल्लताका
रं सदा त्रिगुणसंयुतं पंचदेवा
त्मकं वर्णपंचप्राणमयं सदा
त्रिविंदुसहितं वर्णं त्रिशक्तिसहि
तं सदा इति कामधेनुतंत्रे ठः पुं
शिवः महाध्वनिः चंद्रमंडलः इत्येका
क्षरकोषः मंडलः शून्यं लोकगोचरः

इति मेदिनी ॥
ठक्कुरः पुं देवता ठाकुर इति
ख्यातः यथा सुदामनामगो
पालः श्रीमान् सुंदर ठक्कुरः
इत्यनन्तसंहिता ॥
ठठं
ठठठं | व्य अनुकरण शब्दः ठ
न् ठन् इति भाषा यथा रामाभि
षेके मदविह्वलायाः कस्याश्चित्
हेमघटस्तरुण्याः सोपानमारु
ह्य चकार शब्दं ठठं ठठं ठं ठठठं
ठठंठः इति महानाटकः ॥
ठरः त्रि हृद्धः यथा ज्ञाठेरेव
हृमज्ञी इति काव्यप्रकाशे
देशी भाषा ॥

ड

ड डकारः सव्यंजनत्रयोदशवर्णः
टवर्ग तृतीयवर्णश्च अस्योच्चा
रणस्थानं मूर्द्धा इति व्याकरणं
अस्य स्वरूपं यथा डकारं चंचलापा
ङ्गि सदा त्रिगुणसंयुतं पंचदेव
मयं वर्णं पंचप्राणमयं सदा त्रि
शक्तिसहितं वर्णं त्रिविंदुसहि
तं सदा चतुर्ज्ञानमयं वर्णं आ
त्मादितत्वसंयुतं पीतविद्युल्लता
कारं डकारं प्रणमाम्यहं इतिका

मधेनुतंत्रे डः पुं शिवः शब्दः
त्रासः इत्येकाक्षरकोषः वाड
वाग्निः इति मेदिनी ॥
डङ्गरी स्त्री फलविशेषः तत्
पर्य्यायः डांगरी २ दीर्घर्व्वारुः ३
डंडरी ४ डंगारी ५ नामभुणडी ६
गजदंतफला ७ अस्या गुणाः
शीतलत्वं रुचिकारित्वं दाह
पित्तास्रदोषशोषनाशित्वं गुरुत्वं
धनाशित्वं तर्पणत्वं गौल्यत्वं
च इति राजनिर्घण्टः ॥
डंगारी स्त्री डंगरीफलं इति रा
जनिर्घण्टः ॥
डप क म ङ संहतौ राशीक
रणे इति यावत् इति कविक
ल्पद्रुमः ॥
डिप ङ इ म क संहतौ राशी
करण इतियावत् इति कवि
कल्पद्रुमः ॥
डब इ क प्रेरणे इति कविक
ल्पद्रुमः ॥
डमः पुं वर्णसंकरजातिवि
शेषः डोम इति भाषा सचा
ण्डाल्या लेटात्जातः इति ब्र
ह्मवैवर्त्तपुराणं ॥
डमरं क्ली भीत्यापलायनं
तत्पर्य्यायः मगालिका २
विद्रवः ३ ॥

डिम्बं ४ इति हारावली ॥
डमरः पुं परचक्रादिभयं अस्य
कलहः इत्यमरटीकायां स्वामी
तत्पर्यायः डिंबं २ विप्लवः ३
इत्यमरः डिंबः ४ विंबः ५ डाम
रः ६ इति भरतः ॥
डमरुः पुं वाद्यभेदः इत्यमरः
कपालियोगिवाद्यं इतिभरतः
दीर्णमध्यो गुटिकाद्वयालंबि
तः इति सारसुंदरी चमत्का
रः इति त्रिकाण्डशेषः ॥
डयनं क्ली कर्णीरथः नभो
गतिः इतिहेमचंद्रः ॥
डल्लकं क्ली वंशादिनिर्म्मित
पात्रं डाला इतिभाषा यथा
त्रिशांतचषष्टाधिकं डल्लकं
वस्त्र संयुतं सभोज्यं सोपवीतं
चसोपहारं मनोहरं इतिब्रह्म
वैवर्त्तेप्रकृतिखण्डे ॥
डक्कः पुं वृक्षविशेषः डेऊया
इति मोदार इतिच भाषा तत्पर्या
यः लकुचः २ लिकुचः ३ इत्य
मरः अस्यगुणाः गुरुत्वं
विष्टंभित्वं त्रिदोषप्रकोप
छित्कारित्वंच इति राजवल्ल
भः ॥
डक्कः पुं डक्कः इति शब्द
रत्नावली ॥ ॥

डा स्त्री डाकिनी इति मेदिनी
डाकिनी स्त्री कालीगणविशेषः
यथा सार्द्धंच डाकिनीनांच विक
टानां त्रिकोटिभिः इति ब्रह्मवैव
र्त्ते प्रकृतिखंडे ॥
डांगरी स्त्री डेंगरीफलं इतिरा
जनिर्घण्टः ॥
डामरः पुं शिवोक्तशास्त्रविशे
षः सत्र षड्विधः तेषां नामा
नि श्लोकसंख्याश्च यथा योग
डामरः २३५३३ शिवडामरः ११०
दुर्गाडामरः ११५०३ सारस्वतडा
मरः ९९०५ ब्रह्मडामरः ७१०५
गंधर्वडामरः ६००६० इतिवारा
हीतंत्रे डमरः इत्यमरटीकायां
भरतः चमत्कारः यथा भूता
नामरः श्चमत्कारो ऽयमिति भूत
डामरशब्द निर्वचने निर्धारः ॥
डालिमः पुं दालिमः इत्यमर
टीकायां भरतः ॥
डाहलः पुं त्रिपुरदेशः इतिभू
रिप्रयोगः ॥
डाक्कः पुं दास्वहपक्षी इ
तिजटाधरः ॥
डिंगरः पुं डंगरः क्षेपः खत्र
लः धूर्त्तः सेवकः इति ॥
शब्दरत्नावली ॥

डिण्डिमः पुं वाद्यप्रभेदः इत्य
मरः डेंगरीतिख्यातः इति ॥
डरतः माहेश्वरदेंडी तिख्यातः
इति सारसुंदरी कुस्माण्डकफलः
पानी आमला इति भाषा इति
शब्दचंद्रिका ॥
डिण्डिरः पुं समुद्रफेनः इति
हेमचंद्रः ॥
डिण्डिरमोदकं क्ली गृंजनं इ
तिराजनिर्घण्टः
डिण्डिशः पुं टिण्डिशः इति ।
भावप्रकाशः
डिप उ. क ए संहतौ इति
कविकल्पद्रुमः ॥
डिप शि क य इर नुदि प्रेरणे
इति यावत् इतिकविकल्पद्रु
मः डिप इ क प ड. संहतौ इ
तिकविकल्पद्रुमः ॥
डिव इक प्रेरणे इतिकविक ।
ल्पद्रुमः ॥
डिभ इ प क संघे इति कविक
ल्पद्रुमः ॥ डिमहिंसे सौत्र
धातुरयं इतिकविकल्पद्रुमः
डिमः पुं नाटकस्यरूपकविशे
षः इति हेमचंद्रः ॥

डिम्बं क्ली भयं कललं फुप्फुसः
इति हारावली डमरः इत्यमरः
डिम्बः पुं भयध्वनिः अण्डं फु
प्फुसः प्लीहा विप्लवः इति मे
दिनी डिम्बः इति द्विरूपकोशः
डिम्बाहवः पुं नृपतिरहितयुद्धं
इतिजटाधरः ॥
डिम्बिका स्त्री कामुकी जलविं
बः शोणकवृक्षः इतिशब्दर
त्नावली डिंबः त्रि शिशुः इत्य
मरः मूर्खः इतिमेदिनी अस्य
रूपान्तरं डिम्बः इतिद्विरूपको
षः डिंभकः त्रि बालकः इति
शब्दरत्नावली ॥
डिंबचक्रं क्ली नराणांशुभाशु
भनिर्णायककचक्रविशेषः यथा
डिंभचक्रे न्यसेद्भानि भानु भादि
त्रि मस्तके मुखे त्रीणि द्वयं स्क
न्धे चैकैकं बाहुहस्तयोः हृदि
पंचनाभि गुह्ये चैकैकं षट्च
जानुनोः चरणाभ्यां तथैकैकं
जन्मर्क्षपतनात् फलं शीर्षस्थे
छत्रलाभः स्यात् वक्त्रे मिष्टान्न
भोजनं स्कंधे धनीच बाहुभ्यां
स्थानभ्रष्टो भवेन्नरः पाणि
भ्यां तस्करो लक्ष्मीर्हृदये स्यात्
सुस्थनाभितः गुह्ये कामो ।

भ्रमो ज्ञान्वो रत्पजीवीचपाद
योः इति स्वरोदयः ॥
डिंभा स्त्री अतिशिशुः इत्यमरः
डी ऊ नभोगतौ इतिकविकल्प
द्रुमः डी ऊ डी य गतौ नभोग
तौ इतिकविकल्पद्रुमः ॥
डीनं क्ली पक्षिगतिः इतिजटाध
रः तद्भेदा यथा रुतानां संपात्य
निसृष्टपक्षसंपातमुच्चानि उड्डी
यानि निसेवेधः समन्दीषप्रवृत्त
ते संकल्यापक्षगमन मुच्यते
व्यतिरिक्तकंषड्विंशतिरमीभे
दाः पातानामिह दर्शिताः म
हाडीनं विहायैषां पातानां त्रिवि
धागतिः गतेनत्रयथोद्दिष्टमा
गते पुनरागमः प्रत्याहृतिः प्र
तिगति रिति षट्सप्ततिः स्मृताः
तेषां निपाताः कथ्यन्ते प्रत्येकं पं
चविंशतिः तद्यथा उड्डीनं ऊर्द्ध
गमनं १ अवडीनं अधः पतनं २
प्रडीनं पतनवेगवत्ता ३ डीनं
पतनमात्रं ४ निडीनं नीचैः पत
नं ५ संडीनं सम्यक् पतनं ६ ति
र्य्यग्डीनं तिर्य्यक्पतनं ७ वि
डीनं विचित्रपतनं ८ परिडीनं
सर्वतः पतनं ९ पराडीनं परा
वृत्यगमनं १० सुडीनं सुकुमार १

पातः ११ अभिडीनं आभिमुख्ये
न पुनः पुनः पतनं १२ महाडीनं
दूरपतनेन प्रत्याहृतिः १३
निडीनं भद्वा माश्रयमवा प
पुनः पतनं १४ अतिडीनं दी
र्घपतनं १५ अवडीनं अधः पतनं १६
प्रडीनं अधः पतने वेगवत्ता १७
अवसंडीनं अधः पतने शोभ
नवत्ता १८ डीनडीनकं पतनं
निर्विशेषणं कुत्सितंच १९
संडीनोड्डीनं शोभनमूर्द्धगमनं २०
संडीन डीनं शोभनगमनमात्रं २१
पुनर्डीनं तदेव सामान्यगमनं
२२ डीनावडीनकं तदेवाधः कुत
सितंच २३ संपातं बहुभिः सह
गमनं २४ समुदीषणं परस्प
रस्पर्द्धया गमनं २५ ततोन्यत्
व्यतिरिक्तकं तस्मात् स्पर्द्धा
कृतादेतस्मादि कृतं पतनं २६
एतेषु षड्विंशतिसंख्येषु पतनं
एकं डीननामकं निर्विशेषणं
पतनमात्रं सविशेषणानि प
तनानि पंचविंशति संख्या
नि तत्र तानि सविशेषणानि
वक्ष्यमाणचतुर्भिर्विशेषणैः
विशिष्टानि इति शतं निर्वेशे
षं चैकमिति एकोत्तरं शतं

शतं तानि चत्वारि विशेषणानि
यथा गतेगमनमात्रे आगतेआ
गमने प्रतिगतेगत्वैव पुनरागम
ने आगत्यैव पुनर्गमनंच इति
कर्णपर्व आगम शास्त्रविशे
षः यथा डामरे डमरे डीनं सृ
तेकालीविलासके सप्त कोटि
महाग्रस्था मम वक्त्राद्विनिर्गताः
इतिमुण्डमालातन्त्रे ॥
डीनडीनकं क्ली पक्षिणांगति
क्रियाविशेषः इति जटाधरः अ
स्याविवरणं डीनशब्दे द्रष्टव्यं ॥
डीनावडीनं क्ली पक्षिगतिविशे
षः तत्र एकस्यांगतौ गमस्तर
मिश्रणं अधः कुत्सित गमनच
इतिमहाभारते कर्णपर्वटीका
डुण्डुभः पुं सर्पविशेषः ॥ ढोंड़ा
इति भाषा तत्पर्य्यायः राजिलः
२ इत्यमरः डुण्डुभः इतिभरतः
नागभूत् ४ डुण्डुः ५ इतित्रिका
ण्डशेषः ॥
डुण्डुलः पुं क्षुद्रपेचकः तत्पर्य्या
यः क्षुद्रोलूकः २ शाकुनेयः ३
पिंगलः ४ हृद्याग्रयी ५ हृहद्रावी
६ विशालाक्षः ७ भयंकरः ८
इति राजनिर्घण्टः ॥ ॥

डुलिः स्त्री डुलिः कमठी इत्य
मरटीकायां रायमुकुटः ॥
डुलिका स्त्री खंजनाकारप
क्षिविशेषः इति जटाधरः ॥
डुली स्त्री चिल्लीशाकः इतिरा
जनिर्घण्टः
डोडी स्त्री क्षुपविशेषः तत्
पर्य्यायः जीवन्ती १ शाकश्रे
ष्ठा ३ सुखालुका ४ बहुवल्ली ५
दीर्घपत्रा ६ सूक्ष्मपत्रा ७ जीव
नी ८ अस्या गुणाः कटुत्वं ति
क्तत्वं उष्णत्वं दीपनत्वं कफ
वात कंठामय रक्तपित्तार्त्तिदा
हनाशित्वं रुच्यत्वंच इति रा
जनिर्घण्टः ॥
डोरं क्ली हस्तादिबंधनसूत्रं य
था कोऽनन्त इत्युदीर्याथ एतत्
तत्करपल्लवे हस्ताद्राकृष्य
तड्डोरं दत्तवान् पावकोपरि ॥
इतिभविष्यपुराणे अनन्तव्रत
कथा डोरकं क्ली डोरं यथा
चतुर्दशग्रन्थियुक्तं कुंकुमाक्तं
सडोरकं स्त्रियश्च पुरुषश्चैव
बध्नीयात् वामदक्षिणे इति
भविष्यपुराणे अनन्तव्रतक
था डोरडी स्त्री हरली इतिराजनिर्घण्टः

ढ ढकारः स व्यंजन चतुर्दश वर्णः टवर्गः चतुर्थ वर्णश्चास्योच्चारणस्थानं मूर्द्धा इति व्याकरणं अस्य स्वरूपं यथा ढकारं परमाराध्यं यथा स्वयं कुंडलीपरा पंचदेवात्मकं वर्णं पंचप्राणमयं सदा सदा त्रिगुणसंयुक्तं आत्मादितत्वसंयुतं रक्तविद्युल्लताकारं ढकारं प्रणमाम्यहं इति कामधेनुतन्त्रे ॥

ढः पु ढक्का श्वा श्वलांगूलं इति मेदिनी निर्गुणः ध्वनिः इत्येकाक्षरकोषः ॥

ढक्कः पु देशविशेषः ढाका इति भाषा इति भूरिप्रयोगः ॥

ढक्का स्त्री वाद्यविशेषः ढाक इति भाषा तत्पर्यायः यशःपटहः २ इत्यमरः विजयमर्द्दलः २ इति शब्दरत्नावली ॥

ढक्कारी स्त्री तारिणी यथा ढक्काररवाच ढक्कारी ढक्काररवा ढक्का इति कुलसद्भावे तारासहस्रनामस्तोत्रे

ढाण्ढी स्त्री वाक्यविशेषः यथा ढाण्ढी वाक्यस्वरूपाच ढक्कारान्तररूपिणी इति रुद्रयामले अन्नपूर्णासहस्रनाम

ढालं क्ली फलकं यथा ढालिपत्रजयकरीति अन्नदाकल्पीय सहस्रनामविवरणं

ढाली त्रि ढालविशिष्टः चर्मी यथा ढालिपत्र जयकरी ढकारवर्णरूपिणी इति रुद्रयामले अन्नपूर्णासहस्रनामस्तोत्रं ॥

ढामरा स्त्री हंसी इति धनंजयः

ढुढि अन्वेषणे इति कविकल्पद्रुमः ढुण्ढिः पु गणेशः तन्नामकारणं यथा गणेशं प्रति शिववाक्यं अन्वेषणे ढुण्ढिरयं प्रथितोऽस्ति धातुः सर्वार्थढुण्ढिततया तव ढुण्ढिनामा काशीप्रवेशमपि को लभतेऽत्र देही तोषं विना तव विनायक ढुण्ढिराज तन्माहात्म्यं यथा ढुण्ढे प्रणम्य पुरतस्तव पादपद्मं यो मां नमस्यति पुमानिह काशिवासी तत्कर्णमूलमधिगम्य पुरा दिशामि तत् किंचिदत्र न पुनर्भवतास्ति येना यः प्रत्यहं नमति ढुण्ढि विनायक त्वां काश्यां प्रगे प्रतिहताखिलविघ्नसंघः नो तस्य जातु जगतीतलवर्ति वस्तु दुष्प्राप्यमत्र च परत्र च किंचनापि प्रथमे ढुण्ढिराजो क्षिप्रमस्त्विणतो मनाक् प्राढुण्ढिः सर्व भक्तेभ्यः सर्वार्थान् ॥

संप्रयच्छसि तस्य यात्राविधाने यथा माघकृष्णचतुर्थ्यां तु नक्तव्रतपरायणाः ये त्वां ढुण्ढे र्च्चयिष्यन्ति तेऽर्च्याः स्युः स्मरद्विषां विधाय वार्षिकीं यात्रां चतुर्थी प्राप्य तापसीं शुक्लां शुक्लतिले वृद्धान् प्राश्नीयाल्लड्डुकान्तीकार्यी यात्रा प्रयत्नेन क्षेत्रसिद्धिमभीप्सुभिः तस्यां चतुर्थ्यां त्वत् प्रीत्यै ढुण्ढे सर्वोपसर्गहृत् तां यात्रां नाचरेद्यः कुर्याद्विवेद्य तिललड्डुकान् उपसर्गसहस्रेण स हन्तव्यो मम आज्ञया होमं तिलाज्य द्रव्येण यः करिष्यति भक्तितः तस्याच तुर्थ्यां मंत्रैस्तस्य मंत्रः प्रसेत्स्यति इति काशीखण्डे ॥

ढोलः पु स्वनामख्यातवाद्यं यथा ढक्का ढोलप्रिया नित्या ढोलवाद्यप्रमोदिनी ढोलरूपा ढोलधरा ढोलशब्दस्वरूपिणी इति रुद्रयामले अन्नपूर्णा सहस्रनामस्तोत्रे ॥

ढौक ऋ ङ. गत्या इति कविकल्पद्रुमः ॥

ण

ण णकारः स व्यंजन पंचदशवर्णः टवर्ग पंचम वर्णश्च अस्योच्चारणस्थानं मूर्द्धा इति व्याकरणं ॥ अस्य स्वरूपं यथा णकारं परमेशानि या स्वयं परकुण्डली पीतविद्युल्लताकारं पंचदेवमयं सदा पंचप्राणमयं देवि सदा त्रिगुणसंयुतं आत्मादि तत्वसंयुक्तं महामोहप्रदायकं इति कामधेनुतन्त्रे ॥

णः पु ज्ञानं निश्चयः इत्येकाक्षरकोषः विंदुदेवः स बुद्धदेवताविशेषः भूषणं गुणवर्जितः पानीयनिलयः इति मेदिनी ॥

णख गतौ इति कविकल्पद्रुमः

णट नृत्ये सातिनयन्त्स इतियावत् हिंसायां इति कविकल्पद्रुमः णोपदेशविधौ वर्जनेपि अस्य परस्य च पाठः केषांचिदनुरोधात् इति दुर्गादासः णट म नतौ अभिनयरहितनृत्य इति यावत् इति कविकल्पद्रुमः णद. क्लिशे अव्यक्तशब्द इतियावत् इति कविकल्पद्रुमः णट क भासि इति कविकल्पद्रुमः णभ ई ङ. हिंसे इति कविकल्पद्रुमः णभ यग हिंसे

इतिकविकल्पद्रुमः णमङोशाहे
नतौ इतिकविकल्पद्रुमः ॥
णय ङ. गतौ रक्षे इतिकविक
ल्पद्रुमः ॥
णर्द शब्दे इतिकविकल्पद्रुमः
णोपदेशविधावस्य वर्जनेपि इ
हपाठः केषांचिदनुरोधात् इति
तट्टीकायां दुर्गादासः ॥
णल ज बंधे इतिकविकल्पद्रुमः
णश ९ य ऊ नाशे अदर्शने इ
तियावत् इतिकविकल्पद्रुमः
णस ङ. कौटिल्ये इतिकविकल्प
द्रुमः णह य ओ म बंधे इति क
विकल्पद्रुमः ॥
णक्क गतौ इति कविकल्पद्रुमः
णाथ ङ ङ. आशिषि उपतापे
ऐश्वर्ये अर्थने इतिकविकल्प
द्रुमः णोपदेशविधावस्य वर्ज
नेऽपि इहपाठः कस्यचिदनुरो
धात् इतितट्टीकायां दुर्गादासः
णाध ङ ङ. नाथे इतिकवि
कल्पद्रुमः णोपदेशविधा
वस्य वर्जनेऽपि इहपाठः कस्य
चिदनुरोधात् इतितट्टीका ।
यां दुर्गादासः णास ङ ङ. धाने
शब्दे इति यावत् इतिकविकल्प
द्रुमः णिज र उ ल शुद्धौ इतिक
विकल्पद्रुमः ॥
णिज ९ इर म ओ पोषे शुद्धौ
इतिकविकल्पद्रुमः ॥
णिद ङ म सन्निधौ कुत्सने
इतिकविकल्पद्रुमः ॥
णिद इ कुत् सने इतिकविक
ल्पद्रुमः णिल श गहने दुर्बो
धइतियावत् इतिकविकल्पद्रु
मः णिव इ सेके इतिकविक
ल्पद्रुमः णिश शीले समाधा
वितियावत् इतिकविकल्पद्रुमः
णिष उ सेके इतिकविकल्पद्रुमः
णिस र ङ. ल चुम्बने इतिकविक
ल्पद्रुमः णिक्ष चुम्बने इतिकवि
कल्पद्रुमः णी म प्रापणे इति
कविकल्पद्रुमः णील वर्णे णील
वर्णीकरणइतियावत् इतिकविक
ल्पद्रुमः णीव स्थौल्ये इतिकवि
कल्पद्रुमः णु ल स्तुतौ इतिकवि
कल्पद्रुमः णुद ओ म श प्रेरणे
इतिकविकल्पद्रुमः ॥
णूषि स्तवने इति कविकल्पद्रुमः
णेद ङ म सन्निधौ कुत् सने
इतिकविकल्पद्रुमः ॥
णेष ङ ङ. गतौ इतिकविकल्प
द्रुमः ॥ एतेधातवः स्वभावतो
दन्त्यनादयो णोपदेशेन मूर्द्धन्या ।
णादयः ॥ ॥

न नकारः सव्यंजनषोडशवर्णः
तवर्गः प्रथमवर्णोस्य उच्चार
णस्थानं दन्ताः इत्यव्याकरणं अ
स्यस्वरूपंयथा नकारं चंचलापा
ङ्गि स्वयं परम कुंडली पंचदेवा
त्मकं वर्णं पंचप्राणमयं सदा
त्रिशक्ति सहितं वर्णं आत्मादि
तत्त्वसंयुतं त्रिविंदुसहितंवर्णं
पीतविद्युत्समप्रभं इति काम
धेनुतन्त्रं ॥
नं क्ली स्त्री तरणं बुध्नं इति
मेदिनी ॥
नः पु चौरः अमृतं बुद्धं कोडः
म्लेच्छः इति मेदिनी ॥
गर्भः पाठः इतिशब्दरत्नावली
रत्नं सुगतः योधः गौरविव
र्जितपुच्छं क्रोडपुच्छं इत्येका
क्षरकोषः ॥
नक सहने हासे इति कवि ।
कल्पद्रुमः ॥
नक इ दौस्थ्ये इतिकविकल्पद्रुमः
नक्किलः त्रि धूर्तः इत्युणादिको
षः नक्किला स्त्री औषधं इत्युणा
दिकोषः नकाः त्रि हास्यः सहनी
यः इति नकधातोः कर्मणि यः अ
मयः नकं क्ली पाशंबुसंयुतदधि
इत्यमरः न पर्यायः गोरसजं २
घोलं ३ कालसेयं ४ विलोडि
तं ५ दंडाहतं ६ अरिष्टं ७ अप्लं ८
उदश्वित् ९ मथितं १० इवः ॥
इतिराजनिर्घण्टः नस्यचविधं
तेषांभिन्नानिनामानिलक्षणा
निच यथा समरं निर्जलंघोलं
मथितं तु सरोदकं तत्रपादज
लं प्रोक्तमुदश्विदर्द्धवारिकं छ
च्छिका सरहीनस्यादच्छा मधुर
वारिका तेषांगुणाः वातपित्तह
रं घोलंमथितंकफपित्तनुत् न
त्रंग्राहि कषायाम्लं स्वादुपाकं
रसे लघु वीर्योष्णं दीपनंवृष्यं
प्रीणनं वातनाशनं ग्रहण्या
दिमतां पथ्यं भवेत्संग्राहि ला
घवात् किंचस्वादुविपाकित्वा
न्नचपित्तप्रकोपणं कषायोष्ण
विकाशित्वाद्रौक्ष्याच्चापि कफा
पहं नतत्रसेवी व्यथतेकदाचि
न्न तत्रदग्धाः प्रभवन्ति रोगाः
यथा सुराणाममृतं सुखाय
तथानराणां भुवि तत्रमाहुः
उदश्वित् कफकृद्बल्यं श्रमघ्नं
परमं मतं छच्छिकाशीतलाल
घ्वी पित्तश्रमतृषापहरी वातनुत्
कफकृत् सातुदीपनीलवणा

त्विना अथोद्धृत द्युतस्तोकोद्धृत
द्युतानुद्धृत द्युतानां तक्राणां गुणा
समुद्धृत द्युतं तक्रं पथ्यं लघु विशे
षतः स्तोकोद्धृतद्युतं तस्माद्गुरु
वृष्यं कफावहं अनुद्धृतद्युतं सान्द्रं
गुरु पुष्टिकफप्रदं अथ दोषविशे
षव्याधिविशेषच तक्रविशेषाः
वातेऽम्लं पास्यते तक्रं शुण्ठी सैन्ध
वसंयुतं पित्ते स्वादु सिता युक्तं
सव्योषमुष्णकं कफे हिङ्गुजीरयु
तं क्षोल्लं सैन्धवेन समन्वितं भवे
दतीववातनुदर्शोऽतीसारहृ
त्परं रुचिदं पुष्टिदं बल्यं वस्ति
शूलविनाशनं मूत्रकृच्छ्रे तु स
गुडं पाण्डुरोगे सचित्रकं अथाम
पक्वतक्रगुणाः तक्रमामं कफं
कोष्ठे हन्ति कण्ठे करोति च पीन
सश्वासकासादौ पक्वमेव प्रयु
ज्यते अथ तक्रसेवननिमित्ता
नि शीतकालेऽग्निमान्द्ये च त
था वातामयेषु च अरुचौ स्रो
तसां रोधे तक्रं स्यादमृतोपमं
तत्तु हन्ति गरच्छर्दिप्रसेक
विषमज्वरान् पाण्डुमेदोग्र
हण्यर्शो मूत्रग्रह भगन्द
रान् मेहं गुल्ममतीसारं शू
लप्लीहोदरारुची ॥ ॥

श्वित्रकोष्ठगतव्याधीन् कुष्ठशोथ
तृषाकृमीन् अथातक्रविषयाः नै
व तक्रं क्षते दद्यान्नोष्णकाले न दुर्ब
ले न मूर्च्छाभ्रमदाहेषु न रोगे र
क्तपैत्तिके अथ गव्यादीनां तक्रा
णां विशिष्टगुणाः यान्युक्तानि द
धीन्यष्टौ तद्गुणं तक्रमादिशेत्
इति भावप्रकाशः ॥
तक्रकूर्च्चिका स्त्री उष्णदुग्धे तक्र
योगेन जाता छाना इति भाषा
अस्या गुणाः मलवद्ध्वानका
रित्वं रूक्षत्वं दुर्जरत्वञ्च इति रा
जवल्लभः तक्रमांसः क्ली व्यं
जनविशेषः पचुनि इति पा
रस्यभाषा तस्य पाकप्रका
रो यथा पाकपात्रे घृतं दत्वा
हरिद्रा हिङ्गु भर्जयेत् छागा
देः सकलस्यापि खण्डान्यष्टौ
च भर्जयेत् सिद्धियोग्यं जलं
दत्वा पचेत्तदनन्तरं यथा रा
जिकादियुते तक्रे मांसखण्डानि
धारयेत् तस्य गुणाः तक्रमां
सं तु बलदं लघु रुच्यं वलप्र
दं कफघ्नं पित्तलं किञ्चित्
सर्व्वाहारस्य पाचनं इति भावप्रका
शः तक्राटः पुं मन्थानदण्डः
इति हारावली ॥

तग ऋ स्खलने कम्पे गतौ
इति कविकल्पद्रुमः ॥
तगरं क्ली नदीवृक्षः पिंडत
गर इति कोंकणप्रसिद्धः तग
रमूल इति ख्यातं तत्पर्य्यायः
कालानुशारिवा २ वक्रं ३ कुटि
लं ४ शठं ५ महोरगं ६ नतं ७
जिह्मं ८ दीपनं ९ नगरपादि
कं १० इति रत्नमाला विनम्रं ११
कुञ्चितं १२ षण्ढ १३ नहुषाख्य
१४ दण्डहस्ति १५ वर्हणं १६ पिण्डी
तगरकं १७ पार्थिवं १८ राजह
र्षणं १९ कालानुसारकं २०
क्षत्रं २१ दीनं २२ अस्य गुणाः
शीतलत्वं तिक्तत्वं दृष्टिदोष
विषार्त्तिभूतोन्माद भयनाशि
त्वं पथ्यत्वञ्च आकल्प वृक्षः
इति राजनिर्घण्टः तगरः पु
पुष्पवृक्षविशेषः टगर इति
भाषा तत्पर्य्यायः सितपुष्पः
२ कालपर्णः ३ कटुच्छदः ४
इति शब्दरत्नावली मदनवृ
क्षः इति राजनिर्घण्टः तगर
पादिकं क्ली तगरं इति रत्नमा
ला तंकं पु क्ली पाषाणदारणं
इत्यमरटीकायां रमानाथः प्रि

यविरहजस्तापः भयं इति लिङ्गादिसं
ग्रह टीकायां भरतः ॥
तज्जीस्त्री हिङ्गुपत्री इति राजनिर्घण्टः
तट उच्छ्राये इति कविकल्पद्रुमः
तट क आहतौ इति कविकल्पद्रु
मः ॥ तटं क्ली क्षेत्रं इति मेदि
नी तटः त्रि तीरं तड इति भाषा
इत्यमरः ॥
तटस्थं क्ली लक्षणविशेषः त
स्य स्वरूपं यथा तद्भिन्नत्वे सति त
द्बोधकत्वं तथाच स्वरूपं तटस्थं
द्विधा लक्षणं स्यात् स्वरूपस्य बो
धो यतो लक्षणाभ्यां स्वरूपे प्रवि
ष्टात् स्वरूपेऽप्रविष्टात् यथा का
कवन्तो गृहाः खं बिलञ्च इति वे
दान्तकारिका तटस्थितेत्रि ॥
तटाकः पुं तडागः पद्मादियु
क्तसरः इति शब्दरत्नावली ॥
तटिनी स्त्री नदी इत्यमरः ॥
तटी स्त्री तीरं इत्यमरः ॥
तड क त्विषि आहतौ इति
कविकल्पद्रुमः ॥
तड इ उ आहतौ इति कवि
कल्पद्रुमः ॥
तडगः पुं तडागः इति द्विरूप

कोषः ॥

तडाकः पुं तडागः इति शब्दरत्नावली ॥

तडाका स्त्री नदीसमुद्राणां तटभागः आघातः इति संक्षिप्तसारे उणादिवृत्तिः ॥

तडागः पुं क्ली जलकूटकः इति मेदिनी पद्मादियुक्तसरः तत्पर्य्यायः पद्माकरः २ इत्यमरः तडाकः ३ तटाकः ४ इति शब्दरत्नावली तडगः ५ इति द्विरूपकोषः पंचशत धनुः परिमाण जलाशयः चतुर्दिक्षु पंचचत्वारिंशद्धस्तान्न्यूनतायां सहस्रद्वितयहस्तान्न्यूनत्वेन तडागः इति नव्यवर्द्धमान धृतो वशिष्ठः तस्य जलगुणाः वातकारित्वं स्वादुत्वं कषायत्वं पाकेकटुत्वं शिशिरहिमकाले प्रशस्तत्वंच इति राजवल्लभः तस्योत्सर्गविधिर्यथा पुलस्त्य उवाच श्रृणु राजन्महाबाहो तडागादिषु यो विधिः पुराणेष्वितिहासेषु मत्स्येन राजसत्तम प्राप्यपक्षं समभ्यर्च्य आगते चोत्तरायणे पुण्येऽह्नि विप्रैः क्रियते॥ कृत्वा ब्राह्मणवाचनं प्राक्प्रस्रवणादंभस्तडागस्य समीपतः चतुर्हस्तसमावेदी चतुरस्रा समन्ततः तथा षोडशहस्तः स्यान्मण्डपश्च चतुर्मुखः वेद्याश्च परितो गर्त्ता रत्निमात्रास्त्रिमेखला नव सप्ताथवा पंच योनिवक्त्रा नृपात्मज वितस्तिमात्रा योनिः स्यात् षट्सप्ताङ्गुलविस्तृता सर्वे स्युर्हस्तमात्रास्तु त्रिपर्वोच्छ्रितमेखलाः सर्वेच सर्ववर्णाः स्युः पताकाध्वजसंयुताः अश्वत्थोडुम्बरप्लक्षवटशाखाकृतानिच मण्डपस्य प्रतिदिशं द्वाराण्येतानि कारयेत् शुभास्तत्राष्टहोतारो द्वारपालास्तथापरे अष्टौतु जापकाः कार्य्या ब्राह्मणा वेदपारगाः सर्वलक्षणसम्पूर्णा मंत्रविद्विजितेन्द्रियाः कुलशीलसमायुक्ताः स्थापिता द्विजसत्तमाः प्रतिगर्तेषु कलशा यज्ञोपकरणानिच व्यजनं चासनं शुभं ताम्रपात्रं सुविस्तरं आचार्य्यः प्रक्षिपेद्भूम्यामनुवेदं विचक्षणः अरत्निमात्रो यूपः स्यात् क्षीरिवृक्षविनिर्म्मितः यजमानप्रमाणोवा संस्थाप्यो भूतिमिच्छता हेमालंकारिणः कार्य्याः पंचविंशति

ऋत्विजः कुण्डलानिच हैमानि केयूरकटकानिच तथांगुलीपवित्राणि वासांसि विविधानिच दद्युः समानि सर्वेषामाचार्य्ये द्विगुणं पुनः दद्याच्छयनसंयुक्तमात्मनश्चापि यत् प्रियं सौवर्णौ कूर्ममकरौ राजतौ मत्स्यडुण्डुभौ ताम्रौ कुलीरमण्डूकावायसः शिशुमारकः एवमासाद्य तत्सर्वमादावेव विशाम्पते शुक्लमाल्याम्बरधरः शुक्लगन्धानुलेपनः सर्वौषध्युदकस्नानैः स्नापितो वेदपुङ्गवैः यजमानः सपत्नीकः पुत्रपौत्रसमन्वितः पश्चिमं द्वारमासाद्य प्रविशेद्यागमण्डपं ततो मंगलशब्देन भेरीणां निस्वनेनच रजसा मण्डलं कुर्य्यात् पंचवर्णेन चार्द्धिते षोडशारं ततश्चक्रं पद्मगर्भसुशोभनं वेद्यामुपरि तत्कृत्वा ग्रहान् ग्रहपतींस्तथा संन्यसेन्मन्त्रतः सर्वान् प्रतिदिक्षु विचक्षणः न्यात्रं स्थापयेन्मध्ये वारुणं मंत्रमाश्रितं ब्रह्माणंच । शिवं विष्णुं तत्रैव स्थापयेद्बुधः विनायकंच विन्यस्य कमलामम्बिकां ततः शान्त्यर्थं सर्वलोकानां भूतग्राममशेषतः पुष्पभक्ष्यफलैर्युक्तमेवं कृत्वाधिवासनं कुम्भांश्च रत्नगर्भांश्च वासोभिः परिवेष्टयेत् गन्धपुष्पैरलंकृत्य द्वारपालान् समन्ततः पठध्वमिति तान् ब्रूयादाचार्य्यमपि पूजयेत् बह्वृचौ पूर्वतः स्थाप्यौ दक्षिणेन यजुर्विदौ पश्चिमे सामगौ स्थाप्यावुत्तरेणाप्यथर्व्वगौ उदङ्मुखो दक्षिणतो यजमान उपाविशेत् यजध्वमिति तान् ब्रूयात् यजध्वमिति याजकं उत्कृष्टमंत्रपाठेन तिष्ठध्वं मंत्रजापकाः एवमादिश्य तान्सर्वान् पर्य्युक्ष्याग्निं स मंत्रवित् जुहुयाद्वारुणैर्मंत्रैराज्यं समिधस्तथा ऋत्विग्भिश्चैव होतव्यं वारुणैरेव सर्वतः वैराजं पौरुषं सूक्तं पौण्डुं चेन्द्रं सुसंहितं शैशवं पंचनिधनं गायन्ति ज्येष्ठसामगाः वामदेव्यं बृहत्साम रौरवं सरथन्तरं गवाव्रतं विकर्णंच रक्षोघ्नं नरथस्तथा गायन्ति सामगा राजन् पश्चिमं द्वारमाश्रिताः अथर्व्वगाश्चोत्तरतः शान्तिकं पौष्टिकं तथा जपेयुर्मनसा देवमाश्रिता वरुणं

मध्ये पूर्वैर्गुरभितोमंत्रैरेवंकृत्वा
धिवासने गजाश्व रथ्या वल्मीक
संग्रामरथ्य गोकुलात् स्वदमादा
यद्घाच्च प्रदिपेच्च यथा तथा
रोचनां च ससिद्धार्थान् गंधानगु
ग्गुलयेव चास्नपनं तस्य कर्तव्यं पं
चगव्यसमन्वितं मूर्द्धिकर्तर्म्महा
मंत्रैरेवंकृत्वाविधानतः पवेरत्
निराज्यार्थान् विधियुक्तेन कर्म्मणा
ततः प्रभाते विमले संजाते तग
वांशतं ब्राह्मणेभ्यः प्रदातव्यं
होमान्तेवाष्यवापुनः पंचाशद्वा
प्यषट्त्रिंशात् पंचविंशतिरेवच
ततः संवत्सरे प्रामे मुहेलयेस्त
प्रोभने वेदशाहेस्त्रगांधर्वैर्वीथ्यै
स्वविविधैः पुनः कनकालंकृ
तां कृत्वाजले गामवतारयेत् ॥
सामगाय च सा देया ब्राह्मणा
यविप्रापते पात्री मादायसौ
वर्णी पंचरत्न समन्वितां तत्र
निःक्षिप्यमकरं मत्स्यादींश्चेव
सर्वशः धृतो स्नातुर्भि विप्रैश्च
वेद वेदांग पारगैः महानदीज
लोपेतान् दध्यक्षत विभूषिता
न् उत्तराभिमुखो युक्तो जल
मध्ये प्रकालयेत् आथर्वणेन
स्नात्र तः पुनर्मासां स्तथैव च
आपोहिष्ठेतिमंत्रेण क्षपेदाग
त्यमंडपं पूजयित्वा सदा स्तत्र
बलिंदद्यात् समन्वितः पुन र्हि
निहोतव्यं चत्वारि राजसत्तम ॥
चतुर्थीकर्मकर्तव्यं देयं तत्राधि
पाकितः कृत्वा तु यज्ञपात्राणि
यज्ञोपकरणानि च ऋत्विग्भ्य
स्तु समं दद्यात् मंडपं विभजेत् पुनः
होमपात्रं च शय्यां च आचार्याय
निवेदयेत् ततः सहस्रं विप्राणा
मथवा स्पशतं तथा भोजयेच्च
यथाशक्त्या पंचाशद्वाथ विंशतिः
एवमेव पुराणेषु तडागविधिरु
च्यते कूप वापीषु सर्वासु तथापु
ष्करिणीषु च एष एव विधिर्दृष्टः
प्रतिष्ठासु तथैव च मंत्रतस्तु विशे
यः स्यात् प्रासादोद्यानभूमिषु अ
यन्तु ऋत्विगाचार्यविधि दृष्टेन तु क
र्म्मणा अल्पेष्वेकाग्नि वत्कार्यं।
विनश्याद्याहतेन्द्रणा ॥ ॥
तडागे कालविशेषे जलस्थितेः
फलं यथा प्रावृट् काले स्थितं
तोयं मग्निष्टोम समं स्मृतं
शरत्काले स्थितं तोयं यडुक्त
फलदायकं वाजपेय फल समं

हेमन्त शिशिर स्थितं अश्वमेध स
मं प्राक्त वसन्त समव स्थितं ग्री
ष्मेपि त स्थितं तोयं राजसूयफला
धिकं तडाग करणेफलं यथा प
तान्महाराज विशेषधर्मान् करो
ति योर्चा तत्र शुद्धबुद्धिः सयाति
ब्रह्मालय मेककल्पं दिवं पुन र्याति
तथैव दिव्यं इतिपाद्मे स्रष्टिखण्डं
तडागानः पु उर्द्धीकृतमहस्तिशुण्ड
ज्ञातः यथा उच्चैः करिकरोदेये
तडागानं विरुद्धधाः इतिकुमार
संभवटीका ॥
तडित् स्त्री विद्युत् इत्यमरः ॥
तडित्वान् पुं मेघः मुस्तके इत्य
मरः ॥
तण्डकः पुं खंजनपक्षी फेनः
समास प्राय वाक् गृहदारु ॥
तरुस्कंधः माया बकुलके त्रि इ
ति मेदिनी ॥
तण्डकः पुं क्ली परिष्कारः इति
लिंगादिसंग्रहेऽमरः ॥
तण्डुः पुं शिवद्वारपालविशेषः
इतिहलायुधः ॥
तण्डुरीणः पुं कीटमात्रं तण्डु
लोदकं बर्बरे त्रि इति मेदिनी
तण्डुलः पुं विडङ्ग इति मेदिनी
तण्डुलीयशाकं इतिशब्दरत्नाव
ली धान्यादिनिकरः चाउल इतिभा
षा इतिमेदिनी भृष्ट तण्डुलगु
णाः सुगंधित्वं कफनाशित्वं तृ
ष्णात्व पित्तकारित्वं च इतिराजव
ल्लभः तण्डुला स्त्री महासमं
गा विडंगं इतिराजनिर्घण्टः
तण्डुलाम्बु क्ली तण्डुलोदकं चे
लनि इति भाषा तत्पर्य्यायः
ज्येष्ठाम्बु २ इति वैद्यक परिभाषा
तण्डुलोत्थं २ इतिराजनिर्घण्टः
तण्डुली स्त्री यवतिक्ता लता
शाशाण्डुलीकर्कटी ॥ तण्डुली
शाकः इतिराजनिर्घण्टः
तण्डुलीकः पुं तण्डुलीयशाकः
इतिशब्दरत्नावली ॥
तण्डुलीयः पुं पत्रशाकविशेषः
लुडियानटे इति चांपानटे इतिच
भाषा तत्पर्य्यायः अल्पमारिषः
२ इत्यमरः तण्डुलीकः ३ तण्डु
लः ४ इति शब्दरत्नावली मेघ
रः ५ तण्डुली ६ तण्डुलीयकः ७
ग्रंथिलः ८ वज्रवीर्य्यः ९ मेघ
नादः १० घनस्वनः ११ स्तशाकः १२
पथ्यशाकः १३ स्फूर्जथुः १४
स्वनिताह्वयः १५ वीरः १६ ॥

तण्डुलनामा ८ अस्य गुणाः शि
शिरत्वं मधुरत्वं विष पित्त दाह
श्रमनाशित्वं रुचिकारित्वं दीप
नत्वं पथ्यत्वंच तद्दलगुणाः॥
हिमत्वं स्पर्शः पित्त रक्त विष
कास विनाशित्वं ग्राहकत्वं।
मधुरत्वं विपाके दाह शोष
शामनत्वं रुचिदातृत्वंच इति
राजनिर्घण्टः विडङ्गे तण्ड इ
तिमेदिनी ॥
तण्डुलीयकः पुं तण्डुलीय
शाकः विडङ्ग इतिराजनिर्घ
तण्डुलीयिका स्त्री विडङ्ग इति
राजनिर्घण्टः ॥
तण्डुलुः स्त्री विडङ्ग इतिशब्द
रत्नावली ॥
तण्डुलेरः पुं तण्डुलीयशाकः
इतिहेमचंद्रः ॥
तण्डुलोत्था स्त्री तण्डूलाम्बु इ
ति राजनिर्घण्टः
तण्डूलोदकं क्ली तण्डूलाम्बु।
यथा जल मष्टगुणं दत्वा पलं
कण्डिततण्डुलात् भावयित्वात
तो देयं तण्डुलोदककर्मणि इति
वैद्यकपरिभाषा ॥
तण्डुलौघः पुं वेणुवंशः वेउरवांश
इतिभाषा इतिशब्दचंद्रिका ॥
तण्डुलसमूहश्च ॥
तत् व्य हेतुः इत्यमरः ॥ तत्
त्रि बुद्धिस्थपरामर्शः सेइ
इतिभाषा सर्वनाम शब्दोऽयं
इति व्याकरणं ॥
ततं क्ली वीणादिवाद्यं इत्यमरः
ततः त्रि विस्तृतः व्याप्तः वायो
पुं इतिमेदिनी ॥
ततः व्य हेतुः इत्यमरः आदिः प
रिप्रश्नः पंचम्यर्थः कथान्तरं ॥
आनन्तर्य्यं इतिविश्वः ॥
ततपत्री स्त्री कदलीवृक्षः इति
शब्दचंद्रिका ॥
ततमः त्रि बहूनांमध्येसः अने
केरमध्येसेइ इति भाषा तच्छ
ब्दात् डतम प्रत्ययेनसाधुः इ
तिव्याकरणं ॥
ततरः त्रि द्वयोर्मध्ये सः उयेर
मध्ये सेइ इति भाषा तच्छब्दा
त् डतर प्रत्ययेन निष्पन्नः इति
व्याकरणं ॥
ततस्त्य त्रि ततस्संबंधि तार इति
भाषा ततस् शब्दात् त्यप् प्रत्य
येन निष्पन्नं इतिव्याकरणं त
तिः स्त्री श्रेणी इति हेमचंद्रः

तति त्रि तत्परिमाणं ततगुलि
इति भाषा बहुवचनान्तोऽयं इ
तिव्याकरणं ॥
तत्कालः पुं वर्त्तमानकालः तत्
पर्यायः तदात्वं २ इत्यमरः ॥
तत्कालधीः त्रि प्रत्युत्पन्नमतिः
उपस्थितबुद्धिः इतिहेमचंद्रः ॥
तत्क्रियः त्रि कर्मकारः वेतनं
विनाभारवहादिकर्त्ता इत्यमरः
तत्वं क्ली तत्वं इत्यमरः ॥
तत्परः त्रि आसक्तः इत्यमरः
तत्परायणः त्रि तदासक्तः य
था शुद्धाभवन्तियथान्येऽग्रजाः
कृष्णपरायणाः इति पद्मोत्तरखं
डे तत्फलः पुं कुवलयं कुष्ठना
मौषधिः चौरनामसुगंधिद्रव्यं इ
ति धरणिः ॥
तत्र इ उ क धारणे इतिकवि
कल्पद्रुमः धारणं धरणं भाषा
यामस्य विस्तारणे प्रायः प्रयोगः
केचित्तु तत्रि धातुः कुटुम्बधारणे
वर्त्ततेइत्याहुः इतितट्टीकायां दु
र्गादासः ॥
तत्र व्य तस्मिन् तयोः तेषु से
खानेइतिभाषा इतिव्याकरणं
तत्रत्यः त्रि तत्रभवः तस्मिन्नुत्पन्नः
इति मुग्धबोधव्याकरणं ॥
तत्रभवान् त्रि श्लाघ्यः इतिजटा
धरः तत्वं क्ली स्वरूपं परमात्मा
विलंबितनृत्यं इति मेदिनी ॥
वाद्यप्रभेदः इति विश्वः वस्तु
इतित्रिकाण्डशेषः चेतः इति
धरणिः चतुर्विंशतितत्वानिय
था क्षितिः १ आपः २ तेजः ३ म
रुत् ४ व्योम ५ गंधः ६ रसः ७
रूपं ८ स्पर्शः ९ शब्दः १० नेत्रं ११ ना
सिका १२ जिह्वा १३ कर्णः १४ त्वक् १५
हस्तः १६ पादः १७ मुखं १८ पायुः १९
लिंगं २० प्रकृतिः २१ मनः २२ बु
द्धिः २३ अहंकारः २४ इतिपु
राणान्तरे तत्र नाना मुनिभिर्ना
नाविधमुक्तं तत्रत्रीणितत्वानि
यथा सत्वं १ रजः २ तमः ३ च
तुर्विधानि यथा तेजः १ आपः २
पृथ्वी ३ आत्मा ४ पंचविधानि
यथा शब्दः १ स्पर्शः २ रसः ३
गंधः ४ रूपं ५ षड्विधानि यथा
क्षितिः १ आपः २ तेजः ३ सप्त
विधानि यथा क्षितिः १ आ
पः २ तेजः ३ वायुः ४ आ
काशं ५ जीवः ६ आत्मा ७
नवविधानियथा पुरुषः १

प्रकृतिः २ महत्तत्वः ३ अहं
कारः ४ नभः ५ वायुः ६ ज्योतिः
७ आपः ८ क्षितिः ९ एकादश
विधानि यथा श्रोत्रं १ त्वक् २ चक्षुः
३ घ्राणं ४ जिह्वा ५ वाक् ६ पाणिः
७ उपस्थः ८ पायुः ९ अंघ्रिः १०
मनः ११ त्रयोदशविधानि यथा
नभः १ वायुः २ ज्योतिः ३ आपः
४ क्षितिः ५ श्रोत्रं ६ त्वक् ७ च
क्षुः ८ घ्राणं ९ जिह्वा १० मनः ११
जीवात्मा १२ परमात्मा १३ षोडश
विधानि यथा नभः १ वायुः २ ज्यो
तिः ३ आपः ४ पृथ्वी ५ शब्द ६ स्प
र्श ७ रूप ८ रसः ९ गंधः १० श्रो
त्रं ११ त्वक् १२ चक्षुः १३ जिह्वा १४
घ्राणं १५ मनः १६ सप्तदशविधा
नि यथा पूर्वोक्तानि षोडश
१६ आत्मा १७ पंचविंशति तत्वानि
यथा पूर्वोक्तानि सप्तदश १७
पुरुषः १८ प्रकृतिः १९ महान्
२० अहंकारः २१ मुखं २२ पाणिः
२३ उपस्थः २४ पायुः २५ षड्विं
षड्विंशतिविधानि यथा पूर्वो
क्तानि पंचविंशतिः २५ जीवः
२६ सप्तविंशतिविधानि यथा
पूर्वोक्तानि षड्विंशतिः २६ ईश्व
रः २७ इति श्रीभागवतं ॥

तत्वज्ञानं क्ली बुद्धिगुणविशेषः
तत्वब्रह्मज्ञानं इति हेमचंद्रः य
था प्रमाण प्रमेय संशय प्रयोज
न दृष्टान्त सिद्धान्तावयव तर्क नि
र्णय वाद जल्प वितण्डा हेत्वाभा
स छल जाति निग्रह स्थानानां षो
डशपदार्थानां तत्वज्ञानान्निःश्रेय
साधिगमः इति गोतमसूत्रं ॥
तत्वन्यासः पुं विष्णुपूजा विषय
कंन्यासविशेषः यथा मातृका
नानथार्णांश्च जीवाद्येकैकशो
वदेत् नमः परायेत्युच्चार्य्य तत
त्वात्मने नमः जीवं प्राणं हृदये
प्रोक्ता सर्वांगेषु प्रविन्यसेत् ततो
हृदयमध्ये च तत्व त्रयं च विन्य
सेत् इत्यञ्जलीकृतं तेनु विद
धीत तत्वन्यासं मपूर्वक परात्
तत्परौ भूयः परायच तदाक्
यमात्मने च नमऽत्रमुद्धरेत् त
तत्वमनुक्रमेण सकलं वपुषि
जीवं प्राणमाधोज्य मध्ये न्यसेत्
मतिमहंकारे मनश्चेति मंत्री क
मुखेऽन्त्ययुजो स्त्रिः षधो शब्द पूर्वं
गुणगणमथ कर्णादिस्थितं श्रोत्र
पूर्वं वागादीद्रियः वर्ग मात्मानि
लयेत् आकाश पूर्वगणं मस्तीसेण
दयेशिरे चरणयो हृत् पुण्डरीके

हृदि शंबीजेहृत् पुण्डरीकत
त्वं हृदि प्रविन्यसेत् हंबीजं सू
र्य्यमण्डलतत्वं हृदि प्रविन्यसेत्
संबीजं चंद्रमण्डल तत्वं तत्र प्र
विन्यसेत् रंबीजं वह्नि मण्डल
तत्वं तत्रैव विन्यसेत् षंबीजं प
रमेष्ठितत्वं वासुदेवं च मूर्द्धनि
यंबीजं मथ पुंस्तत्व संकर्षण
मप्यो मुखे लंबीजं विश्वतत्वं च
प्रद्युम्नं च हृदि न्यसेत् वंबीजं नि
वृत्तितत्वं चानिरुद्धमुपस्थके
लंबीजं सर्वतत्वं च पादे नारायणं
न्यसेत् क्ष्रौंबीजं कोपतत्वं चन्द्रसिं
हं सर्वगात्रके एवं तत्वानि विन्य
स्य प्राणायामं समाचरेत् अ
स्य फलं यथा तत्वन्यासं ततः
कुर्यात् साधकः सिद्धिहेतवे
कृतेन येन देवस्य रूपता मेव
यात्यसौ इति गोतमीय तंत्रं ॥
तथाबसा स्य इत्यमरः
तत् दानं पुं सत्यः इत्यमरः
अभ्युपगमः इष्टप्रतिवाक्यं ॥
समुच्चयः निश्चयः इति मेदिनी।
तथाच अव्य पूर्वोक्तार्थदृष्टीक
रणं इति संक्षिप्तसार व्याक
रणं ॥ ॥

तथागतः पुं बुद्धः इत्यमरः
पूर्वोक्तप्रकारेणागतेति ॥
तथैव अव्य तद्वदेव सेइ प्रका
र इति भाषा यथा अस्ति पु
त्रो वशे यस्य भार्या भर्त्ता स
थैव च इति चाणक्यः ॥
तथ्यं क्ली सत्यं तद्वति त्रि इत्य
मरः तद त्रि तत् इति व्याकर
णं तदा अव्य तस्मिन् काले सेइ
समये इति भाषा इत्यमरः ॥
तदात्वं क्ली तत्कालः वर्त्तमा
नकालः इत्यमरः ॥
तदानीं अव्य तस्मिन्काले इत्य
मरः तदामुखं क्ली आरंभः
इति भूरि प्रयोगः ॥
तद्दिनं अव्य दिनमध्ये प्रतिदिनं
इति हेमचंद्रः पूर्वोक्तदिने क्ली
तद्धमः त्रि कृपणः इति हेम
चंद्रः तद्वला स्त्री वाणवि
शेषः इति हेमचंद्रः ॥
तद्द इ स्वादे ॥ मोदे सोत्र
धात्वयं इति कविकल्पद्रु
मः तन द उ म विस्तृतौ
इति कविकल्पद्रुमः ॥
तन कि उपकृतौ श्रद्धायां ।
आघाते शब्दे उपतापे ॥ उप

सर्गाहैर्च्छे इतिकविकल्पद्रुमः
तन्व उ इं गतौ इति कवि
कल्पद्रुमः ॥
तन्व उ य संकोचे इतिकविक
ल्पद्रुमः ॥
तन्व उ य संकोचे इति कवि
कल्पद्रुमः ॥
तनयः त्रि पुत्रः इत्यमरः ॥
तनया स्त्री कन्या इत्यमरः
चक्रकल्पलता इतिशब्दचंद्रि
का तनिष्ठः त्रि अयमनयो
रतिशयेन तनुः ह्रस्वः इतिव्या
करणं तनीयान् स त्रि अय
मेषामतिशयेन तनुः अल्पः
इति व्याकरणं ॥
तनुः स क्ली शरीरं इत्युणादि
कोषः तनुः स्त्री शरीरं त्वक्
इतिमेदिनी स्त्री इतिराजनिर्घ
टः तनुः त्रि अल्पः विरलः कृ
शः इतिमेदिनी ॥
तनुच्छायः पुं जालवर्बुरक
वृक्षः इतिराजनिर्घण्टः ॥
शरीरच्छायायोः क्ली स्त्री च तनुजः
पुं पुत्रः इतिहलायुधः तनुजा
स्त्री कन्या इतिशब्दरत्नावली ॥
तनुत्रं क्ली वर्म्म इत्यमरः तनु
त्राणं क्ली तनुत्रं इतिहलायुधः श
रीरं रक्षणंच ॥

तनुत्वचा स्त्री लघ्वग्निमन्थः इति
राजनिर्घण्टः ॥
तनुपत्रः पुं इङ्गुदीवृक्षः । इति
राजनिर्घण्टः
तनुभस्त्रा स्त्री नासिका इति श
ब्दरत्नावली ॥
तनुरसः पुं घर्म्मः इतिहारावली
तनुरुह क्ली तनुरुहं इतिशब्द
रत्नावली ॥
तनुरुहं क्ली तनुरुहं इतिशब्द
रत्नावली ॥
तनुलः त्रि विस्तृतः इति संक्षिप्त
सारे उणादिवृत्तिः ॥
तनुवातः पुं नरकविशेषः इ
तिहेमचंद्रः ॥
तनुवीजः पुं राजवदरः इतिराज
निर्घण्टः ॥
तनुव्रणः पुं वाल्मीकरोगः इ
तिशब्दरत्नावली ॥
तनुसंचारिणी स्त्री बालिकास्त्री
इतिशब्दमाला ॥
तनुक्षीरः पुं आम्रातकः इति
राजनिर्घण्टः ॥
तनूः स्त्री शरीरं इत्यमरः ॥
तनूकृतः त्रि तष्टः अल्पीकृतः
इत्यमरः ॥ ॥ ॥

तनूजः पुं स्त्री पुत्रः इतिजटाध
रः तनूनपं क्ली घृतं इतिशब्दचं
द्रिका तनूनपात् ह पुं अग्निः चि
त्रकवृक्षः इत्यमरः ॥
तनूरुहं क्ली रोम पतत्रं इति
मेदिनी ॥
तनूरुहः पुं पुत्रः गरुत् लो
म इतिहेमचंद्रः ॥
तनूरुदः पुं पायुः इतित्रिका
ण्डशेषः ॥
तन्तुः पुं सूत्रं इत्यमरः ग्राहः
इतिहेमचंद्रः सन्ततिः यथा
अन्तःस्थः सर्वभूतानामात्मा
योगेश्वरो हरिः स्वमायया ।
सृणोत्कर्मवैराग्याः ऊरुतन्त
वे इतिश्रीभागवते ॥
तन्तकः पुं तन्तुभः सर्षपः
इत्यमरटीकायां रमानाथः ॥
तन्तकाष्टं क्ली तूली भाँतेर
काठ इति भाषा इतिशब्दर
त्नावली ॥ तन्तकी स्त्री नाडी
इतिराजनिर्घण्टः तन्तकीटः पुं
कोषकारः गुटिपोका इतिभाषा
इतिजटाधरः तन्तुणः पुं ग्राहः
हांगर इतिभाषा इतिहेमचंद्रः
तन्तुपर्व्व क्ली परमेश्वरोपवीतिदानं त्यमरः ॥

तिथिः साश्रावणी पूर्णिमा इति
तिथ्यादितत्वं ॥
तन्तुनागः पुं ग्राहः इति हेमचंद्रः
तन्तुनिर्यासः पुं तालः इति श
ब्दरत्नावली ॥
तन्तुभः पुं सर्षपः इत्यमरः ॥
वत्सः इतिजटाधरः ॥
तन्तुरं क्ली मृणालं इतिशब्दरत्ना
वली ॥
तन्तुलं क्ली मृणालं इतिहेमचं
द्रः तन्तुवापः पुं तन्तुवायः भाँति
इतिभाषा इतिजटाधरः तन्त्रं ॥
भाँत इति भाषा इति शब्द ॥
माला ॥
तन्तुवायः पुं लूता इत्यमरः ॥
तंतुवायः इतिशब्दरत्नावली
तन्तुविग्रहा स्त्री कदली इतित्रि
काण्डशेषः ॥
तन्तुशाला स्त्री तन्तुवपनगृहं
भाँत घर इति भाषा तत्पर्य्यायः
गर्त्तिका २ इतिहेमचंद्रः ॥
तन्तुसन्तत त्रि सूत्रविस्तृतव
स्त्रादि सिंगानकापाड इति
भाषा तत् पर्य्यायः ॥
ऊतं २ स्यूतं ३ उतं ४ इ
॥

तंत्रसारः पुं गुवाकवृक्षः इति
त्रिकाण्डशेषः ॥
तंत्र क्ली कुटुम्बकृत्यं सिद्धान्तः ॥
औषधिः प्रधानं तंत्रवायः ॥
परिच्छदः श्रुतिशाखाविशेषः
हेतुः उभयार्थप्रयोजकं इति
कर्त्तव्यता इति मेदिनी राष्ट्र
परच्छंदः करणं अर्थसाधकः
तंतुः सैन्यं स्वराष्ट्रचिन्ता इति
हेमचंद्रः ॥
प्रबंधः इतिशब्दरत्नावली शपथः
इति धरणी धनं गृहं वप
नसाधनं कुलं इतिनानार्थध्व
निमंजरी शास्त्रविशेषः तत्रागम
मस्यलक्षणं यथा सृष्टिश्चप्रल
यश्चैवदेवतानांयथार्च्चनं साध
नंचैवसर्वेषांपुरश्चरणमेवच ष
ट्कर्म्मसाधनंचैव ध्यानयोग ॥
श्चतुर्विधः सप्तभिर्लक्षणैर्युक्त
मागमंतद्विदुर्बुधाः यामलस्य
लक्षणंसृष्टिश्चज्योतिषाख्या
नंनित्यकृत्यप्रदीपनं क्रमसूत्रं
वर्णभेदोजातिभेद स्तथैवच यु
गधर्म्मश्चसंख्यातो यामलस्याष्ट
लक्षणं तंत्रस्यलक्षणं सर्गश्च
प्रतिसर्गश्चमंत्रनिर्णयएवच देवता

नांच संस्थानंतीर्थानांचैव वर्ण
नं तथैवाश्रमधर्मश्च विप्रसं
स्थानमेवच संस्थानंचैव भूता
नांयंत्राणांचैव निर्णयः उत्प
त्तिर्विबुधानांच तरूणां कल्पसं
ज्ञितं संस्थानं ज्योतिषांचैव पु
राणाख्यानमेवच कोषस्यक
थनंचैव व्रतानां परिभाषणं शौ
चाशौचस्य चाख्यानं नरका
णांच वर्णनं हरचक्रस्य चाख्या
नं स्त्रीपुंसोश्चैव लक्षणं राजध
र्मो दानधर्म्मो युगधर्म्मस्तथै
वच व्यवहारः कथ्यतेच तथा
चाध्यात्मवर्णनं इत्यादि लक्ष
णैर्युक्तं तंत्रमित्यभिधीयते त
समाहात्म्यं विसर्ग्गविशेषेदेवानां
ह्रदानामुदधिस्तथा नदीनांचय
थागंगापर्वतानांहिमालयः अ
श्वत्थःसर्ववृक्षाणां राज्ञामिंद्रो य
थावरः देवीनांचयथादुर्गा व
र्णानांब्राह्मणो यथा तथा स
मस्तशास्त्राणां तंत्र शास्त्र मनु
त्तमं सर्वकामप्रदंपुण्यंतंत्रंवैवे
दसंमितं कीर्त्तनं देवदेवस्यह
रस्य मत मेवच पावनं श्रद्धया
नानामिह लोकेपरत्रच ॥ ।

तस्य श्लोकसंख्या यथा तत्राका
विस्तराद्वक्तुं नपि वर्ष शतैरपि ॥
संक्षेपाद्धि प्रवक्ष्यामि लोककल्या
ण वर्त्मना दिवि देवेनवल
द पाताले ब्रह्मशासने ॥ लं
क्षमात्रं भारतेवदितो तंत्राणिया
नि च आगमेत्रिविधंप्रोक्तं च
तुर्थमेश्वरंस्मृतं कल्पश्चतुर्विधः
प्रोक्त आगमो डामरस्तथा याम
लश्चतथातंत्रं तेषां भेदाः पृथ
क्पृथक् मुक्तकाख्यप्रपंचश्च
सारदाख्यश्च नारदः महार्णव
श्च कपिलो योगः कल्पः क
पिंजलः अस्तत्पदिवीरश्च
सिद्धसम्बरणस्तथा प्रथनोष्ट
सहस्रंतुश्लोकादशप्रकीर्त्ति
ताः द्वितीयोमुक्तकस्तत्रषट्सह
स्राणिसंख्यया श्लोकाः शताद्ध
संख्यातास्तृतीय द्विसहस्रकः
शतद्वयंसाधिकंचश्लोकानांपंच
विंशतिः विंशोत्तरसहस्राणिश्लो
कानांभानुसंख्यया प्रपंच प्रथ
मेतंत्रे द्वितीये वसुसंख्यया स
हस्राणि तथा श्लोका सप्तविंश
शतिसंख्यया भूतनेत्रसहस्रा
णि तृतीयेपंचसहस्रकं प्रानत्र
य

पड्.क्तिश्लोकाः प्रपंचः कथित
स्त्रिधा कलासंख्यासहस्राणिशा
रदायाःप्रकीर्त्तिताः पंचविंशाधि
काःश्लोका वसुश्लोकाश्च नार
दः विंशतिश्चसहस्राणि षट्
सहस्राणिसंख्यया वसुश्लोका
श्च कथिताः कपिलः श्लोकसंख्या
या त्रयोदशसहस्राणिकालान
रशतत्रयं श्लोकसंख्या समुद्दिष्टायो
गे कल्पेचसंख्यया बाणसंख्या
सहस्राणिश्लोका नवभिःकीर्त्ति
ताः श्लोकानामत्र सहस्राणि अ
ष्टाविंशतिसंख्यया श्लोकाश्चभा
नुसंख्यातास्तत्रैपिचकपिंजले
अस्तत्पष्ठौसहस्राणि पंचश्लो
काधिकानिच पंचैव कथितानि तत्र
संख्यातानियथार्थतः वीरभामे
षडधिकानिशतानि परिसंख्यया
सहस्राणिचत्वारि श्लोकानां
तयथार्थतः पंचाधिक सहस्रा
णिश्लोकानामत्रसंख्यया सि
द्धसंवरणेक्तानिपंचश्रेण य
थापुरा डामरः षड्विधोज्ञेयः
प्रथमो योगडामरः श्लोकास्त
त्र तयस्त्रिंशत तथा पंचशतानिच
त्रिविंशति सहस्राणि श्लोकानि
चेहसंख्यया एकादशसहस्राणि

संख्याताः शिवडामरे श्लोकाः सप्तैवनिश्चितर्द्धस्वरेणैवभाषिताः तावत् श्लोक सहस्राणि पंचश्लोक शतानिच गुणेनराणिउर्गाया डामरे कथितानिच नवश्लोक सहस्राणि नव श्लोक शतानिच सारस्वते तथा श्लोकाः पंचैवपरिकीर्त्तिताः स्वर संख्या सहस्राणि श्लोकानां वल्लडामरे पंचोत्तर शतान्यत्र संख्यातानि शिवेनतु षष्टिः श्लोक सहस्राणि गंधर्व डामरे तंत्रे श्लोकाश्च षष्टिसंख्याताब्रह्मणाव्यक्तयोनिना यामलाः षट्वसंख्यातास्तत्रादावादियामले द्वात्रिंशच्च सहस्राणित्रयस्त्रिंशच्छतानिच द्वितीयेब्रह्मसंज्ञे तु द्वाविंशतिश्च संख्यया सहस्राणि शतान्यत्र तान्येवकथितानिच तावत् संख्या सहस्राणि शतानि परिसंख्यया विंशतिश्च तथा संख्या श्लोकाश्चविष्णुयामले कालसंख्यासहस्राणिवेदसंख्या शतानिच पंचषष्टिस्तथाश्लोकाकनिष्ठे रुद्रयामले नवश्लोक सहस्राणि त्रयोदशशतानिच द्वाविशति स्तथा श्लोका ॥ ॥

गणेश यामलेतंत्रे रविसंख्या सहस्राणि आदित्याख्येतु यामले तंत्रेनीलपताकायांसहस्राणि च पंचच पंचविंशति श्लोकाश्च कथिता वामकेश्वरे त्रयोदश सहस्राणि द्वेशतेविंशतिस्तथा श्लोकामृत्युंजये तंत्रे संख्यातास्तत्ववेदिभिः गजसंख्यासहस्राणि त्रीणिसंख्याशतानिच सप्तश्लोकास्तथैवात्र तंत्रयोगार्णवेतंत्रे । दशश्लोक सहस्राणि तावन्त्येव यथार्थतः प्रकीर्त्तिताः पंचश्लोक सहस्राणि तावन्त्येव शतानिच शतार्द्ध संख्यया श्लोका दक्षिणामूर्त्ति तंत्रके दशश्लोकसहस्राणि तावन्त्येव शतानिच त्रयोदशतथाश्लोकाःकालिकाख्येच तंत्रके कामेश्वर्यास्तंत्रवरेसहस्राणित्रयंमहत् श्लोकानांसंख्ययाचात्रतत्रराजेच संख्यया नवश्लोकसहस्राणि नवश्लोक शतानि च ॥ द्वाविंशति सहस्राणि हरगौर्याख्यतंत्रके तथाच विंशतिः श्लोकास्तंत्रेस्मिन् परिकीर्त्तिताः अर्कसंख्या सहस्राणि द्वितीये तंत्र वेदिभिः ॥ ॥

अष्टाविंशतिश्च श्लोकाः संख्यातास्तत्रनिर्णये कुब्जिकाख्यमहातंत्रे श्लोकाश्चदशसंख्यया सहस्राणि तथासप्त संख्यातानि मनीषिभिः द्वितीये षट्सहस्राणितदर्द्धंच कनिष्ठके अर्क संख्या सहस्राणि तथांकुशशतानिच तावद्देव्यामहातंत्रे संख्यातानिद्विजोत्तमैः द्वाविंशति सहस्राणि द्वाविंशति शतानिच कात्यायन्यास्तंत्रसंख्यातानिमनीषिभिः वसु श्लोक सहस्राणि तावन्त्येव शतानिच प्रत्यंगिरायास्तंत्रेचनिश्चितानियथार्थतः भूतसंख्यासहस्राणि तथादि तत्त्वशतानिच महालक्ष्म्या स्तंत्रराजे पंच श्लोका प्रकीर्त्तिताः गज संख्या सहस्राणिश्लोकाश्चरत्नसंख्यया त्रिपुरार्णवेमहातंत्रेलिखिताः परमर्षिभिः सरस्वत्याः सहस्रे द्वे द्वे शतेसंख्यया स्मृते पंच श्लोकास्तथैवात्रविज्ञातव्याद्विजातिभिः द्वाविंशति सहस्राणि आद्यतंत्रे तमोत्तरे अङ्क संख्या शतान्यत्र श्लोकाः पंचदशैव तु द्वा। विंशति सहस्राणि तथा वाण

शतानिच द्वात्रिंशच्च तथाश्लोका योगिन्या स्तंत्रराजके द्वितीये षट्सहस्राणितथाचत्रिशतानिच त्रयः श्लोकास्तथैवात्रवाराह्यास्तंत्रउत्तमे ऊर्म्मि संख्यासहस्राणितत्वसंख्या शतानि च गवाद्ये तंत्रराजेस्मिन् श्लोका द्वितत्संख्यया वर्ण संख्या सहस्राणि द्वेशते परिनिश्चिते श्लोकास्वयश्च संख्याता स्तंत्रे नारायणीयके वेद संख्या सहस्राणितान्येवचशतानिच श्लोकानवति संख्याता मृडानी तंत्रराजके ॥ तृतीये त्रि सहस्राणि त्रि शतानि कनिष्ठके त्रिंशत् श्लोकाश्चसंख्याता ज्ञातव्या स्तंत्रवेदिभिः उपतंत्राणियथा संदेशेक्तान्यपतंत्राणिकापिलोक्तानियानिच अत्रतानिचपतानिजैमिन्युक्तानिषानिच वशिष्ठः कपिलश्चैव नारदो गर्ग एवच पुलस्त्यो भार्गवः सिद्धो याज्ञवल्क्यो भृगु स्तथा शुक्रो बृहस्पतिश्चैवअन्येयेमुनिसत्तमाः एभिः प्रणीतान्यन्यानि उपतंत्राणि यानि च नसंख्यातानि तान्यत्र धर्मविद्भि

र्महात्मभिः सारा त्सारतराण्येव
संख्यातानि निबोधत इति वा
राहीतन्त्रं ॥ ॥
तन्त्रकं क्ली नूतनवस्त्रं इत्यमरः
तन्त्रकाष्ठं तन्त्रवायस्यतरी इति
त्रिकाण्डशेषः ॥
तन्त्रता स्त्री अनेकमुद्दिश्यएस
कृत्प्रवृत्तिः यथा आग्नेयाष्टाक
पालैन्द्रदध्यैन्द्रपयोयागानां त्रया
णांआग्नेयाष्टाकपालोपांशुया
यागाग्नीसोमीयैकादशाकपाल
यागानांत्रयाणां सकृत्सकृदनुष्ठि
तेन प्रयाजाद्यंगेनोपकारः सिध्य
ति तथानानाब्रह्मवध सत्वे स
वेदि .... सकृत्प्रायश्चित्ते कृ
ते ब्रह्म ... जन्य पापनाशः त
न्त्रतायाहेतवश्च अदृष्टार्थैकजातीय
कर्मणः कालदेशकर्त्रादीनाम ।
योगानुबंधबैपहेतभूतानामभे
देउद्देश्यविशेषाग्रह इति एवंच
स्नातोऽधिकारी भवति दैवे पै
त्रे च कर्मणि पवित्राणां तथा
जाप्यहानेचविधिर्दर्शितइतिवि
स्मृतं अस्नातानाचोरत्तकर्मजप
होमादिकिंचनेतिदक्षोक्तंचक्रियां
गस्नानेकर्तृसंस्कारद्वारैवतंत्रितकर्त
व्या ॥

शेषकर्मार्थमेकमेव तत्र प्रति
कर्मकर्तव्यं इतिप्रायश्चित्ततत्वं ॥
तन्त्रवापः पुं तन्त्रवायः तन्त्रे पुंक्ली
इति शब्दरत्नावली ॥
तन्त्रवायं पुं वर्णसंकरजातिविशे
षः तांति इतिभाषा अस्योत्पत्ति
र्यथा ताम्रकूटाच्छैवकार्ष्णीम
णिकारस्यजायते मणिकारात्
ताम्रकूटा मणिबंधाप्यं जायते
मणिबंधान्मणिकार्ष्णी तन्त्रवाया
स्वजज्ञिरे इतिपराशर पद्धतिः
त पर्यायः कुविंदः २ इत्यमरः
तन्त्रवापः ३ इति भरतः ॥ तंतुवा
यः ४ इति जटाधरः तंतुवायः
५ इति शब्दरत्नावली ॥
लता इत्यमरटीकायांस्वामी ॥
तंत्रिका स्त्री गुडूची इत्यमरः
तन्त्रिपालकः पुं जयद्रथराजः
इति शब्दमाला ॥
तन्त्री स्त्री वीणागुणः गुडूची ॥
देहसिरा इति मेदिनी नदीवि
शेषः युवतीभेदः इति शब्द
रत्नावली रज्जुः इति हे
मचंद्रः ॥
तंत्रवायः पुं तन्त्रवायः इत्यमर
टीकायां रायमुकुटः ॥

तन्द्रा स्त्री निद्रा अलस्यं इति
हेमचंद्रः तस्यानिदानं यथा ।
तमोवातकफात्तन्द्रा इति ॥
लक्षणंच इंद्रियार्थेष्वसंवित्ति
र्गौरवंजृम्भणंक्लमः निद्रार्त
स्येवयस्येहा तस्यतंद्राविनिर्दिशे
त् इतिमाधवकरः ॥
तन्द्रालुः त्रि निद्रालुः इतिजटाध
रः तन्द्रिः स्त्री निद्रा आलस्यं
इत्युणादिकोषः ॥
तन्द्रिका स्त्री तन्द्रिः इति शब्द
रत्नावली ॥
तन्द्रीः स्त्री अत्यन्तश्रमादिनास
र्वांगेंद्रियाप्रभुत्वं अत्यन्तश्रमा
दिनासर्वांगनिमीलनं निःसह
तेत्यावत् इत्यन्ये इतिभरतः त
त् पर्यायः प्रमीला २ इत्यमरः
तंद्रा २ तंद्रिः ४ इतितट्टीका ॥
तन्द्रिका ५ विषयाज्ञानं ६ इति
राजनिर्घंटः निद्रा इति मे
दिनी ॥
तन्त्रिः स्त्री चक्रकुल्या इतिरत्न
माला तन्त्रिरपिपाठः ॥
तन्वतः पुं रात्रिः वायुः ॥ इ
त्युणादिकोषः ॥
तन्वी स्त्री कृशांगी यथा नवतन्वि

कुचावेतौ नियतौ चक्रवर्त्तिनौ ।
आसमुद्र करग्राही भवान् यत्र
करप्रदः इति कालिदासः ॥
शालपर्णी इति राजनिर्घण्टः
तप उ. अ दाहे इतिकविकल्पद्रु
मः अयमात्मनेपदीत्यन्ये इति
तट्टीकायांदुर्गादासः ॥
तप ३ उपतापे ऐश्वरीभावे इति
कविकल्पद्रुमः ॥
उप य उ. उ दवे उपतापइतिया
वत् ऐश्वर्ये ईश्वरीभावइतिया
वत् इतिकविकल्पद्रुमः ॥
तप क दाहे इतिकविकल्पद्रुमः
तपः स क्ली तपस्या तत्त्रिविधं
शारीरं वाचिकं मानसंच यथा
देवद्विज गुरुप्राज्ञपूजनंशौच
मार्जवं ब्रह्मचर्यमहिंसाचशा
रीरंतपउच्यते १ अनुद्वेगकरं
वाक्यं सत्यं प्रियं हितंच यत्
स्वाध्यायाभ्यसनंचैव वाङ्मयं त
पउच्यते २ मनःप्रसादः सौम्य
त्वंमौनमात्मविनिग्रहः भाव
संशुद्धिरित्येततपो मानसमु
च्यते ३ तदपित्रिविधं सात्विकं
राजसंतामसंच यथा श्रद्धया
परयातप्तंतपस्तत्रिविधंनरैः

अफलाकांक्षिभिर्युक्तैः सात्विकं
परिचक्षते । सत्कार मान पू
जार्थं तपोदंभेन चैव यत् क्रि
यतेतदिह प्रोक्तंराजसं चलमध्रु
वं २ मूढग्राहेणात्मनोयत् पी
डयाक्रियते तपः परस्योत्सा
दनार्थंवा तत्तामसमुदाहृतं ३
इतिश्रीभगवद्गीता ॥ ॥
जनलोकादुर्द्धलोकः यथा
अस्योपरितपोलोकस्तेजोमय
उदाहृतः वैराजा यत्र ते देवा
वसंत्युद्भव वर्जिताः वासुदेवप्र
तोयेषांवासुदेवेऽर्पितक्रियाः
तपसा तोष्य गोविन्दमभिलाष
विवर्जिताः तेतपोलोकमासाद्य
वसंति विजितेंद्रियाः शिलोञ्छ
वृत्तयोयेवैदंतोलूखलिकाश्चये
येऽश्मकुट्टाश्चमुनयः शीर्णपर्णा
शिनश्च ये ग्रीष्मेपंचाग्नितपसो
वर्षासु स्थंडिलेशयाः हेमंते
शिशिरेवाये क्षिपंतिसलिलेत
पाः कुशाग्रनीरबिंदुश्चतर्षिता
यतयोः पिबन् वाताशिनोनि
त्तपिताः पादांगुष्ठाग्र भूस्पृशः
ऊर्द्धहस्ता रविंदृशस्तेकांक्षिस्था
नतिश्चलाः ये वै दिवानिरुच्छासा

मासांश्चमासांश्च ये परे मासो
पवासं कुर्वतिचात्मार्थस्य अना
श्रये कृत्वत्तेतोयपानाये ये ष
ण्मासोपवासकाः येच वर्षा
निमेषा वै वर्षधाराम्बुतर्षकाः
स्थाणुमासोपवासमासमग्रकं
इतिसाध्वदाः जटाटवी कोट
राः कृत नीडाण्डजाश्चये मरू
फवल्मिकांगाश्च त्वाग्नुनद्धास्थि
संचयाः लताप्रतानैः परितोवे
ष्टितावयवाश्च ये प्रास्थानिच म
रूफानियदोषु महीपते इत्येते
नियमे ये तु क्लिष्टात्मान तपो
धनाः ब्रह्मायुषस्तपोलोके ते
वसन्त्यंगतोभयाः इति पद्मपु
राणे चोद्दायणादिव्रतं ॥
धर्मः इतिमेदिनी ॥
तपः पुं ग्रीष्मः इत्यमरः ॥
तपःकरः पुं तपस्वीमत्स्यः
इतिशब्दरत्नावली तपस्याकारके
त्रि तपःक्लेशसहः त्रि दान्तः इत्य
मरः तपःस्थली स्त्री काशी इ
तित्रिकाण्डशेषः ॥
तपती स्त्री छायानामसूर्य्यपत्नी
इतित्रिकाण्डशेषः सूर्य्यकन्या सा
कुरुवंशीय ऋक्षराज पुत्र संवरण

भार्य्या इतिश्रीभागवतं ॥
तपनः पुं सूर्य्यः भल्लातकवृक्षः
अग्न्यादिदाहात्मकनरकः ग्रीष्मः
इति हेमचंद्रः तापः इति धर
णी अर्कवृक्षः चित्राग्निमंथवृक्षः
सूर्य्यकान्तमणिः इति राजनि
र्घण्टः ॥
तपनच्छदः पुं आदित्यपत्रवृ
क्षः इतिराजनिर्घण्टः
तपनतनया स्त्री शमीवृक्षः य
मुना इतिराजनिर्घण्टः ॥
तपनमणिः पुं सूर्य्यकान्तमणिः
इतिराजनिर्घण्टः ॥
तपनात्मजा स्त्री गोदावरीनदी
इति हेमचंद्रः यमुनाच ॥
उपनी स्त्री गोदावरी इति हे
मचंद्रः ॥
तपनीयं क्ली स्वर्णं इत्यमरः
तपनीयकं क्ली सुवर्णं इतिरा
जनिर्घण्टः ॥
तपनेष्टं क्ली ताम्रं इति राज
निर्घण्टः ॥
तपसः पुं चंद्रः इति त्रिकाण्ड
शेषः पक्षी इति सिद्धान्त ।
कौमुद्यामुणादिवृत्तिः तप
स्वतः पुं इन्द्रः इतिहेम ॥

चंद्रः ॥
तपस्यं क्ली कुंदपुष्पं इतिशब्द
चंद्रिका ॥
तपस्यः पुं फाल्गुनमासः इत्य
मरः अर्जुनः इति हेमचंद्रः ॥
तपस्या स्त्री तपः तत्पर्य्यायः
व्रतादानं २ परिव्रज्या ३ नियम
स्थितिः ४ इति हेमचंद्रः व्रत
चर्य्या ५ इति मेदिनी ॥
तपस्विनी स्त्री जटामांसी इत्यम
रः कटुरोहिणी इति हेमचंद्रः
महाश्रावणिका इतिभावप्र
काशः तपोयुक्तास्त्री च ॥
तपस्विपत्रः पुं दमनकवृक्षः
इति राजनिर्घण्टः ॥
तपस्वी न त्रि तपोयुक्तः तत्प
र्य्यायः तापस १ पारिकांक्षी २
इत्यमरः पारकांक्षी ४ पारिकां
क्षकः ५ इति शब्दरत्नावली त
पोधनः ६ आनुकंप्यः इतिमेदि
नी तपस्वी न पुं नारदः इतिश
ब्दरत्नावली मत्स्यविशेषः त
पस्यामाच् इति भाषा तत्पर्य्या
यः तपःकरः २ चेष्टकः ३ चेष्टः ४
इति शब्दचंद्रिका छ्रतकरंजवृक्षः
इतिराजनिर्घण्टः ॥

तपाः[स] पुं माघमासः शिशिरका
लः इति मेदिनी ग्रीष्मः इत्यमरः
टीकायांनयनानंदः ॥
तपात्ययः पुं वर्षाकालः इति
हेमचंद्रः ॥
तपिते त्रि तप्तं इतिद्विरूप
कोषः ॥
तपुः[स] पुं अग्निः सूर्य्यः इ
त्युणादिकोषः ॥
उपोधनः पुं उपस्वी इतिमेदि
नी दमनकवृक्षः इतिराजनि
र्घंटः तपोधना स्त्री मुंडीरी इ
तिमेदिनी तपोवटः पुं ब्रह्मा
वर्त्तदेशः इतित्रिकांडशेषः
तप्तः त्रि तापयुक्तः तत्पर्य्या
यः सन्तापितः २ धूनः ३ धूपा
यितः ४ धूपितः ५ इतिहेमचं
द्रः तप्तकुंभः पुं नरकविशेषः
इतिमार्कंडेयपुराणं ॥
तप्तकृच्छ्रः पुं व्रतविशेषः
यथा पयोघृतमुदकंवायुत
त्र्यहंप्रतित्र्यहं पिबेत्सतप्तकृच्छ्रः
इतिगोतमः तप्तपाषाणकुंडं स्त्री
नरकविशेषः इतिब्रह्मवैवर्त्ते
प्रकृतिखंडं तप्तवालुकः पुं न
रकविशेषः इति पुराणं ॥

तप्तरूपकं स्त्री रौप्यं इति राज
निर्घंटः ॥
तप्तशूर्म्मिकुंडं स्त्री नरकविशे
षः इतिब्रह्मवैवर्त्तेप्रकृतिखंडे
तप्तसुराकुंडं स्त्री नरकविशेषः
इतिब्रह्मवैवर्त्तेप्रकृतिखंडं ॥
तम उ इर भ य खेदे इच्छायां
इतिकविकल्पद्रुमः ॥
तमं स्त्री अन्धकारः इति शब्द
रत्नावली पादाग्रे इति शब्द
चंद्रिका ॥
तमः पुं तमोगुणः इत्यमरटीका
यांरायमुकुटः तमालवृक्षः इ
तिशब्दचंद्रिका ॥
तमः[स] स्त्री प्रकृतेर्गुणविशेषः
तत्त्वावरकं मोहहेतुः इत्यम
रभरतो अस्य कार्य्यसंहारः ॥
इतिश्रीधरस्वामी तस्यधर्मोय
था प्रमादः १ मोहः २ भयं ३
ग्लानिः ४ विषादः ५ शोकः ६
अरतिः ७ अनार्य्यता ८ इति
मोहधर्मः भ्रमः ९ तंद्रा १० मोहः ॥
इत्याश्वमेधिकपर्व अंधकारः
तत्पर्य्यायः तमसं २ निशाच
र्मं ३ नीलपंकं ४ रजोबलं ५ दि
वान्धकः ६ विषद्युति ७ खलकः ८ ध्वः

९ इतित्रिकांडशेषः रजोरसं १०
दिनान्तरं ११ अंधकं १२ इतिशब्द
शब्दरत्नावली अमरोक्तपर्य्या
योः ध्वकारशब्दे द्रष्टव्यः शोकः
इतिमेदिनी पापं ॥ इति हे
मचन्द्रः ॥
तमः स्त्री पुं राहुः इतिमेदिनी
तमंगकः पुं रुद्रकोषः मंचकः
इति हेमचंद्रः त्रिकांडशेषश्च
तमतः त्रि तृषितः वांछितः ।
इत्युणादिकोषः ॥
तमप्रतः पुं नरकभेदः इति
हेमचंद्रः ॥
तमरं स्त्री वङ्गं इति हेमचंद्रः
तमराजः पुं शर्कराविशेषः त
वान इति ख्यान इति केचित् ॥
तत्पर्य्यायः शालकः २ तस्य
गुणाः तृष्णाज्वरदाहरक्तपित्त
नाशित्वं इति राजवल्लभः
तमसं स्त्री अंधकारः इतित्रिकां
डशेषः नगरं इतिसंक्षिप्तसा
रे उणादिवृत्तिः ॥
तमसः पुं कूपः अंधकारः ।
इतिसंक्षिप्तसारे उणादिवृत्तिः
तमसा स्त्री नदीविशेषः इतिसं
क्षिप्तसारेउणादिवृत्तिः ॥ ॥

तमस्ततिः स्त्री अंधकारसमूहः
इतितमिस्राशब्दार्थे मेदिनी ॥
तमस्विनी स्त्री रात्रिः हरिद्रा इ
त्यमरः ॥
तमा स्त्री रात्रिः इतिहेमचंद्रः ॥
तमालवृक्षः इतिशब्दचंद्रिका
तमाः[स] पुं राहुः इति मेदिनी
तमालं स्त्री पत्रकं इति राज
निर्घंटः ॥
तमालः पुं वृक्षविशेषः तत्
पर्य्यायः कालस्कंधः २ तापिच्छः ३
इत्यमरः तापिंजः ४ इतिभर
तः नीलतालः ५ तमालकः ६
नीलध्वजः ७ कालतालः ८ महा
बलः ९ अस्यगुणाः मधुरत्वं ब
ल्यत्वं वृष्यत्वं शिशिरत्वं गुरुत्वं
कफपित्ततृषादाहश्रमशान्ति
करत्वंच इति राजनिर्घंटः तिल
कं खङ्गः वरुणवृक्षः इतिमेदि
नी क्षुद्रखदिरः इति शब्दचंद्रिका
वृक्षभेदवंशत्वचिचपुंस्त्री इ
तिलिंगादिसंग्रहे अमरभर
तो तमालकं स्त्री सुनिषण्ण
शाकं इतित्रिकांडशेषः पत्रकं
तेजपात इतिभाषा इतिराजनि
र्घंटः तमालकः पुं स्त्री तमा

लहन्तः वंशात्वक् इति शब्दरत्ना
वली तमालपत्रं क्ली तमालद्
दः तिलकं पत्रकं इति मेदिनी
तमालिका स्त्री तामलिप्तदेशः
इति त्रिकाण्डशेषः ताम्रवल्ली
भूम्यामली इति राजनिर्घण्टः
तमालिनी स्त्री भूम्यामली इ
तिराजनिर्घण्टः तामलिप्तदेशः
इतिहेमचंद्रः ॥
तमाली स्त्री ताम्रवल्ली वरुण
वृक्षः इति राजनिर्घण्टः ॥
तमिः स्त्री रात्रिः इतिमरटीकायां
भरतः ॥
तमिस्रं क्ली अंधकारं इत्यमरः
क्रोधः इति मेदिनी ॥
तमिस्रा स्त्री अंधकाररात्रिः कृ
ष्णपक्षनिशा इत्यमरः तमोयु
क्तरात्रिमात्रे इति रायमुकुटः
दर्शरात्रिः इति वाचस्पतिः ॥
तमस्ततिः इति मेदिनी ॥
तमिस्रपक्षः पुं कृष्णपक्षः
यथा तमिस्रपक्षत्रुटिकूटभ
क्षितमिति श्रीहर्षः ॥
तमी स्त्री रात्रिः हरिद्रा इत्य
मरः तमोघ्नः पुं वह्निः सूर्यः चं
द्रः बुद्धः केशवः शंभुः इति ।
मेदिनी ॥
तमोज्योतिः पुं ज्योतिरिंगणः ॥
इति शब्दरत्नावली ॥
तमोनुत् पुं अग्निः सूर्यः चंद्रः
दीपः इतिशब्दरत्नावली ॥
तमोनुदः पुं सूर्यः इति शब्द
रत्नावली ॥
तमोपहः पुं सूर्यः चंद्रः बु
द्धिः अग्निः इति मेदिनी ॥
तमोभित् पुं खद्योतः इति
शब्दमाला ॥
तमोमणिः पुं खद्योतः इति
त्रिकाण्डशेषः गोमेदकमणिः
इतिराजनिर्घण्टः ॥
तमोलिप्ती स्त्री देशविशेषः त
मोलुक इति भाषा तत्पर्यायः
तामलिप्तिः २ वेलाकूलं ३ त
मालिका ४ इति शब्दरत्नावली
तामलिप्तं ५ तामलिप्ती ६ इति
त्रिकाण्डशेषः दामलिप्तं ७ त
मालिनी ८ स्तंबपुः ९ विष्णु
गृहं १० इति हेमचंद्रः ॥ ।
तमोविकारः पुं रोगः इति रा
जनिर्घण्टः ॥
तमोहरः पुं चंद्रः इति श
ब्दरत्नावली ॥ ॥

तम्पा स्त्री गौः इति हेमचंद्रः
तम्ब गतौ इतिकविकल्पद्रुमः
तम्बा स्त्री गौः इतिहेमचंद्रः
तय ङ. गतौ रक्षे इतिकवि
कल्पद्रुमः ॥
तरः पुं तरणः कृशानुः इ
तिमेदिनी वृक्षः इतिभूरिप्र
योगः तरः क्ली बलं वेगः ।
तीरं प्लवगः इतिशब्दरत्नाव
ली तरंगः पुं वायुनानघादि
जलस्यातिरूर्ध्वसंप्लवनं ढेउ
इतिभाषा तत्पर्यायः भंगः २
ऊर्मिः ३ वीचिः ४ इत्यमरः ऊर्मी
५ वीची ६ विचि ७ लहरी ८ हली
९ विलि १० इतिभरतः लहरिः
११ इतिसारसुंदरी जलतता १२
भंगिः १३ इतिहारावली वस्त्र
हयादीनामप्युत्फाले इत्यु
णादिकोषः तरंगिनी स्त्री नदी
इत्यमरः तरणं क्ली प्लवन
पूर्वकदशोत्तरगमनं इतिदु
र्गादासः पारगमने स तरणं
यथा तृणमपिसज्जनसंगति
रेका भवति भवार्णव तरणे
नौका इतिमोहमुद्गरः तरणः
पुं भेलकः इतित्रिकांडशेषः स्वर्गः
इति ॥
शब्दसंदर्भसिंधुः ॥
तरणिः स्त्री नौका घृतकुमारी
इत्यमरः ॥
तरणिः पुं सूर्यः अर्कवृक्षः
इत्यमरः भेलकः किरणः
इति हेमचंद्रः ॥
तरणिपेटकः पुं काष्ठाम्बुवा
हिनी इतिजटाधरः ॥
तरणिरत्नं क्ली माणिक्यं इति
राजनिर्घण्टः ॥
तरणी स्त्री नौका इति शब्दरत्ना
वली पद्मचारिणी इति शब्दचं
द्रिका घृतकुमारी इत्यमरटी
कायां भरतः ॥
तरण्डः पुं क्ली वडिशीसूत्रब
द्धकाष्ठादि प्लवः नौका इति
मेदिनी कुम्भतुंबीरंभादिसं
चरः इतिशब्दरत्नावली ॥
तरण्डः पुं देशविशेषः इति
शब्दरत्नावली ॥
तरण्डपादा स्त्री नौका इतिश
ब्दरत्नावली ॥
तरण्डी स्त्री नौका काइति
शब्दरत्नावली ॥
तरत् स्त्री प्लवः कारण्डवप
दी इति मेदिनी ॥ ॥

तरदी स्त्री कंटकिवृक्षभेदः त
त्पर्य्यायः तारदी २ तीव्रा ३ ख
दिरा ४ रक्तबीजका ५ अस्यागुणाः
तिक्तत्वं मधुरत्वं गुरुत्वं वल
त्वं कफनाशित्वंच इतिराज
निर्घण्टः ॥
तरन्तः पुं भेकः आसारः ॥
समुद्रः इत्युणादिकोषः ॥
तरन्ता स्त्री तरिः इत्युणादिकोषः
तरपण्य क्ली फलविशेषः त
रमूज इति ख्यातः यथा ज्येष्ठमा
सिमहेशानि पौर्णमास्यांनिशा
र्द्धके तस्मात्तिरामहाकालीश्र
मन्तीपिलकानने तत्रागत्वा वल
णातस्यैफलं दत्वं तरमुजं तत्
फल भक्षणात्स्मा वरदासि ह
रप्रिया योमे दद्यात् फलं रम्यं
सचिराय ऋतुर्युगे इत्युत्तरका
माख्या तन्त्रं ॥
तरलः पुं हारः हारमध्यम
णिः तलं इत्यजयपालः ॥
तरलः त्रि चलः षिड्गः भास
रः इति मेदिनी मध्यस्त्रत्य
द्रव्यं इति धरणिः द्रवीभूत
श्च तरललोचना स्त्री चंच
लनयनानारी ॥ ।

इतिहेमचंद्रः ॥
तरला स्त्री यवागुः सुरा इति
मेदिनी मधुमक्षिका इति हे
मचंद्रः ॥
तरलितं त्रि जाततारल्य तत्
पर्य्यायः प्रेंखोलितं २ ललि
तं ३ प्रेंखितं ४ धूतं ५ चलितं ६
कम्पितं ७ धूतं ८ वेल्लितं ९
आंदोलितं १० इतिहेमचंद्रः ॥
तरवारिः पुं खड्ग तरवार इति
भाषा इति हेमचंद्रः अथखड्ग
परीक्षा अंग रूपं तथा जाति
नैत्रारिष्टंच भूमिका ध्वनिर्मा
नमितिप्रोक्तं खड्गज्ञामाष्टकं
शुभं अभिन्ने दर्पणेयाद्दक्
विभिद्य वदिते तथा यदेवद
र्पणेविकृतदर्गसंप्रचक्षते
नीलकृष्णादिकंखड्गेरूपमित्य
भिधीयते तेनैवयत् प्रतीतस्या
त्तज्जातिरितिगद्यते अंगानिरि
क्तयज्जाति स्तन्माहात्म्यापरू
चकं तत्रेत्र मितिजानीयात्
खड्गेखड्ग विशारदाः अंगा
निविकं खड्गादियत्कुद्दनापरू
चकं तदरिष्टमितिप्राकुर्भूमिरंगादि
धारणयः खड्गजायतेशाहोमखड्गादिना

हते सध्वनिसत्तनामानं ज्ञान
सष्ट विधविदं पंचाद्या निपुणैः
खड्गे संभाव्यते पिकृत्रिमाः अर्मि
वकृत्रिमा ज्ञेयो नाखेव सहजा
विति शतमंगानि चत्वारि रूपा
णि जातयस्तथा त्रिंशन्नेत्राणिजा
नीयादरिष्टानि तथैवच भूमिश्च
द्विविधाज्ञेयाध्वनिरष्टविधोमतः
मानन्तु द्विविधं प्रोक्तमित्येषांसग्र
होमतः अथखड्गस्य शतांगगण
नाल्मोहार्णवे रूपसर्वा गजोरुह
कदमन स्थूलांग कृष्णारुणास्व
तांभोजगदा तिलानल कणा ग्रंथि
स्थिरांतेनिराः माला जीवक षट्
पदोहंमरिच वालाम्र वर्हीजन
दोहत्स्कमक्षिका मष यवश्रीरि
त्मासर्षपाः सिंही नपूल गोशि
राशिव नरव ग्राहादि कोशोपल
द्रोणीकाक कपाल पत्र मकरी वि
स्त्री फलीसर्षपाः नीलीरक्त वचा
रसानसमना जिंगी शामी रोहित
प्रोष्टी मारिष मार्कवा खुर नाडि
मेघादिगुंजाशाराः हर्वीविल्व
मसूर डुण्डुक शटी मार्जारिका
केतकी मूर्वा वज्रकलाय चम्पक व
ला न्यग्रोध वंशाः सत्ताः ज्येष्ठी
जाल पिपीलिका ॥ ॥

नलरजः कूष्माण्ड रोमस्पृही कर्कंध्रू
वंकलारनालमहिषस्वच्छांतं वक्रार
ति प्रोक्तालोहविशारदेनमुनिना
खड्गस्य भेदाः क्रमात् अथ तस्य
चत्वारिरूपाणि नीलः कृष्णः पिश
गश्चधूम्रश्चेति चतुर्विधः वर्णः म
कर्षः खड्गानांकथितानुनि पुङ्गवैः
अथचतस्रोजातयः ब्राह्मणः क्ष
त्रियोवैश्यः शूद्रश्चेति चतुर्विधः
जातिभेदो विनिर्दिष्टः खड्गानां म
निपुंगवैः अथत्रिंशन्नेत्राणि ॥
चक्रं पद्मं गदा शंखो डमरु र्देव
रंकुशः छत्रंपताकावीणाचम
त्स्यालिंगा ध्वजेन्द्रवः कुंभः स्थूल
श्च शार्दूलः सिंहः सिंहासनंग
जः हंसोमयूरो जिह्वाच दर्शनः
खड्ग एवच पत्रिका चामरं शै
लः पुष्पमाला भुजंगमः त्रिंश
देतानि नेत्राणि खड्गानां कथिता
नि वै अथत्रिंशदरिष्टानि छिद्रं
काकपदं रेखा भिन्नं भेकश्च
मूषिकः विडालः शर्करानी
ली मशकोभृंगस्तविकेचि
विडः कालिकाहारी कपो
तः काकपदंच खर्परः शाकली
कोडीकृष्णपत्रकंजालिके क
रालकंक खर्परं भृंग पुच्छ खनिखिकं

लांगलं वशिष्ठाख्येन मुनिना तत्
वेदिना प्रोक्तान्येतान्यरिष्टानि वे।
ज्ञानात्त्रिशाद्देवहि अथ द्विविधा भू
मिः दिव्यभौमविभागेन भूमि।
स्तु द्विविधा भवेत् अथाष्टधाधि
तिः हंस कांस्याभ्रफेक्कानोका
कतंत्री खेरापमना धृतयोऽष्टवि
धाः प्रोक्ता नागार्जुनमुनेर्मताः
अथ द्विविधं मानं उत्तमाधमभे
देन मानं तद्विविधं भवेत् इति
प्रोक्तानि सूत्राणि खड्गान्तोक्ता
न हेतवे एतानि तत्वतो ज्ञात्वा
भवेद्रूपति पूजितः इति सूत्रा
ध्यायः तत्र प्रथमतोऽङ्गा
नो लक्षणानि निबोधत लो
हदीपे वणपत्र समाभूमिर
गम्ब्रतंप्रतीयेत ऊर्ध्वं तत्तम
हामूल्यं नृप वज्र मुषति ते
एष खड्गवरोदया लक्ष्मी माधु
र्यश्चवलं १ स्वर्णरेखावलीतत्वी
यभूमौ निकषोपमा स्वर्णवज्र
मिति प्राकृत्या पुलक्ष्मीजयप्रदं २
गजमुक्ताकृतिर्भूमौ कृत्स्नाया
मंग संभवः गज वज्र मिति
प्राकृ वक्र स्पर्शो नतद्विशोत्
ज्वरादि व्याधि गमनं तस्य प्र
क्षालनाम्भसा अपि ॥

दीप्तोऽपि भयपालस्तद्दीर्यात् साथ
पेन्मही ३ परंडबीज प्रतिम मेग
भूमिः सितेतरा रुद्र वज्र मिदं
नाम्ना शत्रु दर्प क्षयकरः एत
स्य स्पर्शमात्रेण नरः सम्यग्विम
च्यते महिषाख्यमिदं वज्रं केचिद
फर्मनीषिणः ४ अंगोदमनपत्रा
भस्त्वङ्गे यस्मिन् प्रतीयते विद्याहम
नवज्रेच तज्ज्ञेयं द्विविधं बुधैः नी
लाभ्राभवेद्भूमि स्तत्र नीलाग
रीयसी तस्मिन् पर्युषितं तोयं
गंधेदमनकोपमं तत् प्रभावा
न्महीपालः कान्तामृद्धी हि साध
येत् ५ शांर्गधरस्य एकास्थूला
सितोरेखा भूमिर्नीलाद्रफायदि
स्थूलाङ्क मंगवज्रं तद्विधा लक्ष्मी
यशः प्रदं एतत्ते भवेत्कायः स्
स्थिरतरं स्थितिः एतं महात्मप
रेवदन्ति खड्गकोविदाः ६ कृष्णायां
रुपते भूमौ अंगं च प्रति विम्बितं अ
ग वज्रं भवेत्तस्य द्विधा भूमिः सि
तासिता ७ लोहप्रदीपेऽपि निरं
गं कृष्णपत्राभमीयत्काणिनिभं च
यत् दुर्लभं तन्महामूल्यं कात
लोहप्रवदते कृत्स्ना भूमिर्भवेत्
ढक्काणीपीनावत्क्षोणा संगता ॥
कृत्स ॥ वज्र ॥ ॥ ॥

मितिप्राकृ स्नलतते मोह उच्यते
प्रदीपेऽपि कृत्स्नाभूमिः सुवर्णत
मीषच्छल्कागसंगतं डाकलीव
त्रकं विद्यात् कालसन्तमथापरे
८ अरुणं सूक्ष्म मर्द्धचेदगं भूमिः
सितेतरा अरुणाख्य मिदं वज्रं
शत्रुदर्प निसूदनं स्पर्शमात्र स्पर्श
मात्रेण वह्निरूपास्वमेव शिखो
तस्य स्पर्शेन मात्रेण पद्मकोषः
स्फुटेद्विषि दुर्लभं तन्मनुष्याणां
भाग्यैः कृत्रापि लभ्यते तद्यो जन
सहस्रस्य रिष्टं नाशयति ध्रुवं।
९ श्वेता स्त्रिस्रो यदा रेखा आ
मूलाग्रुपलक्ष्यते श्वेताग्रमिति त
द्विद्यादशेषा लक्ष्मी वलप्रदं १०
अम्भोज दल संकाश मंगं भूमिः
सितेतरा अम्भोजवज्रं तज्ज्ञेयं कथि
मुनिपुंगवैः ॥ अंगंयस्य गदाका
रं भूमिश्चैव सितेतरा गदावज्र
मिदं ब्रूयात् तत्वतेफलसंभवः
११ अंगं कृत्स्नतिलाकारं भूमिश्चै
व सिता ऽसिता तिल वज्र मि
दं ज्ञेयं लक्ष्मी वल यशः प्रदं
तत्र दाने तिलतैलभावस्या ॥
प्रत्यावते ऽधिकं १२ धूम्रवर्णा
भवेद्भूमि रंगं वह्नि शिखो
पमं ॥ ॥

अग्नि वज्र मिदं ज्ञेयं शत्रूणां दाह
कारकं अत्र प्रक्षीतोदकं न्यास्तत
स्मभवति च त्वणात् शाणो व
ह्लिं वमेद्यत्तनथा स्पर्शमात्र सं
मात् तत्ते वलवान् दाहो दग्ध
वक्त्रणाभवेत् एत स्परमभाष्ये
तल्लभ्यते धरणीतले १३ भूमिः सि
तातिलावापि अंगं चेत् पिप्पली
प्रभं करणा वज्र मिदं ज्ञेयं मत
दाहस्त्रमत त्वेत १४ कृत्स्ना भूमिर्य
दैवागोहवपते ग्रंथि संचयः ग्रंथि
वज्रमिदं ज्ञेयं वैरि पक्ष विनाश
ने तत्तत्ते वलवान् दाहरूषा
च ज्वर एव च १६ शालपर्णी द
लाकार मंगं कृत्स्ना सित त्रिका
स्थिरा वज्र मिदं प्राकृत्स्न तत्तेव
पथ्यभवेत् १७ यदाति तितिरि प
त्राभ मंगं भूमिः सितेतरा एत
त्तितिरि वज्रं स्पात्तन तत्तेव
हूयेनवः १८ वनमालासमा
यस्मिन् मालाखड्गे प्रदृश्यते
मालाग्रमिति तद्विद्यात्तोयं
गंधवत्स्रवेत् अत्र तमोदकं न्यस्तं
शीतं भवति तत्क्षणात् एष दा
हप्रतीताना प्रत्ते पित्तहृत्ताम्
मेधो भवेत्परमभैषज्यं भाष्येनेन
द्विलभ्यते १९ यदा जीरक ॥
संकाश ॥ ॥

मंगाभूमिः सिताःसिता यतज्जीर
कवज्रंस्यात्ततस्तेनततस्तणाज्वरः
२० भूमिः सितासितदेशा अंगंभ्र
गाभ मिष्यते तत्र चेन्मध्यमम
स्तं शोषमामोति केवलं यत
भ्रमर वज्रं स्यात्तत् तते स्याद्दि
सूचिका २१ ऊर्द्धगंकपिलाभास
मंग यस्मिन् प्रतीयते ऊर्द्ध्ववज्र
मिदं प्राहुर्विषवेगनिसूदनं लो
हप्रदीपेपि ऊर्द्धगं कपिलाभास
मंगंयस्मिन् प्रतीयते लांगलाग
त्ततद्विद्यात् स्पर्शे तस्याःहिनाश
नं २२ अंगंमरीचसंकाशभवेद्भू
मिःसितेतरा मरीचाभमिदं वज्रं
तत् तत्तेकटुरसकता ततप्रदा
लनतोयेनतश्यन्तिपीनसादयः २३
यदासर्पफणाकारमंगंभूमिस्तुनिर्म
ला भुजंगवज्रं भूमिस्तुनिर्मला
भुजंग वज्रं तद्विद्यात्तत् तते विष
वदुजा तस्यस्पर्शनमात्रेण भेकः
प्राणैर्विमुच्यते यकस्यास्यप्रसा
देन कृत्स्नां शास्ति महीन्दपः
२४ यदाष्व खर संकाश मं
गंभूमिस्तुनिर्मला अश्वाङ्कमि
ति तद्विद्यात् खंग परमदुर्ल
भं तस्यसंयोगमात्रेण वाजी मं
दोपि धावति तस्य क्षालन तोयेन
हयानां ॥ ॥

रोगनाशनं यतत् तते भृशं
मूर्च्छा दाहभ्रमभ्रम यवच २५ म
युरपिच्छसदृशमंगंभूमिःसितेत
रा वर्हांग मिति तं विद्यात्तत् तते
वाग्निरिष्यते सर्पाणामिहसर्वेषा
मस्यस्पर्शासहिस्नुता यतदेवन्दप
तिभिर्भोग्यः ऊर्ज्जापिलभ्यते २६
भूमिरंजनसंकाशाधाराचास्यसि
ताभवेत् अंजनाख्यमिदंप्रायःसर्व
देवोपलभ्यते लोहप्रदीपेपि धा
रा शुभ्राभवेद्यस्य भूमिः कज्जलस
न्निभा कृष्णरंगे श्चितं वापि विद्या
त्कज्जल वज्रकं २७ मधुवर्णा स
मा भूमि रंगं वामधु विन्दु वत् ।
दोशश्च मिति जानीयात् जयल
क्ष्मी यशःप्रदं शार्ङ्गधरेपि । निम्न
कातो भवेद्यत्र रात्रिंदिवविलेपनः
मधुरो मधुवर्णाभः सखड्गो देव
वल्लभः विशेषाश्चात्ररज्यन्ति मत
तमक्षिकादयः २८ आसीम को
णिका यस्य तद्वांगं ऊराउलीकृ
तं तद्वज्रक न माते शाह नागा
र्जुनो मुनिः इदंऊरएडलवज्रंच प्रा
ह लोहार्णवे मुनिः ॥ ॥
अस्यस्तते श्वलवान् दाहो मम
विस्लाकितः २९ यदङ्गं मक्षिका
॥ ॥

कारं भूमिश्चैव सितासिता स्ते
हः प्रपुष्यति चैवात्र मक्षिकांगं
तमादिशेत् ३० अंगं यदा नवा
कारं याच भूमिः सितासिता
तुषवज्र मिदं ख्यातं प्राहनागा
र्जुनो मुनिः ३१ अंगं यव फला
कारंभूमिः कृष्णा सिता तथा
यवांगमिति तं विद्यात्तत् स्पर्शे
कण्डूसंभवः यषखड्गायमस्या
ज्ञा यदीच्छेद्भूतिमात्मनः ३२ अंगं
व्रीहिप्रसूनाभं भूमिर्धूम्रात्तेतेति
रुक् उदव्रीहि वज्रं जानीयच्छत्रू
णां भयवर्द्धनं ३३ अतसी फलसं
काशमंगंभूमिः सिताःसिता अत
सी वज्रमाहुस्ततत्तत्तेशिरसो
रुजा ३४ यदासर्षपबीजाभमंगं
भूमिः सिताःसिता खरधारः खर
स्पर्शः सर्षपांगः सदुर्लभः ३५
सितसकारंभवेद्यस्य अंगंभूमिः सि
तासिता सिंहीवज्रंतं तद्विद्यात्तत्
तते प्रलपेत्नरः यतद्धावन तोये
न काम रोगोपनाशनं ३६ अंगंत
ण्डुलसंकाशंभूमिर्धूम्रासितासि
ता तण्डुलाङ्कमिमं विद्याद्यशःश्री
वलवर्द्धनं यतत्स्पर्शुषितं तोयं
तण्डुलोदकसन्निभं अस्य प्रभा।

वान्मनुजो प्रश्नं हि लभते श्रियं
३७ अंगंचेत्नोत्तराकारं भूमिराद्या
त निःसृता खड्गायम मिदंवि
द्याञ्जोवज्रं नाम नामतः ३८
स्थूलादीर्घाःशिराःकृष्णाभूमि
श्चैवसितासिता शिराङ्कमिति तं
ब्रुयादेनंखड्गाधमंबुधाः ३९ शि
वलिङ्गाकृति यांगे धाराचैव
सिताथवा शिवाङ्कमिति तं
ब्रुयाच्छत्रुपक्षनिसूदनं ४० य
दा व्याघ्रनखाकारमंगंभूमिस्तु
पिंगला नखवज्रमिदंब्रुयात्तत्
तते स्वयशु भवेत् यतदामिष
संस्पर्शात् प्रविशेत् स्वयमेवहि
ग्राहवच्छोपमत्वंगंभूमिर्धूम्रा
खंगाकृतिःग्राहाङ्कमिति जा
नीयाच्छत्रु वंशोपनाशनं अ
स्य स्पर्शन मात्रेण जीवन्मत्स्या
जरत्यसत् ४१ यदा मनुज नेत्रां
गमितिजानीयात् संग्रामे वि
जय प्रदं यतद्धावन तोयेन नून
मंधोपिपश्यति ४२ अंगंकेश
समं यस्य भूमि धूम्रा सितासिता
केशाङ्कमितिजानीयात् लेशाडः
एव भयापहं ४४ निरंगस्थूलप्र
कृति मुपलांगविदुर्बुधाः यत
द्विप्रायशो लोके दृश्यते ।

४१

द्विज सप्तम ४५ पद्मपुराणस्य
पुराणस्य निरङ्गा निशिता धारा
शाणे वह्निं वमत्यपि द्रोणीवज्र
मिदं ज्ञेयं पृथिव्यानातिदुर्लभं
४६ अङ्ग काक पदाकारं भूमिरा
चान निःसहा एष खड्गाधम
स्याज्ज्या काकाङ्गो भूमि मिच्छ
ता ४७ यदा कपाल मंगेषु ह
श्यतेस्पर्शनैः खरं पतद्वि ज्ज्व
जनकं कपालांगवुपस्त्यजेत्
४८ नवीपत्रावलांका या सव
र्णासिपुत्रिका पत्रवज्रक माङ्ग
स्य आयुर्वेदविदो जनाः लोहा
णवेपि सुवर्णसमिनाभूमिरं
गकालमतीयते ततपत्रवज्रं ।
काकस्य सुवर्णमुपजायते
तवरी दल संकाशा मंग य
स्मिन् प्रतीयते तवरी वज्रमाङ्ग
स्ततत्तेनशिरसोभ्रमः एषखड्गा
धमस्त्याज्योयदीच्छेज्जीवनं निजं ४९
विम्बी दल समा भूमि रङ्ग विम्बी
फलोपम विम्बी वज्रत तद्धिया
तज्जलं नियमच्यते पित्त श्लेष्म
विकाराणांप्रशमाय प्रयुज्यते
५० प्रियंगुसदृशान्तर्गभूमिश्च
कपिलाकृतिः फल वज्र मिदं
प्रोक्तंशाणेधूम्रं वमत्यपि ५१ अङ्ग
सर्षप पुष्पाभं भूमिश्चैव सि
तासिता एत सर्षप वज्रस्यात् शा
णे वह्निंवमत्यपि प्रपिक्रुणलि
कांयाति एतदयम कोमलं एत
तू प्रसादात् क्षितिपः कान्तांभा
षयतेमही ५२ नीलीरस समा
भूमि रंगंनीलीतरंगवत् नीलीव
ज्रमिदं दृष्टं शाणेवह्नि शिखास्व
मेत एष खड्ग वरोन्दर्णं मरिष्ट
भयनाशनः ५३ रक्ता स्निग्धोमसृ
रेखा भूमिश्चैव सितासिता रक्ताङ्ग
मितिजानीयाद्वैरिपक्ष विनाशनं
शाणेन यत्र रक्ताभा नीलावा व
मतेशिखं रक्तस्पर्शनमात्रेणास्र
यमेवमिक्रमति ततेस्यरक्तस्रय
पुत्स्रावादाहस्र जायते ५४ अंगंव
चादलसम भूमिश्चैव सितासिता
वचा वज्रमिदं ज्ञेयं तत त्वमाद्विष
नाशनं एषखड्गवरोराज्ञामायनी
यः प्रयत्नतः ५५ रसोनाङ्गतमङ्ग
गंभूमिस्तस्यदलोपमा रसोन व
ज्रंजानीयात् शाणे वह्निं वमत्यपि
अस्यधावनतोयेन आमवातविना
शनं ५६ निरंका निर्मला भूमि
र्हीरा तीक्ष्णा खरः स्वरः सुमना व
ज्रमेतत्स्याद्धिनासनदुर्लभं ५७

मंजिष्ठा सदृशा दीर्घा स्तब्धा रेखा
स्तुविस्तराः जिंगीवज्र मिदं नामस
र्वकामार्थसाधनं ५९ अङ्गं शमी
पत्र समंभूमि धूम्रा सिताःसिता
शमीवज्र मिदं ज्ञेयं शानेश्चरम
दावहं शाणेषु वमते वह्निं सह
ते वह्नि पीडनं ६० रोहितवल्क
लसदृशमंगंभूमिः सितासिता वा
पि धूम्रा गम्भीर स्वर युक्त धारा
तीक्ष्णासिता भवेद्रेखा रोहिताख्य
मिदंवज्रं सर्वारिष्टविनाशनं व
ह्निसंस्पर्शमात्रेण किंचिन्मिचि
मायते इत्ययं दुर्लभः खड्गो देवाना
मपिकथ्यते ६१ शाफरीवल्कला
कारमङ्गं भूमिः सिताःसिता प्रो
ष्टीवज्रमिदंप्रोक्तंम्स्तत्तरनिवारि
णि एषखड्गोत्तमो राज्ञाविपत्तकुल
नाशकः कदाचिल्लभ्यते भाग्यैर्लं
भ्यते लभ्यते मही ६२ अङ्ग मारिष
पत्राभंभूमिः स्याद्विषमश्छवि :
इत्ययं मारिषाङ्गः स्यात् पृथिव्यां
नातिदुर्लभः ६३ अङ्ग राजस्यपु
ष्पाभमंगंभूमिर्दलप्रभा आद्या
तेसहतेनैव एष खड्गाधमोमतः
६४ धारातीक्ष्णा खराकारा भूमिरंगवि
वर्जिता आघातंसहतेघोरं शाणेवह्नि
वमत्यपि खुरंगामितिजानीयात्
पृथिव्यानातिदुर्लभं ६५ निर्मला
समला भूमिर्भस्वैव कदा कदा
मन्दा तीव्रा भवेद्धारा तडिद्वज्रस्य
लक्षणं ६६ नीलांजन समा भूमि
रंगंजलतरंगवत् मेघांग मिति
जानीयाच्छाणेशीतं भवत्यपि एष
खड्गाधमस्त्याज्यो यदीच्छेद्भूमिमात्म
नः भर्तुः प्रतापशमयेद्दवि विश्वय
थाचनः ६७ मेदाधाराभ्रष्टागाघा
भूमिरंगविवर्जिता पर्वताग मिदं ना
मसर्वत्रैवोपलभ्यते ६८ अङ्ग गुंजा
फलसमंभूमिर्मीनदलोपमा गुंज
वज्रमिदं दृष्टं तन्नभवति चर्षणे ॥
शाणेसिंदुवसंकाशं रजोवमति
चासहन्त एषखड्गवरो राज्ञाभाग्या
देवोपयुज्यते अस्यप्रभावात्तज्जालि
यत्र साधयते नृपः ६९ अङ्ग तत्व
शाराकारं भूमिश्चैवसितासिता ॥
धारातीक्ष्णा वमति च शाणे वह्नि
समाः शिखाः शारवज्रमिदं ज्ञेयं
राज्ञांवांछितसिद्धये ७० दूर्वाद
लनिभाभूमि र्हीरा तीक्ष्णा खरः
स्वरः शाणेनवमतेवह्निं दूर्वाव
ज्रंसुदुर्लभं ७१ अंगं विल्वदलाका
रे भूमिश्चैवसितासिता विल्ववज्र ·

मिदंशाणेनीलपीतेवमेच्छिखे प
षवज्रवरंप्रोक्तः शत्रूणांकुलनाश
नः ७२ मसूरदलसंकाशा भूमिर्वर्ण
मसूरवत् मसूरांगमिदंशाणेरक्तो
वमतिवारुणं ७३ शोणपुष्पनिभा
रेखा दीर्घा भूमिः सितेतरा शोणांग
गमितिजानीयात्वज्रंपरमदुर्लभं
७४ शाटीदलसमाभूमिरंगेतत्कुसु
मोपमं शाटीवज्रमिदंप्रायोलभ्यते
गुणवत्तरं ७५ मार्जाररोमसदृशामंग
भूमिःसितेतरा मार्जारांगमिदंनाम्ना
रोग शोक भयावहं एषवज्राधम
स्माज्ज्ञेयदीर्घश्वेतिमात्मनः ७६
केतकीपत्रसदृशामंगंयस्मिन्प्रती
यते विद्यात् केतक वज्रं तत् वा
राणस समुद्भवं ७७ लोहप्रदी
पस्य अंगेमर्वातत्तनिभंभूमिर्म
वीदलच्छविः शाणेनवमतेम्भु
ल्लंशिखां मौर्वी भवेत्ततः मौर्वि
गमिदं मतं कृष्टं यशःकीर्तिव
लावहं ७८ लिंगं तीक्ष्णं खरं गांधि
शाणेवङ्के वमेत् कणं छिन्नस्य
न्नविर्धलोहं वज्राङ्ग मिति तद्दे
नू ७९ कलायपुष्पसदृशामङ्गंभू
मिःसितासिता कलायवज्रंजानी
यात् ततस्तेनपाकश्च्यते ८० अङ्गं

चम्पकपुष्पाभं भूमिः कृष्णा तथा
सिता शिखांशाणेवमेच्छीतं तिक्तं
तस्याजलंभवे इदंचम्पकवज्रंस्यात्
सर्वत्रविजयप्रदं ८१ अंगेवलाद
लसमं भूमिः शुक्ला तथेतरा व
लावज्रमिदंज्ञेयंनानाभावंभवेद्
तं इत्ययंवातरोगाणांनाशनेपर
मोषधं ८२ अङ्गंवटारोहसमंभूमि
र्वटदलच्छविः वटवज्रमिदंज्ञेयं
खरंवज्राधमं बुधैः यतस्यस्पर्शमा
त्रेणतरो मुच्येत सम्पदा ८३ वंश
नीलीसमाभूमिः खरधारासिता
कृतिः वंशांग मितिजानीयाद्वंश
वृद्धिकरंपरं ८४ भूमिः शालद
लाकाराग्रङ्गं लघुसिताःसितं शा
लाङ्गं एषवज्रंः स्यात्पूज्यः सर्वार्थ
दायकः अयंशाणेवमेद्धिंधाराचा
पराचाभवेत् ८५ भूमिःसिताःसिता
वापिअङ्गं ज्येष्ठीसमं लघु ज्येष्ठीव
ज्रमिदं निंद्यं न स्पृश्यं वाद्वितेकु
भिः ८६ पुराणा जाल सदृशा मङ्गं
भूमिःसिताःसिता जालवज्रमिदं
दुःखंशत्रुसम्पत्तिनाशनं यदिशाणे
वमेन्नीलांशिखांवह्निंवमेच्छवा
तदैषदुर्लभः खङ्गोनान्यथा भयदे
तकः ८७ अङ्गंपिपीलिकाकारं॥

भूमिर्हृस्वातथासिता पिपीलिकांग
इत्येष तत्तेनैकएव संभवः स्वयं
यदि भवेद्धस्वः शाणेपुज्यतम स्तदा
८८ नल पत्र समा भूमि रंगतत्
कुसुमोपमं नलाङ्गमितिजानीया
ज्जज्ञैःसर्वार्थ साधकः ८९ निरंका
निर्मलाभूमिर्ह्रस्वंह्रस्वंवमेज्ज्वः द
फाधाराप्रांशस्थूलाग्राचान्तेसहते
नच रत्नोवज्रमिदंनिंद्यशत्रूणांवि
नाशावहं ९० कूष्माण्डबीजसदृशामं
गंभूमिः सिताःसिता कूष्माण्डव
ज्रंज्ञानीयात्तत् तेनवेगनिग्रहः ९१
अंगंन्तरोमसदृशंभूमिर्धूम्रासि
तासिता रोमाङ्गमिति जानीया
त्तत् तेनपित्तलोद्भमः ९२ भूमिः
स्तु हीदलसमा अंगं तत्तु कांडको
पमं धारातीक्ष्णलघुमानं खरास्य
शा स्तुधाङ्गःखङ्गईशेषततस्तेनदा
हत्वङ्भ्रमाः मुखादिकर्णनासा
नांदाहःपाकश्च जायते अयंय
दिचसर्पाणांफणसुपरिविशेते
फलाविदार माप्नोति सर्पो लोट
यते .. ः अस्यधावनतोयेनकु
ष्टरोगविनाशनं ९३ कर्कंधु द
लवर्णाभाभूमि रङ्गंत ततस्स
मं कर्कंधुवज्रंजानीयात्तत्तेनदाह
नाशनं एष

खङ्गाधमस्मान्योजेतव्यायदिविहि
बः ९४ अङ्गंवकुल पुष्पाभंभूमि
स्तत् फलसन्निभा वकुलाङ्गमिदं
पुज्यंशाणेसुरभिगंधवत् तत्रास्ति
जगतीमध्येयदनेन नसाध्यते ९५
अङ्गं सस्मिश्रितं यस्मिन्नकिंचिद्य
क्रमीक्ष्यते सर्वेयांदर्शनेवापितीक्ष्ण
धारः खरस्वरः एष कांजिकवज्रः
साधत्वादवोपलभ्यते नैनंप्राप्या
पि वर्द्धते पोषाच्छित्रादयोपिच ९६
भूमिःकृष्णनिरंगाचेद्धारातीक्ष्णाद्द
ढापिच अग्राचान्तेसहतेयोरक्तं
स्पर्शेन यो विशेत् शाणेन व
ह्निं वमति ध्रुवं वाप्यतिघर्षणा
त् महिषाङ्गः सवे खड्गः पृथि
व्यानातिदुर्लभः ९७ अत्यन्तनि
र्मलाभूमिः शरीरंप्रातिबिम्बिता
धारा तीक्ष्णा खर स्तीक्ष्णः मुष्ठा
गंतद्धिनिर्द्दिशेत् ९८ तस्मिन्य
दा भवेद्रेखाऊर्द्धाक्रान्ताप्यंकंत
दा ९९ अस्मिन्नपि भवेद्वक्रारेखा
वक्राभियत्ततत् १०० एतच्चितय
मुद्दिष्टंखङ्गानां प्रवरं बुधैः प्रा
यशोलभ्यतेलोकेयदिसर्वगु
णावहं इतीदंनिखिलं प्रोक्तं वज्रा
णांलक्षणंमया प्रयत्नेलिखितव्य

क्तं सर्वेषां हितकाम्यया इतः पर
तं लोहार्णालक्षणं यत्र लक्ष्यते न
स्पदासो भवाम्येष प्रतिश्रुतेति क्र
नामया द्विलिंग मिश्र मालोक्य
मिश्रांगमिति निर्दिशेत् सर्वेषा
मंगमालोक्य सर्वांग मिति निर्दि
शेत् इति खड्ग परीक्षाया मंगा
ध्यायो द्वितीयः खड्गस्य रूपाणि
यथा नीली कलाय कुसुम ब्र
विभृंजनाभा या चंद्रनीलमणि
काचमणिप्रभा या भूमिश्च याम
रकतप्रतिमावभासा खड्गस्य नी
लमिति रूपमिदं वदन्ति तत्र चे
त्रिन्दितामज्ञान्यदिष्टामिवहन्य[?]
पि दृश्यते वक्रदोषापि तथापि
गुणावत्तरं १ या कालकाम्बुदम
सीरसकालसर्पशंकाहकारक
चतारसमा विभाति भूमिश्च याभ्र
मरवंधु समावभासा खड्गस्य क
ल मिति रूप मिदं वदंति अपने
त्राणि सम्यक्ते प्रतिष्ठान्यप्रभा
निच साधारण मिदं रूपं माह
नागार्जुनो मुनिः २ या माहिषेणपन
वनेकसमान वर्णा गोमेद रत्नसद
शापि च यस्य भूमिः खड्गस्य पिंग
मिति रूपमिदमवदंति भर्तयशोवल
धनक्षयकारणाय ३ यामन्द्रभ्रमसद
शा

वशिरीष पुष्प तुल्या विभाति मलि
नापि च खड्ग भूमः नागार्जुनो वद
ति धूम्रमिदं हि रूपं भर्तृयशोवलक्ष
नावलि वर्द्धनाय ४ द्विरूपमिश्रितं
ज्ञात्वा शंकरं प्रवदेद्बुधः त्रिभीरू
पैः समेतं तु खड्ग त्रिपुरसंगितं ॥
रूपैश्चतुर्भिः संयुक्तं चतुरं खड्ग
मुत्तरं इति लोहार्णवस्य खड्गप
रीक्षायां वर्णाध्याय स्तृतीयः ॥
जाति श्चतुर्विधा प्रोक्ता खड्गानां
या पुरा मया सम्यक्त्वापि प्रयत्ने
न तासां लक्षणमुच्यते श्रुद्धात्तः श्रु
द्ववर्णश्च स्तनेत्रः सुस्वरश्च यः मृदु
स्पर्शः सुमंद्धय तीक्ष्णधारो महागु
णः खड्गब्राह्मण जातिं तं प्राह ना
गार्जुनो मुनिः अस्य क्षते भवेत्क्षो
भो यो चोरः सर्वांग गोचरः मूर्च्छापि
पासा दाहश्च ज्वरो मत्तश्च जायते
अहहं त्रिफला कल्क मईरात्रिं दि
वोषितं मलिनत्वेन संधेनेनि र्मलेः
कुरुते परं तरुणादित्य किरणस्य
र्शाद्देव तत्क्षण स्थितः दहेत्सर्वेन
सर्वनत्वकरं पुरुषस्य विधारिणः
गायत्र्युच्चारमात्रेण खड्गतां व्रजति
स्फुटं एष खड्गवरः सर्वमविघ्नना
शयेद्ध्रुवं अस्य प्रसादात् पुरुष
स्त्रिलोकः ॥

1161

मपि साधयेत् तस्मादेष मनुष्याणां
सुलभो नहि भूतये दृश्यते माप्रायः
स्वर्गे कुशाद्वीपे हिमालये १ धूम्रव
र्णमहासारं तीक्ष्णधारं खरस्वरं सर्वा
घात महं सर्वं नेत्रवर्णस्वराकरं ख
ड्गं क्षत्रियजातिं तं जानीयात्खड्गको
विदः अस्य क्षते भवेद्दाहस्तृषा नाहो
ज्वरोभ्रमः मत्तश्च जायते शाणे व मे
हफिकणान् वहन् संस्कारे चाप्य
संस्कारे नैर्मल्यं तस्य लक्ष्यते शाणेप्य
शाणेप्य शाणे खरता मूर्छा चास्य तु
तीक्ष्णता रक्तस्पर्शन मात्रेण वि
षोदन्तर मन्तरं अयं खड्गवरः पूज्यो
मनुष्यैरपि लभ्यते २ नीलवर्णः
कृष्णवर्णः संस्कारे निर्मलो भ
वेत् शाणेन खरता चास्य ज्ञानत
ल्प निकृन्तति वैश्य जाति रयं खड्गः
क्षते त्वं मात्र दर्शनः नातन् कृष्णो ना
तिहीनः सर्वत्रैवोपलभ्यते ३ सज
लाम्भोदसंकाशः स्थूलधारो मद्भ
स्वरः संस्कारे चैव मलिनः शाणे
चापि खरेतरः शूद्र जातिरयं खड्गः
क्षतेनाल्पापि वेदना हरादेषो ऽप्य
मस्यापो यदीक्षेहित मात्मनः ।
प्रायशः सर्व लोकेषु स्वयमे
वाप ॥ ॥

दृश्यते ४ द्वयोर्लक्षण मालोक्य
जारजं खड्गमादिशेत् त्रयाणां ल
क्षणेनैव त्रिजातिं खड्गमादिशेत्
चतुर्णा लक्षणेनैव जाति संकर
मुच्यते इति लोहार्णवस्य खड्ग
परीक्षायां जात्यध्यायः ॥ अथ
त्रिंशन्नेत्राणां लक्षणानि चक्रा
कारं यदा नेत्रं खड्गस्यांगे प्रदृश्य
ते तं चक्रनेत्रं जानीयात् भर्तुः
सर्वार्थसाधनं अनेनैकेन खड्गेन
कान्त्या साधयते महीं १ प्रफुल्ल
पद्मसंकाशं नेत्रं पद्मदलोपमं
यदि वा दृश्यते खड्गे पद्मनेत्रं स
मादिशेत् अयं खड्गवरो यत्र
तत्रैव कमलालया २ ऊर्द्ध्वा स्थूला
यदा रेखा गदाकारा प्रतीयते गदा
नेत्रमिदं विद्धि सर्वशत्रुनिसूदनं
शंखाकारं यदा नेत्रं खड्गमध्ये तु
दृश्यते शंखनेत्रमिदं सर्वदेवानाम
पि दुर्लभं ४ डमरु प्रतिमं नेत्रं
यस्य भूमौ प्रतीयते सर्वार्थसा
धकं खड्गं तं विद्याद्धियमदं ५
धनुः स्वरूपं यन्नेत्रं धनुर्नेत्रं प्रव
क्षितं तस्य स्पर्शन मात्रेण मन्दो
ऽपि प्रभुतायते अयं निशीथे वि
जने खड्गो फनफनायते ६ ॥

३

यत्रेत्र संकुशाकारं तन्विद्यात्खड्गं
वत्तरं खड्ग संकुशा नेत्राख्यं भर्तुःस
वीर्यसाधकं अलक्ष्मीपापरक्षोघ्नं
कृत्याग्रहनिवारणं ७ छत्राकारं
यदानेत्रं छत्रनेत्रं वदन्ति तं अस्य
प्रभावात् क्षीणोपि सार्वभौमो
भवेन्नृपः दीनोपिच सुखीभूयात्
सुखीभूयास्महेश्वरः महेश्वरो
पिसचिवः सचिवो मण्डलेश्वरः
मंडलेशश्चक्रवर्तीभवेदत्रनसं
शयः ८ पताकाकृति नेत्रंचेत्
सर्वसंपत्तिकारकं पताकानेत्रमा
ख्यातंसंग्रामविजयप्रदं ९ नेत्रंवी
णाकृतियदावीणानेत्रमवंतितं
निशीथे विजने खड्गोवीणाघोषत्
स्वनमावहेत् अस्य प्रभावात् सर्वे
नृपा अपि वशाभवन्तिहि १० मत्
स्याकृतियदानेत्रं मत्स्यनेत्रमिमंवि
दुः अस्य प्रभावात् क्षितिपः कृत्स्नां
साधयते महीं ११ शिवलिंगसमंने
त्रंलिंगनेत्रमिमं विदुः भर्तुः स
वीर्यसंसिद्ध्यै शत्रूणांनाशनाय
च वामपार्श्वे त्वयाग्राप्यं धर्तव्योयं त्
यारणे १२ अत्रध्वजार्धचंद्रकलशानां
लक्षणानिपतितानि १३ १४ १५ शूलाकृ
तियदानेत्रं शूलनेत्रं वदन्ति तं ॥

सर्वार्थ साधकः सर्वारिष्टानिष्टप्रणा
शनः १६ शार्दूलनेत्रं तंविद्यात् शार्दू
लाकृतिनेत्रतः शत्रुश्रेणीविनाशा
य संग्रामेविजयायच १७ सिंहाकृति
यदानेत्रं सिंहनेत्रमिमं विदुः अस्यप्र
भावात् क्षीणोपि कृत्स्नां साधयते
महीं १८ तत् सिंहासननेत्रं स्यात्
नेत्रेसिंहासनोपमे अस्य प्रभावात्
क्षितिपः कृत्स्नां साधयते महीं १९
गजाकृतियदा नेत्रं वदन्तितं अस्य
प्रभावात् क्षीणोपि लभते राजसम्प
दं २० नेत्रंहंसाकृतियदाहंसनेत्रंवद
न्तितं अस्य प्रभावात् भूपालो यशः
प्राप्नोत्यनुत्तमं २१ मयूराकृतिनेत्रेह
तन्नेत्रमितिनिर्दिशेत् अस्यप्रभा
वान्मनुजः सर्पदर्पान्निसूदयेत् ॥२२
जिह्वाकारंयदा नेत्रं जिह्वानेत्रंवदं
तिच संग्रामलब्धपरेषांवपिवेद्धरि
शिरोरजः २३ दंताकारंयदानेत्रं
दंतनेत्रवदन्तितं सर्वेरिपुगणान्
हि चर्वयत्यतिभैरवं २४ खड्गाका
रंयदानेत्रं खड्गनेत्रं वदन्तितं अस्य
प्रभावान्मनुज त्रिलोकी ॥
वशयेदपि २५ मनुष्य ॥

पुत्रिकाकारा पुत्रिकानेत्रमुच्यते
अयं सशैलां सद्वीपां कृत्स्नांसा
साधयते क्षितिं नचेयं पुत्रिका
किन्तु जयलक्ष्मीरिहस्वयं तस्मा
त्रायंमनुष्याणामल्पभाग्येन लभ्य
ते २६ चामराकृति नेत्रत्वात्नेत्रमिति
निर्दिशेत् अस्यप्रभावाज्जायन्ते
चामरोद्धतसंपदः २७ एकानेक
शिवे शैल नेत्रं तन्नेत्र संतकं
अपिराष्ट्र भये युद्धे विषमे वै
रिसंकटे स्थिरीकरोतिधरणी
धरणीपर्वतोयथा २८ पुष्पमा
लासमं नेत्रं पुष्पनेत्रं वदन्ति तं
अस्यप्रभावात्तुष्यन्ति ग्रहाः सर्वा
श्चदेवताः २९ भुजंगम समेने
त्रे सर्पनेत्र मिदंमतं अयंशत्रु
गणांहन्ति यथा मंत्रे भुजंगमं
३० सवर्णंसमवर्णंचतत्सर्वंहिवि
धंभवेत् सवर्णं शान्ति सम्पत्त्यै वि
पुनाशे तथापरं हयो रेकत्र ए
षेच तत् पुनर्विविधं भवेत् एक
लोक सुखेनेदं ददाति द्विविधं
द्वयोः मूलमध्याग्र संस्थानात्त
पुनर्द्विविधं भवेत् अग्रवाग्रफलं
ज्ञेयंमध्येमध्यफलंमतं मूलेफलं
जयंतस्मात् प्राहनागार्जुनो ॥

मुनिः एकं द्वेत्रीणि नेत्राणि नात्र
संख्या व्यतिक्रमः एकंधर्मः स्वर्गं
कामोद्वेत्रीणिचत्रिवर्गंकं तत्फला
नि प्रयच्छन्ति प्राहनागार्जुनोमुनिः
द्विनेत्रमिति जानीयात् स्वसंज्ञा
नेत्रयोर्द्वयोः त्रिनेत्रंचत्रिभिर्ज्ञेयंव
क्रनेत्र मतः परं यथोत्तरगुण
वहंखड्गमाक्रस्तुतमं दिङ्मात्र
मिति निर्दिष्टं नेत्राणां शुभदायि
नां तीव्राणांमंगलानांचदर्शनंच
शुभावहं इति खड्ग परीक्षायां ने
त्राध्यायः पंचमः यथा नेत्रस्य
संस्थानंतथा रिष्टस्यलक्षयेत् ॥
नेत्रेषुस्थानं चमोनारिष्टस्थान
निर्णयः ॥ प्रशस्तोगोपियःख
ड्गोः रिष्टेनैकेननिन्दितः अथारि
ष्टादरिष्टानां लक्षणानि छिद्रव
द्दृश्यते खड्गे स्वभावेन च लक्ष्य
ते छिद्रारिष्ट मिदं विद्धि भर्तु वी
र्य वलापहं १ यदा काकपदाका
र मरिष्टं दृश्यते क्वचित् अयं
काकपदारिष्टः सर्वाभीष्टविनाश
नः २ रेखाकारंयदारिष्टमूर्ध्वंवाति
र्यगेववा रेखारिष्टमिदंविद्धिभ
र्तुर्वीर्यवलापहं ३ भिन्नभ्रान्तिकरं
यायं भिन्नारिष्ट मिदं विदुः ॥

भर्तुः कुलं यशो राष्ट्रं ना हत्वा न
व्रजेत् स्वयं ४ यदा भेकशिरोरूप
मरिष्टं दृश्यते क्वचित् भेकारिष्ट
मिदं नाम्ना संग्रामे भयदायकं ५
अरिष्टे मूषिकाकारे मूषिकारि
ष्टमुच्यते अयं खड्गाधमः कुर्या
त् पत्युः पातालसंगमं ६ विडाल
नयनाकारो विंदुरेकोति विस्तरः
विडालारिष्टमेतत् स्यात् भर्तुः
सर्वार्थनाशनं ७ अरिष्टं शर्क
राकारं यदा स्पर्शेन बुध्यते श
र्करारिष्टमेतत् स्याद्धन बुद्धिवि
नाशनं ८ यदा नीली रसा भास
मरिष्टं दृश्यते क्वचित् नील्यरिष्ट
मिदं ज्ञेयं यशो लक्ष्मी विनाशनं ९
अरिष्टे मशकाकारे मशकारिष्ट
मुच्यते भर्तुः कुलं यशो बुद्धि हृति
प्रीतिं च नाशयेत् १० संग्रामापति
मो विंदुरेको नेकोऽथवा यदा भृंग
मारिष्टश्चैष पतिस्तति विनाशनः
११ सूचीरूपमरिष्टं चेद्दृश्यतातिर्य
गेव वा सूच्यरिष्टमिदं नाम भर्तुः
कुल विनाशनः १२ त्र्यश्रे छिद्रे वा
राजन् पङ्क्तयो विषमेण वा
ऊर्ध्वं पदि वाधोऽथवा छिद्रा ।
ख्य मरिष्टकं तस्य स्पर्शनमात्रे
णासचेलः स्नानमाचरेत् १३ का
लिकारिष्टमित्येतत् धी धृति ।
स्मृति नाशनं १४ एकत्र यदि नष्टे
ष प्रयत्नेनापि संहतः दारी ना
म महारिष्टं सर्वाभीष्टविनाशनं
अनेकगुणसंपन्नः खड्गो लोकैर्न
गृह्यते १५ कपोतपदमतिम म
रिष्टं चेत्तदाकयं भर्तुः कुलं यशो
विद्या वलं बुद्धिं च नाशयेत् १६
काकाकृतिर्यदारिष्टं काकारिष्ट
तदोच्यते अनेन भर्तुः संग्रामे भं
ग एवोपजायते १७ अरिष्टे खर्प
राकारे खर्परारिष्टमुच्यते भर्तुर्य
शो वलं वीर्यं बुद्धिं प्रीतिं च नाशये
त् १८ यदास्मल्लोहशकलं लग्न
स्यादिव लक्ष्यते शकलीति स वै
खड्गः सर्वाभीष्टनिसूदनः १९
कोणे कंशापत्रकयोर्लक्षणे पति
ते २० २१ यस्मिच्छिन्नमिवाभाति
मध्ये वा दृश्यते क्वचित् जालारि
ष्टमिदं नाम भर्तुः कुलधनापहं
२२ एकैक रेखा दीर्घाग्रा यदा
पल्लविनी भवेत् सर्पो वाथक
रेणाथकरालारिष्टमुच्यते अयं हि
तिनि पालानां हृषि योग्यो भवे
न्नहि दर्शनादेव नश्यति यतो ।

लक्ष्मी जयादय २३ अरिष्टं कंकप
त्राभं कंकारिष्टं तदुच्यते अस्य स्प
र्शनमात्रेण नश्यन्त्यायुर्यशो वलं
२४ खर्जरवृक्ष प्रतिमं यदारिष्टं त
लक्ष्यते खर्जरारिष्टमेतत् स्याज्ज
नेः कुलधनापहं २५ गोमूत्राभम
रिष्टं चेत् मूत्रारिष्टं तदुच्यते अने
न भर्तुर्नश्यन्ति लक्ष्मी वल कलाद
यः २६ गोपुच्छाकृति चेत् खड्गेऽ
रिष्टं संप्रतीक्ष्यते पुच्छारिष्टमिदं
नाम भर्तुः सर्वार्थनाशनं २७ ख
नित्राभमरिष्टं चेत् खनित्रारिष्टमु
च्यते सूराणामपि संग्रामे भंग
मेतत् प्रयच्छति २८ अरिष्टे लाङ्ग
लाकारे लांगलारिष्टमुच्यते अ
यं पापात् पापतरः प्रेक्षणीयो न
भूभुजा अयमायुः श्रियं हंति
विद्यां वलमशेषतः २९ वडिशा
रिष्टस्य लक्षणं पतितं ३० इत्यरि
ष्टानि प्रोक्तानि नाना तेभ्यात् प्रय
त्नतः विचार्यैतानि मतिमान्
खड्गं कोशे निधापयेत् दिमाद्यमि
द मुद्दिष्टमरिष्टानां हितात्मना ।
अमंगलानामेतानां दर्शनं चाशुभा
वहं अरिष्टमेकमेवस्याद्विरिष्टम
भावहं अन्योन्य मशुभं हन्याद्विष
त्य हि विषं यथा एकमारभ्य समा
प्त मरिष्टं प्राह नान्यथा यथोत्त
रे हि गुणिते फल माहु मनीषि
णः इति खड्ग परीक्षायामरिष्टा
ध्यायः षष्टः ॥ अथ द्विविधा भू
मिः दिव्य भौम विभागेन भूमि
र्या द्विविधा मता दिव्या दिवि स
मुत्पन्ना भौमा भूमि समुद्भवा ॥
तल्लक्षण मशेषेण लिख्यते नमि
वोध्यते देव दानवयो मध्ये खड्ग
स्सृष्टि रभूत् पुरा ते खड्गाः पुण्य
देशेषु केषु केषु प्रतिष्ठिताः दि
व्यलक्षणं यथा ये खड्गाः स्थूल
धाराः श्यामतिलचवो निर्मलाङ्गाः
सुनेत्रा ये विष्टाश्चा स्वरूपाः सवि
मल तनवश्चाप्य संस्कार योगात्
दुर्भेद्याश्छेदाश्च ध्वनि गुण गरवो य
त्नवन्तो दाह पाकौ ते दिव्याः कुर्वते
श्रीकुल धन विजय श्री यशोवृ
द्धिमाशु १ अथ भौम लक्षणं
वृहद्धारी ते सर्वमहेशेन विधाणि
यानि भक्तानि तेषां पतितात्तवि
दवः यस्मिन् प्रदेशे तस प्रवदेशा
कालायमामाकरतां जगाम पुरा
सतं तीरसमुद्र मथ्या उत् पायसं
गृह्य यथुः सुरेन्द्राः तद्विन्द्वो यत्र ।

निपतेदेषशुद्धायसामाकरतोजगा
म ये विशेषास्या भ्रष्टा कालाः खरा
गाः संभवन्तिहि मूर्च्छादाहज्वराना
ह शोके हिक्का वमी कराः येऽप
न्नोन्याः कट्टराज्ञामंदाज्ञासभवन्ति
च वलीपलितमालिन्यजराव्याधि
विनाशनाः यत्रैव पतितं यत्र
तत्तदाकरतोगताः तद्यथा वारा
णसी मगधसिंहल भूमि भागेने
पालभूमिषुतथाङ्ग महीप्रदेशे
सौराष्ट्रिकेष्वनरधन्वमहीविभागे
षुद्धायसांकृतिवराः प्रवदंति ज
न्म तद्यथा ·· राणसेयाः स्नि
ग्धास्तीक्ष्णधाराः सदा·· नः लघ
वः सत्वसंधेया ज्ञेयाश्चामेयप्रा
लिनः मा ·· कर्कशाः स्थूलधारा
गूढनरोगिनः गुरवो दुःख संधेयाः
खड्गास्तेषा विचक्षणैः नेपाल देश
प्रभवानिरंगानिष्फलाश्रये ज्ञेयाः
सदंगामलिना लघवः स्थूलधा
राः कालिंगाश्च वः खड्गा व्यंका
ग स्तंतदेतवः सौराष्ट्रा निर्मलाः स्नि
ग्धाः सघ्नकांगाम्भशेखराः सिंहल
द्वीपजातानां चतर्ह्री भेद उच्यते के
चित् सदंगा गुरवः कर्कशाः स्निग्ध
धारिणः केचित् सदङ्गा लघवः।

स्निग्धा स्थूलधारिणः पषांद्ग्पे
णामिश्रेण ज्ञेया हि द्विज नानयः
सामान्यात् द्विगुणं वौद्गंकलिदेश
गुणा स्ततः कलेः शत गुणं भ
द्र भद्राद्वग्रंसहस्रधा वङ्गात् ष
ड्गुणाः पाण्ड्य निरवि ईशाभि
गुणैः ततः कोटिसहस्रेण साय
स्कान्तः प्रशस्यते इत्यादिकं रसाय
नोपयोगिकमेव नतु खड्गे इष्टफ
लं यदाह श्रासोतलोहजातीनो
वज्रं खड्गाययुज्यते तथाच येखड्गा
सीक्ष्णधाराश्च्शामतिगुरवः बहुगुण
ग्धाः सुभेद्याः केचित्सांगानिरंगाः
कतिचनसमला निर्मलाः केचि
देव नेभोमाः ऊर्वतेः मी यत् विज
यवलं बहुगुणानिर्गुणावा ते दुःखं
शोकमग्नं दयति बलकुललक्ष्मीयशो
नाशनास्ते इति खड्ग परीक्षायां भू
मध्यायः सप्तमः २ अथाष्टधा
ध्वनिः ध्वनि रष्टविधः प्रोक्तो यः प्र
वं सद्गसंग्रहे तेषामपिलिखाम्या
चसगुणं लक्षणाष्टकं तद्य ·· प
वे चत्वारः शुभदाः परेनिंदा ··
स्तथा विचार्यखड्गमानंचकर्तव्यं
··· विदेः श्चेरःस्वारइतिख्याता
··· खड्गकोविदेः श्चेरःस्वा ···

सम्पत्ते तार उच्चाटने मतः य
त्रहंसरवस्येव खड्गेनख हते ध्वनिः
हंसध्वनि रयं खड्गः सकलार्थप्र
सायनः १ कांस्यशाह इवाभातियस्मि
न्खड्गे हतेध्वनिः कांस्यध्वनिरयंख
ड्गः प्राह नागार्जुनोमुनिः २ अभ्रस
लक्षणंपतितं ३ ढक्का शाह इवा
भाति यस्मिन् खड्गे हते ध्वनिः ढ
क्काध्वनि रयं खड्गः सर्वशत्रु निसू
दनः ४ काकस्वर इवाभातियस्मि
न्खड्गेहतेध्वनिः काकस्वरोयंख
ड्गः स्यात् स्त्रीयशः कुलनाशनः
५ तंत्रीस्वरसमोयस्मिन् भवेत्खड्गे
हतेध्वनिः तंत्रीध्वनि रयं खड्गः कुल
स्त्री धननाशकः ६ खरस्येव ध्वनिर्य
स्मिन् खरध्वनिरयंमतः स्त्रीयशो
ज्ञानविज्ञान जय तेजो विनाशनः
प्रस्तरस्येव यः खड्गः स निंद्यः ख
ड्गलक्षणे ८ गम्भीरतारध्वनिता ख
ड्गस्य शुभलक्षणं अपङ्क नेत्रहीनो
पि खड्गः सध्वनिरुत्तमः अंधः कु
रूपो मनुजो यथा अपि रसायनः
सर्वलक्षण सम्पन्नः खड्गो यो ध्व
निवर्जितः स निंद्यः संदरांगापिय
था वाक्य विवर्जितः नरेनवाप्य

दण्डेन तथा लोह शलाकया लो
ष्टेन शर्कराभिर्वा ध्वनि विज्ञानमु
च्यते इति खड्ग परीक्षायां ध्वन्यध्या
योष्टमः ॥ अथ द्विविधं मानं य
न्मानं द्विविधं प्रोक्तं तस्य लक्षण
मुच्यते उत्तमाधम भेदेन भेदो हि
द्विविधोमतः उत्तमं यद्धि शालंस्या
त्लघुमानं प्रकीर्तितं १ अधमं तच्च
यत् खर्वं गुरुमानं प्रकीर्तितं २ त
स्मिन् त्रिविधं प्रोक्तमादिमध्यान्तभे
दतः योमुष्टिविंशति समायततो
व्वधारोभर्तुर्भवेत् प्रसरत्तोपि षड
ङ्गुलीभिः माने ·· चाष्टपलिकः स
हि खड्ग मध्ये ना~ ~ शाष्टनव
मुष्टिभि रायतः स्यात् मन्दो भवेत्
प्रसरतोऽपिचतुर्थभागः। तावत्
पलैः परिमितस्ततोधिकोवा ख
ड्गाधमो धन यशः कुल नाशना
य नागार्जुनोपि यावत्याङ्गुष्टयो
दैर्घ्ये तदर्द्धांगुलयोयदा प्रसरेतच्च
तुर्थांशमितिवैमानमुत्तमं यावत्या
मुष्टयोदैर्घ्ये प्रसरेत् त्रिभागिकः
पलै स्तदर्हैस्तुलितः स ख
ड्गो मध्य उच्यते ॥ यावत्यो
मुष्टयोदैर्घ्ये तुर्यांशाः प्रसरेत्तता

न्तु प्रथमः कीर्त्तितः खड्ग स्तत्र स
मोवाधिकः फलैः भोमाना मिद
मद्दिष्टं दिव्यास्त्रलघवोमताः इति
खड्गपरीक्षायां मानाध्यायः ॥
भोजस्तु दीर्घता लघुताचैव स्वर
विस्तीर्णता तथा दुर्भेद्यतासुघट
तास्वड्गानां गुणसंग्रहः खर्वतागुरु
ताचैवमंदतातनुता तथा सुभेद्यता
दुर्घटता खड्गानां दोषसंग्रहः इति
निखिलमुदारमुक्तमत्र वक्त तेष्वे
निकृष्टखड्गयष्टेः नृपतिरिति वि
विस्मयो वियन्नेस चिरनराश्रियम
क्षितां लभेत इति युक्तिकल्पतरु
क्तखड्गपरीक्षा समाप्ता ॥
तरसं क्ली मांसं इत्यमरः तर
स्थानं क्ली घट्टः इति जटाधरः
तरस्वान् त्रि शूरः वेगी इति ॥
व्याकरणं ॥
तरस्वी त्रि शूरः वेगी इत्यमरः
गरुडे वायौच पुं इति राजनि
र्घण्टः ॥
तरन्तः पुं तरन्तः इत्यमरटीकायां
भरतः ॥
तरन्तुः पुं व्याघ्रविशेषः नेकडेवा
च इति भाषा तत्पर्य्यायः ॥

तर्द्दः २ मृगादनः ३ तरक्षकः ४
इतिशब्दरत्नावली ॥
तरक्षकः पुं तरक्षुः इतिशब्दरत्ना
वली ॥
तरंडः पुं नौकाविशेषः भेड इति
भाषा तत्पर्य्यायः होडः २ ॥
वहन ३ वार्वटः ४ वहित्रं ५ इति
त्रिकाण्डशेषः ॥
तरालुः पुं नौकाविशेषः इतिहा
रावली ॥
तरिः स्त्री नौका इत्यमरः दशा ॥
वस्त्रादिपेटकः इति हेमचंद्रः ॥
तरिकः पुं प्लवः इति त्रिकाण्ड
शेषः ॥
तरिका स्त्री नौका इति शब्द
रत्नावली ॥
तरणी स्त्री नौका इति हेमचं
द्रः ॥
तरिता स्त्री तर्जनी इति शब्दचं
द्रिका गृंजनं गांजा इति भाषा
यथा सविसं कालकूटंच नाम्न
कूटंच धुस्तुरं अहिफेनं खर्ज्ज
रसस्तारिका तरिता मता इति
कुलार्णवतंत्रं ॥ तरित्रं पुं
अरित्रं इति हारावली ॥ ॥

तरी स्त्री नौका गदा वस्त्रादिपेट
कः इत्युणादिकोषः धूमः इति
त्रिकाण्डशेषः द्रोणी इतिजटा
धरः दशा इति मेदिनी तरीषः
पुं शोभनाकारः भेलः व्यवसा
यः इत्युणादिकोषः समुद्रः स
मर्थः इतिसंक्षिप्तसारे उणादिवृ
त्तिः स्वर्गः इतिमेदिनी तरीषी
स्त्री इंद्रकन्या इतिमेदिनी तरुः
पुं वृक्षः इत्यमरः ॥ तरुकूणिः
पुं वाग्गदपक्षी इति त्रिकाण्ड
शेषः ॥ ॥
तरुजीवनं क्ली वृक्षमूलं इति
शब्दचंद्रिका ॥
तरुणं क्ली कुब्जपुष्पं इतिमेदि
नी तरुणः पुं स्थूलजीरकः प
रंडः इति राजनिर्घण्टः ॥
तरुणः त्रि युवा इति मेदिनी
नूतनः इति धरणी ॥
तरुणज्वरः पुं सप्ताहावधिज्वरः
यथा आ सप्त रात्रं तरुणं ज्वरमा
हुर्मनीषिणः इति चक्रदत्तः ॥
तरुणदधि क्ली पंचदिनातीतदधि
इतिवैद्यकं शुष्कं मांसं स्त्रियोवृ।
द्धा बालार्कस्तरुणंदधि प्रभाते
मैथुनं निद्रा सद्यःप्राणहराणि

चह इतिचाणक्यं ॥
तरुणी स्त्री द्वितीयवयाः स्त्री भूयो
भूयः प्रवर्त्तमानरजाः स्त्री इत्यमरः
टीकायां सारसुन्दरी तत्पर्य्यायः
युवती २ इत्यमरः तलुनी ३ यु
वतिः ४ इतिभरतः गृहकन्या द
मीवृक्षः चीडानामगंधद्रव्यं पु
ष्पविशेषः सेउती इतिभाषा तत्
पर्य्यायः सहा २ कुमारी ३ गंधा
ढ्या ४ चारुकेशरा ५ भृङ्गेष्टा ६
रामतरुणी ७ सुदला ८ वक्रप
त्रिका ९ अंगवल्लभा १० इतिराज
निर्घण्टः सेवती ॥ यथा चम्पकात्
पुष्प शतकादशोकं पुष्प मुत्तमं
अशोकात् पुष्प साहस्रात् सेव
तीपुष्पमुत्तमं सेवतीपुष्पसाह
स्रात् कुब्जकंपुष्पमुत्तमं इतिनार
सिंहपुराणं अस्यागुणाः शिशिरत्वं
स्निग्धत्वं पित्त दाह ज्वर मुखपाक
तृष्णा विच्छर्दिनाशित्वं मधुरत्वं
च इति राजनिर्घण्टः ॥
तरुणीकटाक्षमालः पुं तिलकवृ
क्षः इति राजनिर्घण्टः ॥
तरुभुलिका स्त्री वाक्तलिः वाडुड
इति भाषा इति हारावली ॥
तरुडलिकापिपाठः ॥ ॥

तरुनखः पुं कंटकः इतिहारावली
तरुभक्ष्यने पुं वंदाकः इति राजनिर्घण्टः ॥
तरुमृगः पुं वानरः इतिशब्दरत्नावली ॥
तरुरागं क्ली किशलयं नूतनपल्लवः इतिहारावली ॥
तरुराजः पुं तालद्रुमः इतिराजनिर्घण्टः ॥
तरुरुहा स्त्री वंदाकः इतिराजनिर्घण्टः ॥
तरुरोहिणी स्त्री वंदाकः इति राजनिर्घण्टः ॥
तरुवल्ली स्त्री जतुकालता इति राजनिर्घण्टः ॥
तरुशायी नं पुं पक्षी इतिहारावली ॥
तरुसारः पुं कर्पूरः इतिहारावली ॥
तरुस्था स्त्री वंदाकः इतिराजनिर्घण्टः ॥
तरूटः पुं उत्पलकन्दः अस्य गुणाः गुरुत्वं विष्टम्भित्वं शीतलत्वंच इतिराजवल्लभः ॥
तर्क क दीप्तौ वितर्के इतिकविकल्पद्रुमः ॥ ॥

तर्कः पुं आकांक्षा वितर्कः व्यभिचारशंका निवर्त्तकः इति भाषापरिच्छेदः सचपंच विधः यथा आत्माश्रयः १ अन्योन्याश्रयः २ चक्रकः ३ अनवस्था ४ प्रमाणबाधितार्थकः ५ इतिजगदीशः यथोलक्षणानि तत्तच्छेदे द्रष्टव्यानि ऊहः हेतुशास्त्रं तत्वमीमांसादि इति मेदिनी ॥
तर्ककः पुं याचकः इतिहेमचंद्रः तर्ककारकश्च ॥
तर्कविद्या स्त्री न्यायविद्या तत्पर्य्यायः आन्वीक्षिकी २ इत्यमरः
तर्कारी स्त्री जयंतीवृक्षः इत्यमरः
तर्किणः पुं चक्रमर्द्दवृक्षः इति रत्नमाला तर्किलोपिपाठः ॥
तर्की नं त्रि तर्कविशिष्टः मीमांसकः यथा त्रैविद्यो हैतुकस्तर्की नैरुक्तो धर्मपाठकः त्रयश्चाश्रमिणः पूर्वे परिषत्स्याद्दशावरा इतिमनुः ॥
तर्कुः स्त्री सूत्रनिर्माणयंत्रं टेको इतिभाषा तत्पर्य्यायः कपालनालिका २ इतित्रिकाण्डशेषः ॥ तर्कुटी ३ सूत्रला ४ इतिहारावली
तर्कुटं क्ली कर्त्तनं काटनाकाट

इतिभाषा इतित्रिकाण्डशेषः तर्कुटी स्त्री तर्कुः इतिहारावली ॥
तर्कुपिण्डः पुं तर्कुस्थितमृत्पिण्डः टेकोरबोटल इति भाषा तत्पर्य्यायः वर्त्तिनी २ इति जटाधरः तर्कुपीठी ३ वर्त्तुला ४ इति हारावली ॥
तर्कुपीठी स्त्री तर्कुपिण्डः इति हारावली ॥
तर्कुलासकः पुं कल्लोलः खरसा इतिभाषा इतिहारावली
तर्कुशाणः पुं सामकः टेकोरशाण इति भाषा इतित्रिकाण्डशेषः ॥
तर्ज भर्त्सने इतिकविकल्पद्रुमः तर्ज कुङ भर्त्से इतिकविकल्पद्रुमः तर्जनं क्ली भर्त्सनं यथा अथीराया स्तर्ज्जन ताडनादि इति रसमञ्जरी ॥
तर्जनी स्त्री अङ्गुष्ठसमीपांगुलिः तत्पर्य्यायः प्रदेशिनी २ इत्यमरः सातुगर्भस्थस्यचतुर्भिर्मासैर्भवति इतिसुखबोधः तर्जिकः पुं देशविशेषः तत्पर्य्यायः ताथिकः २ इतिहेमचंद्रः । तर्णः पुं वत्सः इति हेमचंद्रः तर्णकः पुं सद्योजातवत्सः कोमलेवाछुर इति भाषा इत्यमरः ॥
तर्णिः पुं सूर्य्यः प्लवः इतिशब्दार्थकल्पतरुः ॥
तर्त्तरीकं क्ली नौका पारगे त्रि इति मेदिनी ॥
तर्द हिंसे इति कविकल्पद्रुमः
तर्द्दूः स्त्री दारुहस्तकः काठेर हाता इति भाषा इत्यमरः ॥
तर्पणं क्ली तृप्तिः प्रीणनं इत्यमरः यज्ञकाष्ठं इति हेमचंद्रः ॥ महायज्ञविशेषः तत्तु पितृयज्ञः पितॄणांकव्यवाल्यादीनांच विधिनाजलान्न दानेन तृप्ति संपादनं इत्यमर टीकायां भरतः तत्रविधिंप्रधानं अङ्गंच तत्राद्यं यथा तर्पणंचशुचिः कुर्य्यात् प्रत्यहं स्नातकोद्विजः देवेभ्यश्च ऋषिभ्यश्च पितृभ्यश्चयथाक्रमं इतिशातातपः विधवा मथिकृत्य तर्पणंप्रत्यहंकार्य्यं भर्त्तुः कुशतिलोदकैः तत्पितु स्तत्पितुश्चापिनामगोत्रादि पूर्वकं इति काशीखण्डं द्वितीयंयथा नित्यं नैमित्तिकं काम्यं त्रिविधं स्नानमुच्यते तर्पणन्तुभवेत्तस्यअंगत्वेन

व्यवस्थितं इति ब्रह्मपुराणे त
र्पणाकरणे दोषो यथा नास्तिका
भावाद्यश्चापि न तर्पयति वै सुतः
पिबन्ति देहनिःस्रावं पितरोऽस्य ज
लार्थिनः इति योगियाज्ञवल्क्यः
तस्य निषिद्धस्थानादि यथा ने
ष्टकारचिते पितॄंस्तर्पयेत् इति
शंखलिखितौ यत्र सर्वाय चोत्
सृष्टं यच्चाभोज्यनिपानजं तद्वर्ज्यं
सलिलं तात सदैव पितृकर्मणि
इति मार्कण्डेयपुराणे ॥ तस्य
विधानं यथा स्नातश्चार्द्रवा
सा देव पितृ तर्पणं अम्भःस्थ ए
व कुर्यात् परिवर्त्तितवासाश्चेत्
तीरमुत्तीर्य्येति इति विष्णुः ती
र्थविशेषो यथा तिलोदकांज
लिर्देयो जलस्थैस्तीर्थवासिभिः
इति मत्स्यपुराणं तीर्थस्थल
स्थश्चेत् तर्पणं करोति तदा ज
लैकचरणः आचम्य कुर्यात्
तस्य जले च तर्पणमविरुद्धं स्थ
ले तर्पणं दर्भेषु कार्यं यथा मा
गधेषु सुरांस्तर्प्पयेत् मनुष्यांश्चैवम
न्यतः पितॄंश्च दक्षिणाग्रेषु दद्या
दिति जलांजलीन् इति आग्नेयपु
राणे अशुचि देशात्व यत्राशुचि स्थ
लं वा स्यादुदके देवता पितॄन् ।
तर्पयेत् यथा काम मप्सु सर्वं
प्रतिष्ठितं इति विष्णुः प्रादेशमा
त्रे उद्धृत्य सलिले प्रांमुखः सुरा
न् उदङ्मनुष्यांस्तर्प्येत पितॄन्
दक्षिणतस्तथा इति दक्षः उ
द्धृतोदकेत्व पात्रान्तरे क्षिपेत्
जलमादाय शुचौ पात्रान्तरे क्षिपे
त् जलपूर्णे च वा गर्त्ते न स्थले
त्वविवर्हिषि ॥ इति हारीतः य
द्युद्धृतैः प्रसिंचेत् तिलान् संमि
श्रयेज्जले अतोऽन्यथा तु सव्येन
तिला ग्राह्या विचक्षणैः इति यो
गि याज्ञवल्क्यः अंगुष्ठानामि
काभ्यां च दक्षिणस्य करात् करा
न् तिलान् गृहीत्वा पात्रस्थान्
ध्यायन् सन्तर्पयेत् पितॄन् इति ना
रदः देवतर्पणं यथा ब्रह्माणं तर्प
येत् पूर्वं विष्णुं रुद्रं प्रजापतिं देवा
यक्षास्तथा नागा गंधर्वाप्सरसो
ऽसुराः क्रूराः सर्पाः सुपर्णाश्च तर
वो जंभकाः खगाः विद्याधरा जला
धारास्तथैवाकाशगामिनः नि
राहाराश्च ये जीवाः पापे धर्म्मे र
ताश्च ये तेषामाप्यायनायैतद्दीय
ते सलिलं मया इदं उपवीतिना

प्रांमुखेन देवतीर्थेन कार्यं ॥
मनुष्य तर्पणं यथा सनकश्च
सनंदश्च तृतीयश्च सनातनः
कपिलश्चासुरिश्चैव वोढुः पंच
शिखस्तथा सर्वे ते तृप्तिमायान्
तु मद्दत्तेनांबुना सदा इदं निवी
तिना मनुष्यतीर्थेन सामगेन प्र
त्यङ्मुखेन कार्यं अन्य वेदिना उद
ङ्मुखेन कार्यं ततः ऋषितर्पणं प्रा
ङ्मुखेन उपवीतिना देवतीर्थेन
कार्यं ततो दिव्य पितृ तर्पणं
दक्षिणामुखेन प्राचीनावीतिना
सतिलजलेन पितृतीर्थेन का
र्यं ततः पितृ तर्पणं भीष्माष्ट
म्यां भीष्मतर्पणं तस्य मंत्रो यथा
वैयाघ्रपद्यगोत्राय सांकृतिप्रव
राय च अपुत्राय ददाम्येतत् स
लिलं भीष्मवर्म्मणे प्रार्थनमंत्रो
यथा भीष्मः शान्तनवो वीरः सत्य
वादी जितेन्द्रियः आभिरद्भिरवाप्नो
तु पुत्रपौत्रोचितां क्रियां प्रेतचतुर्द
श्यां यमतर्पणं यथा यमाय ध
र्मराजाय मृत्यवे चान्तकाय च वै
वस्वताय कालाय सर्वभूतक्षयाय
च औदुंबराय दध्नाय नीलाय परमे
ष्ठिने वृकोदराय चित्राय चित्रगुप्ता
य वै नमः प्रत्येक नामभिः स्त्री स्त्री
न् जलीन् दद्यात् तिलतर्पणनि
षेधो यथा रविशुक्रदिने चैव द्वा
दश्यां श्राद्धवासरे सप्तम्यां जन्म
दिवसे न कुर्यात् तिलतर्पणं इति
स्मृतिः संक्रान्त्यां निशि सप्तम्यां र
विशुक्रदिने तथा श्राद्धे जन्मदि
ने चैव न कुर्यात् तिलतर्पणं इति
मत्स्यपुराणं तत्र प्रतिप्रसवो य
था अयने विषुवे चैव संक्रान्त्यां
ग्रहणेषु च उपाकर्मणि चोत्सर्गे
युगादौ मृतवासरे सूर्यशुक्रादि
वारेऽपि न दोषस्तिलतर्पणे तीर्थेति
थिविशेषे च गंगायां प्रेतपक्षके
निषिद्धेऽपि दिने कुर्यात् तर्पणं ति
लमिश्रितं इति मरीचिवचनं ॥
तिलाभावे प्रतिनिधिर्यथा तिला
नामप्यभावेन सुवर्णरजतान्वितं
तदभावेऽपि सिंचेत्तु दर्भैर्मंत्रेण
वाप्यथ इति याज्ञवल्क्यः ॥
अप्रशक्तो आब्रह्म स्तम्बप
र्यन्तं जगत्तृप्यतु ॥ ॥
इत्यनेन त्रीं स्तर्पयेत् इत्या
ह्निकतत्वं काशीखंडमते तु ।

आब्रह्म स्तम्ब पर्य्यन्तं देवर्षि पितृमानवाः तृप्यन्तु सर्वे पितरो मातृ मातामहादयः ॥ अतीत कुल कोटीनां सप्त द्वीपनिवासिनां आब्रह्म भुवनाल्लोकादिदमस्तु तिलोदकं जन्माष्ट। मा तर्पणस्य फलं यथा तस्मात्तिथौ वारि मात्रं पितृणां यः प्रयच्छति गया श्राद्धं कृतं तेन शताब्दं नात्र संशयः इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डं ॥

तर्पणी स्त्री गुरुस्कन्धवृक्षः सचक्षुष्मणावृक्षः इतिशब्दमाला

तर्पणेच्छुः पुं भीष्मः इतिशब्दरत्नावली तर्पणकाङ्क्षिणि त्रि

तर्पिणी स्त्री पद्मचारिणी इति शब्दचन्द्रिका ॥

तर्ष गतौ इति कविकल्पद्रुमः

तर्वटः पुं वत्सरः इतिशब्दरत्नावली चक्रमर्द्दः इति राज निर्घण्टः तर्ष्म क्ली सुपाग्रं इत्यमरः तर्षः पुं अभिलाषः तृष्णा इत्यमरः स्नवः समुद्रः इत्युणादिकोषः सूर्य्यः इतिसंक्षिप्तसारे उणादिवृत्तिः ॥

तर्षणं क्ली पिपासा इतिजटाधरः तर्षितः त्रि तृषितः इतित्रिकाण्डशेषः ॥

तर्द्दुः पुं तरक्षुः इतिशब्दरत्नावली तलः पुं यवक्षारः इतिरत्नमाला तल कि प्रतिष्ठितो व्रतसम्पूर्ण इति यावत् इतिकविकल्पद्रुमः तलं क्ली पुं स्वरूपं यथा महीतलं अधरं इतिमेदिनी तलं क्ली ज्याघातवारणं काननं कार्य्यबीजं इतिमेदिनी गर्त्तः इतित्रिकाण्डशेषः पादतलस्य मध्यं इतिहेमचन्द्रः ॥

तलः पुं तालवृक्षः चपेटः ॥ त्सरुः सव्यपाणिना तन्त्रीघातः इतिमेदिनी स्वभावः आधारः इतिहेमचन्द्रः ॥

तलकं क्ली पुष्करिणी तलाओ इति हिन्दी भाषा इतिहारावली ॥

तलप्रहारः पुं चपेटः तत्पर्य्यायः चर्व्वी २ इतिहारावली ॥ तलाघातश्च तलसारकं क्ली घोटकस्यात्र भोजनपात्रं इति केचित् घोटकस्य वक्षस्थलबन्धन रज्जुः तत्पर्य्यायः वक्रपट्टः २ तलिका २ इति ॥

इति हेमचन्द्रः ॥

तलहृदयं क्ली पादतलस्यमध्यं इति हेमचन्द्रः ॥

तला स्त्री गोधा ज्याघातवारणं इत्यमरः ॥

तलाची स्त्री नलनिर्म्मितकटः इतिहारावली ॥

तलातलं क्ली पातालविशेषः इतिशब्दमाला तत्र मय नामा दानवेन्द्रस्त्रिपुराधिपतिर्भगवता त्रिपुरारिणा त्रिलोकाः शंचिकीर्षुणा निर्दग्धस्वपुरत्रयस्तत्प्रसादात् लब्धपदो मायाविनामाचार्य्यो महादेवेन परिरक्षितो विगतसुदर्शनभयो महीयते इतिश्रीभागवतं तलिका स्त्री तलसारकं इति हेमचन्द्रः ॥

तलितं क्ली भ्रष्टमांसं यथा शुद्धमांसविधानेन मांसं सम्यक्कृषं। साधितं पुनस्तदाज्ये संभ्रष्टं तलितं प्रोच्यते बुधैः अस्यगुणाः तलितं बलमेधाग्निमांसौजःशुक्रवृद्धि कृत् तर्पणं लघु सुस्निग्धं रोचनं दृढता करं इति भावप्रकाशः ॥

तलिनं क्ली शय्या इति हारावली।

तलिनः त्रि विरलः स्तोकः ॥ स्वच्छः इति मेदिनी दुर्ब्बलः इति हेमचन्द्रः ॥

तलिमं क्ली कुट्टिमं तल्पं ॥ चन्द्रहासः वितानकः ॥ इति मेदिनी ॥

तलुनः पुं पवनः युवा इति मेदिनी ॥

तलुनी स्त्री तरुणी युवती इति शब्दरत्नावली ॥

तलेक्षणः पुं शूकरः इतिशब्दार्थकल्पतरुः ॥

तलोदरी स्त्री भार्य्या इति शब्दार्थकल्पतरुः ॥

तलोदा स्त्री नदी इतित्रिकाण्डशेषः

तल्कं क्ली वनं इतित्रिकाण्डशेषः

तल्पं क्ली पुं शय्या अट्टालिका दाराः इत्यमर भरतौ ॥

तल्पकीटः पुं कीटविशेषः छारपोका इतिभाषा यथा जन्मके तल्पकीटस्य तदाशूद्रो भवेद्ध्रुवं इतिब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डं

तल्पनं क्ली करिपृष्ठं इति भूरिप्रयोगः पृष्ठवंशस्य मांसं इति हारावली ॥

तल्लं क्ली विलं इतित्रिकाण्डशेषः।

तल्लः पुं जलाधारविशेषः तलाउ
इति हिंदीभाषा इतिमेदिनी ॥
तल्लजः पुं प्रशस्तः इत्यमरः ॥
अयं अजहल्लिंगः समासे उत्तर प
दे भवति यथाकुमारी तल्लजः इत्य
मरटीका ॥
तल्ली स्त्री तरुणी इतिमेदिनी ॥
तवराजः पुं यवासशर्करा इति
राजनिर्घंटः ॥
तवराजोद्भवखण्डः पुं यवासशर्क
रा इति भवखंडः त त्पर्यायः सुधा
मोदकजः २ खण्डजोद्भवजः ३ सि
तमोदकः ४ अमृतसारजः ५ सि
तखण्डः ६ अस्य गुणाः दाहताष
तृष्णामोह मूर्छा श्वास नाशित्वं इं
द्रियतर्पणत्वं शीतत्वं सदा समधु
रत्वंच इति राजनिर्घण्टः ॥
तवक्षीरं क्ली तोषाक्षीर इतिख्या
ते त त्पर्यायः पयःक्षीरं २ यव
जं ३ यवजोद्भवं ४ अस्यगुणाः ।
मधुरत्वं शिशिरत्वं दाहपित्तक्षय
कास कफश्वासास्रदोषनाशि ।
त्वंच इति राजनिर्घण्टः ॥
तवक्षीरी स्त्री गंधपत्रा इति रा
जनिर्घण्टः ॥
तविषः पुं स्वर्गः समुद्रः । इति
सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥
तविषी स्त्री नदी इंद्रकन्या ॥
शक्तिः इति सिद्धान्तकौमुद्यामु
णादिवृत्तिः ॥
तवीषः पुं स्वर्गः समुद्रः स्वर्णं
इति मेदिनी ॥
तवीषी स्त्री इंद्रकन्या इति ॥
मेदिनी ॥
तष्टः त्रि तनूकृतः इत्यमरः ॥
तष्टा पुं त्वष्टा छुतार इति भाषा
विश्वकर्मा आदित्यविशेषः ॥
इत्यमरटीकायां रमानाथः ॥
तस इ कि अलंकृतौ इति क
विकल्पद्रुमः ॥
तन य उ र उपक्षेपे इति क
विकल्पद्रुमः ॥
तसरः पुं त्रसरः सूत्रवेष्टनं इत्यु
णादिकोषः ॥
तस्करः पुं चौरः शकाशाकः ॥
इतिरत्नमाला मदनवृक्षः इतिज
टाधरः कर्णः यथा व्याहृतायत
परस्त्रीभ्यः श्रुतौ तस्करतास्थिता
इतिरघुः तस्करः कर्णचौरयो रि
तिकोषान्तरं इतितट्टीका ॥ त
स्करस्नायुः पुं काकनासालता
इतिराजनिर्घण्टः ॥ ॥

तस्करी स्त्री कोपनानारी इति
शब्दार्थकल्पतरुः ॥
तरु ऊ कार्श्ये इतिकविकल्पद्रु
मः तदा त्वचोग्रहे चर्मणोग्रहण
इति यावत् समरणे इति कवि
कल्पद्रुमः ॥
तरु ऊ न तदे कृशाकरणे इ
ति यावत् इतिकविकल्पद्रुमः
तक्षकः पुं पातालस्याष्टनागा
न्तर्गतनागविशेषः सकश्यपात्
कद्रुगर्भे जातः इंद्रसखः अस्यवा
सः खाण्डववने आसीत् अयं प
रीक्षितं दष्टवान् इतिश्रीभागव ।
ते त्वष्टा इत्यमरः विश्वकर्मा इ
तिशब्दरत्नावली द्रुमभेदः ।
इतिहेमचंद्रः सूत्रधारः इत्यमर
टीका सारसुंदरी ॥
तक्षणं क्ली कृशाकरणं तक्ष
धातोर्भावे अनट्प्रत्ययः ॥
तक्षणी स्त्री वासीअस्त्रं इतिशब्द
रत्नावली ॥ तक्षशिला स्त्री देश
विशेषः इति सिद्धान्तकौमुदी
तक्षा पुं त्वष्टा इत्यमरः ॥
ताटकः पुं ताटंकः इतिद्विरूप
कोषटीकायां भरतः ॥ ।
ताटस्थ्यं क्ली उदासीनत्वं निक
टस्थत्वं यथा ताटस्थ्येन उदासी
नत्वेन इति तटस्थो निकटस्थः प्र
सिद्ध एवं प्रणय इतिच काव्य
प्रकाशटीकायांचंडीदासः ॥
ताडः पुं ताडनं शब्दः मुष्टिमे
यतृणादि इतिमेदिनी पर्व
तः इतिहेमचंद्रः ॥
ताडका स्त्री राक्षसीविशेषः सा
सुकेतुयक्षकन्याब्रह्मवरेणसह
स्रहस्ति बल युता सुन्द दैत्य पु
त्रस्यसुंदस्य भार्या मारीचमाता
सुंदेनिहते पुत्रेण सह अगस्त्य
मृषिंधर्षयित्वा मुद्यता तस्यशा
पात् सपुत्रा राक्षसत्वं गता श्री
रामेणनिहता इतिरामायणं ॥
ताडकाफलं क्ली बृहदेला इति
रत्नमाला ॥
ताडंकः पुं कर्णभूषा कानतर
का इति भाषा त त्पर्यायः कर्ण
दर्पणः २ इति त्रिकाण्डशेषः ॥
ताटंकः ३ इति द्विरूपकोषटीका
यांभरतः कर्णिका ४ तालपत्रं ५
इत्यमरः ताडपत्रं ६ इतिहेमचंद्रः
ताडनं क्ली आघातः यथा ॥

स्माच्चे नीरस काष्ठ ताडन प्रातं
स्माच्च: प्रचंडातप: इति शृंगारति
लकं ॥
ताडनी स्त्री अश्वताडनयष्टि: तत्
पर्य्याय: चर्म्मयष्टि: २ कशा ३ भीमा
४ चर्म्मलालिका ५ इति शब्दमाला
ताडपत्रं क्ली ताडंक: इति हे
मचंद्र: ॥
ताडि: स्त्री वृक्षविशेष: ताडिया
त इति भाषा इत्यमर टीकायां ॥
भरत: ॥
ताडी स्त्री पत्रद्रुम: ताडयात्
इति भाषा इत्यमरमेदिनीकरौ
त त्पर्य्याय: ताडि: २ ताली ३
तालि: ४ इति भरत: आभरण
विशेष: इति दुर्गासिंह: ॥
ताडुल: पुं ताडयिता इति सं
क्षिप्तसारे उणादिवृत्ति: ॥
ताड्यमान: पुं पटहादि: इति
त्रिकाण्डशेष: ताड्यमाने त्रि ॥
ताण्डवं क्ली पुं नृत्यं इत्यमर:
ताण्डेन मुनिना कृतं ताण्डिन्
त्यशास्त्रं तदस्यास्तीति इतिभर
त: तण्डुना प्रोक्तमिति स्वामी नृत्य
विशेष: उद्धतनृत्यं इति मेदिनी ॥

ताण्डवतालिक: पुं नंदी सचिव
द्वारी इति त्रिकाण्डशेष: ॥
ताण्डवप्रिय: पुं शिव: इति शब्द
माला ॥
ताण्डि क्ली नृत्यशास्त्रं इत्यमरटी
काया भरत: ॥
तात: पुं पिता इत्यमर: ॥
अनुकंप्य: इति मेदिनी पूज्ये त्रि
इति शब्दरत्नावली ॥
ताततु: पुं वृद्धतात: पितृव्य: ॥
जनकस्य हिते त्रि इति मेदिनी ॥
तातजनयित्र्यौ स्त्री मातापितरौ
इत्यमर: द्विवचनान्तोऽयं ॥
ततुल्य: त्रि पितृसम: तत्
पर्य्याय: मनोजवस: २ इति हे
मचंद्र: मनोजव: ३ पितृस
न्निभ: ४ इत्यमर: तातल: ५
इति मेदिनी ॥
तातन: पुं खंजनपक्षी इति त्रि
काण्डशेष: ॥
तातल: पुं रोग: पाक: लोह
कुट: मनोजव: इति मेदिनी
तप्तमात्रे त्रि इत्यजयपाल: ॥
ताति: पुं पुत्र: इति जटाधर: ता
त्कालिक: त्रि तत्कालभव: ॥

यथा तत: श्राद्ध मण्डेहो त
कुर्य्यादेकादेशे यथा कर्त्तुला
त् कैलिकीं शुद्धि रणुहु: पुन
रेवस: इति शुद्धितत्त्वे शौव:
तात्पर्य्यं क्ली अभिप्राय: इ
ति शब्दार्थकल्पतरु: वक्तुरिच्छा
इति भाषापरिच्छेद: ॥
तादात्म्यं क्ली तत्स्वरूपं अभेद
संबंध: इति न्यायशास्त्रं ॥
तादृक् त्रि सइव दृश्यतेऽसौ ।
ताहारमत इति भाषा इति मु
ग्धबोधं ॥
तादृश: त्रि तादृक् इति मुग्ध
बोधं तादृक्ष:
तानं क्ली विस्तार: ज्ञानविषय:
इति शब्दार्थकल्पतरु: ॥
तान: पुं गानांगविशेष: यथा
विस्तार्य्यन्ते प्रयोगा यैर्मूर्च्छनाशे
षसंश्रया: ताना स्तेप्यूनपंचाश
त् सप्तस्वर सम्भवा: तेभ्य एव भ
वन्त्येकूटताना: पृथक् पृथक्
तेभ्य: पंचसहस्राणि त्रयस्त्रिंश
च्छतानि च इति संगीतदामोदर:
तानवं क्ली गात्रतनुता यथा तानवं
तनुता गात्रे दौर्बल्य भ्रमणादिकृत
इत्युज्ज्वलनीलमणि: ॥

तान्तुर: पुं पयसां भ्रम: आवर्त्त:
इति भूरिप्रयोग: ॥
तान्त: त्रि श्रान्त: इति शब्दार्थ
कल्पतरु: ॥
तान्त्रिक: त्रि ज्ञातसिद्धान्त: शास्त्र
तत्त्वज्ञ: इत्यमर: तंत्रशास्त्रवेत्ता
तत्संबंधी च ॥
ताप: पुं संताप: कृच्छ्र इति
मेदिनी ॥
तापक: पुं ज्वर: इति शब्दर
त्नावली तापकर्त्तरि त्रि ॥
तापस्य: पुं अर्ज्जुन: इति पुराणं
तापन: पुं सूर्य्य: इति हेमचंद्र:
कामबाण: इति जटाधर: सू
र्य्यकान्तमणि: इति राजनिर्घण्ट:
तापयितरि त्रि ॥
तापसं क्ली तमालपत्रं तेजपा
त इति भाषा इति राजनिर्घण्ट:
तापस: त्रि तपस्वी इत्यमर:
दमनकवृक्ष: बकपक्षी इति रा
जनिर्घण्ट: ॥
तापसतरु: पुं इंगुदीवृक्ष: ।
इत्यमर: ॥
तापसद्रुम: पुं इंगुदीवृक्ष: इ
ति हेमचंद्र: ॥

तापसद्रुमसन्निभा स्त्री गर्भदात्री
वृक्षः इतिराजनिर्घण्टः ॥
तापसप्रियः पुं प्रियालवृक्षः ॥
इतिराजनिर्घण्टः ॥
तापसप्रिया स्त्री द्राक्षा इति रा
जनिर्घण्टः ॥
तापहरी स्त्री व्यंजनविशेषः यथा
घृते हरिद्रा संयुक्ता माषाणांभ
र्जयेद्बटीः तण्डुलांश्चापि निर्द्धौता
न् सहैव परिभर्जयेत् ॥
सिद्धियोग्यंजलं तत्र प्रक्षिप्य ॥
कुशलः पचेत् लवणार्द्रकहिंगु
निमात्रया तत्र निःक्षिपेत् एषा
सिद्धिंसमायातात्प्रोक्तातापहरी
बुधैः अस्यागुणाः भवेत्तापह
रीवल्या वृष्या श्लेष्माणमाचरे
त् बृंहणीतर्पणीरुच्यागुर्वीतत्र
गुणाः स्मृताः ताहरी इति लोके
इतिभावप्रकाशः तापहारिणी
त्रि तापिंछः पुं तमालवृक्षः इत्य
मरः तापिंजं क्ली धातुमाक्षिकं
इतिराजनिर्घण्टः ॥
तापिंजः पुं तापिंछः इत्यमरटी
काभरतः ॥ तापी स्त्री ताप
तीनदी सापश्चिमवाहिनी विं
ध्याचले प्रसिद्धा इतिराजनिर्घ
टः यमुना इति त्रिकाण्डशे
षः ॥
तपो न पुं बुद्धः इतित्रिकाण्ड
शेषः तापयुक्ते त्रि ॥
ताप्यं क्ली धातुमाक्षिकं इति
रत्नमाला हेमचंद्रेपुंलिंगोऽयं
ताप्यकं क्ली धातुमाक्षिकं इति
राजनिर्घण्टः ॥
तापुत्थसत्त्वकं क्ली माक्षिकधा
तुः इतिरत्नमाला ॥
तामः पुं भीषणः ॥ दोषः
इत्यजयपालः ॥
तामरं क्ली जलं घृतं इति ।
भरत धृत रुद्रः ॥
तामरसं क्ली पद्मं सारसः ॥
इत्यमः स्वर्णं ताम्रं इति ॥
मेदिनी ॥
तामलकी स्त्री भूम्यामलकी
इत्यमरः ॥
तामलिप्तं क्ली देशविशेषः तमो
तामलिप्ती स्त्री लुक् इति भाषा
तत् पर्य्यायः दामलिप्तं २ ताम
लिप्ती ३ तमालिनी ४ स्तंबपूः ५
विष्णुगृहं ६ इति हेमचंद्रः ॥
तमोलिप्ती ७ वेलाकूलं ८ तमा
लिका ९ इति त्रिकाण्डशेषः ॥

1181

तामसः पुं सर्पः खलः इतिमे
दिनी उलूकः इतिराजनिर्घण्टः
चतुर्थमनुः अस्मिन्मन्वन्तरे हरि
नामाविष्णोरवतारः त्रिशिख
नामा इंद्रः वैधृतयो देवाः ज्यो
तिर्धामादयः सप्तर्षयः वृष
ख्यातिनरादयोमनुसुताः इ
तिश्रीभागवते तमोगुणयुक्ते
त्रि तामस मुनयो यथा कणा
दः १ गौतमः २ शक्तिः ३ उपम
न्युः ४ जैमिनिः ५ दुर्वासाः ६ मृ
कंडुः ७ बृहस्पतिः ८ भार्गवः ९
जमदग्निः १० तामसशास्त्राणि
यथा असुरमोहनार्थंशिवकृत
शैवपाशुपतादि १ कणादकृतन
यमी - यतादि २ ब्राह्मणरूपिभ
गवत् कृत बौद्धशास्त्रं ३ जैमिनि
कृत निरीश्वरसांख्यं ४ तामसपु
राणानि यथा मात्स्यं १ कौर्म्मं २
लैंगं ३ शैवं ४ स्कांदं ५ आग्नेयं ६
तामसस्मृतयो यथा गौतमं १
बार्हस्पत्यं २ सामुद्रं ३ यमं ४
शाख्यं ५ औशनसं ६ तामसताम
स कर्म्माणि यथा यतशैवंदैवतं
पैत्रमोपदेवं तथाधर्मशाक्तं ।
शैवं गाणपतं याग ॥ ।
होमादिकं तथा पौरोहित्यंया
जनंच देवलकं ग्रामयाजकं ।
विस्तुसेवापराधंच तथा नामा
पराधकं अस्तत् प्रतिग्रहं देवि
सौकल्यमाभिचारिकं पशुजीवा
दिहननं पातकंचोपपातकं अ
तिपापंमहापापमनुपातकमेव
च लोभं मोह महंकारं कामंक्रो
धं मदंतथा एतद्यदपरंकर्मग ६
र्हितंच वरानने राजसं तामसं
प्रोक्तं मयाच मुनिभिः सद ॥
इतिपाद्मोत्तरखण्डे ॥
तामसिकं त्रि तामसं तमोगु
णकार्य्यं तमसइदमित्यर्थेऽस्मि
कप्रत्ययः ॥
तामसी स्त्री निशा दुर्गा इति मे
दिनी जटामांसी इति राज ६
निर्घण्टः ॥
तामिस्रं क्ली अंधकारमयनर
कं इति मनुः परवित्तापत्यकल
त्रापहर्त्ता यमहतो निपात्यते
यत्र इतिश्रीभागवतं ॥
तामिस्रः पुं ओमच्छाप्रतिघातेक्रो
धः इतिश्रीभागवतटीकायां ॥
स्वामी ॥
ताम्रं क्ली तेजसधातुविशेषः ताम्रा

इति ताँवा इतिच भाषा तत्पर्यायः ताम्रकं १ शुल्व २ म्लेच्छमुखं ३ द्वष्टं ४ वरिष्ठं ५ उडुंबरं ६ इत्यमरः द्विष्टं ७ उदम्बरं ८ उडुंबरं ९ उदंबरं १० ऊडुम्बरं ११ इति तट्टीका उपनेष्टं १२ अम्बकं १३ अरविंद १४ रविलोहं १५ रविप्रियं १६ रक्तं १७ नेपालिकं १८ रक्तधातु १९ सपक्कस्य तस्य गुणाः मधुरत्वं कषायत्वं तिक्तत्वं विपाके कटुत्वं शीतलत्वं कफपित्तविबंधशूलपांडूदरगुल्मनाशित्वंच इतिराजनिर्घंटः अम्लत्वं सारकत्वं रोपणत्वं ॥ लसत्वं लेखनत्वं अर्शो ज्वरकुष्टकासश्वासक्षयपीनसाम्लपित्तशोथकृमि नाशित्वं अल्पबृंहणत्वंच इतिभावप्रकाशः पक्तिनामशूल प्लीह वाधामशूल बहुरोगनाशित्वं शुद्धिकारित्वं बलायुस्तेजःपुष्टितुष्टिकारित्वं नित्यसेवने वली पलित नाशित्वंच अहेहित हरण कंदगर्भनिहितगोमयाग्नितप्तीकृतपंचामृत द्वारा पंचपुट दग्ध ताम्रस्य गुणाः वांति भ्रांति शूलाग्निमांद्याम्लपित्तनाशित्वं बलकारित्वंच अशोधित ताम्र दोषाः आयुःशुक्र बलनाशित्वं रोगहिक्काछर्दि मूर्च्छा भ्रम क्लेद नानारोग कुष्ठ शूल विदाह स्वेदारुचिचित्त संताप कारित्वं विषतुल्यत्वंच इति सुखबोधः ॥ तस्योत्पत्ति र्यथा शुक्रं यत् कार्त्तिकेयस्य पतितं धरणीतले तस्मात् ताम्रं समुत्पन्नमिदमाहुः पुराविदः तस्य लक्षणं यथा जपाकुसुम संकाशं स्निग्धंमृदु घनं क्षमं लोहनागोज्झितं ताम्रं मारणाय प्रशस्यते कृष्णं रूक्षमतिस्तब्धं श्वेतंचापि घनासहं लोहनाग युतंचेति शुल्वं दुष्टं प्रकीर्त्तितं तस्य शोधनविधि र्यथा पत्रलीकृत पत्राणि ताम्रस्याग्नौ प्रतापयेत् निषिंचेत्तप्ततप्तानि तैले तक्रेच कांजिके गोमूत्रे च कुलत्थानां कषाये च त्रिधा त्रिधा एवं ताम्रस्य पत्राणां विशुद्धिः संप्रजायते अथ तस्य मारण विधि र्यथा सूक्ष्माणि ताम्रपत्राणि कृत्वा संस्वेदयेद्बुधः वासरत्रयमम्लेन ततः खल्वे विनिः

क्षिपेत् पादांशसूतकं ततोयाममम्लेन मर्द्दयेत् ततस्तत्पत्राणि लेपयेद्द्विगुणेनच गंधकेनाम्लघृष्टेन तस्य कुर्य्याच्च गोलकं ततः पिष्ट्वाच मीनाक्षीं चांगेरीं सपुनर्णवां तत्कल्केन बहिर्गोलं लेपयेत् द्व्यंगुलोन्मितं धृत्वा तद्गोलकं भाण्डे शरावेण च रोधयेत् वालुकाभिः प्रपूर्य्याथ विभूतिलवणा भिः दत्वा भाण्डमुखे मुद्रां ततश्चुल्ल्यां विपाचयेत् क्रम वृद्ध्याग्निना सम्यक् यावद्यामचतुष्टयं स्वांग शीतं समुद्धृत्य मर्द्दयेत्सूरणद्रवैः याममेकं गोलकं तच्चनिः क्षिपेत्सूरणोदरे मृदालेपस्तु कर्त्तव्यः सर्वतो ऽङ्गुष्ठमात्रकः पाच्यं गजपुटे दिमं मृतं भवति निश्चितं वमनं च विरेकंच भ्रमं क्लमं तथारुचिं विदाहं स्वेद मुत्क्लेदं न करोति कदाचन इतिभावप्रकाशः ॥
शुल्वनिभः अरुणवर्णः इतिहेमचंद्रः शब्दरत्नावलीच तद्वति त्रि ताम्रः पुं कुष्ठरोगविशेषः इतिकर्मविपाकः ताम्रकं क्ली ताम्रं इतिमरः ताम्रकर्णी स्त्री अंजननामपश्चिम दिग्हस्तिपत्नी इत्यमरः ॥
ताम्रकारः पुं वर्णसंकरजातिविशेषः काँसारी इति भाषा तत्पर्यायः ताम्रिकः १ शौल्विकः २ ताम्रकुट्टकः ३ इतिशब्दरत्नावली अस्योत्पत्तिः कंसकार शब्दे द्रष्टव्या ॥
ताम्रकुट्टकः पुं ताम्रकारः इत्यमरः ॥
ताम्रकूटः पुं क्ली क्षुपविशेषः तामाकु इतिभाषा यथा सम्विदा कालकूटंच ताम्रकूटंच धुस्तूरं अहिफेनं खर्ज्जूररसः तारिका तरिता तथा इत्यष्टौ सिद्धिद्रव्याणि यथा सर्व्वाष्टकं प्रिये इति कुलार्णवतन्त्रे ॥
ताम्रकृमिः पुं इंद्रगोपकीटः। इतिभूरिप्रयोगः हारीवलीच
ताम्रगर्भं क्ली तुत्थं इति राजनिर्घण्टः ॥
ताम्रचूडः पुं स्त्री कुक्कुटः इत्यमरः कुक्कुरद्रुः इतिराजनिर्घंटः ताम्रदुग्धा स्त्री गोरक्षदुग्धा इतिराजनिर्घंटः ॥
ताम्रपट्टं क्ली ताम्रनिर्म्मितलेखनपात्रं यथा दत्वा भूमिं निबंधस्वङ्कृत्वा लेख्यन्तु कारयेत् आगामि ॥

भट्टनपतिः परिज्ञानाय पार्थिवः
पटे वा ताम्रपट्टे वा समुद्रां प
रिचिह्नितं इति मिताक्षरा ॥
ताम्रपत्रः पुं जीवशाकः इतिरा
जनिर्घण्टः ताम्रनिर्मित पत्रे क्ली
ताम्रपर्णी स्त्री दीर्घिकाभेदः इ
तिभूरिप्रयोगः नदीविशेषः इति
पुराणं ॥
ताम्रपल्लवः पुं अशोकवृक्षः इ
ति राजनिर्घण्टः ॥
ताम्रपाकी न पुं गर्दभाण्डवृक्षः
इति रत्नमाला ॥
ताम्रपादी स्त्री हंसपदी इति रा
जनिर्घण्टः
ताम्रपुष्पः पुं रक्तकांचनः इति
जटाधरः भूमिचम्पकः इति
शब्दचंद्रिका ॥
ताम्रपुष्पिका स्त्री रक्तत्रिवृत्
इति राजनिर्घण्टः ॥
ताम्रपुष्पी स्त्री धातकी पाटला
वृक्षः इतिराजनिर्घण्टः ॥
ताम्रफलः पुं अंकोटवृक्षः इ
ति राजनिर्घण्टः ॥
ताम्रमूला स्त्री दुरालभा ल
ज्जालुः इतिराजनिर्घण्टः कक्कुर ॥
खिराइ ॥ ॥

इति भाषा इति रत्नमाला ॥
ताम्रवर्णः पुं पल्लिवाहतृणं इ
तिराजनिर्घण्टः ॥
ताम्रवर्णा स्त्री ओड्रपुष्पवृक्षः
इतिशब्दचंद्रिका ॥
ताम्रवल्ली स्त्री मंजिष्ठा इति
रत्नमाला चित्रकूट देश प्रसि
द्धालता तत्पर्यायः ताम्रा २
ताली ३ तमाली ४ तमालिका ५
सूक्ष्मवल्ली ६ सुलोमा ७ शोधनी
८ तालिका ९ अस्या गुणाः कषा
यत्वं कफ दोष मुखकंठोत्थ रोग
नाशित्व श्लेष्म शुद्धिकारित्वंच ।
इति राजनिर्घण्टः ॥
ताम्रवीजः पुं कुलत्थः इति ।
राजनिर्घण्टः ॥
ताम्रवृन्तः पुं कुलत्थः इति
त्रिकाण्डशेषः ॥
ताम्रवृन्ता स्त्री कुलत्थिका इति
हेमचंद्रः ॥
ताम्रवृक्षः पुं रक्तचंदनं कुलत्थः
इति रत्नमाला ॥
ताम्रशिखी न पुंस्त्री कुक्कुटः इति
राजनिर्घण्टः ॥
ताम्रसारं क्ली रक्तचंदनं इतिर
त्नमाला ॥

ताम्रसारकं क्ली रक्तचंदनं इति
राजनिर्घण्टः ॥
ताम्रसारकः पुं रक्तखदिरः इ
तिराजनिर्घण्टः ॥
ताम्रा स्त्री सैंहली इतिराजनिर्घ
ण्टः ताम्राक्षः पुं उपद्वीपभेदः
इतिशब्दमाला ॥
ताम्रातं क्ली रक्तचंदनं इति श
ब्दचंद्रिका ॥
ताम्रार्द्धं क्ली कांस्यं इति त्रि
काण्डशेषः ताम्राक्षः पुं कोकिलः इ
तित्रिकाण्डशेषः ताम्रिकः पुं कंसकारः इतिशब्द
रत्नावली ताम्रनिर्मिते त्रि यथा
कार्षिके ताम्रिके पणः इत्यमरः
ताम्रिका स्त्री गुंजा इति राजनि
र्घण्टः मानरंध्रा वाद्य इतिभूरि
प्रयोगः ॥
ताम्री स्त्री वाद्यविशेषः तत्प
र्यायः मानरंध्रा २ विकारिका
३ इति त्रिकाण्डशेषः ॥
ताम्बूलं क्ली पर्णं पानइति
भाषा अस्य गुणाः कटुत्वं ।
तिक्तत्वं उष्णत्वं मधुरत्वं क्षा
रत्वं कषायत्वं वात कृमिक
फ दुःख दोष ॥ ॥

नाशित्वं कामाग्नि सन्दीपनत्वंस्त्री
संभाषण भूषणत्वं इति वक्त्र
पाटवात् स्यात् कांति कारित्वं
सभेत्यिते भक्ते च शस्तत्वं दंता
स्यदृगादे त्याज्यत्वं स्वर्गेपितृ
लभत्वंच इतिराजवल्लभः अपि
च तीक्ष्णत्वं पीनस कास नाशि
त्वं रुच्यत्वदाहकारित्वंच कृष्णप
र्णस्यगुणाः तिक्तत्वं उष्णत्वं कषा
यत्वं दाहवक्त्रजाड्यमलधारित्वं
च शुभ्रपर्णस्यगुणाः श्लेष्म वा
तामयनाशित्वंपथ्यत्वं रुच्यत्वं दी
पनत्वं पाचनत्वंच सद्यस्त्रोटिततां
बूलभक्षणगुणाः मुखरोगजाड्य
दोषवातारोचकरक्तमलविष्टंभ
वांतिकारित्वं त्रिरात्रत्रोटितभ
योजलयोजित तांबूल[illegible]गुणाः
उत्तमत्वं रुचि बल कारित्वं ॥
त्रिदोषार्ति नाशित्वंच ॥
शिरापर्णतशोष्विल्पकुर्यात्सा
स्वहृद्भसः पीसी त्वग्दोष दत्तस्य
भवितं तत्क्षितास्तिते अनिधायमु
खेपर्णपूगंखादयतेनरः मति
भ्रंशो दरिद्रः स्यादंतेनस्मरते हरि
इति राजनिर्घण्टः पर्णमूलेवसे
द्व्याधिः पर्णाग्रेपापसंचयः ।

चूर्णपर्णे हरेदायुः शिरा बुद्धि
विनाशिनी नाग्रग्रे विषं मूले
मध्ये लक्ष्मी व्यवस्थिता तस्मा
दग्रं च मूलं च मध्यं पर्णस्य वर्ज
येत् चूर्णाधिकं हरति गंध
मधाधिपूगं रागं तथाधिकदलं
च सुगंधिकारि तांबूल मुत्तम
मिदं रसनाग्रभिन्नपर्णं निशास्व
धिकं खदिरं तपनामह्नि तांबूलं
नहितं प्रोक्तं शरीरे रक्तदुर्बले
ज्वरास्यशोषपिपासमदमूर्छा
स्विरोगिषु तांबूलास्यप्रयोगात्
स्यात्क्षोषः पित्तानिलास्त्रता देह
दृक् केश दंताग्नि श्रोत्रवर्णव।
लक्षयः इति राजवल्लभः विनाप
र्णं मुखे दत्वा गुवाकं भक्षयेद्यदि
तावद्भवति चंडालो यावद्गंगां न
गच्छति इति कर्मलोचनं ॥
तांबूलं विधवा स्त्रीणां यतीनां
ब्रह्मचारिणां तपस्विनां च विप्रे
द्र गोमांससदृशं फलं इति ब्रह्म
वैवर्ते ब्रह्मखंडे कुमकं इति
मेदिनी ॥
तांबूलकरंकः पुं तांबुलपात्रं पा
नेर वाटा इति भाषा तत्पर्या
यः स्थगी २ इति हेमचंद्रः ॥

तांबूलदः त्रि तांबूलदाता तत्
पर्यायः वागुलिकः २ इति
त्रिकांडशेषः ॥
तांबूलपत्रः पुं पिंडालुः इति
राजनिर्घंटः
तांबूलरागः पुं मसूरः इति हा
रावली तांबूलस्य रंगं च ॥
तांबूलवल्लिका स्त्री तांबूली इ
ति शब्दरत्नावली ॥
तांबूलवल्ली स्त्री तांबूललता पा
नेरगाछ इति भाषा तत्पर्यायः
तांबूली २ नागवल्ली ३ इत्यमरः
पर्णलता ४ सप्तशिरा ५ सर्पलता ६
फणिवल्ली ७ भुजगलता ८ भक्ष्य
पत्री ९ इति राजनिर्घंटः तांबूल
वल्लिका १० पर्णवल्ली ११ तांबूलिः १२
इति शब्दरत्नावली नागिनी १३
नागवल्लरी १४ इति भावप्रकाशः
तांबूली स्त्री तांबूलवल्ली इत्यमरः
ताय ऋ ङ. पालने: संतनौ विस्ता
र इति यावत् इति कविकल्पद्रुमः
तायिकः पुं तजिकाभिधदेशः ॥
इति हेमचंद्रः ॥
तारं क्ली रूप्यं इति मेदिनी ॥
मुक्ता इति राजनिर्घंटः ॥
तारः पुं वानरविशेषः मुक्ता ॥

विशुद्धिः शुद्धमौक्तिकः इति मे
दिनी प्रणवः इति तंत्रं तरणं
इति विश्वः कुर्चबीजं इति तं
त्रसारः ॥
तारः त्रि अत्युच्चशब्दः इति
मेदिनी स्फुरितकिरणः निर्म
लः इति धरणिः ॥
तारकं क्ली चक्षुः इति मेदिनी
तारकं क्ली स्त्री चक्षुस्तारा न
क्षत्रं इति मेदिनी ॥
तारकः पुं दैत्यविशेषः कर्ण
धारः इति मेदिनी भेलकः इ
ति शब्दरत्नावली त्रातरि त्रि
इति मेदिनी ॥
तारकजित् पुं कार्त्तिकेयः इत्य
मरः ॥
तारकब्रह्म क्ली षडक्षरमंत्रवि
शेषः यथा षडक्षरमहामंत्रं तार
कं ब्रह्म उच्यते ये भजंति च मां भ
क्त्या तेषां मुक्तिर्न संशयः रामाय
नम इत्येवमुच्चार्य मंत्रमुत्तमं सर्व
दुःखहरं चैतत् पापिनामपि मुक्ति
दं इमं मंत्रं जपन्नित्यममलस्त्वं भवि
ष्यसि भस्मास्थिधारणादस्य सं
भूतस्यापि विस्तरपि मंगलं तदभूत्
सर्वं मंत्रोच्चारणात् प्रभात् ॥

त्वमप्यनेन श्रीराम तारकाख्येन
मंत्रतः भूत्वा कार्पण्यविस्तनाथो
मदाज्ञापरिपालकः कृत्वा मुक्ता
न्जीवमात्रान् मानुषादीन् परं
पदं प्रयास्यसि निर्भयमंत्रप्रभावात्
प्रापयिष्यसि इति संदिष्टमावि
स्तु विसर्जमरुक्कणान् इति पा
द्मोत्तरखंडे श्रीशिवं प्रति श्री
विष्णुवाक्यं अपि च मुमूर्षोर्म
णिकर्ण्यां तु अर्धोदकनिवासिनः
अहं दिशामि ते मंत्रं तारकं ब्रह्म वा
चकं ॐ श्रीराम राम रामेत्येतत्ता
रकमुच्यते अतस्त्वं जानकीनाथ
परं ब्रह्म विनिश्चितं इति पाद्मो
त्तरखंडे श्रीरामं प्रति श्रीशिव
वाक्यं ॥
तारका स्त्री क्ली नक्षत्रं कनीनि
का इति मेदिनी इंद्रवारुण्यां स्त्री
इति राजनिर्घंटः ॥
तारकारिः पुं कार्त्तिकेयः इति हे
मचंद्रः ॥
तारकितं त्रि तारकायुक्तं यथा
तारकादेरितः तारकितं नभः
इति सुपद्म व्याकरणं तथा च
सितनिशादृशादि स्फुटदंतुरपत
न करगगणाधिप तारकितांबरः

इतिनैषधं ॥
तारकिनी स्त्री रात्रिः इति राज
निर्घण्टः ॥
तारणः पुं भेलकः इतिशब्दर
त्नावली तरणकारयितरि त्रि
तारणिः स्त्री नौका इतिहारावली
तारतण्डुलः पुं धवलयावनालः
इतिराजनिर्घण्टः ॥
तारतम्यं क्ली तरतमयोर्भावः
न्यूनाधिक्यं यथा निर्धनं निधन
मेतयोर्द्वयो स्तार तम्यविधिम् ।
गघचेतसा बोधनाय विधिना वि
निर्मिता रेफ एवजयवैजयंतिका
इत्युद्भटः ॥
तारदी स्त्री तरदीवृक्षः इति ।
राजनिर्घण्टः
तारपुष्पः पुं कुंदवृक्षः इति
राजनिर्घण्टः ॥
तारलः त्रि विटः इति भूरिप्र
योगः ॥
तारविमला स्त्री धातुविशेषः
इति शब्दार्थकल्पतरुः ॥
तारशुद्धिकरं क्ली सीसकं इ
ति राजनिर्घण्टः ॥
तारा स्त्री पुं नक्षत्रं इत्यमरः
यथा एक तारं नभो दृष्टा ॥
स्मर्त्तव्यो नारदो मुनिः तावद्भव
तिचंडालो यावदन्या न पश्यति
इति कर्मलोचने अक्षिमध्यं
इति मेदिनी शेषस्य पर्य्यायः
विम्बिनी २ कनीनिका ३ इति
राजनिर्घण्टः तारका ४ इत्यम
रः तारास्त्री बुद्धदेवताभेदः ॥
बृहस्पतिभार्य्या इतिमेदिनी ॥
वालिभार्य्या सा सुषेण वानर
कन्या इति रामायणं चीडा ।
मुक्ता इति राजनिर्घण्टः ॥
द्वितीयाशक्तिः यथा लीलया
वाक् प्रदा चेति तेन लील सर
स्वती तारकत्वात् सदा तारा सु
ख मोक्षप्रदायिनी उग्रापत्तारिणी
यस्मादुग्रतारा प्रकीर्त्तिता अस्या
ध्यानं यथा प्रत्यालीढ पदार्पितां
घ्रिशवहृद्घोराट्टहासा परा खड्गे
न्दीवरकर्त्रिखर्परभुजाहुंकारवीजो
द्भवा खर्वा नील विशाल पिङ्गल
जटाजूटैक नागैर्युता जाड्यंन्यस्य
कपालके त्रिजगतां हंत्युग्रतारा
स्वयं अपिच प्रत्यालीढ पदांघ्रि
रां मुण्डमाला विभूषितां ख
र्वां लंबोदरी भीमां व्याघ्रचर्म्मा
वृतांकटौ नवयौवनसंपन्ना ॥

पंचमुद्रा विभूषितां चतुर्भुजां
ललज्जिह्वांमहाभीमां वरप्रदां
खड्गकर्त्रि समायुक्त सव्येतरभु
जद्वयां कपालोत्पल संयुक्त
सव्यपाणियुगान्वितां पिंगोग्रै
कजटांध्यायेन्मौलावक्षोभ्यभूषि
तां वालार्क मंडलाकार लोचन त्र
यभूषितां ज्वलच्चितामध्यगतां
घोरदंष्ट्रां करालिनीं स्वावेशा ।
स्मेरवदनांह्यलंकार विभूषितां
विश्वव्यापकतोयांतःश्वेतपद्मो
परिस्थितां अक्षोभ्यदेवीमूर्द्धन्य
स्त्रिमूर्त्तिर्नागरूपधृक् इत्यादि
शक्ति ध्यानं यथा श्यामवर्णां त्रि
त्रिनयनांद्विभुजां वर पंकजे ॥
दधानां बहुवर्णाभि बहुरूपा
भिरावृतां शक्तिभिः स्मेर वदनां
स्मेरमौक्तिक भूषणां रत्नपादु ।
कयोर्न्यस्तपादांबुजयुगां स्मरेत्
इति तंत्रसारः ॥
तारापतिः पुं शिवः चंद्रः बृह
स्पतिः वाली सुग्रीवः इति पु
राणं ॥
तारापथः पुं आकाशः इतिह
लायुधः तारापीडः पुं चंद्रः इति
त्रिकाण्डशेषः ॥
ताराभूषा स्त्री रात्रिः इति राज
निर्घण्टः ॥
ताराभ्रः पुं कर्पूरः इति राज
निर्घण्टः ॥
तारामंडलः पुं ईश्वरगृहविशेषः
इतिशब्दरत्नावली ॥
तारारिः पुं विटमाक्षिकः इति
हेमचंद्रः ॥
तारिका स्त्री तालरसः ताडीर
तिभाषा यथा संविदाकालकू
टंचताम्रकूटंच धुस्तूरं अहिफे
नंखर्जूररसस्तारिकातरिता तथा
इति कुलार्णवतंत्रं ॥
तारिणी स्त्री बुद्धदेवताभेदः
तत्पर्य्यायः तारा २ महाश्रीः ३
ओंकारा ४ स्वाहा ५ श्रीः ६ मनो
रमा ७ जया ८ अनंता ९ शिवा १० ॥
लोकेश्वरात्मजा ११ खदिरवासि
नी १२ भद्रा १३ वैश्या १४ नीलस
रस्वती १५ शंखिनी १६ महातारा
वसुधारा १८ धनंददा १९ त्रिलोच
ना २० लोचना २१ इतित्रिकाण्डशे
षः द्वितीयाशक्तिः यथा अथभे
दान्प्रवक्ष्यामि तारिण्याः सर्वसिद्धि
दान् येषां विज्ञानमात्रेण जीवन्मु

कस्त साधकः कवितांलभतेस्फु
द्दामनर्गलविजृंभिणीं पांडित्यं
सर्वशास्त्रेषुधनैधनपतिर्भवेत्
राजद्वारेसभायांच विवादे व्य
वहारके सर्वत्रजयमाप्नोतिबृ
हस्पतिरिवापरः इति तंत्रसारः
अस्याध्यानंताराशब्देद्रष्टव्यं ॥
तारुण्यं क्ली यौवनं इत्यमरः
तारेयः पुं वालिपुत्रः इति ज
टाधरः ॥
तार्किकः त्रि तर्कशास्त्रवेत्ता
तर्काध्ययनकर्त्ता इतिव्याकरणं
स षड्विधो यथा वैशेषिकः १
औलूक्यः २ वार्हस्पत्यः ३ नास्ति
कः ४ लौकायतिकः ५ चार्वाकः
६ इतिहेमचंद्रः ॥
तार्क्ष्यः पुं कश्यपः यथा ममथ्य
तरसाराक्षः पाल्लांदीक्षेयपत
गान् पश्यतांसर्वलोकानांता
र्क्ष्यपुत्रःसुधामिव इतिश्रीभागव
तं तार्क्षी स्त्री पातालगरुडीलता
इतिराजनिर्घण्टः ॥
तार्क्ष्यं क्ली रसांजनं इतिमेदिनी ता
र्क्ष्यः पुं अश्वः सर्पः गरुडाग्रजः
गरुडः इतिमेदिनी शालवृक्षः ।
स्वर्णं इतिशब्दरत्नावली ॥ ।

अश्वकर्णवृक्षः स्यंदनं इतिहे
मचंद्रः ॥
तार्क्ष्यजं क्ली रसांजनं इतिभा
वप्रकाशः ॥
तार्क्ष्यध्वजः पुं विष्णुः इति हे
मचंद्रः ॥
तार्क्ष्यनायकः पुं गरुडः इति
राजनिर्घण्टः ॥
तार्क्ष्यप्रसवः पुं अश्वकर्णवृक्षः
इतिराजनिर्घण्टः ॥
तार्क्ष्यी स्त्री वनलताविशेषः इ
तिशब्दरत्नावली ॥
तालं क्ली हरितालं तालीशप
त्रं इतिराजनिर्घण्टः दुर्गासिंहा
सनं इतिहेमचंद्रः तालफलंच
तालः पुं वृक्षविशेषः तत् प
र्य्यायः तालद्रुमः २ पत्री ३
दीर्घस्कंधः ४ ध्वजद्रुमः ५ तृण
राजः ६ मधुरसः ७ मदाढ्यः ८
दीर्घपादपः ९ चिरायुः १० तरु
राजः ११ दीर्घपत्रः १२ गुच्छपत्रः १३
आसवद्रुः १४ इतिराजनिर्घण्टः
लेख्यपत्रः १५ महोन्नतः १६ इ
तिभावप्रकाशः अस्यगुणाः
मधुरत्वं शीतत्वं ॥ ॥

पित्त दाह श्रमापहत्वंच ॥ ॥
अस्य रस गुणाः कफ पित्त दाह
शोफनाशित्वं मदकारित्वंच ॥
तत्फलगुणाः शीतलत्वं वल्य
त्वं स्निग्धत्वं स्वादुरसत्वं गुरुत्वं
विष्टंभित्वं वातपित्तास्रतृनदा
ह क्षयनाशित्वंच इतिराजनिर्घ
ण्टः पित्त रक्त श्लेष्म विवर्द्धन
त्वं दुर्जरत्वं बहुमूत्रत्वं तंद्राभि
ष्यन्दिशुक्रदात्रत्वंच इतिभावप्र
काशः वात कृमि कुष्ठ रक्त पित्त
नाशित्वं बृंहणत्वं हृद्यत्वं स्वादु
त्वंच इतिराजवल्लभः तद्बीजस्य
अर्थात् ताल शस्यस्य गुणाः मू
त्रकरत्वं स्निग्धत्वं वात पित्त ह
रत्वं गुरुत्वंच तदस्थिमज्जगुणाः
मधुरत्वं मूत्रलत्वं शीतलत्वं ।
गुरुत्वंच तालाम्बुगुणाः पित्त
नाशित्वं शुक्र स्तन्य वृद्धि का
रित्वं गुरुत्वंच इतिराजनिर्घण्टः
तालज तरुणतोयगुणाः अति
शयमदकारित्वं तदेवाम्लीभूतं
पित्त वात दोषकृत् इति भावप्र
काशः कफ कृमि हरत्वं रुच्यत्वं
वातलत्वं दुर्जरत्वंच इतिराजवल्लभः

तालप्रलम्बगुणाः मूत्रलत्वं तत
रोगनाशित्वंच इतिराजनिर्घण्टः
ताल तरुण मज्ज गुणाः कि
चिन्मदकरत्वं लघुत्वं श्लेष्मका
रित्वं वातपित्तनाशित्वं सस्नेह
त्वं मधुरत्वं सारकत्वंच इतिभा
वप्रकाशः तालशिरोगुणाः
स्वादुत्वं तिक्तत्वं कषायत्वं मू
त्रानेकरोगनाशित्वं वलप्राण
शुक्रवृद्धिकारित्वंच इतिराजव
ल्लभः गीतकाल क्रिया मानं य
येत्वर इयत् काले गेयः इयत्
कालंविलंवितं इयत् कालं द्रुतं
इयत् कालमध्यमितिवोधयि
तुं ईदृशो हस्ते यंगुल्यांकुंचनप्र
सारणादिक्रियाभिर्नर्त्तितव्यंगा
तव्यंचेतिकालक्रिययोः प्रमा
णंतालः सोंऽजे इद मियत् का
लं गेयमितिकालेनागल्पाघा
कुंचनादिक्रियामानं तालइति
कालस्यएकद्वित्रि मात्राद्युच्चा
रणानियमितस्य क्रियायाः प
परिसंवादात्मिकायाः परिच्छेद हे
तु साल इति मधुः कालेन नर्त्तन
गलवादनक्रियाणांमानं तालः ता
रादेककाल मेषांविरामस्तालेइत्य

न्या इत्यमर टीकायां भरतः॥
तस्मात्पन्निर्यथा गौरीहरयोर्न्द
त्येनतालोवभुवा तस्यकारणं
क्रिया कालस्य हर नत्यस्य ता
एवं गौर्य्या नत्यस्य लास्यं इ
तिसंज्ञा अर्थात पुरुषनृत्यस्य
ताएवंनार्य्यान्तस्यलास्यमि
तिनाम ताएवस्याद्यादरेणला
स्यस्याद्यादरेणचमिलित्वा ताल
इति संज्ञाजाता इतिसंगीतशास्त्र
तस्यभेदा यथा चच्चत्पुट १ चा
चपुटः २ षट्पितापुत्रकस्तथा ३
उद्घट्टकः ४ सन्निपातः ५ कंक
णः ६ कोकिलारवः ७ राजको
लाहलो ८ रंगविद्याधर ९ शची
प्रियो १० पार्वतीलोचनो ११ राज
चूडामणि १२ जयश्रियो १३ वाद
काकुल १४ कंदर्प १५ नलकुवर
१६ दर्पणः १७ रतिलीलो १८ मो
क्तपतिः १९ श्रीरंगः २० सिंहविक्र
मः २१ दीपको २२ मल्लिकामोदो
२३ गजलीलश्च २४ चर्चरी २५ कु
हक्को २६ विजयानंदो २७ वीर
विक्रम २८ टेंकिके २९ रंगाभरण
३० श्रीकीर्त्ति ३१ वनमालि ३२ च
तुर्मुखः ३३ सिंहनंदन ३४॥

नंदीश ३५ चंद्रविंब ३६ द्वि
तीयकाः ३७ जयमंगल ३८ गंध
र्व ३९ मकरंद ४० त्रिभंगयः ४१
रतितालो ४२ वसंतश्च ४३ जगझ
म्पो ४४ गारुगिणः ४५ कवि
शेषर ४६ घोषोव ४७ हरवल्लभ
भैरवौ ४८ गतप्रत्यागतो ४९ मल्ल
तालो ५१ भैरवमस्तकः ५२ सर
स्वतीकंठाभरणः ५३ क्रीडा ५४
निःसारु रेवच ५५ मुक्तावली
रंगराज ५७ भरतानंदो ५८ दि
तालकाः ५९ सम्पक्केष्टक ६०
इत्यादि ताला भरत संमताः
संक्षेपतो निगदिता अथैषांल
क्षणं यथा अर्द्धमात्रं द्रुतं ज्ञे
मेकमात्रं लघु स्मृतं द्विमात्रं
तु गुरु ज्ञेयं त्रिमात्रंतु प्लुतं मतं
तालेचच्चत्पुटे ज्ञेयं गुरु द्वंद्वं ल
घुः प्लुतः १ गुरुर्लघुः प्लुतश्चै
वभवेच्चाचपुटाभिधे २ गलगाल
गलाश्चैवषट्पितापुत्रके मताः ३
उद्घट्टकेत्रगमताः ४ सन्निपाते
गुरुर्मतः ५ चतुर्विधः परिज्ञेय
स्तालः कंकणनामकः ६ इणः
खेडः सम एव विषमश्चैव कथ्य
ते लचतुष्कं गणो स्तो ॥ ॥

खंडे विंदुद्वयं गुरुः यगणस्तु समे
ज्ञेय स्तगणो विषमे भवेत् ख
चतुष्कं सयत्मत्र गुरुविंदुचतुष्ट
यं सयमत्र लघुश्चैव तालोयं।
कोकिलारवः ७ लचतुष्कसय
त्यत्रेवद्वयंस्वत्रयंलघुः लघु विं
दुद्वयंचेति राजकोलाहलाभिधे
८ खद्वयंद्वौप्लुतौयत्ररंगविद्या
धरः स्मृत ९ लघुनि त्रीणि यत्र
स्युर्गुरूणि त्रीणि यत्रैवे प्लुतद्व
येचयत्रास्तिसतालः स्याच्छचीप्रि
यः १० खद्वयंगुरुर्लोविंदुर्गो प्लु
तौगौ प्लुतो पुनः यत्र ताल
सविज्ञेयः पार्वतीलोचनाभिधः
११ राजचूडामणौविंदुर्लश्चविंदु
र्लगौमतौ १२ रगणोनो गुरु
श्चैवजयश्रीरिति कथ्यते १३
प्लुतोलघुचतुष्कचमौनोद्रुतयुग्मं
लघुः लचतुष्कंविनाशंद्वे तालः
स्याद्वादकाकुलः १४ द्रुतद्वयंय
कारश्चकन्दर्पेपिप्रकीर्तितः १५
चत्वारो गुरवो यत्र चत्वारः प्लु
तका अपि लघुद्वयाणिचत्वा
रितालो ऽयं नलकूवरः १६ विंदु
द्वयं गुरुश्चैव भवेद्यत्र स दर्पणः
१७ रतिलीलेवियातगलघुद्वन्द्वं।

गुरुद्वयं १८ आदौषोडशगुरवो
द्वात्रिंशल्लघवस्ततः चतुःषष्टि
द्रुतायत्रसो ऽयंमोक्तपतिर्मतः
१९ श्रीरंग संज्ञके ताले मगणा
लघुप्लुतौ मतौ २० सिंहविक्रम
तालेत्रमगणोनखगाः खगौ २१
प्लुतो लघुः प्लुतश्चैव तालेदी
पक नामनि २२ ताले स्यान्मल्लि
कामोदे लद्वयं खचतुष्टय २३
लचतुष्कंविरामान्तेगजलीले
प्रकीर्त्तिते २४ अष्टद्रुतास्तच
चैर्य्यांविरामान्तेद्रुतो लघुः २५ द्रु
तद्वयं २६ भवेद्युर्विजयानंदे लत्र
यंचलघु त्रयं २७ वीरविक्रमता
लेतद्रुतौलगौ ततःप्लुतः २८ टें
किकारगणेन स्यादेकेनैवहि
तास्यदे २९ भगणो ग प्लुतो स्या
तोरंगाभरणनामके ३० श्रीकी
र्त्तिसंज्ञकेतालेगुरुद्वंद्वं लघुद्व
यं ३१ चतुर्द्रुतालघूद्वौतद्रुतो
गोवनमालिनि ३२ चतुर्मुखा
भिधेतालेयगणानन्तरस्ततः
भगणः प्लुतोलगौविंदुद्वयंगौ
नःप्लुतस्तथा लघुःप्लुतोद्रुत
श्चैकोलघुद्वयमथापिच निशाद्वेल
चतुष्कंच तालेस्यात् सिंह

नंदने गोलघु गौलघुः स्तु
न स्ताले नंदीश्वरेमताः ३५
गौद्रुतौ नोस्तु तद्वंद्वंद्व विश्व
प्रकीर्तितं ३६ द्रुतद्वंद्वंलघुश्च
कस्तालेस्यात् द्वितीयके ३७
चत्वारो गुरवो विंदुश्च न्नारस्य
स्नता अपि सकारस्य यकार
स्य जयमंगलमामनि ३८ विं
द्वोदशाघट्लाश्चतालेगंधर्व
संज्ञके ३९ मकरंदेद्रुत द्वंद्वंल
घुद्वंद्वसध्या गुरुः ४० गुरुर्लघुः
स्तनश्चैव त्रिभंगिः परिकीर्त्तितः
४१ अत्रवति तालस्य लक्षणंपति
तं ४२ वसन्त ताले कर्तव्यानगणो
मगणस्तथा ४३ जगकस्यगुरु १
श्चैकोविरामांतंच त्व द्वयं ४४
गस्तु तौ लोद्रुतौ लश्च स्तनो गारु
णि ४५ शरवे ४६ स्तुतः श्रून्य
नगौलश्च त्वद्वयं च ततो लघुः
त्वचतक्षं विनाशद्वंयत्र चोषः
सउद्यते ४७ हरवल्लभताले
चस्तुतौ लो गोचत्वद्वयं ४८ भ
गणः स्तुतौ गणौ गयौ स्तुतो ल
घुश्च भैरवे ४९ गतप्रत्यागते
ताले लोमो गौ तौ प्रकीर्तितौ ५० व
तर्लघुर्मलताले विरामांतद्रुत द्वयं लगोगो

नो नगौ गश्च त्वद्वयं लद्वयं पुनः
न चतक्षं विनाशद्वं ताले भैरव
मस्तके ५१ सरस्वतीकंठाभरणे
गो लघुश्चकृतद्वये ५२ एकएव
स्तुतो यत्र क्रीडातालः स उच्यते
५४ द्रुतद्वयं विरामांतं तालेनिः
साहकेमतं ५५ त्वत्रयं सविरा
मांतं नो पुनः त्वत्रयंतथा स्तु
तौगः त्वयुगंगश्च यत्र मुक्ताव
लीत्वसा ५६ लगो विंदुयुगं गौलो
रंगराजे प्रकीर्त्तितः ५७ त्वद्व
यंस विरामांतं गुरुः स्तुत द्वयं ल
घुः यत्र ताले स विज्ञेयो भरता
नंदसंज्ञकः ५८ आदिताले लघु
श्चैकस्माह भरतो मुनिः ५९ ग
गणश्च स्तुताद्यंतः संपकेष्टकता
लके ६० एकाधिकशते तालेष
ष्टि र्मुख्या तमा इमे अथ प्रस्तारः
गुरुः स्तु तायो भागे न गुर्वधोभा
गतो लघुः द्रुतं लघो रधोभागेत्र
लेखनस्यात् पंक्तिका उद्दमाचकला
पश्चादिस्य प्रस्तारण क्रमः स
र्व स्तुतो न समारभ्य मात्रा नि
वद्धनिर्मितातं तावत् प्रस्तार
येदमे यावत् सर्वद्रुतंभवेत्
अत्र ताल प्रस्तारे पिंगलवत्रश्चैदिष मेरु

पताकादयः सन्ति वाफल्प भया
त्रोक्ताः अथस्तुतादि मात्रा भेदे
नताल ध्यानतं ताले निस्तानद्व
स्त्वः स्तु न मन्त्र च टयेद्ध्यानमेकं
सशद्वंनतपश्चात् द्वोच ध्यातौ नि
नदविरहितौ दर्शयेद्वंद्वंतो ऽयः
श्रून्यत्वात् फक्का तालाविति॥
जगतिपुनः सत्रसिद्धौ सनदा
विस्य ध्यान त्रयं नत्रिकलनत्रव
ह्निर्वद्वयेद्वलकारं एको ध्यानःस
शद्वोद्विकलस्द्व गुरौ शद्वहीनस्त
ध्यानः सोप्युद्वंयाति लीलावल
यवलयिनोन्मान हस्तांगुलीभिः
किंचोद्वैकैकमात्रा समुदयिनिल
घौध्यातपको निनादीध्यात्यामात्रा
द्वंभाजि द्रुतवपुषि लघो रद्वंता
देन ध्यानः इति ताल ध्यानन प्र
कारः श्रीरंगो मणिवन्धकंक
णवद्वो मुक्तावलीमंडनःक्रीडा
हेत वसंतरक्त द्वदयो गंधर्व ली
ला रतः सात्वात्मोतपतिश्चतत्त्व
त्वनतो यो राजचूडामणिः सोयं
तालमयस्तरणद्रु तणवतसंसा
रवंधं हरिः अपिच नंदीशाः द्व
तनुर्मत्वेनवनत स्तचंद्रविस्तार
यः कंदर्पोनलक्तवरश्चनतितो य

स्यातित्रूपेतले कंवंतः किल।
कोकिलारवभवो वाद्वोजयश्री
रेद्वो ताला त्मामरजिद्धिनतुसग
णः संसारपाशावली व्यातोयः
कविचक्रवर्त्तिपदतो विद्याचनेरं
चितः सोभद्रेय मिमं यमज्ञेन य
शाः सोऽजीजनत श्रीधरः तस्य
श्रीलक्ष्मभंकरस्यभणितो संगीत
दामोदरे तालाद्यः स्तवकोद्युत
स्तवकृतोयातस्तृतीयः पदः॥
अन्यच्चाप्यादावष्टस्तथारुद्रोत्र
स्तंद्वंद्वश्चतद्दशाः दशावतारवं
धादिस्तपनाद्यानतः परं अथा
ष्टतालभेदाः आडः १ दोजः २
ज्योतिः ३ चंद्रशेखरः ४ गंजनं
पंचतालः ६ रूपकं ७ समता
लः ८ अथ रुद्रतालस्यभेदाः
वीरविक्रमः १ विषमसमुद्रः २
यरणं ३ वीरदर्पाकः ४ मण्डु
कः ५ कंदर्पः ६ जौशपाद्विड ः
प्रवचरणं ८ दशकोषी ९ ग
जेंद्रगुरुः १० छुटका ॥ अथव
स्नताल भेदाः अस्त १ विराम
अस्त २ षट्कला ३ सममात्रा
अथेद्रताल भेदाः देवसारः १ दे
वचारी २ मदनदोला ३ गुरुगा
र्वः ४ पंचाली ५ इंद्रभाषः ६

५
७
८

अथचतुर्दशतालभेदाः चित्र
तालः १ चंद्रमात्रा २ देवमात्रा ३
अर्द्धज्योतिका ४ स्वर्गसारः ५ द्वा
मष्ट ६ धराधारा ७ वसंतवाक् ८
काककला ९ कीरशाखा १० तोड्वी
११ हर्षधारिका १२ भाषा १३ अर्द्धमा
त्रा १४ तेषां लक्षणानि यथा एक
तालस्ततः शून्ययुगलं तालिका
परे संगीतः प्रथमः सार आड़ १
तालः प्रकीर्त्तितः १ एकतालं
च शून्यंच क्रमेणापित्रिधाभवे
त् शेषशून्यं कलाभेदेदोजाख्य
स्य भवे त्स्थक् २ प्रथमं युगलं
तालं एक एकस्तथा परे कला
भेदेगानभेदं ज्योतिमिश्रपरि
कीर्त्तितं ३ चंद्रश्चंद्रस्तथा युग्म
तथा चंद्र स्तथा परे षट्ताला
निभवंत्येवं चंद्रशेखर भाषितः ४
एकतालो भवेच्छेषः क्रमेणा
पि चतुष्टयं शेषशून्यं गजेनैव
सर्वतो मुनि भाषितं ५ प्रथमं
युगलेचैव ततः परे तालमेककं
शेषयुग्मं तथा शून्यं पंचता
लं प्रकीर्त्तितं ६ युगलं प्रथ
तालं ततः परं त्वेकं शून्यकं शे
षच युगलं तालं रूपकं परि
कीर्त्तितं ७ ॥ एकतालं।

तथा शून्यं क्रमेणद्विविधंभवेत् ॥
शेषे युगलतालंच समतालंभवेत्
परं ८ एकतालं तथा शून्यं क्र
मेण त्रिविधं भवेत् ततः परं यु
गलं तालं मित्येवं वीरविक्रमः १
युग्मतालं तथा शून्यं ततः परं द्व
यतालकं शेषेच युगलं तालं
समुद्र विषमेस्मृतं २ युग्मता
लंच शून्यंच एक तालंच ततः परे
शेषेकत्र त्रिशून्यंच विषमे धरणी
भवेत् ३ एकतालं तथा शून्यं क्र
मेणापि त्रिधा भवेत् युगलं युग
लं पश्चात् सवीर दशकः स्मृतः
४ प्रथमं एक तालंचं ततः परं शू
न्यमेककं शेषैकत्र त्रितालंच
मंडूकस्य गति यथा ५ समतालं
यथा हर्षं तथा कंदर्प संज्ञितं
समताले भवेत् शून्यं कंदर्पे
नास्ति ततः पुनः ६ पंचतालात्
परं शून्यं ढोशपादिड़ मुत्तमं
अन्तर्द्वयं भवेत् त्रस्तसंग्रामस्य
यथा गतिः ७ एकतालं तथा
शून्यं क्रमेणापि द्विधा भवेत्
शेषैकत्र त्रितालंच ध्रुव चरण
भाषितं ८ एकताल मेकशून्य १
मित्येवंच भवेत् क्रमात् विरामं

एकतालं वारभेदे दशकोषिका
९ युगलं युगलं पश्चात् तदंतेप्ये
कतालकं शेषेच युग्मशून्यंच
गजेंद्रगुरु भाषितं १० युग्मशू
न्यं विरामेच एकतालं भवेत् क्र
मे छुटकाख्यानकं धीर संगीत
परिमिश्रितं ११ युग्मंच त्रस्तंप्रथ
मैकतालं किंचिद्विरामे पुनरेक
तालं त्रस्तस्य तालंच संगीत
मध्ये यथा कपोती हिकरोति ष्टा
हं १ युग्मतालं भवेत्रिंत एकता
लंच ततः परे शेषे द्वितीयशून्यंच
विरामत्रस्ततालकं २ प्रथमंचै
कतालंच युग्मशून्यं तथा परे
शेषैकत्र त्रितालेति षट्कलाख्य
लक्ष्यते ३ आदौ युग्मं तथा यु
ग्मं त्रितालंच तथा परे सम मात्रा
भवत्येषा त्रस्ततालांतरे स्वभे ४
स विरामं त्रितालंच एकं शून्यं तथा
परे शेषे त्रस्तं त्रितालंच देवसार
इतीर्य्यते १ द्वितय शून्यं विरामे
भवति ततश्च त्रितालानि शेषे
णाद्विशून्य मित्येवं देवचाली २
प्रथममेव युग्मतालं ततश्चा
देकशून्यं विरामे शेषे त्रितय
तालं भवतीति मदनदोला ३ ॥

युग्मतालं समारभ्य पंचतालं भ
वेत्तथा अन्तर्द्वंच तथा त्रस्तं गुरु
गंधर्वईरितः ४ श्रावणस्य यथा
धारा स्तथा तालो भवेद्बुनः पंच
तालान्तराणीति पंचालीति प्रकी
र्त्तिता ५ सविरामं चतुस्तालं त्रि
तालं शून्य मेततः मल्लारभेय
थाकेकाचूर्ण्यंतेइंद्रभाषितः ६
एकतालंच शून्यंच क्रमेण त्रि
तयंततः शेषे चतुष्टयं त्रस्तं चि
त्रतालइतीर्य्यते १ एकंचंद्रस्तथा
युग्मतालमथैकत स्वय शेषे १
त्रीणिच शून्यानि चंद्रमात्राभवेत्
परा २ प्रथमं षट्कतालंच अ
न्तर्द्वंतु भवेत् क्रमे शेषे युग्मंत
था शून्यं देवमात्राचसोच्यते ३ चं
द्र शून्यं त्रितालंच विरामेण क्रमे
ण तु अन्तर्द्वंतु भवत्येवं अर्द्ध
ज्योतिरिति स्थितिः ४ एके
कतालांतर युग्मतालात् शू
न्यत्रयं तत्परमेकतालं कला
भिदा शून्य भिदा समाख्यो
स स्वर्गसाराख्यनवीन तालः
युग्मशून्यं विरामेण द्वतालं
मिति क्रमात् द्वामाष्टाख्ये अंत
रे शून्यं इति सर्वत्र भाषितं ६
नवांबुदेदामिनि शीघ्र यान तथा

५

सुसंवद्ध सताललभानएगयुग्मंसत्र
संक्रमतश्चतालंशेषत्रितालंचरा
धराख्या ७ एकतालंच मूर्त्तंच क्र
मेणाप्यिचतद्वयं क्रमाताल त्रयंचै
व वसंतवाक् समुदाहृतः ८ सवि
रामंद्वयंतालंयुग्मतालं तथापरे
शेषैकत्र त्रितालंच भवेत् काक
कलेतिसा ९ त्रितालंच भवेद्धस्तं
तत्परंत्वेकतालकं शेषपिचत्रि
तालंचेतत्कीरवाहाप्रचक्षते १०
युग्मयुग्मंतथायुग्मंतालेत्वेकं
भवेत् क्रमात् शेषमूर्त्त कलाभे
दे नाएडवीति भवेत् एथक् ११
सविरामं द्वयं तालं युग्म मूर्त्त
च हर्षधारा प्रकीर्तिता १२ चंद्र
मूर्त्त विरामेण द्वयंतालं भवेत्
क्रमात् अनुद्रुतभवेद्गतंभाषा
ख्ये ताल मुत्तम १३ अनुद्रुतत्रि
तालंच द्वयंतालं विरामकं ३
त्पर्द्धमात्रा विज्ञेया संगीतभु
विसर्वतः १४ इतिसंगीतदा
मोदरः दष्णावतारप्रबंध
लक्षणं प्रबंधशाद्वेनित्य
नाद्यप्रबंधवाद्यलक्षणं ॥
वाद्यशाद्वे द्रष्टव्यं ॥ ॥
करतलं क्लीं ॥ ॥

मध्यमाभ्यांसंस्मितं करास्फालः
कांस्य निर्मित वाद्य भाण्डं ॥
त्मकः इति मेदिनी ॥
तालकं क्ली हरितालं इतिराज
निर्घंटः द्वारयंत्रं ताला इति भा
षा इति हेमचंद्रः तुवरिका इ
तिशब्दरत्नावली ॥
तालकाभः पुं हरितवर्णः इति
हेमचंद्रः तद्वति त्रि ॥
तालकी स्त्री तालसुरा ताडीइ
ति भाषा इतित्रिकांडशेषः ॥
तालध्वजः पुं वलदेवः इतिह
लायुधः ॥
तालध्वजा स्त्री पुरीविशेषः य
था अस्तितालध्वजा नाम नगरी
त्रिदिवोपमा इतिक्रियायोगसारः
तालपत्रं क्ली ताडंकः इत्यमरः
तालवृन्तस्यपर्णंच ॥
तालपत्रिका स्त्री मुषली ताल
मूली इतिराजनिर्घंटः ॥
तालपत्री स्त्री मूषिकपर्णी इति
मेदिनी ॥
तालपर्णं क्ली स्त्री मुरा नाम
गंधद्रव्यं इतिशब्दचंद्रिका ॥
तालपर्णी स्त्री मधुरिका इति
जटाधरः मुरा इत्यमरः ॥ ॥

तालपुष्पकं क्ली प्रपौण्डरीकं
इतिशब्दरत्नावली ॥
तालभृत् पुं वलदेवः इति त्रि
कांडशेषः ॥
तालप्रलंबं क्ली तालजटा यथा
तथा तालप्रलंबंच चूतं तत्तरु
जापदं इतिराजवल्लभः ॥
तालमूलिका स्त्री तालमूली
इत्यमरः तालमूली स्त्री स्वनाम
ख्यातद्रव्यं तत्पर्य्यायः अर्शो
घ्नी २ मुषली ३ ताली ४ खलि
नी ५ इतिरत्नमाला सुवहा ५
तालपत्रिका ६ गोधापदी ७ हे
मपुष्पी ८ भूताली ९ दीर्घकं
दिका १० अस्यागुणाः मधुरत्व
शीतत्वं हृष्यत्वं पुष्टिवलकफ
प्रदत्वं पिच्छिलत्वं पित्त दाहश्र
महरत्वंच इति राजनिर्घंटः
उष्णवीर्यत्वं द्रहणत्वं गुरुत्वं ।
तिक्तत्वं रसायनत्वं गुदज रो
गानिल नाशित्वंच इति भाव
प्रकाशः मुषलीच द्विधा प्रो
क्ताश्वेताचापरसंज्ञका श्वेतास्व
ल्पगुणोपेता अपराच रसाय
नी इतिराजनिर्घंटः ॥
ताललक्ष्मा न पुं वलदेवः इति

हेमचंद्रः ॥
तालवृन्तं क्ली व्यजनं तालपाता
ख्याख्या इतिभाषा इतिहेमचंद्रः
तस्यवायुःगुणाः त्रिदोष शमनत्वं
लघुत्वंच इति राजवल्लभः ता
लवृन्तकं क्ली व्यजनं इत्यमरः
तालवेचनकः पुं नटः इतिश
ब्दरत्नावली तालवेचनकोपि
पाठः तालव्यं त्रि तालुज्जातं इ
तिव्याकरणं ॥
तालक्षीरकं क्ली तालसंभूतत
वक्षीरं इति राजनिर्घंटः ॥
तालाख्या स्त्री मुरा इति शब्द
चंद्रिका ॥
तालांकः पुं वलदेवः इत्यमरः
करपात्रं शाकभेदः महालक्ष
ण संपूर्णो पुरुषः पुस्तकं हरः
इति हेमचंद्रः ॥
तालावचरः पुं नटः इति ॥
त्रिकाण्डशेषः ॥
तालिः स्त्री भूम्यामलकी इति
रत्नमाला ताली इत्यमरटीका
यांभरतः ॥
तालिकः पुं प्रसारितांगुलिपा
णिः तत्पर्य्यायः चपेटः २ प्रत
लः ३ तलः ४ प्रहस्तः ५ तालः ६

इतिहेमचंद्रः लिखितस्य निव
यनं तत् पर्य्यायः कावनी २ का
चनकी ३ इतिशब्दरत्नावली ॥
तालिका स्त्री चपेटः तालमूली
इतिशब्दरत्नावली तामवल्ली इ
तिराजनिर्घंटः तालितं क्ली भूलितपटः वाद्य
भाण्डं गुणः इत्यजयः ॥
तालिशः पुं पर्वतः इत्युणादि
कोषः ॥
ताली स्त्री ताड़ी ताड़ियात् इति
भाषा तामलकी भूइँ आमला
इतिभाषा इत्यमरः तवरिका।
इतिशब्दरत्नावली तालमूली
इति रत्नमाला ॥
मतिताली कुंचिकाविशेषः
इति हेमचंद्रः ॥
ताम्रवली इति राजनिर्घंटः ॥
सुराभेदः ताड़ी इति भाषा ॥
इति स्मृतिः ॥
तालीपत्रं क्ली तालीशपत्रं
इतिराजनिर्घण्टः ॥
तालीशं क्ली तालीशपत्रं ॥
इतिराजनिर्घण्टः ॥
तालीशपत्रं क्ली वृक्षविशेषः
त त्पर्य्यायः तालीशं २ पत्राढ्यं
३ शुकोदरं ४ धात्रीपत्रं ५ ॥
अर्कवेधं ६ करिपत्रं ७ करिच्छदं
८ नीलं ९ नीलाम्बरं १० तालं ११
तालीपत्रं १२ तमाह्वयं १३ ताली
शपत्रकं १४ अस्य गुणाः तिक्त
त्व उष्णत्वं मधुरत्वं कफ वात
कास हिक्का क्षय श्वास छर्दि दो
षनाशित्वच इतिराजनिर्घण्टः
लघुत्वं अरुचि गुल्माम वह्नि
मांद्य नाशित्वंच इति भावप्र ।
काशः भूम्यामलकी इति मे
दिनी ॥
तालु क्ली जिव्हेंद्रियाधिष्ठानं य
था मुखतस्तालुनिर्भिन्नं जिव्हा
तत्रोपजायते ततोनानारसो ज
ज्ञे जिव्हया योधिगम्यते इतिश्री
भागवतं तेलुया इति टाकरा
इतिचभाषा तत्पर्य्यायः काकु
दं २ इत्यमरः तालुकं ३ इतिरा
जनिर्घण्टः ॥
तालुजिव्हः पुं कुंभीरः इति
हेमचंद्रः ॥
भालरः पुं आवर्तः इतिहेम
चंद्रः ॥
तावकीनं त्रि तवइदं त्वदीयं।
तोमार पर इति भाषा इति ।
व्याकरणं ॥ ॥

तावत् अ साकल्यं अवधिः
मानं अवधारणं इत्यमरः ॥
प्रशंसा पक्षान्तरं इतिशब्द र
त्नावली ॥
तावरं क्ली धनुर्गुणः इति भूरि
प्रयोगः ॥
ताविषः पुं स्वर्गः समुद्रः इति
सिद्धान्तकौमुद्या मुणादिवृत्तिः
ताविषी स्त्री इंद्रकन्या नदी पृ
थिवी इतिसिद्धान्तकौमुद्या मु
णादिवृत्तिः ॥
तावीषः पुं स्वर्गः अम्बुधिः
कांचनं इतिमेदिनी ॥
तावीषी स्त्री चंद्रकन्या इति
मेदिनी ॥
तावुरिः पुं वृषराशिः इति
दीपिका ॥
तिक अर उ. गत्यां इतिकविक
ल्पद्रुमः ॥
तिक न आस्कंदे वधे इतिक
विकल्पद्रुमः तिलं क्ली पपटिकोष
षिः इतिहेम चंद्रः तिक्तः पुं रसविशेषः तित
इति भाषा स वायावाकाशगुण
बाहुल्यात् भवति इति शिव।
दासः तस्य गुणाः जंतु कुष्ठज्व
रार्तिकासदाह नाशित्वं रोच
नत्वं इतिराजनिर्घंटः शीतत्वं
तृषा मूर्छा पित्त कफ विषाक्त
क्लेश रक्त गद नाशित्वं स्वयमरो
चिष्णुत्वं कंठस्तन्यास्य शोधनत्व
वानलत्वं अग्निकारित्वं तास्या।
शोषणत्वं रूक्षत्वं लघुत्वंच अ
तियुक्तस्य तस्य गुणाः शिरःशू
ल मन्यास्तंभश्रमार्तिकम्पमूर्छा
तृषाकारित्वं वलशुक्रक्षयप्र
दत्वंच इतिभावप्रकाशः सुगंधः
इतिमेदिनी कुटजवृक्षः इतिशब्द
चंद्रिका वरुणवृक्षः इतिशब्दमा
ला तिक्तरसयुक्तेत्रि इत्यमरः ॥
तिक्तकः पुं पटोलः इत्यमरः
चिरतिक्तः चिरता इतिभाषा ।
इतिशब्दरत्नावली कृष्णखदिरः
इति शब्दमाला इंगुदीवृक्षः
इतिभावप्रकाशः ॥
तिक्तकंदिका स्त्री गंधपत्रा इ
तिराजनिर्घंटः ॥
तिक्तका स्त्री कटुतुंबी इतिश
ब्दरत्नावली तिक्तगंधिका ॥
स्त्रीवराहकांता इतिशब्दमाला ॥

तिक्तगुञ्जा स्त्री करंजः तत्प
र्यायः तिक्तरसा २ रसघ्ना ३
विषपर्कटी ४ इति हारावली
तिक्ततण्डुला स्त्री पिप्पली इ
तिराजनिर्घण्टः ॥
तिक्ततण्डी स्त्री कटुतण्डीलता
इति राजनिर्घण्टः ॥
तिक्ततुंबी स्त्री कटुतुंबी इतिर
त्नमाला ॥
तिक्तदुग्धा स्त्री क्षीरिणी अजशृं
गी इति राजनिर्घण्टः ॥
तिक्तधातुः पुं पित्तं इति राज।
निर्घण्टः ॥
तिक्तपत्रः पुं कर्कोटकः काक
रोल इति भाषा इति हेमचंद्रः ॥
तिक्तपर्वा पुं दूर्वा इतिजटाधरः
हिलमोचिका गुडूची यष्टिमधु इ
ति मेदिनी ॥
तिक्तपुष्पा स्त्री पाठा इति राज
निर्घण्टः ॥
तिक्तफलः पुं कतकवृक्षः इ
तिराजनिर्घण्टः ॥
तिक्तफला स्त्री यवतिक्तालता।
वार्त्ताकी षड्भुजा इतिराजनिर्घ
ण्टः तिक्तभद्रकः पुं पटोलः इति
शब्दचंद्रिका ॥
तिक्तमरिचः पुं कतकवृक्षः इति
राजनिर्घण्टः ॥
तिक्तरोहिणीका स्त्री कटुका
इतिरत्नमाला ॥
तिक्तरोहिणी स्त्री कटुका इति
राजनिर्घण्टः ॥
तिक्तवल्ली स्त्री मूर्वालता इति
रत्नमाला ॥
तिक्तवीजा स्त्री कटुतुंबी इति
राजनिर्घण्टः ॥
तिक्तशाकः पुं खदिरवृक्षः ब्राह्मणवृक्षः
पत्रसुंदरवृक्षः इति मेदिनी ॥
तिक्तसारं क्ली दीर्घरोहिषकतृ
णं इतिराजनिर्घण्टः ॥
तिक्तसारः पुं खदिरवृक्षः इति
रत्नमाला ॥
तिक्ता स्त्री कटुरोहिणी इतिमे
दिनी पाठा इति रत्नमाला।
यवतिक्तालता षड्भुजा इति
राजनिर्घण्टः छिक्कनी इति
भावप्रकाशः ॥
तिक्ताख्या स्त्री कटुतुण्डी इति
राजनिर्घण्टः ॥
तिक्ताङ्गा स्त्री पातालगरुडीलता

इतिराजनिर्घण्टः ॥
तिक्तिका स्त्री कटुतुम्बी इतिशब्द
रत्नावली ॥
तिग न हिंसायां आस्कंदे इतिक
विकल्पद्रुमः ॥
तिग्म क्ली तीक्ष्णं खरं तद्वति त्रि
इत्यमरः
तिग्मांशुः पुं सूर्यः इतिहलायु
धः तिच न चालने इतिकविक
ल्पद्रुमः तिज क तिक्तीकरणे इ
तिकविकल्पद्रुमः ॥
तिज ङ क्षान्तौ निशाने इतिकविक
ल्पद्रुमः ॥
तिजिलः पुं चंद्रः इत्युणादिकोषः
राक्षसः इति संक्षिप्तसारे उणादि
वृत्तिः ॥
तिण्टी स्त्री त्रिवृत् इतिशब्दचंद्रि
का तितउः पुं चालनी इत्यमरः
तितिभः पुं इंद्रगोपकीटः इति
हेमचंद्रः ॥
तितिल क्ली नंदकं नाद्या इति।
भाषा तैतिलकरणं तिलपि
ष्टं इत्यजयः ॥
तितिक्षा स्त्री क्षान्तिः इत्यमरः शी
तोष्णादि द्वंद्वसहिष्णुता इतिवेदा
न्तसारः ॥ ॥
तितिक्षितः त्रि क्षान्तः इति ज
टाधरः तितिक्षुः त्रि क्षमाशी
लः क्षान्तः इत्यमरः ॥
तित्तिरः पुं तित्तिरिपक्षी इति
शब्दरत्नावली ॥
तित्तिरिः पुं पक्षिविशेषः तीति
रि इतिभाषा तत्पर्यायः तित्ति
रः २ इतिशब्दरत्नावली तित्ति
रिः ३ तैत्तिरः ४ याज्ञवल्क्योदरः ५
अस्य मांसस्य गुणाः रुच्यत्वं ब
लत्वं वीर्यबलप्रदत्वं कषाय
त्वं मधुरत्वं शीतत्वं त्रिदोषश
मनंच इति राजनिर्घण्टः मुनि
विशेषः इतिविश्वः तैत्तिरीयशा
खा इत्युणादिकोशः ॥
तिथः पुं अग्निः कामः इतिसि
द्धान्तकौमुद्यामुणादि वृत्तिः
कालः इति त्रिकाण्डशेषः ॥
प्रावृट् कालः इति संक्षिप्तसा
रे उणादिवृत्तिः ॥
तिथिः स्त्री पुं चंद्रकलाक्रियारू
पा चंद्रकला क्रियोपलक्षितः
काल इतिवा तस्याः स्वरूपं य
था अमादि पौर्णमास्यन्ता या
एव राशिनः कलाः तिथयस्ताः स

मासान्ताः षोडशैव वरानने त
त्र प्रथम कला क्रिया रूपा प्रति
पत् एवं द्वितीयादि कला क्रि
या रूपा द्वितीयादिः सा च वृद्धि
रूपा चेत् शुक्ला क्षयरूपा चेत्
कृष्णा यथा तत्र पक्षे तु भौ मा
से शुक्ल कृष्ण क्रमेण हि चंद्र
वृद्धिकरः शुक्लः कृष्णः क्षयं द्व
त्यात्मकः पक्षस्त्वाद्यास्तु तिथ
यः क्रमात् पंचदश स्मृताः दर्श
नाः कृष्णपक्षेताः पूर्णिमांताश्च
शुक्लके गोभिलोक्तामावास्या
चंद्रकउपद्म्योर्भावापत्र सम
स्तत्र पातन्यायेन तारेपकावच्छे
देनसहावस्थानयुक्तार्क मंडला
च्चंद्र मंडलस्य राशिद्वादशांश
द्वादशांश भोगात्मक निर्गमरू
प वियोगेन शुक्लायाः प्रतिपदा
दि तत्तत् तिथ्युत्पत्तिः एवं
गोभिलोक पौर्णमासी चंद्रार्कसम
मराष्ट्रवस्थान रूप परम वियो
गानंतरमर्कमंडलप्रवेशाय चंद्र
मंडलस्य राशिद्वादशांशद्वादशांश भोगा
त्मकप्रवेशरूपसन्निकर्षेण कृष्णायास्त
त्तत्तिथ्योत्पत्तिरिति यथा अर्का निः
सृतः प्राचीं यद्यात्यहरहः शशी भा
गैर्द्वादशभिस्तत्स्यात् तिथिश्चांद्रमसं दिने त्रिं
शकस्तथा राशोर्भागद्वत्तमिथी
यते आदित्याद्विप्रकृष्टस्तु भाग
द्वादशकं यदा चंद्रमाः स्यात्तदा
प्रतिपदिति समभिधीयते सा देवकृत्ये
पूर्वाह्न युता ग्राह्या एकादश्युपवा
सातिरिक्त स्थले सर्वत्र त्रिसंध्य
व्यापिनी ग्राह्या अथ प्रतिपत् सा
च कृष्णा द्वितीयायुता ग्राह्या शुक्ला
अमावस्यायुता ग्राह्या कृष्णा प्रप
वासे द्वितीयायुता न ग्राह्या अत्रैते
लाभ्यंग कूष्माण्ड भक्षणं क्षौरं च
न कार्यं अथ द्वितीया सा च कृ
ष्णा पूर्वयुता शुक्ला परयुता ग्रा
ह्या भ्रातृद्वितीया तु अपरथाविभ
क्त दिन पंचमांशयुता ग्राह्या उभ
यदिने तत्लाभे परयुता ग्राह्या तत्र
बृहती भक्षणं न कार्यं अथ तृ
तीया सा च रंभाव्रतेतर देव
कार्येषु चतुर्थी युता ग्राह्या
रंभाव्रते तु द्वितीया युता तत्र मां
स भक्षणं पटोल भक्षणं च न
कार्यं ॥ अथ चतुर्थी सा च पं
चमी युता ग्राह्या विनायक व्रते
तृतीया ग्राह्या मंगलवारे शुक्लाच
तुर्थी अत्यंता अत्र मूलक भक्षणं
क्षौरं प्रदोषे अध्ययनं च न कार्यं भा
द्रमासे चतुर्थ्यां चंद्रो न द्रष्टव्यः

प्रमादाद् दृष्ट्वा सिंहः प्रसेन म
वधीत् सिंहो जांबवता हतः सु
कुमारक मा रोदीस्तव ह्येष स्य
मंतकः अनेन मंत्रेणाभिमं
त्रितं जलं पेयं आचारात् स्यम
तकोपाख्यानं च श्रोतव्यं ॥
अथ पंचमी सा च चतुर्थी यु
ता ग्राह्या अत्र बिल्वं न भोक्तव्यं
अथ षष्ठी सा सप्तमी युता ग्राह्या
स्कंदषष्ठी तु पंचमी युता ग्राह्या
अस्यां शिरोभ्यंगो निंब भक्षणं
च न कर्तव्यं अथ सप्तमी सा
षष्ठी युता ग्राह्या तत्र तालं न
भक्षयेत् शुक्लपक्षस्य सप्तम्यां
यदि रविवारो भवेत् सा विज
या सप्तमी माघमासस्य शु
क्ला सप्तम्यां दिवाकरः रथमारु
तस्मात् सा रथसप्तमी सा मन्वा
दिश्च तस्यां अध्ययनं न कर्तव्यं
अथाष्टमी सा शुक्ला नवमीयु
ता ग्राह्या कृष्णा सप्तमीयुता त
त्राध्ययनं नारिकेल भक्षणं च न कर्त
व्यं शनिवारे अथवा मंगलवारे कृ
ष्णाष्टमी पुण्यतरा बृहस्पतिवारे शु
क्लाष्टमी अत्यन्ता बुधाष्टमी सर्वैव
ह्या ग्राह्या जन्माष्टमी व्यवस्था त
च्छेदे द्रष्टव्या अथ नवमी सा चा
ष्टमी युता ग्राह्या तत्रालाबु भ
क्षणं न कर्तव्यं माघस्य शुक्ला
नवमी महानंदा रामनवमी व्य
वस्था तच्छेदे द्रष्टव्या अथ दश
मी सा च शुक्ला एकादशी कृष्णा
तु नवमी युता ग्राह्या अत्र कल
म्बी भक्षणं न कर्तव्यं एकादशी
व्यवस्था श्री विष्णोः शयन व्यव
स्था च तच्छेदे द्रष्टव्या अथ द्वा
दशी सा च एकादशी युता ग्रा
ह्या अत्र पूतिका भक्षणं न कर्त
व्यं फाल्गुनस्य शुक्ला द्वादशी
पुष्य नक्षत्र युक्ता चेत् गोविंद द्वा
दशी अथ त्रयोदशी सा च शुक्ला
द्वादशीयुता कृष्णा परयुता ग्रा
ह्या अत्र वार्ताकी भक्षणं न
कर्तव्यं अथ चतुर्दशी सा शु
क्ला पूर्णिमायुता कृष्णा त्र
योदशीयुता ग्राह्या तत्र माषा
न भोक्तव्याः ज्येष्ठकृष्णा चतु
र्दश्यां प्रदोषे सावित्रीव्रतं
कर्तव्यं तत्र यदा त्रयोदशी दि
वाभागे दण्डद्वय मात्र सत्त्वेपि
चतुर्दशी भवेत् तद्दिने व्रतं क
र्तव्यं पूर्वाह्ने तद्दिपत्तेपिपरदि

त्रिसंध्यव्यापिन्य पराह्णएव य
दा तदुर्ब्बापरयो र्न तथाविधा त
दापिपराह्ण एव भाद्रे मासि कृ
ष्णाचतुर्द्दशी अघोरा माघे कृष्णा
चतुर्द्दशी रटन्ती शिवरात्रिव्य
वस्था तच्छब्दे द्रष्टव्या अश्वपौर्णि
मासी तत्र मासे नभोकृत्यं माव
चतुर्द्दशीयुता ग्राह्या मात्रमासे
युताचेत् तदामहती कार्त्तिकमा
से कृत्तिकानक्षत्र युता पौर्णमा
सी महाकार्त्तिकी एवमन्यत्रापि
महाज्यैष्ठी व्यवस्था तच्छब्दे द्रष्ट
व्या अश्वमावस्या अत्र मासे न
भोकृत्यं सा प्रतिपद्युता ग्राह्या
मंगलवारे यदि अमावस्या भवे
त् तदा अरुणोदय मारभ्य मौ
नी भूत्वा यो गंगायां स्नायात् स
सहस्रगोदान जन्य फलमाप्नु
यात् अमावास्याश्राद्ध व्यवस्था
श्राद्धशब्दे द्रष्टव्या पौषमाघयो
रमावास्या यदि दिवा रविवा
र व्यतीपात श्रवणा नक्षत्र ।
युक्ता भवति तदा अर्द्धोदय ॥
योगः स्यात् अयं कोटि सूर्य्य
ग्रहतुल्यः अत्र तावज्जलं गं
गोदक तुल्यं यत्किंचिद्दानं
मेरुसन्निभं च भवति इति ति

थ्यादितत्वं तिथिकृत्यं मास
शब्दे द्रष्टव्यं तिथिप्रणीः पुं चंद्रः इतिहेमचंद्रः
तिथिक्षयः पुं अमावस्या इ
ति शब्दार्थकल्पतरुः ॥
तिथीस्त्री तिथिः इति भरतः
तिनाशकः पुं तिनिशवृक्षः
इति शब्दरत्नावली ॥
तिनिशः पुं वृक्षविशेषः मशु
रादी ति नाम्ना इति ख्याता शब्दवि
त् स्यादन इति ख्यातश्च तत्पर्य्यायः
स्यन्दनः २ नेमी ३ रथद्रुः ४ अ
तिमुक्तकः ५ वंजुलः ६ चित्रकृ
त् ७ इत्यमरः चक्री ८ शताङ्गः ९
शकटः १० रथः ११ रथिकः १२
भस्मगर्भः १३ मेषी १४ जलधरः १५
अस्य गुणाः कषायत्वं उष्णत्वं
कफ रक्तातीसार व्रणामय नाशि
त्वं ग्राहकत्वं दाह जनकत्वंच
इति राजनिर्घण्टः ॥
तिन्तिडः पुं चिंचा वृक्षाम्लः इ
ति विश्वः दैत्यभेदः इति हे
मचंद्रः ॥ ॥
तिन्तिडिका स्त्री तिन्तिडी
इति शब्दरत्नावली ॥
॥ ॥ ॥ ॥ ॥ ॥

तिन्तिडी स्त्री वृक्षविशेषः तेंत
ल इति भाषा तत्पर्य्यायः चिंचा
२ अम्लिका ३ इत्यमरः तिंतिडी
कः ४ तिंतिडीकं ५ तिंतिडीका
६ अम्लीका ७ आम्लिका ८ आ
म्लीका ९ इति तट्टीका तिन्तिली
१० तिन्तिडिका ११ आम्लिका १२ चुक्रः
१३ चुक्रा १४ चुक्रिका १५ अम्ला १६
अत्यम्ला १७ भुक्ता १८ भुक्तिका १९
चारित्रा २० गुरुपत्रा २१ पिच्छिला
२२ यमदूतिका २३ इति शब्दरत्ना
वली शाकचुक्रिका २४ सुचु
क्रिका २५ सतितिन्तिडा २६ अस्या
आमफलस्य गुणाः अत्यम्लत्वं
कफपित्तकारित्वंच इतिराजनि
र्घण्टः वातनाशित्वंच अस्याः प
क्व फलस्य गुणाः दीपनत्वं रु
चिकारित्वं भेदित्वं उष्णत्वं कफवा
त नाशित्वंच इति राजवल्लभः ॥
विष्टंभनाशित्वं मधुराम्लत्वं पि
त्तदाहास्रकफदोष प्रकोपणत्वं
च पक्वचिंचाफलरसगुणाः मधु
राम्लत्वं रुचिप्रदत्वं शोफ पाकक
रत्वं लेपव्रणदोषनाशित्वंच अ
स्याः पत्रस्य गुणाः शोफरक्तदोष
व्यथानाशित्वं अस्याः शुष्कत्वक्छदा

रस्य गुणाः शूलमंदाग्निनाशित्वं
इति राजनिर्घण्टः अम्लिकायाः
फलपक्वं मर्द्दितं वारिणाढ्यं प्रा
कसामरिचोन्मिश्रं लवङ्गेइसवासि
त अम्लिका फल सम्भूतं पान
कं वातनाशिनं पित्त श्लेष्मकरं
किंचित् सरुच्यंवन्हिबोधकं
इतिभावप्रकाशः वृक्षाम्ले इ
ति विश्वः तिन्तिडीकः त्रि तिन्ति
डी इत्यमरटीकायांभरतः ॥
तिन्तिडीयुतं क्ली चुंचुरी कौड्वी
चिरचिला इति भाषा इति शब्द
रत्नावली ॥
तिन्तिलिका स्त्री तिन्तिडी इत्य
मरटीका ॥
तिन्तिली स्त्री तिन्तिडी इति
शब्दरत्नावली ॥
तिन्तिलीका स्त्री तिन्तिडी इत्य
मरटीका ॥
तिन्दिशः पुं टिण्डिश वृक्षः
इतिराजनिर्घण्टः ॥
तिन्दुः पुं तिन्दुकवृक्षः इ
ति शब्दरत्नावली ॥
तिन्दुकं क्ली कर्षपरिमाणं
इति वैद्यकपरिभाषा ॥ ।

तिंडुकः पुं स्त्री वृक्षविशेषः गाव
इति ख्यातः इत्यमर टीकासारसुं
दरी केंडुकवृक्षः इतिभरतः तें
डुइति भाषा इति राजनिर्घण्टः
तत्पर्यायः स्फूर्जकः २ काल
स्कंधः ३ शितिसारकः ४ इत्य
मरः स्फूर्जकः ५ केंदुः ६ ति
न्दुः ७ तिंडुलः ८ तिंडुकिः ९
तिंडुकी १० इतिशाब्दरत्नावली
नीलसारः ११ असितकारकः १२
स्वर्ण्यकः १३ रामणः १४ स्फूर्जे
नः १५ स्यन्दनाह्वयः १६ काल
सारः १७ अस्य आम फलस्य गु
णाः कषायत्वं ग्राहित्वं वात
कारित्वं शीतलत्वं लघुत्वंच
पक्वफलस्य गुणाः मधुरत्वं।
स्निग्धत्वं दुर्जरत्वं श्लेष्मदत्वं।
गुरुत्वं वण वात नाशित्वं पित्त
प्रमेहास्र कारित्वं विषदत्वंच।
इतिराजनिर्घण्टः पित्तप्रमेहास्र
श्लेष्म नाशित्वं इतिभावप्रकाशः
तत्सारं [illegible] रोग जित् विष्ण
तिंडुक मप्येवं विशेषात् ग्राहि
शीतलं इतिराजनिर्घण्टः तिंडुकिः
स्त्री तिंडुकः इतिशाब्दरत्नावली

तिंडुकिनी स्त्री आवर्त्तकी इ
तिराजनिर्घण्टः॥
तिंडुकी स्त्री तिंडुकः इतिशा
ब्दरत्नावली॥
तिंडुलः पुं तिंडुकवृक्षः इति
शाब्दरत्नावली॥
तिप ऊ ङ ऋ क्षरणे इतिक
विकल्पद्रुमः॥
तिम क्लेदने आर्द्रभाव इतिया
वत् इतिकविकल्पद्रुमः॥
तिम य क्लेदने इतिकविकल्प
द्रुमः तिम य क्लेदने इतिकवि
कल्पद्रुमः तिमिः स्त्री मत्स्यावि
शेषः इत्यमरः तिमिर्महाकाया
मत्स्यः कश्चित् सामुद्रः तथा
च अस्ति मत्स्यास्तिमिर्नाम शा
तयोजन विस्तरः इतिभरतः
समुद्रः इतित्रिकाण्डशेषः॥
तिमिकोषः पुं समुद्रः इति
त्रिकाण्डशेषः॥
तिमिंगिलः पुं मत्स्यविशेषः
तिमिंगिरतियः इत्यमरः॥
तिमिंगिलगिलः पुं महामत्
स्यविशेषः इतिहेमचंद्रः तिमितः
त्रि निश्चलः इति धरणी क्लिन्नः
इत्यमरः तिमिरं क्ली अंधकारः इत्यमरः

1209

नेत्ररोगविशेषः तस्य लक्षणं
यथा तिमिराख्यः सर्वदोषश्चतुर्थं
पटलंगतः रुणद्धि सर्वतोदृष्टिं
लिंग नाश मतः परं इति माध
वकरः॥
तिमिररिपुः पुं सूर्य्यः इति
हलायुधः॥
तिमिषः पुं ग्राम्यकर्कटी इति
त्रिकांडशेषः नाटाम्रः इति हा
रावली तिमी स्त्री तिमिमत्स्यः
इतिद्विरूपकोशः॥
तिरः स व्य अन्तर्द्धाने तिर्य्यगर्थेः
इत्यमरः तिरस्कारः इति तट्टी
कायांस्वामी॥
तिरश्ची स्त्री पशुपक्षिस्त्री माद्दा
इति भाषा इतिमुग्धबोधः॥
तिरस्करिणी स्त्री व्यवधायकप
टः कानात् इतिभाषा इत्यमरः
तिरस्कारः पुं अनादरः इतिह
लायुधः॥
तिरस्कारिणी स्त्री तिरस्क
रिणी इत्यमरटीकायांनील
कण्ठः तिरस्कृतः त्रि अना
दृतः कृततिरस्कारः यथा अ
विवक्षितवाच्यो यत्रत्रयाच्य
भवद्दुतो अर्थान्तरेसंक्रमित

मन्यत्वेवा तिरस्कृतं इति
काव्यप्रकाशः॥
तिरस्क्रिया स्त्री अनादरः ति
रस्कारः इत्यमरः॥
तिरिटिः पुं वृक्षग्रन्थिः इति
शाब्दमाला तिरमः पुं शालिभेदः इतिराजनिर्घंटः
तिरिमः पुं शालिविशेषः अ
स्यगुणाः मधुरत्वं स्निग्धत्वं शी
तलत्वं दाहपित्तसर्वामयनाशि
त्वं त्रिदोष शमनत्वं रुच्यत्वं
पथ्यत्वंच इतिराजनिर्घण्टः
तिरीटं क्ली किरीटं इत्युणादि
कोषः तिरीटः पुं लोध्रः इत्यम
रः तिरोधानं क्ली अन्तर्द्धानं
इत्यमरः॥
तिरोहितः त्रि अन्तर्हितः आ
च्छादितः इत्यमरः॥
तिर्य्यक् व व्य वक्रः तत्पर्य्या
यः साचि २ तिरः ३ इत्यमरः
तिरोऽर्थः तिर्य्यगर्थः इति
शाब्दरत्नावली॥
तिर्य्यक्स्रोतः पुं पशु
पक्ष्यादिः॥
स ब्रह्मणोऽष्टमः सर्गः॥
अष्टाविंश द्विधः यथा॥
तिरश्चामष्टमः सर्गः सोष्टा

विंशद्विधो मतः तेषांलक्ष
णंयथा अविदोभूरितमसो
घ्राणेनाहृद्यवेदिनः इतिश्री
भागवते तिरश्चांतिर्य्यक्स्रो
तसां अविदः श्वस्तनादिज्ञा
नशून्याः भूरितमसः आहारा
दिमात्रनिष्ठाः घ्राणेनाघ्राणेनै
व इष्टमर्थंजानन्ति हृदि अवे
दिनः दीर्घानुसंधानशून्याः इ
ति तट्टीकायां श्रीधरस्वामी
अष्टविंशति भेदा यथा गौर
जो महिषः कृष्णः शूकरोग
वयोरुरुः द्विशफाः पशवश्चे
मे अविरुष्ट्रश्च सत्तम खरो
ऽश्वोऽश्वतरोगौरः शरभश्चम
रीतथा एतेचैकशफाः क्षत्तः
शृणु पंचनखान् पशून् श्वा
शृगालो वृको व्याघ्रो मार्जा
रः शश शल्यकौ सिंहः कपि
गजः कूर्मो गोधाच मकराद
यः कंक गृध्र वक श्येन भास
भल्लुक बर्हिणः हंससारस
चक्राह्व काकोलूकादयः ख
गाः इतिश्रीभागवते गवा
दयश्च अष्टान्ता द्विशफाद्विखुरा
नव खरादयः अश्वान्ताः ए
कशफाः षट् श्वादयोमाथा
न्ताः पंचनखा द्वादश एतेभ

चराः सप्तविंशतिः मकरादयो
जलचराः कंकादयः खगाः अ
भूचरत्वेनैकीकृत्य गृहीता एव
मष्टाविंशतिभेदान्वदंति अन्येषा
मपितिर्य्यक् प्राणिनां यथायथ
मेतेष्वन्तर्भावः इति तट्टीकायांश्री
धरस्वामी तर्य्यग्वासः पुं कुलीरः
इतित्रिकाण्डशेषः ॥
तिर्य्यञ्च् त्रि विहंगादिः इतिमे
दिनी पशुः इतिहेमचंद्रः ।
क्रमगामी इतिशब्दरत्नावली ॥
तिर्य्यंची स्त्री तिरश्ची स्त्रीपश्वा
द्यादिः इतिमुग्धबोधं ॥
तिल गतौ इतिकविकल्पद्रुमः
तिल श स्निहि इतिकविकल्पद्रुमः
तिलः कु स्नेहे इतिकविकल्पद्रुमः
तिलः पु स्वनामख्यातशस्य तत्
पर्य्यायः होमधान्यं २ पवित्रः ३
पितृतर्पणः ४ पापघ्नः ५ पूतधान्यं
६ इतिराजनिर्घंटः स्नेहफलः ७
स्नेहफलप्रफलः ८ अस्यगु
णाः रसे कटुत्वं तिक्तत्वं मधुरत्वं
तुवरत्वं गुरुत्वं विपाके क
टुत्वं स्वादुत्वं स्निग्धत्वं उ
ष्णत्वं कफपित्त कारित्वं
बल्यत्वं ॥ केश ॥ ॥

हितत्वं हिमस्पर्शत्वं त्वच्यत्वं
स्तन्यत्वं व्रणे हितत्वं दंत्यत्वं
अल्पमूत्र कारित्वं ग्राहित्वं वात
घ्नत्वं अग्निमतिप्रदत्वंच इतिभा
वप्रकाशः वर्णकारित्वं ॥
कृष्णः पथ्यतमः सितोऽल्पगु
णदः हीनाकिलान्येतिलाः इ
तिराजनिर्घंटः अपिच कृष्णः
श्रेष्ठतमस्तेषु शुक्लोमध्यमः सि
तः अन्येहीनतराः प्रोक्तास्तज्ज्ञैर
क्तादयस्तिलाः इतिभावप्रका
शः तैलस्यगुणाः अलेकरत्वं ।
केश्यत्वं मधुरत्वं तिक्तत्वं कषा
यत्वं उष्णत्वं तीक्ष्णत्वं बलका
रित्वं कफवातजित्वं स्वग्व्रण
कण्डूति नाशित्वं कांतिदत्वं व
स्त्यंगपाननस्यकर्णाक्षिपूरणे
षुहितत्वंच इतिराजनिर्घंटः ति
लकालकः यथा देवगुरुप्रसादे
नजिह्वाग्रेमेसरस्वती तेनाहं
नृपजानामिभानुमत्यास्तिलं
यथा इतिकालिदासः ॥
तिलकं क्ली क्लोम कृष्णवर्ण
सौवर्च्चलं इत्यमरः सौवर्च्चलं
इतिमेदिनी ॥
तिलकः पु पुष्पवृक्षविशेषः

तत्पर्य्यायः विशेषकः २ मु
खमंडनकः ३ पुण्ड्रकः ४ पुं
ड्रः ५ स्थिर पुष्पी ६ छिन्नरुहः ७
दग्धरुहः ८ स्मृतजीवः ९ तरु
णीकटाक्षकामः १० वासनस
दः ११ कृच्छ्ररुहः १२ भालवि
भूषणसंज्ञः १३ पुन्नागः १४
रेचकः १५ इति राजनिर्घण्टः
द्रुरकः १६ श्रीमान् १७ पुरुषः १८
क्षुरपुष्पकः १९ इति भावप्र
काशः अस्यगुणाः पाकेकटु
त्वं वातपित्तकफनाशित्वं बल
पुष्टिभेदः कारित्वं हृद्यत्वं लघु
त्वंच तत्फलगुणाः कषायत्वं उ
ष्णत्वं मुखदंतदोष कृमि शोफ
व्रण रक्तदोष नाशित्वंच इति
राजनिर्घण्टः शरीरस्थ तिलः
तत्पर्य्यायः तिलकालकः २
इत्यमरः कालकः ३ पिप्लुः ४
जडुलः ५ इति हेमचंद्रः मरु
वकः इतिरत्नमाला अश्वभे
दः रोगभेदः इतिमेदिनी शो
थस्यनिदानलक्षणे यथा ।
कृष्णानि तिलमात्राणि नीरु
जानि समानि च वात पित्त क
फोद्रेकात् तान्विद्यात्तिलकाल

कान् इतिमाधवकरः प्रयाने त्रि इ
तिनानार्थध्वनिमंजरी तिलकः पुं
ल्लो वेदनादिनाललाटादि द्वादशा
गेषु कृत विकृविशेषः त त्पर्यायः
तमालपत्रं २ चित्रकं ३ विशेषकं
इत्यमरः तस्यधारण प्रकारो यथा
द्वादशांगेललाटादो तिलकं ह
रिमंदिरं स्नानान्तेवैष्णवः कुर्यात
प्रत्येकं कृष्णनामभिः वामेवद
क्षि नेत्रान्तेगंडः सेशावेविध्कि।
तं तथैवदक्षिणे कुर्याद्धारेश्च
क्रांकितस्तने ललाटेकेशवंवि
द्यात् कंठेश्रीपुरुषोत्तम वाम
बाहोवासुदेवंसव्येदामोदरंतथा
नाभौनारायणंचैवमाधवंहृदये
तथा गोविंदंदक्षिणे पार्श्वे वामे
चैवत्रिविक्रमं विष्णुसव्ये कर्ण
मूलेदक्षिणे मधुसूदनं शिरो
मध्येहृषीकेशं पद्मनाभंच पृष्ठे
तः हरेर्द्वादशनामानि पठित्वा
तिलकानि तु यः कुर्याद्दै।
स्ववो नित्यं सप्रेमभक्तिमाप्नुया
त् येकंठलग्न तुलसीभवका
ष्ठमाला येद्वादशांग हरिना
म कृतोर्ध्वपुंड्राः ये कृष्णभ
क्ति स्फुटधृत शंखचक्रास्ते
वैष्णवा भुवन माशु पवित्रयंति

तिलक न्तर्ध्वपुंड्रारव्यं मध्यच्छि
द्रं द्विजारद यदिकुर्याल्ललाटे
तद्विज्ञेयं हरिमंदिरं अनासाम्
लमाश्रित्यशिरोमध्यगतंमुने
हरिपादाकृतं नासामूल मारभ्य
यत्नतः हरिमंदिरवत् सर्वं तद्रा
धावल्लभीयकं श्रीराधावल्लभी
यंयत्तिलकं सुमनोहरं योगलं
तत्तु विज्ञेयं यदिमध्यसुरंगितं
यदूर्ध्वपुंड्रं तिलकं शोभनं त
न्मनोहरं तन्मध्य पीतरेखंच॥
श्रीमद्रामानुजे विदुः श्रीरामो
पासना यस्य तिलकं तदूर्ध्व पुंड्र
कं भ्रुवोर्मध्येसविंदुस्याद्यदि वि
प्र मनोहरं हरेः सर्वावतारा
म स्यादीनोविशेषतः उपास
कानां तिलकं केवलं हरिमंदि
रं ऊर्ध्वपुंड्रं द्विजः कुर्यात्तत।
त्रियाणांतथैवच वैश्यानांत
तथाविप्रशूद्रादेमंडलाकृत
अच्छिद्रमूर्ध्वपुंड्रंतयेकुर्वीतिज
नाधमाः तेषांललाटेसततं
पुनः पातो न संशयः दृष्ट्वा
भालेद्विजातीनामच्छिद्र मू
र्ध्व पुण्ड्रकं कार्ष्णः कृष्णस्
तिकृत्वा वस्त्रेणाच्छादयेन्मवि
ललाट दक्षिणे ब्रह्मा वसेद्वा

मेमहेश्वरः मध्येविष्णुर्वसेन्नित्यं
तस्मान्मध्यं न लेपयेत् वर्तुल
तिर्यगच्छिद्रंहृस्वं दीर्घं ततं न
तुषस्थूलं लक्षणसंयुक्तं तिलकंय
त्रिरथ्यकं स्वतिन्त्र यष्टिकुकुन
त्रिमूल मुकुलं कृतं त्रिपुण्ड्रं म
र्ध्वं तिलकं यत्रिरथ्यकं प्रमाणं
तदूर्ध्वपुंड्रस्यदीर्घं स्यात् कलिव
र्धनं आनासा मूलमारभ्य ब्र
ह्मरंध्रगतंयदि मध्यदेशेकोंगु
लंशोकमायतं द्व्यंगुलंविशि
ष्टविज्ञेयमंगुलं तदद्वालयेच
त्र्यंगुलं नासिकाया स्त्रिभागे
कोभागेमानेनयो भवेत् भ्रु
वोर्मध्यादधःस्थानं मूलमा
कुर्मनीषिणः ब्रह्मचारीगृ
हस्थश्च वानप्रस्था यतिस्त
था कुर्यादूर्ध्वपुण्ड्रंतदैष्ण
वाहरिमंदिरं वैष्णवाविप्र
भूपा श्चैव वैश्यशूद्रामनाश्र
माः यदूर्ध्व पुंड्रं बिभ्रयुस्तदेव
हरिमंदिरं नरोवाप्यथवानारी
यदिकृष्णपदंलभेत् यत्नतंत
लसीमालासंधार्या हरिमंदिरं
मध्यच्छिद्रंनकुर्याद्यत्तिलकंयदि
वैष्णवः स्वपदं तच्चिनातत्स भवेन्ना
रदनाम्यथा दंडाकारं द्विरेखंवति

लकोणकं मध्यच्छिद्रंत नपाकृ
दूर्ध्वपुंड्रं मनोहरं अधोमुखाब्ज व
लिकाकारं तिलकमुत्तमं मध्यच्छि
द्रं युग्मरेखं मूर्ध्वपुंड्रं प्रकीर्तितं
तीर्थमृत्पत्रकाष्ठंचविल्वामल
यसंभवं अश्वत्थ तुलसी मूल
मृत्तिका गोष्पदस्य च जाह्नवी
मृन्महानिंब तुलसीकाष्ठमेव
च कस्तूरी कुंकुमं फलं सिंदूरं
रक्तचंदनं गोरोचना गंधकाष्ठं
जलं वागुरु गोमयं धात्रीमू
लस्यमृत्स्नायो हरिद्रागो गृहस्य च
स्नानान्ते सर्ववर्णानां माश्रमा
नां तथैवच एतानि तिलका
न्याहुः संध्यादिसर्वकर्मसु अ
पिच गंगामृत्तुलसीमूलमृत्ति
का मलयोद्भवं साधोश्चरण
संलग्न रजो मृद्गोष्पदस्य च याः
श्वत्थमूल मृद्गोपीचंदनं तीर्थ
मृत्तिका कुंकुमं तुलसी काष्ठं
वैष्णवास्तु मृत्तिका गोरोचना
च कस्तूरी हरिद्रागुरुचंदनं
वल्मीकमृत्तिका गंधः पद्मकं
हरिचंदनं गंधकाष्ठं महानिंबो
यमुनातीरमृत्तिका गुरुपादरजः
वारिणा साधुग्रिहोजले कृता
प्रतिदिने स्नाने मैने गंधमृदादि
भिः चारुयत्तिलकं ग्राह्य तन्मा

स्रा वैस्वैश्वदेवं काम्यं नैमित्तिकं
नित्यं यत्किंचित् कर्म नारद व
र्णाश्रमाणां तत्राप्ति स्नानान्ते
तिलकं विना कर्म वर्णाश्रमाणां
स्यात् दैवं पैत्रं न तत् फलं स्या
त् संध्यां पंचयज्ञान् पैत्रं होमा
दि कर्मयः विना तिलकं दर्भा
भ्यां कुर्य्यात्तन्निष्फलं भवेत् इ
ति पाद्मोत्तरखंडे वीक्ष्यादर्शे
लेवापि यो विदध्यात् प्रयत्न
तः ऊर्द्ध्वपुंड्रं महाभागः स या
ति परमां गतिं इति पाद्मे पाताल
खंडे शिवागमे दीक्षिते स्तु धार्य्यं
तिर्य्यक् त्रिपुंड्रकं विलागमे दी
क्षितस्तु ऊर्द्ध्वपुंड्रं विधारयेत् इ
ति भागवतीभट्टधृतसत्संहिता
तिलकटः पुं तिलस्य रजः ति
लचूर्णं इति शब्दार्थकल्पतरुः
व्याकरणंच ॥
तिलका स्त्री हारभेदः इति
जटाधरः ॥
तिलकालकः पुं शरीरस्थ
तिलः इत्यमरः तिलकः
इति टीका ॥
तिलकाश्रयः पुं ललाटं ।
इति शब्दार्थकल्पतरुः ॥

तिलकिट्टं क्ली तिलमलं त
त्पर्य्यायः पिण्याकः २ तिल
खलिः ३ अस्य गुणाः ग्लपनत्वं
रूक्षत्वं विष्टम्भित्वं दृष्टिदूषणत्वं
च इति भावप्रकाशः ॥
तिलकी त्रि तिलकयुक्तः
यथा शिखी तिलकी कर्म कु
र्य्यात् इति स्मृतिः
तिलचित्रपत्रकः पुं तैलकंदः
इति राजनिर्घण्टः ॥
तिलचूर्णं क्ली चूर्णीकृततिलः तत्पर्य्यायः तिलकल्कं २
पललं ३ पिष्टकं ४ अस्य गु
णाः मधुरत्वं रूक्षत्वं पित्तास्र
बलपुष्टिदत्वंच इति राज
निर्घण्टः ॥
तिलतण्डुलकं क्ली आलिं
गनं इति शब्दमाला तिलमि
श्रित तण्डुलंच ॥
तिलतैलं क्ली तिलस्नेहः
तिलेषु तैलं इति व्याकर
णं अस्य गुणाः तिलशब्दे द्र
ष्टव्याः तिलधेनुः स्त्री तिलनिर्मि
ता धेनुः यथा विधानं तिलधेनोस्त्व
ह्निशीघ्रं द्विजोत्तम मुनिः प्राह वि
धानं यत्तत् शृणुष्व नराधिप षोड
शाढकमयी धेनुश्चतुर्भिर्वत् स

को भवेत् इक्षुदंडमयाः पादाः
दंताः पुष्पमयाः शुभाः नासा गं
धमयी तस्या जिह्वा गुडमयी तथा
स्थिता कृष्णाजिने धेनुं वासोभि
श्छादितां शुभां सूत्रेणावासितां
कृत्वा पंचरत्नसमन्वितां सर्वौष
धिसमायुक्तां मंत्रपूतां तु दाप
येत् अन्नं मे जायतां सद्यः पानं
सर्व्वरसास्तथा कामं संपादय
स्माकं तिलधेनु मयार्जितां गृ ।
ह्णामि त्वां देवि भक्त्या कुटुंबार्थं वि
शेषतः ऋद्धेव कामं ऊहतो ति
लधेनो नमोस्तु ते एवं विधानं
योदत्वा तिलधेनुं नृपोत्तम सर्वं
कामसमाप्तिं तु कुरुते नात्र सं
शयः इति पाद्मे सृष्टिखंडे ॥
तिलपर्णी स्त्री चंदनं इति राज
निर्घण्टः तिलवृक्षपत्रंच
तिलपर्णः पुं श्रीवेष्टः इति
राजनिर्घण्टः ॥
तिलपर्णिका स्त्री रक्तचंद
नं इति हेमचंद्रः ॥
तिलपर्णी स्त्री रक्तचंदनं इत्यम
रः तिलपिच्चटं क्ली तिलपिष्टकं
तिलकुटा इति भाषा इति के ।
न् तिलपिंजः पुं निष्फल
हृदः इत्यमरः ॥ ॥

तिलपेजः पुं निष्फलतिलः इत्य
मरः तिलमयूरः पुं मयूरविशे
षः तत्पर्य्यायः गुरुण्टकः २ इ
ति त्रिकाण्डशेषः ॥
तिलरसः पुं तिलतैलं इति श
ब्दार्थकल्पतरुः ॥
तिलस्नेहः पुं तिलतैलं इति
शब्दार्थकल्पतरुः ॥
तिलाकितदलः पुं तैलकंदः
इति राजनिर्घण्टः ॥
तिलापत्या स्त्री कृष्णजीरकः
इति शब्दचंद्रिका ॥
तिलित्सः पुं गोनसर्पः इ
त्यमरः तिलोत्तमा स्त्री स्वर्वेश्या
इति शब्दचंद्रिका तस्या नाम कार
णं यथा तिलं तिलं समानीय र
त्नानां यद्विनिर्मिता तिलोत्तमे
ति ततस्तस्या नाम चक्रे पितामहः
इति महाभारते आदिपर्व्व ॥
तिलौदनं क्ली कृशरः इति
हारावली ॥
तिल्यं क्ली तिलक्षेत्रं तत्प
र्य्यायः तैलीनं २ इत्यमरः
तिल्लं गतौ इति कविक
ल्पद्रुमः ॥
तिल्वः पुं लोध्रः इत्यम
रः ॥ ॥ ॥

श्वेतलोध्रः इति नहीकाम्यां ॥
स्तम्भूतिः रक्तलोध्रः इतिस्वामी
तिल्वकः पुं लोध्रः इतिराजनि
र्घण्टः तिष्टद्गुः पुं संध्याकालः
यथा आतिष्ठद्गु जपन् संध्याम
क्रान्ता मायतीगवं इति भाट्टः
तिष्यः पुं पुष्यनक्षत्रं इत्यमरः
पौषमासः इतिशब्दरत्नावली
कलियुगं इतिमेदिनी तिष्य
कः पुं पौषमासः इतिशब्दर
त्नावली ॥
तिष्यपुष्या स्त्री आमलकी इ
ति शब्दचन्द्रिका ॥
तिष्यफला स्त्री आमलकी इत्य
मरः तिष्या स्त्री आमलकी इति
शब्दरत्नावली ॥
तिह्ला पुं व्याधिः वीहिः यन्तुः
सद्भावः इति संक्षिप्तसारेउ
णादिवृत्तिः ॥
तीम य क्लेदने इतिकविक
ल्पद्रुमः ॥
तीर त क कर्म्मणःसमाप्तौ
इतिकविकल्पद्रुमः ॥
तीरं क्ली नदीकूलं इत्यमरः
गंगातीरे यथा सार्द्धहस्तशतं तु
यावत् गर्भतः तीरमुच्यते
भाद्रकृष्णचतुर्दश्यां यावदाक्रमते

जलं तावद्गर्भं विजानीयात्
तदूर्ध्वं तीरमुच्यते इति प्रायश्चि
त्ततत्वं प्रायकः इतित्रिकाण्ड
शेषः तीरः पुं त्रपु इति मेदिनी
तीरभुक्तिः पुं देशविशेषः
तीरहोत इति भाषा तत्प
र्य्यायः निच्छविः २ विदेहः ३
इति त्रिकाण्डशेषः ॥
तीरितं क्ली कर्म्मणःसमाप्तिः
इतितीरधातोर्भावेक्तप्रत्ययेन
निष्पन्नं ॥
तीर्णः त्रि उत्तीर्णः अभिभूतः
प्लुतः इति तृधातोः कर्त्तरि क्त
प्रत्ययेन निष्पन्नः ॥
तीर्णपदी स्त्री तालमूली इति
शब्दचन्द्रिका ॥
तीर्थं क्ली शास्त्रं अध्वरः क्षेत्रं
उपायः नारीरजः अवतारः ॥
ऋषिजुष्टंजु पात्रं उपाध्यायः
मन्त्री इतिमेदिनी योनिः द
र्शनं ग्रहः इति हेमचन्द्रः ॥
विपः आगमः निदानं अग्निः
इति संक्षिप्तसारे उणादिवृत्तिः
हस्तस्थितनीर्थानि यथा अं
गुष्ठस्येतीर्थंहैवं स्वल्पांगुले
र्मूलेकायं मध्ये गुह्यांगुल्योः
पैत्रं ॥ ॥ ॥

मूले स्वंगुष्ठस्य ब्राह्मं इत्यमरः ॥
तीर्थं त्रिविधं यथा जंगमं १ ॥
मानसं २ स्थावरं ३ तथाच
ब्राह्मणा जंगमं तीर्थं निर्म
लं सार्वकामिकं येषांवाक्या
दकेनैव शुद्ध्यन्ति मलिनाज
नाः अगस्तिरुवाच शृणु
तीर्थानि गदतो मानसानि म
मानघे येषु सम्यक् नरः स्नात्वा
प्रयाति परमां गतिं सत्यं तीर्थं ।
क्षमातीर्थं तीर्थमिन्द्रिय निग्र
हः सर्वभूतदया तीर्थं सर्वत्रा
र्जवमेवच दानं तीर्थं दमस्ती
र्थं संतोषस्तीर्थमुच्यते ब्रह्म
चर्यं परं तीर्थं तीर्थंच प्रियवा
दिता ज्ञानं तीर्थं धृतिस्तीर्थं पु
ण्यं तीर्थमुदाहृतं तीर्थानाम
पि तत्तीर्थं विशुद्धिर्मनसः परा
एतत्ते कथितं देवि मानसं ती
र्थलक्षणं भौमानामपि ती
र्थानां पुण्यत्वेकारणं शृणु
यथा शरीरस्योद्देशाः केचिन्मेध्य
तमाः स्मृताः तथा पृथिव्या म
द्देशाः केचित् पुण्यतमाः स्मृताः प्र
भावादद्भुताद्भूमेः सलिलस्य च तेज
सा परिग्रहान्मुनीनांच तीर्थानां पुण्य

तास्मृता तस्माद्भौमेषु तीर्थेषु मा
नसेषु च नित्यशः उभयेष्वपि यः
स्नाति स याति परमां गतिं ॥
तीर्थागमने दोषा यथा अनुपोष्य
त्रिरात्राणि तीर्थान्यनभिगम्य च
अदत्वा कांचनं गां च दरिद्रो नाम
जायते तीर्थगमने फलं यथा
अग्निष्टोमादिभिर्यज्ञैरिष्ट्वा विपु
लदक्षिणैः न तत्फलमवा
प्नोति तीर्थाभिगमनेन यत् ती
र्थान्यनुस्मरन् धीरः श्रद्दधानः स
माहितः कृतपापो विशुध्येत किं
पुनः शुद्धकर्मकृत् तिर्य्यग्योनिं
नवैगच्छेत् कुदेशेनचजायते न
दुःखी स्यात् स्वर्गभाक्च मोक्षो
पायंच विन्दति तीर्थफलभागि
नो यथा यस्य हस्तौच पादौच म
नश्चैव सुसंयतं विद्या तपश्च कीर्त्ति
श्च स तीर्थफलमश्नुते प्रतिग्रहा
दुपावृत्तः संतुष्टो येनकेनचित्
अहंकारविमुक्तश्च स तीर्थफल
मश्नुते अदाम्भिको निरारम्भो ल
घ्वाहारो जितेन्द्रियः विमुक्तः सर्व
संगैर्यः स तीर्थफलमश्नुते अ
कोपनोऽमलमतिः सत्यवादी दृ
ढव्रतः आत्मोपमश्च भूतेषु स

तीर्थफलमश्नुते अश्रद्दधानः पापात्मा नास्तिकोऽच्छिन्नसंशयः हेतुनिष्ठश्च पञ्चैते न तीर्थफलभागिनः इति काशीखण्डे ॥ तीर्थयात्राविधानं यथा यो यः कश्चित्तीर्थयात्रान्तु गच्छेत् सुसंयतः स च पूर्व्वं गृहे स्वे कृतोपवासः शुचिरप्रमत्तः संपूजयेद्भक्तिनम्रो गणेशं देवान् पितॄन् ब्राह्मणांश्चैव साधून् धीमान् प्रीणयेत् वित्तशक्त्या प्रयत्नात् प्रत्यागतश्चापि पुनस्तथैव देवान् पितॄन् ब्राह्मणान् पूजयेच्च एवं कुर्व्वतस्तस्य तीर्थे यदुक्तं फलं तत् स्यान्नात्र सन्देह एव इति ब्रह्मपुराणं प्रयागे तीर्थयात्रायां पितृमातृवियोगतः कचानां वपनं कुर्य्यात् वृथा न विकचो भवेत् इति भविष्यपुराणे तीर्थयात्रासमारम्भे तीर्थात् प्रत्यागमे पि च वृद्धिश्राद्धं प्रकुर्व्वीत बहुसर्पिःसमन्वितम् इति कूर्म्मपुराणे ऐश्वर्य्यलाभमाहात्म्यात् गच्छेद्यानेन यो नरः निष्फलं तस्य तत्तीर्थं तस्माद्यानं विवर्जयेत् इति मत्स्यपुराणे संवत्सरं द्विमासोनं पुनस्तीर्थं व्रजेद्यदि मुण्डनञ्चोपवासञ्च नश्यति तेन कारयेत् इति गङ्गावाक्यावली तीर्थप्राप्त्यनन्तरविधानं यथा न परीक्ष्यो द्विजस्तीर्थेष्वन्नार्थी भोज्य एव हि । सक्तुभिः पिण्डदानञ्च चरुणा पायसेन च कर्त्तव्यमृषिभिर्दृष्टं पिण्याकेन गुडेन च श्राद्धं तत्र च कर्त्तव्यमर्घ्यावाहनवर्जितं अकालेऽप्यथवा काले तीर्थश्राद्धन्तर्पणं अविलम्बेन कर्त्तव्यं नैव विघ्नं समाचरेत् यदह्नि तीर्थप्राप्तिः स्यात्ततः पूर्व्ववासरे उपवासश्च कर्त्तव्यः प्राप्तेऽह्नि श्राद्धदो भवेत् तीर्थोपवासः कर्त्तव्यः शिरसो मुण्डनं तथा शिरोगतानि पापानि यान्ति मुण्डनतो यतः तीर्थं प्राप्य प्रसङ्गेन स्नानं तीर्थे समाचरेत् स्नानजं फलमाप्नोति तीर्थयात्राकृतं न तु इति काशीखण्डं मुण्डनञ्चोपवासश्च सर्व्वतीर्थेष्वयं विधिः वर्जयित्वा गयां गङ्गां विशालां विरजां तथा इति स्कान्दे षोडशांशं स लभते यः परार्थेन गच्छति अर्द्धं तीर्थफलं तस्य यः प्रसङ्गेन गच्छति इति पैठीनसिः स्नापयेत् स्वगमित्रादीं ज्ञातीं स्तीर्थे नरोत्तमः प्रत्यक्षापहरं चैतत् वला तीर्थभवं फलं।

इति स्कान्दे मातरं पितरं जायां भ्रातरं सुहृदं गुरुं यमुद्दिश्य निमज्जेत अष्टभागं लभेत सः इति प्रायश्चित्ततत्त्वे मार्कण्डेयपुराणं कलौ तीर्थानां पृथिव्यां स्थितिकालो यथा सरस्वती पुण्यक्षेत्रमाजगाम च भारतं ॥ गङ्गाशापेन कलया स्वयं तस्थौ हरेः पदे पश्चाद्भगीरथानीता मही भागीरथी शुभा समाजगाम कलया वाणीशापेन नारद पद्माजगाम कलया सा च पद्मावती नदी भारतं भारतीशापात् स्वयं तस्थौ हरेः पदे कलेः पञ्च सहस्रञ्च वर्षं स्थित्वा च भारते जग्मुस्ताश्च सरिद्रूपं विहाय श्रीहरेः पदे यानि सर्व्वाणि तीर्थानि काशीं वृन्दावनं विना यास्यन्ति ताभिः सार्द्धञ्च वैकुण्ठमाज्ञया हरेः तीर्थप्रतिग्रहे दोषो यथा तत्र नारायणक्षेत्रे कुरुक्षेत्रे हरेः पदे वाराणस्यां वदर्य्याञ्च गङ्गासागरसङ्गमे पुष्करे भास्करक्षेत्रे प्रभासे रासमण्डले हरिद्वारे च केदारे सोमे वदरपाचने सरस्वतीनदीतीरे पुण्ये वृन्दावने वने गोदावर्य्याञ्च कौशिक्यां त्रिवेण्याञ्च हिमालये एतेष्वन्येषु यो दानं प्रतिगृह्णाति कामतः स च तीर्थप्रतिग्राही कुम्भीपाकं प्रयाति च इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे यानादिना गमने दोषो यथा पुण्यार्द्धं हरते याने तदर्द्धं छत्रपादुके तदर्द्धं तैलमांसाभ्यां सर्व्वं हरति मैथुने इति कर्म्मलोचनं युगभेदे तीर्थविशेषस्य श्रेष्ठत्वं यथा आद्ये कृते पुष्करं तीर्थं त्रेतायां नैमिषं तथा द्वापरे तु कुरुक्षेत्रं कलौ गङ्गां समाश्रयेत् ॥

तीर्थसंख्या यथा तिस्रः कोट्योऽर्द्धकोटी च तीर्थानां वायुरब्रवीत् दिवि भुव्यन्तरीक्षे च तानि ते सन्ति जाह्नवी अथ भूमण्डलस्थप्रादक्षिण्येन तीर्थानि यथा पुष्करं १ तत्र ब्रह्मणः स्थानं तीर्थराजोऽति नाम्ना ख्यातं तत्र त्रिसन्ध्यं दशकोटितीर्थानि यान्ति तस्य फलं अश्वमेधतुल्यं ब्रह्मलोकगमनञ्च जम्बुमार्गः २ तस्य फलं अश्वमेधं तस्य विस्मामिश्र तण्डुलिकाश्रमः ३ तस्य फले दुर्गतिविनाशः ब्रह्मलोकप्रा

अगस्त्यसरः ८ तत्रत्रिरात्रोपवासे
न वाजपेयतुल्यं फलं प्राकाहारे
ण कौमारलोकप्राप्तिश्च धर्मारण्य
५ तत्रकण्वाश्रमः तस्य फलं मवे
श्र माज्ञेणपापक्षयः देव पितृ
पूजनेन अश्वमेध तुल्यं फलं वि
ष्णुलोकप्राप्तिश्च ययातिपात
नं ६ तत्रगमनेन अश्वमेध यज्ञतु
ल्य फलं कोटितीर्थं ७ तत्रमहा
कालस्तिष्ठतिस्नानेन अश्वमेध
तुल्यं फलं भद्रवटः ८ तत्रउ
मापतिस्तिष्ठतितंदृष्ट्वा गोसह
स्रदानफलंतस्यगाणपत्यंचभव
ति नर्मदानदी ९ तत्र पितृदेवत
र्पणात् अग्निष्टोमतुल्य फलं
दक्षिणसिंधुः १० तत्र ब्रह्मचर्ये
ण अग्निष्टोमतुल्य फलं त्रिदिव
प्राप्तिश्च चर्मण्वतीनदी ११ तत्रे
न्द्रियसंयमनेनज्योतिष्टोमफलं
हिमवतसुतार्बुदः १२ तत्र वशि
ष्ठाश्रमः तस्मिन्नेकरात्रवासेनगो
सहस्रदान फलं पिंगतीर्थं १३ त
त्रेंद्रियसंयमनेनसवत्स शतकपि
लादानफलं प्रभासः १४ तत्र कृताश
नस्तिष्ठति तत्र स्नानेन अग्निष्टोमातिरा
त्रयोः फलं सरस्वती सागर संगमः १५ तत्र

स्नानेन गोसहस्रदान फलं
रात्रोपवासेन पितृ देवतर्पणे
नच अश्वमेधफलं वरदानं १६
यत्रविष्णवे दुर्वाससा वरोदत्तः
तत्रस्नानेन गोसहस्र दान फलं
द्वारवत्या पिंडारकतीर्थं १७ त
त्रपद्मचिह्नयुक्ता मुद्राः शूलचि
ह्नितानि पद्मानि अद्यापि दृश्यंते
महादेवस्तिष्ठतिस्नानेनबहुसुव
र्ण यज्ञफलं समुद्रसिंधुसंगमः १८
तत्र स्नानेन पितृ देव तर्पणेनच
वरुणलोकप्राप्तिः द्विमीतीर्थं १९
तत्रमहा देव स्तिष्ठति तत्र स्नाने
नाश्वमेधफलं महादेव दर्शनार्च
नाभ्यांसर्वपापनाशः वसुधारा २०
तस्यादर्शनेन अश्वमेध फलं स्ना
नतर्पणाभ्यांविष्णुलोकप्राप्तिः सिं
धुतमं २१ तत्र स्नानेन बहु सुवर्ण
यज्ञफलं भृगुतुंगं २२ तत्र गमनेन
ब्रह्मलोकप्राप्तिः कुमारिकाशक्रती
र्थं २३ तत्रस्नानेनविमलत्वंभवति
पंचनंदः २४ तत्रपंचयज्ञफलं भीमास्था
ने २५ तत्रस्नात्वा नरो देवीपुत्रो भवति
गोसहस्रदानफलंचलभते गिरिकुं
जे २६ तत्र ब्रह्मा तिष्ठति तत्रस्ना
त्वा गोसहस्रदान फलं विमलतीर्थं २७

अद्यापितत्रसौवर्णराजतमत्स्याद
श्यंतेतत्रस्नानपानाभ्यांवाजपेय
फलं वितस्तानदी २८ तत्रतर्पणे
न वाजपेयफलं स्वर्गप्राप्तिश्च ॥
काश्मीरेवितस्ताख्यातक्षकनाग
सदनं २९ तत्रस्नानेनवाजपेयफ
लं विष्णुलोकप्राप्तिश्च शामपरा
३० तत्रसायंसंध्यायांस्नानेनसप्त
र्षिषुचरुनिवेदनेनच अश्वमेधस
हस्राधिक फलं रुद्रास्पदं ३१
तत्रमहादेवदर्शनात् अश्वमेध
फलं मणिमान्पर्वतः ३२ तत्र
त्रिरात्रोपवासेन ज्योतिष्टोमफलं
देविकानदी ३३ तत्र महादेव स्था
नं तत्र स्नान महादेव दर्शनाभ्यां
महादेवाय चरु निवेदनेन च स
र्वकामप्राप्ति र्देवलोक प्राप्तिश्च
देविकायां रुद्रतीर्थं तत्र स्नाना
त् सिद्धिप्राप्तिः एवं देविकायांय
जनयाजन ब्रह्मवालुक पुष्पन्या
स संज्ञकानि तीर्थानि तेषु स्नाना
त् मरण भय विनाशः दीर्घसत्रं
३४ तत्रगमनादेवदीर्घसत्रफल
प्राप्तिः राजसूयाश्वमेध फल
प्राप्तिश्च विनशनं ३५ मेरुपृ
ष्ठे अन्तर्हिता सरस्वती यत्र
यातिसा चमसतीर्थे एवं शि
वोद्भेदे नागोद्भेदेच दृश्यते च

मसेस्नानात् वाजपेय फलं ना
गोद्भेदेस्नानात् नागलोक प्राप्तिः श
शयानतीर्थं ३६ तत्र स्नानात् शि
ववद्दीप्तिः गो सहस्र दान फल प्रा
प्तिश्च कुमारकोटी ३७ तत्र स्नानेन
पितृ देव पूजनेन च गवामय या
ग फलप्राप्तिः रुद्रकोटी ३८ यत्र
कोटिऋषयो मिलिता अहमग्रे
रुद्रंद्रक्ष्यामीति प्रस्थितानां तेषां
संतोषार्थं एकोरुद्रः कोटिमूर्तयो
अभवत् तत्रस्नानात् अश्वमेध फलं
प्राप्तिः कुलोद्धरणंच सरस्वती सं
गमः ३९ तत्रजनार्दन स्तिष्ठति त
त्रस्नानात् बहु सुवर्णयागफल
प्राप्तिः सयावसानं ४० तत्रगमना
त् गोसहस्रदानफलप्राप्तिः कुरुदे
त्रे ४१ तत्रगमनात् सर्वपापक्षयः त
तो मचक्रुकद्वारपालस्य नमस्कारे
ण गो सहस्रदानफलप्राप्तिः विष्णुस्थानं ४२ तत्रस्नानात्
विष्णुदर्शनात् अश्वमेधफलं वि
ष्णुलोक प्राप्तिश्च पारिपल्ल
वं ४३ तत्र अग्निष्टोमातिरा
त्र याग फल प्राप्तिः पृथि
वीतीर्थं ४४ तत्र गोसहस्र दा
न फलं शाल्किनी तीर्थं ४५
तत्रदशाश्वमेधिकेस्नानात् गोस
हस्र दान फलं सर्पिर्दर्वी ४६

सा नागतीर्थं तत्रगमनेनाग्निष्टो
मफलं नागलोकप्राप्तिश्च कवर्णक
द्वारपालः ४७ तत्रैकरात्रवासात्
गोसहस्रदानफलप्राप्तिः पंचनदं
४८ तत्र कोटितीर्थस्नानात् अश्व
मेधफलं अश्विनीर्थ ४९ तत्र रूप
प्राप्तिः वराहतीर्थं ५० यत्र वराह
रूपी विष्णुः स्थितः तत्र स्नानाद
ग्निष्टोमफलप्राप्तिः जयंत्य ५१
तत्र सोमतीर्थे स्नानात् राजसूय
फलप्राप्तिः एकहंसतीर्थं ५२
तत्र गोसहस्रदानफलप्राप्तिः कृ
तशौचं ५३ तत्रगमनात् पुंडरीक
यज्ञफलप्राप्तिः मुंजावट तीर्थं ५४
तत्र महादेवस्थानं तत्रैकरजनीवा
सात् गाणपत्यप्राप्तिः तत्रैव विशा
लाक्षी वदी दर्शनात् सर्वकाम प्रा
प्तिः जामदग्न्याहृत पुष्करतीर्थं ५५
तत्रस्नानपूजनाभ्यां हयमेधफलं
रामह्रदः ५६ यत्र रामेण क्षात्रमु
त्साद्य तेषां रक्तेन पंचह्रदाः कृ
ताः तेषु स्नान तर्पणाभ्यां पितृ
गणात् वरप्राप्तिः बहु सुव
र्ण यज्ञफल प्राप्तिश्च ॥
वंशमूलकं ५७ तत्र स्नानात्
स्वकुलोद्धरणं कायशोधनं ५८
तत्रस्नानात् देहशुद्धिः लोकोद्धारः

५९ तत्रस्नानात् स्वकीय लोकोद्धा
रः श्रीतीर्थं ६० तत्रगमनात् उत्तम
श्रीप्राप्तिः कपिला तीर्थं ६१ तत्र
स्नानदेवपितृपूजनाभ्यां कपिला
सहस्रदानफलं सूर्यतीर्थं ६२ तत्र
स्नानोपवास पितृ पूजनै रग्निष्टोम
फलं देवलोक प्राप्तिश्च गवांभव
नं ६३ तत्राभिषेकेण गोसहस्र दा
नफलं शंखिनीतीर्थं ६४ तत्रस्ना
नात् उत्तमवीर्यप्राप्तिः ब्रह्मावर्तः ६५
तत्र स्नानात् ब्रह्मलोकप्राप्तिः ॥
सुतीर्थकं ६६ तत्र पितृदेवानां
सान्निध्यं तत्रस्नान पितृदेव पूज
नै रश्वमेध फलं पितृलोकप्राप्ति
श्च अंशुमती ६७ तत्र काशीश्वर
तीर्थं स्नानात् सर्वरोगनाशः ब्र
ह्मलोकप्राप्तिश्च तत्रैव मातृतीर्थं
तत्रस्नानात् संतानवृद्धिः श्रीप्राप्ति
श्च शीतवनं ६८ तत्र केशाभ्युक्षणे
न पवित्रता स्थानलोमापहः ६९
तत्र स्नानात् परमगति प्राप्तिः
दशाश्वमेधिकं ७० तत्र स्नाना
त् निष्कलगतिप्राप्तिः मानुष
तीर्थं ७१ तत्रव्याधपीडिता
कृष्णमृगादिगाश्च मानुष्य
त्वं प्राप्ताः तत्र स्नानात् स
र्वपापमुक्तिः स्वर्गवसतिश्च आपगा

नदी ७२ तत्र देव पितृहेशेनैक
ब्राह्मण भोजनेन कोटि ब्राह्मण
भोजनसिद्धिः स्थलोरुवरः ७३ त
त्र ब्रह्मा तिष्ठति तत्रसप्तर्षिकुंडे स्ना
नात् सर्वपापनाशो ब्रह्मलोकप्रा
प्तिश्च कपिलस्य केदारः ७४ तत्र त
पसा सर्वपापनाशः अंतर्द्धान प्रा
प्तिश्च सरकं ७५ तत्र वृषध्वज प
णामेन सर्वकाम शिवलोकयोः
प्राप्तिः इलास्पदं ७६ तत्र स्नान दे
व पितृ पूजनाभ्यां दुर्गतिविनाशः
वाजपेय फल प्राप्तिश्च किंदानं ७७
तत्र स्नानात् अप्रमेय जपफलं
अनाजन्मतीर्थं ७८ तत्रस्नानाद
प्रमेय दानफलं किंजप्य ७९
तत् नारद स्थानं तत्र प्राणत्यागा
त् अनुत्तम लोकप्राप्तिः वैतरणी
नदी ८० तत्र स्नान शूलपाणिपूज
नाभ्यां सर्वपाप मुक्तिः परम पद
प्राप्तिश्च फलकीतीर्थं ८१ फलकी
वने देवास्तपश्चरंति मिश्रकं ८२
तत्र नारदेन सर्वतीर्थानि मिश्रि
तानि तत्रस्नानात् सर्वतीर्थस्ना
नफलं मधुवटी ८३ सा देवीस्था
नं तत्रस्नानदेवपितृपूजनाभ्यां
गोसहस्रदानफलप्राप्तिः कौशि
कीदृषद्वतीसंगमः ८४ तत्रस्ना

नात् सर्वपापमुक्तिः किंदत्तकूपः ८५
तत्र तिलप्रस्थ दानात् ऋण त्रय
मुक्तिः परमसिद्धि प्राप्तिश्च वेदी
तीर्थं ८६ तत्रस्नानात् गोसहस्र
दानफलप्राप्तिः अहःसुदिनं
तीर्थद्वयं ८७ तयोः स्नानात् सू
र्यलोकप्राप्तिः मृगधुमः ८८ त
त्र विष्णुपदे स्नानात् वामन पूज
नाच्च सर्वपापमुक्तिः रविलोक
प्राप्तिश्च सरस्वत्यास्तीर्थं श्रीकुंजं
८९ तत्रस्नानात् स्वर्गवसतिः नै
मिषकुंजे ९० तस्मिन् स्नानात्
हयमेध फल प्राप्तिः कन्यातीर्थं ९१
तत्र स्नानात् ज्योतिष्टोम फलप्रा
प्तिः ब्रह्म स्थानं ९२ तत्र स्नानात्
शूद्रस्यापि ब्राह्मणत्वं ब्राह्मणस्य
परमगतिः सोमतीर्थं ९३ तत्रस्ना
नात् सोमयाग फल प्राप्तिः स
प्तसारस्वत तीर्थं ९४ तत्र स्नान
जपाभ्यां ब्रह्मलोकप्राप्तिः औशन
सकं ९५ तत्र त्रिसंध्यं कार्त्तिकेयस्य
सन्निधानं कपालमोचनं ९६
तत्र स्नानात् सर्वपापनाशः अ
ग्नितीर्थं ९७ तत्र स्नानात् वह्निलो
कप्राप्तिः कुलोद्धरणं च विश्वामित्र
तीर्थं ९८ तत्र स्नानात् ब्राह्मण्यप्राप्तिः
ब्रह्मयोनिः ९९ तत्रस्नानात् ब्रह्मलो

केवासः पृथुदकं ९० तत्र कार्त्तिके
यस्नाने तत्राभिषेकात् अश्वमेध
फलं प्राप्तिः पापिनामपिस्वर्गप्राप्तिः
मधुस्रवं ९१ तत्रस्नानात् गोसहस्र
दानफलप्राप्तिः सरस्वत्यरुणासं
गमः ९२ तत्रत्रिरात्रोपवासस्नाना
भ्यांब्रह्महत्यापापनाशः अवकीर्णं
९३ तत्र दधिमुनि निर्मितं दधिना
चत्वारः समुद्रा आनीताः तत्रस्ना
नात् दुर्गतिविनाशः शतसहस्र
कं ९४ साहस्रकं ९५ उभयत्र
स्नानात् गोसहस्रगुणो भवेत्
रेणुकातीर्थं ९६ तत्राभिषेक पितृ
देव पूजनाभ्यांसर्वपापनाशः अ
ग्निष्टोमफलप्राप्तिश्च विमोचनं
९७ तत्रस्नानात् सर्वप्रतिग्रहदो
षपापनाशः पंचवट तीर्थं ९८
तत्र गमनात् महापुण्यप्राप्तिः
स्वर्गगमनंच तैजसं ९९ यत्रब्र
ह्मादिभिः सैनापत्येकार्त्तिकेयो
भिषिक्तः कुरुतीर्थं ११० त
त्र स्नानात् रुद्रलोकप्राप्तिः
स्वर्गद्वारं १११ तत्र गमनात् ॥
स्वर्गलोकाग्निष्टोम फल प्रा
प्तिः ॥ अनरकं ११२ तत्र ॥
स्नानात् दुर्गति नाशः काम्य
पुरं ११३ तत्र पितृ देव तर्पणा

गोसहस्र दानफलं दानोप
वासे

त् अग्निष्टोम फल प्राप्तिः गो
कर्णहृदः ११४ तत्र स्नानात्
ब्रह्मलोकप्राप्तिः स्थाणुवटती
र्थं ११५ तत्र स्नानैकरात्र वासा
भ्यां रुद्रलोकप्राप्तिः बदरीपाच
नं ११६ तत्र वशिष्ठाश्रमः तत्र त्रि
रात्रोपवास बदर भक्षणाभ्यां अ
श्वमेधफलं इन्द्रलोकप्राप्तिश्च इंद्र
मार्गं ११७ तत्राहोरात्रोपवासात् इं
द्रलोक प्राप्तिः आदित्याश्रमः
११८ तत्र स्नानात् सूर्यलोक
प्राप्तिः सोमतीर्थं ११९ तत्र स्ना
नात् सोमलोकप्राप्तिः कन्याश्र
मः १२० तत्रत्रिरात्रवासोपवासा
भ्यांकन्याशत प्राप्तिः ब्रह्मलोक
गमनंच दधीचतीर्थं १२१ तत्रस्ना
नात् वाजपेयफलप्राप्तिः सन्निहि
तातीर्थं १२२ तत्र अमावस्यायां सर्वा
णि तीर्थान्यायांति एवं सूर्यग्रह
णे स्नानात् शताश्वमेध फलप्रा
प्तिः स्नानदानाभ्यांस्वर्गलोक प्रा
प्तिश्च तत्रामावस्यायांसूर्यग्रहणे
स्नानश्राद्धाभ्यां अश्वमेध सहस्र
फलप्राप्तिः स्नानमात्रात् सर्व
पाप नाशः ब्रह्मलोक प्राप्ति
श्च गंगाहृदः १२३ तत्रस्नानात्
राजसूयाश्वमेधफलप्राप्तिः ॥

कुरुक्षेत्रं १२४ तत्र तरंतुकारंतुक
योः एवं रामहृद मचक्रुकयो रंतरं
एतत्समंतपंचकं पितामहस्योत्त
रवेदिः धर्मतीर्थं १२५ तत्रस्ना
नात् आसप्तम कुलोद्धरणं काम्य
वनं १२६ तत्र स्नानात् अग्निष्टोम
फलं विष्णुलोकप्राप्तिश्च सौग
न्धिकवनं १२७ यत्र ब्रह्मादयो दे
वाः प्रत्यहमायांति तद्वन प्रवेश
मात्रेणसर्वपापनाशः [illegible]सर
स्वती १२८ तत्र स्नान पितृ देव
पूजनाभ्यां अश्वमेध फल प्राप्तिः
ईशानाध्युषितं १२९ तत्र शाकंभ
री देवीतत्रत्रिरात्रोपवासशाकाहा
राभ्यां द्वादशवर्ष शाकाहारफल
प्राप्तिः सुवर्णाख्यं १३० तत्रशिव
स्लिष्टतितस्य पूजनात् अश्वमेध
फलगाणपत्ययोः प्राप्तिः धूमाव
ती १३१ तत्र त्रिरात्रोपवासात् मन
स्कामप्राप्तिः धूमावती दक्षिणा
र्द्धे रथावर्तः १३२ तत्रारोहणेन म
हादेव प्रसादात् परमगति प्राप्तिः
धारा १३३ तत्र स्नानात् शोकनाशः
गंगाद्वारं १३४ तत्र कोटितीर्थे स्ना
नात् पुण्डरीकयाग फलप्राप्तिः
कुलोद्धरणं एकरात्र वासेन गो
सहस्र दान फल प्राप्तिश्च सप्त

गंगं १३५ त्रिगंगं १३६ शक्रावर्तः १३७
एतेषु पितृदेव तर्पणात् पुण्य
लोक प्राप्तिः गंगायमुनासंगमः १३८
तत्रस्नानात् दशाश्वमेध फल
प्राप्तिः कुलोद्धरणंच कनखलः १३९
तत्र स्नान त्रिरात्रोपवासाभ्यांवा
जिमेधफलब्रह्मलोकयोः प्राप्तिः
कपिलावटः १४० तत्रैकरात्रवा
सेन गो सहस्र दान फलप्राप्तिः
कपिलानागराजः १४१ तत्राभि
षेकात् कपिला सहस्र दान फ
लप्राप्तिः ललितिका १४२ शांत
नु तीर्थं तत्र स्नानात् दुर्गति
विनाशः सुगंधा १४३ तत्र गम
नात् सर्वपाप विशुद्धिः ब्रह्मलो
कप्राप्तिश्च रुद्रावर्तः १४४ तत्र
स्नानात् ब्रह्मलोक प्राप्तिः गंगा
सरस्वती संगमः १४५ तत्र स्ना
नात् अश्वमेधफलप्राप्तिः स्वर्ग
गमनंच भद्रकर्णहृदः १४६ तत्र
स्नान शंकर पूजनाभ्यां दुर्गति
नाशः विष्णुलोक प्राप्तिश्च कु
ब्जाम्रकं १४७ तत्र गमनात् स्वर्ग
प्राप्तिः अरुन्धतीवटः १४८ तत्रै
क रात्र वासात् गो सहस्र दानफ
लप्राप्तिः कुलोद्धरणंच सामुद्रकं
१४९ तत्र त्रिरात्रोपवासेन गोसह

स्त्र दान फलं कुलोद्धरणञ्च ब्रह्मा
वर्त्तः १५० तत्र गमनात् अग्निष्टो
म फलं ब्रह्मलोक प्राप्तिश्च य
मुनाप्रभवः १५१ तत्र स्नानात् अ
श्वमेधफलस्वर्गलोकयोः प्राप्तिः
दर्वीसंक्रमणं १५२ तत्र गमनात्
वाजिमेध फल प्राप्तिः ब्रह्मलोक
गमनंच सिंधुप्रभवः १५३ तत्रपं
चरात्रवासात् बहु सुवर्ण यज्ञ
फलप्राप्तिः ऋषिवेदी १५४ तत्र
गमनात् अश्वमेधफलस्वर्गयोः
प्राप्तिः वाशिष्ठीनदी तत्रैव ऋषि
कुल्या १५५ वाशिष्ठी गमनात् सर्व
वर्णानां द्विजत्वप्राप्तिः ऋषिकुल्या
यां स्नानैक मासवासपणाकाहारैः
ऋषिलोक प्राप्तिः भृगुतुंगं १५६
तत्र गमनात् वाजिमेधफलप्राप्तिः
वीरप्रमोक्षः १५७ तत्र गमनात् स
र्वपाप प्रणाशः संध्यासा विद्याती
र्थं १५८ तत्रस्नानात् यत्र तत्रैव वि
द्याप्राप्तिः महाश्रमः १५९ तत्रै
क काल निराहारात् शुभलो
कप्राप्तिः महालयः १६० तत्रष
ष्ठकालोपवासेनैकमासवासा
त् आत्मना सहैकविंशति पु
रुषोद्धारः तत्रैव महेश्वर दर्श
नात् सर्वपापमरणभययोर्विनाशः

बहु सुवर्ण याग फल प्राप्तिश्च ॥
वेतसीका १६१ तत्रगमनात् अश्व
मेध फलं औशनस गति प्राप्तिश्च
सुंदरिका १६२ तत्र गमनात् रूप
प्राप्तिः ब्राह्मणिका १६३ तत्रग
मनात् ब्रह्मलोकप्राप्तिः नैमिषं
१६४ तत्र ब्रह्मा तिष्ठति तत्रप्र
वेशात् सर्व पापनाशः स्नाना
त् गवामययागफल प्राप्तिः स
प्तकुलोद्धारः उपवासेनप्राणत्या
गात् स्वर्गप्राप्तिश्च गंगोद्भेदः १६५
तत्रत्रिरात्रोपवासात् वाजिमेध फ
लप्राप्तिः विष्णुलोकवासश्च सर
स्वती १६६ तत्र पितृदेव तर्पणात्
सारस्वतलोकवासः बाहुदानदी १६७
तत्रैक रात्रि वासात् ब्रह्मलोक
प्राप्तिः गोप्रचारतीर्थं १६८ तत्र
सरयूतीरं तत्र स्नानात् सर्वपाप
नाशः देवलोक प्राप्तिश्च गोम
त्यारामतीर्थं १६९ तत्रस्नानात्
अश्वमेधफलप्राप्तिः निजकुलपा
वनंच सहस्रवं १७० तत्र गमना
त् राजसूयाश्वमेधफल प्राप्तिः
राजगृहं १७१ तत्र स्नानात् कु
बेर वदाह्लादप्राप्तिः मणिना
गः १७२ तत्र गमनात् गोसहस्र
दान फल प्राप्तिः ॥ ॥

एवं तत् समीपे नित्य कर्मकर
णात् सर्पविषभय नाशः एक
रात्रवासात् सर्व पापनाशश्च गो
तमवनं १७३ तत्र अहल्याह्रदे स्ना
नात् परमगति प्राप्तिः श्रीदेवी १७४
तत्र गमनात् श्रीप्राप्तिः उदपानं
१७५ तत्राभिषेकात् वाजिमेधफल
प्राप्तिः जनकराजकूपः १७६ तत्रा
भिषेकात् विष्णुलोक प्राप्तिः ॥
विनशनं १७७ तत्र गमनात् वाज
पेय फलप्राप्तिः विशाल्याः १७८
सासर्वतीर्थजलोद्भवा तत्रगम
नात् वाजपेय फल प्राप्तिः रवि
लोकगमनंच तपोवनं १७९ तत्रा
धिवासात् गुह्यकलोकवासः
कंपनानदी १८० सा सिद्धनिषे
विता तत्रगमनात् पुंडरीकयाग
फलप्राप्तिः विशल्यानदी १८१
तत्र गमनात् अग्निष्टोम फलं दे
वलोके चिरवासश्च माहेश्वरी १८२
तत्र गमनात् अश्वमेधफलप्रा
प्तिः स्वकुलोद्धरणंच दिवौकः
पुष्करिणी १८३ तत्रगमनात् दुर्ग
ति विनाशः वाजिमेध फलप्रा
प्तिश्च रामपदं १८४ तत्रगमनात्
अश्वमेध फलं माहेश्वरपदं १८५
तत्र स्नानात् अश्वमेध ॥

फलंतत्र तीर्थकोटी तत्र स्नानात्
पुंडरीक यागफलप्राप्तिः नाराय
णस्थानं १८६ यत्रशालग्रामनाम
हरिस्तिष्ठति तत्रगमनात् अश्व
मेधफलं विष्णुलोक गमनंच त
त्रैवउदपानं यत्रचत्वारः समुद्राः स
न्निहिताः तत्रस्नानात् दुर्गतिनाशः
तत्र महादेवस्तिष्ठति तत्र गमना
त् अश्वमेध फलप्राप्तिः इंद्रलोक
वासश्च जातिस्मरः १८७ तत्रस्नाना
त् जातिस्मरत्वप्राप्तिः वटेश्वरपुरं १८८
तत्रकेशवस्य दर्शन पूजनाभ्या
मुपवासेन चवांछित कामप्राप्तिः
वामनतीर्थं १८९ तत्र गमनात् दु
र्गति विनाशः विष्णुलोकप्राप्तिश्च
तत्र कौशिकी तिष्ठति तस्याः सेव
नात् राजसूय यज्ञफलप्राप्तिः चम्प
कारण्यं १९० तत्रैकरात्रवासात् गो
सहस्र दानफलप्राप्तिः गोष्ठीनं १९१
तत्रैकरात्रोपवासात् अग्निष्टोमफ
लप्राप्तिः तत्र देव्यासह विश्वेश्व
र स्तिष्ठति तस्य दर्शनात् मित्रा
वरुण लोकवासः कन्यासंवे
द्यं १९२ तत्राहारजयात् मनुलोक
प्राप्तिः तत्रान्नदानमक्षयं भवति
निश्चीरानदी १९३ तत्र गमनात्
अश्वमेध फल प्राप्तिः स्वकुलो

हरणंच निष्क्रीरा संगमेश्वरनदा
नेन ब्रह्मलोक गमनं तत्र वशि
ष्ठाश्रमः तत्राभिषेकात् वाजपेय
फल प्राप्तिः देवह्रदः १९४ तत्र
गमनात् वाजमेधफल प्राप्तिः
कुलोद्धरणंच कौशिकमुनिह्रदः
१९५ तत्र मास वासात् अश्वमेधफ
लप्राप्तिः सर्वतीर्थवरह्रदः १९६
तत्रवासात् बहुसुवर्णयाग फल
प्राप्तिः दुर्गति विनाशश्च वीराश्रमः
१९७ तत्र कुमार स्तिष्ठति तत्र गमना
त् अश्वमेधफलप्राप्तिः अग्निधारा
१९८ तत्र गमनात् अश्वमेध फल
प्राप्तिः कुलोद्धरणंच पितामहसरः
१९९ तत्रशैलराजप्रतिष्ठितोशिव
विस्तुतिष्ठनः तत्राभिषेकात् अग्नि
ष्टोमफलप्राप्तिः तत्रैव कुमारधा
रा तत्रस्नानात् कृतार्थता त्रिका
लोपवासेनब्रह्महत्यानाशः गौरी
शिखरं २०० तत्रारोहणात् स्तुहना
तत्र कुण्डे स्नान पितृदेवार्चना
भ्यां अश्वमेधफल प्राप्तिः स्वर्गग
मनंच ताम्रारुणा २०१ तत्र ग
मनात् वाजिमेध फल प्राप्तिः
शक्रलोक गमनंच नंदिनी
२०२ तत्रत्रिदश सेवितः कूपः
तत्र गमनात् नरमेध फल॥

प्राप्तिः कौशिकारुणासंगमः २०३
तत्र त्रिरात्रोपवासात् सर्वपापमु
क्तिः उर्वशीतीर्थं २०४ सोमाश्रमः
२०५ कुंभकर्णाश्रमः २०६ तेषुस्ना
नात् अश्वमेधफलप्राप्तिः स्वर्गग
मनंच कोकामुखं २०७ तत्रस्ना
नात्जातिस्मरत्वं नंदा २०८ तत्रगमना
त् कृतार्थता सर्वपापनाशः स्वर्ग
मनंच ऋषभद्वीपः २०९ तत्र क्रौंचनि
सूदन सेवनात् सरस्वत्या स्नानाच्च
विमाने विराजः औद्दालकतीर्थं २१०
तत्राभिषेकात् सर्वपापनाशः॥
ब्रह्मतीर्थं २११ तत्र गमनात् वा
जपेयफलप्राप्तिः चम्पा २१२ त
त्र गमनात् गोसहस्र दान फल
प्राप्तिः ललितिका २१३ तत्र गम
नात् वाजपेय फलं विमान प्रा
प्तिश्च संविधतीर्थं २१४ तत्र स्ना
नात् विद्याप्राप्तिः लौहित्यं २१५ त
त्र गमनात् बहु सुवर्ण यागफल
प्राप्तिः करतोया २१६ तत्र त्रिरात्रो
पवासात् हयमेकादश दान
फलप्राप्तिः कोशलया कालती
र्थं २१७ तत्र गमनात् गोसह
दान फलप्राप्तिः स्वर्गगमनंच
गंगासागरसंगमः २१८ तत्र
गमनात् दशाश्वमेध फल

प्राप्तिः गंगायाः परद्वीपः २१९
तत्र स्नान त्रिरात्रोपवासाभ्यांस
र्वकामप्राप्तिः वैतरणी २२० तत्र
गमनात् सर्वपापनाशः विरजं
२२१ तत्र गमनात् चंद्रवद्दीप्तिः
प्रभवः २२२ तत्र गमनात् सर्व
पापनाशः गोसहस्रदानफलं
स्वकुलपावनंच शोणज्योतीरथ्या
संगमः २२३ तत्रपितृ देव तर्पणा
त् अग्निष्टोम फल प्राप्तिः शोण
प्रभवः २२४ नर्मदाप्रभवः २२५ वं
शगुल्मः २२६ तत्र स्नानात् वाजि
मेध फलप्राप्तिः ऋषभः २२७ त
त्र गमनात् गोसहस्रदानफलप्रा
प्तिः पुष्पवती २२८ तत्र स्नान त्रिरा
त्रोपवासाभ्यां गोसहस्रदानफल
प्राप्तिः कुलोद्धरणंच बदरिका २२९
तत्रस्नानात् दीर्घायुष्य प्राप्तिः स्वर्ग
गमनंचमहेन्द्रपर्वतः २३० तत्र राम
तीर्थस्नानात् वाजिमेध फल प्रा
प्तिः मतंगकेदारं २३१ तत्र स्नाना
त् स्वर्गलोकप्राप्तिः श्रीपर्वतः २३२
तत्रनदीतीरेस्नानात् अश्वमेधफ
ल परमसिद्धिप्राप्तिश्च तत्रम
हादेवो देव्यासह तिष्ठति तत्र
देवकुंडेस्नानात् अश्वमेध फ
ल प्राप्तिः शिवलोक गमनंच

पाण्ड्यदेशेऋषभपर्वतः २३३
तत्र गमनात् वाजपेयफलप्रा
प्तिः स्वर्गगमनंच कावेरी २३४
तत्र गमनात् गो सहस्र दानफ
लं समुद्रतीरे कन्यातीर्थं २३५
तत्रस्नानात् सर्व पापनाशः स
मुद्रमध्ये गोकर्णतीर्थं २३६ तत्र
शिवस्तिष्ठति तस्य पूजनात् त्रि
रात्रोपवासाद्दशाश्वमेध तुल्य
फलं गाणपत्य प्राप्तिः द्वादश
रात्रोपवासात् कृतार्थताच तत्र
गायत्रीस्थानं तत्र त्रिरात्रोपवासा
त् गोसहस्र दान फल प्राप्तिः
ब्राह्मणस्य गायत्री पाठात् सदा
सम्परता अब्राह्मणस्य पाठात्
तस्याविनाशः संवर्तवापी २३७
तत्र गमनात् रूपसौभाग्यप्रा
प्तिः वेणा २३८ तत्रपितृ देव त
र्पणात् मयूर हंस युक्त विमा
न प्राप्तिः गोदावरी २३९ तत्रगम
नेन गवामय यज्ञ फलप्राप्तिः
वायुलोक गमनंच वेणासं
गमः २४० तत्र स्नानात् सर्वपा
पनाशः वरदासंगमः २४१ तत्र
स्नानात् वाजिमेधफलप्राप्तिः ब्र
ह्मस्थूणा २४२ तत्रत्रिरात्रोपवासात्
गोसहस्रदान फलप्राप्तिः स्वर्गग

मनंच कुशप्लवनं २४३ तत्रस्नान
त्रिरात्रोपवासाभ्यां चंद्रलोकप्राप्तिः
देवह्रदः २४४ कृष्णवेण्वाजलभव
वनं २४५ ज्योतिमात्रह्रदः २४६ क
न्याश्रमः २४७ तेषुगमनात् अग्निष्टो
म फलप्राप्तिः देवह्रदेस्नानात् १
गोसहस्र दान फलप्राप्तिः ज्योतिर्मा
त्रह्रदे स्नानात् जातिस्मरत्वं पयो १
ष्णीनदी २४८ तत्रस्नान तर्पणाभ्यां
गोसहस्रदानफलप्राप्तिः दंडकार
ण्यं २४९ तत्रमहाराजे जलस्पर्शात्
गो सहस्र दान फल प्राप्तिः शरभं
गाश्रमः २५० शुक्राश्रमः २५१ तत्र
गमनात् दुर्गतिनाशः कुलपवित्र
ताच सूर्पारकं २५२ तत्ररामतीर्थ
तत्र स्नानात् बहु सुवर्णयज्ञ फ
लप्राप्तिः सप्तगोदावरं २५३ तत्र
स्नानात् महा पुण्य प्राप्तिः देवलोक
गमनंच देवपथं २५४ तत्रगमने
नदेवसत्रफलप्राप्तिः तुंगकारण्यं
२५५ तत्रप्रवेशात् सद्यःपापनाशः
मासवासात् सकुलस्यपवित्रता
ब्रह्मलोकगमनंच मेधाविकं
२५६ तत्र पितृ देव तर्पणात्
अग्निष्टोम फल स्मृति मेधा
तां प्राप्तिः कालंजरपर्वतः २५७
तत्रदेवह्रदेस्नानात् सूर्यलोक

प्राप्तिः चित्रकूटपर्वतः २५८ त
त्रमंदाकिन्यां स्नानपितृ देव त
र्पणाभ्यां अश्वमेधफलप्राप्तिः य
त्रमगतिलाभश्च भर्तृस्थानं २५९
तत्रकार्तिकेयस्तिष्ठतितत्र गमना
त् सर्वकाम प्राप्तिः कोटितीर्थे स्ना
नात् सर्वकाम प्राप्तिः कोटितीर्थे
गोसहस्रदान फल प्राप्तिः ज्येष्ठ १
स्थानं २६० तत्र महादेव स्तिष्ठति त
द्दर्शनात् चंद्रवत्प्राप्तिः तत्रकूपेच
त्वारः समुद्राः तिष्ठंति तत्र स्नान
प्रदक्षिणाभ्यां परमगतिप्राप्तिः शृंग
वेरपुरं २६१ यत्ररामोगंगामुत्तीर्णः तत्र
स्नानात् सर्वपापनाशः विस्तलोकप्रा
प्तिश्च मुंजावटः २६२ तत्र महादेवस्ति
ष्ठति तस्य पूजनप्रदक्षिणाभ्यां गाणा
पत्य प्राप्तिः तत्तीर्थेजाह्नवी स्नानात्
सर्वपापनाशः प्रयागः २६३ तत्र त्री
ण्यग्निकुंडानि तत्र यमुनया गंगा सं
गतायत्रब्रह्मादयोदेवाः सिद्धाः पित
रः सनत्कुमारमुख्याऋषयोनाग
सुपर्णसिद्ध कृतगंधर्वाप्सरस
स्तिष्ठन्ति एववेदायज्ञाश्चमूर्ति
मंतः ब्रह्माणमुपासन्ते स सर्व
तीर्थेभ्योऽधिकः तस्य नाम सं
कीर्तन श्रवण मूर्ति कालभ
नैः सर्व पाप नाशः ।। तत्र ॥

स्नानात् त्रिलोके एवं वेद विद्या
सूयत पुण्यंतत् प्राप्तिः राजसूया
श्वमेध फल प्राप्तिश्च तत्र वपन
महत् भोगवतीनामवासुकि ती
र्थं २६४ तत्राभिषेकात् अश्वमेध
फलप्राप्तिः अयोध्या मथुरा मा
या काशीकांचीअवंतिका पुरी
द्वारवतीचैव सप्तैतामोक्षदायि
काः तासु वासंप्रकुर्वंति ये म
ता वा नरा परं लभंतेन पुन
र्जन्म मातृगर्भेषु कुत्रचित् इ
तिपाद्मेभूमिखंडं ॥
तीर्थकरः पुं जिनः इतिहेमचंद्रः
तीर्थकृत् पुं जिनः इतिधरणी
तीर्थंकरः पुं जिनः इतिहेमचंद्रः
तीर्थराजी स्त्री काशी इतित्रिकां
डशेषः ॥
तीर्थवाकः पुं केशः इतिहेमचं
द्रः तीर्थसेवी न पुं स्त्री वकपक्षी
इतिराजनिर्घंटः तीर्थवासिनिति
तीवं स्थौल्ये इतिकविकल्पद्रुमः
तीवरः पुं समुद्रः व्याधः इतिमे
दिनी वर्णसंकरजातिविशेषः ।
तेओर इति भाषा सत्वराजपुत्र
स्त्रियां तत्रियाज्जातः इति ब्रह्म
वैवर्ते शूर्णिकभार्यायां पुण्ड्रका

जातः इतिपराशर पद्धतिः ती
वरी स्त्री व्याधपत्नी इतिसिद्धांत
कौमुद्यामुणादिवृत्तिः ॥
तीव्रं क्ली अभिशयः इत्यमरः
तीवे तीक्ष्णं त्रपु इत्युणादिको
षः लोहं इतिराजनिर्घंटः ॥
तीव्रः त्रि अत्यन्तः नितान्तः
कटुः इत्युणादिकोषः शिवेपुं
इति शब्दरत्नावली ॥
तीव्रकंठः पुं सूरणः इतिराज
निर्घंटः ॥
तीव्रगंधा स्त्री यवानी इति राज
निर्घंटः ॥
तीव्रज्वाला स्त्री धातकी इतिरा
जनिर्घंटः ॥
तीव्रवेदना स्त्री यातना अति
प्राय वेदना इत्यमरः ॥
तीव्रा स्त्री कटुरोहिणी गण्डदू
र्वा राजिका इतिमेदिनी नदीवि
शेषः इति शब्दरत्नावली ॥
महाज्योतिष्मती तरदीहस्तः ॥
तुलसी इतिराजनिर्घंटः ॥
तीक्ष्णं क्ली खरं विषं लोहं ॥
युद्धं इत्यमरः मरणं शस्त्रं शी
घ्रं इतिकहीकासारसुंदरी ॥
सामुद्रलवणं मुष्ककः इतिमेदिनी

चव्यकं इतिराजनिर्घंटः मरकं
इति हेमचंद्रः तीक्ष्णवस्तूनि य
था प्रतिभा १ हीरकं २ कटाक्षः
३ दूर्वांकुर ४ नखः ५ लवणं ६
रविकरः ७ इतिकविकल्पलता
तीक्ष्णः पुं यवक्षारः इतिमेदिनी
श्वेतकुशः कुंदुरुकः इति राज
निर्घण्टः तीक्ष्णगणो यथा आ
श्लेषा आर्द्रा ज्येष्ठा मूला इति
ज्योतिषं ॥
तीक्ष्णः त्रि तिग्मः आत्मत्यागी
इति मेदिनी निरालस्यः ॥
सुबुद्धिः इति धरणी योगी इत्य
जयपालः ॥
तीक्ष्णकः पुं मुष्ककः गौरसर्ष
पः इति राजनिर्घंटः ॥
तीक्ष्णकंटकः पुं धुस्तूरः इति
जटाधरः वर्बुरः इङ्गुदी करीरः
इति राजनिर्घण्टः ॥
तीक्ष्णकंटका स्त्री कन्थारीवृ
क्षः इतिराजनिर्घंटः ॥
तीक्ष्णकंदः पुं पलाण्डुः इति
राजनिर्घण्टः ॥
तीक्ष्णकर्मा न् त्रि तीव्रकर्मा त
त्पर्यायः आयःशूलिकः २ इ
तित्रिकाण्डशेषः ॥ ॥

तीक्ष्णकल्कः पुं तम्बुरुवृक्षः इ
ति राजनिर्घंटः ॥
तीक्ष्णगंधः पुं शोभांजनः इति
राजनिर्घंटः रक्ततुलसी इतिर
त्नमाला कुंदुरुनामगंधद्रव्यं ।
इति जटाधरः ॥
तीक्ष्णगंधकः पुं शोभांजनवृक्षः
इत्यमरः ॥
तीक्ष्णगंधा स्त्री श्वेतवचा कन्था
री राजिका इतिराजनिर्घंटः ॥
वचा इतिमेदिनी जीवंती इतिश
ब्दचंद्रिका सूक्ष्मैला इति रत्न
माला ॥
तीक्ष्णतण्डुला स्त्री पिप्पली इ
ति रत्नमाला ॥
तीक्ष्णतैलं क्ली सर्जरसः स्नु
हीक्षीरं सुरा इति शब्दरत्नावली
तीक्ष्णदंष्ट्रः पुं व्याघ्रः इतिराज
निर्घंटः ॥
तीक्ष्णपत्रः पुं तम्बुरुवृक्षः इ
ति राजनिर्घण्टः ॥
तीक्ष्णपुष्पं क्ली लवंगं इति
राजनिर्घंटः ॥
तीक्ष्णपुष्पा स्त्री केतकी इति
राजनिर्घण्टः ॥
तीक्ष्णफलः पुं तम्बुरुवृक्षः इति

इति राजनिर्घंटः ॥ ॥
तीक्ष्णमूलः पुं शिग्रुः कुलं
जनः इति राजनिर्घंटः ॥
तीक्ष्णरसः पुं यवक्षारः इतिर
त्नमाला ॥
तीक्ष्णशूकः पुं यवः इतिहेमचं
द्रः तीक्ष्णसारा स्त्री शिंशपा इतिरा
जनिर्घण्टः ॥
तीक्ष्णा स्त्री वचा सर्पकंकालिका
वृक्षः इतिरत्नमाला कविकच्छुः
महाज्योतिष्मती अत्यम्लपर्णी
इतिजटाधरः ॥
तीक्ष्णायसं क्ली लोहविशेषः ती
खा इति इशपान इतिच भाषा तत्
पर्यायः लोहं २ शस्त्रायसं ३ शस्त्रं
४ पिण्डं ५ पिण्डायसं ६ शठ ७
आयसं ८ निशितं ९ तीव्रं १० ॥
खड्गं ११ मुण्डजं १२ अयः १३ वि
द्रायसं १४ चीनजं १५ अस्य गुणाः
रूक्षत्वं उष्णत्वं तिक्तत्वं वातपित्त
कफ प्रमेह पाण्डु शूल नाशित्वं
तीक्ष्णत्वं मुण्डलोहाधिकत्वंच ॥
इतिराजनिर्घण्टः तु ल हेमा हिं
सायां पूर्वौ इतिकविकल्प ॥
द्रुमः ॥ ॥
तु त्व पादपूरणे भेदः अवधा

रणे इत्यमरः समुच्चयः ॥ पक्षा
न्तरे नियोगः प्रशंसा विनिग्र
हः इतिशब्दरत्नावली ॥
तुक्खे पुं अपत्य इतिहेमचंद्रः तु
कादीरी स्त्री तुगाक्षीरी इति
हेमचंद्रः ॥
तुगा स्त्री वंशलोचना इतिरा
जनिर्घण्टः तुगाक्षीरी स्त्री वं
शलोचना इतिराजनिर्घंटः ॥
वंशलोचनाभेदः अस्या गु
णाः क्षय श्वासकास नाशित्वं
मधुरत्वं हिमत्वंच इतिराजव
ल्लभः ॥
तुंगः पुं पुन्नागवृक्षः पर्वतः
बुधग्रहः इति हेमचंद्रः नारिके
लः गण्डकः इतिराजनिर्घंटः
योगभेदः इति शब्दरत्नावली
सत ग्रहाणां उच्च राशिः यथा
सूर्यादुच्चान्यज वृष मृग स्त्री
कुलीरान्त्य युके दिग्वह्नीन्द्र नृय
तिथिधृशरान्तम विंशांशैर्विशा
न् अंशानेतान् वदति यवन
आत तुंगान्स्तंगोस्तान्नेवांशान्स
दनभवनेषाहमीचान्सनीचान् इ
तिदीपिका आदित्य मेषे वृषभे
शशांके कन्यागते सेच गुरौ ।

कुलीरे मीनेच मृगे मकरे म
हीजे शनौ तुलाया मिति तुङ्ग
गेहाः इति समयामृतं ॥
अथ तुङ्गस्य ग्रहफलं तुङ्गेऽर्क
शुभ संयुतः शुभकरे मित्रेक्षित
ष्टोयदा दैवात् पश्यति सोपिवा
शुभकरानेकं द्विकंवात्रिकं वि
श्वेशाः प्रथितो विमर्द्दित रिपुः
क्षौणीशमान्योयदात्तापालार्च्चि
तपादपद्मयुगलोराजा त्रिको
णोयदा २ तुङ्गेचंद्रमसि प्रसन्न
वपुषिश्रभाऽऽदनष्टयुतोप्रख्यातो
रविमर्द्दकोः गदनन्नराजेश्वरो
रूपवान् तापालार्चित पादप
द्मयुगलो वाधर्मशीलोमहा
न् सौम्यैरेवयुतोऽथवा प्रियत
मे दृष्टे त्रिकोणेपिच च यदि
भवति मृगस्थोभूमिपुत्रस्तदावे
नदिनकरमयूखाक्रूष्टरश्मि नरें
द्रः अगद तनुरभीतः शत्रुदर्पा
पहारीप्रमानरिपुनरेन्द्रः स्यांति
कोणेपि जातः स कन्यास्थः श
शलाञ्छनस्य तनयस्तिष्येशकैः
संयुतो दृष्टो वायदि संयुतः शुभ
करै ज्ञोत स्तदाभूपतिः यात्रायांत
रंगोद्भममकरिणा याते मही कंपते
लक्ष्मीभूद्वरणीरुहाविगलिता
यांतित्रिकोणेपिच ५ तुङ्गे गुरौ
मित्रखगेन दृष्टो राजा भवेदिंद्र
समान मूर्त्तिः गजाश्व नौकान
रधूर्णलक्ष्मीः पृथ्वीपतिः स्वस्य
त्रिकोणगेपि ६ तुङ्गे भृगौ शुभ
सहृत् प्रयुतेच दृष्टे दैवात् पुनः
सयदि पश्यति मित्र संघान् भू
पार्थिवो भवति कीर्त्तिकरः प्रधा
नोदीर्घायुरुपग्रसवभूगर्भगजेत्रि
कोणे ७ तुङ्गे शनौ मित्र खगेन
दृष्टे प्रचण्ड दशोन्नपतिप्रधानः
नष्टप्रपनेदिग्गामनेच पृथ्वी त्रिको
णगेचापिनरेंद्रमूर्त्तिः शा भवति
धरणिपालोनीचबुद्धिः प्रतापी द
यगज धन पूर्णोजातिवर्गे विर
क्तः कुटिलमति रतीनो भूविभा
गहरयुक्त स्तमसि मिथुन संस्थे
जायतेमानवेन्द्रः रा मृगपतिहृ
षकन्याकर्कटस्थेच राहौ भव
ति विपुललक्ष्मी राज राजाधि
पोवा हयगजनर नौका मंडितः सार्व
भौमोन्नपति रमर पूज्योराहः तुङ्गी
चिरायुः रा अतिनिधनव्ययतुङ्गे
कीर्त्तिनमेनत् फलं वर्षं केन्द्र
त्रिकोणलाभेवा तुङ्गफलंयथा

दिष्टं इति कोष्ठीप्रदीपः ॥
तुङ्गः त्रि उग्रः प्रधानं उन्नतः
इति शब्दरत्नावली किंजल्के
क्ली इति राजनिर्घंटः ॥
तुङ्गकः पुं पुन्नागवृक्षः इति
शब्दरत्नावली ॥
तुङ्गभद्रः पुं मदोन्मत्तहस्ती
इतिमेदिनी ॥
तुङ्गभद्रा स्त्री नदीविशेषः सा
दक्षिणे प्रसिद्धा तस्या जल
स्य गुणाः स्निग्धत्वं निर्मलत्वं
स्वादुत्वं गुरुत्वं कण्डुपित्तास्रद
त्वं प्रायःसात्म्यत्वमेधाकरत्व
च इतिराजनिर्घण्टः ॥
तुङ्गशेखरः पुं पर्वतः इतिश
ब्दमाला ॥
तुङ्गा स्त्री वंशलोचना शमी इ
ति राजनिर्घण्टः ॥
तुङ्गिनी स्त्री महाशतावरी इ
ति राजनिर्घण्टः ॥
तुङ्गी स्त्री हरिद्रा वर्वरा इति
मेदिनी ॥
तुङ्गी न पुं तुङ्गस्थानस्थितः
उच्चस्थ ग्रहः इतिज्योतिषं ॥
तुङ्गीपतिः पुं चंद्रः इतित्रि
काण्डशेषः ॥ ॥
तुङ्गीशः पुं शिवः कृष्णः सूर्य्यः
इति शब्दरत्नावली ॥
तुच्छे क्ली पुलाकजं भुवि इति
भाषा इत्युणादिकोषः ॥
तुच्छः त्रि शून्यः इत्यमरः हीनः
इत्युणादिकोषः अल्पः इतिहे
मचंद्रः ॥
तुच्छद्रुः पुं एरण्डवृक्षः इतिश
ब्दचंद्रिका ॥
तुच्छधान्यकं क्ली पुलाकः आ
गड़ा इति भाषा इतिरत्नमाला
तुच्छा स्त्री तस्या नीलीवृक्षः इ
ति भावप्रकाशः ॥
तुज इ क दीप्तौ निकेतने हिं
सायां वले दाने इतिकविक
ल्पद्रुमः ॥
तुज इ भाषा वले इतिकविक
ल्पद्रुमः ॥
तुज हिंसे इतिकविकल्पद्रुमः
तुट शि कलहे इतिकविकल्प
द्रुमः तुट्टुमः पुं उन्दुरुः इतित्रि
काण्डशेषः ॥
तुड शि भेदे इतिकविकल्पद्रु
मः तुड इ ङ वधे निष्पीडने इ
ति यावत् इतिकविकल्पद्रुमः
तुड ऋ वधे द्वियाकरण इतिया

वत् इतिकविकल्पद्रुमः ॥
तुडु अनादरे इतिकविकल्पद्रुमः
तुण प कुटिलीकरणे इतिकविकल्पद्रुमः तुणिः पुं कुणिः तरुः इत्यमरटीकायांस्वामी
तुण्डं क्ली मुखं इत्यमरः ॥
तुण्डकेरिका स्त्री कार्पासी इति राजनिर्घण्टः
तुण्डकेरी स्त्री बिंबिका तेलाकुचा इति भाषा इत्यमरटीकायां भरतः ।
तुण्डिः पुं मुखं चंचु इत्युणादिकोषः नाभौ स्त्री इति शब्दरत्नावली ॥
तुण्डिका स्त्री नाभिः बिम्बिका इति शब्दरत्नावली ॥
तुण्डिकेरी स्त्री कार्पासी बिंबिका इत्यमरः ॥
अस्या पर्यांतराणि तुंडिकेरिका तुण्डिकेरिः तुण्डकेरी तुण्डिकेशी इत्यमरटीका ॥
तुण्डिकेशी स्त्री बिम्बिका इति शब्दचंद्रिका ॥
तुण्डिभः त्रि वृहन्नाभिः वृहन्नाभि युक्तः इत्यमरः ॥
तुण्डिलः स्त्री वृहन्नाभिः इत्यमरः मुखरः इत्युणादिकोषः ॥
तुत्थ त क स्तुतौ इतिकविकल्पद्रुमः ॥
तुत्थं क्ली खर्परीतुत्थं अञ्जनभेदः तुतिया इतिभाषा तत्पर्यायः नीलांजनं २ हरिताश्म ३ तुत्थकं ४ मयूरग्रीवकं ५ ताम्रगर्भं ६ अमृतोद्भवं ७ मयूरतुत्थं ८ शिखिकंठं ९ नीलं १० इति राजनिर्घण्टः तुत्थांजनं ११ शिखिग्रीवं १२ वितुन्नकं १३ मयूरकं १४ इत्यमरः तुत्थकं १५ मूषातुत्थं १६ मत्तामदं १७ इतिशब्दचंद्रिका अस्यगुणाः कटुत्वं क्षारत्वं उष्णत्वं श्वित्र नेत्रामय नाशित्वं सर्वविष दोषशमनत्वं कांतिकारकत्वंच इतिराजनिर्घण्टः क्षारत्वं निर्मलत्वं लघुत्वं भेदकत्वं कृमि कण्डू कुष्ठक फनाशित्वंच इतिराजवल्लभः रसांजनं ग्रावा इत्युणादिकोषः अग्निः इति संक्षिप्तसारे उणादिवृत्तिः अग्नौ पुं इति हेमचंद्रः ॥
तुत्थकं क्ली तुत्थं इतिशब्दचंद्रिका तुत्था स्त्री नीलीवृक्षः तद्देला

इत्यमरः महानीली इति राजनिर्घण्टः ॥
तुत्थांजनः क्ली उपधातुविशेषः तुत्थं इत्यमरः ॥
तुद श ज औ व्यथे इति कविकल्पद्रुमः ॥
तुन्दं क्ली उदरं इत्यमरः ॥
तुन्दकूपिका स्त्री नाभिः इति हेमचंद्रः ॥
तुन्दकूपी स्त्री नाभिः इतित्रिकाण्डशेषः ॥
तुन्दपरिमृजः त्रि तुंदपरिमृजः इत्यमरटीकायां रमानाथः ॥
तुन्दपरिमृजः त्रि अलसः इत्यमरः तुन्दि क्ली उदरं इतिहेमचंद्रः गंधर्वविशेषे पुं इति जटाधरः
तुन्दिः स्त्री नाभिः इति त्रिकाण्डशेषः ॥
तुन्दिकः त्रि विशालजठरोजनः इति शब्दरत्नावली ॥
तुन्दिका स्त्री नाभिः इति शब्दरत्नावली ॥
तुन्दितः त्रि तुण्डिलः इतिभरतद्विरूपकोषः ॥
तुन्दिभः त्रि तुन्दिलः इति शब्दरत्नावली ॥
तुन्दिलः त्रि विशालजठरोजनः भुँडे इतिभाषा तत्पर्यायः ॥ पिचिण्डिलः २ बृहत्कुक्षिः ३ तुन्दिकः ४ तुन्दिभः ५ तुन्दी ६ इति शब्दरत्नावली ॥
तुन्दिलफला स्त्री त्रपुषी इतिराजनिर्घण्टः ॥
तुन्दी स्त्री नाभिः इतिशब्दरत्नावली तुन्दी २ त्रि तुन्दिलः इति शब्दरत्नावली अमरश्च ॥
तुन्नः पुं नन्दीवृक्षः तूंद इति भाषा इत्यमरः व्यथितेत्रि इति तद्यथान्वर्थ दर्शनात् तुन्नवायः पुं सौचिकः दरजी इति ॥ भाषा इत्यमरः ॥
तुम्प वधे इतिकविकल्पद्रुमः
तुम्प श वधे क्लेशे इतिकविकल्पद्रुमः ॥
तुम्फ वधे इति कविकल्पद्रुमः
तुम्फ श वधे क्लेशे इति कविकल्पद्रुमः ॥
तुप वधे इतिकविकल्पद्रुमः
तुप प श क्लेशे वधे इति कविकल्पद्रुमः ॥
तुप इक अर्दने इतिकविकल्पद्रुमः तुफ प श क्लेशे वधे इति

कविकल्पद्रुमः
तफ वधे इतिकविकल्पद्रुमः
तव इ क अर्हे पीडायामितिया
वत् इति कविकल्पद्रुमः ॥
तभ स्ल उ. हिंसे इतिकविकल्प
द्रुमः ॥
त भ य ग हिंसे इतिकविकल्प
द्रुमः ॥
तभ य ग हिंसे इतिकविकल्प
द्रुमः ॥
तमरः पुं क्ली तमलः इत्यमरः
टीकायांरायमुकुटः ॥
तमलं क्ली रणसंकुलं संकी
र्णयुद्धं इत्यमरमेदिनीकरौ पर
स्परसंबाधोरणसंकुलः इतिभ
रतः तमलः पुं कलिद्रुमः इति
मेदिनी व्याकुलो रणः इतित्रि
काण्डशेषः ॥
तम्बः पुं स्त्री अलावुः इत्यमरः
टीकायांभरतः ॥
तम्बकः पुं अलावुः इतिशब्द
रत्नावली राजालावुः इतिराजनि
र्घण्टः तंबा स्त्री अलावुः इतिश
ब्दरत्नावली गावी इति त्रिकाण्डशे
षः तम्बिः स्त्री अलावुः इतिश
ब्दरत्नावली ॥

तम्बिका स्त्री अलावुः इतिशब्द
रत्नावली कटुतम्बी इति राज
निर्घण्टः ॥
तम्बिनी स्त्री कटुतंबी इतिराज
निर्घण्टः ॥
तम्बी स्त्री अलावुः इत्यमरः ॥
कलिंगूद्रः इतिरत्नमाला ॥
तम्बीपुष्पं क्ली लताम्बुजं अला
वुपुष्पं इतिहारावली ॥
तम्बुकं क्ली अलावुफलं इति
हट्टचंद्रः ॥
तम्बुकः पुं अलावुः इति भरत
धृत हट्टचंद्रः ॥
तम्बुरी स्त्री अकुरी धन्याकं
इति मेदिनी ॥
तम्बुरु क्ली अलम्बुरु इत्यमरटी
कायां भरतः
तम्बुरुः पुं गंधर्वविशेषः स्वर्गगा
यकः इति जटाधरः अर्हदुपास
कविशेषः इति हेमचंद्रः वृ
क्षभेदः तत्पर्यायः स्फुलघ्नः २
इतिरत्नमाला सौरजः ३ सौर
वनजः ४ सानुजः ६ द्विजः ७
तीक्ष्णकल्कः ८ तीक्ष्णफलः
तीक्ष्णपत्रः १० महामुनिः ॥स्फु
टलः १२ स्फुगंधिः १३ अस्यगुणाः मधुर
त्व तिक्तत्वं ॥

कटुत्वे उष्णत्वं कफ वात स्थूल
गुल्मोदराध्मान क्रिमि नाशित्व
वह्निदीपनत्वंच इतिराजनिर्घण्टः
तर लि र वेगे इति कविकल्पद्रुमः
तरः त्रि वेगवान् इति तरसाप्र
हृटीकायां भरतः ॥
तरगः पुं चित्र घोटकः इति
मेदिनी ॥
तरगगंधा स्त्री अश्वगंधा इति
रत्नमाला ॥
तरगब्रह्मचर्यकं क्ली अभावादं
गनात्यागः इतित्रिकाण्डशेषः
तरगी न त्रि अश्वारोहः इति हे
मचंद्रः ॥
तरगी स्त्री अश्वगंधा इतिमेदिनी
अश्वस्त्री इतिव्याकरणं ॥
तरंगः पुं स्त्री घोटकः इत्यमरः
चित्र इति शब्दरत्नावली
तरंगकः पुं घोषकाकृतिः हस्ति
घोषा इतिख्यातः इतिरत्नमाला
तरंगद्विषणी स्त्री महिषी इति
राजनिर्घण्टः ॥
तरंगप्रियः पुं यवः इति राज।
निर्घण्टः ॥
तरंगमः पुं स्त्री घोटकः इत्यम
रः तरंगवक्त्रः पुं किन्नरः इतिज

टाधरः ॥
तरंगवदनः पुं किन्नरः इत्यम
रः तरंगारिः पुं करवीरः इतिर
त्नमाला ॥
तरंगिका स्त्री देवदालीलता
इतिराजनिर्घण्टः ॥
तरंगी स्त्री अश्वगंधा इतिशब्द
रत्नावली घोटिकाहृद्यः इति
राजनिर्घण्टः ॥
तरायणः त्रि परायणः इत्यम
रः टीकायांस्वामी ॥
तराषाट् रे पुं इंद्रः इत्यमरः
अस्य रूपान्तरं तराषाट् ॥
तरिः स्त्री तरी इतिशब्दरत्नाव
ली तरीस्त्री नेत्रवायस्यकोष्ठनि
र्मितोपकरणं विशेषः तत्पर्यायः
नेत्रकाष्ठ २ तलिः ३ तली ४ त
रिः ५ इतिशब्दरत्नावली ॥
तरीयं क्ली ब्रह्म इति वेदान्तसारः
तरीयः त्रि चतुर्थः इतिमुग्धबो
धं तरीयवर्णः पुं शूद्रः इतिह
लायुधः तरुष्कः पुं गंधद्रव्य
भेदः शिलारस इति ख्यातः तत्प
र्यायः यवनः २ अम्रः ३ धूम्रव
र्णः ४ सुगंधिकः ५ सिल्हकः ६
सिल्हसारः ७ पीतसारः ८ कपिः

पिण्याकः १० कपिजः ११ कल्पः १२
पिण्डिनः १३ पिण्डतैलकः १४ करेव
रः १५ कृत्रिमकः १६ लेपनः १७ अ
स्यगुणाः सुरभित्वं तिक्तत्वं कटुत्वं
स्निग्धत्वं कुष्ठकफपित्तास्त्ररीकृच्छ्र
मूत्राघातज्वरार्त्ति नाशित्वंच इतिरा
जनिर्घण्टः म्लेच्छजातिविशेषः ।
तुरुष्कइतिभाषा इति मेदिनी दे
शविशेषः तरकस्तान इतिपा
रस्य भाषा तत्पर्य्यायः प्रा
खिः २ इति हेमचन्द्रः ग्रीवा
सकृद्भृतः इति विश्वः ॥
तुर्य्यः त्रि चतुर्थः इतिमुग्ध
बोधं तुर्व ई हिंसे इतिकविक
ल्पद्रुमः तुर्वसुः पु ययातिराजपु
त्रः यथा ययातिरुवाच यत्त्वंमे
हृदयाज्जातोवयः स्वन प्रयच्छसि
तस्मात्प्रजा समुच्छेदं तुर्वसोतवया
स्यति संकीर्णाचारधर्मेषु प्रतिलो
मचरेषुच पिशिताशिषु लोके
षुत्वं राजा भविष्यसि गुरुदा
रप्रसक्तेषु तिर्य्यग्योनि गतेषुच
पशुधर्मेषु म्लेच्छेषु पापेषुच
भविष्यसि इति मत्स्यपुराणे
तुल कि परिमाणे इतिकविक
ल्पद्रुमः ॥

तुलसारिणी स्त्री तूणं इतिश
ब्दमा ॥
तुलसी स्त्री स्वनामख्यातवृक्षः त
त्पर्य्यायः सुभगा २ तीव्रा ३ पावनी ४
विष्णुवल्लभा ५ सुरेज्या ६ सुरसा ७
कायस्था ८ सुरदुन्दुभिः ९ सुरभिः
१० बहुपत्री ११ मंजरी १२ हरिप्रिया
१३ अपेतराक्षसी १४ श्यामा १५
गौरी १६ त्रिदशमंजरी १७ भूत
घ्नी १८ भूतपत्री १९ इतिराजनि
र्घण्टः पर्णासः २० वृन्दा २१ क
ठिंजरः २२ कुठेरकः २३ इतिश
ब्दरत्नावली वैष्णवी २४ पुण्या २५
पवित्रा २६ माधवी २७ अमृता २८
पत्रपुष्पा २९ सुगन्धा ३० गन्ध
हारिणी ३१ इति भरत धृत मधु
मित्रः सुरवल्ली ३२ प्रेतराक्षसी
३३ सुवहा ३४ ग्राम्या ३५ सुल
भा ३६ बहुमंजरी ३७ देवदुन्दु
भिः ३८ इतिभावप्रकाशः क्षु
द्रपत्र तुलस्याः पर्य्यायः खर
पत्रः १ जंबीरः २ पत्रपुष्पः ३
फणिज्जकः ४ अल्पपत्रः ५ स
मीरणः ६ इति रत्नमाला मरुव
कः ७ प्रस्थपुष्पः ८ इत्यमरः
गन्धतुलस्याः पर्य्यायः सुगन्धकः १

गन्धनामा २ तीक्ष्णगन्धः ३ फणि
ज्जकः ४ गन्धफणिज्जः ५ सुगन्धः
६ देवदुन्दुभिः ७ एते रक्त तुलस्याः
पर्य्यायाः इतिलोकव्यवहारः
बिल्वगन्धतुलस्याः पर्य्यायः वैकु
ण्ठकः १ बिल्वगन्धः २ अल्पमानकः
३ श्वेत तुलस्याः पर्य्यायः अर्जकः
१ श्वेतपर्णासः २ गन्धपत्रः ३ कुठेरकः
४ अस्तार्जकः ५ तीक्ष्णः ६ तीक्ष्णगन्धः
७ सितार्जकः ८ कृष्णतुलस्याः
पर्य्यायः कृष्णार्जकः १ कृष्णव
र्णी २ कालमानः ३ करालकः ४
कालपर्णी ५ सुरभिः ६ मानकः ७
वर्वरीतुलस्याः पर्य्यायः सुर
भिः १ तुलसीद्वेषा २ सुरसा ३
अपेतराक्षसी ४ इति रत्नमाला
वर्वरी ५ कवरी ६ तुंगी ७ खरपु
ष्पा ८ अजगन्धिका ९ इत्यमरः
सामान्य तुलस्या गुणाः कटुत्वं
तिक्तत्वं उष्णत्वं सुरभित्वं श्ले
ष्मवातजन्तु भूत कृमि वांतिना
शित्वं रुचि कारित्वंच इतिराज
निर्घण्टः दाह पित्तकारित्वं दीप
नत्वं कुष्ठकृच्छ्रास्त्रपार्श्वरुङ्नाशि
त्वंच शुक्ला कृष्णाच तुलसी गु
णै स्तुल्या इतिभावप्रकाशः अस्या

उत्पत्तिर्यथा गोलोके इयं तुल
सी गोपी श्रीकृष्ण प्रिया श्रीकृ
ष्णेन सह अस्याः क्रीडां दृष्ट्वा रा
धाशापात्मानवीं योनिं या
हि तच्छ्रुत्वा सा खिन्ना गोविन्दस्ता
मुवाच त्वं भारते तपस्त्वमाम्
मांशं नारायणं लभिष्यसि सा
पृथिव्यां धर्मध्वज राजपत्न्यां मा
धव्यां कार्तिकी पूर्णिमायां जाता
नरानार्य्यश्च तां दृष्ट्वा तुलनां रा
त्रमयोग्या स्तेन इह लोकेपि तु
लसीति नाम्ना ख्याता सा तपस्त
प्तुं वनं गता तदानीं राधा शापात्
सुदाम गोपालो दानवीं योनिं
प्राप्य शंखचूड नाम्ना ख्यातः सो
पि ब्रह्मणो वरात् सर्ववध्यत्वं प्रा
पः यदा तव पत्न्याः सतीत्वनाशो
भविष्यति तदा मरिष्यसि इति ब्र
ह्मा तमुक्तवान् स तुलसी मुवाह
देवानामधिकारं जहार देवाः ब्र
ह्मसभां गताः ब्रह्मा तैः सार्द्धं
शिवलोकं गतवान् शिवस्तैः सार्द्धं
वैकुण्ठं गतवान् नारायणो ब्रह्मा
णमुवाच मम शूलं गृहीत्वा शि
वो युद्धार्थं तत्र गच्छतु अहंच शंख
चूडरूपेण तत्पत्न्याः सतीत्व
भंगं करिष्यामि इति श्रुत्वा शिव

स्तत्र जगाम स शिवेन सह युद्धे
नियुक्तस्तदानीं नारायणस्तत्प
त्नीं तद्वेषेण धर्षितवान् पश्चात्
सा नारायणं ज्ञात्वा शशाप त्वं
पाषाणो भव जन्मान्तरे आत्मानं
विस्मरिष्यसि इत्युक्त्वा तच्चरणयो
र्पतत्सा रोदच्च तदा नारायण ।
स्तामुवाच त्वमिदं शरीरं त्यक्त्वा
मासदृशी भव मया सह क्रीड इयं
तनुर्गंडकी नदी भवतु तव केशा
समूहस्तुलसी नाम्ना पुण्यवृक्षो
भवतु तदा तत् सर्वमभूत् इति ।
ब्रह्मवैवर्ते पद्मपुराणमते जल
धरपत्नी वृन्दालावण्यदर्शनेन
विष्णुर्मुग्धः तन्मोहवारणार्थं
देवा महादेवशरणं गताः महादे
वस्तानुवाच मायामाराधयत ते
मायां तुष्टुवुः माया तानुवाच य
हं स्वतः सत्वतमो गुणैर्गौरी लक्ष्मी
स्वधा रूपेणास्ति शामिता युष्माकं
कार्यं विधास्यामि तद्गत्वा देवा
स्तासां समीपमागत्य प्रणेमुः
ता स्तेभ्यो बीजानि ददुर्वाक्यानि
जगदुश्च यत्र विष्णुस्तिष्ठति त
त्रेमानि बीजानि वपत देवास्तथा
चक्रुस्तद्बीजेभ्यस्त्रयो वृक्षा अभवन्
धात्रीमालतीतुलसीच धात्री स्वधा

भूता मालती लक्ष्म्यंशा भूता तुल
सी गौर्यंशा भूता तुलस्या माहात्म्यं
यथा ब्रह्मोवाच तुलस्याः शृणु
माहात्म्यं पापघ्नं सर्वकामदं यत्सु
रा विष्णुनाप्रोक्तं तत्ते वक्ष्याम्यशे
षतः संप्राप्ते कार्तिके दृष्ट्वा नि
यमेन जनार्दनः पूजनीयो मह
त्स्निग्धकोमलैस्तुलसीदलैः दृ
ष्टा स्पृष्टा तथा ध्याता कार्तिके
नमिता विता रोपिता सेविता नि
त्यं पापं हन्ति युगार्जितं सप्तथा
तुलसी येस्तु सेविता द्विजसत्तम
युगकोटिसहस्राणि ते वसन्ति
हरेर्गृहे रोपिता तुलसी यावत्
कुरुते मूलविस्तरं तावद्युगसह
स्राणि तनोति सुकृतं हरिः तुलसी
दलपुष्पाणि यो दद्याद्धरये मुने
कार्तिके सकलं पापं सोऽन्यजन्मा
र्जितं दहेत् रोपिता तुलसी या
वत् वर्द्धते वसुधातले तावत्
कल्पसहस्राणि विष्णुलोके
महीयते यत्फलं सर्वपुष्पेषु
सर्वपत्रेणायतफलं तुलस्यास्त
दलार्द्धेन पुण्यं स्याद्विप्रजेन तुल
सीगंधमादाय यत्र गच्छति मारु
तः दिशो दशापुनात्याशु भूतग्रा
मांश्चतुर्विधान् तुलसी ॥

काननोद्भूता छाया यत्र भवेन्मुने
तत्र श्राद्धं प्रदातव्यं पितृणां तृ
प्तिहेतवे तुलसीबीजनिकरो य
स्मिन् पतति वै मुने तस्यान्तं
परमं ज्ञेयं पितृणां प्रीतिवर्द्धनं
यस्मिन् गृहे द्विजश्रेष्ठ तुलसी
तन्मृत्तिका तत्रैव नोपसर्प
न्ति भूतले यमकिंकराः तुलसी
मृत्तिकालिप्तो यदि प्राणान् परि
त्यजेत् यमेन नेक्षितुं शक्तो मुक्तः
पापशतैरपि तुलसीमृत्तिका
लिप्तं ललाटं यस्य दृश्यते कले
स्पृशन्ति नो तस्य कलिर्मुनिवरो
त्तम यः कश्चित्तुलसीमूले कार्ति
के केशवप्रियः दीपं ददाति विप्रें
द्र स लभेद्वैष्णवं पदं तुलसीकान
नं चैव गृहे यस्यावतिष्ठते तद्गृ
हं तीर्थभूतं हि नायान्ति यमकिंकराः
दर्शनं नर्मदायास्तु गंगास्नानं त
थैव च तुलसीवनसंसर्गः सममे
तत्त्रयः स्मृतं रोपणात् पालनात्
सेवा दर्शनात् स्पर्शनान्नृणां तुल
सी दहते पापं वाङ्मनःकायसंचि
तं तुलसीमंजरीभिर्यः कुर्यात्
द्धरिहरार्चनं न स गर्भगृहं याति
मुक्तिभागी भवेन्नरः पुष्कराद्यानि

तीर्थानि गंगाद्याः सरितस्तथा
वासुदेवादयो देवा वसन्ति तुल
सीदले तुलसीमंजरीयुक्तो यस्तु
प्राणान् विमुंचति यमो न वीक्षितुं
शक्तो मुक्तः पापशतैरपि इति प
द्मोत्तरखंडे ॥ यत्रैकस्तुलसी
वृक्षस्तिष्ठति द्विजसत्तम तत्रै
व त्रिदशाः सर्वे ब्रह्मविष्णु
शिवादयः केशवः पत्रमध्येषु
पत्राग्रेषु प्रजापतिः पत्रवृन्ते
शिवस्तिष्ठेत् तुलस्याः सर्वदे
वहि लक्ष्मी सरस्वती चैव गाय
त्री चंडिका तथा शची चान्या दे
वपत्न्यस्तत्पुष्पेषु वसन्ति वै
इन्द्राऽग्निः शमनश्चैव नैरृतो
वरुणस्तथा पवनश्च कुबेरश्च
तच्छाखायां वसन्त्यमी आदि
त्यादिग्रहाः सर्वे विश्वेदेवाश्च
सर्वदा वसवो मनवश्चैव तथा
देवर्षयोऽखिलाः विद्याधराश्च
गन्धर्वाः सिद्धाश्चाप्सरसस्तथा
तुलसीपत्रमाश्रित्य सर्वदा
निवसन्ति वै चिन्वन्ति तृणजा
तानि तुलसीमूलजानि वै ते
देहस्थावलरम्याश्रितानि तत्
क्षणाद्धरिः ग्रीष्मकाले द्विजश्रे
ष्ठ सुगंधैः शीतलैर्जलैः तुलसी

सेचनं कृत्वा नरो निर्वाणमाप्नु
यात् चंद्रातपं वा छत्रं वा तुलस्यै
यस्तु यच्छति विशेषतो निदा
घेषु स मुक्तः सर्वपातकैः वैशा
खे तु जलधाराभिर्वर्द्धयेत् तुलसीं ज
नः सेचयेत् सोऽश्वमेधस्य फलं प्रा
प्नोति नित्यशः कदाचित्तुलसीं दु
र्गे सेचयेद्यो नरोत्तमः तस्य देवम
नि विप्रर्षे लक्ष्मी भवति निश्चला
गोमयेन तुलसीमूले यः कुर्या
दुपलेपनं संमार्जनं च कुरुते
तस्य पुण्यफलं शृणु रजांसि
तस्य यावंति हरीभूतानि तेषु मि
ते तावत् कल्पसहस्राणि मो
दते ब्रह्मणा सह यद्धर्म्म कर्म
कुरुते मनुजः पृथिव्यां नारायण
प्रियतमां तुलसीं विना च तत्
सर्वमेव विफलं भवति द्विजें
द्र पद्मेक्षणोऽपि नहि तुष्यति
देवदेवः यस्य स्यात्तुलसीपत्रं
मुखे शिरसि कर्णयोः मृत्युका
ले द्विजश्रेष्ठ तस्य स्वामी न भा
स्करिः इति पाद्मे क्रियायोग
सारः सुस्नातः सर्वतीर्थे
षु सर्वयज्ञेषु दीक्षितः तुल
सीपत्रतोये च यो भिषेकं स
माचरेत् गवामयुत दानेन

यत्फलं लभते नरः तुलसीपत्र
दानेन तत्फलं कार्त्तिके सति ॥
तुलसीतोयकणिका मृत्युकाले
च यो लभेत् रत्नयानं समारुह्य
वैकुंठं स प्रयाति च त्रिकालं
तुलसीपत्रं शुद्धं पर्युषितं सति
श्राद्धे व्रते वा दाने वा प्रतिष्ठायां सु
रार्च्चने भूगतं तोयपतितं यद्
दत्तं विष्णवे सति शुद्धं तत्तुलसी
पत्रं क्षालनादन्यकर्मणि ॥
तुलसीचयननिषेधकालो य
था पूर्णिमायाममायां च द्वाद
श्यां रविसंक्रमे तैलाभ्यंगे च स्ना
ने मध्याह्ने निशि संध्ययोः
अशौचेऽशुचिकाले च रात्रिवासा
न्वितेऽपि वा तुलसीं ये च छिन्दं
ति ते छिंदंति हरेः शिवः तुल
सीस्पर्शनेन मिथ्याप्रतिज्ञायां
मिथ्याशपथे च दोषो यथा तु
लसीं स्वकरे कृत्वा स्वीकारं यो न
रक्षति स याति कालसूत्रं च या
वच्चंद्रदिवाकरौ करोति मिथ्या
शपथं तुलस्या यो हि मानवः स
याति कुंभीपाकं च यावदिंद्राश्चतुर्द
श इति ब्रह्मवैवर्त्ते प्रकृतिखंडे तुल
सीपत्रचयने मंत्रो यथा मात

स्तुलसि गोविंदहृदयानंदकारि
णि नारायणस्य पूजार्थं चिनोमि
त्वां नमोऽस्तु ते कुसुमैः पारिजा
ताद्यैः सुगंधैरपि केशवः त्वया
विना नैव तृप्तिं चिनोमि त्वा म
तः शुभे त्वया विना नैव तृप्तिं चि
नोमि त्वा मतः शुभे त्वया विना म
हाभागे समस्तं कर्म निष्फलं अ
तस्तुलसि देवि त्वां चिनोमि वरदा
भव चयनोद्भवदुःखं च यद्देवि ते
हृदि वर्त्तते तत्क्षमस्व जगन्मात
स्तुलसि त्वां नमाम्यहं कृतांजलि
रिमान्मंत्रान् पठित्वा वैष्णवो जनः
करतालत्रयं दत्वा चिनुयात्तुल
सीदलं शनैः शनैः स्तथा कारे
ण्णीयते तुलसीदलं यथा न क
स्यते शाखा तुलस्या द्विजसत्त
म पत्राणां चयने विप्र भग्नशा
खा यथा भवेत् तथा हृदि व्य
था विष्णोर्ह्रीयते तुलसीपतेः
इति पाद्मे क्रियायोगसारः तुल
सीकाष्ठमालामाहात्म्यं यथा तु
लसीकाष्ठनिर्माणमालां गृह्ण
ति ये नराः पदे पदेऽश्वमेधानां लभ
ते निश्चितं फलं इति ब्रह्मवैवर्त्ते प्रकृ
तिखंडे सात्वतेन तुलसीकाष्ठमाला
कंजसमुद्भवा धार्य्या नित्यं प्रयत्नेन

तेन त्वं कमलस्य लक्षणं इति भक्तस्य तु
लसीकंजकाष्ठसमुद्भवा विष्णोर्थं
मात्मनो माला धृता कृष्णेन दर्शि
ता इति पाद्मोत्तरखण्डे गणेश
पूजने तुलसी निषेधो यथा तु
लसीं प्रति गणेशवाक्यं पुष्पा
णां सारभूता त्वं भविष्यसि मनो
रमे कलांशेन महाभागे स्वयं
नारायणप्रिया प्रिया त्वं सर्वदे
वानां कृष्णस्य च विशेषतः पूजा
विमुक्तिदा नृणां मम त्याज्या च
सर्वदा इति ब्रह्मवैवर्त्ते गणेश
खंडे तुलस्याः स्तवो यथा
नारायण उवाच वृंदा वृंदावनी
विश्वपूजिता विश्वपावनी पुष्प
सारा नंदिनी च तुलसी कृष्णजी
वनी एतन्नामाष्टकं चैतत् स्तोत्रं
नामार्थसंयुतं यः पठेत्तां च संपू
ज्य सोऽश्वमेधफलं लभेत् इति
ब्रह्मवैवर्त्ते प्रकृतिखंडे ॥
तुलसीद्वेषी स्त्री वर्वरी इति रत्न
माला तुला स्त्री सादृश्यं माने गृ
हाणां दाने त्वथायपीविका पलश
ते भारे इति मेदिनी मेषादि
द्वादशराशिमध्ये सप्तम रा
शिः तत्पर्य्यायः युकः २ युक ३
घटः ४ तौली ५ तुलाभृत् ६ इति

ज्योतिषं सा चित्रा शेष पाद द्वय स्वातीसमुदाय युक्त विशाखा प्रथमपादत्रयेण भवति तदधिष्ठातृदेवतातुलाधारिपुरुषः अस्याः शिरसउदयः नानावर्णाः उल्लंबभावः सापश्चिम दिक् स्वामिनी वायुराशिस्त्रिगुणा चिक्कणा निःशब्दा वनचारिणी अल्पसंताना अल्पस्त्रीसंगा शूद्रवर्णासमानांगा च तत्रजातस्य फलं वक्ताविद्यावरः स्त्रीद्रःखितः इति जातकं जन्मकालीन चं द्राश्रितैतद्राशिफलं वृष तुरंग गजक्रयविक्रयोद्विजसुरार्च्चनदानमनाः शुमान् शशिनि तौलि गतेवक्रदार भाग्विभव संचित विविधविक्रमः इति कोष्ठीप्रदीपः तस्याउपरयेतत्रासकलग्नं भवति तस्य गारिगतपापग्रहरिमासंदशत्वग्गुलाधिकपंचांगुलप्रभेदप्रोक्तमानेन विशायतोशो पटत्रिंशत्पलाधिकपंचदंडाः इतिज्योतिषं तत्रजातफलं तुलालग्ने शुभानजातः सुधीः सत्कर्मतत्परः विद्वान् सर्वकलावित्तोधनाप्याजनप्रजितः इतिकोष्ठीप्रदीपः परीक्षा विशेषः यथा नारदः ब्राह्मणस्य घटो देयः क्षत्रियस्य हुताशनः वैश्यस्य सलिलं देयं शूद्रस्य विषमेव तु साधारणः समस्तानां कोषः सोक्रामनी विभिः विषवर्ज्जं ब्राह्मणस्य सर्वेषां तु तुलास्मृता अथतुलाउत्पत्ति विधिः यज्ञियं वृक्षं छित्वा मंत्रपूर्वकं छित्वा लोकपालेभ्यः प्रणम्य पंडितैः चतुर्हस्ता चतुरस्रा ऋज्वी तुला कार्य्या तत्र त्रिषु स्थानेषु वलयानि दातव्यानि तत्र षड्हस्तौ स्तंभौ कृत्वाहस्तद्वयमवधानेन दक्षिणोत्तरयोर्दिशोर्हस्तद्वयनिखनने कृत्वा यद्दृष्टारक कीलकायस्तंभयो रुपरि मंत्रद्वय छिद्रं मध्यनिवेशित लोहांकुशपट्टकं विधाय तत्पट्टकस्य मध्य स्थितांकुशेन तुलामध्य वलयस्य लोहं संयुज्यात् पर्वंच सति स्तंभयोरन्तरा तिर्य्यक् तुलादण्डं तिष्ठति तुलाग्रस्थिताभ्यामायसकीलकाभ्यां शिक्याद्वय रज्जुवंधनं कुर्य्यात् तलायाः पार्श्वयोः प्राकृतस्य दिशोर्तोरणस्तंभौ तुलाभाटशाखलोक्षायौ कार्यौ तोरणयोरुपरिस्तत्रसमहौसन्मयादयोमलौ धटमस्तकचावतावलम्बौ ॥ ॥

कार्य्यो तुलादण्ड पूर्व पश्चिमयोर्धार्य्यः पूर्वशिकाशिलातोलयेत् पश्चिमे कर्म्मारं तुलायाउपरिलंदेयं यदिजले नलवते उदा तुलासमास्तेयो अथैतन्नयोगः कृतोपवासः कृतस्नानादिः प्राड्विवाको ब्राह्मणः कार्य्यं पृच्छेत् निवदितं विवेचयेत् ततोभियुक्तं तोलयित्वावतार्य्य धर्म्मावाहनादिकं कुर्य्यात् ओं तत्सदित्युच्चा। र्य्य ब्राह्मणत्रयं गंधादिना पूजयित्वातान् स्वस्ति पुण्याहमहं दिव्यकं विद्धीच यित्वादिक्यागभूतहोमार्थं ब्रह्मचतुष्टयं ऋत्विक्चतुष्टयंच पाद्यादिभिरभ्यर्च्य वृणुयात् अथ शक्तावेकं ब्राह्मणमेकं ऋत्विजंच ततस्तुलां सपताकां ध्वजालंकृतां भूमौ निधायतस्यां प्राङ्मुखः प्राड्विवाकः पुष्पाक्षतमादाय ओं भूर्भुवः स्वरित्युच्चार्य्य एह्येहि भगवन् धर्म दिव्येस्मिन् समाविश सहितो लोकपालेश्च वस्वादित्यमरुद्गणैः इति मंत्रेण धर्ममावाह्य इदमर्घ्यं ओं धर्माय नमः इत्यादि प्रयोगेणार्घ्यपाद्याचमनीय मधुपर्काचमनीयवस्त्रयज्ञोपवीताचमनीयमुकुट कटक भूषणान्तं दत्वा तथैवार्घ्यादि भूषणान्तं प्रणवादि नमोन्तेन स्व स्व नाम्ना पूर्वस्यां इंद्राय दक्षिणस्यां कृयेराय आग्नेय्यां अग्नये नैर्ऋत्यां निर्ऋतये पश्चायां वायवे ऐशान्यां ईशानाय इंद्रस्य दक्षिणपार्श्वे अष्टवसुभ्यः प्रत्येकं नामभिः तत्र धराय ध्रुवाय सोमाय आपाय अनिलाय अनलाय प्रत्युषाय प्रभासाय इंद्रेशानयोर्मध्ये तथा द्वादशादित्येभ्यः तत्र धात्रे अर्य्यम्णे मित्रायवरुणाय अंशाय भगायइंद्राय विवस्वते पूष्णे पर्जन्याय त्वष्ट्रे विष्णवे अग्निपश्चिमभागे नैकादशरुद्रेभ्यः तत्र वीरभद्राय शंभवे गिरीशाय अजैकपदे अहिर्बुध्न्याय पिनाकिने अपराजिताय भुवनाधीश्वराय कपालिने स्थाणवे भवाय यम रक्षसो र्मध्ये तथामातृभ्यः तत्र ब्राह्म्यै माहेश्वर्य्यै कौमार्य्यै वैष्णव्यै वाराह्यै माहेन्द्र्यै चामुण्डायै निर्ऋति मरे गणेशाय वरुणोत्तरे अष्टमरुद्भ्यः तत्र गगनाय स्पर्शनाय वायवे अनिलाय मारुताय प्राणाय प्राणेशाय जीवाय धरोत्तरभागे रु

गौर्य्यैपाद्यादि भूषणान्तं दत्वा
धर्म्माय गन्धपुष्पधूपदीपनैवे
द्यानि पूर्ववद्दत्वा इन्द्रादि दुर्गान्ते
भ्यो गन्धादिकं दद्यात् ततश्च
तद्दिक्षु चतुर्भिर्ब्राह्मणैर्विभिन्नवे
दैः अग्नीन् प्रज्वाल्य वेकति जैक
मग्निः प्राड्विवाकः पूर्वोक्तविधि
नासंस्थाप्य प्रणव पूर्विकां सव्या
हृतिकां गायत्रीं स्वाहान्तां मुक्ता
पश्चात्तेन पायसेन समिद्भिर्भि
लिताभिरष्टोत्तरशतं अष्टाविंशतिं
अष्टौ वा जुहुयात् ततो दक्षिणां द
द्यात् एवं हवनान्ते देवपूजां विधा
य प्राथ्वांकृतोपवासं आर्द्रवास
सं पश्चिमशिखं कृत्वा इष्टकोष्ठ
पूर्वशिखं कृत्वा उत्तोल्य धरोपरि
जलदानेन मासमवगाह्य प्रवदा
रयेत् ततः प्राड्विवाकः तद्दिनकृ
जलमस्याविच्छेदकादिमुत्पांप
क्तिं वयेन समसंख्यातरेण श्री
दित्यचन्द्रावनिलोनलश्चद्यौर्भू
मिरापोहृदयं यमश्च अहश्च
रात्रिश्च उभे च संध्ये धर्म्मोपि जानाति
तिनरस्य वृत्तं इति चतुर्मन्त्रारिशु
दक्षर मन्त्र समेतां समभिपूज्यार्थ
करणाकरणरूपमिदमभे दन
मिदम्यत्र मस्मान्मया नष्टहीनमि

त्वादिरूपां प्रतिज्ञां लिपिपत्रे विलि
ख्य तत्पत्रं शोध्य शिरोगतं कुर्य्या
त् ततः प्राड्विवाको धटमभिमन्त्र
येदेभिः त्वं धटो ब्रह्मणा सृष्टः
परीक्षार्थं दुरात्मनां धकारस्ह
मसूर्तिस्त्वं टकारात् कुटिलं नरं
धृतो धारयते यस्माद्धटस्तेनाभि
धीयते त्वं वेत्सि सर्वभूतानां
पापानि सुकृतानि च त्वमेव दे
व जानीषे न विदुः यानि मानवाः
व्यवहाराभिशस्तोयं मानुषः शु
द्धिमिच्छति तदेनं संशयादस्मा
द्धर्म्मतस्त्रातुमर्हसि तुलाधारकं
च नियमेदनेन ब्रह्मघ्नो ये स्मृ
ता लोका ये लोकाः कूटसाक्षि
णः तुलाधारस्य ते लोकास्तुला
धारयतो मृषा धर्म्मस्त्वं तुला म
भिमन्त्रयेदनेन तुले सत्यधामा
सि पुरा देवैर्विनिर्म्मिता तत्सत्य
वद कल्याणि संशयान्मां विमोच
य यद्यस्मि पापकृन्मातः स्त
तो मां त्वमधो नय शुद्धश्चेद्गम
योर्द्ध्वं मां सर्वं वेत्सि कृताकृतं
ततः प्राड्विवाकः पूर्वानीतं तं पु
रुषं तुलामारोपयेत् आरोपितं
माकोनयत्तस्मान्नयथाकाशे
देशे स्थापयेः ।। ।।

कान्तं वक्रं हतं शीर्णं चेद्रं मत्वा
शान्तो चेत् ततस्तामः प्राङ्गेश्वेन
श्वेता रागः कुरः प्राग्यात्तस्माद्वा
त्रेहम्र्यस्थाने धाय्येकोने कर्त्तव्या
इत्यस्य पंचधा धावकालस्तत्र सु
हाभुद्धत्तानाय स्थापयेत् ततः प्र
तिमानद्व्याङ्गुद्धीवस्थानेभ्रुद्धः अ
धोवस्थाने त्वशुद्धः समावस्थाने
अल्पदोषः संदेहे पुनः परीक्षारी
ति दृष्टकारणव्यतिरेकेणाच्छेद
भङ्गेवाप्यशुद्धिमादिशेत् ततः शु
द्धिहिताचार्यादीन् दक्षिणादिभि
स्तोषयेत् इति दिव्यतत्त्वं ।।
तुलाकोटिः स्त्री नूपुरे मानभेदः
अर्बुदः इति हेमचन्द्रः ।।
तुलाकोटी स्त्री तुलाकोटिः इ
त्यमरटीकायां भरतः ।।
तुलाकोषः पुं तुलापरीक्षा इ
ति मिताक्षरा ।।
तुलाधरः पुं तुलाराशिः वणि
जि इति मेदिनी तुलागुणः इ
ति हेमचन्द्रः ।।
तुलापुरुषदानं क्ली षोडश
महादानान्तर्गत दानविशेषः
यथा आयत सर्वदानानां तुलापु

रुषसंज्ञितं तस्य कालो यथा
नोक्तानि यानि गुह्यानि महादाना
नि षोडश तानि ते संप्रवक्ष्यामि
यथा वदनुपूर्वशः तुलापुरुष
योगाख्यं येषामादौ विधीयते
अयने विषुवे चैव व्यतीपाते दि
नक्षये युगादिषूपरागेषु तथा
मन्वन्तरादिषु संक्रान्त्यां पौर्ण
मास्यां च द्वादशीष्वष्टकासु च
यज्ञोत्सवविवाहेषु दुःस्वप्ना
द्भुतदर्शने द्रव्यब्राह्मणलाभो
वा श्रद्धा वा यत्र जायते तस्य दे
शा यथा तीर्थे वायतने गोष्ठ
कूपारामसरित्सु च गृहे वा
थ वने वापि तडागे रुचिरे यथा
महादानानि देयानि संसारभय
भीरुणा अस्य विधानं यथा
पुण्यां तिथिमथासाद्य कृत्वा
ब्राह्मणवाचनं मंडपं रचयेद्वि
द्वान् तन्महासनं बुधः समह
स्तं भवेद्वेदीमध्ये षट्करायता
वा तस्मिन्नैव तोरणं कुर्यात् सार
दारुमयं शुभं कुर्यात् कुण्डानि
चत्वारि चतुर्दिक्षु विचक्षणः
तुलारोपणमस्तारे रश्मि
भि स्तोरणमेतत् वेर्थवत्

विधानतः समेखला योनि समा
युतानि संपूर्णकुंभानि सहासना
नि सताम्रकुण्डद्वय संयुतानि
सयज्ञपात्राणि सहस्रुवाणि द्व
स्तप्रमाणानि तिलाज्य वरपुष्पा
पहाराणि सशोभनानि पूर्वोत्तरे
हस्तमिताच वेदी ग्रहादि देवेश्व
र पूजनाय अर्च्यो द्विजैर्ब्रह्मशि
वाच्युतानां तत्रैव कार्य्य फल
स्रवमाल्यैः ब्रह्मशिवाच्युतानां
प्रतिमास्तु पूज्या कार्य्या स्तरेषां
दक्षिणे कार्य्या लोकेश वर्णाः
परितः पताकामध्ये ध्वजं किं
किणिका युतं स्यात् द्वारेषु का
र्य्याणि च तोरणानि चत्वार्य्यपि
क्षीरवनस्पतीनां द्वारेषु कुंभ
द्वय मत्र कार्य्यं स्रग्गंध धूपांब
र रत्नयुक्तं यत्र पूर्वे सारदारु
मयं कुर्य्या दिमकं तस्येदानी
मनुष्ठान माह सालेंगुदी चं
दन देवदारु श्रीपर्णि बिल्व प्रि
यकांचनोत्थं स्तंभद्वयं हस्त पु
गात्रखातं कृत्वा द्वंद्वं पंचकरोच्छ्रि
तेतत् तदन्तरं हस्तचतुष्टयं स्या
द्धवोन्तरायोच तदंगमेव चन्द्र
स्तातुला कार्य्या पादोकार्य्याप्त न
या विधो अन्तरं तत्तयोर्हस्तो भवेद
धर्द्व मेव च समानजातिश्च तुला
वलंब्याहेमेन मध्ये पुरुषेण युक्ता
हैमेन पुरुषेणाति सुवर्ण निर्मित
वासुदेवाकृतिने ति बोद्धव्यं दैर्घ्येण
साहस्तचतुष्टयं स्यात् पृथुत्वमस्या
स्तदंगुलीस्यात् सुवर्णपत्राभर
णाच कार्य्या सलोहपाशद्वय शोरव
लाभिः युतासुवर्णेन तु रत्नमाला
विभूषिता माल्य विलेपनाभ्यां च
कं लिखेद्वारिजगर्भयुक्तं नानारजोभि
र्भुवि कीर्णपुष्पं वितानकं चोपरि पं
चवर्णं संस्थापयेत् पंच पताकशोभ
भूति तुला निर्माणयुक्तं अथ द्विजा
वेदविदश्च कार्य्याः सवामवेशाव
यशीलयुक्ताः विधान दक्षाः पद्वो
ऽनुकूला यत्रार्य्य देश प्रभवा द्वि
जेंद्राः गुरुश्च वेदांग विदार्य्य देश
समुद्भवः शीलकुलाभिरूपः कार्य्यः
पुराणाभिरतोतिदक्षः प्रसन्नगंभी
र स्वरसत्वीकः पूर्वेण ऋग्वेदविदो यथा
स्तां यजुर्विदो दक्षिणतश्च पश्चात स्या
ग्यो द्विजो साम विदोव पश्चादथर्व
णा उत्तरतश्च कार्य्या विनायकादि
ग्रह लोकपाल वस्वष्टकादित्य मरु
द्गणानां ब्रह्माच्युतेशान वनस्पती
नां स्वमंत्र ॥ ॥

तो होम चतुष्टयं स्यात् जप्यानि
सूक्तानि तथैव चैषां मनुक्रमेण
पि यथा स्वरूपं अभ्यर्च्चयेल्लोक
पतीन् क्रमेण मंत्रैरमीभिर्यजमा
नयुक्तः इत्यावाह्य सर्वदेवानिति
गन्धो हेमभूषणं कुण्डलानि च है
मानि सूत्राणि कटकानि च द्विगु
णं गुरवे दद्यात् भूषणाच्छादनादि
कं जापकाः शांतिकाध्यायजापकाः
सर्वतो दिशं उपोषिता स्ततः सर्वे
कृत्वैव मधिवासनं आवाहने च म
ध्येच कार्य्यो ब्राह्मणवाचनं ततो
मंगलशब्देन स्नापितो वेद पुंग
वैः त्रिः प्रदक्षिण मावृत्य गृहीत
कुसुमांजलिः शुक्लमाल्यांबरो भू
त्वा तां तुलामभिमंत्रयेत् नमस्ते
सर्वदेवानां शक्तिस्त्वं शक्ति मा
स्थिता साक्षीभूता जगद्धात्री नि
र्मिता विश्वयोनिना एकतः सर्व
सत्यानि तथानृतशतानि च ध
र्माधर्मकृतां मध्ये स्थापितासि ज
गद्धिते त्वं तुले सर्वभूतानां प्रमा
णमिह कीर्तिता मां तोलयंती सं
साराद्धरस्व नमोस्तु ते योऽसौ त
त्त्वाधिपो देवः पुरुषः पंचविंशकः
स एकोऽधिष्ठितो देवि त्वयि तस्मा
न्नमोस्तु ते नमो नमस्ते गोविं
द तुलापुरुषसंज्ञकः त्वं हरे
तारयस्वास्मानस्मात् संसारसा
गरात् पुण्यकालमथासाद्य कृ
त्वाधिवासनं पुनः पुनः प्रदक्षि
णं कृत्वा तां तुलामारुहेद्बुधः
सखड्गवर्म्मः कवची सर्वाभरण
भूषितः धर्मराज मथादाय है
मं सूर्येण संयुतं कराभ्यां बद्ध
मुष्टिभ्यामास्ते पश्यन् हरेर्मुख
ततो परे तुला भागे न्यसेयु द्विज
पुंगवाः सा स्यादभ्यधिकं यावत्
कांचनं चाति निर्मलं पुष्टिकाम
स्तु कुर्वीत भूमि संस्थं नरेश्वर त
णमात्रं ततः स्थित्वा पुनरेत दुदी
रयेत् नमस्ते सर्वभूतानां सा
क्षीभूते सनातनि पितामहेन
देवि त्वं निर्मिता परमेष्ठिना त्व
या धृतं जगत्सर्वं सहस्थावर
जंगमं सर्वभूतात्मभूतस्थ नम
स्ते विश्वधारिणि ततोवतीर्य्य
गुरवे पूर्वमर्द्धं निवेदयेत् प्राप्य
तेषां ऋत्विक्भ्यश्च तथान्येभ्यो प्रदा
पयेत् दीनानाथविशिष्टादीन्
जयेत् ब्राह्मणैः सह न चिरं धार
येद्देहे हेम संप्रादितं बुधः तिष्ठन्
भयावहं यस्मात् शोकव्याधिकरं तृणां

प्रीत्यं परस्त्रीकरणात् श्रेयः प्राप्नोति पुष्कलं तस्याद्य विशेषेण फलं यथा अष्टानामपि धातूनां यस्तुलां कृत्वा नरः सर्वपापैः प्रमुच्येत मनोवाक्कायसंभवैः यावद्धान्यस्थितं तस्य तावत्कोटिशतानि च मोदते तेन वर्षाणां स्वर्गलोके न संशयः अथ मानुष्यमाक्रम्य कदाचित् कालपर्य्यये धनधान्यसमृद्धो वै जायते महतां कुले आत्मनस्तु तुलां कृत्वा स्ववर्णे यः प्रयच्छति स तारयेत् पितृगणान् दशपूर्वान् दशापरान् आत्मनस्तु तथा देहात् फलभाग्जायते नरः जन्मप्रभृति यत् पापं मातृकं पैतृकं तथा स्ववर्णदानात्तद्दारिद्र्यं न पश्यति कदाचन रजतस्य तुलां कृत्वा स्वकृतीयः प्रयच्छति तावद्वर्षप्रमाणेन निर्मलः स्वर्गभाग्भवेत् अनेन तरुभवेद्दाता पृथिव्यां नात्र संशयः स्वर्णहारी कुष्ठी वा सर्वव्याधियुतोपि वा ताम्रस्य तु तुलां कृत्वा मुच्यते नात्र संशयः सप्तवर्षसहस्रं वै स्वर्गलोके महीयते यः प्रयच्छति स तु रङ्गवङ्गं प्राप्य वर्षाणां सहस्रो

दते आयसस्य तुलां कृत्वा दाता रत्नाधिपो भवेत् लभते सुतमस्यान्ते बलवान् जायते सदा त्रैलस्य तु तुलां कृत्वा यो ददाति द्विजातये सोऽप्सरः प्रातसंकीर्णे विमाने दिवि मोदते सीसकस्य तुलां कृत्वा यो ददातीह मानवः स गंधर्वपदं गच्छेत् नानाभरणभूषितः रङ्गस्य तु तुलां कृत्वा विप्रेभ्यो यः प्रयच्छति विमुक्तः सर्वपापेभ्यश्चन्द्रसायुज्यमाप्नुयात् चूतस्य तु तुलां कृत्वा ये प्रयच्छन्ति मानवाः तेजस्विनोऽभिजायन्ते रोगाभिश्च चिरजीविनः तैलस्य तु तुलां कृत्वा यो वै दद्याद्विजातये अरोगित्वं सुखित्वं वै आयुष्मानपि जायते अम्बरः सर्वसौभाग्यं सर्वान्कामान्मधुप्रदः अनेन विधिना यस्तु तुलापुरुषमाचरेत् प्रतिलोकाधिपस्थाने प्रतिमन्वन्तरं वसेत् विमानेनार्कवर्णेन किंकिणीजालमालिना प्रज्यमानोऽप्सरोभिश्च ततो विष्णुपुरं व्रजेत् कल्पकोटिशतं यावत् तिष्ठेल्लोके महीयते कर्मक्षयादिह पुनर्भवेद्राजराजो भूपालमौलिमणिरा

जितपादपीठः श्रद्धान्वितो भवति यज्ञसहस्रयाजी दीप्तप्रतापजितसर्वमहीपलोकः यो दीप्यमानमपि पश्यति तन्नियुक्तः कालान्तरे स्मरति वाचयतीह लोके यो वा शृणोति पठतीह समानरूपः प्राप्नोति वासवपुरं परदेवजुष्टं इति दानसागरः ॥

तुलाबीजं क्ली गुञ्जा इति कांडशेषः ॥

तुलिः स्त्री तूरी इति शब्दरत्नावली तूलिका इत्यमरटीकासारसुन्दरी ॥

तुलिका स्त्री खञ्जनिक इति त्रिकाण्डशेषः ॥

तुलिनी स्त्री शाल्मलिः इति रत्नमाला ॥

तुलिफला स्त्री शाल्मलिः इति रत्नमाला ॥

तुली स्त्री तूरी इति शब्दरत्नावली तुल्यः त्रि सादृश्ययुक्तः तत्पर्य्यायः समः १ सदृक्षः २ सदृशः ३ सदृक् ४ साधारणः ५ समानः ६ ७ इत्यमरः सधर्मः ८ संनिभः ९ सरूपः १० इति जटाधरः उत्तरपदस्थास्तुल्यवाचका यथा निभः १ संकाशः २ नीकाशः ३ प्रतीकाशः ४ उपमा ५ इत्यमरः भूतः ६ रूपः ७ कल्पः ८ इति भरतः प्रभः ९ इति शब्दरत्नावली ॥

तुल्यपानं क्ली आत्मीयेन जनेन सह मिलित्वा एककाले कृतपानं तत्पर्य्यायः सपीतिः २ इत्यमरः

तुवरः पुं क्ली कषायरसः इत्यमरः कषाययुक्ते श्मश्रुहीने च त्रि इत्युणादिकोषः ॥

तुवरयावनलः पुं धान्यविशेषः तत्पर्य्यायः तुवरः २ कषाययावनालः ३ रक्तयावनलः ४ लोहितकस्तुम्बुरुधान्यं ५ अस्य गुणाः कषायत्वं उष्णत्वं विरेचकत्वं संग्राहित्वं वातशामनत्वं विदाहित्वं शोषकारित्वंच इति राजनिर्घण्टः ॥

तुवरिका स्त्री सौराष्ट्रजमृत्तिका इत्यमरः आढकी इति भरतः

तुवरी स्त्री आढकी सौराष्ट्रमृत्तिका तत्पर्य्यायः मृत् २ सौराष्ट्री ३ मृत्स्ना ४ आसंगः ५ मसी ६ सुराष्ट्रजा ७ मृत्तालकं ८ काली ९ मृत्तिका १० सुरमृत्तिका ११ तुवरा १२ काक्षी १३ सुजाता १४ अस्या १५

गुणाः तिक्तत्वं कटुत्वं कषायत्वं उष्णत्वं लेखनत्वं चक्षुष्यत्वं ग्राहित्वं छर्दि पित्त श्लेष्मानाशित्वं च इति राजनिर्घण्टः ॥
तुवरीशिम्बः पुं चक्रमर्दकवृक्षः इति शब्दचन्द्रिका ॥
तुविः स्त्री तुम्बी इति शब्दमाला ॥
तुष तिल्ल य ञो तुष्टौ इति कविकल्पद्रुमः ॥
तुषः पुं धान्यत्वक् विभीतकवृक्षः इत्यमरः ॥
तुषग्रहः पुं अग्निः इति त्रिकाण्डशेषः ॥
तुषसारः पुं अग्निः इति शब्दमाला तुषानलः पुं तुषाग्निः तत्पर्यायः कुकूला २ इति हेमचन्द्रः
तुषारः पुं हिमं देशभेदः शीकरः हिमभेदः इति हेमचन्द्रः ॥ शीतलेत्रि यथा अपां हि तृप्ताय न वारि धारा स्वादुः सुगन्धिः स्वदते तुषारा इति नैषधं कर्पूरभेदः इति राजनिर्घण्टः ॥
तुषितः पुं देवगणविशेषः इत्यमरः ॥ तेषट्त्रिंशत् स्मृताः इति भरतः ॥ केषाञ्चिन्मते द्वादश यथा । प्राणापानसमानाश्चोदानोव्यानएव च चक्षुःश्रोत्ररसाघ्राणस्पर्शौ बुद्धिर्मनस्तथा द्वादशैते तु तुषिता देवाः स्वारोचिषेऽन्तरे इति सारसुन्दरी ॥
तुषाम्बु क्ली तुषोदकः इति राजनिर्घण्टः ॥
तुषोदकं क्ली काञ्जिकं इति हारावली काञ्जिकभेदः अस्य लक्षणं यथा तुषोदकं यवैरामैः सतुषैः शकलीकृतैः यवैरुदकसंहितैः संधान वर्जितात् अस्य गुणाः दीपनत्वं रुच्यत्वं पाण्डुक्रिमिगदवस्तिशूलनाशित्वं तीक्ष्णत्वं उष्णत्वं पाचनत्वं ॥ पित्तरक्तकारित्वं च इति भावप्रकाशः ॥
तुष्टः त्रि तोषप्राप्तः यथा तस्मिंस्तुष्टे जगत्तुष्टं प्रीणिते प्रीणितं जगत् इति पुराणं ॥
तुष्टिः स्त्री तोषः अधिगतार्थादन्यत्रनच्छतुबुद्धिः इति चण्डीटीकायां नागोजीभट्टः मातृकाविशेषः इति भवदेवभट्टः ॥
तुष्टः पुं कर्णमणिः इति शब्दचन्द्रिका तुस ध्वाने इति कविकल्पद्रुमः

तुसः पुं तुषः इत्यमरटीकायां रमानाथः ॥
तुस्तं क्ली धूलिः इति लिङ्गादिसंग्रहे भुस्त शब्दटीकायां सारसुन्दरी ॥
तुह इर अर्द्दने वध इति यावत् इति कविकल्पद्रुमः ॥
तुहिनं क्ली हिमं इत्यमरः ॥ चन्द्रतेजः इत्युणादिकोषः ॥
तुहिनांशुतैलं क्ली कर्पूरतैलं इति राजनिर्घण्टः ॥
तुङ्क्ष प्रनादरे इति कविकल्पद्रुमः तूणन क संकोचे इति कविकल्पद्रुमः तूण ङ क पूरणे इति कविकल्पद्रुमः तूणः पुं स्त्री बाणाधारः तत्पर्यायः उपासङ्गः २ तूणीरः ३ निषङ्गः ४ इषुधिः ५ इत्यमरः तूणी ६ इति शब्दरत्नावली ॥
तूणकं क्ली छन्दोविशेषः । यथा तूणकं समानिकापदद्वयं विनान्तिमं इति छन्दोमञ्जरी तूणी स्त्री तूणः इति शब्दरत्नावली तूणीन पुं नन्दीवृक्षः इति राजनिर्घण्टः तूणाग्रेकेचि ।
तूणीकः पुं नन्दीवृक्षः इति राजनिर्घण्टः ॥
तूणीरः पुं तूणः इत्यमरः ॥
तूनकं क्ली तुत्थे तूतिया इति भाषा इति शब्दचन्द्रिका ॥
तूदः पुं तूलवृक्षः इति राजनिर्घण्टः ॥
तूर य ङ ई हिंसे वेगे इति कविकल्पद्रुमः ॥
तूरं क्ली वाद्यं इति हेमचन्द्रः ॥
तूरी स्त्री धुस्तूरवृक्षः इति भावप्रकाशः ॥
तूर्णं क्ली शीघ्रं तद्वति त्रि इत्यमरः ॥
तूर्णिः पुं मनः इत्युणादिकोषः त्वरा इति हेमचन्द्रः श्लोकः मन इति संक्षिप्तसारे उणादिवृत्तिः ॥
तूर्यं क्ली वाद्यं इति हेमचन्द्रः तूर्यखण्डः पुं दगड्वाद्यं इति हारावली ॥
तूल क ङ पूरणे इति कविकल्पद्रुमः तूल क निष्कर्षे इयत्तापरिच्छेद इति यावत् इति कविकल्पद्रुमः तूलं क्ली आकाशं इति मेदिनी अमस्याकारवृक्षविशेषः प

लाशाल्मलिः इति तूत इति च भाषा तत्पर्य्यायः तूदः २ ब्रह्मकाष्ठः ३ ब्राह्मणेष्टः ४ पूषकः ५ ब्रह्मदारु ६ सुपुष्पं ७ विप्रकाष्ठं ८ नीलवृन्तकं ९ क्रमुकं १० विप्रकाष्ठं ११ मदसारः १२ इति राजनिर्घण्टः पूगः १३ तूत पक्वफल गुणाः गुरुत्वं स्वादुत्वं हिमत्वं पित्तानिलनाशित्वं च तदाम फलगुणाः गुरुत्वं सारकत्वं अम्लत्वं उष्णत्वं रक्तपित्तकारित्वं च इति भावप्रकाशः मधुराम्लत्वं दाहप्रशमनत्वं वृष्यत्वं कषायत्वं कफनाशित्वं च इति राजनिर्घण्टः ॥ तूलः पुं कार्पासादितूलः तत्पर्य्यायः पिचुः २ इत्यमरः ॥ पिचुलः ३ पिचुतूलः ४ तूलपिचुः ५ इत्यमरटीका पिचुतूलं ४ तूलपिचुः ५ इत्यमरटीका पिचुतूलं ६ इति त्रिकाण्डशेषः तूलकः क्ली तूलः इति हेमचन्द्रः तूलकार्मुकं क्ली तूलस्फोटनार्थधनुः धुनखरा इति भाषा तत्पर्य्यायः पिंजलं २ इति त्रिकाण्डशेषः तूलचापः पुं तूलकार्मुकं ३ इति शब्दरत्नावली तूलनालिका स्त्री पिजिका पौइन इति भाषा इति त्रिकाण्डशेषः ॥ तूलनाली स्त्री तूलनालिका इति भूरिप्रयोगः ॥ तूलपिचुः पुं तूलः इत्यमरटीकायां भरतः ॥ तूलवृक्षः पुं शाल्मली इति राजनिर्घण्टः ॥ तूलशर्करा स्त्री कार्पासबीजं इति शब्दमाला ॥ तूलसेचनं क्ली सूत्रकर्त्तनं काटना इति भाषा इति शब्दमाला तूला स्त्री कार्पासी इति राजनिर्घण्टः वर्त्तिः इति शब्दरत्नावली तूलिः स्त्री स्वनामख्यात चित्रकरोपकरणं इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ तूलिका स्त्री चित्रकरोपकरणं तूली इति भाषा तत्पर्य्यायः ईषिका २ इत्यमरः तूलिः ३ तूली ४ ईषीका ५ इषीका ६ वीरणादिशलाका इत्यन्ये शय्या वर्त्तिर्नमनावर्त्तितं सवर्णीकृता नेफलितिप्यते तत्रेत्यसे यावर्त्तितं सवर्णी इवाकार यत्र निलिप्यते तत्रेति केचित् इति भरतः शय्योपकरणं तोषकं इति ॥

भाषा इति मेदिनी वर्त्तिः इति शब्दरत्नावली ॥ तूलिनी स्त्री लक्ष्मणाकंदः इति राजनिर्घण्टः शाल्मलिवृक्षः इति भावप्रकाशः ॥ तूलिफला स्त्री शाल्मलि इति रत्नमाला ॥ तूली स्त्री नील वर्त्तिः इति शब्दरत्नावली तूलीका इत्यमरटीकायां भरतः ॥ तूवरः पुं कालेप्यजाततृङ्गा गौः नेडा गरु इति भाषा अप्रमश्रु पुरुषः माकुंदिया इति भाषा इत्यमरः श्रुरुषव्यंजन त्यक्तः कषायरसः इति मेदिनी ॥ तूवरिका स्त्री तुवरिका इत्यमरटीकायां रमानाथः ॥ तूवरी स्त्री सौराष्ट्रमृत्तिका इत्यमरटीकायां भरतः ॥ तूष तुष्टौ इति कविकल्पद्रुमः तूष्णीं व्य मौनं इत्यमरः ॥ तूष्णींशीलः त्रि मौनी तत्पर्य्यायः तूष्णीकं २ इत्यमरः ॥ तूष्णीकः त्रि तूष्णींशीलः इत्यमरः तूष्णीकं व्य मौनं इत्यमरः तूस्तं क्ली धूलिः जटा इति मेदिनी ॥ पापं सूक्ष्मं इति शब्दरत्नावली ॥ तृट् स्त्री इच्छा तृष्णा कामकन्या इति मेदिनी ॥ तृवं क्ली जातीफलं इति शब्दचन्द्रिका ॥ तृण उ म द भेदे इति कविकल्पद्रुमः ॥ तृणं क्ली नडादि विनाखड इति ख्यातं इति केचित् इति भरतः तत्पर्य्यायः अर्ज्जुनं २ इत्यमरः त्रिणं ३ खटं ४ खेटं ५ हरितं ६ नाडदं ७ इति शब्दरत्नावली ॥ गोभ्यस्तृणदानफलं यथा तीर्थस्नाने च यत्पुण्यं विप्रभोजने यत् पुण्यं च महादाने यत् पुण्यं हरिसेवने सर्व्वव्रतोपवासेषु सर्व्वेष्वेव तपःसु च भुवः पर्य्यटने यत्तु सत्यवाक्येषु यद्भवेत् यत्पुण्यं सर्व्वयज्ञेषु दीक्षायां च लभेन्नरः तत्पुण्यं लभते प्राज्ञो गोभ्यो दत्त्वा तृणानि च इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डं धनिष्ठादि पञ्च नक्षत्रेषु गृहनिर्म्माणार्थ तृणकाष्ठाहरणे दोषो यथा

अग्निचौरभयं रोगो राजपीडा ष
न्नतिः संग्रहे तृण काष्ठानां
कृते वस्त्रादि पंचके इतिज्योतिः
सारसंग्रहः ॥
तृणकुंकुमं क्ली सुगंधद्रव्यभे
दः तत्पर्य्यायः तृणस्कुं २ गं
धि ३ तृणशोणितं ४ तृणपुष्पं
६ गंधाधिकं ७ तृणोत्थं ८ तृणाख्ये
९ लोहितं १० अस्य गुणाः कटु
त्वं उष्णत्वं कफमारुत शोफकं
डूतिपामाकुष्ठामदोषनाशित्वं प
रमभास्वरत्वंच इतिराजनिर्घण्टः
तृणकुटी स्त्री तृणाच्छादितगृ
हं तत्पर्य्यायः कायमानं २ इति
त्रिकाण्डशेषः तृणौकः २ इति
हेमचंद्रः ॥
तृणकूर्म्मः पुं तुंबी इतिशब्दमा
ला तृणकेतः पुं वंशः इतिहा
रावली तृणकेतकः पुं वंशः
इतिराजनिर्घण्टः ॥
तृणगोधा स्त्री विरकोलः कृ
कलासः इतिमेदिनी तृणजलौ
का इतिकेचित् ॥
तृणग्रंथिः स्त्री वर्णजीवंती
इतिराजनिर्घण्टः ॥
तृणग्राही पुं नीलमणिः इतिराज
निर्घण्टः मणिविशेषः कापुर
दाना इतिभाषा इतिशब्दार्थक
ल्पतरुः तत्पर्य्यायः मुक्तापुष्टः २
तृणमणिः ३ इतिहारावली ॥
तृणजम्भः त्रि तृणभक्षकः तृण
वर्णदन्तयुक्तः इतिकेचित् ॥
तृणता स्त्री धनुः तृणत्वं इति मे
दिनी ॥
तृणद्रुमः पुं तालः गुवाकः
ताली केतकी खर्जूरः खर्ज्जू
री नारिकेलः हिंतालः एषां
निर्यास गुणाः शीतलत्वं ल
घुत्वं मोहनत्वं वलकारित्वं
हृद्यत्वं तृष्णा संतापनाशित्वंच
इतिराजनिर्घण्टः ॥
तृणधान्यं क्ली धान्यविशेषः उ
डिधान इति भाषा तत्पर्य्यायः ॥
नीवारः २ इत्यमरः तृणध्वजः पुं
वंशः इत्यमरः ॥ तृणनिम्बः पुं
नेपालनिम्बः इतिराजनिर्घण्टः
तृणपत्रिका स्त्री इक्षुदर्भा इति
राजनिर्घण्टः ॥
तृणपदी स्त्री गुण्डाशिनी
इतिराजनिर्घण्टः ॥
तृणपुष्पं क्ली तृणकुंकुमं इतिराज

निर्घण्टः
तृणपुष्पी स्त्री सिंदुरपुष्पीवृक्षः
इति राजनिर्घण्टः ॥
तृणशूली स्त्री चंचा चाँच इति
भाषा इति हारावली ॥
तृणवल्वजा स्त्री वल्वजा इतिरा
जनिर्घण्टः ॥
तृणमणिः पुं तृणग्राही इति
हारावली ॥
तृणमत्कुणः पुं लग्नकः जामि
न इतिभाषा इति त्रिकाण्डशेषः ॥
तृणराजः पुं तालवृक्षः इत्यमरः
नारिकेलः इति राजनिर्घण्टः
तृणबीजः पुं श्यामाकः इति
रत्नमाला ॥
तृणबीजोत्तमः पुं श्यामाकः इ
तिराजनिर्घण्टः ॥
तृणशीतं क्ली कत्तृणं गंधतृ
णं इति रत्नमाला ॥
तृणशीता स्त्री जलपिप्पली
इति राजनिर्घण्टः ॥
तृणशून्यं क्ली मल्लिका केत
कीफलं इति मेदिनी तृणरहिते
त्रि तृणषट्पदः पुं बरोलः वाल
ता इतिभाषा इतिहारावली ॥
तृणसारा स्त्री कदली [illegible] ॥
इतिहारावली ॥
तृणसिंहः पुं कुठारः इतिशब्दा
र्थकल्पतरुः ॥
तृणहर्म्यः पुं तृणयुक्ताट्टालि
का अट्टालिकोपरितृणनिर्मि
तगृहं तत्पर्य्यायः मचटः २ इ
तिहारावली ॥
तृणेक्षुपः पुं मंथानकतृणं
इतिराजनिर्घण्टः ॥
तृणाग्निः पुं तृणजाताग्निः तत्
पर्य्यायः वत्सलः इति त्रिकांड
शेषः ॥
तृणांजनः पुं कृकलासः इति
त्रिकाण्डशेषः
तृणाढ्यं क्ली पर्वततृणं इति रा
जनिर्घण्टः ॥
तृणाम्लं क्ली लवणतृणं इति
राजनिर्घण्टः ॥
तृणास्कृ पुं तृणकुंकुमं इतिरा
जनिर्घण्टः ॥
तृणेक्षुः पुं वल्वजा इतिराजनि
र्घण्टः तृणोत्तमः पुं उरवर्बुलतृ
णं इति राजनिर्घण्टः ॥
तृणोद्भवः पुं नीवारः इति राज
निर्घण्टः तृणौकः क्ली काय
मानं तृणनिर्मितगृहं स्वद ॥

याचरइति भाषा इति हेमचंद्रः
तृणौषधं क्ली पलवालुकाख्य
गंधद्रव्यं इतिशाद्बचंद्रिका ॥
तृण्या स्त्री तृणसमूहः इत्य
मरः तृतीयः त्रि त्रयाणांपूर
णः तेसरा इत्यादिभाषा इति
व्याकरणं तृतीयप्रकृतिःस्त्री
तृतीयाप्रकृतिः इत्यमरटी
कायांभरतः ॥
तृतीया स्त्री तिथिविशेषःसा
चंद्रमंडलस्य तृतीय कलाक्रि
या रूपा तत्क्रियोपलक्षितःका
लो वा इतितिथ्यादितत्वं अस्या
जातस्यफलं यथा सकलगु
णगभीरोभूमिपालानुरागी।
पवनगरविगाही सर्वलोको
पकारी परविषय निवासी को
तुकी सत्यवादी भवतिनिखिल
विद्यो यस्तृतीया प्रसूतः इति
कोष्ठीप्रदीपः ॥
तृतीयाकृतं त्रि वारत्रयकृष्टे
क्षेत्रे तिनवार चासदेया क्षेत्र इति
भाषा इत्यमरः ॥ तृतीयाप्रकृ
तिः स्त्रीनपुंसके इत्यमरः ॥
तृद इरउन अनादरे हिंसे इ
तिकविकल्पद्रुमः ॥ ॥

तृम्प श प्रीणने इतिकविकल्प
द्रुमः तृम्फ शप्रीणने इतिकवि
कल्पद्रुमः तृन्ह उश हिंसे इति
कविकल्पद्रुमः ॥
तृप कि सन्दीपने प्रीणने इति
कविकल्पद्रुमः ॥
तृप न प्रीणने इतिकविकल्पद्रु
मः तृप जि ल्ट य ऊ प्रीणने
इतिकविकल्पद्रुमः ॥
तृप द श प्रीणने इति कविक
ल्पद्रुमः ॥
तृपत् पुं चंद्रः इत्युणादिकोषः
छत्रं इतिसिद्धान्तकौमुद्यामु
णादिवृत्तिः ॥
तृपला स्त्री लता इत्युणादि
कोषः त्रिफला इति संक्षिप्तसा
रेउणादि वृत्तिः ॥
तृप्रः त्रि तृप्तियुक्तः इत्यमरः
तृप्तिः स्त्री भक्षणादिनाकांक्षा
निवृत्तिः तत्पर्यायः सौहित्यं २
तर्पणं ३ इत्यमरः प्रीणनं ४
प्रसितंभवं ५ इतिशब्दरत्ना
वली तृफः पुं चुल्हे इत्युणादिको
षः उज्ज्वलदत्तः इतिसंक्षिप्तसारे
उणादिवृत्तिः तृफ पश प्रीणने
इतिकविकल्पद्रुमः ॥ ॥

तृफला स्त्री त्रिफला इतित्रिकांड
शेषः ॥
तृफुः पुं सर्पजातिः इत्युणादिको
तृक्ष गतौ इतिकविकल्पद्रुमः
इतिकविकल्पद्रुमः ॥
तृषा स्त्री तृष्णा इच्छा कामक
न्या इति शब्दरत्नावली लांग
लिकीवृक्षः इति शब्दचंद्रिका ॥
तृषाभूः स्त्री क्लोम इतिशब्दचं
द्रिका तृषाह्वं क्ली जलं इतिशब्द
चंद्रिका तृषाहा स्त्री मधुरिका
तृषाहा स्त्रीः मधुरिका इति शब्द
चंद्रिका ॥
तृषितः त्रि तृष्णायुक्तः तत्पर्या
यः तर्षितः २ सतृष्ट ४ इतित्रि
काण्डशेषः तृषार्या क्ली ॥
तृषितोत्तरा स्त्री श्मशानपर्णी इ
तिशब्दचंद्रिका ॥
तृष्णक् त्रि लुब्धः इत्यमरः ॥
तृष्णा स्त्री धनानीयस्त्रीकाइच्छा
इतिचरणटीकायांनाशोजीभट्टः
सा लिप्सा पानेच्छा इति मेदिनी
तत्पर्यायः उदन्या २ पिपासा
३ तृट् ४ तर्षः ५ इत्यमरः तृष्णारि
पुं पर्पटः इति राजनिर्घंटः ॥
तृष्णात्वयः पुं शान्तिः इति हेम।

चंद्रः पिपासानाशस्त्र ॥ तृह
थ ऊ प त्रिंसे इतिकविकल्पद्रु
मः ॥
तृक्ष गतौ इतिकविकल्पद्रुम
तॄ तरे अभिभवे स्तरणे इति
कविकल्पद्रुमः ॥
ते त्व त्वया इति त्रिकाण्डशेषः
युष्मच्छब्दस्य षष्ठी तव चतु
र्थ्यान्तश्च इतिव्याकरणं ॥
तेजः क्ली दीप्तिः प्रभावः प
राक्रमः रेतः इति मेदिनी नि
ट नवनीत अग्निः इतिहेमचं
द्रः सुवर्णं मज्जा पित्तं इति
राजनिर्घण्टः असहनं ॥
यथा अथिदेमापमानादः
प्रयुक्तस्य परेण यत् प्राणान्त
येष्वसहनं ततेजः समुदाहृतं
इत्यमरटीकायांभरतः पंचम
हाभूतान्तर्गततृतीय महाभूतं
यथा तृतीयं ज्योति रित्याकृष्य
दृश्यात्मस्मुच्यते अधिभूतेन
तेजरूपं सर्वसत्त्वाधिदैवते इत्या
श्वमेधिकपर्व अस्यधर्माः रूपं १
द्रवत्वं २ प्रत्यक्षयोगित्वं ३ अस्य गु
णाः स्पर्शः १ संख्या २ परिमाणं ३
पृथक्त्वं ४ संयोगः ५ विभागः

६ परत्वं ७ अपरत्वं ८ रूपं ९ द्रवः १० वेगः ११ अस्य नैमित्तिकद्रवत्वं अस्पर्शोऽस्यः रूपं शुक्लभास्वरं इंद्रियाः परमाणुरूपं नित्यं सावयवमनित्यं अनित्यं त्रिधा देहः इंद्रियं विषयः इति ॥ भाषापरिच्छेदः ॥
तेजःफलः पुं वृक्षविशेषः तेजफल इति भाषा तत्पर्यायः तरुफलः २ शाल्मलीफलः ३ लवकफलः ४ श्रेयफलः ५ गंधफलः ६ कंटवृक्षः ७ अस्य गुणाः कटुत्वं तीक्ष्णत्वं सुगंधित्वं दीपनत्वं रात श्लेष्मारुचि नाशित्वं वालरसाकरत्वंच इति राजनिर्घंटः ॥ तेजनः पुं वंशः इत्यमरः मुंजः भद्रमुंजः इति राजनिर्घंटः ॥
तेजनकः पुं शरः इत्यमरः ॥
तेजनी स्त्री मूर्वा इत्यमरः ज्योतिष्मती इति शब्दरत्नावली ॥
तेजपत्रं क्ली स्वनामख्यातद्रव्यं तत्पर्यायः गंधजातं २ पत्रं ३ पत्रकं ४ इति शब्दरत्नावली अस्य गुणाः कफवातार्शो हृल्लासारुचिनाशित्वं इति राजवल्लभः अमरटीकायां त्वक्पत्र शब्दे द्रष्टव्याः

तेजलः पुं कपिंजलपक्षी इति राजनिर्घंटः ॥
तेजस्करं त्रि तेजोवृद्धिकारकद्रव्यं इति वैद्यकं ॥
तेजस्विनी स्त्री ज्योतिष्मती इति शब्दरत्नावली महाज्योतिष्मती ॥ इति राजनिर्घंटः ॥
तेजस्वी त्रि तेजोयुक्तः यथा महातपस्वी तेजस्वी ब्रह्मचारी च सुव्रती गुरुभक्तियोक्तश्वास्त्रे च पंडितः नास्त्रपंडितः इति ब्रह्मवैवर्ते श्रीकृष्णजन्मखंडं ॥
तेजितः त्रि तीक्ष्णीकृतः शाणान इति भाषा तत्पर्यायः निशितः २ क्ष्णुतः ३ शाणितः ४ इत्यमरः ॥
तेजीयान् त्रि तेजोयुक्तः यथा अज्ञाने पुरुषः शास्त्रज्ञान अस्य कर्मणा तेजीयसां न दोषाय वह्नेः सर्वभुजो यथा इति ब्रह्मवैवर्ते श्रीकृष्णजन्मखंडं ॥
तेजोमंथः पुं गणिकारिका इति रत्नमाला ॥
तेजोरूपं क्ली ब्रह्म यथा अशरीरं विग्रहवदिंद्रिय वदतींद्रियं यत् साक्षि सर्वसाक्षि तेजोरूपं नमाम्यहं इति ब्रह्मवैवर्ते श्रीकृष्ण

जन्मखंडं ॥
तेजोवती स्त्री गजपिप्पली इति शब्दरत्नावली चविका इति रत्नमाला महाज्योतिष्मती । इति राजनिर्घंटः ॥
तेजोवृक्षः पुं तक्षाग्निमंथः इति राजनिर्घंटः ॥
तेन अ तद्धेतुना सेइलिमित्ते इति भाषा इत्यमरटीकायां भरतः ॥
तेन पुं गानांगविशेषः यथा तेनेतिशब्दस्तेनः स्यात् मंगलानां प्रदर्शकः तेशब्देनोच्यते गौरीनशब्देनोच्यते हरः तेन मांगलिकप्रायशब्दस्तेनः इति संगीतदामोदरः ॥
तेप ऋ ङ कंपे च्युतौ इति ॥ कविकल्पद्रुमः ॥
तेमः पुं आर्द्रीभावः इत्यमरः ॥
तेमनं क्ली आर्द्रीकरणं व्यंजनं इति मेदिनी ॥
तेमनी स्त्री चुल्लीभेदः इति हेमचंद्रः ॥
तेव ऋ ङ देवने क्रीडन इति यावत् इति कविकल्पद्रुमः ॥
तेवनं क्ली केलिकानन क्रीडा ॥

इति हेमचंद्रः ॥
तैजसं क्ली घृतं इति स्मृतिः धातु द्रव्यं इत्यमरः ॥
तैजसावर्त्तिनी स्त्री मूषा तेजसगलानमूषी इति भाषा इत्यमरः ॥
तैतिलं क्ली ववाद्येकादशकरणांतर्गत चतुर्थकरणं तत्र जातफलं यथा कलासुदक्षो ललनाभिलाषी सुमूर्तिसंतर्जितकामदेवः वक्ता गुणज्ञः कुशलः सुशील स्त्रैतिलाख्यं करणं प्रसूतौ इति कोष्ठीप्रदीपः ॥
तैतिलः पुं गण्डकः इति मेदिनी ॥
तैत्तिरं क्ली तित्तिरिगणः इत्यमरः ॥
तैत्तिरः पुं तित्तिरिपक्षी इति राजनिर्घंटः गंडकः ॥ इति मेदिनी ॥
तैत्तिरीयकः पुं तैत्तिरीयी । यजुर्वेदीय शाखा विशेषवेत्ता ॥
तैत्तिरीया स्त्री यजुर्वेदस्य शाखाविशेषः यथा देवरात सुतः सोपि छर्दित्वा यजुषांगणं ततोगतोथमुनयोदहशुस्तान् यजुर्गणान् यजुंषि तित्तिराभूत्वा तल्लोलुपतयाददुः तैत्तिरीया इति

यज्ञः शाखा आसन् सुपेशलाः
इति श्रीभागवते ॥
तैरणी स्त्री लूताविशेषः तत्प
र्य्यायः तैरणः २ तैरः ३ ऊर्णी
ली ४ रागदः ५ अस्या गुणाः शि
शिरत्वं तिक्तत्वं व्रणनाशित्वं
अरुणरंगदत्वञ्च इति राज
निर्घण्टः ॥
तैलं क्ली सिल्हकः इति र
त्नमाला तिलादिजातस्नेहः
यथा तिलादिस्निग्धवस्तूनां
स्नेहस्तैलमुदाहृतम् इति भा
वप्रकाशः तत्पर्य्यायः स्नेद
णं २ स्नेहः ३ अभ्यञ्जनं ४
इति हेमचन्द्रः अस्य गुणाः क
षायत्वं मधुरत्वं त्वच्यत्वं उ
ष्णत्वं व्यवायित्वं पित्तकारित्वं
बद्धविण्मूत्रत्वं श्लेष्मावर्द्धकत्वं
सर्ववातविकारनाशित्वं मेधा
ग्निबलवर्द्धनत्वञ्च नास्तितैलात्
परं किञ्चित् भेषजं मारुतापहं
इति राजनिर्घण्टः पक्कतानत
तैलस्य गुणाः महद्गुणत्वं किं
चिद्गुणहीनत्वञ्च द्रव्यसंयोगसंस्कृततैल
स्य सर्वरोगनाशित्वं अवगाहनेयुक्ततैल
स्य गुणाः शरीरबलकारित्वं शिरामुख
रोमकूपः धमनी नाडी ॥ ॥

द्वारात्मिकादित्वञ्च नित्यमस्तके
अधिकतैलदानगुणाः शिरः
शूलखालित्य पालित्य नाशित्वं
केशमूलस्य दृढता कारित्वं
केशास्थापननवनताकृस्नता
दीर्घता कारित्वं इन्द्रिय प्रसन्न
ताप्रवृद्धि कारित्वञ्च नित्यकर्ण
तैलपूरणस्य गुणाः यथा हनु
संग्रहोच्चैःश्रुति र्वा धिर्य्यकर्ण
वातजरोगाजनकत्वं मर्द्दने तै
लस्य गुणाः स्नानाद्दशगुणागुरु
त्वं इति राजवल्लभादिः प्रातःस्ना
ने व्रते श्राद्धे द्वादश्यां ग्रहणे तथा
मद्यलेपसमं तैलं तस्मात्तैलं विव
र्जयेत् इति कर्म्मलोचनं तूनञ्च
सार्षपं तैलं यत्तैलं पुष्पवासितं
अदुष्टं पक्वतैलञ्च तैलाभ्यङ्गेषु
नित्यशः इति तिथ्यादितत्त्वं ॥
वारविशेषे तैलग्रहणफलं यथा
रवौ हृद्रोगः सोमे कीर्त्तिलाभः
कुजे मृत्युः बुधे पुत्रहानिः गुरोर
र्थहानिः शुक्रे शोकः शनौ दीर्घा
युः अथ निषिद्धदिने तैलग्रहण
दोषखण्डनार्थं देय द्रव्य नियमः र
वौ दूर्वा कुजे भूमिः शुक्रे गो
मयं अस्य प्रमाणं यथा ॥

अर्कक्रूरं दहति हृदयं कीर्त्ति
लाभश्च सोमे भौमे मृत्युर्भवति
नियतं चेन्दजे पुत्रलाभः अर्थ
ग्लानिर्भवति च गुरौ भार्गवे प्रो
कयुक्तस्तैलाभ्यंगात्तनयमरणं
सूर्य्यजे दीर्घमायुः इति ज्योति
स्सारसंग्रहः ॥
तैलकं क्ली अल्पपरिमाणतैलं
इति व्याकरणं ॥
तैलकन्दः पुं कन्दविशेषः तत्प
र्य्यायः द्रावककन्दः २ तिलाङ्कि
तदलः ३ करवीरकन्दसंज्ञः ४
तिलचित्रपत्रकः ५ अस्य गुणाः
लोहद्रावित्वं कटुत्वं उष्णत्वं वा
तापस्मारविषशोफनाशित्वं
रसस्य बन्धकारित्वं देहसिद्धि
कारित्वञ्च इति राजनिर्घण्टः ।
तैलकावु वर्णकजरजाति
विशेषः कल्लु इति भाषा स।
कोटकस्त्रीगर्भकुम्भकाराज्जा
तः इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे
तत्पर्य्यायः पुसरः २ वाल्किकः
३ तैली ४ इति हेमचन्द्रः ॥
तैलकिट्टं क्ली तैलमलं खलि
इति ख्याते तत्पर्य्यायः पिण्याकः
२ खलिः ३ तैलकल्कजः ४ अस्य गु

णाः कटुत्वं गौल्यत्वं कफवातप्र
मेहनाशित्वञ्च इति राजनिर्घण्टः
तैलङ्गः पुं देशविशेषः इति श
ब्दरत्नावली ॥
तैलचौरिका स्त्री तैलपायिका
इति शब्दरत्नावली ॥
तैलद्रोणी स्त्री कण्ठपर्य्यन्तमज्ज
नार्थं तैलपूर्णकाष्ठादि निर्मि
त पात्रविशेषः तत्रावस्थिति
गुणाः वातरोग व्याकुलहरोग
पङ्गु वाधिर्य्य मिम्मिन गद्गदत्वं
ग्रन्थ्यस्थि प्रचलितपवनगा
त्रकम्प कपाटी ग्रीवाभङ्गापहं
त्र दाय रुधिरभवमूत्रकृच्छ्र व
स्ति रोगेषु शस्तं इति राज
वल्लभः ॥
तैलपर्णिकं क्ली हरिचन्दनं इत्य
मरः चन्दनविशेषः तत्तु तिल
पर्णीवृक्षजातं धवलं सुशीतलं
इति भरतः ॥
तैलपर्णी स्त्री चन्दनं श्रीवा
सः सिल्हकः इति मेदिनी ॥
तैलपा स्त्री तैलपायिका ॥
इति राजनिर्घण्टः ॥
तैलपायिका स्त्री कीटविशे
षः तैलापोका इति आरसु

ला इतिचभाषा तत्पर्य्यायः पयो
स्ती २ इत्यमरः तैलचौरिका ३ इति
शब्दरत्नावली तैलपा ४ इतिराज
निर्घण्टः ॥ तैलाम्बुका ५ खला
धारा ६ इतिजटाधरः तैलपिपी
लिका स्त्री पिपीलिकाभेदः त
त्पर्य्यायः उदद्या २ कपिजाचि
का ३ इति राजनिर्घण्टः ॥
तैलफलः पुं इङ्गुदी विभीत
कः इति राजनिर्घण्टः ॥
तैलभाविनी स्त्री जातीपुष्पवृक्षः
इतिराजनिर्घण्टः ॥
तैलमाली स्त्री वर्त्तिः इतिशब्दमा
ला तैलस्फाता स्त्री स्वधा तिलपा
तोः स्फास्वधायांसा इतिलिंगादि
संग्रहेऽमरभरतौ ॥
तैलसाधनं क्ली गंधद्रव्यविशेषः
काकला इतिभाषा तत्पर्य्यायः
काकालं २ कोलकं ३ गंधधूली
फलं ४ कक्कोलकं ५ कोषफलं
६ इति शब्दचंद्रिका ॥
तैलस्फटिकः पुं रत्नमणिः।
इतिहेमचंद्रः ॥
तैलागुरु क्ली दाहागुरु इति
राजनिर्घण्टः ॥
तैलाटी स्त्री वरटा इतिहेमचंद्रः

तैलाम्बुका स्त्री तैलपायिका इति
जटाधरः ॥
तैलिकः पुं तैलकारः इति।
व्याकरणं ॥
तैलिनी स्त्री कीटभेदः तत्पर्य्या
यः तैलकीटः २ घद्दिध्या ३
दर्द्दूनाशिनी ४ इति राजनिर्घण्टः
दशावर्त्तिः इति शब्दमाला ॥
तैलिशाला स्त्री यंत्रगृह कलुर
घर इति भाषा इति हेमचंद्रः ॥
तैली न पुं स्त्री तैलकारः इति
हेमचंद्रः तैलसंबंधिनि त्रि तै
लीनं क्ली तिलक्षेत्रं इत्यमरः ॥
तैषः पुं पौषमासः इत्यमरः ॥
तैषी स्त्री पुष्यनक्षत्रयुक्तापौर्ण
मासी इतिमुग्धबोधं ॥
तैक्ष्ण्यं क्ली तीक्ष्णता इतिव्याकर
णं तोकं क्ली अपत्यं पुत्रोदुहिता
च इत्यमरः ॥
तोक्मं क्ली कर्णमलं इतिहेम
चंद्रः मेचः इत्यजयपालः
तोक्मः पुं हरियवः । अपक्व
यवः इत्यमरः हरिद्वर्णः ॥
इति हेमचंद्रः ॥
तोटकं क्ली दशाक्षरपा ॥
दच्छन्दः ॥ ॥

इतिछंदोमंजरी प्रस्तविवरणं ॥
छंदः शब्दे द्रष्टव्यं ॥
तोडृ अनादरे इति कविकल्प
द्रुमः ॥
तोत्रं क्ली गवादिताडनदंडः ॥
पौचनी इतिख्यातः तत्पर्य्यायः
प्राजनं २ तोदनं ३ गजस्यतो
दनदंडः तत्पर्य्यायः वेणुकं
२ इत्यमरः वेणुकं ३ इति
भरतः ॥
तोदः पुं व्यथा इतिरत्नमाला
तोदनं क्ली तोत्रं इत्यमरः ॥
व्यथा इति मेदिनी ॥
तोमरः पुं क्ली शस्त्रविशेषः
शावली इतिभाषा तत्पर्य्यायः
शर्वला २ इत्यमरः हस्तक्षेप्य
सफलस्य दण्डः शायवौक्ष इति
भाषा इतिमहाभारतटीका ॥
तोमरधरः पुं अग्निः इतिशब्दा
र्थकल्पतरुः ॥
तोमरिका स्त्री तुवरिका इति
शब्दरत्नावली ॥
तोयं क्ली जलं इत्यमरः तोयका
मः पुं परिव्याधः जलवेतसः इ
तिजटाधरः जलाभिलाषिणि त्रि।
तोयकृच्छ्रं क्ली जलमात्रपान

रूप व्रतविशेषः इति मिताक्ष
रा तोयडिम्भः पुं घनोपलः
इतिहारावली ॥
तोयदः पुं मेघः मुस्तकं घृते
क्ली इतिमेदिनी जलदातरि त्रि
तोयधरः पुं मेघः मुस्ता म
निषण्णकशाकः इतिमेदिनी
तोयधिः पुं समुद्रः इतिपुराणं
तोयधिप्रियं क्ली लवंगं इतिश
ब्दचंद्रिका ॥
तोयनिधिः पुं समुद्रः इति श
ब्द रत्नावली ॥
तोयपिप्पली स्त्री कांचडा इति
ख्यात जलजशाक भेदः तत्प
र्य्यायः लांगली २ शारदी ३ श
कुलादनी ४ इत्यमरः ॥
तोयपुष्पी स्त्री पाटलावृक्षः इ
ति शब्दमाला ॥
तोयप्रसादनं क्ली कतकं इ
तिभूरिप्रयोगः ॥
तोयप्रसादनफलं क्ली कत
कफलं इति रत्नमाला ॥
तोयफला स्त्री इर्वारुः इ
ति राजनिर्घण्टः ॥
तोयवल्ली स्त्री कारवेल्लः उच्छे

इतिभाषा इतिरत्नमाला ॥ ।
तोयशुक्तिका स्त्री जलशुक्तिः
इति राजनिर्घण्टः ॥
तोयसूचकः पुं भेकः इति श
ब्दार्थकल्पतरुः ॥
तोयाधिवासिनी स्त्री पाटलावृ
क्षः इति रत्नमाला तोयादिवासि
न्यपि पाठः ॥
तोरणं क्ली कन्धरा कंठी इति
हारावली ॥
तोरणः पुं क्ली वहिर्द्वारं इत्यम
रः मूलद्वाराद्बाह्यद्वारं इति कोक्क
टोदयः द्वारोपरिबोनस्तम्भयो
रुपरि निवद्धनानावस्त्ररत्नादिम
यं धनुराकारं यद्रत्नं तत्तोरणं
मिति वरुवः उपरिस्रगादियुक्त
स्तम्भादिद्वय निर्मित ग्रहादि ब
हिर्द्वारं इति सांजः बंधनमालेति
ख्यातं इति केचित् इत्यमरटीका
यां भरतः ॥
तोलं क्ली पुं तोलकं यथा।
एक तोलं द्वितोलं वा त्रितोलं वे
द तोलकं इत्याधिकेन रः कृत्वा य
श्चित्रीयते फवं इत्यागमः ॥
तोलकं क्ली पुं शाणद्वयमानं इ
ति शब्दला अशीतिरक्तिपरिमा
णं तत्र षोडश माषकः षण्णव
तिरक्ति परिमाणं च तोला इति
भरि इति च भाषा तत्पर्यायः ॥
कोलं २ द्रङ्क्षणं ३ वटकं ४ क
र्षार्द्धं ५ इति वैद्यकपरिभाषा ॥
कर्षः ६ इति लीलावती ॥
तोषः पुं तुष्टिः इति धरणिः
तौतातिकं क्ली तौतातभट्टकृत
शास्त्रं यथा नैवाश्रावि गुरोर्म
तं न विदितं तौतातिकं दर्शनं
तत्त्वज्ञानमहो न शालिकगिरां
वाचस्पतेः का कथा इति प्रबोध
चंद्रोदयः ॥
तौतिकं क्ली मुक्ता इति राजनि
र्घंटः तौतिकः पुं शुक्तिः इति रा
जनिर्घण्टः ॥
तौर्य्यं क्ली तूर्य्यमुरजादौ भवं शब्द
रूपं इत्यमरटीकायां भरतः ॥
तौर्य्यत्रिकं क्ली नृत्यगीतवाद्यमिदं
समुदितं त्रयं नाट्यं च इत्यमरः ॥
नटसम्बन्धि नृत्यगीतवाद्यमिति त्र
यं इति तट्टीकासारसुंदरी ॥
विस्तरस्तु गीतवाद्यनृत्यकर्म य
था गायनं यः प्रकुर्वीत मम कर्म
परायणः तेषां यथा फलः

शृणु मे श्रूयश्च गदतो मम यावति
वादनाणेव गीयमाने यशस्विनि
भावर्द्धर्षसहस्राणि इहलोके म
हीयते रूपवान् गुणवान् सिद्धः
सर्ववेदविदांवरः निमंत्रयणति
वै वज्रपाणिं देवं न संशयः ॥
मद्भक्तश्चैव जायेत इहलोकपथे
स्थितः सर्वकर्म गुणश्रेष्ठस्तथा
पि मम पूजकः इहलोकान् परिभ्र
ष्टो मम गीत परायणः मद्भक्तः स
र्वसंसारान् मम लोकाय गच्छति य
त्र गायति सुश्रोणि कौमुद्यां चैव ।
द्वादश्यां सर्वसंगं परित्यज्य मम लो
काय गच्छति यत्र गायति गीता
नि मम जागरणे सदा सर्वसंग
तं मद्भक्तो वै मम लोकाय ग
च्छति एतत्ते कथितं देवि गाय
नस्य फलं महत् यस्य गीतस्य शब्दे
न तरेत् संसार सागरं वादित्रस्य
प्रवक्ष्यामि तत्र श्रूणश्च वसुंधरे
प्राप्तवान्मनुजो येन देवेभ्यः स
मतांस्वयं सम्प्रतकाल प्रयोगे
ण सन्निपातेन वा पुनः नव व
र्षसहस्राणि नव वर्ष शता
नि च कुवेर भवनं गत्वा मो
दते वै यदृच्छया कुवेर ॥
भवनाद्भ्रष्टः स्वच्छंद गमनालयः
शय्यादि ताल सम्पातैः मम लो
काय गच्छति नृत्यमानस्य वक्ष्यामि
येन मच्छिन्ति छित्वा संसार सागरं
त्रिंशद्वर्ष सहस्राणि त्रिंशद्वर्षश
तानि च पुष्कर द्वीप मासाद्य स्वच्छ
न्दगमनालयः फलं प्राप्नोति सुश्रो
णि मम कर्म परायणः रूपवान्
गुणवान् शूरः शीलवान् सुपथे
स्थितः मद्भक्तश्चैव जायते संसार
परमोचितः यस्तु जागरतो नित्यं
गीतवाद्येन नर्त्तकः जंबुद्वीपे समा
साद्य राजराजस्तु जायते सर्वकर्म स
मायुक्तो रतिना वै महीपतिः
मद्भक्तश्चैव जायेत मम कर्मप
रायणः इति वराहपुराणं ॥
तौलं क्ली तुला तुलायां वर्त्तमानः
तुला राशौ पुं तौली इति ज्योतिषं
तौलिकः पुं चित्रकारः इति ।
शब्दमाला ॥
तौलिकिकः पुं चित्रकारः तत्
पर्य्यायः रंगाजीवः २ चित्रक
र ३ इति हेमचंद्रः ॥
तौलिकः ४ इति शब्दमाला
तौषारं क्ली तुषारजलं । इति
राजनिर्घण्टः ॥ ॥

तौतिकः पुं यवराशिः इति । दीपिका ॥

त्यक्तं त्रि कृतत्यागं तत्पर्यायः ॥ हीनं २ विधुतं ३ समुज्झितं ४ । धूतं ५ उत्सृष्टं ६ इत्यमरः विनाकृतं ७ विरहितं ८ निर्ह्रुतः ९ इतित्रिकाण्डशेषः ॥

त्यज औ हानौ इतिकविकल्पद्रुमः

त्यजनं क्ली त्यागः वर्जनं त्यजधातोर्भावे अनट् प्रत्ययः त्यत् त्रि तत् सेह इतिभाषा अस्य पुं लिंग स्त्री लिंगयो रूपं स्यः स्या । सर्वनाम शब्दोऽयं इति ॥ व्याकरणं ॥ ॥

त्यागः पुं दाने इत्यमरः वर्जनं इति मेदिनी विवेकिपुरुषः ३ । इतिशब्दरत्नावली ॥

त्यागी त्रि दाता शूरः इति मेदिनी वर्जनशीलः यथा यस्तु कर्मफलत्यागी सत्यागीत्यभिधीयते इति भगवद्गीता ॥

त्यागिमः त्रि त्यक्तः त्यागेन निष्पन्नः ॥ ॥ इतिव्याकरणं ॥ ॥

त्याज्यः त्रि त्यागयोग्यः वर्जनीयः यथा तीरे प्रतिग्रह स्त्याज्य । स्त्याज्यो धर्मस्य विक्रयः इति प्रायश्चित्ततत्वं ॥

त्रकइ ङ गतौ इतिकविकल्पद्रुमः त्रग इ गतौ इतिकविकल्पद्रुमः त्रंगः पुं स्त्री पुरविशेषः इतित्रिकाण्डशेषः ॥

त्रद इ चेष्टे इति कविकल्पद्रुमः

त्रप षि ऊ ङ ष लज्जे इति कविकल्पद्रुमः ॥

त्रपा स्त्री पुं लज्जा इत्यमरः ॥ कुलटा इति मेदिनी कुले कीर्त्तिः इतिशब्दरत्नावली ॥

त्रपाकः पुं म्लेच्छविशेषः इत्युणादिकोषः ॥

त्रपारण्डा स्त्री वेश्या इतिजटाधरः

त्रपिष्ठः त्रि अतिलज्जितः इति मुग्धबोधं ॥

त्रपीयान् त्रि त्रपिष्ठः इतिव्याक

त्रपु क्ली सीसकं रंगं इति मेदिनी ॥

त्रपुः स क्ली रंगं इत्युणादिकोषः

त्रपुकर्कटी स्त्री त्रपुषी इति राजनिर्घण्टः ॥

त्रिपुटी स्त्री सूक्ष्मैला इतिरत्नमाला ॥ ॥

त्रपुलं क्ली रंगं इति भरतकृत द्विरूपकोषः ॥

त्रपुषं क्ली रंगं इति भरतकृत द्विरूपकोषः त्रपुषीफलं समा इति भाषा तत्पर्यायः कंटकिफलं २ सुधावासं ३ सुशीतलं ४ तल्लघु फलगुणाः नीलत्वं बलरुद् भ्रम दाह पित्त रक्तपित्त नाशित्वं स्वादुत्वं शीतत्वंच तत्पक्वफलगुणाः अम्लत्वं उष्णत्वं पित्तलत्वं कफ वात नाशित्वंच तद्वृद्धफलगुणाः मूत्रलत्वं शीतत्वं रूक्षत्वं पित्तास्र कृच्छ्रनाशित्वंच इति भावप्रकाशः अस्यसामान्यगुणाः स्वादुत्वं गुरुत्वं विष्टंभित्वं शीतलत्वं मुखप्रियत्वं रूक्षत्वं । अतिमूत्रलत्वंच इतिराजवल्लभः

त्रपुषी स्त्री कर्कटी इति हेमचंद्रः रंगमात्रोपि पाठः ॥

त्रपुसं क्ली रंगं इतिराजनिर्घण्टः

त्रपुसी स्त्री महेन्द्रवारुणी कर्कटी लताविशेषः समा इति खीरा इतिचभाषा तत्पर्यायः पीतपुष्पा २ कोशालुः ३ त्रपुकर्कटी ४ । बहुफला ५ कोषफला ६ तन्तिलफला ७ कंटकीलता ८ सुधावासा ९ अस्याः फलस्य गुणाः रुच्यत्वं मधुरत्वं शिशिरत्वं गुरुत्वं भ्रमपित्तविदाहार्त्ति वांति नाशित्वं वक्त्रमूत्रदत्वंच कोशातिपत्रकेटोल्लरपिपाठः इति राजनिर्घण्टः ॥

त्रप्सं क्ली द्रप्सं घोलतरदधि पातलदइ इति भाषा इत्यमरटीकायां भरतधृत विद्याविनोदः ॥

त्रयं क्ली अवयव तिन इति भाषा इति मुग्धबोधं ॥

त्रयः पुं त्रिसंख्या तिन इति भाषा त्रिशब्दस्य बहुवचनांतरूपोऽयं अस्य स्त्री लिंग क्लीव लिंगयो रूपे तिस्रः त्रीणि इति व्याकरणं ॥ तद्वाचकानि यथा कालः १ अग्निः २ भुवनं ३ गंगामार्गाः ४ शिवचक्षुः ५ गुणः ६ ग्रीवारेखा ७ कालिदासकाव्यं ८ वलिः ९ संध्या १० पुरं ११ पुष्करं १२ रामः १३ विष्णुः ज्वरपादः १५ इतिकविकल्पलता त्रिसंख्या विशिष्टे त्रि इत्यमरः तिस्रोभार्यास्त्रिशालाश्चत्रयो भ्रात्राश्च बांधवाः । त्र्यश्च वेदविरुद्धाश्च न स्युते मंगलप्रदाः । इति ब्रह्मवैवर्तेप्रकृतिखण्डं ॥

त्रयी स्त्री ऋक् साम यजुर्वेदाः एतत्त्रितयं इत्यमरः पुरंध्री ॥

स्रमतिः इतिविश्वः सोमराजीवृ
न्तः इति शब्दचन्द्रिका ॥
त्रयीतनुः पुं सूर्य्यः इतिहलायु
धः त्रयीधर्मः पुं ऋग्यजुःसाम्ना
विधाने त्रिवेदोक्तकर्म इत्यमरः
त्रयीमुखः पुं ब्राह्मणः इतिहेमच
न्द्रः त्रयोदश न त्रि संख्याविशेषः
१३ तेरइति भाषा बहुवचनान्तो
यं तत्संख्यायुक्तस्य इत्यमरः
तद्वाचकः ताम्बूलगुणाः १३ इति
कविकल्पलता ॥ ॥
त्रयोदशः त्रि त्रयोदशानां पूरणः
तेरजि इत्यादि भाषा इति व्या
करणं ॥
त्रयोदशी स्त्री तिथिविशेषः ॥
साचेन्द्रस्य त्रयोदश कला क्रिया
रूपा त्रयोदश कला क्रियावच्छि
न्न कालरूपा वा इति तिथ्यादित
त्वे तत्रजातस्य फलं यथा रूपान्वि
तः सात्विक भाव हीनः स्त्रीचचा
ल्पजननीप्रियश्च सदालसः
शिल्पशुश्रेणीकवेत्ता त्रयोदशीजन्म
तिथिर्यदिस्यात् इति कोष्ठीप्रदी
पः इयं धर्मस्य तिथिः इति वराह
पुराणं त्रस क धृतौ ग्रहे निषे
धे इति कविकल्पद्रुमः ॥

त्रस इ कि भासि इति कवि क
ल्पद्रुमः ॥
त्रस ई ण भये इतिकविकल्पद्रुमः
त्रस य भये इतिकविकल्पद्रुमः ॥
त्रसं क्ली वने इतित्रिकाण्डशेषः ॥
त्रसः त्रि जंगमः इत्यमरः ॥
त्रसरः पुं तन्त्रवायोपकरणविशेषः
तासनीइतिभाषा तत्पर्य्यायः ॥
सूत्रवेष्टनं २ इत्यमरः तलवः ३
इति भरतः ॥
त्रसरेणुः स्त्री सूर्य्यभार्य्याविशेषः
इतित्रिकाण्डशेषः ।
त्रसरेणुः पुं त्रिंशत् परमाणुपरि
माणं मगवाक्षान्तर्गते सूर्य्यकिरणे
दृश्यते तत्पर्य्यायः ध्वंसी २ । यथा
जालान्तरगते सूर्य्यकरे ध्वंसी विलो
क्यते त्रसरेणुस्तु विज्ञेयस्त्रिंश
ता परमाणुभिः इति वैद्यकपरि
भाषा ॥
त्रिसरः पुं भीरुकः इति संक्षिप्त
सारे उणादिवृत्तिः ॥
त्रस्तः त्रि भीतः इतिजटाधरः ॥
स्तीत्रं क्ली यथा सविरामं त्रिता
लेच एकं द्रुतत्रयापरे शेषे त्र
स्तं त्रितालेच देवसार इतीर्य्यते ॥
इति संगीतदामोदरः ॥

त्रस्नुः त्रि त्रासशीलः इत्यमरः
त्रा ङ पालने त्रै ङ पालन इत्यत्र
कैश्चिदन्तादौ त्रा पठ्यते इति क्रम
दीश्वरः इति कविकल्पद्रुमटीका
यां दुर्गादासः ॥
त्राणं क्ली रक्षणं त्रायमाणलता
रक्षिते त्रि इतिमेदिनी ॥
त्राणा स्त्री त्रायमाणा इति राज
निर्घण्टः ॥
त्रातं त्रि रक्षितं इत्यमरः ॥
रक्षणे क्ली ॥
त्रापुषं त्रि त्रपुवानिर्म्मितं इति
व्याकरणं ॥
त्रायंती स्त्री त्रायमाणा लता ।
इत्यमरः त्राणकर्त्रीच ॥
त्रायमाणं त्रि रक्ष्यमाणं इति
व्याकरणं ॥
त्रायमाणा स्त्री बला इति बङ्गला
इति च ख्याता तत्पर्य्यायः ।
वार्षिकं २ त्रायन्ती ३ बलभद्रिका ४
इत्यमरः कृतत्रा ५ त्रायमाणिका ६
भलभद्रा ७ सुकामा ८ वार्षिकी ९
गिरिजा १० अनुजा ११ मांगल्याह्वा १२
देवबला १३ पालिनी १४ भयना
शिनी १५ अवनी १६ रक्षणी १७
त्राणा १८ इति राजनिर्घण्टः ॥

सुभद्राणी १९ भद्रनामिका २० इ
तिरत्नमाला अस्य गुणाः शीत
त्वं मधुरत्वं गुल्म ज्वरकफास्र
भ्रम तृष्णा क्षय ग्लानि विषच्छ
र्दि विनाशित्वंच इति राजनि ।
र्घण्टः पित्तनाशित्वं इति राज
वल्लभः ॥
त्रासः पुं भयं इत्यमरः मणे
र्दोषं इति मेदिनी ॥
त्रासदायी न त्रि भयदाता तत्
पर्य्यायः शास्करः २ इतिहेमचन्द्रः
त्रिंशः त्रि त्रिंशतः पूरणः इति
व्याकरणं ॥
त्रिंशकः त्रिंत्रिंशत् समूहः सम
हार्थेड्कप्रत्ययः इतिसुपद्मव्याकर
णं त्रिंशत् स्त्री संख्याविशेषः त्रिश
इति भाषा एकवचनान्तोऽयं । त्रिं
शद्वये त्रिंशतौ त्रिंशतो बहुत्वे त्रिं
शतः इतिव्याकरणं त्रिंशत् पत्र
क्ली कुमुदं इति शब्दमाला ॥
त्रिकं क्ली पृष्ठवंशाधरः इत्यम
रः त्रयं इति मेदिनी त्रिपथसं
स्थाने इतिहेमचन्द्रः त्रिफला
त्रिकटु ॥ त्रिमदः यथा गुडूची
मारसंयुक्तात्रिकत्रय समन्वयात्

वातरक्तं त्रिहन्त्याशु सर्वरोगहरस्त्वयः
इति सुखबोधः ॥
त्रिककुत् ² पुं त्रिकूटपर्वतः इत्य
मरः ॥
त्रिकटः पुं गोक्षुरकः इति शब्द
रत्नावली ॥
त्रिकटु क्ली मिलितशुण्ठीमरीचपि
प्पल्यः तत्पर्यायः त्र्यूषणं २ व्योषं ३
इत्यमरः कटुत्रयं ४ कटुत्रिकं ५
अस्य गुणाः दीपनत्वं श्वासकास
त्वगामय गुल्म मेह कफ स्थौल्य
मेदः श्लीपद पीनस नाशित्वंच इ
ति राजनिर्घण्टः ॥
त्रिकणं क्ली मिलितहरीतक्यामलकविभी
तकस्पर्शः त्र्यूषणं तत्पर्य्यायः ॥
कणकारीत्रयं २ कणकत्रयं ३ ।
इति राजनिर्घण्टः ॥
त्रिकण्टः पुं गोक्षुरकः इति शब्द
रत्नावली पत्रशृङ्गहृदः तेकांटा
सिंज इति भाषा इति शब्द चंद्रि
का मत्स्यभेदः टेङ्गरा इति भा
षा अस्य गुणाः पित्त कफ ना
शित्वं रुक्षत्वं अग्निदीपनत्वं लघुत्वंच
इति राजवल्लभः ॥
त्रिकण्टकः पुं लघुगर्गमत्स्यः इ
ति त्रिकाण्डशेषः गोक्षुरक हृदः ।
इति हेमचंद्रः ॥
त्रिका स्त्री कूपोपरिस्थपद्मभ्रान्त
भागः भूमिष्ठकूपपद्मं इत्यन्ये ॥
कूपस्य समीपे रज्जुधारणार्थं त्रिस्थि
दारुयंत्रं इति स्वामी इत्यमरः
टीकायां भरतः ॥
त्रिकायः पुं बुद्धः इति हेमचंद्रः ॥
त्रिकार्षिकं क्ली मिलित नागराति
विषा मुस्ता त्रय रूपं इति राज।
निर्घण्टः ॥
त्रिकालज्ञः पुं बुद्धः इति हेमचंद्रः
सर्वज्ञेति ॥
त्रिकालदर्शी ⁿ पुं ऋषिः इति ह
लायुधः भूतभविष्यद्वर्त्तमानं वे
त्तीति ॥
त्रिकालवित् पुं बुद्धः इति हलायु
धः त्रिकालज्ञे त्रि त्रिकूटं क्ली सिंधुलवणम्
…लवणं इति राजनिर्घण्टः
त्रिकूटः पुं पर्वतविशेषः यस्या
परि लंका तत्पर्य्यायः त्रिककुत्
२ इत्यमरः ॥
सुवेलः ३ त्रिमुकुटः ४ ॥
इति हेमचंद्रः ॥ त्रिशृङ्गः ५
चित्रकूटकः ६ इति शब्दरत्नावली
क्षीरोदसमुद्रतीरस्थ पर्वतः ॥ ॥

1275

यथा सर्वरत्नमयः श्रीमान् त्रिकूटो
नाम पर्वतः सुतः पर्वतराजस्य सुमे
रो भास्कर द्युतेः क्षीरोदजलवीच्या
घौतामलशिलातलः उत्थितः
सागरं भित्त्वा देवर्षिगणसेवितः ॥
अप्सरोभिः परिवृतः श्रीमान् प्र
स्रवणाकुलः गंधर्वैः किन्नरैः
यक्षैः सिद्धचारणपन्नगैः विद्या
धरैः सपत्नीकैः संयतैस्तु तप
स्विभिः मृग द्वीपि गजेन्द्रैश्च वृ
तगात्रो विराजते पुन्नागैः कर्णि
कारैश्च बिल्वामलक पाटलैः
चूत निम्ब कदंबैश्च चंदनागुरु
चम्पकैः शालैस्तालैस्तमालैश्च
शाल्मलार्जुन पिप्पलैः तथान्यै र्वि
विधैर्वृक्षैः सर्वतः समलंकृतः
नानाधातुविकीर्णैः शृंगैः प्रस्रवद्भिः
समंततः शोभितो रुचिरप्रख्यै
स्त्रिभिर्विपुलैश्च सानुभिः शृंगैः शा
खामृगैः सिंहैर्मातंगैश्च सदा मदैः
जीवंजीवक संघुष्टैश्चकोर शिखि
नादितैः तस्यैकं कांचनं शृंगं सेव
ते यद्दिवाकरः नानापुष्पसमाकीर्णं
नानागंधाधिवासितं द्वितीयं राज
तं शृंगं सेवते यन्निशाकरः पाण्डु
रांबुदसंकाशं तुषारचयसन्निभं व
ज्रेन्द्रनील वैदूर्य्य तेजोभिर्भासय
न्दिशः तृतीयं ब्रह्मसदनं प्रकृष्टं
शृंगमुत्तमं न तत्कृतघ्नाः पश्य
न्ति न नृशंसा न नास्तिकाः नात
प्ततपसो लोके ये च पापकृतो जनाः
तस्य सानुमतः पृष्ठे सरः कांचन पं
कजं कारण्डवसमाकीर्णं राजहंसो
पशोभितं तत्रैकः सुचलसंकाशो मदा
चलित लोचनः तृषितः पातुकामो
सौ वने तस्मिन् तज्जले सलीलः पंक
जवने यूथ मध्य गतः स्मरन् गृहीत
स्तेन रौद्रेण ग्राहेणाव्यक्त मूर्त्तिना
गरुडस्थो जगन्नाथो लोकाधारस्त
पोधन ग्राहग्रस्तं गजेन्द्रं तं तं च ग्राहं
जलाशयात् उज्जहाराप्रमेयात्मा तर
सा मधुसूदनः स्थलस्थं दारयामा
स ग्राहं चक्रेण माधवः मोक्षयामा
स नागेन्द्रं पापेभ्यः शरणागतं इ
ति वामनपुराणं ॥
त्रिकूटलवणं क्ली द्रोणील
वणं इति राजनिर्घण्टः
त्रिकोणं क्ली योनिः ॥ इ
ति शब्दार्थकल्पतरुः ॥ ।
लग्नात् नवमपंचमलग्ने इ
ति दीपिका अस्य त्रि ॥ त्रिको

ण वस्तूनि यथा हलः १ शिव
चक्षुः २ कामाख्या ३ वह्निमंडलं
४ एकारः ५ वज्रं ६ शृंगाटं ७ श
कटादि ८ योनिः ९ इति कवि
कल्पलता ॥
त्रिकोणफलं क्ली शृंगाटकं इति
भावप्रकाशः ॥
त्रिखं क्ली त्रपुषं इतिशब्दचंद्रिका ॥
त्रिखट्वं क्ली खट्वात्रयं तिसृणां
खट्वानांसमाहारः इत्यमरः ॥
त्रिखट्वी स्त्री त्रिखट्वं इत्यमरः ॥
त्रिगणः पुं त्रिवर्गः धर्मार्थकामाः
इत्यमरटीकायांनीलकंठः ॥
त्रिगर्त्तः पुं देशविशेषः लाहोरा
ख्यदेशैकभागः तत्पर्यायः ।
जालन्धरः २ इति हेमचंद्रः ॥
तद्देशास्थे पुं भूम्नि गणितान्तरे इ
तिमेदिनी ॥
त्रिगर्त्तकः पुं त्रिगर्त्तदेशः इतित्रि
काण्डशेषः ॥
त्रिगर्त्ता स्त्री क्षुद्रघंटिका कामुकांग
ना इति मेदिनी ॥
त्रिगर्त्तिकः पुं त्रिगर्त्तदेशः इति
भूरिप्रयोगः त्रिगुणं क्ली सत्वर।
जस्तमांसि इति श्रीभागवते
त्रयाणांप्रकृतेः गुणत्रय युक्ते

च त्रि त्रिगुणात्मकं ॥
त्रि वारत्रयहृष्टक्षेत्रे ॥ इत्य
मरः ॥
त्रिजातकं क्ली मिलित त्वक् त
गेला पत्राणि यथा एलादि त्रिति
हृदिष्टं त्रिजातं त्रिसुगंधिकं वा
तर्जातं समागत हृद्यं वातकफा
पहे ग्राहि च त्वगेला पत्रकैः स्तु ।
ल्यैः स्त्रि सुगंधि त्रिजातकं नाग
केशर संयुक्तं चातुर्जातकमुच्य
ते इति राजनिर्घंटः ॥
त्रिणं क्ली तृणं इति शब्दरत्नावलीः
त्रिणता स्त्री धनुः इतित्रिकाण्डशेषः
त्रिणतंच ॥ ॥
त्रिणाचिकेतः पुं यजुर्वेदैकदेशो
ग्रंथः तद्वेदाध्यायी इतिमनुः ॥
त्रितयं क्ली त्रयाणांप्रकरणं इति
व्याकरणं ॥
त्रितंत्रं क्ली स्त्री तत्त्वत्रयं त्रयाणां
तत्वाणां समाहारः इत्यमरः ॥
त्रिदण्डः पुं संन्यासाश्रमः यथा
यस्त्वसंयत षड्वर्गः प्रचंडेंद्रियसा
रथिः ज्ञानवैराग्यरहितंत्रि द ण्ड मु
पजीवति इति श्रीभागवते त्रिदंडी न् पुं त्रि
दंडधारियतिः काय वाङ्मनो दण्डयुक्तः इति

श्रीभागवते यज्ञोपवीते इतिलोक
प्रसिद्धिः ॥
त्रिदला स्त्री गोधापदी लता इति
जटाधरः ॥
त्रिदलिका स्त्री चर्मकषा इति श
ब्दचंद्रिका ॥
त्रिदश पुं देवः इत्यमरः ॥
त्रिदशदीर्घिका स्त्री स्वर्गंगा इति
हेमचंद्रः ॥
त्रिदशमंजरी स्त्री तुलसी इति रा
जनिर्घंटः ॥
त्रिदशायुधं क्ली वज्रं इति त्रिकांड
शेषः ॥
त्रिदशारिः पुं असुरः इति शब्द
रत्नावली ॥
त्रिदशालयः पुं स्वर्गः इत्यमरः
सुमेरुपर्वतः इतिहलायुधः ॥
त्रिदशावासः पुं स्वर्गः इति हला
युधः ॥
त्रिदशाहारः पुं अमृतं इति ह
लायुधः ॥
त्रिदिनस्पृक् श पुं अहस्पर्शः यथा
तिथ्यन्तद्वय मेकोदिनवारः स्पृशा ति
यत्र तत्र्यवमदिनं त्रिदिन स्पृ
क् दिन त्रय स्पर्शनादक्षः इति
ज्योतिषतत्वं ॥ ॥

त्रिदिवः पुं क्ली स्वर्गः इत्यमरः
आकाशः इति हेमचंद्रः ॥
त्रिदिवा स्त्री नदीभेदः इति ॥
मेदिनी ॥
त्रिदिवेशः पुं देवः इत्यमरः ॥
त्रिदिवोद्भवा स्त्री स्थूलैला इति
राजनिर्घंटः ॥
त्रिदृक् श पुं शिवः इति हेमचंद्रः
त्रिदोषं क्ली दोषत्रयं वातपित्त
कफ रूपं इतिराजनिर्घंटः
त्रिदोषजः त्रि त्रिदोषजनितः ।
सन्निपातरोगः यथा विरज्वरे
वात कफोल्वणे वा त्रिदोषजेवा
दशमूल मिश्रः किराततिक्ता
दि गणः प्रयोज्यः शुद्ध्यर्थिनेवात्रि
वृता विमिश्रः इतिचक्रपाणिदत्तः
त्रिधा अत्रिप्रकारः इतिमुग्धबो
धं नारायणः परोदेवः सत्वरूपो
जनार्द्दनः त्रिधात्मानं स भगवान्
समर्ज्ज परमेश्वरः इति वारा
हपुराणं ॥
त्रिधातुः पुं गणेशः इति त्रिका
ण्डशेषः धातुत्रयेक्ली ॥
त्रिधामा न् पुं विष्णु शिवः अग्निः
मृत्युः इति शब्दार्थकल्पतरुः
धामत्रयेक्ली सीच ॥

त्रिधारकः पुं गुण्डतृणं इति राजनिर्घण्टः धारकत्रययुक्ते ॥
त्रिधारस्नुही स्त्री स्नुहीविशेषः तत्पर्य्यायः अस्त्रः २ धारास्नुही ३ इति राजनिर्घण्टः ॥
त्रिनयनः पुं शिवः इति हलायुधः नयनत्रययुक्ते ॥
त्रिनेत्रः पुं शिवः यथा दिपीशवृंदाशविभूतिरीशिता दिशांसकान प्रसरावरोधिनी दधारयस्याणिहर्षं हृदयाधिकां निजत्रिनेत्रावतरत्वबोधिकां इति नैषधं ॥ तत्पुराणे यथा ततः साध्यगणानीश त्रिनेत्रानसृजत् पुनः कोटयस्ता राशीर्निर्जरामरणवर्जिताः वामः सृजत्रमत्स्यो स्तानव्यणाविनिवारितः नैवंविधा भवेत् सृष्टिर्जरामरणवर्जिता इति मत्स्यपुराणं ॥
त्रिनेत्रचूडामणिः पुं चंद्रः इति त्रिकाण्डशेषः ॥
त्रिनेत्रा स्त्री वाराहीकंदः इति राजनिर्घण्टः नेत्रत्रययुक्ते च ॥
त्रिपताकं क्ली रेखात्रयांकितभालं ॥ इति हारावली ॥ ॥
त्रिपत्रः पुं विल्वः इति राजनिर्घण्टः ॥ ॥

पत्रत्रये त्रिपत्री ॥
त्रिपत्रकः पुं पलाशवृक्षः इति हेमचंद्रः ॥
त्रिपथं क्ली त्रिमार्गं तेमाताप्रथ इति भाषा तत्पर्य्यायः त्रिकं २ इति हेमचंद्रः शून्यागारे श्मशाने वा निर्जने वा चतुष्पथे विल्वधात्री द्रुमस्याग्रे त्रिपथे वा भजेत्त्रिपि स भवेत् सर्वसिद्धीशः सर्ववेदविदांवरः इति गुप्तसाधनतंत्रं ॥
त्रिपथगा स्त्री गंगा इत्यमरः ॥
त्रिपदा स्त्री हंसपदीवृक्षः इति राजनिर्घण्टः ॥
त्रिपदिका स्त्री अर्घ्यार्थ पात्रनिर्मितत्रिपाद युक्त शंखाधारः इति तंत्रसारः ॥
त्रिपदी स्त्री गोधापदी इति रत्नमाला हस्तिगात्रबंधः इति हेमचंद्रः त्रिपादयुक्ता पदत्रयं इति व्याकरणं भाषा कवितायाश्छंदो विशेषः यथा पञ्चदिकोता यदि यमकोता द्वादशपरिणतमात्रा किन्नरगीतिस्तदितिनिवीतिः स्याद् समाचर गाथा स्पदामुदाहृतः येषासंगी ॥

तके नित्यं निवीतिः किन्नरारण्यका सेवस्यात् प्राकृते गाने त्रिपदी ॥ परिष्कृता इति कोषान्तरः ॥
त्रिपर्णः पुं पलाशः इति राजनिर्घण्टः ॥
त्रिपर्णिका स्त्री कंदविशेषः तत्पर्य्यायः बृहत्पत्रा २ छिन्नग्रंथिनिका ३ कंदालुः ४ कंदफला ५ अम्लवल्ली ६ विनारुहा ७ त्रिपर्णी ८ अस्या गुणाः मधुरत्वं शीतत्वं ॥ श्वासकास विषव्रणविनाशित्वं पित्तप्रकोपशमनत्वंच इति राजनिर्घण्टः
त्रिपर्णी स्त्री शालपर्णी इति भावप्रकाशः वनकार्पासी वृक्षिप । र्णीभेदः इति रत्नमाला ॥
त्रिपात् पुं विष्णुः इति त्रिकाण्डशेषः ज्वरः यथा विद्राविते भूतगणे ज्वरस्तु त्रिशिरा त्रिपात् इति श्रीभागवतं ॥
त्रिपादिका स्त्री हंसपदीलता । इति राजनिर्घण्टः ॥
त्रिपिष्टपं क्ली स्वर्गः इत्यमरः ॥ आकाशं इति शब्दरत्नावली ॥
त्रिपिष्टपसत् पुं देवता इति १ हलायुधः ॥
त्रिपुटः पुं सतीलकः तीरं इति मेदिनी हस्तभेदः तालकः इति शब्दरत्नावली गोक्षुरवृक्षः इति रत्नमाला ॥
त्रिपुटा स्त्री मल्लिका सूक्ष्मैला त्रिवृत् इति मेदिनी कर्णस्फोटा स्थूलैला रक्तत्रिवृत् इति राजनिर्घण्टः देवीविशेषः यथा ऋषिः सम्मोहनश्छन्दो गायत्री देवता पुनः त्रिपुटाख्या हि हृल्लैखे बीजे रंगानि षट् क्रमात् अस्या रूपं यथा पारिजातवने रम्ये मण्डपे मणिकुट्टिमे रत्नसिंहासने रम्ये पद्मे षट्कोणशोभिते अधस्तात् कल्पवृक्षस्य निषण्णां देवतां स्मरेत् चापपाशाम्बुज सरसिजान्यंकुशं पुष्पबाणान् संविभ्राणां करसरसिजै रत्नमौली त्रिनेत्रां हेमभ्राजत्कनककनकारत्नमंजीरकांची ग्रैवेयाद्यैर्विलसिततनुं भावये छत्रिमाद्यां चामरादर्शताम्बूल करण्डक समुद्गकान् वहन्तीभिः ऊर्म्मीभिः देवीभिः परिवारिता ॥ कर्णाम्रत वर्णिता पद्मपत्नी ॥

साधकंदशा इति तंत्रसारः ॥
त्रिपुटी [ष] पुं एरण्डवृक्षः इतिश
ब्दमाला ॥
त्रिपुटी स्त्री त्रिवृता इत्यमरटी
कायां भरतः ॥
त्रिपुटीफलः पुं एरण्डः इति
हारावली ॥
त्रिपुण्ड्रं क्ली भस्मादिकृतकपा
लस्थतिर्य्यग्रेखात्रयं यथा वि
ना भस्मत्रिपुण्ड्रेण विना रुद्राक्षमा
लया पूजितोपि महादेवो न स्यात्त
स्य फलप्रदः तस्मान्मृदापि कर्त्त
व्यं ललाटेपि त्रिपुण्ड्रकं इति
तिथ्यादितत्वे ब्रह्माण्डपुराणे।
ऊर्द्ध्वपुण्ड्रं मृदा कुर्य्यात् त्रिपुण्ड्रं।
भस्मना सदा तिलकं वै द्विजः
कुर्य्यात् चंदनेन यदृच्छया ऊर्द्ध्व
पुण्ड्रं द्विजः कुर्य्यात् क्षत्रियश्च
त्रिपुण्ड्रकं अर्द्धचंद्रं च वैश्यश्च
वर्त्तुलं शूद्रयोनिजः इत्याह्निका
चारतत्वे शिवागमेदीक्षितैस्तु यथा
र्य्यं तिर्य्यक् त्रिपुण्ड्रकं विस्वागा।
मेदीक्षितस्तु ऊर्द्ध्वपुण्ड्रं विधारयेत्
इति नागोजीभट्टधृतसत्संहिता
त्रिपुण्ड्रकं क्ली त्रिपुण्ड्रं यथा व
ह्निललाटगा त्रिस्रो भस्मरेखास्त्रिपुण्ड्र

कं इति हारावली ॥
त्रिपुरं क्ली मयदानवनिर्म्मितं पुरत्र
यं पुरा असुरा देवैर्निर्जिताः ॥
ततः मायिनो परमाचार्य्यं मयं
शरणमाययुः स गमनागमने अह
श्या दुर्विर्तर्क्य परिच्छदा हैमीरौ
प्यायसीतिति स्त्रिः पुरो निर्माय तेभ्यो
ददौ ते असुरा स्ताभि पुरीभिः
रलक्षिताः पूर्व वैरमनुस्मरन्तः
सेश्वरान् त्रीन् लोकान् नाशयांच
क्रुस्ततः सेश्वरा लोका हरं उपासां
चक्रिरे हरो माभैष्टेति सुरानुक्त्वा
धनुषि शरं संधाय पुरेषु अमुं
चत तैः शरैः स्पृष्टाः पुरौकसो
ऽसुरा असवः संतो निपेतुः ॥
महायोगी मय स्तान् सुरानानीय
त्रिपुरस्थितसिद्धामृतरसकूपे ॥
ऽक्षिपत् ते ऽसुरा तद्रसंस्पृष्टा
दृढशरीराः सन उत्तस्थुस्तदा वि
सु गौ ब्रह्मा च वत्सो भूत्वा त्रि
पुरे प्रविश्य रसकूपामृतं पपौ
असुरा विस्मायया ॥ मोहि
ताः संतो न न्यषेधन् तदा विष्णुः स्वा
भिः शक्तिभिः शंभोर्युद्धोपकरणं
रथसारथिधनुर्बाणादिकं ॥
अथात ततः शंभुः सन्नद्धः ॥ गा

रथमास्थाय शरं न्यधनुषि संधाय
मध्याह्नकाले त्रिपुरं ददाह इति
श्रीभागवते ॥
त्रिपुरदहनः पुं शिवः इति
हारावली ॥
त्रिपुरमल्लिका स्त्री पुष्पवृक्षविशे
षः त्रिपुरमालिका इतिख्याता तत्
पर्य्यायः स्त्रेष्मघ्ना २ इति त्रिका
ण्डशेषः ॥
त्रिपुरान्तकः पुं शिवः इत्यमरः
त्रिपुरी स्त्री देशविशेषः त्रिपुरा
इतिख्याता तत्पर्य्यायः चेदिन
गरी २ इति हेमचंद्रः ॥
त्रिपुषा स्त्री कृष्णत्रिवृत् इति
शब्दचंद्रिका ॥
त्रिपृष्ठः पुं राजभेदः तत्पर्य्यायः
प्राजापत्यः २ इति हेमचंद्रः ॥
त्रिफला स्त्री मिलितहरितकी
विभीतकामलकीफलानि तत्प
र्य्यायः त्रिफली २ फलत्रयं ३ फल
त्रिकं ४ इति राजनिर्घण्टः अस्या
गुणाः त्रिदोषनाशित्वं नास्रस्र
त्वं मलभेदित्वं च इति राजवल्लभः
त्रिफली स्त्री त्रिफला इति रा
जनिर्घंटः ॥ ॥
त्रिवलीकं क्ली पायुः इति हेमचंद्रः

त्रिभण्डी स्त्री त्रिवृता इत्यमरः त्रि
भद्रं क्ली सुरतं इति त्रिकाण्ड
शेषः ॥
त्रिभुवनं क्ली त्रिलोकी त्रयाणां
भुवनानां समाहारः इति व्याकरणं
त्रिमदः पुं मुस्ताचित्रकविडंगानि
इति वैद्यके ॥
त्रिमधुः पुं ऋग्वेदैकदेशः मधु
वातादि ऋक् त्रय वेत्ता यथा।
त्रिनाचिकेतस्त्रिमधुस्त्रिसुवर्णीषड
ङ्गवित् इति पंक्तिपावनवर्णने ॥
पुराणं ॥
त्रिमधु क्ली मिलितसिता माक्षि
क सर्पींषि तत्पर्य्यायः मधुरत्रय
२ मधुत्रयं ३ इति राजनिर्घण्टः
त्रिमार्गी स्त्री त्रिपथं त्रयाणां मा
र्गाणां समाहारः इति व्याकरणं ॥
त्रिमकुटः पुं त्रिकूटपर्वतः इति
हेमचंद्रः ॥
त्रिमुखः पुं बुद्धविशेषः इति हे
मचंद्रः ॥
त्रिमुखा स्त्री बुद्धदेवताभेदः ।
शाक्यमातादेवी तत्पर्य्यायः मारी
ची २ वज्रकालिका ३ विकटा ४
वज्रवाराही ५ गौरी ६ पोत्रिरथा
७ इति त्रिकाण्डशेषः ॥ ॥

त्रिमूर्त्तिः पुं बुद्धः इतित्रिकाण्डशेषः ब्रह्म विष्णु शिवाख्य मूर्त्तित्रयवान् यथा त्रिमूर्त्तिर्यः सर्गस्थितिविलय कर्म्मणि तनुते इति गंगेशोपाध्यायः ॥

त्रियष्टिः पुं देवपर्पटी इति रत्नमाला ॥

त्रियामकं क्ली पापं इतिशब्दमाला त्रियामा स्त्री रात्रिः हरिद्रा इत्यमरः यमुना नीली कृष्णत्रिवृत् इत्युणादिकोषः ॥

त्रियुहः पुं कपिलाश्वः इति हेमचंद्रः ॥

त्रिरात्रं क्ली रात्रित्रयं तिसृणां रात्रीणां समाहारः इतिलिंगादि संग्रह टीकायां भरतः ॥

त्रिरेखः पुं शंखः इतिहेमचंद्रः ॥

त्रिलवणं क्ली सैंधवं विड रुचक मिलितैतल्लवणत्रयं इति राजनिर्घण्टः ॥

त्रिलोकी स्त्री त्रयाणां लोकानां समाहारः यथा भूर्लोकः भुवर्लोकः स्वर्लोकश्च इति लिंगादिसंग्रहटीकायां भरतः

त्रिलोकेशः पुं सूर्य्यः इतिशब्दचंद्रिका ॥

त्रिलोचनः पुं शिवः इत्यमरः ॥

त्रिलोचना स्त्री बुद्धदेवीभेदः इति त्रिकाण्डशेषः दुर्गा च ॥

त्रिलोचनी स्त्री दुर्गा इति पुराणं

त्रिलोहकं क्ली सुवर्णरजतताम्रं एतल्लोहत्रयं इतिराजनिर्घण्टः

त्रिलोही स्त्री मुद्राविशेषः यथा अथ मंत्रिणां हितार्थाय त्रिलोही मुद्रा निरूप्यते सोम सूर्य्याग्निरूपाः स्युः वर्ण्णा लोह त्रयं तथा रौप्यमिंदुः स्मृतो हेम सूर्य्यस्ताम्रो हुताशनः लोहभागाः समुद्दिष्टाः स्वराद्यक्षरसंख्यया त्रैलोहैः कारयेन्मुद्रा मसंकलित संगतां ॥ राष्ठ स्वराः स्मृताः सौम्याः स्पर्शाः सौराः प्रभोदयाः आग्नेया व्यापकाः सर्वे सोमसूर्य्याग्नि देवताः स्वराः षोडश विख्याताः स्पर्शाः स्युः पंचविंशतिः व्यापका दश ते काम धन धर्म प्रदायिनः ॥ सार्द्धं सहस्रं संजप्य स्पृष्ट्वा तां त्र्यक्षरात्मतः तस्यां संस्थापयेन्मंत्री सर्पिषा पूर्व संख्यया निःक्षिप्य कुंभतो मुद्रामभिषेकोक्त वर्त्मना आवाह्य पूजयेद्देवीमुपचारैर्विधानतः अभिषिच्य ।

विनीताय दयालो मुद्रिकां गुरुः इयंमुद्रा तद्रोग विषज्वर विनाशिनी व्याल चौर मृगादिभ्यो रक्षांकुर्य्याद्विशेषतः गृहे विजयमाप्नोति धारयन् मनुजेश्वरः मंत्र सिद्धिकरी पुंसां चतुर्वर्ग फलप्रदा धारयन्मनुजो नित्यं देवतुल्यो भवेद्भुवि इतितंत्रसारः

त्रिवर्गः पुं धर्मकामार्थाः इत्यमरः त्रिफला त्रिकटु वृद्धि स्थानतयाः सत्वरजस्तमांसि इति मेदिनी स्वनीतिः इतिशब्दरत्नावली

त्रिवर्णकं क्ली गोक्षुरकः त्रिफला त्रिकटु इतिमेदिनी ॥

त्रिवर्षिका स्त्री त्रिहायणी त्रिवर्षीगौः इति हेमचंद्रः ॥

त्रिविक्रमः पुं विष्णुः इत्यमरः

त्रिविष्टपं क्ली त्रिपिष्टपं स्वर्गः इत्यमरटीकायां स्वामी त्रिभुवनेव त्रिविष्टपसत् पुं त्रिपिष्टपसत् इति हलायुधः ॥

त्रिवीजः पुं श्यामाकः इतिराजनिर्घण्टः ॥

त्रिवृत् स्त्री लताविशेषः तेउडी इति भाषा तत्पर्य्यायः सर्वानुभूतिः २ सरला ३ त्रिपुटा ४ त्रिवृ ५ त्रिभण्डी ६ रेचनी ७ इत्यमरः सरला ८ सरणा ९ सरसा १० त्रिपुटी ११ रोचनी १२ एते त्रिवृता सामान्ये शुक्लत्रिवृतायामितिकेचित् इति भरतः मालविका १३ मसूरी १४ श्यामा १५ अर्द्धचंद्रा १६ विदला १७ सुषेणी १८ कालिंगिका १९ कालमेषी २० काली २१ त्रिवेला २२ त्रिवृत्तिका २३ इति राजनिर्घण्टः कृष्णायाः पर्य्यायः श्यामा १ पालिन्दी २ सुषेणिका ३ काला ४ मसूरविदला ५ अर्द्धचंद्रा ६ कालमेषिका ७ इत्यमरः ॥ पालिंधी ८ कालमेणिका ९ इतिभरतः श्वेतायाः पर्य्यायः त्रिवृत् १ हकाली २ सरला ३ त्रिभंडी ४ त्रिपुटा ५ अरुणायाः पर्य्यायः आच्छादनी १ ऊदरूणा २ निःसृता ३ त्रिवृता ४ अरुणा ५ इति रत्नमाला सामान्यत्रिवृता गुणाः । कटुत्वं उष्णत्वं कृमिश्लेष्मार्त्तिं कुष्ठ कण्डू व्रणनाशित्वं विरेचने प्रशस्तत्वंच इति राजनिर्घण्टः अरुणवर्णत्रिवृद्गुणाः स्वादुत्वं कषायत्वं रेचनत्वं रूक्षत्वं कटुत्वं दोषपाके पित्तकफापह ॥

त्वंच अस्याश्चाल्पान्तरगुणा विज्ञे
या त्रिवृता सिता इति राजवल्लभः
श्वेतत्रिवृद्गुणाः विरेचनत्वं स्वादुत्वं
उष्णत्वं वातकारित्वं रूक्षत्वं पित्त
ज्वरश्लेष्मपित्तशोथोदरापहत्वं
च कृष्णत्रिवृता गुणाः श्वेता।
हीन गुणत्वं तीव्रत्वं विरेचनत्वं
मूर्च्छा दाह मद भ्रान्ति कंठोत्कर्ष
णकारित्वंच इति भावप्रकाशः
त्रिवृत्करणं क्ली तिसृणां तेजसां
मिश्रीकरणं यथा तेजो जल।
क्षितयः प्रत्येकं द्वेधा विभज्य प
कस्मिन्नर्द्धे स्वेतरयोरर्द्धार्द्धप्रक्षिपे
त् इति मोक्षधर्मटीकायां नी
लकण्ठः ॥
त्रिवृत्पर्णी स्त्री हिलमोचिका इति
शब्दचंद्रिका ॥
त्रिवृता स्त्री त्रिवृत् इत्यमरः ॥
त्रिवेणी स्त्री स्थानविशेषः यत्र गं
गायमुनासरस्वतीनां वियोगः सा
दक्षिणप्रयागः तत्सीमनिर्णयः
यथा प्रद्युम्नस्य हृदात् याम्ये सर
स्वत्याश्चयोत्तरे तद्दक्षिणप्रयागस्तु
गंगातो यमुनागता इति प्रायश्चि
त्ततत्त्वं इयं मुक्तवेणीति कथ्य
ते प्रयागे युक्तवेणी ॥ ॥

त्रिवेला स्त्री त्रिवृत् इति राजनिर्घ
ण्टः त्रिशंकुः पुं सूर्य्यवंशीयराज
विशेषः स तु इक्ष्वाकुवंशोद्भव र
घुराजपुत्रः यथा वशिष्ठमाहस्म
हं सशरीरेण स्वर्गगमनं यजेयं व
शिष्ठ एतदशक्यमित्याह ततो रा
जा तस्य पुत्रानुवाच सशरीरो य
यज्ञेन स्वर्गं यथाप्रयानथाकुरु
नयद्भिर्भवद्भिः परित्यक्तस्तदाहं
गुरुमुपासिष्ये वशिष्ठपुत्रास्तच्छ्रु
त्वा राजानमूचुर्वशिष्ठो भगवान्
अशक्यमिति यत्प्राह तदस्मा
भिः कथं शक्यं राजोवाच यद्युष्म
त्तो गतिं गमिष्यामि तच्छ्रुत्वा ऋ
षिपुत्रा राजानं शेपुः स्म चाण्डालो
भविष्यसि ततो रात्र्यामतीतायां स
चाण्डालदर्शनो भूत्वा विश्वामित्रं
शरणमाययौ विश्वामित्रस्तमीय
ज्ञेनायाजयामास तस्मिन् यज्ञे
देवा भागार्थं नागच्छन् ततो विश्वा
मित्रः क्रोधात् राजानमब्रवीत्
मया बाल्यात्प्रभृति यत्तपः कृतं
तेन त्वं दिवं व्रज ततो राजा सशरीरो
दिवं ययौ तद्दृष्ट्वा शक्रस्तमुवाच त्रि
शंको त्वं भूमौ पत ततः वाक्शि
राः पतन् राजा पाहीति विश्वामित्र ॥

मुवाच विश्वामित्रस्तिष्ठेति तं मुक्त्वा
स्वर्गाद्दक्षिणमार्गे परान् सप्तर्षी
नसृजदपरं नक्षत्रचक्रं सृष्टुपचक्र
मे देवाः संभ्रान्ता ऋषिमूचुरयं स
शरीरः स्वर्गं गन्तुं नार्हति विश्वा
मित्रस्तानुवाच अहमस्य स्वर्गारो
हणं प्रतिज्ञाय कथमन्यथा तं क
रिष्यामि अतो यावल्लोकाः स्थास्य
न्ति तावदमूनि नक्षत्राण्येव ति
ष्ठन्तु त्रिशंकुरप्यवाक्शिरास्तिष्ठ
तु इति रामायणं विशालः शा।
लभः इति मेदिनी चातकपक्षी
इति शब्दरत्नावली खद्योतः ॥
इति शब्दमाला ॥
त्रिशंकुजः पुं हरिश्चंद्रराजः
इति हेमचंद्रः ॥
त्रिशंकुयाजी पुं विश्वामित्रः
इति हेमचंद्रः ॥
त्रिशरणः पुं जिनः इति त्रि
काण्डशेषः ॥
त्रिशर्करा स्त्री मिलितगुडोत्
पन्ना हिमोत्था मधुरा इति।
राजनिर्घण्टः ॥
त्रिशाला स्त्री हेमादिस्थानविशेषः
सा वर्द्धमानमाता इति हेमचंद्रः
त्रिशाखपत्रः पुं बिल्वः इति राज
निर्घण्टः ॥
त्रिशिखं क्ली त्रिशूलं किरीटं
इति हेमचंद्रः ॥
त्रिशिखः पुं राक्षसविशेषः स
रावणपुत्रं इति हेमचंद्रः बिल्वः
इति राजनिर्घण्टः ॥
त्रिशिखिदला स्त्री मालाकंदः
इति राजनिर्घण्टः ॥
त्रिशिराः पुं कुबेरः इति हेमचं
द्रः ज्वरः यथा त्रिशिरस्त्वं प्रसन्नो
हं येन ते मज्ज्वराद्भयं इति श्री
भागवतं रावणपुत्रविशेषः ॥
खरसेनापतिः इति रामायणं ॥
त्रिशीर्षकं क्ली त्रिशूलं इति हे
मचंद्रः ॥
त्रिशूलं क्ली अस्त्रविशेषः तत्
पर्य्यायः त्रिशिखं २ इति मेदिनी
शूलं ३ त्रिशीर्षकं ४ इति
हेमचंद्रः ॥
त्रिशूली पुं शिवः यथा अदो
भेद्य स्त्रिशूली च वृषकेतुर्महा
बलः इति स्कंदपुराणे नीलकं
ठस्तवः त्रिशृंगः पुं त्रिकूटपर्व
तः इति शब्दरत्नावली त्रिकोणः
यथा अंगेन हीनस्त्रिशृंगस्तद
न्निति सारसमुच्चयः ॥

त्रिसंगी पुं रोहितमत्स्यः इति
प्राहार्थकल्पतरुः ॥
त्रिष्टुप् स्त्री छंदोविशेषः इ
तिछंदोमंजरी अस्य विवरणं छं
दस्शब्दे द्रष्टव्यं अस्मात् पश्चि
यथा तस्योष्णिगासील्लोमभ्यो
गायत्री च त्वचो विभोः त्रिष्टु
प्मांसात् स्नुतोऽनुष्टुप् जगत्य
स्थ्नः प्रजापतेः ॥ मज्जायाः पंक्ति
रुत्पन्ना बृहती प्राणतोऽभव
त् इति श्रीभागवते ॥
त्रिसंधिः स्त्री पुष्पविशेषः तत्
पर्यायः सांध्यकुसुमा २ संधि
वल्ली ३ सदाफला ४ त्रिसंध्यांग
सुमा ५ कांता ६ सुकुमारा ७ संधि
जा ८ सा त्रिविधा रक्ता १ सिता २ अ
सिता च ३ अस्या गुणाः कफका
सहरत्वं रुच्यत्वं त्रिदोषशमन
त्वंच इति राजनिर्घण्टः ॥
त्रिसंध्यं क्ली पूर्वाह्णमध्याह्ना
पराह्णकालः इत्यमरः अस्य रू
पान्तरं त्रिसंधी इत्यमरटीकायां
भरतः त्रिसमं क्ली समत्रयं समह
रीतकीनागरगुडरूपे इति राज
निर्घण्टः ॥
त्रिसरः पुं कृशरः इति हेमचंद्रः

त्रिसवनं क्ली त्रिकालं इति प्रा
यश्चित्ततत्वं ॥
त्रिसवनस्नायी न् पुं त्रिकालस्ना
यी इति स्मृतिः ॥
त्रिसिता स्त्री त्रिशर्करा इति राज
निर्घण्टः ॥
त्रिसीत्यं त्रि वार त्रय कृष्ट क्षेत्रं
इत्यमरः ॥
त्रिसुगंधि क्ली त्रिजातकं इति रा
जनिर्घण्टः ॥
त्रिसुपर्णः पुं बह्वृचानां वेदभागः
तद्व्रतं च तद्योगात् पुरुषोऽपि ॥
त्रिसुपर्णः इति मनुटीकायां कु
ल्लूकभट्टः ॥
त्रिस्रोताः स्त्री गंगा नदीभेदः इ
ति मेदिनी ॥
त्रिहल्यं त्रि वारत्रयकृष्टक्षेत्रं तत्
पर्यायः त्रिगुणाकृतं २ तृतीया
कृतं ३ त्रिसीत्यं ४ इत्यमरः ॥
त्रिहायणी स्त्री त्रिवर्षा गौः इत्यम
रटीकायां रमानाथः द्रौपदी ।
यथा कृतयुगे वेदवती त्रेतायां ज
नकात्मजा द्वापरे द्रौपदी छायात
नहस्मात् त्रिहायणी इति ब्रह्मवै
वर्ते श्रीकृष्णजन्मखण्डं ॥
त्रिस्तारं क्ली तारत्रयमिलितस्वर्णं

कातार यवतार टंकणतारादीनि
इति राजनिर्घण्टः ॥
त्रिस्वरः पुं कोकिलाक्षदलः ॥
झलेखारा इति भाषा इति रत्न
माला ॥
त्रुट यशि छिदि इति कविकल्पद्रुमः
त्रुट उ क छिदि इति कविकल्पद्रुमः
त्रुटिः स्त्री छोटेला अल्प संशयः
कालभेदः स च क्षणादर चतुर्भा
ग ग्रहणात्मकः इत्यमरः ॥
क्षणद्वयात्मकः इति टीकायां
स्वामी ॥
त्रुटिवीजः पुं कचुः इति शब्दमाला
त्रुटी स्त्री त्रुटिः इत्यमरटीकायां ॥
भरतः ॥
त्रुन्प वधे । इति कविकल्पद्रुमः
त्रुम्फ वधे । इति कविकल्पद्रुमः
त्रुप वधे । इति कविकल्पद्रुमः
त्रुफ वधे । इति कविकल्पद्रुमः
त्रेता स्त्री दक्षिणाग्निः गार्हपत्य ॥
आहवनीयः एकोक्त्या इदमग्नित्रयं
इत्यमरः द्वितीययुगं तस्य परि
माणं यथा त्रिचत्वारिंशल्लक्षे ॥
णविंशेन सहस्राधिकेन च चत्
र्युगं परिमितेन रत्नामक्रमेण च
द्विषट् लक्ष परिमितं षण्णवति

सहस्रकं त्रेतायुगं परिमितं
कालविद्भिः प्रकीर्तितं इति ब्र
ह्मवैवर्ते प्रकृतिखण्डं तस्य धर्मा
यथा त्रेतायुगे समायाते धर्मः
पादोनतां गतः अल्पक्लेशाद्धि
ता लोकाः केचित् केचित् स्या
शयाः विस्मधाः नरता लोकाय
त्त दानपरायणाः वर्णाश्रमाचा
ररताः सत्त्विनः स्वस्थचेतसः छ
त्राभूमिस्पृशः शूद्राः सर्वब्राह्मण
सेविनः ब्राह्मणाश्च महात्मानो वे
दवेदांगपारगाः प्रतिग्रहनि
वृत्ताश्च सत्यसंधा जितेंद्रियाः त
पोव्रतरता नित्यं दातारो विमुत्से
विनः कालवर्षी तडित्वांश्च स्त्रि
यः सर्वाः पतिव्रताः वसुंधरा च
शस्याढ्या पुत्राश्च पितृसेवि
नः इति पाद्मे क्रियायोगसारः
त्रेधा त्रिधा इति मुग्धबोधं ॥
त्रै ङ पालने इति कविकल्पद्रुमः
त्रैगुण्यं क्ली त्रिगुणधर्मः सत्व
रजस्तमस्त्वं यथा त्रैगुण्यवि
षया वेदा निस्त्रैगुण्यो भवार्जु
न इति श्रीभगवद्गीता शौच्य
सौगंध्य मांद्य यथा त्रैगुण्य
ललितैश्चारुमरुद्भिरुपवीजिते

इति शिवरात्रिव्रतकथा त्रिभिः पूरणंच ॥

त्रैधं न त्रिधा इति मुग्धबोधं

त्रैपुरः पुं त्रिपुरदेशः तत्पर्यायः डाहलः २ चैद्यः ३ चेदिः ४ इति हेमचंद्रः ॥

त्रैलोक्यं क्ली त्रिलोकी यथा त्रैलोक्यं येनदखिलं रिपुना। प्राणेन त्रातं त्वया समरे मूर्ध्नि तेपिधा इति चंडी ॥

त्रैलोक्यविजया स्त्री भंगा भांग इति ख्याता इति शब्दचंद्रिका

त्रैविद्यः पुं त्रिवेदज्ञः त्रिविद्यावेत्ता यथा त्रैविद्या हैतुकस्तर्की नैरुक्तो धर्मपाठकः त्रयश्चाश्रमिणः पूर्वे परिषत् स्याद्दशावरा इति व्यवहारतत्वं ।

त्रोटकी स्त्री रागिणीविशेषः इति हलायुधः ॥

त्रोटिः स्त्री चंचुः कट्फलं ॥ पक्षी मीनभेदः इति मेदिनी त्रोटिहस्तः पुं पक्षी इति शब्द ॥ चंद्रिका ॥

त्रोटी स्त्री त्रोटिः इति शब्द। रत्नावली ॥

त्रोत्रं क्ली गवादिताडनदंडः पाँचनी इति ख्यातः तत्पर्यायः ॥ प्राजनं २ तोदनं ३ प्रवयणं ४ ॥ गजस्य तोदनदण्डः तत्पर्यायः वैणुकं २ वेणुकं ३ इत्यमरः भरतो त्रस्तं इति सिद्धांतकौमुद्यामुणादिवृत्तिः आवश्यक्रिया व्याधिभेदः इति संक्षिप्तसारे उणादिवृत्तिः ॥

त्रौल क्क ड. गतौ इति कविकल्पद्रुमः ॥

त्र्यंगटं क्ली शिक्यभेदः योतांजनी इति मेदिनी ॥

त्र्यंकटः पुं योतांजनी शिक्यभेदः ईश्वरः इति हेमचंद्रः ॥

त्र्यध्वगा स्त्री गंगा इति त्रिकाण्ड ॥ शेषः ॥

त्र्यंजनं क्ली अंजनत्रयं यथा कालांजनं पुष्पांजनं रसांजनं इति राजनिर्घण्टः ॥

त्र्यंबकः पुं शिवः इत्यमरः ॥

त्र्यंबकसखः पुं कुबेरः इत्यमरः

त्र्यक्षः पुं शिवः इति त्रिकाण्डशेषः

त्र्यक्षरः पुं घटकः इति त्रिकांड शेषः ॥

त्र्यहस्पर्शः पुं त्रिदिनस्पृक् तिथि त्र्यहस्पर्शयुक्तमलः इति ज्योतिषं

त्र्यहस्पृशं क्ली त्र्यहस्पर्शः तथाच वशिष्ठः एकस्मिन् सावने त्वह्नि तिथीनां त्रितयं यदा तदा दिनक्षयः प्रोक्तस्तत्र साहस्रिकं फलं फलमिति वैदिक कर्मपरं ॥ अपि मासे दिनपाते यद्युधिष्ठिरो भानुलंघिते मासि चक्रिणि सुप्ते क्षय्योत्सवो मांगल्यं विवाहश्चति भीमपराक्रमः दिनपाते दिनक्षये त्र्यहस्पृशं नाम यदेतत् उक्तं तत्र प्रयत्नः कृतिभिर्विधेयः विवाहयात्रा शुभ पुष्टिकर्म सर्वं न कार्यं त्रिदिनस्पृशेन इति ज्योतिस्तत्वं ॥

त्र्याहिकः त्रितीयेह्नि भवः यथा एकाहिक द्व्याहिक त्र्याहिक चातुर्थिक सतत ज्वर विषमज्वर इत्यायपराजितास्तोत्रं ॥

त्र्युषणं क्ली मिलित शुंठी पिप्पली मरीचं इत्यमरः ॥

त्र्यूषणं क्ली त्र्युषणं इत्यमरटीकायां भरतः ॥

त्व त्रि भवान् त्वमिति भाषा युष्मच्छब्दस्य प्रथमैकवचनांतरूपोऽयं लिंगत्रये समान ॥ इति ॥ व्याकरणं ॥ ॥

त्वः त्रिभिन्नः अन्यः इत्यमरः ॥

त्वक् स्त्री इंद्रियविशेषः यथा पूर्ववत्त्रित्वयुक्ते देहव्यापित्वगिंद्रियं प्राणादिस्तमरुद्वायुपर्यंतो विषयोमतः उद्भूतस्पर्शवद्द्रव्यगोचरः सोपि च त्वचः रूपान्यच्चक्षुषो योग्यं रूपमत्रापि कारणं इत्याद्युदेत्वचो योगो मनसा ज्ञानकारणं इति भाषापरिच्छेदः वल्कलं गुडत्वक् चर्म इति मेदिनी शेषस्य पर्यायः अस्रग्धरा २ इत्यमरः असृग्वरा ३ इति तट्टीका त्वरं ४ त्वचा ५ धर्म ६ छल्ली ७ छल्ली ८ इति शब्दरत्नावली त्वचं दारचिनी इति भाषा इति राजनिर्घण्टः ॥

त्वक्कण्डूरः पुं व्रणः इति हारावली

त्वक्क्षीरः पुं क्षीरीशाहस्तः क्षीरकंचुकी इति भाषा इति रत्न ॥ माला ॥

त्वक्पत्रं क्ली गुडत्वक् इत्यमरः तेजपत्रं इति केचित् इति भरतः तत्पर्यायः उत्कटं २ भृंगं ३ त्वचं ४ चोचं ५ वरांगकं ६ इत्यमरः ॥

त्वक्पत्री स्त्री हिंगुपत्री तत्पर्यायः

कारवी २ पृथ्वी ३ बाष्पीका ४
कवरी ५ पृथुः ६ इत्यमरः ॥
तत् पत्री ७ इतिभरतः ॥
त्वक्पुष्पं क्ली रोमांचः इतित्रिका
ण्डशेषः किलासं इतिहेमचंद्रः
त्वक्पुष्पिका स्त्री किलासं फुली
इतिभाषा इतित्रिकाण्डशेषः
त्वक्पुष्पी स्त्री किलासं इतिजटा
धरः त्वक्सारः पुं वंशः इत्यमरः
गुडत्वक् इति शब्दचंद्रिका ॥
श्योणाकवृक्षः ब्रह्मवृक्षः इति रा
जनिर्घण्टः ॥
त्वक्सारा स्त्री वंशरोचना इति
राजनिर्घण्टः ॥
त्वक्सारभेदिनी स्त्री क्षुद्रचंचुवृ
क्षः इति राजनिर्घण्टः ॥
त्वक्सुगंधः पुं नारंगः इति भा
वप्रकाशः ॥
त्वक्सुगंधा स्त्री एलवालुकनाम
गंधद्रव्यं इतिजटाधरः ॥
त्वक्क्षीरा स्त्री वंशरोचना इत्य
मरः ॥
त्वक्क्षीरी स्त्री त्वक्क्षीरा इति
राजनिर्घण्टः ॥
त्वग इ कम्पे गतौ इतिकवि क
ल्पद्रुमः ॥

त्वगंकुरः पुं रोमांचः इतित्रिकाण्ड
शेषः ॥
त्वगक्षीरी स्त्री त्वगक्षीरी वंश
लोचना इतिजटाधरः ॥
त्वगंधः पुं नागरंगः इति राज
निर्घण्टः ॥
त्वग्जं क्ली रोम रुधिरं इति रा
जनिर्घण्टः ॥
त्वग्दोषापुं [illegible] कोढ रोगः इति रा
जनिर्घण्टः
त्वग्दोषापहा स्त्री वागची इति
राजनिर्घण्टः ॥
त्वग्दोषारिः पुं हस्तिकंदः इति
राजनिर्घण्टः ॥
त्वच श हृस्यां सम्वरणे इतियावत्
इति कविकल्पद्रुमः ॥
त्वचं क्ली द्रव्यविशेषः दारचिनी ॥
इतिभाषा तत्पर्य्यायः त्वक् १
वल्कलं २ अंगं ३ वरांगं ४ मुखं
शोधनं ५ शकलं ६ सिंहलं ७
वन्यं ८ सुरसं ९ कामवल्लभं १०
उत्कटं ११ वक्रगंधं १२ विज्जलं १३
वनप्रियं १४ नटपर्णं १५ गंधवल्कं
१६ वरं १७ शीतं १८ अस्य गुणाः
कटुत्वं शीतलत्वं कफकासवि
नाशित्वं मुक्काम शमनत्वं ॥

कंठ शुद्धि करत्वं लघुत्वं च ।
इति राजनिर्घण्टः वल्कलं ॥
चर्म गुडत्वक् इतिधरणिः त्व
चा स्त्री त्वक् इति शब्दरत्नावली
त्वचापत्रं क्ली त्वक्पत्रं इति श
ब्दरत्नावली
त्वचिष्टः त्रि त्वचीयान् अतिश
य त्वग्विशिष्टः इतिव्याकरणं ॥
त्वचिसारः पुं वंशः इत्यमरः
त्वचिसुगंधा स्त्री क्षुद्रैला इति
हारावली ॥
त्वत् त्रि भिन्नः इति जटाधरः ॥
भवतः तोमा हृइतेर् इतिभाषा
इतिव्याकरणं ॥
त्वंच उ इतो गतौ इति कवि
कल्पद्रुमः ॥
त्वंचउ अ संकोचे इतिकविकल्प
द्रुमः त्वदीये त्रि भवदीये इति
व्याकरणं त्वर ञि षउ म वेगे इ
ति कविकल्पद्रुमः ॥
त्वरणं क्ली त्वरा इतिव्याकरणं त्व
रा स्त्री वेगः तत्पर्य्यायः ॥
सम्भ्रमः २ इत्यमरः आवेगः ३
त्वरिः ४ तूर्णिः ५ संवेगः ६ इति
हेमचंद्रः आविष्टः इत्यमरटी
कायांस्वामी ॥

त्वरिः स्त्री त्वरा इतिहेमचंद्रः ॥
त्वरितं क्ली शीघ्रं तद्विशिष्टे त्रि
इत्यमरः ॥
त्वरितोदितं त्रि शीघ्रोच्चारितवचः
तत्पर्य्यायः निरस्तं २ इत्यमरः
त्वष्टः त्रि तनूकृतः चाँचा छो
ला इत्यादि भाषा तत्पर्य्यायः
तष्टः २ इत्यमरः ॥
त्वष्टा पुं आदित्यविशेषः विश्व
कर्मा इतिहेमचंद्रः वर्णसंकरजा
तिविशेष इत्यमरः अस्यपर्य्यायः
काष्ठतट् शोद्रे उत पतिष्य सूत्रधा
रशाह्वश्चतृ ॥
त्वरु ऊ कार्श्ये कृशाकरणे इति
यावत् इतिकविकल्पद्रुमः ॥
त्वरु त्वचायादे सम्वरणे । इति
कविकल्पद्रुमः ॥
त्वाक्प्रत्यक्षं क्ली स्पर्शज्ञानं द्र
व्यादेः स्पर्शी हाशी हारा बोध ः
यथा अथ ज्ञान मात्रे त्वङ्मनः
संयोगस्य यदि कारणत्वं तदा
रासन चाक्षुषादि काले त्वाच
प्रत्यक्षं स्यात् इति सिद्धान्त
मुक्तावली ॥
त्वाष्ट्रः पुं वृत्रासुरः इतित्रिका
ण्डशेषः ॥

त्वाष्ट्री स्त्री चित्रानक्षत्रं इति हेमचंद्रः संज्ञानामसूर्य्यपत्नी इति शब्दरत्नावली रथिका लघुरथः इति त्रिकाण्डशेषः ॥

त्विट् स्त्री शोभा प्रभा वाक् इति मेदिनी व्यवसायाः जिगीषा इति विश्वः ॥

त्विष ञ उ भासे अवपूर्वकोऽयं निवासे दाने दीप्तौ च इति कविकल्पद्रुमः ॥

त्विषा स्त्री दीप्ति इति शब्दरत्नावली त्विषाम्पतिः पुं सूर्य्यः इत्यमरः त्विषिः पुं किरणं इति हेमचंद्रः त्सर्वं छद्मगतौ इति कविकल्पद्रुमः त्सरुः पुं खड्गमुष्टिः इत्यमरः तत्पर्य्यायः मुष्टिः २ त्सालनलः ३ इति शब्दरत्नावली ॥

थ

थ थकारः सव्यंजन चतुर्द्दशा वर्णः तवर्गद्वितीयवर्णश्च अस्योच्चारणस्थानं दंतः इति व्याकरणं अस्य स्वरूपं यथा थकारं चंचलापांगि कुण्डली मोक्षरूपिणी त्रिशक्तिसहितं वर्णं त्रिबिंदुसहितं सदा पंचदेवमयं वर्णं पंच। प्राणात्मकं सदा अरुणादित्य संकाशं थकारं प्रणमाम्यहं इति कामधेनुतंत्रे अस्य लिखन प्रकारो यथा कुंचिता कुण्डली भूत्वा वामाद्दक्षिणतस्ततः वामतः कुंचिता भूत्वा दक्षाधो दक्षतो गता कुर्द्ध रज्जायता रेखा सदा गंगादयः क्रमात् वाणी भवानी लक्ष्मीश्च ध्यान मस्य प्रचक्षते ॥ इति वर्णोद्धारतंत्रं ॥

थं क्ली रक्षणं मंगलं साधुसं ॥ इति मेदिनी ॥

थः पुं पर्व्वतः भयरक्षकः इति मेदिनी व्याधिभेदः भयचिह्नं भक्षणं इति शब्दरत्नावली ॥

थुड प्रि संवृतौ इति कविकल्पद्रुमः थुत्कारः पुं निष्ठीवनत्यागानुकरणशब्दः ॥

थुर्व्व ई वधे इति कविकल्पद्रुमः थुथु टा निष्ठीवनत्यागानुकरणशब्दः यथा थुथुकृत्य वमन्निरधगजन्नेविति सूक्तिकर्णामृतं ॥ थैथै अ वाद्यानुकरणशब्दविशेषः इति संगीतदामोदरः ॥

थोडनं क्ली संवरणं इति थुड धातो र्भावे ल्युट्प्रत्ययः ॥

द दकारः स व्यंजन पंचदशवर्णः तवर्गतृतीय वर्णश्च अस्योच्चारणस्थानं दंतः इति व्याकरणं ॥ अस्य स्वरूपं यथा दकारं शृणु चार्व्वंगि चतुर्व्वर्गप्रदायकं पंच देवमयं वर्णं पंचप्राणमयं सदा त्रिशक्तिसहितं देवि त्रिबिंदुसहितं सदा आत्मादि तत्त्वसंयुक्तं स्वयं परमकुण्डली रक्त विद्युल्लताकारं दकारं हृदि भावय इति कामधेनुतंत्रं ॥

दं क्ली भार्य्या इत्येकाक्षरकोषः ॥

दः पुं अचलः दत्तः दाता इति मेदिनी खण्डनं इति शब्दरत्नावली

दंशः पुं कीटविशेषः दाँश इति भाषा तत्पर्य्यायः वनमक्षिका २ इत्यमरः गोमक्षिका ३ अरण्यमक्षिका ४ भम्भरालिका ५ इति शब्दरत्नावली पाम्पूरः ६ दंशकः ७ इति हारावली दुष्टमुखः ८ क्रूरः ९ क्षुद्रिका १० इति राजनिर्घण्टः धर्म्म दंशनं इति मेदिनी खण्डनं दोषः मर्म सर्पक्षतं इति विश्वः दन्तः इति हेमचंद्रः ॥

दंशकः पुं दंशः इति हारावली दंशनकर्त्तरि त्रि ॥

दंशनं क्ली वर्म्म दंतादिनाखण्डनं कामडान कलकटान इत्यादि भाषा इति हेमचंद्रः

दंशभीरुः पुं स्त्री महिषः इति त्रिकाण्डशेषः ॥

दंशमूलः पुं शिग्रुः इति राजनिर्घण्टः ॥

दंशितः त्रि वर्म्मितः दष्टः इति हेमचंद्रः ॥

दंशी स्त्री लघुदंशाः छोटदाँश इति भाषा इत्यमरः ॥

दंष्ट्रा स्त्री दंतविशेषः तत्पर्य्यायः दाढा इति हेमचंद्रः ॥

दंष्ट्रिका स्त्री दाढिका इति हेमचंद्रः

दंष्ट्री [illegible] शूकरः इत्यमरः ॥ सर्पः इति शब्दरत्नावली दंष्ट्राविशिष्टे त्रि यथा दंष्ट्रिभिःशृंगिभिर्व्वापि हता म्लेच्छैश्च तस्करैः येषामपर्थे हतायांति रजस्वगैन संशयः इति वह्निपुराणे अग्निपुराणं ॥

दकं क्ली जलं इति त्रिकाण्डशेषः

दक्षं क्ली करणं इति रत्नमाला

दग्धः त्रि भस्मीकृतः पोडा इति

भाषा तत्पर्य्यायः सृष्टः २ सृष्टः
३ उषितः ४ इत्यमरः येन्नाणामा
मिषं पणं गोर्वत्समामिषं द्वी
रं फलेऽन्नेवीरमामिषं आमिषं।
रक्तशाकं च सर्व्वं च दग्ध्यमामि
षं इति कर्म्मलोचनं ॥
दग्धकाकः पुं द्रोणकाक
इति हेमचंद्रः ॥
दग्धरथः पुं चित्ररथगंधर्व्वः
इति महाभारते ॥
दग्धरुहः पुं तिलकवृक्षः इ
ति राजनिर्घण्टः ॥
दग्धरुहा स्त्री दग्धावृक्षः इ
ति राजनिर्घण्टः ॥
दग्धा स्त्री स्थितार्को दिक् इति मे
दिनी वृक्षविशेषः ऊरुहृ इति।
ख्याता तत्पर्य्यायः दग्धरुहा २
दग्धिका ३ स्थलेरुहा ४ रोमशा
५ कर्कशादला ६ भस्मरोहा ७ स
दग्धिका ८ अस्या गुणाः कटुत्वं
कषायत्वं उष्णत्वं कफवात ना
शित्वं पित्तप्रकोपनत्वं मलवान्
त्तदीपनत्वं च इति राजनिर्घण्टः
मासदग्धा यथा सौरचैत्रपौष
योर्द्वितीया एवं ज्येष्ठफाल्गुन
योश्चतुर्थी वैशाखश्रावणयोःष
ष्ठी आषाढफाल्गुनयोरष्टमी भाद्राग्र
हायणयोर्दशमी कार्त्तिकमाघ
योर्द्वादशी अस्याः प्रमाणं यथा
द्वितीया मीनधनुषोश्चतुर्थी वृष
कुंभयोः मेषकर्कटयोः षष्ठी क
न्यामिथुनयोरष्टमी दशमी वृश्चि
के सिंहे द्वादशी मकरे तुला
एभिर्याता न जीवेत यदि शक्र स
मो भवेत् ॥ अस्याः प्रमाण
मपरं यथा वैशाखे शुक्ला ष
ष्ठी ज्येष्ठे कृष्णा चतुर्थी आषाढे
शुक्लाष्टमी श्रावणे कृष्णा षष्ठी
भाद्रे शुक्ला दशमी आश्विने कृ
ष्णाऽष्टमी कार्त्तिके शुक्ला द्वादशी अ
ग्रहायणे कृष्णा दशमी पौषे शुक्ला
द्वितीया माघे कृष्णा द्वादशी फाल्गु
ने शुक्ल चतुर्थी चैत्रे कृष्णा द्विती
या आसां प्रमाणं यथा मेषे दिने
शोत्ययुगे मृगेंद्रे एके धनुःस्थे क
लसे च शुक्ला कुलीरकन्यालिम
गास्य मीनवृषे च कृष्णास्तिथयः
प्रदग्धाः दिनदग्धा यथा रवि
वारे द्वादशी बुधे तृतीया बृह
स्पतौ षष्ठी शुक्रे पंचदशी शनौ
सप्तमी अस्याः प्रमाणं यथा
मासा रुद्रा दिशो ॥ ॥

रामाः षट्पत्तमनय स्तथा क्षयन्ते
तिथयः समस्तर्थ्यौघैः समसप्तभिः
इति ज्योतिःसारसंग्रहः ॥
दग्धिका स्त्री दग्धान्न पोडाभात
इति भाषा चाँचौं इति ख्याता इ
ति केचिदिति भरतः तत्पर्य्यायः
भिस्सटा २ इत्यमरः ॥
भिस्सिटा ३ भिष्मिटा ४ भिष्मि
टा ५ भिष्मिका ६ इति तट्टीका सार
सुंदरी दग्धावृक्षः इति राज
निर्घण्टः ॥
दग्धेष्टका स्त्री झामकं इतिहा
रावली ॥
दघ इ त्यागे अवने इति क
विकल्पद्रुमः ॥
दघ न घातने इति कविकल्पद्रुमः
दण्ड न क दण्डपाते इति कवि
कल्पद्रुमः ॥
दण्डः पुं क्ली लगुडः इत्यमरः त
त्पर्य्यायः सचत्रिविधः वधः अर्थग्र
हणं बंधन ताडनादिश्च इत्यमर
टीका सारसुंदरी तत्पर्य्यायः सा
हसं २ दमः ३ इत्यमरः ऊर्द्धस्थि
तिः ठाडान इति भाषा ॥
इति सारसुंदरी व्यूहभेदः प्र
काण्डः अश्वः कोणः मन्थानः
सैन्य कालः घडी इति भाषा
भाषा मानभेदः काठा इति
भाषा चण्डांशोः पारिपार्श्विकः
यमः अभिमानः इति मेदिनी
ग्रहभेदः इति हेमचंद्रः ॥
इक्ष्वाकुराजपुत्रः इति पुराणं ॥
कालभेद दण्डस्य प्रमाणं यथा
षट्पलं पात्रनिर्म्माणं गभीरं
चतुरंगुलं स्वर्णमाषैः कृतं छिद्रं
कुण्डैश्च चतुरंगुलैः यावज्जलस्
तं पात्रं तत्कालं दण्डमेव च ॥
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डं ॥
स्वधारण गुणाः सबलतः संप्रति
ष्ठानत्वं शत्रुनिषेधनत्वं अवष्टम्भ
नत्वं आयुष्यत्वं भयघ्नत्वं च इति राज
वल्लभः शरणागतरक्षणादि य
थापाशरणागतसत्त्वानां भूतानामप्य
हिंसनं बहिर्वेदि च यद्दानं दण्ड
स्तदभिधीयते इति मोक्षधर्म्मः ॥
ब्राह्मणं प्रति दण्डोद्यमे दण्डनि
पातने च दोषो यथा क्षिप्रदण्डो
द्यमे कृच्छ्रमतिकृच्छ्रं निपातने
इति प्रायश्चित्ततत्वं क्रोधस्या
देशे दण्ड यथा लोभान्मोहा
द्भयान्मैत्रात्कामात्क्रोधात्

स्थेयचा अज्ञानाद्बालभावाद्वा सा
दत्वं विनय मुच्यते यथा मनुनामे
स्यान्नेयः साहसमन्त्यमवदेत् तस्य
दण्डविशेषांस्तु प्रवक्ष्याम्यनुपूर्व
शः लोभात् सहस्रं दण्ड्यस्तु मोहा
त् पूर्वं तु साहसं भयाद्वौ मध्यमौ
दण्डौ मैत्रात् पूर्वं चतुर्गुणं ॥
कामाद्दशगुणं पूर्वं क्रोधात्तु
त्रिगुणं परं अज्ञानात् द्वे शते
पूर्णे बालिश्याच्छतमेवतु प
तानाहुः कोटसाद्ये प्रोक्तान् द
ण्डान्मनीषिभिः धर्म्मस्याव्यभि
चारार्थमधर्म्मनिधनाय च कोट
साक्ष्यं तु कुर्वाणान् त्रीन् वर्णान् धा
र्म्मिको नृपः प्रवासयेद्दण्डयित्वा ब्रा
ह्मणन्तु विवासयेत् दण्डस्य स्था
नानि यथा दशस्थानानि दण्ड
स्य मनुः स्वायम्भुवोऽब्रवीत् त्रिषु
वर्णेषु यानि स्युरक्षतो ब्राह्मणो
व्रजेत् उपस्थमुदरं जिह्वा हस्तौ
पादौ च पञ्चमं चक्षुर्नासा च कर्णौ
च धनं देहस्तथैव च अनुब
न्धं परिज्ञाय देशकालौ च त
त्त्वतः सारापराधौ चालोक्य दण्डं
दण्ड्येषु पातयेत् अविहितदण्डेषु
दोषो यथा अधर्म्मदण्डनं लोके
यशोघ्नं कीर्त्तिनाशनं अस्वर्ग्यं च प
रत्रापि तस्मात्तत् परिवर्जयेत् ॥
अदण्ड्यान् दण्डयन् राजा दण्ड्यांश्चै
वाप्यदण्डयन् अयशो महदाप्नो
ति नरकं चैव गच्छति ॥ ॥
दण्डस्य पौर्वापर्य्यनियमो यथा ॥
वाग्दण्डं प्रथमं कुर्य्यात् धिग्दण्डं
तदनन्तरं तृतीयं धनदण्डन्तु व
धदण्डमतः परं वधेनापि यदा त्वे
तान्निग्रहीतुं न शक्नुयात् ॥
तदैषु सर्वमप्येतत् प्रयुञ्जीत चतु
ष्टयं दण्डस्य भेदा यथा ॥
पणानां द्वे शते सार्द्धे प्रथमः सा
हसः स्मृतः मध्यमः पञ्च विज्ञेयः
सहस्रन्त्वेव चोत्तमः क्रमेण देयं।
प्रतिज्ञाते पञ्चकं शतम् इति
अपकृते तद्द्विगुणं तन्मनोरनुशा
सनं दोषविशिष्टकन्यादानेद
ण्डो यथा यस्तु दोषवतीं कन्या
मनाख्याय प्रयच्छति । तस्य
कुर्य्यान्नृपो दण्डं स्वयं षण्णव
तिं पणान् अकन्येति वदः क
न्यां दुष्याद्द्वेषेण मानवः स शतं प्रा
प्नुयाद्दण्डं तस्या दोषमदर्शयन्
गवादीनां शस्यभक्षणे शास्त्रे य
था परिदेशे परिहृते ॥ ॥

ग्रामान्तीयेऽथवा पुनः सपालः
दण्डार्हो विपालान् वारयेत् पशून्
क्षेत्रादि सीमा विवादे दण्डो
यथा क्षेत्रकूपतडागानामाराम
स्य गृहस्य च सामन्तप्रत्ययो ज्ञे
यः सीमासेतुविनिर्णयः साम
न्ताश्चेन्मृषा ब्रूयुः सेतौ विवदतां।
नृणां सर्वे पृथक् पृथग्दण्ड्या राज्ञा
मध्यमसाहसं गृहं तडागमारामं
क्षेत्रं वा भीषया हरन् शतानि पं
च दण्ड्यः स्यादज्ञानाद्द्विशतो दमः
वाक्पारुष्ये दण्डो यथा शतं
ब्राह्मणमाक्रुश्य क्षत्रियो दण्डमर्ह
ति वैश्योऽध्यर्द्धशतं द्वे वा शूद्रस्तु
वधमर्हति पञ्चाशद्ब्राह्मणो दण्ड्यः
क्षत्रियस्याभिशंसने वैश्ये स्याद
र्द्धपञ्चाशच्छूद्रे द्वादशको दमः
समवर्णे द्विजातीनां द्वादशैव व्य
तिक्रमे वादेष्ववचनीयेषु तदेव
द्विगुणं भवेत् एकजातिर्द्वि
जातींस्तु वाचा दारुणया क्षिपन्
जिह्वायाः प्राप्नुयाच्छेदं जघन्य
प्रभवो हि सः नामजातिग्रहं त्वेषा
मभिद्रोहेण कुर्वतः निःक्षेप्योऽ
योमयः शङ्कुर्ज्वलन्नास्ये दशाङ्गुलः
धर्मोपदेशं दर्पेण विप्राणामस्य ।
कुर्वतः तप्तमासेचयेत्तैलं वक्त्रे
श्रोत्रे च पार्थिवः श्रुतं देशं च जा
तिं च कर्म्म शारीरमेव च वितथे
न ब्रुवन् दर्पाद्दाप्यः स्याद्द्विशतं
दमं काणं वाप्यथवा खञ्जमन्य
म्वापि तथाविधं तथ्येनापि ब्रुव
न्दाप्यो दण्डं कार्षापणावरं मा
तरं पितरं जायां भ्रातरं तनयं गु
रुं आक्षारयन् शतं दाप्यः पन्था
नं चाददद्गुरोः ब्राह्मणक्षत्रिया
भ्यां तु दण्डः कार्य्यो विजानता ।
ब्राह्मणे साहसः पूर्वः क्षत्रिये त्वे
व मध्यमः विट्शूद्रयोरेवमेव
स्वजातिं प्रति तत्त्वतः छेदवर्जं प्रण
यणं दण्डस्येति विनिश्चयः ॥ द
ण्डपारुष्ये दण्डो यथा येन केन
चिदङ्गेन हिंस्याच्चेत् श्रेष्ठमन्त्य
जः छेत्तव्यं तत्तदेवास्य तन्मनो
रनुशासनं पाणिमुद्यम्य दण्डं
वा पाणिच्छेदनमर्हति पादेन
प्रहरन् कोपात् पादच्छेदनमर्ह
ति सहासनमभिप्रेप्सुरुत्कृष्ट
स्यापकृष्टजः कट्यां कृताङ्को निर्वा
स्यः स्फिचं वास्यावकर्त्तयेत् अव
निष्ठीवतो दर्पात् द्वावोष्ठौ छेदयेन्नृ
पः अवमूत्रयतो मेढ्रमवशर्द्धयतो

गुदे केशेषु शृङ्गे तौ हस्तौ छेदये
दविचारयन्। पादयोर्दाढिकायां
च ग्रीवायां वृषणेषु च। त्वग्भेदकः
शतं दण्ड्यो लोहितस्य च दर्शकः।
मांसभेत्ता तु षण्णिष्कान् प्रवास्यस्त्व
स्थिभेदकः। वनस्पतीनां सर्वेषामु
पभोगो यथा यथा तथा तथा द
मः कार्य्यो हिंसायामिति धारणा।
मनुष्याणां पशूनाञ्च दुःखाय
प्रहृते सति। यथा यथा महद्दुः
खं दण्डं कुर्य्यात्तथा तथा। अङ्गा
नां पीडनायाञ्च व्रणशोणितयो
स्तथा। समुत्थानव्ययं दाप्यः सर्व
दण्डमथापि वा। द्रव्याणि हिंस्याद्यो
यस्य ज्ञानतोऽज्ञानतोऽपि वा। स
तस्योत्पादयेत्तुष्टिं राज्ञे दद्याच्च
तत्समं। चर्म्मचार्म्मिकभाण्डेषु
काष्ठलोष्ट्रमयेषु च। मूल्यात् पञ्च
गुणो दण्डः पुष्पमूलफलेषु च।
यानस्य चैव यातुश्च यानस्वामि
न एव च। दशातिवर्त्तनान्याहुः
शेषे दण्डो विधीयते। छि
न्ननास्ये भग्नयुगे तिर्य्यक्प्र
तिमुखागते। अक्षभङ्गे च यान
स्य चक्रभङ्गे तथैव च। छेदने चैव यन्त्रा
णां योक्त्ररश्म्योस्तथैव च। आक्र
न्दे चाप्यपैहीति न दण्डं मनु

रब्रवीत्। यत्रापवर्त्तते युग्यं वैगुण्यात्
प्राजकस्य तु। तत्र स्वामी भवे
द्दण्ड्यो हिंसायां द्विशतं दमं। प्रा
जकश्चेद्भवेदाप्तः प्राजको दण्ड
मर्हति। युग्यस्थाः प्राजकेऽनाप्ते
सर्वे दण्ड्याः शतं शतं। स चेत्तु प
थि संरुद्धः पशुभिर्वा रथेन वा।
प्रमापयेत् प्राणभृतस्तत्र दण्डोऽ
विचारितः। मनुष्यमारणे क्षिप्रं
चौरवत् किल्बिषी भवेत्। प्राण
भृत्सु महत्स्वर्द्धं गोगजोष्ट्रहया
दिषु। क्षुद्रकाणां पशूनाञ्च हिंसा
यां द्विशतो दमः। पञ्चाशत्तु भवेद्द
ण्डः शुभेषु मृगपक्षिषु। गर्द्दभाजा
विकानाञ्च दण्डः स्यात् पञ्चमाष
कः। माषकस्तु भवेद्दण्डः श्वशूकर
निपातने। भार्य्या पुत्रश्च दासश्च
शिष्यो भ्राता च सोदरः। प्राप्तापराधा
स्ताड्याः स्यू रज्ज्वा वेणुदलेन वा॥
पृष्ठतस्तु शरीरस्य नोत्तमाङ्गे कथं
चन। अतोऽन्यथा तु प्रहरन् प्रा
प्तः स्याच्चौरकिल्बिषं ॥ ॥
चौरस्य दण्डविधिर्यथा। यस्तु रज्जुं
घटं कूपाद्धरेद्भिन्द्याच्च यः प्रपां।
स दण्डं प्राप्नुयान्माषं तच्च तस्मि
न् समाहरेत्। धान्यं दशभ्यः कुम्भे।

तोऽहरतोऽभ्यधिकं वधः। शेषेऽप्ये
कादशगुणं दाप्यस्तस्य च तद्धनं।
तथा धरिममेयानां शतादभ्यधि
के वधः। सुवर्णरजतादीनां
मुत्तमानाञ्च वाससां। पञ्चाशतस्त्व
भ्यधिके हस्तच्छेदनमिष्यते। शेषे
त्वेकादशगुणं मूल्याद्दण्डं प्रक
ल्पयेत्। पुरुषाणां कुलीनानां ना
रीणाञ्च विशेषतः। मुख्यानाञ्चैव
रत्नानां हरणे वधमर्हति। महा
पशूनां हरणे शस्त्राणामौषधस्य
च। कालमासाद्य कार्य्यञ्च राजा द
ण्डं प्रकल्पयेत्। गोषु ब्राह्मणसं
स्थासु छुरिकायाश्च भेदने पशू
नां हरणे चैव सद्यः कार्य्योऽर्द्ध
पादिकः। सूत्रकार्पासकिण्वानां
गोमयस्य गुडस्य च। दध्नः क्षीरस्य
तक्रस्य पानीयस्य तृणस्य च। वेणु
वैदलभाण्डानां लवणानां तथैव च।
मृण्मयानाञ्च हरणे मृदो भस्म
न एव च। मत्स्यानां पक्षिणाञ्चैव तै
लस्य च घृतस्य च। मांसस्य मधुन
श्चैव यच्चान्यत् पशुसम्भवं। अन्येषां
चैवमादीनां मद्यानामोदनस्य च।
पक्वान्नानाञ्च सर्वेषां तन्मूल्याद्द्विगु
णो दमः। पुष्पेषु हरिते धान्ये गुल्मवल्ली

नगेषु च। अन्येष्वपरिपूतेषु दण्डः
स्यात् पञ्च कृष्णलः। परिपूतेषु
धान्येषु शाकमूलफलेषु च॥
निरन्वये शतं दण्डः सान्वयेऽर्द्ध
शतं दमः। स्यात् साहसं त्वन्वयव
त् प्रसभं कर्म्म यत् कृतं। निरन्व
यं भवेत् स्तेयं हृत्वापव्ययते च य
त्। यस्त्वेतान्युपक्लृप्तानि द्रव्याणि
स्तेनयेन्नरः। तमाद्यं दण्डयेद्राजा
यश्चाग्निं चोरयेद्गृहात्। येन येन य
थाङ्गेन स्तेनो नृषु विचेष्टते। तत्त
देव हरेत्तस्य प्रत्यादेशाय पार्थि
वः। परदाराहरणे दण्डो यथा।
परदाराभिमर्शेषु प्रवृत्तान्नॄन्
महीपतिः। उद्वेजनकरैर्दण्डै
श्छिन्नयित्वा प्रवासयेत्। परस्य
पत्न्या पुरुषः सम्भाषां योजयन्
रहः। पूर्वमाक्षारितो दोषैः प्रा
प्नुयात् पूर्वसाहसं। परस्त्रियं यो
ऽभिवदेत् तीर्थेऽरण्ये वनेऽपि वा।
नदीनामपि सम्भेदे स सङ्ग्रहण
माप्नुयात्। उपचारक्रिया केलिः
स्पर्शो भूषणवाससां। सह ख
ट्वासनञ्चैव सर्वं सङ्ग्रहणं तथा।
स्त्रियं स्पृशेददेशे यः स्पृष्टो वा
मर्षयेत्तया। परस्परस्यानुमते

सर्व्वसंग्रहणं स्मृतं अब्राह्मणः संग्रहणे प्राणान्तं दण्डमर्हति न सम्भाषां परस्त्रीभिः प्रतिषिद्धः समाचरेत् निषिद्धो भाषमाणस्तु सुवर्णं दण्डमर्हति नैष चारणदारेषु विधिर्नात्मोपजीविषु सज्जयन्ति हि ते नारीर्निगूढाश्चारयन्ति च किंचिदेव तु दाप्यः स्यात् सम्भाषां ताभिराचरन् योऽकामां दूषयेत् कन्यां स सद्यो वधमर्हति सकामां दूषयंस्तुल्यो न वधं प्राप्नुयान्नरः कन्यां भजन्तीमुत्कृष्टं न किंचिदपि दापयेत् जघन्यं सेवमानान्तु संयतां वासयेद्गृहे उत्तमां सेवमानस्तु जघन्यो वधमर्हति शुल्कं दद्यात् सेवमानः समामिच्छेत् पिता यदि अभिसह्य तु यः कन्यां कुर्य्याद्दर्पेण मानवः तस्याशु कर्त्तेदङ्गुल्यौ दण्डं चार्हति षट्शतं सकामां दूषयंस्तुल्यो नाङ्गुलिच्छेदमाप्नुयात् द्विशतन्तु दमं दाप्यः। प्रसङ्गविनिवृत्तये कन्यैव कन्यां या कुर्य्यात् तस्याः स्याद्द्विशतो दमः शुल्कञ्च द्विगुणं दद्याच्छिफाश्चैवाप्नुयाद्दश या तु कन्यां प्रकुर्य्यात् स्त्री सा सद्यो मौण्ड्यमर्हति अंगुल्योरेव वा छेदं खरेणोद्वहनं तथा भर्त्तारं लङ्घयेद्या तु स्त्री ज्ञातिगुणदर्पिता तां श्वभिः खादयेद्राजा संस्थाने बहुसंस्थिते पुमांसं दाहयेत् पापं शयने तप्त आयसे अभ्यादध्युश्च काष्ठानि तत्र दह्येत पापकृत् संवत्सराभिशस्तस्य दुष्टस्य द्विगुणो दमः व्रात्यया सह संवासे चाण्डाल्या तावदेव तु शूद्रो गुप्तमगुप्तं वा द्वैजातं वर्णमावसन् अगुप्तमङ्गसर्व्वस्वैर्गुप्तं सर्व्वेण हीयते वैश्यः सर्व्वस्वदण्डः स्यात् संवत्सरनिरोधतः सहस्रं क्षत्त्रियो दण्ड्यो मौण्ड्यं मूत्रेण चार्हति ब्राह्मणीं यद्यगुप्तान्तु गच्छेतां वैश्यपार्थिवौ वैश्यं पञ्चशतं कुर्य्यात् क्षत्त्रियं तु सहस्रिणं उभावपि तु तावेव ब्राह्मण्या गुप्तया सह विप्लुतौ शूद्रवद्दण्ड्यौ दग्धव्यौ वा कटाग्निना सहस्रं ब्राह्मणो दण्ड्यो गुप्तां विप्रां बलाद्व्रजन् शतानि पञ्च दण्ड्यः स्यादिच्छन्त्या सह सङ्गतः मौण्ड्यं प्राणान्तिको दण्डो ब्राह्मणस्य विधीयते इतरेषान्तु वर्णानां दण्डः प्राणान्तिको भवेत् वैश्यश्चेत् क्षत्त्रियां गुप्तां

वैश्यां वा क्षत्त्रियो व्रजेत् यो ब्राह्मण्यामगुप्तायां तावुभौ दण्डमर्हतः सहस्रं ब्राह्मणो दण्डं दाप्यो गुप्ते तु ते व्रजन् शूद्रायां क्षत्त्रियविशोः साहस्रो वै भवेद्दमः क्षत्त्रियायामगुप्तायां वैश्ये पञ्च शतं दमः मूत्रेण मौण्ड्यमिच्छेत्तु क्षत्त्रियो दण्डमेव वा अगुप्ते क्षत्त्रियावैश्ये शूद्रां वा ब्राह्मणो व्रजन् शतानि पञ्च दण्ड्यः स्यात् सहस्रन्त्वन्त्यजस्त्रियं ऋत्विजं यस्त्यजेद्याज्यो याज्यं चर्त्विक् त्यजेद्यदि शक्तं कर्म्मण्यदुष्टञ्च तयोर्दण्डः शतं शतं न माता न पिता न स्त्री न पुत्त्रस्त्यागमर्हति त्यजन्नपतितानेतान् राज्ञा दण्ड्यः शतानि षट् इति मनुः दण्डस्य फलं यथा दण्डः संरक्षते धर्म्मं तथैवार्थं विधानतः कामं संरक्षते यस्मात् त्रिवर्गो दण्ड उच्यते राजदण्डभयाल्लोकाः पापाः पापं न कुर्व्वते यमदण्डभयादेके परलोकभयात्तथा दण्डश्चेन्न भवेल्लोके विभजन् साध्वसाधुनी शूले मत्स्यानिवापक्ष्यन् दुर्ब्बलान् बलवत्तराः अपराधेषु भूपालो दण्डं कुर्य्याद्यथाविधि मात्स्ये ॥ करणं तस्मात् राजा भवति किल्बिषी विरुद्धमपि जल्पन्तो हन्ता दण्ड्या न भूभृता हन्त हन्ता तु नरकमाविशेत् सचिवैः सह विपक्षवचनाद्यो भृत्याद्दण्डनवान्हि ति विपक्षवचनाद्दण्डः स्वामिनं नरकं नयेत् इति युक्तिकल्पतरुः ॥

दण्डकः पुं क्ली श्लोकविशेषः छन्दोभेदः इत्यमरटीकासारसुन्दरी प्रस्तावे विवरणं छन्दःशब्दे द्रष्टव्यं

दण्डकन्दकः पुं धरणीकन्दः इति राजनिर्घण्टः ॥

दण्डका स्त्री जनस्थानं दण्डकारण्यं इति जटाधरः ॥

दण्डकाकः पुं द्रोणकाकः इति हेमचन्द्रः ॥

दण्डढक्का स्त्री वाद्यविशेषः दामामा इति नागरा इति च भाषा तत्पर्य्यायः नाली १ घटी २ यामनाली ३ यमढक्का ४ यामघोषः ५ त्रिकालघोषः ६ दम्मनः ७ कुन्दुभिः ८ कुंकुः ९ गम्भीरिका १० इति शब्दरत्नावली ॥

दण्डनाम्नी स्त्री नाम्नीवाद्यं इति शब्दरत्नावली ॥

दण्डधरः पुं यमः इत्यमरः ॥ राजा ॥

इति जटाधरः लगुडधारके त्रि ॥ दण्डधारः पुं यमीनाथः प्रेताधिपः इति मेदिनी दण्डधरे त्रि ॥ दण्डनायकः पुं सेनानीः सचक्र दण्डवल्लाध्यक्षः इति हेमचन्द्रः ॥ दण्डनीतिः स्त्री अर्थशास्त्रं इत्यमरः तत्तु चाणक्यादि प्रणीतं नीतिशास्त्रं इति भरतः तस्याः स्वपत्ति र्यथा दण्डेन नीयते चेदं दण्डं नयति वा पुनः दण्डनीतिरिति ख्याता त्रीं लोकानभिवर्त्तते तच्च ब्रह्मकृत शास्त्र सहस्राध्याय परिमितं तद्यथा ततोऽध्यायसहस्राणां शतं चक्रे स्वबुद्धिजं यत्र धर्मस्तथैवार्थः कामश्चैवाभिवर्णितः त्रिवर्ग इति विख्यातो गणएष स्वयंभुवा चतुर्थो मोक्ष इत्येव पृथगर्थः पृथग्गुणः मोक्षस्यापि त्रिवर्गोऽन्यः प्रोक्तः सत्वं रजस्तमः स्थानं वृद्धिः क्षयश्चैव त्रिवर्गश्चैव दण्डजः आत्मा देशश्च कालश्चाप्युपायाः कार्य्यमेव च सहायाः कारणं चैव षड्वर्गो नीतिजः स्मृतः त्रयी चान्वीक्षिकी चैव वार्त्ता च भरतर्षभ दण्डनीतिश्च विपुला विद्यास्तत्र निदर्शिताः

अमात्यरक्षा प्रणिधी राजपुत्ररक्षणं तथा चारश्च विविधोपायः प्रणिधेयः पृथग्विधः साम भेदः प्रदानं च ततो दण्डश्च पार्थिव उपेक्षा पञ्चमी चात्र कार्त्स्न्येन नरसत्तम मन्त्रश्च वर्णितः कृत्स्नस्तथा भेदार्थ एव च विभ्रमश्चैव मन्त्रस्य सिद्ध्यसिद्ध्योश्च यत्फलं सन्धिश्च विविधाभिख्योहीनो मध्यस्तथोत्तमः भयसत्कार वित्ताख्यं कार्त्स्न्येन परिवर्णितं यात्राकालाश्च चत्वारस्त्रिवर्गस्य च विस्तरः विजयो धर्म्मयुक्तश्च तथार्थविजयश्च ह आसुरश्चैव विजयस्तथा कार्त्स्न्येन वर्णितः लक्षणं पञ्चवर्गस्य त्रिविधश्चात्र वर्णितं प्रकाशश्चाप्रकाशश्च दण्डोऽथ परिशब्दितः प्रकाशोऽष्टविधस्तत्र गुह्यस्तु बहुविस्तरः रथा नागा हयाश्चैव पादाताश्चैव पाण्डव विष्टिर्नावश्चराश्चैव देशिका इति चाष्टमं ॥ अङ्गान्येतानि कौरव्य प्रकाशानि बलस्य च जङ्गमाजङ्गमाश्चोक्ताश्चूर्णयोगा विषादयः स्पर्शे चाभ्यवहार्य्ये चाप्युपांशुस्त्रिविधः

स्मृतः अरि र्मित्र मुदासीन इत्येतेप्यनुवर्णिताः कृत्स्ना मार्ग गुणाश्चैव तथा भूमिगुणाश्च ह आत्मरक्षणमाश्वासः स्पशानां चान्ववेक्षणं कल्पना विविधाश्चापि नरनागरथवाजिनां व्यूहाश्च विविधाभिख्या विचित्रं युद्धकौशलं। उत्पाताश्च निपाताश्च सुयुद्धं सुपलायनं शस्त्राणां पालनं ज्ञानं तथैव भरतर्षभ बलव्यसन निर्मुक्तं तथैव बल हर्षणं पीडा चापत्कालश्च पत्तिज्ञानं च पाण्डव तथा खात विधानं च ॥ योगसंचार एवच चौरैराटविकैश्चौग्रैः परराष्ट्रस्य पीडनं अग्निदैरसदैश्चैव प्रतिरूपकचारकैः श्रेणिमुख्योपजापेन वीरुधच्छेदनेन च दूषणेन च नागानां मांसांकालननेनेन च आराधनेन भक्तस्य प्रत्ययोपार्जनेन च आ[illegible] सप्तांगस्य च राज्यस्य ह्रास वृद्धी समंजसं दूत सामर्थ्य योगाश्च राष्ट्रस्य च विवर्द्धनं अरिमध्यस्थ मित्राणां सम्यक् प्रोक्तं प्रपंचनं तथा मर्द्दः प्रतीघातस्तथैव च बलीयसां व्यवहारः सूक्ष्मश्च तथा कण्टक

शोधने श्रमो व्यायाम योगश्च त्यागो द्रव्यस्य संग्रहः अभृतानां च भरणं भृतानां चान्ववेक्षणं अर्थस्य काले दानं च व्यसने चाप्रसङ्गिता तथा राजगुणाश्चैव सेनापति गुणाश्च ह कारणं च त्रिवर्गस्य गुणदोषा स्तथैव च दुष्टेङ्गितं च विविधं वृत्तिश्चैवानुजीविनां शङ्कितत्वं च सर्व्वस्य प्रमादस्य च वर्जनं अलब्धलाभो लब्धस्य तथैव च विवर्द्धनं प्रदानं च विवृद्धस्य पात्रेभ्यो विधिवत्तदा विसर्गो अर्थस्य धर्मार्थकामहेतुकमुच्यते चतुर्थं व्यसनाघातेन तथैवाचानवर्णितं क्रोधजानि तथोग्राणि कामजानि तथैवच दशोक्तानि कौरव्य व्यसनान्यत्र चैव ह मृगयाक्षास्तथापानं स्त्रियश्च भरतर्षभ कामजान्याहुराचार्य्याः प्रोक्तानीह स्वयंभुवा वाक्पारुष्यं तथोग्रत्वं दण्डपारुष्यमेव च । निग्रहो ह्यात्मनस्त्यागो अर्थदूषणमेव च यन्त्राणि विविधान्येव क्रियास्तेषां च वर्णिताः अवमर्दः प्रतीघातः केतनानां च भंजनं चैत्यद्रुमावमर्दश्च रोधः कर्मान्त

नाशनः उपस्कारोथ वसनं त
थोपायाश्च वर्णिताः पणवानक
शंखानां भेरीणांच युधिष्ठिर ॥
उपार्जनंच द्रव्याणां परिमर्द्दश्च
तानि षट् लवस्यच प्रशमनं
सतांचैवाभिपूजनं विद्वद्भिरे ।
कीभावश्च दानहोमविधिस्तथा
मंगलालभनंचैव शरीरस्यप्र
तिक्रिया आहार योजनंचैवनि
त्य मांगलिका मेवच एकेन च
पथोस्यैयंसत्यत्वं मधुराणिरः
उत्सवानां समाजानां क्रियाः ।
केतनज्ञानस्तथा प्रत्यक्षाश्चपरो
काश्च सर्वाधिकरणेष्वथ वृत्ति
र्भक्तशाहजनित्यचैवान्ववेक्षणं
प्रदण्डत्वं च विप्राणां युक्त्या दण्ड
निपातनं अनुजीविस्वजातिभ्योगु
णेभ्यश्च समुद्भवः रक्षणंचैवपौ
राणां राष्ट्रस्य च विवर्द्धनं ॥ म
ण्डलस्यांच या चिंता राजन्द्वा
दशराजिका द्वासप्तति विधा चै
वशरीरस्यप्रतिक्रिया देशजाति
कुलानांच धर्माः समन्तः वर्णि ।
ताः धर्मश्चार्थश्चकामश्चमोक्षश्चा
नुवर्णितः उपायश्चार्थलिप्साच
विविधा भूरिदक्षिण मूलकर्म
क्रियाचात्र माया योगश्च वर्णि
तः दूषणं स्रोतसांचैव वर्णि
तंचास्थिराम्भसां यैर्यैरुपायै
र्लोकस्तु न चलेदार्य्यवर्त्मनः
तत्सर्वं राजशार्दूल नीतिशास्त्रे
षु वर्णितं एतत् कृत्वा शुभं शा
स्त्रं ततः स भगवान् प्रभुः देवानु
वाच संहृष्टः सर्वान् शक्रपुरोग
मान् उपकाराय लोकस्य त्रिवर्ग
स्थापनाय च नवनीतं सरस्वत्या
बुद्धिरेषा प्रभाविता दण्डेन सहिता
ह्येषा लोक रक्षण कारिका नि
ग्रहानुग्रह रता लोकाननुचरिष्य
ति इति महाभारते राजधर्मः ॥

दण्डपांशुलः पुं द्वारपालः इति
शब्दरत्नावली ॥

दण्डपाणिः पुं यमः काशीस्थ
शिवगणविशेषः स पूर्णभद्रय
क्षपुत्रः हरिकेशनामाशिवमा
राध्यशिववरेण काश्यां दण्डना
यकत्वमवाप्तवान् यथा भक्तस
धीरस्यतपोनिधे ईदृशो हरो वरा
णां निकरं तदा मुदा लोकस्य य
क्षास्य ममप्रियस्य नो भवाधुना दण्ड
धरो वरान्मम स्थिरस्त्वमद्यादि दु
ष्टानां दण्डकः सुपालकः पुण्यकृतांच

मत्प्रियः त्वं दण्डपाणिर्भवना
मतोऽधुनासर्वान् गणान्शाधिम
मास्त्वयोत् कटान् त्वत्सात् कृत
क्षेत्रवेऽद्य महाराष्ट्र काश्यामना
गाद्यसमुक्तिभाजनः सभाजनं
प्रागतएव तेचरेत् ततः समर्हां
मम भक्ताश्चारणान् मद्भक्तियुक्तो
पि विना त्वदीयां भक्तिं नकाशी
वसतिं लभते गणेषु देवेषु हि
मानदेषु जन्यमान्योभव दण्डपा
णे इति काशीखण्डं ॥

दण्डपारुष्यं क्ली ताडनमवास
नाशीतव्यसनविशेषः इतिहेम
चंद्रः अष्टादशविवादान्तर्गतविवा
दविशेषः मल्लताडनादि इतिम
नुटीकायां कुल्लूकभट्टः ॥

दण्डपालः पुं मद्गुशाकरमत्स्या
दौडिका इति भाषा इति हारा व
ली द्वारपालः ॥

दण्डपालकः पुं शडालमत्स्यः
इति हारावली ॥

दण्डभृत् पुं कुंभकारः इति
त्रिकाण्डशेषः दण्डधारकेत्रि

दण्डयात्रा स्त्री दिग्विजयः सयाने
वरयात्रा इति मेति मेदिनी ॥

दण्डयामः पुं यमः दिने अगस्त्यः
इतिमेदिनी ॥

दण्डरी स्त्री उडुरीफलं इति रा
जनिर्घण्टः ॥

दण्डवादी न पुं दर्वटः द्वारपालः
इतिहारावली दण्डवक्त्रिर्त्रि द

ण्डवालधिः पुं हस्ती इतिशब्द
रत्नावली ॥

दण्डवासी पुं द्वारपालः इतित्रि
काण्डशेषः एकग्रामाधिकृतज
नः इतिजटाधरः ॥

दण्डविष्कंभः पुं यत्र स्तंभादौ आ
कर्षणार्थं रज्वा दण्डो निबध्यते सः
चोलमण्डयारखुंटी इति भाषा त
त्पर्यायः कुठरः इत्यमरः ॥

दण्डवृत्तकः पुं स्नुही इति रा
जनिर्घण्टः ॥

दण्डहस्तं क्ली तगरपुष्पं इति
राजनिर्घण्टः ॥

दण्डाजिनं क्ली शाठ्यं इति शब्दा
र्थकल्पतरुः ॥

दण्डादण्डि अव्य दण्डैश्चदण्डैश्चप्र
हृत्य युद्धं प्रवृत्तं लाठालाठि इति
भाषा इति व्याकरणं ॥

दण्डारः पुं वाहन मत्तहस्ती शा
रयंत्रकं कुम्भकारस्यचक्रं इति
मेदिनी ॥ ॥

दण्डाहतं क्ली घोलं इत्यमरः ॥

दण्डिकः पुं दण्डधारकः छडिवरदार इति आसावरदार इति च भाषा मत्स्यविशेषः डानिकणा माच इति भाषा अस्य गुणाः कफवातपित्तनाशित्वं तिक्तत्वं लघुत्वं च इति राजवल्लभः ॥

दण्डिका स्त्री हारविशेषः इति जटाधरः रज्जुः यथा अंगुल्यात् कर्षं दण्डिकां छिन्नंति इति। सुपद्मव्याकरणे दण्डिका रज्ज्विति तट्टीकाकारः ॥

दण्डितः त्रि कृतदण्डः तत्पर्यायः दापितः २ साधितः ३ इति हेमचंद्रः ॥

दण्डी पुं जिनविशेषः इति त्रिकाण्डशेषः दमनकवृक्षः इति राजनिर्घण्टः यमः द्वाःस्थः दंडयुक्तेऽपि इति हेमचंद्रः चतुर्थाश्रमी यथा जाते जगति वाल्मीके कविरित्यभिधीयते कवी इति ततो व्यासे कवयस्त्वयि दण्डिनि इति कालिदासः ॥

दण्डोत्पलं क्ली वृक्षविशेषः डानिपोला इति डानकुनि इति च भाषा अस्य गुणाः तयश्वास कासनाशित्वं अग्निदीपनत्वं च इति राजवल्लभः तत्पीतरक्तश्वेतपुष्पभेदेन त्रिविधं पीतस्य पर्यायः गोवंदनी २ गंधवल्ली ३ सहदेवी ४ सहा ५ रक्तस्य पर्यायः विश्वदेवा १ श्वेतस्य दण्डोत्पला स्त्री श्वेतपुष्पदण्डोत्पलं इति रत्नमाला ॥

दण्ड्यः त्रि दण्डनीयः दण्डितव्यः तत्पर्यायः दण्डार्हः २ इति जटाधरः ॥

दत् पुं दन्तः इति शब्दचंद्रिका असवकुवचने दतः ॥

दत्तं त्रि दत्तितं कृतदाने तत्पर्यायः विसृष्टं २ इति त्रिकाण्डशेषः दिश्राणितं ३ इति शब्दरत्नावली दाने क्ली तत्सम्विधिर्यथा दत्तं सप्तविधं प्रोक्तमदत्तं षोडशात्मकं पण्यमूल्यं भृतिस्तुष्ट्या स्नेहात् प्रत्युपकारतः स्त्री शुल्कानुग्रहार्थं च दत्तं दानविदो विदुः अदत्तं तु भयक्रोधशोकावेगरुगान्वितैः तथोत्कोचपरीहासव्यत्यासछलयोगतः ॥ बालमूढास्वतंत्रार्त्तमत्तोन्मत्तोपवर्जितं कर्त्ता ममेदं कर्म्मेति । प्रतिलाभेच्छया च यत् अपात्रे पात्रमित्युक्ते कार्य्ये चाधर्मसंहिते यद्दत्तं स्यादविज्ञानात् तद्दत्तमिति निश्चितं इति मिताक्षरा ॥

दत्तः पुं राजविशेषः स्वप्नि सिंहनेदत्तः इति हेमचंद्रः ॥ वैश्यस्योपाधिविशेषः यथा शर्म्मा देवश्च विप्रस्य वर्म्मा त्राता च भूभुजः भूतिर्दत्तश्च वैश्यस्य दासः शूद्रस्य कारयेत् इत्युद्वाहतत्वे अधुना कायस्थादेरुपाधिश्च भगवदवतारविशेषः स अत्रिपुत्रः दत्तात्रेयेति नाम्ना ख्यातः इति श्रीभागवतं ॥

दत्तकपुत्रः पुं द्वादशविधपुत्रान्तर्गतपुत्रविशेषः यथा दद्यान्माता पिता वा यं स पुत्रो दत्तको भवेत् इति याज्ञवल्क्यः तस्य विवरणं स्यात्कारो यथा शुक्रशोणितसंभवः पुत्रो मातापितृनिमित्तकः तस्य प्रदानविक्रयत्यागेषु मातापितरौ प्रभवतः नत्वेकं पुत्रं दद्यात् प्रतिगृह्णीयाद्वा स हि संतानाय पूर्वेषां स्त्री पुत्रं न दद्यात् प्रतिगृह्णीयाद्वा अन्यत्रानुज्ञानाद्भर्त्तुः पुत्रं ॥ प्रतिग्रहीष्यन् बन्धूनाहूय राजनि निवेद्य निवेशनस्य मध्ये व्याहृतिभिर्हुत्वा प्रतिगृह्णीयादिति । इति वशिष्ठः तस्य गोत्रं यत्र माप्ति यथा गोत्ररिक्थे जनयितुर्न हरेद्दत्रिमः सुतः गोत्ररिक्थानुगः पिण्डो व्यपैति ददतः स्वधा ॥ पितुर्गोत्रेण यः पुत्रः संस्कृतः पृथिवीपते आचूडान्तं न पुत्रः स पुत्रतां याति चान्यतः चूडाद्या यदि संस्कारा निजगोत्रेण वै कृताः दत्ताद्यास्तनयास्ते स्युरन्यथा दास उच्यते ऊर्द्ध्वन्तु पंचमाद्वर्षान्न दत्ताद्याः सुता न्रप गृहीत्वा पंचवर्षीयं पुत्रेष्टिं प्रथमं चरेत् ॥ इत्युद्वाहतत्वे दत्तको द्विविधः केवलदत्तकः द्व्यामुष्यायणदत्तकश्च केवलदत्तको जनकेन प्रतिग्रहीत्र्यैव दत्तः तस्यैव पुत्रः द्व्यामुष्यायणस्तु जनकप्रतिग्रहीतृभ्यामावयोरयमिति संप्रतिपन्नः स उभयोरपि पुत्रः इति मिताक्षरा ॥

दत्तप्रदानिकं क्ली अष्टादशविवादपदान्तर्गतविवादपदविशेषः दत्तस्य पुनराहरणं यस्मिन्

विवादपदे तत्र यथा नारदः दत्वा द्र
व्यमसम्यग्यः पुनरादातुमिच्छति
दत्ताप्रदानिकं नाम व्यवहारपदं हि
तत्‌ असम्यग्विहितमार्गेण इ
ति मिताक्षरा ॥
दत्तात्मा न पुं पुत्रविशेषः यथा ।
दत्तात्मा तु स्वयं दत्तः इति कात्याय
नः अस्य विवरणं दत्तात्मा तु पु
त्रो यो मातापितृविहीनस्ताभ्यां
त्यक्तो वा तवाहं पुत्रो भवामीति
स्वयं दत्त उपनीतः इति मि
ताक्षरा ॥ ॥
दत्तानपकर्म्म न क्ली दत्ताप्रदानि
कं इति मनुः ॥
दत्तिः स्त्री दानं इति शब्दरत्नाव
ली दत्तेयः पुं इंद्रः इति त्रिकाण्ड
शेषः ॥
दद ङ. दाने धृतौ इति कवि
कल्पद्रुमः ॥
ददनं क्ली दानं इति शब्दरत्ना
वली ॥
दद्रुः पुं रोगविशेषः दाद इ
ति भाषा तस्य नामान्तराणि द
द्रुः २ दद्रुः ३ दर्द्रुः ४ इति भरत
धृतशब्दभेदाः तस्य लक्षणं यथा
सकण्डू रागपिडकं दद्रुमण्डल
मुद्गतं इति माधवकरः तस्य चि
कित्सा यथा कुष्ठक्रिमिघ्नोद
द्रुघ्नो निशासैन्धवसर्षपाः अम्ल
पिष्टाः प्रलेपोऽयं दद्रुकुष्ठनिसू
दनः दूर्वाभया सैन्धवचक्रमर्द्द
कुठेरकाः काञ्जिकतक्रपिष्टाः त्रिभिः
प्रलेपैरपि वद्धमूलं दद्रुं च कुष्ठं
च विनाशयंति इति भावप्रका
शः कच्छुयः इति संक्षिप्तसारे
उणादि वृत्तिः ॥
दद्रुकः पुं दद्रुरोगः इति शब्द
रत्नावली ॥
दद्रुघ्नः पुं चक्रमर्द्दकः इत्यमरः
दद्रुणः त्रि दद्रुरोगी इत्यमरः
दद्रुनाशिनी स्त्री सैल्लिनीकीटः
इति राजनिर्घण्टः ॥
दद्रुरोगी न त्रि दद्रुरोगविशिष्टः
देडुया इति भाषा तत्पर्य्यायः ॥
दद्रुणः २ इत्यमरः ॥
दद्रूः पुं दद्रुः इत्यमरटीकायां ।
भरतः ॥
दद्रुघ्नः पुं दद्रुघ्नः इति शब्दरत्नाव
ली दद्रुणः त्रि दद्रुणः इत्यमरटी
कायां रमानाथः ॥
दध ङ. दाने धृतौ इति कविक
ल्पद्रुमः ॥

दधि क्ली श्रीवासः वसनं इति
शब्दरत्नावली क्षीरोत्तरावस्था
भावः दइ इति भाषा तत्पर्य्यायः
क्षीरजं २ मङ्गल्यं ३ विरलं ४
इति राजनिर्घण्टः पयस्यं ५ च
वेतरत्र दधि द्रप्सं इत्यमरः
अस्य गुणाः अम्लत्वं गुरुत्वं वा
तदोषशमनत्वं संग्राहित्वं मू
त्रावहत्वं वल्यत्वं शोफकफा
त्यरुच्यशमनत्वं वह्निशांतिका
रित्वं कासश्वासपीनसविषमज्वर
शीतज्वरहितत्वं रक्तोद्रेकशुक्र
वृद्धिकारित्वं च इति राजनिर्घण्टः
उष्णत्वं दीपनत्वं स्निग्धत्वं क
षायानुरसत्वं पाकेऽम्लत्वं पित्त
मेदः प्रदत्वं मूत्रकृच्छ्रप्रतिश्याय ।
यातीसारारुचिकार्श्येषु शस्तत्वं
च इति भावप्रकाशः स्वादुत्वं हृद्य
त्वं रोचनत्वं मंगल्यत्वं इति राजव
ल्लभः अथ पक्वदुग्धदधिगुणाः
रुच्यत्वं स्निग्धत्वं उत्तमगुणत्वं पि
त्तानिलापहत्वं सर्वधात्वग्निवलव
र्द्धनत्वं च निःसारदुग्धदधिगुणाः
संग्राहित्वं शीतलत्वं वातलत्वं ल
घुत्वं विष्टंभित्वं दीपनत्वं रुच्यत्वं ग्र
हणीरोगनाशित्वं च ॥ वह ॥
दधि गुणाः सुस्निग्धत्वं मधुरत्वं
नातिपित्तकरत्वं च शर्करासहि
त दधि गुणाः श्रेष्ठत्वं तृष्णापि
त्तास्रदाहनाशित्वं च गुडयुक्त ।
दधि गुणाः वातनाशित्वं वृष्य
त्वं वृंहणत्वं तर्पणत्वं गुरुत्वं च
इति भावप्रकाशः वातजतृष्णा
नाशित्वं इति चक्रदत्तः रात्रौ द
धि सेवने विशेषो यथा रात्रौ
दधि न भुंजीत किंतु सघृतशर्करं
समुद्गसूपसहितं क्षौद्रं उष्णसामलकं
भुंजीत रक्तपित्तकफोत्थेषु वि
कारेषु च अंवुहूनाग्निनमपि दधि
न हितं अत्र विशेषे विधिनि
षेधौ हेमन्तशिशिरवर्षासु द
धि शस्तं शरद्ग्रीष्मवसंतेषु प्रा
यशो विगर्हितं अविधिना दधि
सेवने दोषः ज्वरासृक्पित्तवीस
र्पकुष्ठपाण्डुभ्रमकामलारोगा प्र
सिः अथ गोदधिगुणाः विशेष
स्वादुत्वं वल्यत्वं रुचिप्रदत्वं प
वित्रत्वं दीपनत्वं स्निग्धत्वं पुष्टि
कारित्वं वायुनाशित्वं अशेषद
धिमध्ये गुणाधिकत्वं च माहिष
दधिगुणाः सुस्निग्धत्वं श्लेष्मल
त्वं वातपित्तनाशित्वं स्वादुपाकित्व

अभिष्यन्दित्वं गुरुत्वं रक्तकफदूष
णत्वंच ॥ छागीदधिगुणाः उत्तमत्वं
ग्राहित्वं त्रिदोषनाशित्वं श्वासका
सार्शःक्षयकार्श्येषु शस्तत्वं दीप
नत्वंच इति भावप्रकाशः ॥ आविक
दधिगुणाः उन्नामकफवातपित्त
कोपनत्वं ॥ अश्वीदधिगुणाः वात
नाशित्वं दीपनत्वं चक्षुर्हितत्वंच
ऊष्ट्रक दधिगुणाः क्षारत्वं अ
म्लत्वं कटुपाकित्वंच ॥ हा
स्तिनी दधिगुणाः वीर्य्याल्पत्वं क
षायत्वं कफवातनाशित्वंच मा
नुष्यदधिगुणाः मधुरत्वं बलत्वं
स्निग्धत्वं सन्तर्पणत्वंच इतिरा
जवल्लभः ॥ अथ दधिभेदाः आ
दौ मन्दं ततः स्वादु स्वाद्वम्लंच
ततः परं अम्लंचतत् पञ्चमं त्वम्ल
पंचमंदधिपंचधा मन्दादीनां लक्ष
णानि गुणाश्च मन्दं तु अव्यक्तर
सं किंचिद्घनं भवेत् मन्दं स्या
त् स्रष्टविण्मूत्रं दोषत्रयविदा
हकृत् यत् सम्यक् घनतां यातं
व्यक्तस्वादुरसं भवेत् स्वाद्वम्ल
स्य गुणाः ज्ञेयाः सामान्य दधिव
ज्जनैः यत्तिरोहित माधुर्य्यं व्यक्ता
म्लंतत्तदम्लकं अम्लंतद्दीपनं पित्तरक्त
श्लेष्मविवर्द्धनं तदत्यम्लं दंतसं
हर्षकंगदिदाहकृत् अत्यम्लं
दीपनं रक्तपित्तवृद्धिकरंपरं इति
भावप्रकाशः ॥ लवणं मधुरस
र्पिः शर्करा मुद्गधात्रीफलसमरस
विहीनं नैनतस्मिन्नित्यं नचक्षा
रदिवसेते नोष्णकाले न रात्रौ न
दधिकफविकारे पित्तदोषेपिना
यात् त्रिकटुकयुक्तमेतद्राजिका
चूर्णमिश्रंकफहरमनिलघ्नं व
ह्नि संधुक्षणंच तुहिन शिशिरका
ले सेवितं चातिपथ्यं रचयति तनु
दार्ढ्यं कांतिमत्वंचन्द्रणां दधिम
ध्यमीषदम्लमाद्रितेचक्षात्मसं
यावत् यावन्मधुरं दोषहरंतावद
म्लमिदं इति राजनिर्घण्टः ॥
दधियत्स्वादुतन्मेदः कफाभि
ष्यन्दकारणं दध्यम्लमति यद्
रक्तदूषणंकफपित्तकृत् विदाहि
स्रष्टविण्मूत्रं मंदजातं त्रिदोष
कृत् दधित्वसारं रूक्षंतु ग्राहि वि
ष्टम्भि वातलं पीनसे चातिसारे च
शीतके विषमज्वरे अरुचौ मूत्रकृ
च्छ्रे च कार्श्ये च दधि शस्यते इतिरा
जवल्लभः ॥ धारणकर्म्मविधि इति
मुग्धबोधं ॥ दधिकूर्चिका स्त्री अर्द्धो
दकोस्मदगे ॥ ॥

दध्यम्ले संयोगात् जाता इति के
चित् उत्स्तुगपे दध्यम्लसंयोगात्
लाता इत्यन्ये छेना इति भाषा ।
अस्या गुणाः वातनाशित्वं ग्रा
हित्वं रूक्षत्वं दुर्जरत्वंच इति रा
जवल्लभः ॥
दधिचारः पुं दधिमन्थनदण्डः ।
तत्पर्य्यायः वैशाखः २ नक्राटः ३
करचर्षणं ४ इतिहारावली ॥
दधिजं क्ली नवनीतं इति राज
निर्घण्टः ॥
दधित्थः पुं कपित्थ इत्यमरः ॥
दधित्थाख्यः पुं शल्लकद्रवः लोबा
न् इति भाषा इतिरत्नमाला ॥
दधिधेनुः स्त्री दानार्थदध्यादिनि
र्मिता धेनुः स्त्री दानार्थदध्यादिनि
र्मिताधेनुः यथा दधिधेनोर्म्महात्म्य
जविधानं शृणु साम्प्रतं अनुलिप्ते
महीभागे गोमयेन नराधिप गोच
र्म्म मात्रे तु पुनः पुष्पप्रकरशोभि
ते कुशैरास्तीर्य्य वसुधां कृष्णाजि
नकुशोत्तरां दधिकुम्भं ततः स्थाप्य
सदा धान्य चयोपरि चतुर्थांशेन
न वत्सं तु सौवर्णमुखमंडितं श्वा
काग्र वस्त्र युग्मेन पुष्प गंधैस्तु स।
जितां ब्राह्मणाय कुलीनाय साधुहृत्ता
य धीमते ॥ ॥
क्षमादिगुणयुक्ताय दद्यात्तांद
धिधेनुकां पुच्छदेशोपविष्ट
स्तमुद्रिकाकर्णमात्रकैः दाड
कोपानही छत्रं दत्त्वा मंत्रमनु
स्मरेत् दधिक्राव्णेति मंत्रेणदधि
धेनुं प्रदापयेत् एवं दधिमयीं धे
नुं दत्वा राजर्षिसत्तम एकाहारो
दिनं तिष्ठेद् आचन्द्रपन्दनं यज
मानो वसेद्राजन् त्रिरात्रंच द्विजो
त्तम दीयमानं प्रपश्यंति ते या
न्ति परमां गतिं यत्र क्षीरवहान
द्यो यत्र पायसकर्द्दमाः मुनय
ऋषयः सिद्धास्तत्र गच्छन्ति धेनु
दाः यद्दृश्याश्वमेधेन प्राप्नुया
द्दापिमानवः सोऽश्वमेधफल
प्राप्य विष्णुलोकं सगच्छति इति
वराहपुराणं दधिपुष्पिका
स्त्री अपराजिता इतिराजनिर्घण्टः
दधिपुष्पी स्त्री कोलशिम्बी इ
ति राजनिर्घण्टः ॥
दधिफलः पुं कपित्थवृक्षः
इत्यमरः ॥
दधिमण्डः पुं मस्तु मात इति
भाषा इतिरत्नमाला ॥
दधिमण्डोदः पुं दधिसमुद्रः
इतिश्रीभागवतं ॥

दधिमुखः पुं वानरविशेषः स
सुग्रीवस्य मातुलः तस्य मधुवन पा
लकश्च इति रामायणं ॥
दधिशोणः पुं वानरः इति त्रि
काण्डशेषः ॥
दधिसक्तवः पुं करंभः दध्युप
सिक्ताः सक्तवः दहीछातु इति भा
षा इत्यमरः नित्यबहुवचनांतो
ऽयं दधिसारं क्ली नवनीते इति
हेम चंद्रः ॥
दधिस्नेहः पुं दधिसारः तत्प
र्यायः सारः २ दध्युत्तरगं ३ क
हूरं ४ इति रत्नमाला ॥
दधिस्वेदः पुं घोलं इति जटाध
रः दधीचः पुं दधीचिमुनिः
इति शब्दभेदप्रकाशः ॥
दधीचिः पुं मुनिविशेषः स च
अथर्वमुने रौरसात् कर्दम क
न्यायां शांतिनाम्न्यां जातः वृत्र
वधार्थं देवैरस्यास्थि वज्रं नि
र्मितं इति श्रीभागवतं ॥
दधीच्यस्थि क्ली हीरकं इति त्रि
काण्डशेषः वज्रंच ॥
दध्नक त्रि दृष्टः इति त्रिकाण्ड
शेषः दध्नः पुं यमः इति शब्द
रत्नावली दध्याकरः पुं दधिसमु
द्रः इति ॥ ॥

शब्दार्थकल्पतरुः ॥
दध्यानी स्त्री सुदर्शना सुदर्शन
गुलंच इति भाषा दधिरवप इति
केचित् पुराति इति केचित् मद
नमंत इति हिंदी भाषा इति रत्नमा
ला दध्युत्तरं क्ली दधिस्नेहः इ
ति शब्दचंद्रिका ॥
दध्युत्तरगं क्ली दधिस्नेहः इति
रत्नमाला ॥
दध्युदः पुं दधिसमुद्रः इति ज
टाधरः ॥
दनुः स्त्री कश्यपपत्नी सा दक्ष
स्यादानवमाताच इति त्रिकाण्डशे
षः दनुजः पुं असुरः इत्यमरः
दनुजद्विट् पुं देवः इति शब्दर
त्नावली ॥
दनुसूनुः पुं असुरः इति जटाधरः
दंतः पुं अद्रिकटकः कुंजः ।
इति मेदिनी शैलस्यांग इति त्रिकां
डशेषः चर्वणसाधनास्थि ।
दांत इति भाषा गर्भस्थस्य षष्ठेमा
सि गृह्यदंतपंक्तिर्भवति इति सु
श्रुतः तत्पर्यायः रदनः २
दशनः ३ रदः ४ इत्यमरः द्विजः ५
खुरः ६ इति शब्दरत्नावली ॥ २
त्रिकीर्णयांतस्याद्यानस्थानानि ॥

यथा स्तनयो र्गण्डयो श्चैव डो
ष्ठे चैव तथा धरे दन्ताघातः प्र
कर्तव्यः कामिनीनं सुखावहः
इति कामशास्त्रं ॥ अथ दन्त
रोगाणां निदानादि यथा ।
शोणितं दंतवेष्टेभ्यो यस्याक
स्मात् प्रवर्तते दुर्गंधीनि स
कृष्णानि प्रक्लेदीनि मृदूनि च
दंतमांसानि शीर्यंते पचंति च
परस्परं शीतादोनाम सव्या
धिः कफशोणितसंभवः १ दं
तयोस्त्रिषु वा यस्य श्वयथु र्जा
यते महान् दंतपुप्पुटको ना
म सव्याधिः फलरक्तजः २ स्रव
न्ति पूय रुधिरं चला दंता भवंति
च दंतवेष्टः सविज्ञेयो दुष्टशोणि
तसंभवः ३ श्वयथु र्दंतमूलेषु
रुजावान् कफरक्तजः लालास्रावी
स विज्ञेयः शौषिरो नाम नामतः
कण्डूमान् शौषिरो गदः इति च ।
पादः ४ दंताश्चलंति वेष्टेभ्यस्ता
लु चाप्यवदीर्यते दंतमांसानि प
च्यंते मुखंच परितप्यते यस्मिन् स
र्वजो व्याधि र्महाशौषिर संज्ञितः
५ दंतमांसानि शीर्यंते यस्मिन्
ष्ठीवति चाप्यसृक् पित्तासृक्

कफजो व्याधि र्ज्ञेयः परिदरो
हिसः ६ वेष्टेषु दाहः पाकश्च
ताभ्यांदन्ताश्चलंतिच आघ्ना
हताः प्रस्रवंति शोणितं दन्त
वेदना आध्मायन्ते स्रुते रक्ते
मुखं पूतिच जायते यस्मिन्
सोपकुशो नाम पित्तरक्तकृतो
गदः ७ घृष्टेषु दंत मांसेषु
संरंभो जायते महान् भवंति
दंताश्च चलाः स वैदर्भोऽभि
घातजः ८ मारुतेनाधिको दं
तो जायते तीव्रवेदनः खलिव
र्धन संज्ञासौ जाते रुक् च प्रशा
म्यति ९ शनैः शनैः प्रकुरुते
वायु र्दंत समाश्रितः कराला
न् विकृतान् दंतान् करालो
न स सिध्यति १० हानव्ये पश्चि
मे दंते महान् शोथो महारुजः
लालास्रावी कफकृतो वि
ज्ञेयः सोऽधिमांसकः ११ ॥
दंत मूल गता नाड्यः पंच ज्ञे
या यथेरिताः दीर्यमाणेष्विव
रुजा यस्य दंतेषु जायते दाल
नो नाम स व्याधिः सदागति नि
मित्तजः २ कृष्णच्छिद्रश्चलः स्रा
वी ससंरंभो महारुजः अनिमित्त

कृमिर्वातात् स ज्ञेयः कृमिदन्त
कः १३ वक्रं वक्रं भवेद्यस्य दन्त
भङ्गश्च जायते कफवातकृतो
व्याधिः स भञ्जनकसंज्ञकः १४
शीतरूक्षप्रवाताम्लस्पर्शाना
मसहा द्विजाः पित्तमारुतको
पेन दन्तहर्षः समामतः १५
मलो दन्तगतो यस्तु कफमारुत
शोषितः शर्करेव खरस्पर्शी
सा ज्ञेया दन्तशर्करा १६ कपा
लेष्विव दीर्यन्ते दन्तानां सैव शर्
करा कपालिकेति पठिता सदा
दन्तविनाशिनी १७ योऽसृङ्मिश्रे
ण पित्तेन दग्धो दन्तस्त्वशेषतः
श्यावतां नीलतां वापि गतः स
श्यावदन्तकः १८ इति माधवकरः
दन्तकः पुं पर्वतशृङ्गे नागदन्तः
इति हेमचन्द्रः ॥
दन्तकर्षणः पुं जम्बीरः इति
शब्दरत्नावली ॥
दन्तकाष्ठं क्ली विकङ्कतवृक्षः
इति राजनिर्घण्टः दन्तधावना
र्थकाष्ठं तद्यथा नरसिंहपुरा
णे दन्तकाष्ठस्य वक्ष्यामि समासे
न प्रशस्तता सर्वे कण्टकिनः पु
ण्याः क्षीरिणश्च यशस्विनः महाभा
रते तिक्तं ॥

कषायं कटुकं सुगन्धि कण्टका
न्वितं क्षीरिणो वृक्ष गुल्माद्या
भक्षयेद्दन्तधावनं निषिद्धका
ष्ठानि यथा गुवाक तालहिन्ता
लास्तथा ताडी च केतकी खर्ज्जु
रनारिकेलौ च सप्तैते तृणराज
काः तृणराजशिरापत्रैर्यः कुर्या
द्दन्तधावनं तावद्भवति चाण्डालो
यावद्गङ्गां न पश्यति तस्यै
र्घ्यपरिमाणं वाह विष्णुः कनि
ष्ठाग्रहसमस्थौल्यं सकूर्च्चं द्वाद
शाङ्गुलं प्रातर्भुक्त्वा च यतवाक् भ
क्षयेद्दन्तधावकं मरीचिः द्वादशा
ङ्गुलं विप्राणां क्षत्रियाणां
नवाङ्गुलं अष्टाङ्गुलं च वैश्यानां शू
द्राणां षडङ्गुलं चतुरङ्गुलमा
नेन नारीणां विधिरुच्यते अन्त
र प्रभवानां च षडङ्गुल मुदाहृ
तं इत्याह्निकतत्त्वं ॥
दन्तकाष्ठकं क्ली आकल्लवृक्षः
इति राजनिर्घण्टः ॥
दन्तच्छदः पुं ओष्ठः इति हलायुधः
दन्तच्छदोपमा स्त्री बिम्बी इति राज
निर्घण्टः ॥
दन्तधावनं क्ली दन्तशुद्धिः तस्य विधि
र्यथा प्रातर्भुक्त्वा च मृद्वग्रं कषाय ।

कटु तिक्तकं भक्षयेद्दन्तधावनं दन्
तमांसान्यबाधयन् तस्य काष्ठा
नि यथा केप्यत्र करवीराम्रक
रञ्ज वकुलाशनान् दन्तकाष्ठार्थ
मन्वेत्सर्वान् कण्टकिनोऽप्यमुः
खदिरश्च कदम्बश्च करञ्जश्च वट
स्तथा तिन्तिडी वेणुपृष्ठं च आम्र
निम्बौ तथैव च अपामार्गश्च बि
ल्वश्च अर्कश्चोडुम्बरस्तथा एते
प्रशस्ताः कथिता दन्तधावन क
र्मणि तस्य निषिद्धकाष्ठानि यथा
गुवाक ताल हिन्ताल खर्ज्जुरैः ॥
केतकी युतैः नारिकेलेन ताड्या
च न कुर्याद्दन्तधावनं ॥ तस्य
दिग्भेदेन शुभाशुभफलं यथा ।
मस्तुः स्याद्दक्षिणास्येन पश्चिमा
स्येन चामयः पूर्वास्येनोत्तरास्य
न सम्पदो दन्तधावनात् ॥ ॥
तस्य तिथिविशेषे निषेधो यथा
प्रतिपद्दर्श षष्ठीषु नवम्यैकाद
शीषु च दन्तानां काष्ठसंयोगो
दहत्यासप्तमं कुलं दन्तचर्वणा
नेतरं चक्षुः सेचनं यथा । दन्ता
न् दृढमथो हृष्टो प्रातः सिंचेच्च ।
लोचने तोयपूर्णमुखस्तेन
उष्णिरोगप्रसीदति ॥ रोग ।

विशेषे दन्तकाष्ठवर्ज्जनं यथा अ
हिनीकर्णशूली च दन्तरोगी नव
ज्वरी शोषी कासी च मूर्च्छान्तो द
न्तकाष्ठं विवर्जयेत् तस्य गुणा य
था निहन्ति वक्त्रवैरस्यं जिह्वा
दन्ताश्रितं मलं आरोग्यं रुचिमा
धत्ते सद्यो दन्तविशोधनं इति
राजवल्लभः कृतशौचस्ततः
प्रातः कुर्याद्दन्तस्य धावनं ।
जिह्वाया मार्ज्जनं चापि रसालस्य
दलादिभिः दक्षिणाभिमुखो भू
त्वा पश्चिमाभिमुखस्तथा न दन्
तधावनं कुर्यात् कुर्याच्चेन्नार
की भवेत् मध्यमानामिकाभ्यां
च वृद्धाङ्गुष्ठेन च द्विजः दन्तस्य ।
धावनं कुर्यात् तर्ज्जन्या न क
दाचन अश्वत्थवटबिल्वानां तथा
ग्राः काष्ठिकया बुधः न दन्तधा
वनं कुर्यान्नयेद्दस्वरसस्य च ॥
नित्यक्रिया फलं प्रेप्सुस्त्वरया
दन्तधावनं प्रभाते कृतवान् प्राज्ञः
सूर्योदय विवर्ज्जिते ॥
सूर्योदये द्विजश्रेष्ठ यः कुर्याद्द
न्तधावनं नित्यक्रिया फलं त
स्य सर्वमेव विनश्यति यः स्नान
समये कुर्यात् जैमिने दन्तधावनं
निराशाः पितरो यान्ति तस्य देवाः

स्वर्षयः दंतस्यधावनंकुर्य्याद्यो
मध्याह्न पराह्णयो नस्यपुष्य न
गृह्णंति देवताःपितरोजलं स्ना
नकालेपुष्करिण्या यःकुर्य्याद्दं
तधावनं तावज्ज्ञेयःसचाण्डालो
या वद्गंगा न पश्यति भग व
त्युदिते सूर्य्ये यः कुर्य्याद्दंत
धावनं नहंत कांक्षी पितरो
भुक्त्वा गच्छति दुःखिनः उपवा
सदिने विप्रपितृश्राद्धदिने तथा
न च तत्र फलमाप्नोति दंतधाव
नकान्नरः प्रभाते मार्जयेद्दंता
नवास्यस्य रसनां तथा कुर्य्याद्दा
दशविमेद्द कवलानि जलैर्द्धं
ये उपवासे पितृश्राद्धे विधिना
नेनजैमिने दंतधावनकान्नर्यः
सद्गतिं लभते फलं इतिपाद्म
क्रियायोगसारः ॥
दंतधावनः पुं खदिरवृक्षः गु
ल्ककरंजः इति राजनिर्घण्टः
वकुलः इतिशब्दचंद्रिका ॥
दंतपत्रं स्त्री कुण्डलं इति श
ब्दरत्नावली ॥
दंतपत्रकं स्त्री कुंदपुष्पं इति
शब्दचंद्रिका ॥
दंतपुष्पं स्त्री कतकफलं इति
शब्दचंद्रिका ॥
दंतफलं स्त्री कतकं इति श
ब्दचंद्रिका ॥
दंतफलः पुं कपित्थं इति रा
जनिर्घण्टः ॥
दंतफला स्त्री पिप्पली इति रा
जनिर्घण्टः ॥
दंतभागः पुं गजाग्रभागः गज
स्यस्कंधः स्कंधपश्चात्तो योऽग्र
भागः सदंतसहितः इत्यमरभर
तो दंतमलं स्त्री दंतलग्नक्लेदः त
त्पर्य्यायः शुष्किका २ इतिहाराव
ली दंतमूलिका स्त्री दंतीवृक्षः इ
तिशब्दरत्नावली ॥
दंतवस्त्रं स्त्री ओष्ठः इतिहेमचंद्रः
दंतवासाः पुं ओष्ठः इतित्रिकाण्ड
शेषः ॥
दंतबीजकः पुं दाडिमः इति रा
जनिर्घण्टः ॥
दंतशठः पुं दन्तशठः इत्यमरः
टीकायांमथुरानाथः ॥
दंतशठः पुं जम्बीरः कपित्थः
कर्म्मरंगकः नागरंगकः इति
मेदिनी अम्लः इतिहेमचंद्रः
दंतशठा स्त्री चांगेरी इति मेदि
नी वृक्षाम्लिका इति राजनिर्घण्टश्च

दंतशर्करा स्त्री कफवायुशोषित
दंतगतमलं पाथुरिइति भाषा
इतिमाधवकरः अस्या लक्षणं
दंतशब्दे द्रष्टव्यं ॥
दंतशाणं स्त्री निष्कुकर्णं मिषिर
तिभाषा इति त्रिकाण्डशेषः ॥
दंतशिरा स्त्री मापी इति शब्द
रत्नावली ॥
दंतहर्षः पुं दंतरोगविशेषः।
इतिमाधवकरः अस्य लक्षणं दं
तशब्दे द्रष्टव्यं ॥
दंतहर्षकः पुंजंबीरः इतिजटाध
रः दंतहर्षणः पुं जंबीरः इतित्रि
काण्डशेषः ॥
दंताघातः पुं निम्बुकः इतिराज
निर्घण्टः दशानघातश्च इतिकी
र्तयो तस्यस्यानामानिदंतशब्दे ।
द्रष्टव्यानि ॥
दंतायुधः पुं शूकरः इति त्रि
काण्डशेषः
दंतार्बुदं स्त्री पुं दंतरोगभेदः
तत्पर्य्यायः दंतमूलः २ दंत
शोफः ३ द्विजव्रणः ४ इति रा
जनिर्घण्टः ॥
दंतालिका स्त्री वल्गा इतित्रिकाण्ड
शेषः ॥
दंतावलः पुं स्त्री हस्ती इत्यमरः।
दंतिका स्त्री दंतीवृक्षः इत्यमरः
दंतिजा स्त्री दंतिका इतिशब्दर
त्नावली ॥
दंतिनी स्त्री दंतीवृक्षः इतिराज
निर्घण्टः ॥
दंतिमदः पुं हस्तिमदः इतिराज
निर्घण्टः ॥
दंती स्त्री स्वनामख्यातवृक्षः तत
पर्य्यायः शीघ्रा २ श्येनघण्टा ३
निकुंभी ४ नागस्फोता ५ दंतिनी ६
उपचित्रा ७ भद्रा ८ चूला ९ रेचनी
१० अनुकूला ११ निःशल्या १२ चक्र
दंती १३ विशल्या १४ मधुपुष्पा १५
एरण्डफ १६ तरुणी १७ एरण्डप
त्रिका १८ अरण्यवती १९ विशोध
नी २० कुंभी २१ उडुंबरदला २२ इति
राजनिर्घण्टः निकुम्भः २३ दंति
का २४ प्रत्यक्पर्णी २५ उडुम्बर
पर्णी २६ इत्यमरः अस्या गुणाः
कटुत्वं उष्णत्वं शूलामत्वग्दोषा
र्शोव्रणाश्मरीशल्यशोधनत्वं
दीपनत्वंच इति राजनिर्घण्टः ॥
अष्ठीलिकाध्मानगुल्मोदरनाशि
त्वे सारकत्वंच इतिराजवल्लभः।
दंती न पुं स्त्री हस्ती इत्यमरः ॥

दंतीवीजं स्त्री जयपालः इतिराज
निर्घण्टः ॥
दंतरः त्रि उन्नमदंतः दंतो इति ।
भाषा उन्नतननः इति मेदिनी ॥
कदाचिद्दंतो मूर्खः कदाचिल्लोम
शः खली कदाचिन्नंदिलोड्ः खी
कदाचिच्चंचला सती इति सा
मुद्रकं ॥
दंतरच्छदः पुं वीजपुरः इति
राजनिर्घण्टः ॥
दंतोलूखलिकः त्रि वानप्रस्थवि
शेषः दंतमात्रेणच्छित्वा यो भक्ष
तिसः इतिश्रीभागवतं ॥
दंत्यः त्रिदंतोद्भवः इतिव्याकरणं
दन्दशूकः पुं सर्पः राक्षसः ।
इतिमेदिनी ॥
दंत उ न दंभे इति कविकल्पद्रुमः
दंत क ऊ संघाते इति कविक
ल्पद्रुमः ॥
दष्णु ओ दंशने इतिकविकल्पद्रु
मः दम ई क नोदे प्रेरणे इति ॥
कविकल्पद्रुमः ॥
दम क नोदे इतिकविकल्पद्रुमः
दभ्रं त्रि अल्पं इत्यमरः समद्रे पुं
इत्युणादिकोषः ॥
दम इ र भ य उ शमे शांतीभावे ।
इतियावत् इतिकविकल्पद्रुमः ॥
दमः पुं दण्डः इत्यमरः दण्डस्य ल
क्षणं यथा दमनाद्दण्डनाच्चैव तस्मा
द्दण्डं विदुर्बुधाः यत्रश्यामोलोहि
ताक्षोदण्डश्चरतिनिर्भयः प्रजा ।
स्तत्र न मुह्यंति नेता चेत् साधु
पश्यति इति मत्स्यपुराणं
तपः क्लेशसहिष्णुता न स्यर्था
यः दांतिः २ दमथः ३ इत्यमरः
दमनं तत बाह्येंद्रियनिग्रहः ।
इतिवेदांतसारः ॥
विषयाद्व्याहृतस्य मनसो यथेष्ट
विनियोगयोग्यता इतिकेचित्
दमस्य लक्षणं यथा ऊत् सितात्
कर्मणोविप्रयच्चवित्तनिवारणं
स कीर्तितो दमः प्राज्ञैः समस्त
तत्वदर्शिभिः इतिपाद्मेक्रिया
योगसारः कर्द्दमः इति ॥
मेदिनी ॥
दमकः त्रि दमनकर्त्ता इति ।
व्याकरणं ॥
दमघोषः पुं चंद्रवंशीयराजवि
शेषः स चेदिदेशपतिः शि
शुपालपिताच इतिपुराणं ॥
दमघोषसुतः पुं शिशुपालः
इति त्रिकाण्डशेषः ॥

दमथः पुं दमः दण्डः इत्युणा
दिकोषः ॥
दमथुः पुं दण्डः दमः इति
मेदिनी ॥
दमनं क्लीं दण्डः यथा अनुच्छि
तस्य दमनमुचितेच श्रमेतोष्कृतं
इतिब्रह्मवैवर्तेश्रीकृष्णजन्मखंडे
दमनः पुं पुष्पविशेषः दोनाइति
भाषा तत्पर्यायः पुष्पचामरः
२ इति त्रिकाण्डशेषः वीरः ३
प्रशांतः इति शब्दरत्नावली ॥
ऊदंद्दत्तः इतिराजनिर्घण्टः ।
दमनकः पुं वृक्षविशेषः दोना
इतिभाषा तत्पर्यायः दमनः
२ दांतः ३ गंधोत्कटा ४ मुनिः
५ जटिला ६ दंडी ७ पाण्डुरागः ८
ब्रह्मजटा ९ पुण्डरीकः १० ताप
सपत्री ११ पत्री १२ पवित्रकः १३
देवशेखरः १४ कुलपत्रः १५
विनीतः १६ तपस्विपत्रः १७ इ
तिराजनिर्घण्टः मुनिपुत्रः १८
तपोधनः १९ गंधोत्कटः २०
ब्रह्मजटी २१ कुलपुत्रकः २२ इति
भावप्रकाशः अस्य गुणाः शीत
लत्वं तिक्तत्वं कषायत्वं कटुत्वं
कुष्ठदोषद्वंद्वत्रिदोषविषविस्फो
टविकारहारत्वंच इतिराजनिर्घ
ण्टः हृद्यत्वं वृष्यत्वं सुगंधित्वं ग्रह
णस्वेदक्लेदकण्डूनाशित्वंच इति
भावप्रकाशः ॥
दमनी स्त्री अग्निदमनीवृक्षः इति
राजनिर्घण्टः ॥
दमयंती स्त्री भद्रमल्लिका इति
शब्दमाला नलराजपत्नी सा
विदर्भदेशीय भीम राजकन्या
इतिपुराणं ॥
दमितः त्रि दांतः इत्यमरः ॥
क्लेशसहमात्रे इति भरतः भा
र वाहनादि क्लेशसहः इति
सुभूतिः ॥
दमी पुं दमनविशिष्टः दमोऽस्या
स्तीति णीन् प्रत्ययेन निष्पन्नः
दमुनाः पुं अग्निः इत्यमरः ॥
शुक्राचार्यः इत्युणादिकोषः
दमूनाः पुं अग्निः इतिशब्दर
त्नावली ॥
दम्पती पुं भार्यापती इत्यमरः
दंभः पुं कपटः कल्कं शाठ्यं
पाखण्डः इतिशब्दरत्नावली ॥
दंभोलिः पुं वज्रं इत्यमरः ॥
दम्यः पुं वत्सतरः सतुप्राप्त दम
नकालोगौः इत्यमरः अनड्वान् ॥

इति राजनिर्घण्टः दमनीये त्रि
दय भि ङ ग्रहणे गतौ वधे दा
ने ग्रवने पालने इतियावन्
इति कविकल्पद्रुमः ॥
दयः पुं दया इतिशह्दरत्नावली
दया स्त्री करुणा ग्रस्या लक्षणं य
था यत्नादपि पर क्लेशं हर्त्तुं या
हृदिजायते इच्छा भूमिसुरश्रेष्ठ
सादया परिकीर्त्तिता इति पाद्मे
क्रियायोगसारः ग्रपिच ग्रा
त्मवत् सर्वभूतेषु योहिताय
भायच वर्त्तते सततं हृष्टः क्रि।
याह्येषा दया स्मृता इति म।
त्स्यपुराणे ॥
दयाकूर्च्चः पुं बुद्धः इतिहेमचंद्रः
दयालुः त्रि दयायुक्तः तत्पर्य्यायः
कारुणिकः २ कृपालुः ३ सूरतः
४ इत्यमरः ॥
दयितं त्रि प्रियं इत्यमरः ॥
दयितः पुं पतिः इतिजटाधरः
दयिता स्त्री भार्य्या इतिहलायुधः
दरं क्ली ईषदर्थः इति मेदिनी ॥
दरं क्ली शंखः यथा विष्णुर्वदे
दरकमल कौमोदकी चक्रपाणि
मितिक्रमदीपिका ॥
दरः पुं क्ली भयं गर्त्तः इत्यमरः।

कन्दरे पुं स्त्री इत्यमरटीकायां
भरतः ॥
दरकंटिका स्त्री शतावरी इति
राजनिर्घण्टः ॥
दरणिः पुं कूलभंगः भंगन इ
तिभाषा तत्पर्य्यायः कूलहरणः २
इतिशह्दरत्नावली कूलतरुलः ३
इति भूरिप्रयोगः ॥
दरत् स्त्री प्रपातः भयं पर्वतः
इतिमेदिनी म्लेच्छजातिः इति
लिंगादिसंग्रहे ग्रमरः हृत् ॥
तीवं इति सिद्धांतकौमुद्यां ॥ म
णादिवृत्तिः ॥
दरदं क्ली हिंगुलं इति राज
निर्घण्टः ॥
दरदः पुं देशविशेषः भयं ॥
म्लेच्छजातिभेदः इतिशह्दरत्ना।
वली ॥
दरिः स्त्री दरी इति शह्दरत्नावली
दरितः त्रि भीतः इतिहेमचंद्रः।
दरिद्रः पुं निर्धनः तत्पर्य्यायः
निःस्वः २ दुर्विधः ३ दीनः ४ दु
र्गतः ५ इत्यमरः कीकटः ६ दुःस्थः ७
इति जटाधरः ग्रस्तमितः ८ इति
दानधर्मः तस्यकारणं यथा ॥
ग्रनुपोष्य त्रिरात्राणि तीर्थान्य ॥

नभिगम्यच ग्रदत्वा हेमधेनुश्च
दरिद्रोजायतेनरः इतिपाद्मेभू
खण्डे दरिद्रो यस्त्वसंतुष्टः कृ
पणो यो ग्रजितेंद्रियः इतिश्री
भागवते ॥
दरिद्रा त्त लु दुर्गमे इति
कविकल्पद्रुमः ॥
दरिद्रायकः त्रि दरिद्रः इति
मुग्धबोधं ॥
दरिद्रितः त्रि दरिद्रः दारिद्र्ययु
क्तः दरिद्राधातोः कर्म्मणिक्तः ॥
दरिद्रता त्रि दरिद्रायकः दरि
द्रा धातोः कर्त्तरितृन् प्रत्ययः
दरोदरं क्ली दरोदरं इत्यमरटी
कायांभरतः ॥
दरोदरं क्ली दुरोदरं इत्यमरटी
कायांभरतः ॥
दर्द्दरः पुं पर्वतः ईषद्भ्रभाज
नत्रि इति मेदिनी ॥
दर्द्दराभः पुं व्यंजनविशेषः
तत्पर्य्यायः मीनाक्षीणः इति
शह्दमाला ॥
दर्द्दरीकं क्ली वाद्यं इत्युणादि
कोषः दर्द्दरीकः पुं मेघः वाद्यभे
दः भेकः इति संक्षिप्तसारे उणा

दिवृत्तिः ॥
दर्द्दरं क्ली ग्रामजालं इति
मेदिनी ॥
दर्द्दुरः पुं स्त्री भेकः इत्यमरः
दर्द्दुरः पुं मेघः वाद्यभाण्डभेदः
पर्वतविशेषः इतिमेदिनी ॥
राक्षसः इति संक्षिप्तसारेउणा
दिवृत्तिः ॥
दर्द्दुरा स्त्री चंडिका इति मेदिनी
दद्रुरा पुं दद्रुरोगः इति शह्द
रत्नावली ॥
दर्द्दुः पुं दद्रुरोगः इत्युणादि।
कोषः ॥
दर्द्दुघ्नः पुं चक्रमर्द्दकः इतिशा
ह्दरत्नावली ॥
दर्द्दुणः त्रि दद्रुरोगी इत्यमर।
टीकायांभरतः ॥
दर्द्दुः पुं दद्रुरोगः इत्युणादि
कोषः ॥
दर्द्दुणः त्रि दद्रुरोगी इत्यमर
टीकायांभरतः ॥
दर्द्दुरोगी त्रि दद्रुरोगी इत्यमर
टीकायांभरतः ॥ दर्पः पुं उत्क
र्षत्वं इतिनीलकंठः कस्तूरी
इतिमेदिनी ऊष्मा इति त्रिकाण्डशेषः

अहंकृतिः तत्पर्य्यायः गर्वः २
अहंकारः ३ अवलिप्तता ४ अ
भिमानः ५ ममता ६ मानः ७ चि
त्तोन्नतिः ८ स्मयः ९ इति हेमचं
द्रः अहंकारश्च सर्वेषां पापबीज
ममंगलं ब्रह्माण्डेषु च सर्वेषां
गर्वपर्य्यन्तमुन्नतिः येषां येषां
भवेद्दर्पो ब्रह्माण्डेषु परात् परे
विज्ञाय सर्व्वसर्व्वात्मा तेषां शा
ताहमेवच दत्ताणाम्महतां चैव
येषां गर्वो भवेत् प्रिये एवं विधम
हं तेषां चूर्णीभूतं करोमि च च
कार दर्पभंगं च महाविष्णोः पुरा
विभुः ब्रह्मणश्च तथा विष्णोः शे
षस्य च शिवस्य च धर्म्मस्य च यम
स्याग्निष्वात्तस्य चेन्द्रसूर्य्ययोः गरु
डस्य च वन्हेश्च गुरोर्दुर्व्वाससस्त
था दौवारिकस्य भक्तस्य जयस्य
च सुराणामसुराणां च भवतः का
मशक्रयोः लक्ष्मणस्यार्ज्जुनस्या ।
पि वाणस्य च भृगोस्तथा सुमेरो
श्च समुद्राणां वायोश्च वरुणस्य
च सरस्वत्याश्च दुर्गायाः पद्मायाः
श्च भुवस्तथा सावित्र्याश्चैव गंगायाम
नमायास्तथैव च प्राणाधिष्ठातृदेव्या
श्च प्रियायाः प्राणतोपि च ॥ ।
प्राणाधिकाया राधाया अन्येषाम
पि का कथा हत्वा दर्पं च सर्वेषां प्र
सादं च चकार सः इति ब्रह्मवै
वर्त्ते श्रीकृष्णजन्मखण्डे ॥
दर्पकः पुं कामदेवः इत्यमरः ॥
दर्पणं क्ली चक्षुः इति जटाधरः
संदीपने इति दृपधात्वर्थ दर्श
नात् ॥
दर्पणः पुं क्ली रूपदर्शनाधारः
आर्शि इति भाषा तत्पर्य्यायः ॥
मुकुरः २ आदर्शः ३ इत्यमरः
आत्मदर्शः ४ कंदरः ५ दर्शनः ६
प्रतिबिम्बाश्रयः ७ इति शब्दरत्ना
वली कर्कः ८ कर्करः ९ इति ज
टाधरः अस्य गुणाः आयुः श्री
कान्तित्वं पापनाशित्वं च इति
राजवल्लभः ॥
दर्पारंभः पुं अहंकारारम्भः त
त्पर्य्यायः मदस्फूर्तिः २ इति ।
जटाधरः ॥
दर्वः पुं राक्षसः हिंस्रः इति सं
क्षिप्तसारे उणादिवृत्तिः ॥
दर्वरीकः पुं इंद्रः वायुः वाद्य
भेदः इति संक्षिप्तसारे उणादि
वृत्तिः ॥ दर्वटः पुं दण्डवासी
इति हारावली ॥ ॥

दर्विः स्त्री व्यंजनादिदारकः हाता
इति भाषा तत्पर्य्यायः कम्बिः २
खजाका ३ इत्यमरः दर्वी ४ क
म्बी ५ खजाकजः ६ फणा इति
शब्दरत्नावली ॥
दर्विका पुं दर्वी इति द्विरूपकोषः
दर्विका स्त्री दार्विका इत्यमरटी
कायां रायमुकुटः खजाका इ
ति द्विरूपकोषः ॥
दर्वी स्त्री दर्विः इति शब्दरत्नावली ॥
दर्वीकरः पुं सर्पः इत्यमरः ॥
खजाकाकारफणेत्रि ॥
दर्भः पुं कुशः इत्यमरः उलपतृ
णं इति रत्नमाला काशः इति श
ब्दरत्नावली हरिताः सपिंजलाः ॥
श्वेतपुष्पाः स्निग्धाः समाहिताः
गोकर्णमात्रास्तु कुशाः सकृच्छि
न्नाः समूलकाः पितृतीर्थेन देयाः
स्युः दूर्वा श्यामाक मेवच काशाः
कुशाः वल्वजाश्च तथान्ये तीक्ष्ण
रोमशाः मौंजाश्च शाद्वलाश्चैव
षड्दर्भाः परिकीर्त्तिताः ॥
सपिंजलाः साग्राः तीक्ष्णरोमशा
इति वल्वजानां विशेषणं शाद्वला
इति सर्वेषां विशेषणं तेन तेषाम
भावे मूकतृणं शर प्रभृति ॥
वल्वज नल मुंठ वर्ज्जं सर्व्वतृणानी
ति गोभिलेन तद्व्यतिरिक्तवल्वजा
नां निषेधो बोद्धव्यः मूकानि फ
लशून्यमेतर्ष्यस्तानि येषां तृ
णानां सेति तानि मूकतृणानि
इति भट्टनारायणाचरणाः ।
गोकर्णमितावितस्त्यंगुष्ठानामि
का परिमाणाः रत्निप्रमाणाः श
स्ता वै पितृतीर्थेन संस्कृताः उपमू
ले तथा लूनाः प्रस्तरार्थे कुशोत्तमाः
इति वायुपुराणं वर्ज्यप्रतिप्रसवा
वाह हारीतः पथि दर्भाश्चितौ दर्भा
ये दर्भा यज्ञभूमिषु स्तरणासन
पिण्डेषु षट्दर्भान् परिवर्ज्जयेत्
पिण्डार्थं ये स्तृता दर्भा यैः कृतं पि
तृतर्पणं मूत्रोच्छिष्ट प्रलिप्तं च
त्यागस्तेषां विधीयते धृतैः कृ
ते च विण्मूत्रे त्यागस्तेषां विधी य
ते धृतैः विप्रुपलक्षणेन तती
या धृते दर्भे हपलक्षितेन पु
रुषेण नीवीमध्ये च ये दर्भा ब्र
ह्मसूत्रे च ये धृताः पवित्रं स्तान्
विजानीयाद्यथा कायस्तथा
कुशाः आचमन प्रयतो नित्यं प
वित्रेण द्विजोत्तमः नोच्छिष्टं तु
भवेत्तत्तु भुक्तशेषं विवर्ज्जयेत्

कृतं समापितमित्यर्थः ॥
दर्भवटुलक्षणमाह रत्नाकरे ॥
ब्रह्मसंग्रहः ऊर्द्ध्वकेशो भवेद्ब्रह्मा
लंबकेशस्तु विष्टरः दक्षिणाव
र्त्तको ब्रह्मा वामावर्त्तस्तु विष्टरः
श्राद्धदीपिकायां सप्तभिर्नवभि
र्वापि साग्रहितयवेष्टितं ओंकारे
णैव मंत्रेण द्विजः ऊर्ध्वाग्रकुशा
द्विजं नवभिरित्यत्र पंचभिरिति
त्वत्र पंचभिरिति कर्मोपदेशि
न्यां पाठः दर्भसंख्याविशेषा
भिधानेच्छंदोगेतरपरं ॥ य
त्तु वास्तुनि मुष्टिंच लंभेब्रह्म
वटौ तथा दर्भसंख्या न विहिता
विष्टरास्तरणेष्वपि इति गोभिल
परिशिष्टीय वचनात् इति श्रा
द्धतत्वं ॥
दर्भटं क्ली निभृतगृहं इति त्रि
काण्डशेषः ॥
दर्भपत्रः पुं काशः इति राज
निर्घण्टः ॥
दर्भाह्वयः पुं मुंजः इति राज
निर्घण्टः ॥
दर्शः पुं अमावस्या इत्यमरः श्र
न्योः संचेंद्वसूर्यौ त्वदर्शाद्दर्श
उच्यते इति मत्स्यपुराणं अव
लोकनं इति मेदिनी ॥

पर्वांतकृत यागविशेषः स चा
ग्नेयात्मकः यथा आग्नेयाष्टाक
पालैंद्र दध्यैंद्रपयो यागास्त्रयोः
मावास्यायां सच यावज्जीवं कर्त्त
व्यः कौण्डपायि कर्मेष्वा मासमा
घ्य इति मलमासतत्वं ॥ ॥
दर्शकः पुं द्वारपालः इत्यमरः
दर्शयिता प्रवीणः इति मेदिनी
दर्शतः पुं सूर्यः चंद्रः इति सि
द्धान्तकौमुद्यामुणादिवृत्तिः ॥
दर्शनं क्ली नयनं स्वप्नः बुद्धिः
धर्मः उपलब्धिः दर्पणः शास्त्रं
इति मेदिनी शास्त्रंतु षड्विधं ।
वैशेषिक न्याय मीमांसा सांख्य
पातंजलं वेदांत रूपं एतानि तत्व
ज्ञानार्थं वेदान् विचार्य कणाद
गौतम जैमिनि कपिल पतंजलि
वेदव्यासाख्यैर्मुनिषट्कैः कृतानि
इत्य इत्यजयः वर्णः इति त्रि
काण्डशेषः चाक्षुषज्ञानं ॥
देखो इति भाषा तत्पर्यायः
निर्वर्णनं १ निध्यानं २ आलोक
नं ३ ईक्षणं ४ इत्यमरः निभा
लनं ५ इति जटाधरः ॥
पुण्यदर्शनानि यथा नंद उवाच
येषांच दर्शने पुण्यं पापंच यस्य

दर्शने तत्सर्वं वद सर्वेषां श्रो
तुं कौतूहलं हि मे श्रीभगवान्
उवाच सद्ब्राह्मणानां तीर्थानां वै
ष्णवानांच दर्शने देवताप्रतिमा
दर्शनात् तीर्थस्नायी भवेन्नरः सू
र्यस्य दर्शने भक्त्या सतीनां दर्शने
तथा संन्यासिनां यतीनांच तथै
व ब्रह्मचारिणां भक्त्या गवांच व
ह्नीनां गुरूणांच विशेषतः गजे
न्द्राणां सिंहानां श्वेताश्वानां तथैव ।
च शुकानांच पिकानांच खंजना
नां तथैव च हंसानांच मयूराणांच
सानां शंख पक्षिणां वत्सयु
क्तधेनूनां मत्स्यानां तथैव च प
तिपुत्रवतीनांच नराणां तीर्थयायि
नां प्रदीपानां सुवर्णानां मणीनांच
विशेषतः मुक्तानां हीरकानांच
माणिक्यानां महाशय तुलसीपु
ष्पाणां दर्शनं पापनाशनं फ
लानि शुक्ल धान्यानि घृतं दधि म
धुनिव पूर्णकुंभंच लाजांच रा
जेंद्र दर्पणं जलं मालांच शुक्ल
पुष्पाणां दृष्ट्वा पुण्यं लभेन्नरः गोरो
चनांच कर्पूरं रजतंच सरोवरं पुष्पो
द्यानं पुष्पितंच दृष्ट्वा पुण्यं लभेन्नरः
देवाश्रिते देववृक्षे सुगंधि पव ।

नेतथा शंखंच दुंदुभिं दृष्ट्वा सद्यः
पुण्यं लभेन्नरः शुक्लपक्षस्य चंद्र
स्यापी युषं चंदनं तथा कस्तूरीं कुं
मं दृष्ट्वा नंदपुण्यं लभेन्नरः पताका
मक्षयवटं तरुं देवोस्थितं शुभं ॥
देवालये देवयानं दृष्ट्वा पुण्यं ल
भेन्नरः शुक्तिं प्रवालं रजतं स्फा
टिकं कुशमूलकं गंगामृदं कु
शं ताम्रं दृष्ट्वा पुण्यं लभेन्नरः पु
राणं पुस्तकं शुद्धं सबीजं विष्णु
यंत्रकं स्निग्धदूर्वाक्षतं रत्नं दृष्ट्वा
पुण्यं लभेन्नरः तपस्विनं सिद्ध
मंत्रं समुद्रं कृष्णसारकं यज्ञं
महोत्सवं दृष्ट्वा सपुण्यं लभ
तेनरः गोमूत्रं गोमयं दुग्धं गो
धूलिं गोष्ठ गोष्पदं पक्वशस्यान्वि
तं क्षेत्रं दृष्ट्वा पुण्यं लभेत नरः रु
चिरां पद्मिनीं श्यामां न्यग्रोध परि
मंडलां सुवेशां सुवसनां दि
व्यभूषणभूषितां वेशणांतेमक
रीं गंधसहूर्वाक्षत तण्डुलं सि
द्धान्नं परमान्नंच दृष्ट्वा पुण्यं ल
भेद्ध्रुवं कार्त्तिकी पूर्णिमायांच
राधिका प्रतिमां शुभां संपूज्य दृ
ष्ट्वा नराश्चाच करोति जन्मखंडनं
हिंगुलां यानयाष्टम्यामिषमासि

सिते शुभे श्रीदुर्गाप्रतिमां दृष्ट्वाक
रोति जन्मखण्डनं शिवरात्रौ च का
श्यां च विश्वनाथस्य दर्शनं कृत्वो
पवासं पूजां च करोति जन्मखण्ड
नं जन्माष्टमीदिने भक्तो दृष्ट्वा मां
विश्वमाधवं प्रणम्य पूजां कृत्वा च
करोति जन्मखण्डनं उपोष्य वनम
ध्ये च भाण्डीरे मालतीवने संपूज्य
राधां मां चैव करोति जन्मखण्डनं ॥
पौषे मासि शुक्लपक्षे यत्र तत्र
स्थले नरः पद्मायाः प्रतिमां दृष्ट्वा
करोति जन्मखण्डनं सप्तजन्मभवे
तस्य पुत्रः पौत्रो धनेश्वरः उपोष्यै
कादशीं स्नात्वा प्रभाते द्वाद
शीदिने दृष्ट्वा काशीं प्रणम्य स्पर्शं
करोति जन्मखण्डनं दत्त्वा विल्वप
दे पिण्डं विल्वं यश्च प्रपूजयेत् ॥
पितृणां स्वात्मनश्चैव करोति
जन्मखण्डनं प्रयागे मुण्डनं कृ
त्वा यश्च पितॄन् प्रतर्पयेत् ॥
उपोष्य नैमिषारण्ये करोति
जन्मखण्डनं उपोष्य पुष्करे स्नात्वा
किंवा बदरिकाश्रमे संपूज्य दृष्ट्वा
मामेव करोति जन्मखण्डनं सि
द्धां कृत्वा च बदरीं भुंक्ते बदरिकाश्र
मे दृष्ट्वा मत्प्रतिमां नन्दकरोति जन्मखण्ड
नं

दोलायमानं गोविन्दं दृष्ट्वा वृन्दा
वने च मां दृष्ट्वा संपूज्य नत्वा च
करोति जन्मखण्डनं माघे दृष्ट्वा
च मंचस्थमामेव मधुसूदनं संपू
ज्य नत्वा भक्तश्च करोति जन्मखण्डनं
रथस्थं च जगन्नाथं यो द्रक्ष्यति कलौ
नरः संपूज्य भक्त्या नत्वा च करोति
जन्मखण्डनं उत्तरायणसंक्रान्त्यां
प्रयागे स्नानमाचरेत् संपूज्य न
त्वा मामेव करोति जन्मखण्डनं ॥
कार्त्तिकीपूर्णिमायां च दृष्ट्वा मत्
प्रतिमां शुभां उपोष्य पूजां कृत्वा च
करोति जन्मखण्डनं चन्द्रभागास
मीपे च माघ्यां च मानयेन प्राणैः ॥
राधया सह मां दृष्ट्वा करोति ज
न्मनः क्षयं रामेश्वरसेतुबन्धे श्रा
वणी पूर्णिमा दिने ॥ उपोष्य
दृष्ट्वा संपूज्य करोति जन्मनः क्ष
यं दीननाथं दिनकरं लोलार्कं
चोत्तरायणे उपोष्य दृष्ट्वा संपू
ज्य करोति जन्मनः क्षयं कृषि
कोष्ठे सुवसने कलविंके सुग
न्धे विसन्दके राजकोष्ठे नन्दके
पुष्पभद्रके पार्वती प्रतिमां ॥
दृष्ट्वा कार्त्तिकेयं रामेश्वरं नन्दिनं
शंकरं दृष्ट्वा करोति जन्म ॥

नः क्षयं त्रिकूटे मणिभद्रे च पश्चि
मोदधि सन्निधौ समुपोष्य दधि
माधवं मां दृष्ट्वा मुक्तिमाप्नुयात् ॥
इति ब्रह्मवैवर्ते श्रीकृष्णजन्मखं
डे ॥ दर्शनीयः त्रि मनोज्ञः इति धरणिः
दर्शनयोग्यः इति व्याकरणं दर्शी।
यामिनी स्त्री तमिस्रा अन्धकार।
रात्रिः इति हेमचन्द्रः ॥
दर्शयिता त्रि दर्शक प्रतीहारः
इति भरतः ॥
दर्शविपत् पुं चन्द्रः इति हारावली
दर्शितः त्रि दर्शनं कारितं तत्प।
र्यायः प्रकाशितः २ आविष्कृतः
३ प्रकटितः ४ इति हेमचन्द्रः ॥
दल भि भेदे इति कविकल्पद्रुमः।
दलक भेदे इति कविकल्पद्रुमः दलं
क्ली उत्सेधः खण्डं शस्त्री छदः
अपद्रव्यं पत्रं इति मेदिनी छदनं इति
शब्दरत्नावली तमालपत्रं इति रा
जनिर्घण्टः अर्द्धं इति लीलावती
दलकोषः पुं कुन्दपुष्पवृक्षः इति
शब्दमाला ॥
दलनिर्मोकः पुं भूर्जवृक्षः इति
शब्दमाला ॥
दलनी स्त्री लोष्टं ढेला इति ॥

भाषा इति शब्दरत्नावली भेद
कर्त्तरि त्रि यथा स्याद्दलनी भवभी
तिरीति शमनी लोकत्रयत्रायि
णी भूयाद्वः प्रतिपत्तिपत्तदल
नी वाञ्छाफलोल्लासिनी इति वि
द्वन्मोदतरंगिणी ॥
दलपः पुं स्वर्णं शस्त्रं इत्युणा
दिकोषः ॥
दलपुष्पा स्त्री केतकी इति
राजनिर्घण्टः ॥
दलसारिणी स्त्री केमुकः इति
रत्नमाला ॥
दलसूचिः पुं कण्टकं इति हारा
वली दलस्नसा स्त्री पत्रशिरा
तत्पर्यायः शालिः २ इति हेम
चन्द्रः दलाढकः पुं स्वयंजातति
लः पृश्नी गैरिकं फेनः खात
के नागकेशरः मरुत्तरः इति
मेदिनी कुन्दः करिकर्णः ॥
शिरीषः वात्या इति हेमचन्द्रः
दलाम्लः पुं पंककर्वटः दल
दलि इति भाषा इति त्रिकाण्डशे
षः दलामलं क्ली मरुवकवृ
क्षः दमनवृक्षः इति मेदिनी ॥
मदनवृक्षः इति शब्दरत्नावली
दलाम्लं क्ली चुक्रं इति राजनिर्घण्टः

दलिः स्त्री पुं लोष्टं दला इति दे
ला इति च भाषा इति शब्दरत्नाव
ली दलिकं क्ली काष्ठं इति हेम
चंद्रः दलितं त्रि प्रफुल्लं इति हे
मचंद्रः खंडितं यथा दलितोज
नमेच पुंजेत्यादि क्रमदीपिका
दलेगंधिः पुं सप्तपर्णवृक्षः इ
ति त्रिकाण्डशेषः ॥
दल्मः पुं प्रतारणा पापं मु
निभेदः इत्युणादिकोषः चक्रं
इति सिद्धान्तकौमुद्यामुणादिवृ
त्तिः दल्मिः पुं इंद्रः इति हेमचं
द्रः वज्रं इति सिद्धान्तकौमुद्या
मुणादिवृत्तिः ॥
दव इ गमे इति कविकल्पद्रु
मः दवः पुं वनं वनाग्निः इत्य
मरः अग्निः इति तट्टीकायां
नीलकंठः उपतापः इति केचि
त् दवथुः पुं परितापः इति ज
टाधरः चक्षुरादिदाहः इति रा
जनिर्घण्टः ॥
दवाग्निः पुं दावानलः इति द्वि
रूपकोषः ॥
दविष्ठः त्रि सुदूरः अत्यंतदू
रवर्ती इत्यमरः ॥
दवीयान् स त्रि सुदूरः इत्यमरः

दश इ क दीप्तौ इति कविकल्प
द्रुमः दश इ क उ दर्शने दंशने
इति कविकल्पद्रुमः ॥
दश त्रि संख्याविशेषः द्विगुणि
तपंच १० दशवाचकानि यथा
हलांगुलिः १ शंभुबाहुः २ रावण
मस्तकं ३ कृष्णावतारः ४ दिक् ५
विश्वदेवः ६ अवस्था ७ चंद्राश्वः ८
पंक्तिः ९ इति कविकल्पलता ॥
बहुवचनान्तोऽयंशब्दः तत्संख्या
विशिष्टः इत्यमरः ॥
दशकंठः पुं रावणः इति शब्द
रत्नावली ॥
दशकंठजित् पुं रामः इति त्रि
काण्डशेषः ॥
दशकंधरः पुं रावणः इति हेमचंद्रः
दशग्रीवः पुं रावणः इति शब्दमाला
दशतिः स्त्री शतं इति महाभारते
दानधर्मः ॥
दशधा अव्य दशप्रकारं इति व्याक
रणं दशनं क्ली कवचं शिखरे पुं
इति मेदिनी ॥
दशनः पुं क्ली दंतः इत्यमरभ
रतौ ॥ दशनवासः क्ली ओष्ठः इत्य
मरः दशनाख्या स्त्री चुञ्चिका इति
शब्द ॥ ॥

चंद्रिका ॥
दशनोच्छिष्टः पुं निश्वासः अधर
चुंबनं इति मेदिनी दंतच्छेदेत्रि द
शपारमितावरः पुं बुधः इति हे
मचंद्रः ॥
दशपुरं क्ली कैवर्तीमुस्तकं इत्य
मरः देशभेदः समालवदेशैक
खण्डे पुरभेदः इति मेदिनी द
दशपूरं क्ली दशपुरं इत्यमर
टीकायां भरतः ॥
दशबलः पुं बुद्धः इत्यमरः ॥
दशभूमिगः पुं बुद्धः इति हेमचंद्रः
दशभूमीशः पुं बुद्धः इति त्रिकाण्ड
शेषः ॥
दशमः त्रि दशानां पूरणः दशांऽ
इत्यादि भाषा इति व्याकरणं ॥
दशमी स्त्री तिथिविशेषः सा चंद्र
स्य दशमकलाक्रियारूपा तदुप
लक्षितकालरूपा वा इति तिथ्यादि
तत्वे सा सर्वासां दिशां मतिप्रिया ।
यथा दशमीच तिथिस्तासां मतीव व
दयिता भवेत् तस्यां दध्याशनो यस्तु
सवनीभवनेनरः तस्य पापद्वयं
नाश्यं तं स्वहस्तेन्य इति व
राहपुराणं ॥ तत्र जातस्य फलं
यथा विद्याविनोदी धन पुत्र ॥

पुत्रः प्रलम्ब कंठो मदनाधिक
श्रीः उदारचित्तः समनादयालुः प्र
सूतिकाले दशमी यदि स्यात्
इति कोष्ठीप्रदीपः विमुक्ताव
स्था मरणावस्था अतिशेषवयो
वस्था इति नानार्थटीकायां भरतः
दशमी त्रि अतिवृद्धः नवतेरूर्द्ध्व
दशमी ऽवस्था विशेषः स वि
द्यते ऽस्यति इत्यमरभरतौ ॥
दशमीस्थः त्रि क्षीणरागः स
नष्टवीजः मरणावस्थाप्राप्तश्च
स च अतिवृद्धो नवतेरूपरिवर्तमा
नः इत्यमरभरतौ सत्ताशने ॥
इति हेमचंद्रः ॥
दशमुखः पुं रावणः इति त्रिका
ण्डशेषः ॥
दशमुखान्तकः पुं श्रीरामः इति
शब्दरत्नावली ॥
दशमूत्रकं क्ली हस्तिमहिषो
ष्ट्र गवाजमेषाश्व गर्द्दभ मानु
ष मानुषीणां दशानां मूत्रं इति रा
जनिर्घण्टः दशमूलं क्ली पाचन
विशेषः यथा विल्वश्योनाककं
भारीपाटलागणिकारिकाः दी
पनं कफवातघ्नं पंचमूलमिदं म
हत् शालपर्णी पृश्निपर्णी वृहतीद्वय

गोदुरंखात पित्त हरं हृष्यं कनी
यः पंचमूलकं उभयं दशमूल
व सन्निपातज्वरापहं कासे श्वासे
च तन्द्रायां पार्श्वशूलेच शस्यते
पिप्पलीचूर्ण संयुक्तं कंठहृद्
ग्रहनाशनं इति सुश्रुतबोधः ॥
दशायोगभंगः पु संस्कारकर्म
णि नक्षत्रवेधविशेषः यथा वर्ज्जे
द्वेधः यथा निष्क्रम वेदैकद
शानविंश भेकादशाष्टादशवि
शसंख्याः इष्टोडुनासूर्य्ययुतोडु
नाच योगादमुष्मद्दशायोगभंगः
अस्यार्थः कर्मकालीन विवाह
युक्त नक्षत्रांकं रविभुक्त नक्षत्रां
कयो र्योगे यदि एते अंकाः स्युः
तदा दशायोगभंगः स्यात् अस्य
प्रतिप्रसवो यथा आद्य पादेष्वि
तेसूर्य्ये त्वरीणांशं विवर्जयेत् ।
द्वितीयस्ये तृतीयेच विपरीत
मतोऽन्यथा इति स्मार्त्तित्व ।
दशरथः पु इक्ष्वाकुवंशीयराज
विशेषः स अयोध्याधिपतिः ॥
अस्योत्पत्ति र्यथा । सौराष्ट्रे
शौरव भिक्षु नाम द्विजपत्नी
कलहा भर्त्रा सह सर्वदा कल
हात् स्मृता येनत्व गत्वा सा कदाचित् होडुनरस्वरूपं

श्रमेती धर्मदत्तसंज्ञकं द्विजं दृष्ट्वा
तत् समीपमागत्य तद्धस्तस्थ त
लसीवारि संसर्गात् पापभावं प
रित्यज्य तमुवाच हे द्विज मयि कृपां
कुरु अहं कथं मुक्तिं प्रयास्यामि धि
ग्मीदृता तामुवाच तीर्थदान व्रता
दिभिः पापानि नश्यंति तेषु तेना
धिकारः तस्मात् जन्म पर्य्यन्तं य
न्मया कार्त्तिकव्रतं कृतं तस्यार्द्धं द
दामि इत्युक्त्वा तुलसीमिश्रितजल
लेन तामसेचयत् द्वादशाक्षरम
न्त्रमश्रावयच्च ततः सा दिव्यरूपा अ
भवत् तदा सा दिव्यं विमानमपश्य
त् विष्णुगणौ पुण्यशीलसुशीला
ख्यौ सा तद्विमाने आरोहिता धर्म
दत्तस्तद्विमानं तौ गणौच दृष्ट्वा अ
तिविस्मयेन भूमौ पपात पुण्य ।
शील सुशीलौ तमुत्थाप्य प्रश
स्य ऊचतुः त्वमनन्तरजन्मनि भार्या
भ्यां सह वैकुंठं यास्यसि तत्र वहू
सहस्र वत्सराणि स्थित्वा पुण्यव
ये सूर्य्यवंशोद्भवदशरथनामा ॥
राजा भविष्यसि अनया कलह
या सह भार्यात्रय युतः सा विष्णुः
पितृत्वेन स्वीकरिष्यति इतिपा
॥ ॥

दशारूपभृत् पु विष्णुः इति शब्दार्थ
कल्पतरुः ॥
दशवाजी न पु चंद्रः इति हेमचंद्रः
दशा स्त्री अवस्था दीपवर्त्तिः व
स्त्रांते बहुवचनान्तोऽयं शब्दः इति
मेदिनी चेतः इत्यजयपालः ॥
शरीरस्य दश दशा यथा गर्भ
वासः १ जन्म २ बाल्य ३ कौमा
रं ४ पौगण्डं ५ यौवनं ६ स्थावि
र्य्यं ७ जरा ८ प्राणरोधः ९ ना
शः १० इति मोक्षधर्मटीकायां नी
लकंठः ॥ कामज दश दशा ।
यथा चक्षुरागस्तदनु मनसः सं
गतिर्भावना च व्यावृत्तिः स्यात्तदनु
विषयग्रामतश्चैतसोऽपि निद्रा ।
छेदस्तदनु तनुता निस्त्रपत्वं त
तोऽनुन्मादो मूर्च्छा तदनु मरणं स्यु
र्दशाः प्रक्रमेण इत्यलंकारशास्त्रं
कलौ नराणां यथा आयुषः सूर्य्या
द्यष्टग्रह भोग्याष्ट भाग विशेषः
तत्र नाक्षत्रिकी दशा यथा षट्
सूर्य्यस्य दशा स्तेयाः शशिनो द
शपंच च । अष्टावंगारके शौक्ता
बुधे सप्त दश स्मृताः शनेश्च दश
शा शौक्ता गुरो रेकोनविंशतिः
राहो द्वीदश वर्षाणि भृगो

रष्टैकाविंशतिः जन्मकालीन न
क्षत्र विशेषवशेन ग्रहाणां दशा
नियमो यथा कृत्तिकादित्रये सू
र्य्यः शशी रोहिण्यचतुष्टये मघा
दि त्रितये भौमा बुधो हस्तचतु
ष्टये अनुराधात्रये शौरिर्गुरुः
पूर्व्वचतुष्टये धनिष्ठा त्रितये रा
हुः शेषस्तु शुक्र स्वातुष्टये ॥
सूर्य्योपद्रवभौमार्किदशानिकृ
ष्टानांतु गुरु चंद्र ज्ञ शुक्राणां
यथेप्सितफलप्रदाः दशाफलं
तु उद्विग्न चित्त परिखेदित विग्ननाश
क्लेश प्रवास गद भीति महाभियो
गैः संक्षोभितस्वजन वंधुवियोग
दुःखै र्भानोर्दशा भवति कष्टक
री नराणां १ ॥ सौख्यविभर्त्तिव
र वाहनयान रत्न कीर्त्तिप्रताप
वल वीर्य्य शुभान्वितस्य । मिष्टा
न्नपान शयनाशनभोजनानि चं
द्रो ददाति धन कांचन भूमि सं
चं २ शस्त्राभिघातवध वंधनरो
ग पीडां चिंताज्वरं विकलतां च
गृहे करोति चौराग्निदाहभय भं
ग विपत्ति रोग कीर्त्ति प्रतापध
न हा वदशा कुजस्य ॥ ३ ॥ दिव्यां
गना वदनपंकज षट् पदत्वं

लीला विलासशयनासन भोजनंच
नानाप्रकारविभवागमकोषवृद्धिः
तिं प्रभवेद्गुरुदशासु हितार्थ सि
द्धिः ४ मिथ्यापवाद वध बंधन।
कार्य्यहानिर्मीत सर्प्प युक् प्रिय स
खद्दवियोगविहीनः मैत्रच वैरमभि
वांछति वैर युक्तः कष्टास्तु पाप
ददशासु शनैश्चरस्य ५ रम्यं गृहं
विनय संचय मानवृद्धिं प्राप्नो।
तिसौख्य धन धान्य विभूतियुक्तं
धर्मार्थकामसुखभोगवकृपयोगं।
यावद्बृहस्पति दशा पुरुषो हि ना
वन् ६ बुद्ध्याविहीनमतिनाशवि
योगदुःख नष्टार्थसिद्धि भयमं
ग वियार्त्तिरोगं संताप शोक पर
देशगतेकरोति राहोर्दशा भवति
जीवनसंशयाय ७ मंत्रप्रभाव नि
पुणः प्रमदा विलासः क्षेमातप
त्र नृपपूजित देशलाभः हस्त्य
श्वलाभधनहर्षमनोरथंच शौक्री
दशा भवति निश्चित राजलक्ष्मीः
८ रवेरंतर्दशामासाः ४ तस्य फलं
उद्विग्नचित्त परिखेदित वित्तना
शक्लेश प्रवास गदभीति महा
भिघातान् दुःखप्रयोग वधबंधभ
यानिचैव भानोर्दशा प्रकुरुते खलु

राजपीडां १ सोमस्य मासाः ६ फलं
गद संकट संत्रासं स्वेच्छाहानिं म
नःक्षतिं कुरुते रजनी नाथो भा
नोरंतर्दशागतः २ मंगलस्य मासाः
दिने ६ फलं सर्वेषां तिलको भूत्वा
मणि रत्न प्रधानकं प्राप्नोति धन
धान्यानि रवेरंतर्गतेकुजे ३ बुधस्य
मासाः ११ दिनं ६ फलं व्याधिः शत्रु
भयं नित्यं सर्वगात्रे विचर्चिका
नृपंपतिसर्वकार्याणि भानोरंत
र्गतेबुधे ४ शनेर्मासाः ६ दिने २०
फलं संतापं वित्त नाशंच बंधनं।
पराजयं सौरिः करोति वैकल्प
भानोरंतर्दशागतः ५ गुरोर्वर्षः १
दिने २० फलं धर्मार्थकामसौख्यानि
ददाति विबुधार्चितः कुशादिवा
धि हंताच भानोः पाकदशागतः
६ राहोर्मासाः ८ फलं अप्रभान
भवं द्वेषं व्याधि भीतिस्तनत
यान् कुरुते सिंहिका सुतः रविपा
कदशागतः ७ शुक्रस्य वर्षः १
मासौ २ फलं कोष्टश्री वाधिरो
रोगज्वरान् शूलादिदारुणान्
शोकं करोति भृगुजः सूर्य्य
स्यांतर्दशागतः ८ एवं ॥
वर्षाः ६ ॥ ॥ ॥

चंद्रस्य स्थूलदशा वर्षाः १५ तस्य
वांतर्दशा वर्षो २ मासः फलं।
कुर्य्याद्विभूति वरवाहन मानपत्र
देमपतापबलवीर्य्यसमन्विता
नि मिष्टान्न पान शयनासन भोज
नानिचांद्रीदशा मधुरकांचनं भू
मिदात्री कुजस्य वर्षः १ मासः १
दिनानि १० फलं पित्त शोणित
पीडांच चौरदीनां भयस्तथा मं
गलः कुरुते नित्यं विधोरंतर्दशा
गतः बुधस्य वर्षो २ मासाः ४ दि
नानि ० फलं सर्वत्र लाभंच गजा
श्वगोधनानि च चंद्रजः कुरुते
सौख्यं विधोरंतर्दशागतः शने
वर्षः १ मासाः ४ दिनानि २० फलं
बंधुक्लेशंन्यपीडां तिं व्यसनं शोकं
सम्पदं विनाशं कुरुते सौरि श्चंद्र
स्यांतर्दशागतः गुरो वर्षो २ मा
साः ० दिनानि २० फलं दानसौ
ख्यानि संभोगं वस्त्रालंकारभूष
णं कुरुते विबुधाचार्यो विधोरं
तर्दशागतः राहोर्वर्षः १ मासाः
८ फलं वह्नि शत्रुभयं दुःखं
शोकं वपुधनक्षयं कुरुते राहु
रप्यर्य चंद्र पाक दशागतः शु
क्रस्य वर्षो २ मासाः ११ फलं।

सेव्यते वरनारीभि र्नरो लक्ष्मीश्च
वर्द्धते। मुक्ता हार मणि प्राप्ति र्वि
धोरंतर्गते सिते रवे मासाः १० ॥
फलं ऐश्वर्य्य वकुसौख्यंच व्याधि
नाश मरि क्षयं नृपतेजो रविः कु
र्याद्विधोः पाकदशागतः एवं व
र्षाः १५ कुजस्य स्थूल दशा वर्षाः
८ तस्यांतर्दशा मासाः ७ दिना
नि ३।२० फलं क्रूराभिघात वध
बंध भयानि धने चिंताज्वरं वि
कल शून्य गृहाश्रमंच चौराग्नि
भीति धन हानि नरेंद्र पीडाः कु
र्य्याद्विनाशानि धनेचदशा कुज
स्य बुधस्य वर्षः ०।३।२० फलं
परमैश्वर्य्यमतुलं नानाविध
सुखाश्रयं करोति सोम पुत्रश्च
क्षितिजांतर्दशागतः शनेर्मा
साः ८।२६।४० फलं रिपुचौ
राग्नि भीतिंच रोग मंतर संभवं
महाजनकलोद्वेषः कुजस्यांत
र्गतेशनौ गुरोर्वर्षः ०।४।२०।४०
फलं पुष्प धूपान्न वस्त्राद्यै र्देवब्रा
ह्मणपूजनं नृपतस्त्वत्व माप्नो
ति कुजस्यांतर्गते गुरौ राहोर्मा
साः १०।२० फलं आत्मकार्यार्थ मुद्वे
गं बंध चौरादि साध्वंस कुरुते।

सिंहिकापुत्रे भौमस्यान्तर्दशागतः
शुक्रस्य वर्षः १।६।२०। फलं धन
वृद्धिं सुखादीश्च नानावस्त्रवरस्त्रि
यः प्राप्नोति विपुलां लक्ष्मीं कुज
जस्यान्तर्गते भृगौ रवे मासाः ५
१०। फलं नानारत्नं च सौख्यं च
भूमिलाभमथापि वा नृप पू
जामवाप्नोति कुजस्यान्तर्गते र
वौ सोमस्य वर्षः १।७०। फलं
धनलाभं सुखं भोगं शरीरारो।
ग्यमेव च लोकानन्द मवाप्नो
ति द्विजान्तर्गते विधौ एवं वर्षाः
८ वुधस्य स्थूलदशा वर्षाः १७
तस्यान्तर्दशा २।८।३।२०। फलं
दिव्यांगना वदन पंकज षट्पद
त्वं लीलाविलास वरभोगसुखो
दयं च नानाप्रकार विभवागम
कोषवृद्धिं क्षिप्रं लभेद्बुधदशा
प्रवलो च सिद्धिं शनेर्वर्षः १।५।
२६।४०। फलं वामस्त्रीसमुत्तापी
डा विरहो वंधुभिः सह विदेश
गमनं चैव वुधस्यान्तर्गते शनौ
गुरो वर्षो २।११।२६।४०। फलं।
व्याधि शत्रुभय संकोचं धनाप्यार
प्य लभः लभेद्भार्या सुपुत्रं च वुध
स्यान्तर्गते गुरौ राहो वर्षः १।१०।२०।

फलं वंधुनाशं मनस्तापं देशान्त्यागं
च वंधनं करोति वहुदुःखानि
वुधस्यान्तर्गतस्तमः शुक्रस्य वर्षाः
३।३।२०। फलं धनाप्तिं वंधु
पुत्रं च धर्मवत्वं धनागमं कुरुते
दानवाचार्यो वुधपाकदशांगतः
रवे मासाः ११ दिनानि १०। फलं
श्रिया परमया युक्तो गज वाजि
धनान्वितः प्रभाकरः करोत्याशु
वुध पाकदशागतः सोमस्य व
र्षो २।४।१०। फलं कंठकादिप्रवे
शं च स्त्रीभ्यो भयमेव च निशाक
रः करोत्याशु वुधपाकदशागतः
कुजस्य वर्षः १।३।३।२०। फलं
कफपित्त समुद्भूता शिरः पीडा भ
यावहा माहेयः कुरुते शोकं वुध
स्यान्तर्दशागतः एवं वर्षाः १७
शनेः स्थूलदशा वर्षा १९ अस्या
न्तर्दशा मासाः ११।३।२०। फलं
मिथ्यापवाद वध वंधनिराश्रयं
यत्नं चौरादि भूपति भुजंगम
भीति मुग्यां। आशा निराश्रम
पत्याजेन कार्य्यहानिं प्रयोगे दशा
प्रकुरुते नियतं नराणां गुरोर्वर्षः १
९।३।२०। फलं देवतानुरतं।
प्रांते नानाप्राप्ति करो ॥ ।

तिच नेग सौख्य समायुक्तं प्रयोगारं
तर्गतो गुरुः राहो वर्षः १।१।
१० फलं नृपाश्रयं ज्वरं चोरं दुः
खं च प्राण संशय धन तयं च
कुरुते शनेरन्तर्गतस्तमः शुक्र
स्य वर्षः १।११।१०। फलं सुहृद
धुधनैः पूर्णो भार्य्या वित्त समन्वि
तः स्वर्ण सुखं च लभते सोस्यान्त
र्गते सिते रवे मासाः ६।२० फलं पर
दाराभिगमनं करोति स्वरदीप्तिः
जीवनस्य च संदेहं शने रन्तर्दशा।
गतः ॥ सोमस्य वर्षः १।४।२०।
स्त्रीनाशं कुक्षिरोगं च कफ पित्त
गदं शशी वंधुद्वेषं च कुरुते पं
गो रंतर्दशागतः कुजस्य मासाः
८।२६।४०। फलं देहदैन्यं
महारोगं नानादुःखानि भूमि
जः धननाशं च कुरुते शने रं
तर्दशागतः वुधस्य वर्षः १।६।
२६।४० फलं आरोग्यं विजयं
राज्यं वहुविज्ञानि सोमजः।
करोति त्वादरं लोके शने रंत
र्दशागतः एवं वर्षाः १०। गुर
रोः स्थूलदशा वर्षाः १६ तस्य
न्तर्दशा वर्षाः ३।४।७।२०। फलं
राज्यास्पदं तनय वित्त विलास

भोगान् पर्य्याप्त सौख्य धनधान्य
समाश्रयं च विद्या प्रसाद वररत्न
सुखार्थं भोगसिद्धिं दशास्तु रगु
रोः कुरुते प्रियत्वं राहोर्वर्षो २।
१० फलं वंधुद्वेषं मृषावादं स्था
नभ्रंशं निराश्रयं। कलहंकार
येद्धाकू गुरो रंतर्दशागतः शु
क्रस्य वर्षाः ३।८।१०। फलं
कलहं वंधुभिः सार्द्धं वित्तनाशं
मनः क्षतिं स्त्रीवियोगं च कुरुते
जीवस्यान्तर्गतः सितः रवे वर्षः १
दिनानि २० फलं वहुमित्रं वहु
धनं सौभाग्यं राजवल्लभं कुरुते
भास्करः शांतिं गुरोरन्तर्दशागतः
सोमस्य वर्षो २।७।२०। फलं
भोगाप्तो वहुभार्य्यः स्याद्
पुरोग विवर्जितः नृपं तल्पा
भवेच्चैव गुरो रंतर्दशागतः ॥
कुजस्य वर्षः १।४।२६।४०। फलं
तीक्ष्णरोषो रिपोर्हन्ता गजवर्जी
मदर्शनः सुखसौभाग्य संयुक्तः
कुजे चान्तर्गते गुरोः वुधस्य वर्षो २
११।२६।४०। फलं सुस्थोऽसुस्थः
सुखी दुःखी शत्रुवृद्धिः पुनः पु
नः देवार्चन परो नित्यं जीवस्यान्त
र्गते वुधे शने वर्षः १।९।७।२०।

फलं वेश्या जनाश्रयात् सौख्यं
भवेद्धित्र विवर्जितः लम नीति
मता नित्यं गुरो रंतर्गते शनौ ॥
एवं वर्षाः ९ ॥ राहोः स्वल्प
दशावर्षाः १२ तस्यांतर्दशाव
र्षः २।४। फलं भार्यादिदूष
ण निदान विवाद वंध शस्त्राभि
घातभयहीनपराक्रमस्था प्रमा
न्नसौख्यधन कांचन दीनदेहो रा
होर्दशाभवति जीवनसंशया।
य शुक्रस्य वर्षौ २ मासाः ४ शि
रोरोगं कृदेहं च कर्याद्भार्याच चं
चलां बांधवैः कलहो नित्यं राहो
रंतर्गते भृगौ रवेर्मासाः ८ फलं
शिरो रोग भयं घोरं स्वस्तु शो
कं च दारुणं हृदग्निभयं कु
र्याद्राहोरंतर्गतो रविः सोमस्य
वर्षः १।८। फलं स्त्री पुत्र कल
हंचैव वित्तनाशं मनः क्षतिं ।
करोति क्लेश मत्यर्थं राहो रंत
र्गतो विधुः कुजस्य मासाः १०।
२० फलं विष शस्त्राग्नि चौरेभ्यो
नियतं दारुणं भयं पातस्या
तर्गतः कर्याद्मरणं भूमिनंदनः
बुधस्य वर्षः १।१०।१२। फलं ज्वर
दारग्निसंपीडां कलहं स्वजनैः सह
भृत्यापत्येषु विद्वेषं कुर्यान्नृपाना
त्तरे बुधः शने वर्षः १।१।९।
फलं स्त्री पुत्रैः कलहो नित्यं बां
धवैः सहवैरिता भवेत्तत्र कथाङः
खं राहो रंतर्गते शनौ गुरो व
र्षौ २।१।१०। व्याधिडः खं भये
स्यक्तो देव ब्राह्मण पूजकः का
र्यसिद्धिर्भवेद्दिष्ट्या राहोरंतर्गते गु
रौ एवं वर्षाः १२॥ शुक्रस्य स्थूल
दशावर्षाः २१ तस्यांतर्दशा वर्षाः
४।१। मंत्रप्रचार रुचिर प्रमदा।
विलास सम्मान दान नृपपूजन
कोषलाभान् हस्त्यश्व यान परि
पूर्णमनोरथं च शौक्रीदशा स्रज
ति निश्चल राजलक्ष्मी रवेर्वर्षः १
देहस्त्रीव्रणकोंत स्त्रीव्रतापो ज्व
रान्विता व्यक्तः स्याद्बांधवैः सर्वैर्भा
र्गवांतर्गते रवौ सोमस्य वर्षौ २।११।
सम्माननाशो रोगश्च कार्यनाशश्च
नित्यशः शुक्रस्यांतर्गते चंद्रे स्त्रीना
शो नियतं भवेत् कुजस्य वर्षः १।
६।२०। उत्साही धन धान्याढ्यः
कल्पवृक्षसमनाः सुधीः भूमिला
भोभवेद्वैव शुक्रस्यांतर्गते कुजे
बुधस्य वर्षाः ३।३।२०। सर्वत्र लभ
ते सौख्यं मान संचय भूषणं भार्या

सुशीलतामेति भार्गवांतर्गते बुधे
शनेर्वर्षः ११।११।१० फलं शत्रुह
य मवाप्नोति मित्रवृद्धिश्च जायते
चौरादिभिस्य लाभः स्यात् शुक्र
स्यांतर्गते शनौ गुरोर्वर्षाः ३।४
१०। फलं राज पूजा सर्वप्रीतिः
कन्याजननमेव च भार्गवांतर्ग
ते जीवे चौरनष्टं च लभ्यते राहो
र्वर्षौ २।४। फलं वधनं वंधु
पुत्राद्ये र्वधनाशो रिपोर्भयं ।
शरीरं दैन्यमाप्नोति भृगो रंत
र्गतस्तमः एवं वर्षाः २१ इत्यत्र
दशा कथनं अथ प्रत्यंतर्द
शा ग्रहांतरं दिनं कृत्वा षष्टि
लब्धं फलं भवेत् फलाणि गण
येद्धीमान् रव्यादेः क्रमतो यथा र
वौ च वेदा वसवः सुधांशौ कुजे
च वाणाः शशिजे तथांकाः श
नावृतर्दिकु च वृहस्पतौ स्याद्राहो
तरंगाभृगुजे च रुद्राः ग्रहस्यांतर्द
शामासान् दिनीकृत्य गुणा हता
न् स्वांकलब्धं विजानीयात् प्रत्यं
तर्ग्रहवासरान् इति प्रत्यंतर्दशा
इति ज्योतिस्तत्वं युगभेदे दशा
विशेषा यथा सत्ये लग्नदशा चै
वत्रेतायां हरगौरिका द्वापरे ॥
योगिनी चैव कलौ नाक्षत्रिकीद
शा इति समयामृतं ॥
दशाधा दशा यथा योगिनी १
वार्षिकी २ नाक्षत्रिकी ३ लाग्निकी ४
मुकुंदा ५ विंशोत्तरा ६ त्रिंशोत्तरा
रा ७ पताकी ८ हरगौरी ९ दि
नदिशा १० इति ज्ञानरत्नं ॥
दशाकर्षः पुं प्रदीपः इति हे
मचंद्रः ॥
दशाकर्षी पुं प्रदीपः इतिहारा
वली ॥
दशांगुलं क्लीं खर्वुजं इतिभा
वप्रकाशः ॥
दशाननः पुं रावणः इतिशब्द
रत्नावली ॥
दशानिकः पुं दंतीवृक्षः इतिश
ब्दचंद्रिका ॥
दशारुहा स्त्री कैवर्त्तिका इति
राजनिर्घण्टः ॥
दशार्णः पुं देशविशेषः सविंध्य
पर्वतस्य पूर्वदक्षिणस्यां दिशि
वर्त्तते नदी विशेषे स्त्री इति शा
ब्दार्थकल्पतरुः ॥
दशार्हः पुं बुद्धः यदुदेशः ॥
तद्देशस्थे पुं भूम्नि इतित्रिका ।
ण्डशेषः ॥

1337

दशावतारः पुं विष्णुः इतित्रिका
ण्डशेषः तस्य दशावतारा यथा
मत्स्यः १ कूर्मः २ वराहः ३ न
सिंहः ४ वामनः ५ जामदग्न्यः ६
रामः ७ कृष्णः ८ बुद्धः ९ कल्की
१० इति वराहपुराणं अपिच ।
धर्मान्नारायणस्यांशः संभूत
श्चाक्षुषेऽन्तरे यज्ञश्च वर्त्तयाम
स्तदैवा वैवस्वतेऽन्तरे प्रादुर्भावे
ततस्तस्य वल्मात्यासीत् पुरोहि
तः युगाख्यायां च तस्यान्त आप
न्नेषु सुरेषु वै संभूतः स समुद्रा
न्ते हिरण्यकशिपोर्वधे द्वितीये
नरसिंहाख्ये रुद्रा स्यासीत् पुरो
हितः बलि संस्थेषु लोकेषु त्रे
तायां सप्तमं प्रति तृतीयेवा ।
मनस्यार्थे धर्मेणतु पुरोधसा
पता स्तिस्रः स्वता स्तस्य दिव्याः
संभूतयो द्विजाः मामष्याः स
प्तयेऽस्मे तु शापजा स्ताश्चिवो
धत त्रेता युगे तु प्रथमे दत्ता
त्रेयो बभूव ह नष्टे धर्मे चतुर्थ्यां
शेमार्कण्डेय पुरः सरः पंचमः
पंचदशपांतत्रेतायां संबभूव ह
मांधाता चक्रवर्त्ती तु तस्यानूथ्यः
पुरः सरः एकोनविंशत्या त्रेतायां
सर्वक्षत्रांतकृद्विभुः जामदग्न्यस्त
थाषष्ठो विश्वामित्र पुरःसरः च
तुर्विंशे युगे वस्ता वशिष्ठेन पुरो
धमा सप्तमो रावणस्यार्थे जज्ञे
दशरथात्मजः अष्टमे द्वापरे ।
विसृ रक्षाविंशोपरो शरात् वेद
व्यास स्तथा जज्ञे जातुकर्ण पुरः
सरः कर्तुं धर्मव्यवस्थानमसुरा
णां प्रणाशनं बुद्धो नवमके जज्ञे
तपसा पुष्करेक्षणः देवकांव
सुदेवेन हैपायन पुरःसरः ।
तस्मिन्नेव युगे क्षीणे संध्या शि
ष्टे भविष्यति कल्की विष्णुयशा
नाम पाराशर्य पुरःसरः दशमो
भाव्य संभूतो याज्ञवल्क्य पुरःसरः
इतिमत्स्यपुराणं ॥

दशाश्वः पुं चंद्रः इतिशब्दरत्ना
वली ॥

दशास्यः पुं रावणः इति भूरि
प्रयोगः ॥

दशास्यजित् पुं श्रीरामः इतिभू
रिप्रयोगः ॥

दशेन्धनः पुं प्रदीपः इतित्रिका
ण्डशेषः ॥

दशेरः पुं हिंस्रः इत्युणादिकोषः

दशेरकः पुं मरुदेशः तद्दे ॥

शस्थे पुं भूम्नि इति हेमचंद्रः ॥

दशेरुकः पुं मरुदेशः इतिभू
रिप्रयोगः ॥

दस ३ र यङ् उत्क्षेपे इति क
विकल्पद्रुमः ॥

दस ३ क भासि इतिकविकल्पद्रु
मः दस ३ क ङ. दर्शने दंशे इति
कविकल्पद्रुमः ॥

दस्मः पुं यजमानः चोरः कृता
शनः इतिमेदिनी खलः इति
शब्दरत्नावली ॥

दस्युः पुं चोरः रिपुः महासाहि
सिकः इतिशब्दरत्नावली ॥

दस्रं क्लीं शिशिरः इतिसंक्षिप्त
सारोणादिवृत्तिः ॥

दस्रः पुं खरः अश्विनीसुतः इ
तिमेदिनी ॥

दस्रौ पुं अश्विनौ इत्यमरः ॥
द्विवचनांतोऽयंशब्दः ॥

दस्रदेवता स्त्री अश्विनीनक्षत्रं
इतिहेमचंद्रः ॥

दस्रसूः स्त्री संज्ञा सा सूर्यपत्नी
अश्विनीकुमारमाता च इति त्रि
काण्डशेषः दह ३ क दीप्तौ दा
हे इति कविकल्पद्रुमः ॥

दहः पुं अग्निः इति सिद्धांतकौ
मुद्यामुणादिवृत्तिः दावानलः

दहनं क्लीं दाहः भस्मीकरणं
पोड़ानइतिभाषा दहधातोर्भा
वे अनट्प्रत्ययः ॥

दहनः पुं अग्निः चित्रकः भल्ला
तकः दुष्टचेतसि त्रि इतिमेदिनी
कपोतः इति राजनिर्घण्टः ॥

दहनकेतनः पुं धूमः इति हे
मचंद्रः ॥

दहनप्रिया स्त्री स्वाहा इतित्रि
काण्डशेषः ॥

दहनागुरु क्लीं दाहागुरु इतिरा
जनिर्घण्टः ॥

दहनारातिः पुं जलं इति रा
जनिर्घण्टः ॥

दहनीयः त्रि दाह्यः दहनार्हः
दहधातोः कर्मण्यनीयप्रत्यये
नतिष्पन्नः दहनोपलः पुं सूर्य
कांतमणिः इतिहेमचंद्रः दहनो
पमोप्यत्र ॥ दहरः पुं मूषि
का स्वल्पः भ्राता बालकः इति
विश्वमेदिन्यौ सूक्ष्मः यथा उदर
मुपासते य ऋषिवर्त्मसु कूर्पदृशः
परिसरपद्धतिं हृदयमारुणयो द
हरं इतिश्रीभागवतं ॥ ॥

दह गै दाहे भस्मीकरणे इतिया
वत् इतिकविकल्पद्रुमः ॥
इत्युणादिकोषः नरकं वरुणः
इतिसंक्षिप्तसारे उणादिवृत्तिः
दक्ष ऊ स्पादे शीघ्रकरणे इतिया
वत् वृद्धौ इतिकविकल्पद्रुमः ॥
दक्ष म ष ऊ गत्यां वधे इतिक
विकल्पद्रुमः ॥

दक्षः पुं प्रजापतिविशेषः स
ब्रह्मणोदक्षिणांगुष्ठाज्जातः त
तःप्रभृति मैथुनेन प्रजा जाताः
यथा शारीरानाथ वक्ष्यामि मात्
हीनान्प्रजापतेः अंगुष्ठाद्दक्षि
णाद्दक्षः प्रजापतिरजायत
यथाससर्जचैवादौ तथैवशृणु
तद्द्विजाः यदा तु सृजतस्तस्य
देवर्षि गणपन्नगान् नवृद्धिम
गमल्लोकस्तदामैथुनयोगतः
दक्षःपुत्रसहस्राणि पांचजन्यम
जीजनत् इतिमत्स्यपुराणे अस्य
भार्य्या स्वायंभुव मनुकन्या प्रसू
तिः तस्याषोडशकन्या यथा श्र
द्धा १ मैत्री २ दया ३ शान्तिः ४ तुष्टिः
५ पुष्टिः ६ क्रिया ७ उन्नतिः ८ बुद्धिः
९ मेधा १० स्मृतिः ११ तितिक्षा १२ ह्रीः १३
स्वाहा १४ स्वधा १५ सती १६ तस्य ॥

त्रिसहस्र पुत्राः दक्षप्रजापतिर्हि
ती जन्मनि दक्षप्राचेतसः सुतोभू
त्वा षष्ठमन्वन्तरे प्रजा सृष्टिंचका
र सच असिक्न्यां पत्न्यां षष्टिंकन्या
जनयित्वा प्रजापतिभ्योदत्तवान्
धर्म्माय दश कश्यपाय सप्तदश
चंद्राय सप्तविंशतिः कृशाश्वाय
द्वे भूताय द्वे अंगिरसे द्वे इतिश्री
भागवते तात्पर्य्यः ॥ मुनि।
भेदः हरहृषिः द्रुमभेदः वह्निः
इति विश्वः महेशः। इति
शब्दरत्नावली पटौ त्रि इति
मेदिनी शेषस्य पर्य्यायः ॥
चतुरशोहेद्रष्टव्याः ॥

दक्षकन्या स्त्री दुर्गा इति त्रिका
ण्डशेषः ॥

दक्षजा स्त्री दुर्गा इतिहेमचंद्रः ॥

दक्षजापतिः पुं चंद्रः इति हेमचं
द्रः शिवश्च ॥

दक्षसावर्णिः पुं नवममनुः अ
स्मिन्मन्वंतरे ऋषभ नामाभग
वदवतारः अद्भुत नामा इंद्रः पार
मरीचिगर्भाद्या देवाः द्युतिमद्या
सप्तर्षयः भूकेतु दीप्तिकेतुप्रभृत
यो मनुपुत्रा भविष्यंति इतिश्री
भागवते ॥

दक्षा स्त्री पृथिवी इतिमेदिनी
दक्षाध्वरध्वंसकृत पुं शिवः इ
तिहलायुधः ॥

दक्षाय्यः पुं गरुडः गृध्रः इति
सिद्धांतकौमुद्यामुणादिवृत्तिः

दक्षिणः त्रि दक्षिणोद्भूतः सर
लः परछंदानुवर्त्ती अवामः इ
तिमेदिनी दक्षः अपसव्य ॥
दाहिन इति भाषा इति हेमचं
द्रः चतुर्थी पत्यन्तर्गत पति वि
शेषः तस्यलक्षणं यथा स
कल नायिका विषय सम सह
जानुरागः अस्योदाहरणं यथा
प्रत्नस्मरेस्फुरति पक्ष्मदृशां सह
स्रमद्विहृदयं कथय कुत्रनिवेश
यामि इत्याकलय्य नयनाम्बुरु
हे निमील्यरोमांचितेन वपुषा
स्थित मच्युतेन इति रसमंजरी

दक्षिणहस्ता प्रदाने दोषयथा

दक्षिणहस्ताप्रदाता च सर्पश्च स
प्तजन्मसु ततो भवेद्धस्तहीनो मा
नवश्च ततःशुचिः इति ब्रह्मवै
वर्त्ते प्रकृतिखण्डे ॥ ॥
दक्षिणहस्तेप्रतिग्रहो यथा ॥
ॐकारमुच्चरन्प्राज्ञो द्विजाय सकु
मोदकं गृह्णीयाद्दक्षिणे हस्ते तदेव
स्ति

कीर्तयेत् इत्यादित्यपुराणं ॥

दक्षिणकालिका स्त्री आद्याशक्तिः
यथा ऊर्द्ध्वे वामे कृपाणं परक
मलतले छिन्नमुण्डं तथाधः स
व्येचाभीर्वरंचत्रिजगदघहरे दक्षि
णे कालिकेच इतितंत्रसारः ॥

दक्षिणतः अ दक्षिणस्यादिशि
इत्यमरटीकायां रायमुकुटः ॥

दक्षिणपूर्वा स्त्री पूर्वदक्षिणको
णः इतिव्याकरणं ॥

दक्षिणस्थः पुं सारथिः इत्यम
रः दक्षिणस्थितेत्रि ॥

दक्षिणा स्त्री दक्षिणदिक् तत्प
र्य्यायः अवाची १ शमनी २ यामी ३
वैवस्वती इति राजनिर्घण्टः द
क्षिणवायुगुणाः षड्रसयुक्तत्वं
बलहितत्वं बलवर्द्धनत्वं चक्षु
र्हितत्वं वीर्यवर्द्धनत्वं रक्तपित्त
प्रशमनत्वं सौख्यकान्तिमत्ति प्र
दत्वं प्रास्यनाशित्वं विदाहित्वं
अस्त्रमारुतकोपनत्वं गाणपदा
दिकीटानां जनकत्वंच इतिद्रव्य
गुणाः अस्यादिशोऽधिपतिः द्व
षकन्या मकरराशयः इतिज्योतिषं
यज्ञादि विधि दानं इति मेदिनी ॥

प्रतिष्ठा इति हेमचन्द्रः यज्ञादि सम्पादकत्वेन विहितदाने सा यज्ञपत्नी श्रीकृष्णदक्षिणांशसम्भूता यथा कार्त्तिकी पूर्णिमायान्तु रासे राधामहोत्सवे आविर्भूता दक्षिणांशात् कृष्णस्य तेन दक्षिणा दक्षिणायाः प्रदानेन तस्या वृद्धिर्यथा यज्ञो दक्षिणया सार्द्धं पुत्त्रेण च फलेन च कर्म्मिणां फलदाता चेत्येवं वेदविदो विदुः कृत्वा कर्म्म च तस्यैव तूर्णं दद्याच्च दक्षिणां तत् कर्म्म फलमाप्नोति वेदैरुक्तमिदं मुने कर्त्ता कर्म्मणि पूर्णे च तत्क्षणं यदि दक्षिणां न दद्याद्ब्राह्मणेभ्यश्च दैवेनाज्ञानतोऽथवा मुहूर्त्ते समतीते तु द्विगुणा सा भवेद्ध्रुवं एकरात्रे व्यतीते तु भवेत् शतगुणा च सा त्रिरात्रेण दश गुणा सप्ताहे द्विगुणा ततः मासे लक्षगुणा प्रोक्ता ब्राह्मणानाञ्च वर्द्धते संवत्सरे व्यतीते तु सा त्रिकोटि गुणा भवेत् कर्म्म तद्यजमानानां सर्व्वञ्च निष्फलं भवेत् स च ब्रह्मस्वापहारी न कर्म्मार्होऽशुचिर्नरः दरिद्रो व्याधियुक्तश्च तेन पापेन पातकी तद्। गृहाद्याति लक्ष्मीश्च शापं दत्त्वा सुदारुणं पितरो नैव गृह्णन्ति तद्दत्तं श्राद्धतर्पणं एवं सुराश्च तत् पूजां तद्दत्ताग्नौ हुताहुतिं दाता न दीयते दानं गृहीता च न याचते उभौ तौ नरकं यातश्छिन्नरज्जुर्यथा घटः नार्पयेद्यजमानश्चेद्याचितां च दक्षिणां भवेद्ब्रह्मस्वापहारी कुम्भीपाकं व्रजेद्ध्रुवं वर्ष लक्षं वसेत्तत्र यमदूतेन ताडितः ततो भवेत् स चाण्डालो व्याधियुक्तो दरिद्रकः ॥ पातयेत् पुरुषान् सप्त पूर्व्वांश्च सप्तजन्मनः इति ब्रह्मवैवर्त्ते प्रकृतिखण्डं नायिकाविशेषः यथा यो गौरवं भयं प्रेमसद्भावं पूर्व्वनायके न मुञ्चत्यन्यसक्तापि सा ज्ञेया दक्षिणा बुधैः इति विष्णुपुराणटीकायां स्वामी ॥

दक्षिणाग्निः पुं यज्ञाग्निविशेषः इत्यमरः दक्षिणस्यां दिशोऽग्निर्दक्षिणाग्निः इति भरतः अस्य नाम कारणं यथा दक्षिणस्य दक्षिणा ॥ स्वाहोऽस्मि भूत्वा यतोऽमरान् । नयसे दक्षिणा भागं दक्षिणाग्निस्ततोऽभवत् इति वराहपुराणं ।

दक्षिणाचलः पुं मलयपर्व्वतः इति

इति हेमचन्द्रः ॥

दक्षिणाचारः पुं आचारविशेषः यथा स्वधर्म्मनिरतो भूत्वा पञ्चतत्त्वेन पूजयेत् स एव दक्षिणाचारः शिवो भूत्वा शिवां यजेत् इत्याचारभेद तन्त्रे ॥

दक्षिणात् अव्य दक्षिणस्यां दिशि इत्यमरटीकायां रायमुकुटः ॥

दक्षिणापथजन्मा पुं जातिविशेषः यथा दक्षिणापथजन्मानः सर्व्वे नरवरान्धकाः गुहाः पुलिन्दाः शवराः चुचुका मद्रपैः सह उत्तरापथजन्मानः कीर्त्तयिष्यामि तानपि यौनकाम्बोजगान्धाराः किराता वर्व्वरैः सह एते पापकृतस्तात चरन्ति पृथिवीमिमां इति महाभारते मोक्षधर्म्मः ॥

दक्षिणामुखः त्रि दक्षिणां दिङ्मुखः यथा स्नात्वा गयाश्राद्धं दक्षिणामुखभोजनं न जीवत् पितृकः कुर्य्यात् कृतेन च । पितृहा भवेत् इति तिथ्यादितत्त्वं

दक्षिणायनं क्ली सूर्य्यस्य दक्षिणागतिः सा श्रावणादिषट्सु मासेषु भवति इत्यमरः तत्रजातस्य फलं यथा याम्यायने यस्य भवेत् प्रसू ॥ तिः शठः कठोरः पिशुनस्वभावः चतुष्पदाढ्यः कृषिमानदृष्टवीर्य्यो मलाक्तो मनुजः प्रतापी इति कोष्ठीप्रदीपः कर्कटसङ्क्रान्ति यथा मृगकर्कट सङ्क्रान्ती द्वे तु दग्दक्षिणायने विषुवती तुला मेषे गोलमध्ये तथापरो ॥ इति तिथ्यादितत्त्वं ॥ अयनचक्रं यथा चक्रं सारे विलिख्य ग्रहपतिरयने सङ्क्रमे चेत् करोति यस्मिन् ऋक्षेऽन्नदन्तं मरणभयकरं स्थूलमूले निदध्यात् तत्पश्चाद्दार स्थले विविधभयकरे पृष्ठपार्श्वेऽर्थलाभः सौख्यं स्याच्चक्रगर्भे विविधमुनिमतं विद्धि । वामक्रमेण इति ज्योतिषं ॥

दक्षिणारुः पुं व्याधकर्तृक दक्षिणाङ्गव्रणित मृगः इत्यमरः

दक्षिणार्हः त्रि दक्षिणायोग्यः अस्याशये दक्षिणामर्हति यः इति भरतः तत्पर्य्यायः दक्षिणीयः २ दक्षिण्यः ३ इत्यमरः

दक्षिणावर्त्तकी स्त्री वृश्चिकालिः इति राजनिर्घण्टः

दक्षिणाशापतिः पुं यमः इति हेमचन्द्रः ॥

दक्षिणीयः त्रि दक्षिणार्हः इत्यम
रः दक्षिणेन वा दक्षिणदिशि
इति रायमुकुटः दक्षिणभागे य
थादक्षिणेन हरिं रुद्रो गोविंद
मनिनेश्वरः येनेष्टा हरि रीशांस्त
नेनेश समिनो ग्रंथिकाः इतिमु
ग्धबोधं ॥
दक्षिणेर्मा पुं व्याधशरावाताल
दक्षिणांग ब्रणयुक्त मृगः तत्
पर्य्यायः दक्षिणारुः २ इत्यमरः
दक्षिण्यः त्रि दक्षिणार्हः इत्यमरः
दा दाने इतिकविकल्पद्रुमः ॥
दा डु म लि दाने इति कवि
कल्पद्रुमः ॥
दाल लूनौ इतिकविकल्पद्रुमः
दा स्त्री शोधनं दानं छेदः उप
तापः रक्षा इतिमेदिनी ॥ दा
कः पुं यजमानः इत्युणादिको
षः दाता इति सिद्धांतकौमु
द्यामुणादिवृत्तिः दाडकः पुं दंतः
इतिशब्दार्थकल्पतरुः ॥
दाडिमः त्रि एला इति मेदिनी ।
फलवृक्षविशेषः तत्पर्य्यायः ।
करकः २ इत्यमरः पिण्डपुष्पः
३ दाडिम्बः ४ पर्वरुट् ५ स्वादम्लः
६ पिण्डीरः ७ फलषाडवः ८ शुक
वल्लभः ९ इतित्रिकांडशेषः ॥
रक्तपुष्पः १० इतिरत्नमाला दाडि
मीसारः ११ कुट्टिमः १२ फलषाडवः
१३ मूर्द्धत्वषमध्योपि रक्तबीजः १४
सफलः १५ दन्तबीजकः १६ मधुबी
जः १७ कुचफलः १८ रोचनः १९ म
णिबीजः २० कल्कफलः २१ वृत्त
फलः २२ सुनीलः २३ नीलपत्रः २४
अस्यगुणाः मधुराम्लत्वं कषाय
त्वं कासवात कफ श्रम पित्त विना
शित्वं ग्राहित्वं दीपनत्वं लघुत्वं उ
ष्णत्वं शीतलत्वं रुचिदात्वंच इति
राजनिर्घण्टः हृद्यत्वं अम्लत्वं स्वा
दुत्वं तृष्णा नाशित्वं कंठशोधन
त्वं कफ पित्ताविरोधित्वंच ॥ द्विवि
धं तत्तद्वित्तयं मधुरंचाम्लमेवच म
धुरं तत्र त्रिदोषघ्नं मन्यं वात क
फापहं ॥ इतिराजवल्लभः ताप
हारि मधुरं लघु पथ्यं इति राजनि
र्घण्टः ॥ तत्र फलं त्रिविधं स्वादं स्वा
द्वम्लं केवलाम्लकं तत्र स्वादु त्रिदोष
घ्नं तृड्दाह ज्वर नाशनं हृत् कंठ मु
खरोगघ्नं तर्पणं शुक्रलं लघु क
षायानुरसं ग्राहि स्निग्धं मेदोव

लावहं स्वाद्वम्लं दीपनं रुच्यं ।
किंचित् पित्तकरं लघु अम्लंतु
पित्तजनक मन्यं वात कफापहं
इतिभावप्रकाशः ॥
दाडिमपुष्पकः पुं रोहितकवृ
क्षः रोहडा इतिख्यातः इत्यमरः
दाडिमप्रियः पुं शुकपक्षी इ
ति शब्दरत्नावली ॥
दाडिमभक्षणः पुं कीरपक्षी इ
तिशब्दचंद्रिका ॥
दाडिमीसारः पुं दाडिमः इति
राजनिर्घण्टः ॥
दाडिम्बः पुं दाडिमः इति त्रिका
ण्डशेषः ॥
दाढा स्त्री दन्तविशेषः तत्पर्य्यायः
दंष्ट्रा २ जम्भः ३ इति हेमचंद्रः ॥
प्रार्थना समूहः इतिशब्दार्थ
कल्पतरुः ॥
दाडिका स्त्री मुखावयवविशेषः
दाडि इति भाषा तत्पर्य्यायः ॥
दंष्ट्रिका २ इतिहेमचंद्रः ॥ दा
णाजिनिकः त्रि दाम्भिकः इति
हेमचंद्रः ॥
दातं त्रि छिन्नं इत्यमरः ॥
दाता त्रि दानकर्त्ता तत्पर्य्या
यः दारुः २ सुविरः ३ इतित्रिका
ण्डशेषः ॥
दात्यूहः पु स्त्री पक्षिविशेषः ।
डाउकः इति भाषा तत्पर्य्यायः ।
कालकण्ठकः २ इत्यमरः अत्यूहः
३ दात्योहः ४ कालकंठः ५ ॥
मांसगः ६ शितिकण्ठः ७ कचाट्
रः ८ इति शब्दरत्नावली काकम
द्गुः ९ इति त्रिकाण्डशेषः जल
काकः इतिराजनिर्घण्टः चात
कः इति मेदिनी मेघः इतिशब्द
रत्नावली ॥
दात्योहः पुं स्त्री दात्यूहः इति
शब्दरत्नावली ॥
दात्रं क्ली अस्त्रविशेषः दाइति
कास्ता इतिच भाषा इति भरतः
तत्पर्य्यायः लवित्रं २ इत्यमरः
खड्गीकं ३ इतिशब्दरत्नावली ॥
दात्री स्त्री दानकर्त्री इतिव्याकरणं
दात्वः पुं दाता इति सिद्धांतकौमु
द्यामुणादिवृत्तिः ॥
दाधिकं त्रि दधिसंस्कृतवस्तु इति
हेमचंद्रः ॥
दान म आर्जवे ऋजुकरण इति
यावत् छिदि इतिकविकल्पद्रु
मः दानं क्ली गजमदः पालनं
छेदनं शुद्धिः इति मेदिनी ॥

पूतकोटरकीटजमधु अस्य गुणाः
पूतत्वं दीपनत्वं कफच्छर्दिमेह
नाशित्वंच इति राजवल्लभः देवब्रा
ह्मणादिसम्प्रदानक द्रव्यमोचनं
तत्पर्य्यायः त्यागः २ विहापितं ३
उत्सर्जनं ४ विसर्जनं ५ विश्राण
नं ६ वितरणं ७ स्पर्शनं ८ प्रति
पादनं ९ प्रादेशनं १० निर्वपणं
११ अपवर्जनं १२ अंहतिः १३।
इत्यमरः दायः १४ इति त्रिका
ण्डशेषः प्रदानं १५ ददनं १६
विश्राणनं १७ दत्तिः १८ अंहती
१९ उत्सर्गः २० अतिसर्जनं २१
स्पर्शः २२ विसर्गः २३ दानं
२४ प्रदेशनं २५ इति शब्दरत्नाव
ली तस्य लक्षणादि यथा अ
र्थीनामुदिते पात्रे श्रद्धया प्रतिपा
दनं दानमित्यभिनिर्दिष्टं व्याख्या
ने तस्य वक्ष्यते संप्रदानस्वत्वा।
पादकद्रव्यत्यागो दानमिति दाता
प्रतिग्रहीता च श्रद्धा देयं च धर्म
युक् देशकालौ च दानानामङ्गा
न्येतानि षड्विदुः मनसा पात्रमु
द्दिश्य भूमौ तोयं विनिःक्षिपेत् वि
द्यते सागरस्यान्तो दानस्यान्तो न वि
द्यते परोद्दे कल्पिते दानं पा ॥

त्राभावे कथं भवेत् गोत्रजेभ्य
स्तथा दद्यात् तदभावे स्ववंधु
षु यद्दात्तुन संकल्पः स्यात्तं च स
र्वह्निवंधवाः दद्यात् स्वजातिषि
ष्वभ्यस्तदभावेऽप्सु निःक्षिपेत्
स्नात्वा शुद्धे समे देशे गोमयेनो
पलेपिते वसित्वा वसने शुद्धे दा
नं दद्यात् सदक्षिणं पञ्चगोदश
गुर्दद्यात् दशदद्याच्च गोशती।
शतं सहस्रगुर्दद्यात् सहस्रं वक्र
गोधनः ग्रासार्द्धमपि ग्रासं न
र्थिभ्यः किन्न दीयते इच्छानुरूपो
विभवः कदा कस्य भविष्यति अ
यरावाधम क्लेशप्रयत्नेनार्जितं
धनं स्वल्पं वा विपुलं वापि देय
मित्यभिधीयते विक्रयं चैव दानं
च न नेयाः स्युरनिच्छवः दाराः पु
त्राश्च सर्वस्वमात्मन्येव च योजयेत्
आपत्काले च कर्त्तव्यं दानं विक्र
य एव च अन्यथा न प्रवर्त्तेत इति
शास्त्रार्थ निश्चयः यज्ञो दानं त
पो जाप्यं श्राद्धं च सुरपूजनं पिष्ट
गायां कृतं सर्वकोटिकोटिगुणं
भवेत् शिवस्य विष्णो रमेशस्य स
न्निधौ दत्तमक्षयं शालग्रामशि
लायत्र तत्तीर्थं योजनत्रयं तत्र दा

नं च होमश्च कोटि कोटिगुणं भ
वेत् यद्यत्र दुर्लभं द्रव्यं यस्मिन्
कालेपि वा पुनः दानार्हौ देश।
कालौ तौ स्यातां श्रेष्ठौ न चान्य
था पात्रेभ्यो दीयते नित्यमन
पेक्ष्य प्रयोजनं केवलं धर्मबुद्ध्या
यद्धर्मदानं प्रचक्षते सहस्रगु
णितं दानं भवेद्दत्तं युगादिषु
कर्म श्राद्धादिकं चैव तथा म
न्वन्तरादिषु आहारं मैथुनं नि
द्रां संध्याकाले विवर्जयेत् कर्म
चाध्ययनं चैव तथा दान प्रतिग्र
हौ तामसेन तु यज्ञेन दानेन तप
सा तथा निरये जन्म चेहोत्तहैहि
विद्यात्तु तामसीं राजसेन तु य
ज्ञेन दानेन तपसा तथा निरय
स्वर्गयोर्जन्म कृत्वा राज्यश्रियायु
तं सात्त्विकेन तु यज्ञेन दानेन
तपसा तथा देवलोके ध्रुवं।
वासो देवसायुज्यमेव च गत्वा
यद्दीयते दानं तदनन्तफलं स्मृ
तं सहस्रगुणमाकृष्य याचितेन च
तदर्द्धकं आशां दत्वा ह्यदाता
दानकाले निषेधकं दत्वा सं
तप्यते यस्तु तमाकृष्य वा
तकं यो मत्त्यः प्रतिश्रुत्यापि पु
नः मत्त्यः प्रयच्छति आत्मानं।

संक्रमं कृत्वा परां स्तारयते ह्रियः ॥
यस्य यद्दीयते वस्त्रमलंकारादि
किंचन तेषां देवमन्त्राभ्यां कृत्वा प्रा
त्तां पूजनं तत्तस्य मूल मन्त्रे
ण प्रतिनाम्ना निवेदयेत् योर्चि
तः प्रतिश्रुत्यादद्याद्र्चित मेव
वा तावुभौ गच्छतः स्वर्गं नरकं च
विपर्य्यये इति मुद्धितन्त्रं ॥
दानं त्रिविधं सात्त्विकं राजसं तामसं
च सात्त्विकं यथा दातव्यमिति य
दानं दीयतेऽनुपकारिणे देशेका
ले च पात्रे च तद्दानं सात्त्विकं स्मृ
तं राजसं यथा यत्तु प्रत्युपका
रार्थं फलमुद्दिश्य वा पुनः।
दीयते च परिक्लिष्टं तद्दानं राजसं
विदुः तामसं यथा अदेशका
ले यद्दानमपात्रेभ्यश्च दीयते
असत्कृतमवज्ञातं तत्तामस
मुदाहृतं इति श्रीभगवद्गीता ॥
हस्त्यश्व गा मनड्वाहं मणि मु
क्तादि कांचनं परोक्ते हरते यस्तु
पश्चाद्दानं प्रयच्छति न स गच्छ
ति वै स्वर्गं दाता रौरव भागिनः
अनेन कर्मणा युक्ताः पच्यन्ते न
रकेऽधमाः इति मत्स्यपुराणं।
नित्यनैमित्तिकादि भेदेन त
च्चतुर्विधं यथा नित्यनैमि

तिकं काम्यं त्रिविधंदानमुच्यते च
तुर्थंविमलंप्रोक्तंसर्वदानोत्तमोत्त
मे अहन्यहनियत्किंचिद्दीयतेनु
पकारिणे अनुद्दिश्यफलंतत्स्या
द्ब्राह्मणायच नित्यकं यत्पापोप
शान्त्यर्थं दीयते विदुषां करे नैमि
त्तिकंतदुद्दिष्टंदानंसद्भिरनुत्तमं
अपत्यविजयैश्वर्यस्वर्गार्थं यत्
प्रदीयते दानंतत् काम्यमा
ख्यात मृषिभि धर्मचिंतकैः ॥
यदीश्वर प्रीणनार्थं ब्रह्मवित्सु
प्रदीयते चेतसाधर्मयुक्तेनदा
नंतद्विमलं शिवं इति कूर्मपुरा
णं दानपतिः पुं सततदाता इति
जटाधरः अक्रूरः इतिश्रीभाग
वते दानवः पुं असुरः इत्यमरः
सदक्षकन्या दनुगर्भे कश्यपाज्जा
तपकषष्टिसंख्याकस्तेषुप्रधान
प्रधानास्तेषांनामानि यथा हि
रण्यकशिपु १ शंबरः २ अरिष्टः ३ हयग्री
वः ४ विभावसुः ५ अयोमुखः ६
शंकुशिराः ७ स्वर्भानुः ८ कपि
लः ९ अरुणः १० पुलो
मा ११ वृषपर्वा १२ एकचक्रः
१३ तापनः १४ धूम्रकेशः १५
विरूपाक्षः १६ विप्रचित्ति १७ दुर्जयः
१८ इति श्रीभागवतं ॥
दानवज्रः पुं वैश्यः इतिपुराणं
दानवारिः पुं देवता इत्यमरः
दानशीलः त्रि दाता तत्पर्यायः
वदान्यः २ वदन्यः ३ इत्यहेमचं
द्रः दानशौण्डः त्रि बहुप्रदः इत्य
मरः दानीयः त्रि सम्प्रदाने इत्य
मुग्धबोधं ॥
दानुः त्रि दाता विक्रांतः इति
मेदिनी शर्म वायुः इति सं
क्षिप्तसारे उणादिवृत्तिः ॥
दान्तः त्रि तपः क्लेशसहः दमि
तः इत्यमरः दाता इति संक्षिप्तसा
रे उणादिवृत्तिः दमनक वृक्षेपि
त्रिषु वृषे च पुं इति राज
निर्घण्टः ॥
दान्तिः स्त्री तपः क्लेशसहिष्णुता
तत्पर्यायः दमथुः २ दमः ३ इत्य
मरः दापितः त्रि साधितः इत्यम
रः धनादिना आयत्तीकृतः इ
तिभरतः धृती इतिख्यातं यस्मै
दत्तं स इतिरमानाथः दंडितः
इति विद्याविनोदः शोधितद्र
व्यं इतिनयनानंदः दापितः
इति पाठोऽपि इतिकालिंग
पुरुषोत्तमौ ॥ ॥ ॥

दाम न क्ली स्त्री यत्रैकस्मिन् बहुम
ग्रहयुक्ते अनेक गावो बध्यन्ते त
त्दाङ्क्ति इति टीका इतिचभाषा
तत्पर्यायः संदानं २ इत्यमरः।
रज्जुः इतिदामोदरदर्शनात् दा
मनपर्वे न क्ली दमनभंजनति
थिः सा चैत्र शुक्ल चतुर्दशी
इतितिथ्यादितत्वं ॥
दामनी स्त्री पशुबंधनरज्जुः त
त्पर्यायः पशुरज्जुः २ इत्यमरः
दामलिप्तं क्ली तमोलिप्तदेशः
इति हेमचंद्रः ॥
दामा स्त्री दाम इतिभरतः ॥
दामांचनं क्ली अश्वादेः पादबंध
नरज्जुः इति हेमचंद्रः ॥
दामांचलं क्ली एकशफाङ्घ्रिबंधः
अश्वादि पाद बंधन रज्जुः इति
हारावली ॥
दामोदरः पुं विष्णुः इत्यमरः ॥
भूतादिर्विशेषः इतिहेमचंद्रः
दांभिकः पुं स्त्री वकपक्षी इति
राजनिर्घण्टः दंभयुक्ते त्रि
दाय ञ ङ. दाने इतिकविकल्प
द्रुमः दायः पुं यौतकादि देय।
धनं कन्यादानकालेजामात्रा
दिभ्योदत्तं तित्ताद्यो ब्राह्मणादि
भ्यश्च यद्दं ॥ ॥
यंदीयते तत् इतिभरतः ॥
तत्पर्यायः हरणं २ इत्यमरः
सोल्लुंठभाषणं विभक्तव्यपि
तृद्रव्यं दानं इति मेदिनी ॥
स्थानं खण्डनं इति शब्दरत्ना।
वली लयः इत्यजयपालः दा
यकः त्रि दाता यथा हितावित्र
तिदायक इति भक्तिरसामृतसिं
धुः दायबंधुः पुं भ्राता इति श
ब्दरत्नावली ॥
दायभागः पुं सम्बंधिमात्रेणसं
बंधिधनविभागः पूर्वद्रव्यस्वामि
संबंधाधीनं तत्स्वाम्युपरमे यत्र
द्रव्येस्वत्वं तत्र निरूढो दायशब्द
स्तस्य विभागः एकदेशगतस्वे
त्वं तद्धिरण्याद्यावृत्तस्त्वस्य
स्यविनिगमना प्रमाणाभावेन
वैशेषिकव्यवहारानर्हतयाऽव्य
वस्थितस्य गुटिकापातादिना व्यं
जनं अथवा विशेषेण भजनं स्व
त्वापनयायत्र चैकं दासीगवादि
कं बहुसाधारणं तत्रापि तत्तत्
कालविशेष वहन दोहन फले
न स्वत्वंव्यज्यते अथदायाधिका
रक्रमेषु धनाधिकारिणः तत्रा
दौसन्तधने औरसपुत्रस्याधि।
कारः ॥

तदभावे पौत्रस्य तदभावे प्रपौ
त्रस्य मृतपितृकपौत्रमृत पिता
मह क प्रपौत्रयोः पुत्रेणसह
तुल्याधिकारः एषामभावे
पत्नीधनाधिकारिणी तत्रायं वि
शेषः पत्नी धनं भुंजीत एव न
तु तस्यदानाधमनविक्रयान् कर्त्त
मर्हति किंतुभर्त्तुरौर्द्धदेहिकक्रिया
र्थंदानादिकमप्यनुमतं वर्त्तना
शक्तौआधमनमप्यनुमतं तद
शक्तौ विक्रयणमपि भर्त्तुरौर्द्ध
देहिकक्रियार्थं मर्थानुरूपं भ
र्त्तृ सपिण्ड भर्त्तृगुरु भर्त्तृदौहि
त्रसंतान भर्त्तृभागिनेय भर्त्तृ
मातुलेभ्योदद्यात् एतेषामभा
वेवपितृ कुले दद्यात् पत्न्यभा
वेदुहिता तत्रापि प्रथमं कुमारी
अत्रायं विशेषः कन्याजाताधि
कारा पश्चात् परिणीता सतीअ
विद्यमानपुत्रायदिस्यात्तदा तत्
पितृदायेसपुत्रायाः संभावितपु
त्राया भगिन्यास्तुल्याधिकारः कु
मार्य्यभावेचोढायाः पुत्रवत्याः संभा
वितपुत्रायाश्चतुल्याधिकारः एतयोरे
कतराभावेऽन्याधिकारिणी एत
योरभावेपि वंध्यापुत्रहीन विधव
योर्नाधिकारः सर्वदुहित्रभावे दौ

हित्रस्याधिकारः तदभावे पितुर
धिकारः तदभावे मातुरधिकारः।
तदभावेसोदरस्याधिकारः सोद
राभावे सजातीय वैमात्रेयाधिकारः
तदभावे सोदर भ्रातृपुत्राणामधि
कारः संसर्ग्यसंसर्गिसोदरभ्रातृपु
त्रेषुसंसर्गिभ्रातृपुत्रस्याधिकारः
एवंसंसर्ग्यसंसर्गिवैमात्रेयभ्रातृपु
त्रे सति संसर्गिवैमात्रेयु भ्रातृ
पुत्रस्याधिकारः यदात्वसंसर्गी
सोदरभ्रातृपुत्रः संसर्गी चासोदर
भ्रातृपुत्र स्तदा तयोर्युगपदधिका
रः यदा पुनः सोदर वैमात्रेय भ्रा
तृपुत्रौ संसर्गिणावसंसर्गिणौ वा
तदा उभयोरेवसोदरभ्रातृपुत्रस्या
धिकारः भ्रातृपुत्राभावेभ्रातृपौत्रस्या
धिकारः अत्रापि सोदर वैमात्रेय भ्रा
तृपुत्रवत् क्रमो वोध्यः भ्रातृपौत्राभा
वे पितृदौहित्रस्याधिकारः अत्रसो
दर भगिनी पुत्र वैमात्रेयभगिनी
पुत्रयोस्तुल्यवदधिकारः पितृदौ
हित्राभावे पितामहस्याधि ॥
कारः पितामहाभावे पिता ॥
मह्या अधिकारः पितामह्यभा
वेपितृव्यस्याधिकारः ॥ ॥
तदभावे पितृव्य ॥ ॥

पुत्रस्याधिकारः तदभावेपितृव्य
पौत्रस्याधिकारः पितृव्यपौत्राभावे
पितामहदौहित्राभावे पितृव्यदौ
हित्रस्याधिकारः तदभावे प्रपि
तामहस्याधिकारः तदभावेप्रपि
तामह्या अधिकारः ततः पिताम
ह भ्राताधिकारी तदभावेपिता
मह भ्रातृपुत्रः तदभावेपिता
मह भ्रातृपौत्रः ततः प्रपितामह
हदौहित्रोऽधिकारी ततः पिता
महभ्रातृदौहित्रोऽधिकारी।
ततःपितामहभ्रातृदौहित्रोऽधिका
री तदभावे मातामहः तदभावे
मातुलः तदभावे मातृष्वस्रीयः
तदभावे मातुलपुत्रः तदभावे
मातुलपौत्रः एषामभावे सकु
ल्यः सकुल्योपिद्विविधःअधस्त
न ऊर्द्धतनश्च तत्रप्रपौत्रपुत्रा व
धयोऽधस्तनास्त्रयः वृद्धप्रपिता
महादि त्रयऊर्द्धतनास्तत्राप्या
दावधस्तनानां सकुल्यानां क्र
मेणाधिकारः तेषामभावेऊर्द्ध
तनानांक्रमेणाधिकारः एवं।
विध सकुल्याभवेसमानोदकाः
तदभावे आचार्य्यः तदभावे शिष्यः
तदभावे सहवेदाध्यायिब्रह्मचारि
णः तदभावे ग्राम ॥ ॥

स्थाः सपौत्राः तदभावे तथाविधाः
समानप्रवराः उक्त पर्य्यन्ताभा
वे तद्ग्रामस्था स्तु विद्यता दिगु
णयुक्ता ब्राह्मणा धनाधिकारिणः
एतेषामभावे ब्राह्मण धनवर्ज्जं
राजाधिकारी ब्राह्मण धनस्य तु
गुणवद्ब्राह्मणपर्य्यन्ताभावे ब्राह्मणा
न्तरस्यग्रामान्तरस्थस्यापि अधि
कारः वानप्रस्थ यति ब्रह्मचारि
णां धनं धर्मभ्रातृ सच्छिष्याचार्य्या
गृह्णीयुः तदभावे चैकत्रवासी एका
श्रमी वा गृह्णीयात् ब्रह्मचारीच द्वि
विधः नैष्ठिकउपकुर्वाणश्च तत्र
नैष्ठिक धने आचार्य्यस्याधिकारः
उपकुर्वाणस्य तुधनं पित्रादिभि
रेव ग्राह्यं इति पुं धनाधिकारिणः
अथ स्त्रीधनाधिकार क्रमः तत्रकु
मारीधनेप्रथमं सोदरभ्राताधिका
री तदभावे माता तदभावे पिता
वर दत्त धनेवरोऽधिकारी ॥
अथोढास्त्रीधनाधिकारक्रम नि
रूपणार्थं तद्धनं निरूप्यते विवा
हकाले लब्धंयौतकं धनं १भर्त्तृ
नीयमाना पितृमातृकुलात् यद्धनं
लेने तत् २ भर्त्तृदत्तं ३ भ्रातृदत्तं ४
पितृदत्तं ५ मातृदत्तं ६ ॥ ।

द्वितीय विवाहार्थिना पूर्वस्त्रियै पा
रितोषिकं यद्दत्तं तत् ७ अन्वाध्या
दत्तं ८ अलंकरणं ९ गृहादि कर्मि
त्वशिल्पिस्वभर्तृ द्वारेणान्येषां
गृहादि निष्पादनाद्गृहीतकौच विध
याऽन्येभ्यो यद्धनं लब्धं तत् १० पु
त्रदत्तं ११ मातुलादिदत्तं १२ वि
वाहात् परतः पित्रादिना भर्त्रा
दिना च यद्दत्तं १३ भर्तृदत्तस्याव
शातिरिक्तानामेतेषां धनानां स्त्री
दानादिकं कर्तु मर्हति तदेवं ।
स्त्रीधने निरूपिते तस्यां मृतायां
तद्धनाधिकारो निरूप्यते तत्र
यौतक धने कुमार्याः प्रथम
मधिकारः तदभावे वाग्दत्तायाः
तदभावे चोढायाः पुत्रवत्याः सं
भावितपुत्रायाश्च युगपदधिकारः
तदभावे वंध्याविधवयोस्तुल्यवदधि
कारः तत्र कुमारी वाग्दत्ता जाताधि
कारः तत्र कुमारी वाग्दत्ता जाताधि ।
कारानंतरं परिणीता सती पश्चा
द्दैव्यात्वेनावधृता पुत्रमनुत्पाद्यैव
विधवाभूता वा तदा तस्यां मृतायां तत्स्त्री
कौतमातृधनेतद्भगिन्यः पुत्रवती सं
भावितपुत्रयोरभावे वंध्याविधवयोर
प्यधिकारः सर्वेषु ह्यत्रभावे पुत्रस्यापि

कारः पुत्राभावे दौहित्रोऽधिकारी दौहि
त्राभावे पौत्रः तदभावे प्रपौत्रः तदभा
वे सपत्नीपुत्रः तदभावे सपत्नीपौ
त्रः तदभावे सपत्नीप्रपौत्रः एतत्
पर्यंताभावे ब्राह्मदैवार्षगांधर्वप्रा ।
जापत्याख्यविवाहपंचकलब्धयो
तकधने भर्त्रधिकारः भर्तुरभावे
भ्रातुः तदभावे माताधि कारिणी
तदभावे पिता सपत्नी प्रपौत्र प
र्यंताभावे आसुर राक्षस पैशा
चाख्यविवाह त्रिकलब्ध यौतक
धने तु प्रथमं मातुरधिकारः ॥
तदभावे पितुः पितुरभावे भर्तुः
अथायौतक स्त्री धनाधिकारि ॥
क्रमस्तत्र विवाह पूर्वापर काल
पितृदत्त यौतकाभ्यामतिरिक्त
स्त्री धने कन्या पुत्रयो र्युगपद
धिकारः तयोरेकतराभावे अन्य
तरस्य तद्धनं तयोर्द्वयोरभावे कु
ढायाः पुत्रवत्याः संभावितपुत्रा
याश्च तुल्यवदधिकारः एतयो
रेक तराभावे अन्यस्या अधिका
रः एतयो र्द्वयोरभावे पौत्रः पौ
त्राभावे दौहित्रः तदभावे प्रपौत्रः
तदभावे सपत्नीपुत्रः तदभावे
सपत्नीपौत्रः तदभावे सपत्नी

प्रपौत्रोऽधिकारी ततो वंध्या वि
धवा च तुल्यवदधिकारिण्यौ
एतयोरेकतराभावे चान्यतरस्याः
वंध्याविधवापर्यंताभावे यौतक
वत् ब्राह्मादि विवाह पंचक विवा
हितायाधने भर्तृभ्रातृमातृपितृ
णां क्रमशोऽधिकारः विवाहका
ल तत्पूर्वापरकालवास्त्रीयैयद्ध
नं पित्रा दत्तं तत्रधन प्रथमं कुमा
र्याः तदनंतरं मूढयोः पुत्रवती
संभावितपुत्रयोः तदनंतरं वंध्या
विधवयोश्चाधिकारः सर्वेषु ह्यत्र
भावे पुत्रादे यौतकधनानंतर वत्
क्रमेणाधिकारः ततो ब्राह्मादि
विवाह पंचकलब्धयौतकधने
षु पितृ पर्यंता भावे आसुरादि
विवाह त्रिक लब्धयौतक धने
षु च भर्तृ पर्यंताभावे देवरादे र
धिकारः तदभावे देवरभ्रातृस्व
सृयोः सुतानां युगपदधिकारः
एतेषाम भावे असपिंडोऽपि भ
गिनीपुत्रः तदभावे भर्तृभागि ।
नेयः तदभावे भ्रातृसुतः तद
भावे जानता जामातृ पर्यंता ।
भावे सपिंडानंतर्यक्रमेण स्व
सृभ्रातृस्वस्रादीनां सपिंडा
नामधिकारः सपिंडाभावे सकुल्याः

समानोदकाः सगोत्राः समान
प्रवराश्चपि धनवत् क्रमेणाधि
कारिणः एतत्सर्वाभावे ब्राह्म
णीधने स्वग्रामस्थश्रोत्रियादेरधि
कारः क्षत्रियादि धनराजएवा
धिकारः इति स्त्रीधनाधिकारिणः
अथ विभागानधिकारिणः ॥
क्लीव पतितजात्यंधजन्मबधि
रउन्मत्तजडमूकपंगुपितृद्विड नि
रिंद्रियोपपातिकाचिकित्स्य सरो
गार्त्ताः पतितवर्ज एते भरणीयाः
पतितपुत्रवर्जनेतेषां पुत्रा यदि
निर्दोषाः तदांशभागिनः क्ली
बादीनां अपुत्रा भार्याः यदि सद्वृ
त्ता स्तदा भरणीयाः एषां दुहितरोऽवि
वाहपर्यंतं भरणीयाः अथावि
भाज्याविभाज्यधननिर्णयः तत्र
पैतामह पितृ र्जितं साधारण धनो
पघातेनार्जितं चेति त्रिविधं धनं स
र्वैरेव विभाज्यं किंतु तत्रार्जकस्य
द्व्यंशो अन्येषामेकैकांशः सा
धारणधनानुपघातेन शौर्यप्राप्तं
धनं एवं साधारणधनानुपघा
तेनार्जितविद्या धनं पितृ पितृ
व्यादि प्रसादादिना लब्धं धनं भा
र्याप्राप्ति काले लब्धं धनं मित्रता
प्राप्तं धनं आर्जितलब्धं एतान्य
विभाज्यानि विद्याधनेतत्सम ॥

विद्याधिकविद्येभ्योदेयं एवं यदि
विद्यामभ्यस्यतो भ्रातुः कुटुम्ब
मपरो भ्राता स्वधनव्यय शरीर
यासाभ्यां बिभर्त्ति तदा तद्विद्या
र्जित धने मूर्खस्यापि अपर भ्रातु
रंशित्वं स्वकृत्वात् पित्रादितोलब्ध
विद्यार्जित धने न सर्वेषां मूर्खा
मूर्खाणामंशित्वं विद्याधनं यथा
यदिमवानभद्रमुपन्यस्यति तदा
भवतेएतावद्धनं दातव्यं इति प
णितं तत्र भद्रोपन्यासेन यत्पणि
तेधनंलब्धं तत् अध्यापितशिष्या
द्यल्लब्धं ऋत्विक्कर्मकरणेन यज
मानाद्दक्षिणादिरूपं लब्धं धनं य
त्किं वित् विद्यायाः प्रश्ने कृते तत्र
सम्यगुत्तरेण परितोषाद्पणित
मेव किंविद्धनं ददाति तत् योऽ
स्मिन् शास्त्रार्थे मम संशयमप
नयति तस्मै सुवर्णादिकमिदं दा
स्यामीत्युक्ते तस्य संशयमपनीय
यल्लब्धं वादिनोः कृतविवाद वि
षये संदेहन्यायकरणार्थ मागत
योः सम्यङ्निरूपणेन यल्लब्धं।
शास्त्रादिपुस्तज्ञानं प्रकाश्य प्र
तिग्रहादिना यल्लब्धं तथान्य
र्थेवादाहादविचारेण परंनिर्जि
त्य यल्लब्धं एकस्मिन् देये वस्त
॥ ॥

नि बहूनां ब्राह्मणानां समुप
स्थानेयेन प्रकृष्टं वेदमधीत्य
लब्धं चित्रकर सुवर्णकारादिभिः
शिल्पिभि मूल्यादधिकं यल्लब्धं
द्युतेनापि परं निर्जित्य यल्लब्धं
एतानि अविभाज्यानि ॥ क्रमा
दभ्यागतं द्रव्य मन्येन हृतं यदि
दायादानामननुमत्या तेषामेक
तरेण साधारण धनानुपघाते
न स्वतरव्यापारैरपेक्षेण चयन
मुद्धरति तदा तद्धन मुद्धारकर्त्तुरे
व भूमिस्तु यदि अन्येर्हृता एके
नाहृता तदा सततरीयांशं गृहीत्वा
अवशिष्ट भागत्रयं अन्यैः सहस
मं विभजेत् अयं निष्कर्षः विभ
क्तेनाविभक्तेन वा साधारण धना
नुपघातेनापर व्यापारैरपेक्षेणये
न यदर्जितं तदर्जकस्यैव नतत्र
द्विभाज्य मितरैः किंतु विद्यालब्ध
धनमात्रे विशेषः सचप्रागेवाभि
हितः अंगयोजितं वस्त्रमलंका
रं अश्वादि वाहनं लड्डुकादिकृ
तवाप्यादि गतं पित्रादि संबंधिज
लंदासी व्यतिरिक्ता स्त्री गोप्रचारः
रथ्या एतानि नान्य धनवद्विभाज्या
नि किंतु स्वच्छापारेण तद्गृहीत
अयं वंसस्यव्यापारोपयुक्त शयन
भोजनपात्रादिन विभजनीयं येन

1355

यद्गृहीतं तत्तस्यैव पुस्तकं तत्र
द्वैनं याह्यं किंतु पंडितेन तदंतर्गत
ज्ञानं तस्य दद्यात् तदंशमूल्यमेव वा
दत्वा गृहीतव्यं एवं शिल्पिनो पि
त्र्याद्युपयुक्त द्रव्यं नाशिल्पिनो तत्रा
पि पुस्तक वद्व्यवस्था पितरिजीव
ति यस्मिन् वा लोके येन गृहीत्वा ना
दिकं हृतं तस्य न विभागः यद्यप
रेण पिवास्त्वतरे तथा कृतं अथ
संसृष्ट विभाग क्रमार्थमादौ संस
र्गो निरूप्यते पितृ भ्रातृ पितृव्या
ना मन्यतरेण सह विभक्तः सन्
पुनरैक्यान्मेच्छया पूर्वकृत वि
भागमपेक्ष्य यत्तवधनं तन्मम ध
नं यन्मम तत्तवापीति व्यवस्थया
एकगृहे रूपतया वस्थानं संसर्गः
अथ संसृष्ट विभागः अत्रभ्रातृणां
अन्येषां तुल्य संबंधिनां वा संसर्ग
संसर्गिणां मध्ये संसर्गिणामेव
प्रथमं मृत संसर्गि धनेऽधिकारः
तदभावे तथाविध संसर्गिणामि
ति क्रमः एवं यदा पिता पुत्रान् विभ
ज्य यथा शास्त्र भागं गृहीत्वा पुत्रैः
सहासंसृष्ट एव पुत्रान्तरमुत्पा
द्य मृतस्तदा विभागानन्तरजात
एवतद्धनाधिकारी न पूर्व विभ
क्तः एवं पूर्व भ्रातृ विभागपि वि

भक्तजस्य नांशित्वं यदित्व येन केन
चित् पुत्रेण संसृष्टः सन् पितामृतः
तदा तद्धनं संसृष्ट विभक्तजाभ्यां स
मं विभाज्यं यथा धने तथर्णेपि
यद्यविज्ञात गर्भायामेस्त्रियां पुत्रा
विभक्ताः स्युः न्नर्भजातो विभक्त द्रव्या
णि कीहृत्य पुनर्विभज्य स्वांशं गृह्णी
यात् नत्व विभक्तजने सह पितृ
द्रव्यांशित्वं अथ पितृकृत विभागो
निरूप्यते यत्र पितृकृत विभाग
स्तत्र स्वोपार्जित धने पितुरिच्छैव नि
यामिका पितामह धने न मातृ
रजोनिवृत्ति सहकृता तदिच्छा नि
यामिका स्वोपार्जित धने पिता इ
च्छया धनं गृहीतव्य शक्नोति कस्मै
चिदधिकं कस्मैचिन्न्यूनं दातुमर्हति
पैतामह धन विभागेन पिता स्वय
मंशद्वयं गृहीत्वा पुत्रेभ्य एकैकां
शं दद्यात् किंतु पैतामहमणिमु
क्ताप्रवालादिषु पितुः स्वाच्छंद्यं भू
मि निबंध द्विदान्यतमेन स्वाच्छंद्यं
स्वार्जित धन विभागे पित्रा अपुत्र
पत्नीभ्यः पुत्रतुल्यांशो देयः यदि
ताभ्यः स्त्रीधनं न दत्तं स्त्रीधने दत्ते
सति अर्द्धं देयं पुत्रकर्तृक विभागेतु
पितुरंशाभावः ॥ शूद्रस्य दासी

पुत्रोपि पितुरिच्छया परिणीत स्त्री
जातपुत्रेणसह तुल्याधिकारी मृते
पितरि तदंशार्द्धाधिकारी तथाविध
भ्रात्रभावेदौहित्रेवासति पितुः सर्व
धनाधिकारी सति दौहित्रेतेनसह
तुल्याधिकारी पितरि मृते मात
रि जीवंत्यां पुत्राणांविभागो न
धर्म्यः यदि जीवंत्यां मातरि वि
भागं कुर्वंति तदा मातापि पु
त्र तुल्यांश भागिनी विमातुर
शाभावः किंतुसा ग्रासाच्छादना
दिनाभर्त्तव्या एवंपितामहधने
पौत्रैर्विभज्यमाने पितामह्यःपौ
त्रतुल्यांशभागिन्यः ॥ औरसेन
दत्तकादीनां विभागे औरसस्य
द्व्यंशित्वंसवर्णे दत्तकादेरेकैकां
शित्वं विभागस्तु पित्रादेर्धनिनः
ऋणं परिशोध्य तदवशिष्ट धन
स्यकरणीयः उत्तमर्णेच्छया वि।
भज्यवा तदृणं परिशोधनीयं प
केन भ्रात्रादिना बहुपोष्यतया य
दाधिकं भुक्तं तत्र न विभक्तांशो
विभाग मध्येप्रवेशनीयः किंतु भ
क्ताविशिष्टस्याविद्यमान धनस्यैव
विभागः कार्य्यः असंस्कृत भ्रातृ
भगिनीनांपैतृक धनेन संस्कारःक
र्त्तव्यः विभागःकाले केनचिद्वि
कृतस्यपश्चात् शमस्यसमभागः
कर्त्तव्यः प्रमादिना कृतांशास्त्री
य विभाग धनस्यपुनःशास्त्रीय
विभागःकार्य्यः अथविदेशोगत
स्यविभागः विभक्तता दशायां दे
शांतरगतस्य चिरकालानंतरागा
तस्यसप्तम पुरुषपर्य्यंतं संततेर
पि साक्ष्यसामंतादिना वा स्वज्ञापन
पूर्वकंकमागतधनात् यथा शा
स्त्रंमंशभागित्वमितिस्थिते यथा
व्यवस्थाविदेशायतविषयिणी दे
शस्य विषयेत्व धनिनश्चतुर्थपर्य्यं
त एव तद्दत्तविभागार्हता साधार।
ण धनेपिस्वांशप्रदानंकर्त्तव्यं इति
श्रीकृष्णतर्कालंकारकृततत्त्वसंग्र
हः देशस्यजानैः संघस्य धर्मोग्राम
स्यैषो भृगुःउदितःस्यात् सततेनैव
दाय भागं प्रकल्पयेत् इति दाय
तत्त्वं ॥

दायविभागः पुं दायभागः य
था किं दायस्य विभागो विभक्तव
यवत्वे विश्वादायेनसह विभागोः
संयुक्तत्वे इतिजीमूतवाहनः

दायादः पुं सपिण्डः पुत्रः ॥
इत्यमरः ॥

दायादी स्त्री कन्या इतिशब्दकल्प
तरुः ॥

दायितः त्रि दापितः इत्यमरः टी
कायांभरतः ॥

दायकः पुं पुत्रः इति हेमचंद्रः ॥
बालकः इतिमेदिनी दारकः ।
इति शब्दार्थकल्पतरुः ॥

दारकः त्रि भेदकः इतिमेदिनी।
ग्राम्यशूकरः इतिराजनिर्घण्टः

दारकर्म क्ली विवाहः इति ।
त्रिकाण्डशेषः ॥

दारणं क्ली कतकं इतिशब्दचंद्रि।
का विदारणं यथा दारुदारणेप
योः समाहृते इतिलीलावती ॥

दारदः पुं दरददेशोद्भवविषभे
दः इत्यमरः पारदः हिंगुलं ।
इति मेदिनी समुद्रः इति हारा
वली ॥

दारबलिभुक् पुं बकपक्षी इति।
त्रिकाण्डशेषः ॥

दाराः पुं भार्य्या बहुवचनांतोः
यं इत्यमरः ॥

दारा स्त्री दाराः इत्यमरटीकायां
भरतः ॥

दारिः स्त्री विदारकः इति श।
ब्दार्थकल्पतरुः ॥ ॥

दारिका स्त्री कन्या इति जटाधरः ॥

दारितः त्रि कृतदारणः तत्पर्य्यायः
भिन्नः २ भेदितः इत्यमरः ॥ दारि
द्र्यं क्ली दरिद्रता यथा प्रणीयदा
रिद्र्यदरिद्रतां नृपः इतिनैषधं ।
निर्थकारान्तोप्ययं ॥

दारु क्ली पुं काष्ठं इत्यमरभरतौ
दारु क्ली देवदारु पित्तलं इति
मेदिनी ॥

दारुः त्रि शिल्पी दारकः इति
धरणी दाता इतित्रिकाण्डशेषः

दारुकं क्ली देवदारु इति राज
निर्घण्टः ॥

दारुकः पुं श्रीकृष्णसारथिः इ
तित्रिकाण्डशेषः ॥

दारुकदली स्त्री वनकदली इति
राजनिर्घण्टः ॥

दारुका स्त्री काष्ठमयस्त्री काठे
रपुतल इति भाषा तत्पर्य्यायः
पुत्रिका २ दारुस्त्री ३ शालभंजि
का ४ शालभंजी ५ शालांकी ६
इतिशब्दरत्नावली दारुपुत्रिका ७
कुरुणी ८ दारुगर्भा ९ इतिहा
रावली ॥

दारुगंधा स्त्री चीडा नाम गंध
द्रव्यं इतिराजनिर्घण्टः ॥

दारुगर्भा स्त्री दारुमयस्त्री इति
हारावली ॥
दारुजः पुं मर्द्दलः इति शब्द र।
त्नावली काष्ठनिर्म्मितेत्रि ॥
दारुणः पुं चित्रकः इतिराजनिर्घ
टः भयानकरसः भयहेतौ त्रि
इत्यमरः ॥
दारुनिशा स्त्री दारुहरिद्रा इति
रत्नमाला ॥
दारुपत्री स्त्री हिंगुपत्री इतिरा
जनिर्घण्टः ॥
दारुपीता स्त्री दारुहरिद्रा इति
राजनिर्घण्टः ॥
दारुपुत्रिका स्त्री दारुका इति
हारावली ॥
दारुमुख्याह्वया स्त्री गोधा इ
तिराजनिर्घण्टः ॥
दारुस्त्री स्त्री दारुका इति त्रिकां
डशेषः ॥
दारुहरिद्रा स्त्री स्वनामख्यात
वृक्षविशेषः तत्पर्य्यायः पीतद्रुः
२ कालेयकः ३ हरिद्रुः ४ दार्वी ५
पचम्पचा ६ पर्जनी ७ इत्यमरः।
पीतिका ८ पीतदारु ९ स्थिररागा
१० कामिनी ११ कटंकटेरी १२ प
र्जन्या १३ पीता १४ दारुनिशा १५
कालीयकं १६ कामवती १७ दारु।
पीता ॥ कर्कटिनी १९ अस्यागुणाः
तिक्तत्वं कटुत्वं उष्णत्वं व्रणमेह
कण्डु विसर्प त्वग्दोष विषकर्णा
क्षिदोषनाशित्वंच इतिराजनि
र्घण्टः कफपित्तशोथनाशित्वं ॥
विशेषेण कफाभिष्यन्दनाशित्वं
च इतिराजवल्लभः ॥
दारुहस्तकः पुं काष्ठनिर्म्मितह
स्तः काठेर हाता इतिभाषा त
त्पर्य्यायः तर्द्दूः २ इत्यमरः ॥
दार्घसत्रः त्रि दीर्घसत्र यागे भवः
इतिसिद्धान्तकौमुदी ॥
दार्ढ्यं क्ली दृढता दृढशब्दात् भा
वार्थेष्यञ् प्रत्ययेननिष्पन्नं ॥
दार्द्दुरं क्ली दक्षिणावर्त्तशंखः ज
त्तजलं इतिशब्दार्थकल्पतरुः
दर्द्दुरधर्मश्च ॥ ॥
दार्वटं क्ली चिंतावेश्म इति हारा
वली ॥
दार्वाघाटः पुं मयूरः इति शब्दार्थ
कल्पतरुः ॥
दार्वाघाटः पुं शतपत्रकपक्षी का
ठठोकरा इतिभाषा इत्यमरः ॥
दार्वाघातः पुं दार्वाघाटपक्षी इ
तिशब्दरत्नावली ॥ ॥

दार्विका स्त्री क्वाथोद्भवतुत्थं गो
जिव्हा इत्यमरः ॥
दार्विपत्रिका स्त्री गोजिव्हा इति
रत्नमाला ॥
दार्वी स्त्री दारुहरिद्रा गोजिव्हा
इतिमेदिनी देवदारु हरिद्रा इति
विश्वः ॥
दार्वीक्वाथोद्भवं क्ली रसांजनं इ
तिराजनिर्घण्टः कृत्रिमरसांज
नं इतिरत्नमाला ॥
दार्षदः त्रि दृषद्भवः इति सिद्धांत
कौमुदी ॥
दालं क्ली वन्यमधु इतिशब्दार्थ
कल्पतरुः इंद्रनील दलाकार सू
क्ष्ममक्षिकोत्पन्नं वृक्षकोटरा
न्तरभवंमधु अस्यगुणाः कटुत्वं
कषायत्वं अम्लत्वं मधुरत्वं। पि
त्तदोषकारित्वंच इति राज
निर्घण्टः ॥
दालः पुं कोद्रवः इतिहेमचंद्रः
दालवः पुं स्थावरविषभेदः
इतिहेमचंद्रः ॥
दाला स्त्री महाकालः इतिभाव
प्रकाशः ॥
दालिका स्त्री महाकालः इतिभा
वप्रकाशः ॥ ॥
दालिमः पुं दाडिमः इत्यमरः
टीकायांभरतः ॥
दाली स्त्री देवदाली लता इति
राजनिर्घण्टः ॥
दाल्भ्यः पुं मुनिविशेषः इति
महाभारतं ॥
दाल्भिः पुं इंद्रः इतित्रिकाण्डशे
षः दावः पुं वनं वनवह्निः इ
त्यमरः अग्निः इत्यमरटीकायां
नीलकंठः उपतापः इति भरत
कृतद्विरूपकोषः ॥
दावाग्निः पुं वनोद्भवाग्निः तत्
पर्य्यायः दवाग्निः २ दावानलः ३
इति शब्दरत्नावली दवः ४
दावः ५ इत्यमरः ॥
दावानलः पुं दावाग्निः इति
शब्दरत्नावली ॥
दाविकः त्रि देविकानदीसंभवः
इत्यमरः ॥
दाश न व हिंसने इतिकविक
ल्पद्रुमः ॥
दाश ऋ न क दाने इति कविक
ल्पद्रुमः ॥
दाश ऋ न दाने इतिकविकल्पद्रु
मः दाशः पुं भृत्यः इत्यमरटीका
यांरमानाथः ॥ ॥

दाशपुरं क्ली दशपुरं इत्यमर
टीकायांस्वामी ॥
दाशरथः पुं श्रीरामः इतिशब्द
रत्नावली ॥
दाशरथिः पुं श्रीरामः इतिहेम
चंद्रः ॥
दाशार्हः पुं विष्णुः इतिहेमचंद्रः
दशार्हदेशजश्च ॥
दाशेरकः पुं मालव दशाः इति
त्रिकाण्डशेषः ॥
दाश्वः त्रि दाता इतिजटाधरः ॥
दाश्वान् त्रि दत्तवान् इतिमुग्धबो
धं दास र न दवे इतिकविकल्पद्रु
मः दास ऋ ञ दाने इतिकविकल्प
द्रुमः दासः पुं शूद्रः ज्ञातात्मा धी
वरः इति मेदिनी दानपात्रं इति
विश्वः शूद्राणां नामोत्तरप्रयोज्य
पद्धति विशेषः यथा शर्म्मान्तंब्रा
ह्मणस्यस्यात् वर्म्मान्तंक्षत्रियस्यच
गुप्त दासात्मकं नाम प्रशस्तं वै
श्यशूद्रयोः इत्युद्वाहतत्वं ॥
दास्यतेदीयते यस्मै सः चाकर
इति भाषा तत्पर्य्यायः भृत्यः
२ दासेरः ३ दासेयः ४ गोप्यकः
५ चेटकः ६ नियोज्यः ७ किंकरः ८
प्रैष्यः ९ भुजिष्यः १० परिचारकः

११ इत्यमरः प्रेष्यः १२ प्रेष्य १३
प्रैषः १४ इतिभरतः परिकर्म्मी
१५ परिचरः १६ सहायः १७ उप
स्थाता १८ सेवकः १९ अभिसरः
२० अनुगः २१ स पंचदश विधः
यथा नारदः गृहजातस्तथा क्री
तोलब्धो दायादुपागतः अन्नाका
ल भृत स्तद्वदाहितः स्वामिना
च यः मोक्षितो महतश्चर्णात्
युद्धप्राप्तः पणे जितः तवाहमि
त्युपगतः प्रव्रज्यावसितः कृतः
भक्तदासश्च विज्ञेय स्तथैव वड
वाहृतः विक्रेता चात्मनः शास्त्रे
दासाः पंचदशास्मृताः अस्यार्थः
गृहजातोदास्यामुत्पन्नः दाया
दुपागतः क्रमागतः अन्नाकाल
भृतः दुर्भिक्षपोषितः स्वामिनाश्रा
हितोबंधकीकृतः मोक्षितः ऋण
मोचनेनांगीकृतदास्यः तवाहमि
त्युपगतः कस्याप्यदासः सन् स्वयं
दासत्वेनदत्तरूपः प्रव्रज्यावसितः
सन्यासभ्रष्टः कृतः केनचिन्नि
मेनयत्नावत् कालपर्य्यन्तं तवाहं
दास इतिकृतसमयः भक्तदासः स
मिक्षेपि भक्तार्थमंगीकृत दास्यः
वडवाहृतः वडवा दासी तल्लोभा

द्गंगी कृत दास्यः इति श्रीकृष्ण
तर्कालंकारकृतकर्मसंग्रहः त
स्यकर्म यथा कर्म्मापि द्विविधं ज्ञे
यमशुभं शुभ मेवच अशुभं दा
सकर्म्मोक्तं शुभं कर्मकृतांस्मृतं
गृहद्वाराशुचिस्थानरथ्यावस्क
रशोधनं गुह्यांग स्पर्शनोच्छिष्ट
विण्मूलग्रहणोज्झनं अशुभं
कर्म्मविज्ञेयंशुभमन्यदतः परं
इतिमिताक्षरायांनारदः विप्रस्य
किंकरोभूपो वैश्यो भूपस्य भूमि
प सर्वेषां किंकराः शूद्रा ब्राह्म
णस्यविशेषतः इतिब्रह्मवैव
र्त्तेगणेशखण्ड ॥
दासनंदिनी स्त्री सत्यवती इति
शब्दरत्नावली ॥
दासपुरं क्ली कैवर्त्तीमुस्तकं इ
तिशब्दरत्नावली ॥
दासिका स्त्री दासी इत्यमरटीका
यांभरतः ॥
दासी स्त्री भुजिष्या इतिमेदिनी ॥
तत्पर्य्यायः कर्मकरी २ इतिमुग्ध
बोधं दासपर्य्यायशब्दाः स्त्रीलिंगे
अस्याः पर्य्याया भवंति काकजंघा
नीलाम्लानः नीलझिण्टी इ
तिराजनिर्घण्टः पीतझिण्टी ॥

इतिरत्नमाला वेदी इतिविश्वः शूद्र
पत्नी कैवर्त्तपत्नीच ॥
दासीसभं क्ली दास्याः सभा इत्य
मरः ॥
दासेयः पुं दासः इत्यमरः ॥
कैवर्त्तः इति शब्दरत्नावली ॥
दासेयत् पत्रे त्रि ॥
दासेयी स्त्री सत्यवती इतित्रिका
ण्डशेषः ॥
दासेरः पुं दासः इत्यमरः कैवर्त्तः
इतिशब्दरत्नावली उष्ट्रः ॥ दासि
कापत्येत्रि इतिमेदिनी दासेरकः
पुं उष्ट्रः इतिराजनिर्घण्टः ॥
दासीसुतः इतिहारावली ॥ दा
स्यं क्ली दासस्य भावः दासत्वं ।
यथा अर्च्चनं वंदनं मंत्रजपः
सेवन मेवच स्मरणं कीर्त्तनं शश्व
द्गुण श्रवण मीप्सितं निवेदनं ।
स्वस्य दास्यं नवधा भक्तिलक्षणं
इतिब्रह्मवैवर्त्ते प्रकृतिखण्डे ॥
दाहः पुं दहनं भस्मीकरणं अथ
शवदाहविधि यथा गतप्राणंज्ञा
त्वापुत्रादिः स्नात्वाग्रे कृतोस्या
पयेत् ततोगतप्राणंस्नापयित्वा
वाससासर्वं शरीरमाच्छाद्यास्तीर्ण
कुशायां भूमौ दक्षिणशिरसंस्थाप

येत् ततोहृतेनाभ्यज्य ॐगयादीनिच
तीर्थानियेचपुण्याः शिलोच्चयाः कु
रुक्षेत्रंचगंगाच यमुनाच सरिद्वरा ॥
कौशिकीचंद्रभागाच सर्वपापप्रणा
शिनी भद्रावकाशागण्डकीसरयू
पनसास्तथा वेणवेत्रवराहेव तीर्थं
पिण्डारकं तथा पृथिव्यांयोनिती
र्थानिसरितः सागरास्तथा ॥ इ
ति चिंतयित्वा पुनः स्नापयेत् ।
वस्त्रान्तरं परिधाप्य उपवीत मन्त
रीयंचदत्वाचंदनादिनोपलिप्यक।
र्णनासिका नेत्रहृदय मुखात्मकेषु
सप्तछिद्रेषु सप्तस्वर्णखंडिका
स्तदभावेकांस्यादि खंडिकानिः क्षि
पेत् ततोवस्त्रान्तरेणाच्छाद्यवहेयुः
वहनकालेआमपात्रस्थ तदन्नार्द्धं
वर्त्मार्द्धेत्यजेत् अर्द्धं पिण्डार्थमवशेष
येत् ततः श्मशानात्पुत्रादिभिर्नीता भू
मौगत्वा तदर्द्धं तिलसहितं पिण्ड
दानेतिकर्त्तव्यतया उत्सृजेत् सा
यथा गोमयेनोपलिप्तायां भूमौ।
पातित वाम जानुः प्राचीनावीती
कुशमूलेन ॐअपहता असुरा रक्षां
सिवेदिषद इत्यनेन दक्षिणाग्रे
खांकर्यात् तदुपरि कुशानास्तीर्य
ॐपरेमेत सौम्य गंभीरेभिः पथिभिः

पूर्विणोभिर्देहयस्मभ्यं द्रविणेह
भद्रंरयिंचनः सर्ववीरं नियच्छ
इत्यावाह्य सतिल जलपात्रं वा
महस्ता दक्षिण हस्तेन गृहीत्वा
ॐअद्यामुकगोत्र प्रेतामुक देव
शर्मन्नेतत्तेऽत्र मुपतिष्ठतां इति
वामहस्त गृहीतामपात्रादन्नं स
तिलं दक्षिण हस्तेन गृहीत्वा कु
शोपरि दद्यात् पिण्डपात्रमक्षा
लनजलेन तदुपरि प्रत्यवनेज
ने तुलसी गंधादिदाने स्नानेगतेरे
षांतत्वावाहनमिति विशेषः ॥
ततः पुत्रादिः स्नात्वाचितांरचयि
त्वा तत्रदारुचयंकर्यात् तदुपरि
वस्त्र द्वय सहितं दक्षिणशिरसं
सामगमधोमुखं पुमांसं न्यसेत्
नार्यास्तूत्तान देहत्वं सामगेतरे
षां उत्तरशिरस्कं ततोदेवाश्चाग्निमु
खाः सर्वेहुताशनं गृहीत्वापतंद
हंत्विति मनसा ध्यात्वाग्निः गृही
त्वा ॐ कृत्वा तद्दुष्करंकर्मजानता
वाप्यजानतामृत्युकालवशंप्राप्य
नरंपंचत्वमागतं धर्माधर्म समायुक्तं
लोभमोह समावृतं दहेयं ॥
सर्वगात्राणि दिव्यान् लोका
न्सगच्छतु इतिपठि ॥ ॥

ॐअद्यामुकगोत्रप्रेतामुकदेवशर्मन्नत्रावनेनिक्ष्वइत्यवनेजयेत्।

त्वा त्रिः प्रदक्षिणीकृत्य दक्षिणामु
खः शिरःस्थानेदद्यात् स्त्रीदाहेतर
स्मिन्नेवपावकः नारी स्मिन्हः ततो
दाहेहते प्रादेशप्रमाणाः सप्तका
ष्ठिका गृहीत्वा चिताग्निं सप्तवारान्
प्रदक्षिणीकृत्य सप्तकाष्ठिका।
एकैकक्रमेण चिताग्नौ प्रक्षिपेत्
ततः कुठारेण क्रव्यादाय नामस्तु
भ्यमिति मंत्रं सकृत् पठित्वा चि
तास्थ ज्वलद्दारूपरि सप्तप्रहारा
देयाः तमग्निमपस्पृश्य वामावर्त्तं
न स्नानं नदीगत्वा नग्रेशवं न
देहन् प्रात्संवधिवस्त्रादिश्मशा
नवासिचांडालादिभ्यो दद्यात्।
सूतिकारजस्वलाचवस्त्रांतराहृ
तं सतिलपंचगव्यंजलपूर्णकुंभ
आपोहिष्ठीय वामदेव्यादिभिः शि
रःस्नापयित्वा दहेदिति विशेषः
गर्भवत्यास्तु गर्भं निःसार्य स्था
नान्तरे निःक्षिप्य तस्या दाहः का
र्यः ततो जलसमीपं गत्वा पुत्रा
दयः प्रयोग दानाभिज्ञ प्रणालिका
दिकं प्रार्थयेयुः उदकं करिष्याम
इति तेनच कुरुध्वं माचैवं पुनरि
त्यशतवर्षं प्रेते कुरुध्वमेवेनवस्मि
न् इत्युत्तरे दत्ते हृहउरःस्मर भवत
रणं जले ततः परिहित वस्त्रप्र

क्षाल्यतदेव परिधायप्राचीनावी
तिनो दक्षिणामुखाः ॐअपनः
शोशुचदघ मित्यनेन मंत्रेण वा
मतस्ताकामिकया कया आलोड्य
एकवस्त्राः सकृन्निमज्योन्मज्याच
म्य दक्षिणामुखा स्तर्पयेयुः ततः
ॐअमुक गोत्रं प्रेतममुक देवश
र्माणं तर्पयामीति सामगानां
प्रयोगः यजुर्वेदिनांतु अमुक
गोत्रप्रेतामुकदेवशर्मन्नेतत्तेति
लोदकं तृप्यस्वेतिएकांजलिदान
मावश्यकं अंजलित्रयदानेफला
तिशयः ततः पुनः स्नात्वा जला
दुत्थाय बाल पुरःसरंकार्य्यं ततः
शाद्वलोउपविश्य मानुष्ये कदली
स्तंभ निःसारे सारमार्गणं यः करो
ति ससंमूढो जलबुद्बुद सन्निभे
पंचधासंभृतः कायो यदि पंचत्व
मागतः कर्मभिः स्वशरीरोत्थैस्त
त्रका परिदेवना गंत्री वसुमती
नाशं मुदधिर्दैवतानिच फेनप्रख्यः
कथं नाशं मर्त्यलोको न यास्यति
श्लेष्माश्रु बांधवैर्मुक्तं प्रेतो भुंक्ते यतो
ऽवशः अतो न रोदितव्यं हि क्रिया
कार्या विधानतः इति चिंतयित्वा
गृहद्वारंसमागत्य निंबपत्राणि दं
तैः खण्डयित्वा शमीपापं शमयति

निशांमी सृष्ट्वा अपमेवस्थिरो भू
यासंइत्यश्मानंपदा सृष्ट्वाअग्नि
नःशर्मयच्छत्वइति अग्निंसृष्ट्वाद
षभच्छागयोर्मध्ये स्थित्वा सोमिति
मस्तेणदावपिसृष्ट्वा गोमयमुद
कं गौरसर्षपांश्च सृष्ट्वा वाल्पूरः
सरागृहे विशेषु दिवावेदाहस्त
दाराश्चैयामप्रवेशःरात्रौ चेत्तदा
दिवसे असक्तौ ब्राह्मणानुमतिं
गृहीत्वा कालप्रतीक्षणं विनाप्र
वेष्टव्यं इतिशुद्धितत्वं ॥

दाहकः पुं चित्रकः रक्तचित्र
कः इतिराजनिर्घण्टः दाहकर्तरित्रि

दाहनं क्ली भस्मीकरणंप्रेरणं दा
हकरणंइतिभाषा भ्रामदहधा
तोर्णिजन्तादनटप्रत्ययेननिष्पन्नं ॥

दाहसरः पुं श्मशानं इति त्रिका
ण्डशेषः ॥

दाहहरणं क्ली वीरणमूलं इति
शब्दचन्द्रिका ॥

दाहागुरु क्ली सुगन्धिद्रव्यविशेषः
तत्पर्य्यायः दाहनागुरु २ दाहका
ष्ठं ३ धूपागुरु ४ तैलागुरु ५ पु
रं ६ वनवल्लभं ७ अस्य गुणाः
कटुत्वं उष्णत्वं केशवर्द्धनत्वं
वर्णत्वं केशदोषनाशित्वं ॥
सततसौगंध्य विस्तार ॥

कवित्वंच इतिराजनिर्घण्टः ॥

दाक्षकं क्ली दक्षाणांसमूहः इ
त्यमरटीकायांरायमुकुटः ॥

दाक्षायणी स्त्री अश्विन्यादयोरेव
त्यन्ताःसप्तविंशतिस्ताराः इत्यम
रः उमा इति मेदिनी रोहिणीन
क्षत्रं इतिहेमचंद्रः दन्तीहस्ता इ
तिरत्नमाला दक्षंच तेषा मारभ्य
प्रजाः सम्प्रविवर्द्धिताः ॥
तत्र दाक्षायणी पुत्राः सर्वे देवाः
सवासवाः वसवोऽष्टौच रुद्राश्च
आदित्या मरुतस्तथा सोपिद
क्षायसश्रोणी गौरीदक्षाथवल्ल
ण इतिहितवे पुरा याहि रुद्रेण
शमहात्मना साव दाक्षायणीदे
वीपुनर्भूत्वा न्यपोतम इति वाराह
पुराणं ॥

दाक्षायणीपतिः पुं चंद्रः इति
त्रिकाण्डशेषः ॥

दाक्षायणीरमणः पुं चंद्रः इति
हलायुधः ॥

दाक्षाय्यः पुं गृध्रः इत्यमरः

दाक्षिकन्या स्त्री वाह्लीकेषु
ग्रामसंज्ञा इति नपुंसकलिं
गसंग्रहटीकायांभरतः ॥

दाक्षिणात्यः त्रि दक्षिण देशो

त्रवः इतिशब्दार्थकल्पतरुः नारि
केलः इतिराजनिर्घण्टः ॥

दाक्षिण्यं क्ली अनुकूलता इति
हेमचंद्रः दक्षिणार्हे त्रि इत्यमरः

दाक्षीपुत्रः पुं पाणिनिमुनिः इ
तिहेमचंद्रः ॥

दाक्ष्यं क्ली दक्षता निपुणता दक्ष
शब्दात् भावेष्यप्रत्ययः ॥

दिक् स्त्री अवकाशं ददातिया त
त्पर्य्यायः ककुप् २ काष्ठा ३ आ
शा ४ हरित् ५ इत्यमरः दिशि
नी ६ अस्या व्युत्पत्तिर्यथा क्षवैव
मवधिं तस्मादिदं पूर्वंचपश्चिमं ।
इति देशो निदिश्येत यया सादि
गिति स्मृता तस्यावायोर्गुणाः ॥
विष्वग्वायुरनापुष्यः प्राणिनां
नैकदोषकृत् सर्वत्तुनिंदकोहन्ता
क्षतात् पातपूरः स्मरः इतिराज
वल्लभः सा दशधा यथा पूर्वा
१ आग्नेयी २ दक्षिणा ३ नैर्ऋती ४
पश्चिमा ५ वायवी ६ उत्तरा ७
ऐशानी ८ ऊर्द्ध्वं ९ अधः १० ॥
तासां उत्पत्तिर्यथा महातपा
उवाच शृणु राजन्नवहितः प्र।
जापाल कथा मिमां यथा दि
शाः समुत्पन्नाः श्रोत्रेभ्यः सृष्टि
वीपत्ते ब्रह्मणः सृजतः सृष्टिमा
दि सर्गेसमुत्थिते चिंता भूत्महू
तीकोमेप्रजाःसृष्टा धरिष्यति प
वंचिंत यत स्तस्य अवकाशं प्रज
त्विह प्रादुर्वभूवुः श्रोत्रेभ्यो दश
कन्यामहाप्रभाः पूर्वीच दक्षिणा
चैवप्रतीची चोत्तरा तथा ऊर्द्धाध
रच षण्मुख्याः कन्यासांस्तदा
न्यास्तासांमध्येचतस्रस्तु कन्याप
रमशोभनाः याःषण्मुख्यामहा
भागा गाम्भीर्य्येण समन्विताः ॥
ता ऊचुः प्रणयाद्देवं प्रजापतिम
कल्मषं अवकाशान्नो देहि दे
वदेव प्रजापते यत्र तिष्ठामहेस
र्वा भर्तृभिःसहिताः सुखं ॥
पत्तयश्चमहाभागादेहिनोऽव्यक्त
संभव ब्रह्मोवाच ब्रह्माण्डमेतत्
संश्रोणयः शतकोटि प्रविस्तरं ।
तस्मिन्नेस्वच्छयातुष्टा उष्यतां माचि
लम्बथ भर्तृश्चवः प्रयच्छामिस्र
ष्टाऽस्मपश्चिनोतथाः यथेष्टं गम्यतां
देवो यस्यायो रोवनेऽधना पदस्तु
काम्यताःसर्वा यथेष्टं प्रययुस्तदा

ब्रह्मा ससर्जन्तेषां तान् लोक पा
लान् महाबलान् दृष्ट्वा तल्लोक
पालांस्तताः कन्याः पुनराक्षयत्
विवाहं कारयामास ब्रह्मा लो
कपितामहः एकामिंद्राय स मा
दादग्नयेऽन्यां यमायच निर्ऋता
यच देवाय वरुणाय महात्मने
वायवे धनदेशाय ईशानाय च स
त्तम ऊर्द्धंस्वयमविष्णाय शेषायाधो
व्यवस्थितो एवं दत्त्वा पुनर्ब्रह्मा ति
थिं प्रादात् दिशां गुरुः दशमीं भ
द्रेनाम्नस्तु अर्द्धनाम्नोदनः प्रभुः
ततः प्रभृति नादेवाः संज्ञाया परि
कीर्त्तिताः इति वराहपुराणं ॥
न्यायमतेऽस्याः सर्वगतत्वं ॥
परममहत्त्वपरिमाणं कुर्वातिका
दिधीहेतुत्वं नित्यत्वं एकत्वेपिउ
पाधि भेदात् प्राच्यादि व्यपदेश
भाक्त्वं अस्या गुणाः संख्या १
परिमितिः २ पृथक्त्वं ३ संयोगः
४ विभागः ५ इतिभाषापरिच्छेदः
दिक्पतिः पुं दिगधीश्वरः तद्यथा
प्राच्यधिपो रविः अग्निकोणाधिपः
शुक्रः दक्षिणाधिपः कुजः नैर्ऋत
कोणाधिपो राहुः प्रतीच्यधिपः श
निः वायुकोणाधिपश्चंद्रः ॥

उत्तराधिपो बुधः ईशानकोणाधिपो
गुरुः तस्यप्रमाणं यथा सूर्यः
शुक्रः क्षमापुत्रः सैंहिकेयः श
निः शशी सौम्यस्त्रिदशामंत्री च
प्राच्यादि दिगधीश्वराः इति ज्यो
तिस्तत्वं ॥
दिक्पालः पुं पूर्वादि दश दिशा
पालकः यथा पूर्वस्यां दिशि इंद्रः
अग्निकोणे वह्निः दक्षिणस्यां दि
शि यमः नैर्ऋतकोणे निर्ऋतः
पश्चिमस्यां दिशि वरुणः वायु
कोणे मरुत् उत्तरस्यां दिशि कुवेरः
ईशानकोणे ईशः ऊर्द्धदिशि ब्रह्मा
अधो दिशि अनंतः इति पुराणं
यज्ञार्च्चयति विधिना दिक्पाला
दीस्तु कर्मणः तत्र प्रपूजयेदेन
विधिं भागवतं शुकं इतिपद्मपु
राणं दिक्शूलं क्ली दिग्विशेष
गमने निषिद्धवाराः यथा पश्चि
मायां शुक्ररवी उत्तरस्यां बुध मं
गलौ पूर्वस्यां शनिसोमौ दक्षिण
स्यां बृहस्पतिः तथाच शुक्रादि
त्यादिने न वारुणी दिशं न चैव कुजे
चोत्तरां मंदेंदोश्च दिनेन शक्रककु
भं याम्यां गुरौ न ॥ ॥

व्रजेत् शूलानीति विलंघ्य यांति
मनुजा ये वित्तलाभाशया भ्रष्टाशाः
पुनरापतंति यदि ते शक्रेण तुल्या
अपि इति ज्योतिःसारसंग्रहः के
चांचिन्मते बौधे गुरौ दक्षिणे ॥
ईशाने ज्वलने चैव नैर्ऋते मा
रुते तथा न गंतव्यं सुराचार्ये प्र
तीच्यां रविभृगुयोः इति स्वरे ॥
बोधः दिक्करः पुं करभः इति शब्द
रत्नावली दिक्करः पुं युवा इति
माघटीकाधृतकोषः ॥
दिक्करी स्त्री युवती इतिहेमचंद्रः
दिगम्बरः पुं शिवः क्षपणः न
ग्नः तमः इति मेदिनी ॥
दिगंबरी स्त्री दुर्गा दिगंबरस्य प
त्नी इति कुलार्णवः नग्नेत्रि इत्यम
रः दिग्गजः पुं दिग्हस्ती यथा
ऐरावतः पुंडरीको वामनः कुमु
दोऽञ्जनः पुष्पदंतः सार्वभौमः सु
प्रतीकश्च दिग्गजाः इत्यमरः एते
क्रमेण पूर्वाद्यष्टदिशां हस्तिनः ॥
दिग्धः पुं विषाक्तबाणः तत्पर्य्यायः
लिप्तकः २ इत्यमरः स्नेहः अग्निः
इति हेमचंद्रः ॥ ॥
प्रबंधः इति जयपालः दिग्धः

त्रि लिप्तः इति मेदिनी ॥
दिग्वासाः पुं शिवः इति हेम
चंद्रः नग्नेत्रि ॥
दिग्विजयः पुं विद्यया युद्धेन वा
दिशां विजयः यथा शंकरदिग्वि
जयः पाण्डवदिग्विजय इत्यादि ॥
दिंकः पुं उत्कुणडिंभः इति शा
ब्दार्थकल्पतरुः ॥
दितं त्रि छिन्नं इत्यमरः ॥
दितिः स्त्री दैत्यमाता सा दक्षक
न्या कश्यपपत्नी च खण्डनं इति
मेदिनी राजविशेषे पुं इति श
ब्दार्थकल्पतरुः ॥
दितिजः पुं दैत्यः इतिहेमचंद्रः
दितिसुतः पुं दैत्यः इत्यमरः ॥
दित्यः पुं दैत्यः इतिशब्दार्थ ॥
कल्पतरुः ॥
दिद्युत् त्रि दीप्तिविशिष्टः इति
मुग्धबोधं दिधिषाय्यः पुं भ्रा
रोपितबंधुः इति सिद्धांतकौमु
दीमुणादिवृत्तिः दिधिषुः पुं
द्विरूढापतिः इत्यमरः ॥
द्विरूढायां स्त्री इति शब्दरत्नाव
ली दिधिषूः स्त्री द्विरूढा वार
द्वयविवाहिता स्त्री तत्पर्यायः दि

पीषुः २ पुनर्भूः ३ दिधिषुः ४
इति शाद्बरत्नावली विवाहिता
यांकनिष्ठायां सत्यां अविवाहि
ता ज्येष्ठाभगिनी यथा ज्येष्ठायां
विद्यमानायांकन्या या मुह्यते॰
नुजासाचाग्रेदिधिषूर्जेयापूर्वी
चदिधिषुःस्मृता इत्युद्धाहतत्वं
दिधिषुपतिः पुं द्विरूढापतिः।
दिधिषुर्द्विरूढातस्याः पतिः स्वा
मी दिनं क्लीपुं कालविशेषः
तत्पर्यायः घस्रः २ अहः ३ दिव
सः ४ वासरः ५ इत्यमरः भास्वरः
६ दिवा ७ इतिराजनिर्घण्टः वारः ८
अंशकः ९ द्युः १० अंशकं ११ इति
शाद्बरत्नावली तत्तमनुष्यमानेषु
ष्टिदण्डात्मकं पितृमाने गौणचांद्र
मासात्मकं देवासुर माने वत्स
रात्मकं ब्रह्ममानेद्विसहस्र
महायुगात्मकं मनुष्यमाने ब्रह्म
णोदिनस्य संख्या ।८६४······
इति पुराणं तदेव मनुष्याणांसौ
र सावन चांद्र नाक्षत्र भेदेन।
चतुर्विधं यथा सावनंदण्डाः ष
ष्टिरहः स्यात्पत्रगुणांशाप्त्या।
स्यादेनंभवेत् १ उदयादोदयाज्ज्ञानो
भौमसावनवासराः २ तिथिनै।

कम दिवस छ्योऽह्माने प्रकीर्तितः
३ आयुर्दाये स्मृतं प्राज्ञैर्नादेत्रे ष
ष्टिनाडिकं ४ जीमूत वाहन मते
तु सूर्यकिरणावच्छिन्नचतुर्याम।
शार्ङ्ग ॥
दिनकरः पुं सूर्यः इतिहेमचंद्रः
दिनकरात्मजा स्त्री यमुना इति
हलायुधः ॥
दिनकेशवः पुं अंधकारः इति
शाद्बरत्नावली ॥
दिनज्योतिः स्ने क्ली आतपः इति
राजनिर्घण्टः ॥
दिनदुःखितः पुं चक्रवाक
इतिशाद्बरत्नावली ॥
दिनप्रणीः पुं सूर्यः इतित्रिका
ण्डशेषः ॥
दिनवलः पुं पंचम षष्ठ सप्तमा
ष्टमैकादशद्वादशराशयः इति
ज्योतिषं ॥
दिनमणिः पुं सूर्यः इति त्रि
काण्डशेषः ॥
दिनमूर्द्धा पुं पूर्वाद्रिः उदयाच
लः इति त्रिकाण्डशेषः॥
दिन्त क ङ. संघाते इति कवि
कल्पद्रुमः ॥ ॥

दिनांशः पुं प्राह्णमध्याह्नापराह्ण
सायाह्नादिः इतिराजनिर्घण्टः
दिनादिः पुं प्रभाते इति राज।
निर्घण्टः ॥
दिनान्तः पुं सायः दिवावसानं
इत्यमरः ॥
दिनान्तकः पुं अंधकारः इति
त्रिकाण्डशेषः ॥
दिनावसानं क्ली दिनांतः इति
हेमचंद्रः ॥
दिनिका स्त्री एकदिनकृतकर्म
मूल्यं इतिशाद्बमाला ॥
दिम इ क नोदे प्रेरणाइतियाव
त् इतिकविकल्पद्रुमः॥
दिम्प म उ क संघाते इति क
विकल्पद्रुमः ॥
दिलीपः पुं सूर्यवंशीयराजवि
शेषः सचांशुमतःपुत्रः भगीरथ
पिता दशरथप्रपितामहस्य इ
तिरामायणं ॥
दिलीपराट् ज पुं दिलीपराजः इ
तित्रिकाण्डशेषः ॥
दिलीरं क्ली शिलीन्ध्रकं इति।
हारावली ॥
दिव इ प्रीतौ इतिकविकल्पद्रुमः
दिव य उ जिगीषायां इत्कोपाः॥

पणे व्यवहारकरणइतियावत्
द्युतौ क्रीडायां गतौ इति क
विकल्पद्रुमः ॥
दिव क ङ. परिकूजने इतिकवि
कल्पद्रुमः ॥
दिव क अर्दे इतिकविकल्पद्रुमः
दिवं क्ली स्वर्गः आकाशं इति
मेदिनी दिवा वनं इति हेम ॥
चंद्रः ॥
दिवसः पुं क्ली दिनं इत्यमरः
दिवसकरः पुं सूर्यः इतिहेम
चंद्रः दिवसमुखं क्ली प्रभातं इ
तिहलायुधः ॥
दिवस्पतिः पुं इंद्रः इत्यमरः ॥
दिवस्पृथिव्यौ स्त्री रोदसी स्वर्ग
भूम्यौ द्विवचनांतोऽयं इतिहे
मचंद्रः ॥
दिवा अ दिनं इत्यमरः ॥
दिवा न पुं दिनं इत्युणादिकोषः
दिवाकरः पुं सूर्यः अर्कवृक्षः
इत्यमरः काकः पुष्पविशेषः इ
तिशाद्बचंद्रिका ॥
दिवाकीर्तिः पुं नापितः चंडालः
उलूकः इति हेमचंद्रः ॥
दिवाटनः पुं काकः इति शा
ब्दार्थकल्पतरुः ॥

दिवातनः त्रि दिनभावः यथा
सायेतनी निथिप्रणयः पंकजानां
दिवातनी कांति कांत्या सदा न
स्याक्रे पयंतीमुविस्मिता इतिभ
ट्टिः दिवांधः पुं पेचकः इतिवि
काण्डशेषः दिवांधाः शालिनः
केचिदिगावंधा स्तथापरे केचिदि
वानध्या रात्रौ शालिन स्तल्पदृष्ट
यः इतिचेङ्गी ॥
दिवांधा स्त्री वल्गुला पक्षी इ
तिराजनिर्घण्टः ॥
दिवांधकी स्त्री छुछुंदरी इति
पुराणं ॥
दिवाभीतः पुं उल्लूकः कुमुदा
करः चोरः इतिमेदिनी ॥
दिवाभीतिः स्त्री पेचकः इतिश
ब्दरत्नावली ॥
दिवामणिः पुं सूर्य्यः इतिशब्द
रत्नावली ॥
दिवामध्यं क्ली मध्याह्नः इति
हेमचंद्रः ॥
दिवास्वापा स्त्री वल्गुलापक्षी
इतिराजनिर्घण्टः ॥
दिविः पुं चाषपक्षी इति श
ब्दमाला ॥
दिविजः त्रि स्वर्गीयः इतिसंदि
प्रसारः ॥
दिविषत् पुं देवः इत्यमरः ॥
दिविष्ठः त्रि स्वर्गस्थः इति संदि
प्रसारः ॥
दिवी स्त्री उपजिह्विकाकीटः इ
तिहारावली ॥
दिवौकाः पुं देवः चातकः इ
तिमेदिनी ॥
दिवोदासः पुं काशीराजः सचं
द्रवंशीय भीमरथराजपुत्रः इति
पद्मपुराणं ॥
दिवोद्भवा स्त्री एला इतिशब्दा
र्थकल्पतरुः दिविजातेत्रि ॥
दिवौकाः पुं देवः इत्यमरः ।
चातकः इति मेदिनी ॥
दिव्यं क्ली लवंगं इतिमेदिनी
हरिचंदनं इति राजनिर्घण्टः ॥
शपथः तद्भेदा यथा धटोग्निरु
दकंचैव विषं कोषश्च पंचमं
षष्ठंच तंडुलाः प्रोक्ता सप्तमं
तप्तमाषकं अष्टमं फल मित्युक्तं
नवमं धर्मजं स्मृतं दिव्यान्येता
निसर्वाणि निर्दिष्टानि स्वयंभुवा
इतिदिव्यतत्त्वे बृहस्पतिः एषावि
वरणं [illegible] हेकैषां चित् परी
त्ताशब्दे द्रष्टव्यं गंगाजल

स्पर्श पूर्वक शपथ स्तत्र मिथ्या
कथने दोषस्तु यथा ब्रह्मणोवच
नं श्रुत्वा ज्ञानेशो ज्ञानिनांवरः
गंगातोयं करेकृत्वा स्वीकारंच
चकार सः गंगातोय मुपस्पृश्य
यथा यदि वदेज्जनः स याति का
लसूत्रंच यावद्दै ब्रह्मणो वयः
इतिब्रह्मवैवर्त्ते प्रकृतिखण्डं ॥
गंगाजलादि स्पर्श पूर्वक शप
थेदोषो यथा तथा गंगोदकं
ताम्रं गोमयं गोरज स्तथा सत्य
वा यदिवा सत्यं यदि दिव्यं क
रोतियः कर्म्मच रौरवं याति त
था कारयिता प्रिये उभयोः पु
नरावृत्ति र्नरयोनिषु नास्तिवै ॥
तस्मात्ति पुनरावृत्ति र्नीचश्च सू
करयोनिषु दिव्यं कर्म्मः कारयित
जंप पूजा वृथा यथा गायत्रीर
हितस्यापि नरकंघोरतरोत्तरं ।
इतिगायत्रीतंत्रे पंचम पटलः
दिव्यः त्रि मनोज्ञः दिविभवः
इति मेदिनी ॥
दिव्यः पुं यवः गुग्गुलुः इति
राजनिर्घण्टः भावविशेषः य
था रुद्रयामले भावत्रयं दिव्यवीर
पश्वक्रमात् दिव्यस्तु देववत्प्रायो
वीरश्चोद्धतमानसः सत्यत्रेता
द्वे पर्य्यन्तं दिव्यभाव विनिर्णी
यः त्रेताद्वापरपर्य्यन्तं वीरभाव
इतिरितं मद्यं मत्स्यं तथा मांसं
मुद्रां मैथुनमेवच श्मशानसाध
नंभद्रे चिता साधन मेवच एतत्ते
कथितं सर्वं दिव्यवीरमतं प्रिये
दिव्यवीर मतं नास्ति कलिकाले
सुलोचने इति कालीविलास
तंत्रे ॥
दिव्यगंधं क्ली लवंगं इति राज
निर्घण्टः ॥
दिव्यगंधः पुं गंधकः इति रा
जनिर्घण्टः ॥
दिव्यगंधा स्त्री स्थूलैला महाचं
चुशाकः इतिराजनिर्घण्टः ॥
दिव्यगायनः पुं गंधर्वः स्वर्गगा
कः इतिशब्दरत्नावली ॥
दिव्यचक्षुः पुं मर्कटः इतिशब्द
माला सुगंधभेदः अंधे सुलोच
नेच त्रि इतिमेदिनी चसमा इ
तिख्यातश्च ॥
दिव्यतेजाः स्त्री ब्राह्मी इतिराज॥
निर्घण्टः ॥
दिव्यदोहदं त्रि उपयाचितं देवदे
य वस्तु इति त्रिकाण्डशेषः ॥

यद्दीयते न देवेभ्यो मनोराज्य
स्य सिद्धये उपयाचितकं दिव्य
दोहदं तद्विदुर्बुधाः इतिहारा
वली ॥
दिव्यपंचामृतं क्ली सिलितः।
बाज्यगव्यदधि गव्यक्षीरमाक्षि
क शर्करा रूपं इतिराजनिर्घंटः
दिव्यपुष्पः पुं करवीरः इतिरा
जनिर्घण्टः ॥
दिव्यपुष्पा स्त्री महाद्रोणा इ
तिराजनिर्घण्टः ॥
दिव्यपुष्पिका स्त्री लोहितवर्णा
र्कवृक्षः इतिरत्नमाला ॥
दिव्यरत्नं क्ली चिंतामणिः इतिश
ब्दार्थकल्पतरुः ॥
दिव्यरथः पुं व्योमयानं देव
विमानः इतिशब्दरत्नावली
दिव्यरसः पुं पारदः इतिराज
निर्घण्टः ॥
दिव्यवस्त्रः पुं सूर्यशोभा इति
शब्दरत्नावली सुंदरवस्त्रयुक्ते
त्रि सुंदरवस्त्रे दिविभववस्त्रे च।
क्ली दिव्यलता स्त्री मूर्वीलता इ
ति राजनिर्घण्टः ॥
दिव्यसारः पुं शालवृक्षः इति
राजनिर्घण्टः ॥ ॥

दिव्या स्त्री धात्री इति मेदिनी ॥
वंध्याकर्कोटकी शतावरी ॥
महामेदा ब्राह्मी स्थूलजीरकः
श्वेतदूर्वा हरीतकी पुरा इतिरा
जनिर्घण्टः ॥
दिव्यादिव्या स्त्री उपदेवीविशेषः
इति शब्दार्थकल्पतरुः ॥
दिव्योदकं क्ली आकाशजलं त
त्पर्य्यायः खवारि २ आकाशस
लिलं ३ व्योमोदकं ४ अंतरीक्ष
जलं ५ अस्यगुणाः त्रिदोषनाशि
त्वं मधुरत्वं पथ्यदत्वं परमरुच्य
त्वं अग्निदत्वं तृष्णाश्रममेहापहार
कत्वं पात्रापेक्षितगुणत्वं च अना
र्तवस्य तस्य गुणाः सर्वेषां देहि
नां त्रिदोषजनकत्वं सद्योभूमि
ष्ठस्य तस्य गुणाः कलुषत्वं दोष
दायकत्वं च चिरस्थितस्य गुणाः
लघुत्वं स्वच्छत्वं पथ्यत्वं स्वाडत्वं
सुखावहत्वं च इतिराजनिर्घण्टः
दिव्योपपादुकः त्रि देवता इत्य
मरः ॥
दिव्यौघः पुं गुरुविशेषः यथा
महादेवो महाकाल स्त्रिपुरघ्ने
व भैरवः दिव्यौघा गुरवः प्रोक्ता
सिद्धौघान् कथयामि ते इति

शाक्तिरत्नाकर तंत्रं अपिच
अथनारागुरुन् वक्ष्ये हृष्टात्
फलप्रदान् ऊर्द्ध्वकेशो व्योम
केशो नीलकंठ वृषध्वजः दि
व्यौघान् सिद्धिदान् वत्सम्पण
श्रावहितोभव अपिद्या मणाव
त् समहादेवगुरून् इति मनु
द्धवान् परमात्मा परानंदः प
रमेष्ठी प्रभोदयः कुलः कालः
कलानाथा दिव्यौघा भैरवादि
का इतितंत्रसारः ॥
दिश भा न ऊँ उचे इतिकविक
ल्पद्रुमः उच इह दान मात्राप
पनम्वा कथने ध्यंये इतिनदी
कायांङगोदासः ॥
दिशा स्त्री दिक् इतिव्याकरणं
दिशाः स्त्री दिक् इत्यमरटीका
यां मथुरानाथः ॥
दिश्यं त्रि दिग्भववस्तु इत्यमरः
दिष्टं क्ली भाग्यं इत्यमरः उप।
दिष्टे त्रि इतित्रिकाण्डशेषः ॥
दिष्टं पुं कालः इत्यमरः दारु
हरिद्रा इतिशब्दमाला ॥
दिष्टान्तः पुं मरणं इत्यमरः ॥
इतिमेदिनी ॥
दिष्टा च आनंदः इत्यमरः।

भाग्येन यथा दिष्ट्यात्वेकु दिगतः
परः पुमान् इतिश्रीभागवतं ॥
दिस्त त्रि दाता इत्युणादिकोषः ॥
दिह म ल ऊँ लेपने इतिकविक
ल्पद्रुमः ॥
दी ऊँ उ. य क्षये इतिकविकल्पद्रुमः
दीदिविः पुं क्ली अन्नं इत्यमरः ॥
बृहस्पतौ पुं इति मेदिनी ॥
दीदिविः त्रि उदितः इतिशब्दर
त्नावली ॥
दीधितिः स्त्री किरणः इत्यमरः
दीधी इ ऊ. त ल देवने दीप्तौ इ
ति कविकल्पद्रुमः ॥
दीनं क्ली तगरपुष्पं इति राज
निर्घण्टः ॥
दीनः त्रि दरिद्रः इत्यमरः भीतः
इति मेदिनी ॥
दीना स्त्री मूषिकस्त्री इतिमेदि
नी दीनारः पुं स्वर्णभूषा मुद्रा इ
त्युणादिकोषः निष्कपरिमाणं
इत्यमरः स्वर्णकर्षद्वयं इति
तट्टीका सारसुंदरी सम्प्रदाय
ह्रारांर्थ मानवस्तु लौकिकाः।
द्वात्रिंशद्रतिकापरिमितं कांचनं
इतिभरतः ॥
दीप ई उ. य ऊ दीपने इतिकवि

कल्पद्रुमः ॥
दीपः पुं वर्त्तिस्थज्वलदग्निशिखा ॥
तत्पर्य्यायः प्रदीपः २ स्नेहाशः ३
दीपकः ४ कज्जलध्वजः ५ शिखा
तरुः ६ गृहमणिः ७ ज्योतिस्वाहवः
८ दशेन्धनः ९ दोषातिलकः १० दो
षास्यः ११ नयनोत्सवः १२ इति श
ब्दरत्नावली कार्त्तिकमासे दीप

यथा स्कन्दे दीपस्य माहात्म्यं

दानस्य माहात्म्यं कार्त्तिके च हरि
प्रिय यस्य श्रवणमात्रेण दीप।
दाने मतिर्भवेत् सूर्य्यग्रहे कुरु
क्षेत्रे नर्म्मदायां शशिग्रहे तुला
दानस्य यत्पुण्यं तदत्रे दीपदान
तः घृतेन दीपकं यस्तु तिलतैले
न वा पुनः ज्वालयेन्मुनिशार्द्दूलस्य
अश्वमेधेन तस्य किं तेनेष्टं क्रतुभिः सर्व्वैः कृतं तीर्थावगा
हनं दीपदानं कृतं येन कार्त्तिके केशवाग्रतः।
तावद्वर्ज्जेतिपापानि देहेऽस्मिन्मुनि।
सत्तम यावत्कार्त्तिकमासेन्दी।
पदानं कृतं भवेत् तावद्वर्ज्जेति
पुण्यानि स्वर्गे मर्त्ये रसातले
यावत्प्रज्वलते दीपः कार्त्तिके के
शवाग्रतः स्फुरत्तेनापि पितृलि
गीयागीता महामते भविष्यन्ति
कुले स्माकं कदाचित् सत्ता

भुवि कार्त्तिके दीपदानैर्येतोषि
विष्यन्ति केशवं अपि नस्ते भवि
ष्यन्ति कुले च विना गुणैः दीप
दानं कार्त्तिके ये दास्यन्ति हरितोषि
दं यथा यस्मिंश्च दानेन कृतेन भी
ष्मं सर्व्वे तेऽप्याप्ति कार्त्तिके द
ते दीप स्तुष्टिकरो हरेः दीपदास्य
तिये पुत्रास्ताहृष्टं चक्रपाणिनः
कार्त्तिके तेऽमुनिश्रेष्ठ तत्कारुता
वयं मन्त्रहीनं क्रियाहीनं शुद्धिही
नं जनार्दन व्रतं संपूर्णतां यातु का
र्त्तिके दीपदानतः अनेनैव हि मन्त्रे
णादीपं संकल्पयेन्मुने मधुसूद
न तस्मात्कार्त्तिके मुनिपुङ्गव
इति पाद्मे उत्तरखण्डे अपि च दा
स्यन्ते देवदेवाय दीप पुष्पाकुले
पत्रं अपि नः सुजले भूयादेका
दशुपातिशो नरः परिष्णुप
[illegible] सर्व्वपापान [illegible] निर्दग्धं
पितृणां [illegible] कृत्वा न्यपतिस्त
नम दत्तो व दीपान् विधिवत् वि
ष्णोरायतने बलिः सगंधैस्तैलसं
पूर्णान् दीपान् सुतृतैलकान्
सर्षपस्य सुतैलेन तुमधकान् सि
संभवेः दीपप्रदानान्नरकं तथा
मिश्र स्तकान् तौली ॥

1375

समार्थया ज्वलन् विश्लोकम
गाजतः इति वामनपुराणं ॥
दीपं स्पृष्ट्वा वैधकर्म करणे दो
षो यथा दीपं स्पृष्ट्वा तु यो देवि
ममकर्माणि कारयेत् तस्याप
राधाद्वैभूमे पापं प्राप्नोति मानवः
तत्कृणुष्व महाभागे कथ्यमानं
मया गचे जायते षष्टिवर्षाणि
कुष्ठीगात्र परिम्लानः चाण्डाल
स्य गृहे तत्र एव भव न संशयः
एवं भूत्वा तु तत्कर्म मम दे
वे स्मलोयदि मद्भक्तश्चैव जायते
शुद्धे भागवते गृहे प्रायश्चित्तं प्र
वक्ष्यामि दीपस्य स्पर्शनाद्भुवि
भवंति मनुजा येन कथं च्या
ण्डतल्ययोनिषु यस्य कस्यापि मा
सस्य शुक्लपक्षस्तेव द्वादशी चतु
र्थी भक्तमाहारमाकाशशायनेस्व
पेत् दीपं स्पृष्ट्वापराधाद्वैतं बिम।
मकर्म परिक्षिप्तः एतन्मे कथि
तं देवि स्पर्शनात् दीपकस्य तु
संसारमोक्षणं चैव यत्कृत्वा ल
भते शुभं इति वराहपुराणं पुरु
षस्य दीपनिर्वापने दोषो यथा।
दीपनिर्वापनात् पुंसः कुष्माण्ड
च्छेदनात् स्त्रियः अचिरेणैव कालेन
वंश ॥

नाशो भवेद्ध्रुवं देवार्थकल्पितदी
दीपस्य निर्वापने दोषो यथा।
नैव निर्वापयेद्दीपं देवार्थमुपक
ल्पितं दीपहर्त्ता भवेदन्धः काणो
निर्वापको भवेत् इत्येकादशी
तत्त्वे कालिकापुराणं कार्त्तिक
कृष्णचतुर्दश्यां नरकनिवृत्तये
दीपदानं यथा नरकाय प्रदातव्यो
दीपः संपूज्य देवताः इति ति
थितत्त्वधृतलिङ्गपुराणं ॥
स्त्रियां दीपो न संस्थाप्यः य
था सर्व्वसहा वसुमती सहते न
तु विंद हयं अकार्य्यपादघातं च
दीपतापं तथैव च इत्येकादशी
तत्त्वधृतकालिकापुराणं ॥
दीपकं क्ली वा काव्यालंकारः दी
पिकारके त्रि इति मेदिनी कुंकुमं
इति शब्दरत्नावली काव्यालंका
रस्य लक्षणं यथा प्रस्तावितानाम
प्रस्तुतानां मन्येषां वा यदा भवेत्
एकधर्माभिसंबंधः स्यात्तदा तु
ल्ययोगिता अप्रस्तुतप्रस्तुतयो
र्दीपकं तु निगद्यते यथा मात्रे
वला बले पाद पुनापि पर्व व
तु प्रसाध्यते तेन जगज्जिगीषु
णासनीव योषित् प्रकृतिस्थनि
॥

ग्लापुमांसममेति भवान्तरेष्वपि
इति साहित्यदर्पणं अपिच जा
तिक्रियागुणद्रव्यवाचकेन पदे
नत एकत्र वर्त्तिना सर्ववाक्यार्थो
दीपकं भवेत् यथा भ्रमद्भ्रमरके
कारपुंस्कोकिलकलध्वनिः
मंदचंदनवातोपिहरंतिह्रदयंन
णां इतिकाव्यचंद्रिका ॥
दीपकः पुं यमानी इतिरत्नमाला
लोचमस्तकं इतिशब्दरत्नावली
दीपःयेन पतिर्गणेन पतिरेण
गृत्यन्तेसः वाजइतिशिकरा इति
चभाषा इति हेमचंद्रः ॥
रागविशेषः अयं हनुमन्मते
षड्रागेष्वद्वितीयरागः सर्पिने
चानिर्गतः अस्य जाति संपूर्णा
ग्रहंत षड्जस्वरः गान समय
स्तुग्रीष्मंतौमध्याह्नः अस्यरूपं
यथा वर्णोरक्तः वस्त्रंपाटलव
र्णं गलभूषणं हरन्मक्तामा
लं मनहरस्यान्नंवेश्यः वक्री
परिहृतश्च कस्मात्किंन्ते लज्जया
दीपनिर्वापनेनांधकारमयंगृहं
कृत्वास्त्रीभीरमन्ते अस्यरागिण्यः
पंचयथा देषी १ कामोद् २ नट् ३
केदारा ४ कानरा ५ कार्णाटी ६ पुत्राश्च
होयथा कुन्तलः १ कमलः २ क
लिंग ३ कलिंदः ३ चम्पकः ४ कुसु
मः ५ कुसुमः ५ रामः ६ लहिलः ७
हिमाल ८ भरतमते अस्य रागिण्यो
यथा केदारा १ गोरा २ गौरड ३ गुज्ज
री ४ रुद्राणी ५ तन्मते पुत्रा यथा
कुसुमः १ टंकः २ नटनारायणः ३
विहागरः ४ फिरोदस्तः ५ रहस
मंगला ६ रभसमंगला ६ मंगला
ष्टकः ७ अड्डानुः ८ आड्डाना ८ इ
तितदफतोलहिंदाख्यसंगीतशा
स्त्रसंग्रहः ॥
दीपकिट्टं क्ली दीपजातकज्जलं
इतिशब्दार्थकल्पतरुः ॥
दीपकूपी स्त्री दीपवर्त्तिः शलि
ता इतिभाषा तत्पर्य्यायः तैल
माली २ दीपखोरी ३ विदारिका
४ इतिशब्दमाला ॥
दीपखोरी स्त्री दीपकूपी इतिश
ब्दमाला ॥
दीपध्वजः पुं क्ली कज्जलं इति
जटाधरः ॥
दीपनं क्ली तगरमूलं इतिरत्न
माला कुंकुमं इतित्रिकांडशेषः
दीपनः पुं मयूरशिखा शालिं
चशाकः इतिशब्दचंद्रिकाकास

मर्द्दः पलाण्डुः इतिराजनिर्घंटः
दीपयितरित्रि ॥
दीपनी स्त्री मेथिका पाठा यवानी
इतिराजनिर्घंटः ॥
दीपनीयः पुं यवानी इतिरा
जनिर्घंटः दीपनयोग्येति ओ
षधवर्गविशेषः यथा पिप्पली
पिप्पलीमूलं चव्य चित्रक ना
गरं दीपनीयःस्कन्धोवर्गः कफा
निलगदापहः इतिचक्र
दीपपादपः पुं दीपवृक्षः इति
शब्दार्थकल्पतरुः ॥
दीपपुष्पः पुं चम्पकवृक्षः इ
तिराजनिर्घंटः ॥
दीपवृक्षः पुं दीपाधारः पिल।
सुज इतिदेल्लका इतिच भाषा
तत्पर्य्यायः दीपतरुः २ ज्योत्
स्नावृक्षः ३ इति त्रिकाण्डशेषः
दीपपादपः ४ इति शब्दार्थक
ल्पतरुः ॥ ॥
दीपशिखा स्त्री कज्जलं इति।
शब्दार्थकल्पतरुः प्रदीपज्वा
लाच दीपशृंखला स्त्री दीपा।
ली इतिहारावली ॥
दीपान्विता स्त्री मुख्यचांद्रेणाश्वि
नस्यगौणचांद्रेण कार्त्तिकस्यामावा
स्या
यथा येयं दीपान्विता राजन्ख्या
ता पंचदशी भुवि तस्यां दद्याच्च
चेहन पितॄणां वै महालये त
त्रकर्मोति यथा प्रदोषसमये
लक्ष्मीं पूजयित्वा यथा क्रमं दीप
वृक्षास्तथा कार्य्या भक्त्या देवगृ
हेष्वपि चतुष्पथे श्मशानेषु न
दी पर्वत सानुषु वृक्षमूलेषु गो
ष्ठेषु चत्वरेषु गृहेषु च वस्त्रैः पु
ष्पैः शोभितव्याः क्रिया विक्रय
भूमयः दीपमाला परिक्षिप्ते प्र
दोषे तदनन्तरं ब्राह्मणान् भो
जयित्वादौ विभाज्यच बुभुक्षि
तान् अलंकृतेन भोक्तव्यं नवव
स्त्रोपशोभिना स्निग्धै र्मुग्धैर्वि
दग्धैश्च बांधवै र्भृत्यकैः सह इति
तिथितत्वं ॥
दीपाली स्त्री दीपमाला तत्पर्य्या
यः दीपशृंखला २ इतिहारावली
दीपान्वितामावास्या तत्पर्य्यायः
यक्षरात्रिः २ इति त्रिकाण्डशे
षः दीपिका स्त्री महितापनीय
श्रीनिवासकृतज्योतिर्ग्रन्थविशे
षः यथा अस्ते गतवति मिहि
रे ३ तिमलिनदोषाकुलेव ॥
गो विभवे उदाहरादिषु स्फुरि

ग्रहणार्थं दीपिका क्रियते पत
द्रिका भुवन चरण जातक मुद्रा
दिदीपिकाः संति रागिणी विशे
षः सा हिल्लोल रागस्य पत्नी
अस्याध्यानं यथा प्रदोषकाले
गृहसंप्रविष्टा प्रदीप हस्तारुण
गात्र वस्त्रा सीमंत सिंदूरविराज
माना सुरक्तमाल्या किलदीपि
केयं तस्या गान कालः सा
याह्नः इतिसंगीतदामोदरः॥
प्रकाशिकायांत्रि ॥
दीपिता त्रि दीप्तिकर्ता इति ॥
व्याकरणं ॥
दीप्तं क्ली स्वर्णं हिंगु इति राज
निर्घण्टः ॥
दीप्तः पुं निम्बुकः सिंहः इति।
राजनिर्घण्टः ॥
दीप्तः त्रि निर्भासितः दग्धः ज्व
लितः इतिमेदिनी ॥
दीप्तकं क्ली स्वर्णं इतिराजनिर्घ
ण्टः दीप्तजिह्वा स्त्री पुं उल्काभुखी
सृगाली इतिहारावली ॥
दीप्तपिंगलः पुं सिंहः इतिराज
निर्घण्टः ॥
दीप्तरसः पुं किंचुलकः इति
शब्दचंद्रिका ॥

दीप्तलोचनः पुं विडालः इति
राजनिर्घण्टः ॥
दीप्तलोहं क्ली कांस्यं इति राज
निर्घण्टः ॥
दीप्ता स्त्री लांगलिकावृक्षः इति
रत्नमाला ज्योतिष्मती सातला
इतिराजनिर्घण्टः ॥
दीप्ताग्निः पुं अगस्त्यः इतित्रिका
ण्डशेषः तीव्रजठरानलयुक्ते
त्रि दीप्तांगः पुं मयूरः इतिश
ब्दरत्नावली ॥
दीप्ताक्षः पुं विडालः इति शब्द
रत्नावली ॥
दीप्तिः स्त्री दीपनं तत्पर्य्यायः
प्रभा २ रुक् ३ रुचिः ४ त्विट् ५
भा ६ भाः ७ छविः ८ द्युतिः ९ रो
चिः १० शोचिः ११ इत्यमरः कारणवे
गस्यतीव्रता क्रिया अयत्नजगुणः
इतिहेमचंद्रः कांतिरेव वयोभो
ग देश काल गुणादिभिः। उ
द्दीपितातिविस्तारप्राप्ताचेद्दीप्ति
रुच्यते इत्युज्ज्वलनीलमणिः॥
लाक्षा कांस्य। इति राज नि
र्घण्टः ॥
दीप्तिकः पुं दुग्धपाषाणवृ
क्षः इतिराजनिर्घण्टः ॥

दीप्तोपलः पुं सूर्य्यकांतमणिः इ
तिराजनिर्घण्टः ॥
दीप्यः पुं यामानी जीरकः इति
राजनिर्घण्टः मयूरशिखोरुद्र
जटा इति ख्याता इत्यमरः ॥
दीप्यकं क्ली अजमोदा यमानी॥
वर्हिचूडा इतिमेदिनी ॥
दीप्यकः पुं अलंकारः यमानी
लोचमस्तकः इति भरत धृत
रभसः ॥
दीप्यं त्रि दीप्तिविशिष्टः इतिव्या
करणं ॥
दीर्घं त्रि आयतं इत्यमरः ॥
दीर्घः पुं तालशालवृक्षः इत्क
टः इतिरत्नमाला रामशरः उ
ष्ट्रः इति राजनिर्घण्टः पंचमष
ष्ठसप्तमाष्टम राशयः यथाह
श्चिकककन्यामृगपतिवणिक्पादी
र्घीः इतिज्योतिषतत्वे द्विमात्रव
र्णः तद्यथा आईऊऋॠएऐओ
गुरुवर्णः इतिव्याकरणं ॥
दीर्घकणा स्त्री गौरजीरकः इ
तिराजनिर्घण्टः ॥
दीर्घकंटकः पुं वर्वुरः इतिरा
जनिर्घण्टः ॥
दीर्घकंठकः पुं वकपक्षी इति

शब्दचंद्रिका ॥
दीर्घकंदकं क्ली मूलकं इति राज
निर्घण्टः ॥
दीर्घकंदिका स्त्री मुषली इतिरा
जनिर्घण्टः ॥
दीर्घकंधरः पुं वकः इति राज
निर्घण्टः ॥
दीर्घकाण्डः पुं गुण्डतृणं इति रा
जनिर्घण्टः ॥
दीर्घकाण्डा स्त्री पातालगरुडील
ता इतिराजनिर्घण्टः ॥
दीर्घकीलः पुं अंकोठवृक्षः इति
राजनिर्घण्टः ॥
दीर्घकीलकः पुं अंकोठवृक्षः
इतिजटाधरः ॥
दीर्घकूरकं क्ली राजान्नं इति राज
निर्घण्टः ॥
दीर्घकेशः पुं भल्लुकः इति राज
निर्घण्टः आयतकचे त्रि ॥
दीर्घकोशिका स्त्री दीर्घकोषिका
इत्यमरटीकायांभरतः ॥
दीर्घकोषिका स्त्री क्षिणखिका
क्षिणक इतिख्याता तत्पर्य्यायः
दुर्नाम्ना २ इत्यमरः ॥
दीर्घगतिः पुं उष्ट्रः इति राज नि
र्घण्टः ॥ ॥

दीर्घग्रंथिः पुं गजपिप्पली इति राजनिर्घण्टः ॥
दीर्घग्रीवः पुं उष्ट्रः इतिहेमचंद्रः नीलक्रौंचः इति राजनिर्घण्टः ॥
दीर्घघाटिकः पुं उष्ट्रः इतिशब्दमाला दीर्घजंगलः पुं भंगानमत्स्यः इतिशब्दमाला ॥
दीर्घजंघः पुं वकः इतित्रिकांड शेषः उष्ट्रः इति जटाधरः आयतजानपुकेप्ति ॥
दीर्घजिह्वः पुं सर्पः इतिहेमचंद्रः दीर्घतरुः पुं तालः इतिशब्दार्थकल्पतरुः ॥
दीर्घतुण्डा स्त्री छुछुंदरी इति कोषान्तरः
दीर्घनिमिषा स्त्री कर्कटी इतिशब्दमाला ॥
दीर्घतृणः पुं मल्लिवारः इति राजनिर्घण्टः ॥
दीर्घदण्डः पुं परंण्डवृक्षः इति भावप्रकाशः ॥
दीर्घदण्डकः पुं परण्डवृक्षः इतिजटाधरः ॥
दीर्घदंष्ट्री स्त्री गोरक्षी इतिराजनिर्घण्टः ॥
दीर्घदर्शी पुं पंडितः इत्यमरः ॥ गृध्रः इतिशब्दरत्नावली भल्लकः इतिराजनिर्घण्टः हरदर्शीकेति
दीर्घदृष्टिः पुं दीर्घदर्शी इतिहलायुधः ॥
दीर्घद्रुः पुं तालवृक्षः इतिशब्दचंद्रिका ॥
दीर्घद्रुमः पुं शाल्मलिः इतिराजनिर्घण्टः ॥
दीर्घनादः पुं शंखः इतिराजनिर्घण्टः ॥
दीर्घमालं क्ली दीर्घरोहियकं इतिराजनिर्घण्टः ॥
दीर्घनालः पुं हस्तगुण्डः यावनालः इतिराजनिर्घण्टः ॥
दीर्घनिद्रा स्त्री मरणः इतिहेमचंद्रः
दीर्घपटोलिका स्त्री लताकलविशेषः पुंडुल इतिभाषा अस्यगुणाः स्निग्धत्वं कटुत्वं विष्टंभित्वं गुरुत्वं वायु पित्तश्लेष्मरुचि भेद कारित्वं । मधुरत्वं शीतलत्वंच इति राजवल्लभः ॥
दीर्घपात्रः पुं राजपलाण्डुः ॥ कंदः हरिदर्भः कुंदः नालः इतिराजनिर्घण्टः कुलः इतिभावप्रकाशः ॥
दीर्घपत्रकः पुं रक्तलशुनः परंडः

हिज्जलः वेतसः इति राजनिर्घण्टः करीरवृक्षः इति शब्दचंद्रिका जलजमधुकः इतिजटाधरः लशुनः इतिहेमचंद्रः ॥
दीर्घपत्रा स्त्री चित्रपर्णिका चाकुलियाभेदः ह्रस्वजम्बुः इति रत्नमाला गंधपत्रा केतकी डोडीक्षुपः इतिराजनिर्घण्टः ॥
दीर्घपत्रिका स्त्री श्वेतवचा घृतकुमारी शालपर्णी इति राजनिर्घण्टः ॥
दीर्घपत्री स्त्री पलाशीलताम हाचंचुशाकः इतिराजनिर्घण्टः
दीर्घपर्णी स्त्री पृश्निपर्णी इति राजनिर्घण्टः ॥
दीर्घपल्लवः पुं शणवृक्षः इतिराजनिर्घण्टः आयतच्छदेक्ली वतिति दीर्घपात् पुं कंकपक्षी इतिशब्दरत्नावली ॥
दीर्घपादः पुं कंकपक्षी इति हेमचंद्रः ॥
दीर्घपादपः पुं तालः पूगः इ
दीर्घपृष्ठः पुं सर्पः इत्यमरः
दीर्घफलः पुं आरग्वधवृक्षः इतिराजनिर्घण्टः ॥
दीर्घफलकः पुं अगस्त्यवृक्षः इतिराजनिर्घण्टः ॥
दीर्घफला स्त्री जतुका कपिलद्राक्षा इतिराजनिर्घण्टः ॥
दीर्घमारुतः पुं स्त्री हस्ती इति त्रिकांडशेषः ॥
दीर्घमूलः पुं मोरटलता विल्वांतरवृक्षः इतिराजनिर्घण्टः ॥
दीर्घमूलः क्ली लामज्जकं इति राजनिर्घण्टः ॥
दीर्घमूलकं क्ली मूलकं इति राजनिर्घण्टः ॥
दीर्घमूला स्त्री श्यामालता शालपर्णी इतिरत्नमाला ॥
दीर्घमूली स्त्री दुरालभा इतिशब्दमाला ॥
दीर्घरदः पुं शूकरः इतित्रिकांडशेषः आयतदंतेत्रि ॥
दीर्घरसनः पुं सर्पः इति शब्दचंद्रिका ॥
दीर्घरागा स्त्री हरिद्रा इति राजनिर्घण्टः ॥
दीर्घरात्रं क्ली चिरकालं इतित्रिकाण्डशेषः दीर्घानिशाच ॥ दीर्घरोमा पुं भल्लकः इतिशब्दार्थकल्पतरुः ॥

दीर्घद्वेषिकं क्ली कट्फलभेदः सुगंधिफलविशेषः बडेदिष इति भाषा तत्पर्य्यायः हृत्फकं १ हृत्फलच्छदं २ ग्रहेलं ३ दीर्घनालं ४ तिक्तसारं ५ अस्य गुणाः तिक्तत्वं कटुत्वं उष्णत्वं कफवातभूतग्रहविषनाशित्वं व्रणदत्तनवि[illegible]णत्वंच इति राजनिर्घण्टः ॥

दीर्घवंशः पुं नलः इति राजनिर्घण्टः आयतेनलार्थेऽकुलेच

दीर्घवक्त्रः पुं स्त्री हस्ती इति शब्दमाला ॥

दीर्घरद्रिका स्त्री कुंभीरः इति शब्दार्थकल्पतरुः ॥

दीर्घवल्ली स्त्री महेंद्रवारुणी पातालगरुडी पलाशी इति राजनिर्घण्टः ॥ आयतलताच ॥

दीर्घवाला स्त्री चमरी इति राजनिर्घण्टः ॥

दीर्घवृन्तः पुं श्योनाकवृक्षः इत्यमरः ॥

दीर्घवृन्तकः पुं श्योनाकः इति शब्दमाला श्योनाकप्रभेदः इति राजनिर्घण्टः ॥

दीर्घवृन्ता स्त्री इंद्रचिर्भिटी इति राजनिर्घण्टः ॥

दीर्घ[illegible] स्त्री एलापर्णी [illegible]चंद्रिका:

दीर्घशरः पुं यावनालः इति राजनिर्घण्टः ॥

दीर्घशाखः पुं शणवृक्षः इति [illegible]निर्घण्टः शालवृक्षः इति शब्दचंद्रिका ॥

दीर्घशाखिका स्त्री नीलाम्लीक्षुपः इति राजनिर्घण्टः ॥

दीर्घशिंबिकः पुं तरः इति राजनिर्घण्टः ॥

दीर्घशूकं क्ली राजान्नं इति राजनिर्घण्टः ॥

दीर्घसक्थ त्रि दीर्घोरु इति व्याकरणं ॥

दीर्घसक्थि क्ली शकटं इति व्याकरणं दीर्घसत्रं क्ली यज्ञविशेषः तीर्थविशेषः इति शब्दार्थकल्पतरुः दीर्घसरनः पुं स्त्री कुक्कुरः इति त्रिकाण्डशेषः ॥

दीर्घसूत्रः त्रि चिरक्रियः इत्यमरः अदीर्घसूत्रश्च भवेत् सर्वकर्मसु पार्थिवः दीर्घसूत्रस्तु नश्यते: कर्महानिर्ध्रुवं भवेत् रागेद्वेषे च काले च दोहे पापे च कर्मणि अप्रणे चैव कर्त्तव्ये दीर्घसूत्रः प्रशस्यते

इति मत्स्यपुराणे दिशतेनैनोच

दीर्घसूत्री न त्रि दीर्घसूत्रः इति हलायुधः ॥

दीर्घस्कंधः पुं तालवृक्षः इति राजनिर्घण्टः ॥

दीर्घा स्त्री पृश्निपर्णी इति राजनिर्घण्टः ॥

दीर्घाध्वगः त्रि लेखहारः धाउडिया इति भाषा उष्ट्रे पुं इति मेदिनी ॥

दीर्घायुः स पुं शाल्मलिवृक्षः काकः जीवकवृक्षः मार्कण्डेयः चिरजीविनि त्रि इति मेदिनी ॥

दीर्घाप्रथः पुं ऊर्णाखु इति त्रिकाण्डशेषः शूकरः इति शब्दमाला

दीर्घापुष्पः पुं श्वेतमंदारकः इति राजनिर्घण्टः ॥

दीर्घालर्कः पुं श्वेतमंदारकः इति राजनिर्घण्टः ॥

दीर्घिका स्त्री दिशाजयन्तुः परिमितजलाशयः दीघि इति भाषा तत्पर्य्यायः वापी २ इत्यमरः ॥ तज्जलगुणाः गुरुत्वं कटुत्वं क्षारत्वं पित्तलत्वं कफवातनाशित्वंच हिंगुपत्री इति राजनिर्घण्टः ॥

दीर्घैर्वारुः पुं डंगरी इति राजनिर्घण्टः ॥

दीर्णः त्रि विदारितः भीतः इति मेदिनी ॥

दीविः पुं किकीदिविः इति शब्दमाला ॥

दुः अ निषेधः दुःखं निंदा अववेपणं इति दुर्गादासधृतपुरुषोत्तमदेवः ॥

दुः स अ दुःखभावेन कोपः इति दुर्गादासधृतमेदिनी ॥

दु गतौ इति कविकल्पद्रुमः ॥

दु दु ओ न अनुतापे इति कविकल्पद्रुमः ॥

दुःकूलः पुं चोरनामगंधद्रव्यं इति राजनिर्घण्टः ॥

दुःख न क दुःखकृतौ इति कविकल्पद्रुमः ॥

दुःखं क्ली संसारः इति त्रिकाण्डशेषः मनोधर्मविशेषः न्यायमते आत्मगुणभेदः तत्तु अधर्मजन्यं सचेतसां प्रतिकूलं इति भाषापरिच्छेदः तत्पर्य्यायः पीडा २ बाधा ३ व्यथा ४ आमानस्यं ५ प्रसूतिजं ६ कष्टं ७ कृच्छ्रं ८ आभीलं ९ इत्यमरः अर्त्तिः १० ॥

आर्त्तिः ११ पीडनं १२ स्रवाधा १३ बा यनं १४ आमनस्यं १५ आमानस्यं १६ लिवायनं १७ वीडितं १८ विदेवनं १९ इतिशब्दरत्नावली सर्वदुःख च हर्षेव शोकेन मंगलालयं म याद्दमेव तत्त्वस्य योगिनामपिडु र्लभं इतिवल्लवैवर्ते श्रीकृष्णज न्मखण्डे दुःखमेव प्रवक्ष्यामि जन्म कृष्णस्य वसुंधरे अतिनेभापचारे णदुःखमेव विनाशनं अहंकार कृतो नित्यं नरोमोहेनचावृतः येमां नैव प्रपद्यंते ततोदुःख नरं नुकिं सर्वभूतेसर्वविदे नमस्कारविवर्जिताः येवर्मानप्र पद्यंतेततोदुःखतरंनुकिं सर्व ज्ञानिनसिद्धादिपाकमभेदनका रयेत् सर्वेष्टदेवं नरोऽश्नाति न त्रदुःखतरंनुकिं प्राप्तकालेवै स्वदेहेदृष्ट्वाग्निस्थि मागतं अद त्वा तस्मै भुंक्ते तत्रदुःखतरंनु किं यूसंतसस्त वैषम्ये परदा राभिमर्दकः परोपतापी मंदा त्मा तत्रदुःखतरंनु किं आकृत्वायु र्वलेकर्मगृहेसेवमतेनदः अस्मकाल वर्णाश्रमसत्त्व दुःखतरंनु किंर त्नस्य रथ्यानानिगमद्धमानानिपश्य ति नैव ॥

तस्याग्रतः स्पृष्टे तत्र दुःखतरन्नु किं अग्नि लिप्ति शिले केचित् तुलमालि समन्वितं सुश्कामे केचिदस्थिति त्रदुःखतरंनु किं वरवस्त्राहृतां प्राप्यां समासेवंति भूषिताः केचित् सलोष्ठ शेवंते ततोदुःख तरंनु किं विद्वानकृती गुणतत्त्वसर्व एतदं विशारदः केचिन्मूकात्रह यं पतेतत्रदुःखतरंनु किं विद्यमा नेधनेकेचित्कृपणाभोगवर्जिताः दरिद्रो जायते दाता तत्र दुःख त तरंनु किं दुष्टपसहद्येमार्थेन [illegible] प्रहास्यवेन् एकापिकर्भ गान्ता तत्रो दुःखतरंनु किं लब्धा तुलानुषीसंतांपचभूत समन्वि तां मामेव न प्रपद्यन्ते ततो दुःख तरंनु किं लब्धा ब्राह्मणं भवेत् त्रयोवर्णाः समथ्यमे पापकर्म रतालासक्त्वातोदुःखतरंनुकिं प त्रते कथितं भद्रे दुःखकर्मविनि श्चयं सर्वभूतहितार्थाय यत्वया परिपृच्छते इतिवराहपुराणे ॥ दुःखदानियथा परतंत्र्य १ आधिः २ व्याधिः ३ मानच्युतिः ४ शत्रुः ५ कुभार्या ६ नैःस्व ७ कुग्रामवासः ८ कुस्वामिसेवनं ९ वक्रकन्याः हरंते

त्रिनेत्रा १०२ त्रिशूला १०३ चर्चिका १०४ तीव्रा १०५ नंदिनी १०६ नंदा १०७ ध रित्रिणी १०८ मातृका १०९ चिदा नंदस्वरूपिणी ११० मनस्विनी १११ महादेवी ११२ निद्रारूपा ११३ भवा निका ११४ तारा ११५ नीलसरस्वती ११६ कालिका ११७ उग्रतारा ११८ का मेश्वरी ११९ सुंदरी १२० भैरवी १२१ राजराजेश्वरी १२२ भुवनेशी १२३ त्वरिता १२४ महालक्ष्मी १२५ रा जीवलोचनी १२६ धनदा १२७ [illegible]। गीश्वरी १२८ त्रिपुरा १२९ ज्वाला। मुखी १३० बगलामुखी १३१ सिद्ध। विद्या १३२ अन्नपूर्णा १३३ विशाला ती १३४ सुभगा १३५ सगुणा १३६ निर्गुणा १३७ धवला १३८ गीति १३९ गीतवाद्यप्रिया १४० अट्टालवासि। नी १४१ अट्टहासिनी १४२ घोरा १४३ प्रेमा १४४ वटेश्वरी १४५ कीर्तिदा १४६ बुद्धिदा १४७ अवीरा १४८ पंडिता। लयवासिनी १४९ मंडिता १५० संव त्सरा १५१ कृष्णरूपा १५२ बलिप्रि। या १५३ तुमुला १५४ कामिनी १५५ का मरूपा १५६ पुण्यदा १५७ विश्वचक्र धरा १५८ पंचमा १५९ वृंदावन तु रूपिणी १६० अयोध्यारूपिणी १६१ मायां

वती १६२ जीमूतवसना १६३ ज गन्नाथस्वरूपिणी १६४ कृत्तिवस ना १६५ त्रियामा १६६ जमलार्जुनी १६७ यामिनी १६८ यशोदा १६९ यादवी जगती १७१ कृष्णजाया १७२ सत्यभा मा १७३ सुभद्रिका १७४ लक्ष्मणा दिगंबरी १७६ पृथुका १७७ तीक्ष्णा आचारा १७९ अक्रूरा १८० जाह्नवी गंडकी १८२ ध्येया १८३ जृंभणी मोहनी १८५ विकारा १८६ अक्षरवा सिनी १८७ अंशका १८८ पत्रिका १८९ पवित्रिका १९० तुलसी १९१ अतु। ला १९२ जानकी १९३ वंद्या १९४ कामना १९५ नारसिंही १९६ गिरी शा १९७ साध्वी १९८ कल्याणी कमला २०० कांता २०१ शांता २०२ कुला २०३ वेदमाता २०४ कर्मदा संध्या २०६ त्रिपुरसुंदरी २०७ रासे। शी २०८ दक्षयज्ञविनाशिनी २०९ अनंता २१० धर्मेश्वरी २११ चक्रेश्वरी खंजना २१३ विदग्धा २१४ कुब्जि। का २१५ चित्रा २१६ सुलेखा २१७। चतुर्भुजा २१८ राका २१९ प्रज्ञा २२० ऋद्धिदा २२१ तापिनी २२२ तपा २२३ सुमंत्रा २२४ इति तस्याः सहस्र नामांतर्गतं ग्रंथदुर्गानाम्नो।

ब्रूत पत्नि यया दुर्गो दैत्ये महाविघ्ने भवबन्धे कुकर्मणि शोके दुःखे च नरके यमदण्डे च जन्मनि महाभयेऽतिरोगे चाप्य शब्दो हन्तृवाचकः एतान् हन्त्येव या देवी सा दुर्गा परिकीर्त्तिता अथवा दैत्यनाशार्थवचनो दकारः परिकीर्त्तितः उकारो विघ्ननाशस्य वाचको वेदसम्मतः रेफो रोगघ्नवचनो गश्च पापघ्नवाचकः भयशत्रुघ्नवचनश्चाकारः परिकीर्त्तितः स्मृत्युक्तिश्रवणाद्यस्या एते नश्यन्ति निश्चितं ततो दुर्गा हरेः शक्तिर्हरिणा परिकीर्त्तिता दुर्गोऽति दैत्यवचनोऽप्याकारो नाशवाचकः दुर्गं नाशयति या नित्यं सा दुर्गा वा प्रकीर्त्तिता विपत्तिवाचको दुर्गश्चाकारो नाशवाचकः तं ननाश पुरा तेन बुधैर्दुर्गा प्रकीर्त्तिता अस्याः स्वरूपं यथा नन्दपत्नीं प्रति श्रीकृष्णवाक्यं आद्या नारायणी शक्तिः सृष्टिस्थित्यन्तकारिणी करोमि च यया सृष्टिं यया ब्रह्मादिदेवताः यया जयति विश्वं च यया सृष्टिः प्रजायते यया विना जगन्नास्ति मया दत्ता शिवाय सा दया निद्रा च तृष्णा क्षमा श्रद्धा क्षमा धृतिः तुष्टिः पुष्टिस्तथा शान्तिर्लज्जाधिदेवता हि सा वैकुण्ठे सा महालक्ष्मीर्गोलोके राधिका सती मर्त्ये लक्ष्मीश्च क्षीरोदे दक्षकन्या सती च सा सा दुर्गा मेनकाकन्या दैत्यदुर्गतिनाशिनी स्वर्गलक्ष्मीश्च दुर्गा सा शक्रादीनां गृहे गृहे सा वाणी सा च सावित्री विप्राधिष्ठातृदेवता वह्नौ सा दाहिका शक्तिः प्रभाशक्तिश्च भास्करे शोभाशक्तिः पूर्णचन्द्रे जले शक्तिश्च शीतला शस्यप्रसूतिशक्तिश्च धारणा च धरासु सा ब्राह्मण्यशक्तिर्विप्रेषु देवशक्तिः सुरेषु सा तपस्विनां तपस्या सा गृहिणां गृहदेवता मुक्तिशक्तिश्च मुक्तानां माया सा सांसारिकस्य सा मद्भक्तानां भक्तिशक्तिर्मयि भक्तिप्रदा सदा नृपाणां राज्यलक्ष्मीश्च वणिजां लाभरूपिणी पारे संसारसिन्धूनां त्वयीदृक्तरणी सतां सद्बुद्धिरूपा च मेधाशक्तिस्वरूपिणी व्याख्याशक्तिः श्रुतौ शास्त्रे दानशक्तिश्च दातृषु देवादीनां विप्रभक्तिः पतिभक्तिः सतीषु च एवंरूपा च या शक्तिर्मया दत्ता शिवाय सा अपि च शङ्करं प्रति पार्वतीवाक्यं वैकुण्ठे ॥ ।

॥ परगृहवासः १२ वर्षाप्रवासः १३ आर्याद्वयं १४ जम्बालः १५ दुर्हलकरणककृषिः १६ इति कविकल्पलता ॥

दुःखदोह्या स्त्री दुष्टदोहगवी तत्पर्य्यायः करटा २ इति हेमचन्द्रः ॥

दुःखितः त्रि दुःखी दुःख धातोः कर्त्तरि क्तप्रत्ययः दुःखं जातमस्येति इतच्प्रत्ययेनापि भावे क्ते दुःखं तत्र क्ली ॥

दुःखी त्रि दुःखान्वितः दुःखं विद्यतेऽस्येति इन्प्रत्ययः ॥

दुःषमम् अ निन्दनीयं तत्पर्य्यायः निःषमं २ गर्ह्यं ३ इत्यमरः ॥

दुःसमं त्रि असमञ्जसं इति त्रिकाण्डशेषः ॥

दुःसहा स्त्री नागदमनी इति राजनिर्घण्टः ॥

दुःसाधी पुं दौवारिकः इति शब्दमाला ॥

दुःसाध्यः त्रि दुःखेन साध्यः दुःखेन साध्यते निष्पाद्यते यः ॥

दुःस्थः त्रि दुर्गतः मूर्खः दुःखेन तिष्ठतीति यः इति मेदिनी लब्धः इति शब्दार्थकल्पतरुः ॥

दुःस्पर्शः पुं दुरालभा इत्यमरः ॥ लताकरञ्जः इति राजनिर्घण्टः ॥ खरस्पर्शे त्रि इति मेदिनी ॥

दुःस्पर्शा स्त्री कपिकच्छूः आकाशवल्ली कण्टकारी दुरालभा ॥ इति राजनिर्घण्टः ॥

दुःस्फोटः पुं शस्त्रभेदः इति हेमचन्द्रः ॥

दुकूलं क्ली क्षौमवस्त्रं सूक्ष्मवस्त्रं इति मेदिनी ॥

दुगूलं क्ली दुकूलं पट्टवस्त्रं इति हेमचन्द्रः ॥

दुग्धं क्ली स्त्रीजातिस्तननिःसृतद्रवद्रव्यविशेषः दुध इति भाषा तत्पर्य्यायः क्षीरं २ पीयूषं ३ ऊधस्यं ४ स्तन्यं ५ पयः ६ अमृतं इति राजनिर्घण्टः बालजीवनं इति भावप्रकाशः अस्य सामान्यगुणाः स्वादुरसत्वं स्निग्धत्वं ओजःकारित्वं धातुवर्द्धनत्वं वातपित्तहरत्वं वृष्यत्वं श्लेष्मलत्वं गुरुत्वं शीतलत्वं पिच्छिलत्वं इक्षुगुणागुरुत्वं च गोदुग्धगुणाः प्राणधारकत्वं बलायुःपुष्टत्वं शुक्रकारित्वं मेध्यत्वं रक्तपित्तरोगवायुनाशित्वं रसायनत्वं च छागीदुग्धगुणाः मधुरत्वं शीत

त्वं मलवंधाग्निकारित्वं रक्तपित्तवि
कार श्वासकास सर्वदोष नाशित्वं
च मेषी दुग्ध गुणाः गुरुत्वं स्वा
दुत्वं स्निग्धत्वं उष्णत्वं कफपित्त
नाशित्वंच माहिषदुग्धगुणाः
अतिस्निग्धत्वं निद्राकारित्वं अ
ग्निनाशित्वं उष्ट्री दुग्ध गुणाः
रूक्षत्वं उष्णत्वं शोथ वात कफ
नाशित्वंच अश्वी दुग्ध गुणाः
सलवणत्वं ....
हस्तिनी दुग्धगुणाः मधुरत्वं
शुक्रकारित्वं कषायानुरस
त्वं गुरुत्वंच नारीदुग्धगुणाः
प्राणधारकत्वं शरीरहितकारि
त्वं हेद्दणत्वं रुचिजनकत्वंच।
प्रसूयकाले गो दुग्ध पान गु
णाः गुरुत्वं विष्टंभित्वं दुर्जरत्वं
तस्मात्सप्तर्ष्याद्यात् परंयाम्नेया
मार्द्धमेववाऽजीर्णपयो ग्राह्यं न
तत्पथ्यं दीपनंलघु विज्ञत्सा
वात्सवत् सात्नीपयः दोसल ॥
एकवर्णावत्स गो दुग्धं सेनव
णीहक्ष्मवर्णगोऽप्यंपवप्रशास्तं
इत्रमत्तकमाष पर्णमत्तकाई
ष्टंगागो दुग्धं पक्वमपक्वंवा हित।
कारकं पर्युषितदुग्धगुणाः गुरुत्वंविष्ट
म्भित्वं दुर्जरत्वंच अपक्व दुग्धगु
णाः प्रायोऽभिष्यंदित्वं गुरुत्वंच
शृतोष्णं कफवातघ्नं शृतं
शीतं पित्तघ्नं धारोष्णं दुग्धं
अमृततुल्यं शीतलं दुग्धं वि
ना सर्दमपक्वं दुग्धं त्याज्यं सलव
णदुग्धं विग्रथितं नष्टं त्याज्यं
दुग्धं च त्याज्यं दुग्धान्नगुणाः व
र्ह्हितत्वं बल कारित्वं पित्तना
शित्वं रसायनत्वंच शाकाम्लप
लपिण्याक कुलत्थ लवणामिषैः
करीर दधि माषैश्च प्रायः क्षीरंवि
रुध्यते इति राजवल्लभः ॥
अथ चतुर्विध क्षीर गुणाः केष्मा
दिकं पथ्यतमं शृतोष्णं क्षीरं त्व
जानां शृतशीत माहुः ॥
दोहान्तपीतं महिषीपयस्तुगव्यं
तथारोग्यमिदं प्रशास्तं हृष्यंहृदय
मग्नि वर्द्धनकरं सर्वांग पीतं पयो
मध्याह्ने बलदायकं रतिकरं ह्र
स्वप्रविवर्धनं वात्यवक्तिकरं न
तोवल्कशर्वरीयमदेवार्द्धके दोषा
क्षीणमनेकदोषशमनं सेव्यं ततः स
र्वदा क्षीरंमकुर्मवजितयोषितं यद
नप्रमेतहितकतिंमयाति ॥
षमांत दोषं कुरुते नद्धं ॥।

1387

विशोपमं स्यादुषितं दशानां ॥
जीर्णज्वरे कफे क्षीणे क्षीरं स्याद
दमृतोपमं तदेव मत्तरोपीतं
विषवद्धंति मानुषं क्षीरकाश्च
गुणाः चतुर्थी भागं सलिलं नि
धाय यत्नात्पचावर्तितमुत्तमं तत्
सर्वामयघ्नं बल पुष्टिकारि वीर्य
प्रदं क्षीर मतिप्रशस्तं गव्यं पू
र्वाह्णकाले स्यादपराह्णे त्व माहि
षं क्षीरं सशर्करं पथ्यं यद्दासा।
त्यंचसर्वदा क्षीरं नक्तंजीन क
दाच्यनमंनपंच नैलवणेनसा
र्द्धं मिष्टान्न संधानक माषमुद्ग
कोशातकी कंदफलादिकैश्च ॥
तथाच मत्स्यमांसगुडमुद्गमूल
कैः कुष्ठमावहति सेवितं पयः शा
कः कुष्ठमावहति सेवितं पयः शा
कजांबवरसादि सेवितं मारयत्य
बुधमाशुसर्पवत् स्निग्धंशीतंगुरु
क्षीरं सर्वकालं न सेवयेत् क्षीणा
ग्निः कुरुते मंदं मंदाग्निं नष्टमेवच ॥
नित्यंनीवाग्निना सेव्यं सुपक्वं माहि
षं पयः पुष्टिं निधातवः सर्वबल
पुष्टि विवर्द्धनं क्षीरं गवाजकारेर्मधु
रंतारं नवप्रसूतानां तत्वपित्तदाहं करोति
रक्तामयं कुरुते मधुरं त्रिदोषशमनं ॥
क्षीरंमध्यप्रसूतानां लवणंमधुरं
क्षीरंविदाह जननं चिरप्रसूता
नां गुणहीनं निःसारः क्षीरं प्र
थमप्रसूतानां मध्यमवयसां र
सायनमुक्तमिदं दुर्वलतेन हृद्गानां
नासांमासत्रयाद्द्र्ध्वं गुर्विणीनांच
यत्पयः तद्धादि लवणं क्षीरं म
धुरं पित्तशोषकृत् दुग्धाम्लेषी
तलेस्वादु वृष्यं वर्णकरं गुरु वात
पित्तापहं रूक्षं बृंहणंबलवर्द्धमे
इति राजनिर्घंटः अथ भावप्रका
शोक्त साम्य दुग्ध गुणाः दुग्धं
सुमधुरं स्निग्धं वातपित्तहरं सरं
सद्यःशुक्रकरं शीतं सात्म्यं सर्वश
रीरिणां जीवनं बृंहणं बल्यं मेध्यं
वाजीकरं परं वयःस्थापकमायु
ष्यं संधिकारि रसायनं विरेकवा
न्तिवस्तीनां तुल्यमोजोविवर्द्धनं।
जीर्णज्वरे मनोरोगे शोष मूर्च्छा
भ्रमेषुच ग्रहण्यां पाण्डुरोगेच
दाहे तृषि हृदामये शूलोदाव
र्ते गुल्मेषु बस्तिरोगे गुदांकुरे र
क्तपित्ते तिसारे च योनिरोगे श्र
मे क्लमे गर्भस्रावेच सततं हितम
वैः स्तनं बाल वृद्धतन क्षीणाः स्त्र
हावायकृशाश्च ये तेभ्यः सदातिशयितं

हित मेतदुदाहृतं इति भावप्र
काशः ॥
दुग्धः त्रि प्रपूरितः इति मेदिनी
कृतदोहस्य दोहने क्ली ॥
दुग्धकूपिका स्त्री पिष्टकविशेषः
यथा तण्डुलचूर्णं विमिश्रित नष्ट
क्षीरेण सांद्रपिष्टेनाल्पकूपिकां
विदध्यात्तां च [illegible] सर्पिषा सम्यक्
स्तनितां कोमलं तस्यां घनपयसा
पूर्णां गर्भं च शर्करकर्पूरितवद्धां तां
मद्येनेन पक्वलवनं च कृतिपाण्डु
खण्डके [illegible] पयेन कर्पूरवासि
ते दुग्धपालः अस्या गुणाः दुग्धकू
पिका सा बल्यापिमानिलापहा
वृष्या पित्तापहा गुर्वी शुक्रकरी तर्पणी
रुच्या विदधाति कायपुष्टिं हृष्टिं
दुग्धसारं गौरवं चिरं इति भाव
प्रकाशः ।
दुग्धतालीयं क्ली दुग्धाग्रं क्षीर
फेनः इति मेदिनी दुग्धाग्रं इ
ति हेमचन्द्रः ॥
दुग्धपाचनं क्ली दुग्धपाकपात्रं
तत्पर्यायः वङ्ककं २ इति शब्दरत्ना
वली ॥
दुग्धपाषाणः पुं हस्तविशेषः
शिरगोला इति भाषा तत्पर्यायः
दुग्धपाषाणकः २ दुग्धाश्मा ३
क्षीरी ४ गोमेदसन्निभः ५ वज्राभः ६
दीप्तिकः ७ दुग्धी ८ क्षीरदलः ९ अ
स्य गुणाः रुच्यत्वं ईषद्दुष्टत्वं ज्वर
पित्तहृद्रोगमूत्रकृच्छ्राश्मानविना
शित्वं च इति राजनिर्घण्टः ॥
दुग्धपुष्पी स्त्री वृक्षविशेषः दुग्ध
पेया इति ख्याता तत्पर्यायः से
वकालः २ निद्रा ३ भंगा ४ नर्तक
री ५ इति शब्दचन्द्रिका ॥
दुग्धफेनः पुं क्षीरडिण्डीर [illegible] तत्
पर्यायः शार्करः २ इति राजनि
र्घण्टः ॥
दुग्धफेनी स्त्री क्षुपविशेषः त
त्पर्यायः पयःफेनी २ फेनदुग्धा ३
पयस्विनी ४ लूतारिः ५ व्रणकेल
ही ६ गोजापर्णी ७ अस्या गुणाः कटु
त्वं तिक्तत्वं शिशिरत्वं विष व्रणना
शित्वं रुच्यत्वं पुंस्त्वरसायनत्वं च
इति राजनिर्घण्टः ॥
दुग्धबीजा स्त्री यावनालाख्यकनान
मतण्डुल विपिटः अस्या गुणाः ॥
समधुरत्वं दुर्जरत्वं वीर्यपुष्टि दात
त्वं च इति राजनिर्घण्टः ॥
दुग्धाब्धितनया स्त्री लक्ष्मीः इति
कविकल्पलता ॥

दुग्धाश्मा न पुं दुग्धपाषाणः इ
ति राजनिर्घण्टः ॥
दुग्धावः पुं उपलविशेषः इ
ति शब्दार्थकल्पतरुः ॥
दुग्धिका स्त्री वृक्षविशेषः दुधी
दुधलतीर इति च भाषा तत्पर्या
यः स्वादुपर्णी २ क्षीरावी ३ क्षीरि
णी ४ अस्या गुणाः उष्णत्वं गुरु
त्वं रूक्षत्वं वातलत्वं गर्भकारित्वं
स्वादुक्षीरत्वं कटुत्वं तिक्तत्वं म
लमूत्रोत्सर्गकारित्वं पटुत्वं ।
स्वादुत्वं विष्टम्भित्वं वृष्यत्वं कफ
कुष्ठ कृमि नाशित्वं च इति भाव
प्रकाशः । वृक्षभेदः गंधिकादु
ति ख्याता तत्पर्यायः उज्जमा २
युग्मफला ३ उत्तमफलिनी ४ इ
ति रत्नमाला ॥
दुग्धिनिका स्त्री रक्तापामार्गः इ
ति राजनिर्घण्टः ॥
दुग्धी स्त्री क्षीरादी इति मेदिनी
दुग्धपाषाणः इति राजनिर्घण्टः ।
दुच्छकः पुं मृगनाभिगंधद्रव्यवि
शेषावकाशकः इति मेदिनी ॥
दुडिः स्त्री दुलिः कच्छपी इत्यमरटी
कायां रायमुकुटः ॥ दुण्डुकः त्रि ड
खलितः इति शब्दार्थ ॥ ॥
कल्पतरुः ॥
दुण्डुभः पुं दुण्डुभसर्पः इत्युणा
दिकोषः ॥
दुद्रुमः पुं हरित पलाण्डुः इत्यम
रः दुन्दमः पुं दुन्दुभिः इति शब्दर
त्नावली ॥
दुन्दुः पुं वसुदेवः इति त्रिकाण्ड
शेषः दुन्दुभिवाद्यं इति शब्दर
त्नावली ॥
दुन्दुभिः पुं हहरुक्का तत्पर्यायः
भेरी २ आनकः ३ इत्यमरः ॥
वरुणः दैत्यभेदः इति मेदिनी
रक्षोभेदः वाद्यभेदः इति शब्दर
त्नावली विषं इति हेमचन्द्रः
दुन्दुभिः स्त्री अक्षः पाशकः इ
त्यमरः अक्ष पाशक विषये दा
नविशेषो विनिर्दिष्टः इति ख्यातः इति
केचित् अक्ष विन्दु त्रिक द्वयं इ
ति [illegible]
स्वर्णादिमयपुत्तोपकरणं
पाशटी इति ख्याता इति केचित्
इति नदीकायां भरतः ॥
दुन्दुमारः पुं धुन्धुमारः इति शब्दा
र्थकल्पतरुः ॥
दुरदृष्टं क्ली दुर्भाग्यं इति स्मृतितत्त्वे

दुरध्वः पुं कुपथः इत्यमरः ॥
दुरभिग्रहः पुं अपामार्गः इति
राजनिर्घण्टः दुःखग्राह्ये त्रि दु
रभिग्रहा स्त्री कपिकच्छुः दुरा
लभा इतिराजनिर्घण्टः ॥
दुराकः पुं म्लेच्छभेदः इत्युणा
दिकोषः ॥
दुराचारः पुं विरुद्धाचरणं य
था प्राप्ते कलियुगे घोरे नराः पु
ण्यविवर्जिताः दुराचाररताः स
र्वे सत्यवार्त्तापराङ्मुखाः इत्यध्या
त्मरामायणं निंदिताचारवति त्रि
दुराधर्षः पुं गौरसर्षपः इतिरा
जनिर्घण्टः अधर्षणीये त्रि दुरा
धर्षा स्त्री कुटुंबिनीवृक्षः इतिरा
जनिर्घण्टः ॥
दरारुहः पुं बिल्वः नारिकेलः
इतिराजनिर्घण्टः ॥
दुरारुहा स्त्री खर्जूरी इति राज
निर्घण्टः ॥
दुरारोहः पुं स्त्री [illegible] इति
राजनिर्घण्टः दुःखारोहणीये त्रि।
त्रि दुरारोहा स्त्री शाल्मलिवृक्षः
इतित्रिकाण्डशेषः श्रीवल्ली इति
राजनिर्घण्टः दुरालभा स्त्री स्वना
मख्यातकंटकयुक्तक्षुद्रवृक्षवि
शेषः यवासप्रभेदः हिंगुया
इतिख्याता तत्पर्यायः दुराल
भा २ धन्वयासः ३ ताम्रमूला ४
कच्छुरा ५ दुस्पर्शा ६ धन्वी ७ ध
न्वयवासकः ८ प्रबोधनी ९ सू
क्ष्मदला १० विरूपा ॥ दुरभिग्रहा ११
दुर्लभा १२ दुःप्रधर्षा १४ इति राज
निर्घण्टः यासः १५ यवासः १६
दुःस्पर्शः १७ अनन्ताकः १८ रोदनी
अनंता २० समुद्रान्ता २१ इत्यमरः
गंधारी २२ कषायः २३ इतिभा
वप्रकाशः अस्या गुणाः [illegible]
त्वज्वर छर्दि श्लेष्म पित्त विसर्प
वेदना नाशित्वंच इति राज वल्ल
भः कटुत्वं तिक्तत्वं उष्णत्वं सार
त्वं अम्लत्वं मधुरत्वं वातगुल्म
प्रमेह नाशित्वंच इतिराजनिर्घण्टः
यवासस्य गुणा स्तुल्या बुधैरुक्ता
दुरालभा इतिभावप्रकाशः दुरा
लभनीये त्रि दुरालभा स्त्री दुरा
लभा इति राजनिर्घण्टः ॥
दुरालापः पुं गालिः इति शब्दार्थ
कल्पतरुः ॥
दुरासदः त्रि दुष्प्राप्यः यथा दु
रासदो दुर्विषहो भूतानां सवभ
वह ॥

इतिश्रीभागवतं ॥
दुरितं क्ली पापं इत्यमरः ॥
तद्वति त्रि ॥
दुरितदमनी स्त्री शमी इतिराज
निर्घण्टः पापनाशिनीच ॥
दुरिष्टः त्रि [illegible] अयमन
योरेषांवा अतिशयेन दुःनिंदितः
इतिव्याकरणं ॥
दुरीषणा स्त्री शापः इतिशब्दा
र्थकल्पतरुः ॥
दुरोदरं क्ली द्यूतभेदः पाशक।
क्रीडा इत्यमरः ॥
दुरोदरः पुं द्यूतकृत पणः इति
मेदिनी ॥
दुर्गं क्ली पर्वतादिभिर्दुर्गमं पुरं
इत्यमरः गडइति केल्ला इतिचभा
षा तत्पर्यायः कोट्टं २ इति हे
मचंद्रः तत्तु षड्विधं यथा तत्र
दुर्गं त्वपः कुर्यात् षण्णामेकतमं
बुधः धन्वदुर्गं महीदुर्गं नरदुर्गं त
थैवच वार्क्षंचैवाम्बुदुर्गंच गिरिदुर्गं
(तत्पार्थिवसर्वेषां चैव दुर्गा)
णां गिरिदुर्गं प्रशस्यते दुर्गंचय
विशेषेतद्वाहात्मकसंयुते प्रान
प्रीयंत्रमुक्तोपशानशस्त्र समाहतं
इति मत्स्ये ॥ ॥
१९१ अध्यायः ॥
दुर्गः पुं असुरभेदः यंहत्वा चंडि
काया दुर्गेति नामाभूत् इतिका
शीखण्डं गुग्गुलुः इति राजनि
र्घण्टः दुर्गमे त्रि इतिमेदिनी दुर्ग
कारकं क्ली वृक्षविशेषः इतिश
ब्दमाला दुर्गकर्त्तरि त्रि ॥
दुर्गतः त्रि दरिद्रः इत्यमरः ॥
दुर्गतिः स्त्री नरकः इत्यमरः
दारिद्र्यं इति मेदिनी ॥
दुर्गतिनाशिनी स्त्री दुर्गा यथा
ब्रह्माण्डविजयस्यास्य कवचस्य
प्रजापतिः ऋषिश्छंदश्च गायत्री
देवी दुर्गतिनाशिनी इति ब्रह्मवै
वर्त्तगणेशखण्डं ॥
दुर्गंधं क्ली सौवर्चललवणं।
इतिहेमचंद्रः ॥
दुर्गंधः पुं दुष्टगंधः तत्पर्यायः
पूतिगंधिः २ इत्यमरः आम्र
वृक्षः इतिशब्दचंद्रिका पलाण्डुः
इति भावप्रकाशः दुष्टगंध।
युक्ते त्रि ॥
दुर्गंधी त्रि दुर्गंधयुक्तः इत्यमर
टीकायांरायमुकुटः ॥
दुर्गपुष्पी स्त्री वृक्षविशेषः देश
पुष्पा इतिख्याता तत्पर्यायः मा

नमी २ बालाक्षी ३ केशधारिणी ४ इति शब्दचंद्रिका ॥
दुर्गमः त्रि दुर्गः दुःखेनगमनीयस्थानादि इति शब्दमाला ॥
दुर्लंघनः पुं स्त्री उष्ट्रः इति हेमचंद्रः दुर्लंघनीये त्रि ॥
दुर्गसंचरः पुं संक्रमः सौंको इति भाषा इत्यमरः ॥
दुर्गसंचारः पुं दुर्गसंचरः इत्यमरटीकायांस्वामी ॥
दुर्गा स्त्री नीली इति मेदिनी ॥ अपराजिता इति शब्दचंद्रिका । श्यामापक्षी इति राजनिर्घंटः ॥ हिमालय कन्या सा शिवभार्या गणेश कार्तिकयोर्माता च तस्य पर्यायः उमा २ कात्यायनी ३ गौरी ४ काली ५ हैमवती ६ ईश्वरा ७ शिवा ८ भवानी ९ रुद्राणी १० सर्वाणी ११ सर्वमंगला १२ अपर्णा १३ पार्वती १४ मृडानी १५ चंडिका १६ अंबिका १७ इत्यमरः शारदा १८ चंडी १९ चंडवती २० चंडा २१ चंडनायिका २२ गिरिजा २३ मंगला २४ नारायणी २५ महामाया २६ वैष्णवी २७ महेश्वरी २८ महादेवी २९ हिंडी ३० ईश्वरी ३१ कोट्टवी ३२ षष्ठी ३३ माधवी ३४ नगनंदिनी ३५ जयंती ३६ भार्गवी ३७ रंभा ३८ सिंहरथा ३९ सती ४० भ्रामरी ४१ दक्षकन्या ४२ महिषमर्दिनी ४३ हेरंबजननी ४४ सावित्री ४५ कृष्णपिं[illegible] ४६ वृषाकपायी ४७ लंबा ४८ हिमशैलजा ४९ कार्त्तिकेयप्रसूः ५० आद्या ५१ नित्या ५२ विद्या ५३ शुभंकरी ५४ सात्त्विकी ५५ राजसी ५६ तामसी ५७ भीमा ५८ नंदनंदिनी ५९ महामायी ६० शूलधरा ६१ सुनंदा ६२ शुंभघातिनी ६३ इति शब्दरत्नावली ह्री ६४ पर्वतराजतनया ६७ हिमालयसुता ६८ महेश्वरवनिता ६९ इति कविकल्पलता सत्या ७० भगवती ७१ ईशाना ७२ सनातनी ७३ महाकाली शिवानी ७५ हरवल्लभा ७६ उग्रचंडा ७७ चामुंडा ७८ विधात्री ७९ आनंदा ८० महामात्रा ८१ महामुद्रा ८२ माकरी ८३ भौमी ८४ कल्याणी ८५ कृष्णा ८६ मानदात्री ८७ मदालसा ८८ मानिनी ८९ चार्वंगी ९० वाणी ९१ ईशा ९२ वलेशी ९३ भ्रमरी ९४ भूष्या ९५ फाल्गुनी ९६ यती ९७ ब्रह्ममयी ९८ भाविनी ९९ देवी १०० अचिंता १०१

ऽहं महालक्ष्मी गोलोके राधिका स्वयं शिवाहं शिवलोकेपि ब्रह्मलोके सरस्वती अहं निहत्य दैत्याञ्च दक्षकन्या सती पुरा त्वन्निंदया पुरा त्यक्त्वा सा चाहं शैलकन्यका रक्तवीजस्य युद्धे च काली च मूर्तिभेदतः सावित्री वेदमाताहं सीता जनक कन्यका रुक्मिणी द्वारवत्यां च भारते भीष्मकन्यका सुदाम्नः शापतो देवात् वृषभानुसुताधुना धर्मपत्नी च कृष्णस्य पुण्य वृंदावने वने अपरं च कृष्णस्य प्रति पार्वती वाक्यं एकाहं राधिकारूपा गोलोके रासमंडले रास । शून्यं च गोलोके परिपूर्णं ऽहं क प्रभो परिपूर्णतमा हं च तव व। क्षःस्थल स्थिता तवाज्ञया महालक्ष्मी रहं वैकुंठ वासिनी सर। स्वती च तत्रैव वामपार्श्वे हरेरपि तवाहं मनसा जाता सिंधुकन्या तवाज्ञया सावित्री वेदमाताहं कलया विधि सन्निधौ तेजःसु सर्वदेवानां पुरासेन्य तवाज्ञया अधिष्ठानं कृतं तत्र धृतं दिव्यशरीरकं शुभा दैत्य श्रेष्ठ दैत्यान्स निहता श्चावलीलया दुर्गा निहत्य दुर्गाहं त्रिपुरा । त्रिपुरे वधे निहत्य रक्तवीजं च रक्तवीजविनाशिनी तवाज्ञया दक्षकन्या सती सत्यस्वरूपिणी योगेन त्यक्त्वा देहं च शैलजाहं तवाज्ञया त्वया दत्ता शंकराय गोलोके रासमंडले विस्मय शक्तिरहं तेन विस्मयायाच वैष्णवी नारायणस्य मायाहं तेन नारायणी स्मृता कृष्ण प्राणाधिकाहं च प्राणाधिष्ठातृ देवता महद्विमोक्षवामे स्व जननी राधिकास्वयं तवाज्ञया पंचधाहं पंचप्रकृतिरूपिणी कलाक । लांशयाहं च देवपत्न्या गृहे गृहे ॥
अथ तस्याः पूजा प्रकाशः प्रथमे पूजिता सा च कृष्णेन परमात्मना वृंदावने च सृष्ट्यादौ गोलोके रासमंडले मधुकैटभ भीतेन ब्रह्मणा सा द्वितीय तः त्रिपुर प्रेषितेनैव हरेणैव त्रिपुरारिणा अहल्या महेंद्रेण शापाद्वीसतः पूरा चतुर्थे पूजिता देवी भक्त्या भगवती सती तदा मुनींद्रैः सिद्धेंद्रैः देवैश्च मनुमानवैः पूजिता सर्वविश्वेषु बभूव सर्वतः सदा तेजःसु सर्वदेवानामाविर्भूता पुरा मुने सर्वे देवा ददुः तस्यै शास्त्राणि भूषणानि च दुर्गादयश्च दैत्या

अनिरुद्धा दुर्गया तया दत्तं स्वरा
ज्यं देवेभ्यो वरं च यदभीप्सितं का
लांतरे पूजितास्मात्सुरथेन महात्म
ना राज्ञा मेधस शिष्येण मृण्मय्यां
च सरित्तटे मेषादिभिश्च मेषैः कु
लमांसैश्च गंडकैः छागैर्मीनैश्च
कूष्माण्डैः पक्षिभिर्वालिभिर्मुने
वेदोक्तानि च दत्त्वैवमुपचाराणि
षोडश स्तुत्वा तु कवचं ध्यात्वा स
पूज्य च विधानतः राजा कृत्वा परी
हारं वरं प्राप यथेप्सितं मुक्तिं संश्र
यवैश्यश्च लेभे पूज्य च सरित्तटे तु।
ष्टौ वराजौ वैश्यश्च साश्रुनेत्रः पुटां
जलिः विससर्ज मृण्मयीं तां गंभी
रे निर्मले जले मृण्मयीं तृण्मयीं
दृष्ट्वा जलधौ तां नराधिपः रुरोद
तत्र वैश्यश्च ततः स्थानांतरं ययौ॥
त्यक्त्वा देहं च वैश्यश्च पुष्करे दुः
करं तपः कृत्वा जगाम गोलोकं दु
र्गादेवीवरेणैव राजा ययौ स्वराज्यं
च पुष्यो निष्कंटकं बली भोगांश्च बु
भुजे भूपः षष्टिवर्षसहस्रकं भार्यां
स्ववालं संन्यस्य पुत्रे सकालयोग
तः मनुर्बभूव सावर्णिस्त्सा च पु
ष्करे तपः कृत्वैवं कथितं वत्स समासे
न यथागमं दुर्गाख्यानं मुनिश्रेष्ठ

किं भूयः श्रोतुमिच्छसि इति ब्रह्मवै
वर्त्तपुराणं अथ दुर्गापूजाविधिः
शरत्काले महापूजा क्रियते या
च वार्षिकी शारदीया महापूजा
चतुः कर्ममयी शुभा तां तिथिक्र
यमासाद्य कुर्यात् भक्त्या विधानतः
चतुः कर्ममयी स्नपन पूजन बलि
दान होमरूपा सा च प्रतिवर्षं कर्त
व्या हिशारीरेचैवैवलश्येकेंद्रग
ते रवौ वर्षवर्षे विधानं स्थापनं च
विसर्जनं यो मोहादथवालस्याद्दे
वीं दुर्गां महोत्सवे न पूजयति दं
भाद्द्वेषाद्वाप्यथ भैरव क्रुद्धा भग
वती तस्य कामानिष्टान्निहंति वै
वीप्सायाकरणे प्रत्यवाय श्रुतेश्च
सा पूजा नित्या विधिसमभिव्याहृ
त फलश्रुतेः काम्या च यथा ह्यवे
वं परमामाद्य निहंति त्रिदिवौकसः
एवमन्यैरपि सदा देव्याः कार्यं प्रपू
जनं विभूति मतुलां लब्धुं चतुर्वर्ग
प्रदायकं कामनया पूजने कृते प्र
संगान्नित्यपूजा सिद्धिः तत्र हि वच
नं कृष्णनवम्यादिप्रतिपदादि ष
ष्ठ्यादिसप्तम्यादिमहाष्टम्यादिकेव
लमहाष्टमी केवल महानवमी पू
जारूपाः कल्पा उक्ताः तदनंतरमशो
च॥

मपिनमतिबंधकं सा पूजा त्रि
विधा यथा शारदी चंडिका पू
जा त्रिविधा परिगीयते सात्त्विकी
राजसी चैव तामसी चेति विश्रुतिः
सात्त्विकी जप यज्ञाद्यैर्नैवेद्यैश्च नि
रामिषैः माहात्म्यं भगवत्याश्च
पुराणादिषु कीर्तितं पाठस्तस्य
जपः प्रोक्तः पठेद्देवीमनास्तथा
देवीसूक्तजपश्चैव यज्ञो वह्निषु
तर्पणं राजसी बलिदानैश्च नैवे
द्यैः सामिषैस्तथा सुरा मांसाद्यु
पहारैर्जपयज्ञैर्विना तु या विना मं
त्रैस्तामसी स्यात् किरातानां तु स
म्मता ब्राह्मणैः क्षत्रियैर्वैश्यैः शू
द्रैरन्यैश्च सेवकैः एवं नानाम्लेच्छ
गणैः पूज्यते सर्वदस्युभिः स्वयं
वाप्यन्यतो वापि पूजयेत्पूजयेत्त
वा अर्द्धकस्पनपोयोगादर्हत्स्या
तिथ्या यजनात् स्वाभिरुच्याच्च विंता
तां देवः सान्निध्यमृच्छति अथ नव
म्यादिकल्पः इषमासप्रसितेपक्षे
हेकन्याराशिगते रवौ नवम्यां बो
धयेद्देवीं क्रीडाकौतुकमंगलैः।
ज्येष्ठानक्षत्रयुक्तायां षष्ठ्यां बिल्वा
भिमंत्रणं सप्तम्यां मूलयुक्तायां प
त्रिकायाः प्रवेशनं पूर्वाषाढयुतायां

म्यां पूजा होमाद्युपोषणं उत्तरेण
नवम्यां तु बलिभिः पूजयेत् शिवां।
श्रवणेन दशम्यां तु प्रणिपत्य वि
सर्जयेत् प्रतिवर्षं कन्यार्के कर्तव्य
त्वात् पक्षेः सिंहार्केपि बोधनं त
लार्केपि स्थापनादिकं क्रियते वोद
कृत्यत्वात् कन्यार्के मलमासेन त
दारम्भे यदि पूर्वमारब्धं तदा म
लमासेपि पूजादेवीमाहात्म्यपाठा
दिकं प्रत्यहं कर्तव्यमेव यावज्जीवु
राकाद्यं जलं वह्निप्राशिग्रहाः ताव
च्चंडिका पूजा भविष्यति सदा भुवि
तत्र कृष्णनवम्यादेव कल्पत्वेन पूर्वी
विद्धे बोधनं उभयदिने पूर्वाह्णेन
वमीलाभे पूर्वदिने आर्द्रानुबोधे
तु पूर्वाह्णं विना दिवा मात्रे युग्मा
दरं विनापि परदिने बोधनं उभय
दिने पूर्वाह्णे नवम्यालाभे पूर्व
दिने बोधनं युग्मात् कन्यादिमीन
पर्यंतं यत्र संप्राप्यते शिवः तत्र
बोधः प्रकर्तव्यो देव्या राज्ञां शुभं।
प्रदः बोधनसंज्ञो यथा इषे मा
स्यसितेपक्षे नवम्यामार्द्रयोगतः
श्रीवृक्षे बोधयामि त्वां यावत् पूजां
करोम्यहं ऐरावणस्य वधार्थाय
रामस्यानुग्रहाय च अकाले ब्रह्म

णावोधयोदेव्यास्त्वयि क्रतः पुरा अह
मप्याश्विने तद्वत् बोधयामि सुरेश्वरी
शक्रेणापि च संबोध्य प्राप्तं राज्यं सुरा
लये तस्मादहंत्वां प्रतिबोधयामि
विभूतिराज्यप्रतिपत्तिहेतोः यथैव
रामेण हतो दशास्यस्तथैव श
त्रून् विनिपातयामि षष्ठी बोधने
तु अहमप्याश्विने षष्ठ्यां सायाह्ने
बोधयाम्यहं इति पावनीयं ॥
अथ प्रतिपदादिकल्पः आश्विने
शुक्लपक्षे तु कर्तव्यं नवरात्रकं प्र
तिपदादिक्रमेणैव यावच्च नवमी
भवेत् प्रतिपदादि तत्तत्तिथिषु
कृत्यमाह भविष्ये केशसंस्कारद्र
व्याणि प्रदद्यात् प्रतिपद्दिने पट्टडो
रं द्वितीयायां केशसंयमहेतवे
दर्पणं च तृतीयायां सिन्दूरालक्त
कं तथा मधुपर्कं चतुर्थ्यां तु तिल
कं नेत्रमंडनं पंचम्यां अंगरागं च श
क्त्यालंकरणानि च षष्ठ्यां बिल्व
तरौ बोधं सायं संध्यासु कारयेत्
सप्तम्यां प्रातरानीय गृहमध्ये प्रपू
त् उपोषणमथाष्टम्यामष्टम्या के:
प्रपूजनं नवम्यामुग्रचण्डाया महद्
देवार्चनं दिवा पूजां च बलिदानं च
तद्वनातः प्रपूजयेत् कुमारीपूज।
नीया ॥

च भूषणैश्च भूषणैः संपूज्य प्रेष
णं कुर्यात् दशम्यां शावरोत्स
वैः अनेन विधिना यस्तु देवीं प्री
णयते नरः कल्पवत् पालयेत्तं
देवी सर्वापदि स्थितं पुत्रदारधन
हीनं संख्यानस्यनविध्येन भुक्त्वेह
परमान् भोगान् प्रेत्य देवीगणो
भवेत् अथ षष्ठ्यादिकल्पः ॥
बोधयेद्बिल्वशाखायां षष्ठ्यां दे
वीं फलेषु च सप्तम्यां बिल्वशाखां
तामाहृत्य प्रतिपूजयेत् पुनः पू
जाः तथाष्टम्यां विशेषेण समाच
रेत् जागरश्च स्वयं कुर्यात् बलि
दानं महानिशि प्रभूतबलिदानं च
नवम्यां विधिवद्धरेत् ध्यायेद्दशभु
जां देवीं दुर्गां मंत्रेण पूजयेत् विसर्ज
नं दशम्यां तु कुर्याद्वै शावरोत्सवैः
धूलिकर्दमविक्षेपैः क्रीडाकौतुक
मंगलैः भगलिंगाभिधानैश्च भग
लिंगप्रगीतकैः भगलिंगक्रि
याभिश्च कुर्याच्च दशमी दिने ॥
नवमी बोधनासामर्थ्ये षष्ठ्यां सा
यं बोधनं यथा षष्ठ्यां बिल्वतरौ बो
धं सायं संध्यासु कारयेत् षष्ठ्यां
बोधनामंत्रण करणेपि पत्री प्रवे
शपूर्वदिने सायं षष्ठी लाभे एकदे

वोभयकरणं यदा तु पूर्वदिने सा
यं षष्ठीलाभः परदिने सायं विना
षष्ठीलाभस्तदा पूर्वेद्युर्बोधनं
परदिने सायमामंत्रणं यदा तु उभ
यदिने सायं षष्ठीलाभस्तदा परेह्नि
षष्ठ्यां बोधनं उभयदिने सायं षष्ठ्य
भावे पूर्वाह्णेपि षष्ठ्यां बोधनं आमंत्र
णमंत्रस्तु मेरु मन्दर कैलास हिम
वच्छिखरे गिरौ जातः श्रीफलवृक्ष
त्वं अम्बिकायाः सदा प्रियः श्रीशैल
शिखरे जातः श्रीफलः श्रीनिकेतनः
नेतव्योसि मया गच्छ पूज्यो दुर्गा स्व
रूपतः सायं षष्ठ्यां तु कर्तव्यं पार्व
त्या अधिवासनं षष्ठ्यभावेपि क
र्तव्यं सप्तम्यामपि नारद ॥ अथ
सप्तम्यादिकल्पः आश्विने शुक्ल
पक्षे तु सप्तम्यादि दिनत्रये तत्र पू
जा विशेषेण कर्तव्या मम मानवैः
विशेषं तत्र वक्ष्यामि शृणु पुत्रक
मन्मतं सप्तम्यां पत्रिका पूजा रंभा
दि नवभिर्युता महामयी च मू।
र्तिर्मे पुत्रायुर्धन वृद्धये अष्टमी
सा महापुण्या तिथिः प्रीतिकरी मम
कुर्यात्तत्र महास्नानं पंचगव्य घृते
स्तथा गायत्रीभिः कषायैश्च गंधा
द्यैस्तीर्थवारिभिः औषधीभिश्च सर्वा

भिर्भृंगारैः कलशैस्तथा पुष्प
रत्नादितोयैश्च गंधैर्मलयजैस्त
था गीत वादित्रनादेन स्नापये
न्माच भक्तितः पूजा सदुपचारैश्च
नैवेद्यैश्च मनोहरैः बिल्वपत्रैर्हि
ताकैश्च तिलधान्यादि संयुतैः
जुहुयाज्ज्वलिते वह्नौ तस्य पु
ण्यफलं शृणु संसारे यानि सौ
ख्यानि काम्यानि नरपुंगव दीर्घ
मायुर्यशः पुत्रं विपुलं धनधान्य
कं लभते मत्प्रसादेन अंते मम
पुरं व्रजेत् बलिं तत्र विशेषेणादे
यो मत्प्रीतये नरैः अनेन विधि
ना यस्तु नवमीमतिवाहयेत् मं
क्षे च विपुलान् भोगानन्ते शिवपुरं
व्रजेत् ततः सप्तम्यां मूलयुक्तायां
केवलायां वा पूर्वाह्णे पत्रीप्रवेश
उभयत्र पूर्वाह्णे सप्तमी लाभे पर
त्र युगाद्यावृद्धिसत्वेपि सप्तमी पार्व
तीप्रियः रवेरुदयमीक्षते न तत्र ति
थिर्युगमता पूर्वाह्णे नवपत्रिकाप्र
भकरी सर्वार्थसिद्धिप्रदा प्राग्राग
धनदा करोति विजयं चंडीप्रवेशोप
भा मध्याह्ने जनपीडनं क्षयकरी सं
ग्राम घोरावहा सायाह्ने वधबंधना
नि कलहं सर्पदतं सर्वदा सप्तम्यामस्तु

गायां यदि विशति गृहं यस्त्रिकाष्ठी
फलाच्या राज्ञः सप्तांग राज्यं पुन
स्सर्वमखिलं हन्ति मूलानुरोधात्
तस्मात्सूर्योदयस्थानवमीति प्र
भद्रां सप्तमीमाप्य देवी भूपालो
वेशयेन्नो सकलजनहिता वद
स्र्हे विहाय लिंगस्था पूजयेद्देवी
[illegible]स्थानयेवच पुस्तकस्थाम
[illegible]देवी पावके प्रतिमासुच चित्रे
च त्रिशिखे खड्गे जलस्थापि
पूजयेत् स्नात्वा यथाविधि विधौ
तकरान नामि[illegible]राचम्य समागम
लंबर यज्ञसूत्रः प्राणानायम्य
दद्दिग्बन्धो भूतशाखिवहासने गणप
तिं च गुरुं वन्दना कृत्वा संस्थरवावी
पोभूत्वा हमंत्र प्रपूजयेत् सोपवा
सो निशार्द्धे तु महाविभव विस्तरैः
पूजां समारभेद्देव्या नक्षत्रे वारुणे
पिवा पश्चात्पश्च कर्तव्या गवला
जवपस्तया उक्तवचने पश्च्यात
श्च कर्तव्या इति स्मृतेः अष्टम्यां तथि
वै मांसैः कुसुमैश्च सुगंधिभिः पूज
येदुक्तमानीयैर्बलिभिर्भोजनैः शिवां
इति कालिकापुराणाच्च अष्टम्यां व
लिदानेन पुत्रनाशो भवेद्ध्रुवं इति देवी
पुराणीयं सहि पूजा बलिदान परं

नक्षत्रयायां उभयतिथि कर्तव्यत्वेन
नद्वलिदानस्य नवम्यां स्वावकाश
त्वात् [illegible] कालिका
पुराणे नदनन्तरं सप्तमी नवमी
संध्ये तृतीयातल[illegible]नेत्र प्र
त्याहं पुत्रपौत्रीणां नाना संयुता।
यवासं महाष्टम्यां पुत्रवान् समाच
रेत् यथा तथैव पूतात्मा व्रती दे
वीं प्रपूजयेत् मूलेन प्रतिपूजयेत्
दुर्गान्तीं चंडीं प्रचंडा कृतिं चाष्टम्यां
मुपवासस्य नवि[illegible]या भक्त्या समा
राध्यावानानापाशुकमङ्गैस्सह
पिरैः कृत्वा नवम्यां बलिं नन्दाञ्च प्र
वर्णांजित्रिंचदशमीसंप्राप्य संप्रे
षयेत् भगवन्त्याः प्रदेशादि वि
संगीताश्च याः क्रियाः तिथ्याद्युप
यगाभित्वा सर्वीस्ताः कारयेद्बुधः
सूर्योदयकालीनघटिकामात्रति
थो सम्यक् पूजनासामर्थ्ये कालिका
पुराणे सम्यक् कल्पे दिनं पूजां
यदि कर्तुं न शक्नोति उपचारांस्त
दा दानं पंचैतान् विनिवेदयेत् गंधपु
ष्पंच धूपंच दीपं नैवेद्यमेव च अ
भावे गंधपुष्पाभ्यां तदभावे च भ
क्तितः सदैव पूजा कथिता तथा
वस्त्रादिकं पुनः प्रातरावाह ॥

येद्देवीं प्रातरेव प्रवेशयेत् प्रातःप्रा
प्तनक्षत्रसंपूज्य प्रातरेव विसर्जयेत्
अत्र प्रातः पदं पूर्वाह्णपरं बलीमप्र
जयेद्देवीं सप्तम्यादिदिनत्रये हा
भ्यां चतुर्वर्गोभिर्वा कारसहितं वशां
तिथेः अष्टम्यामुपवासः पुत्रव
तो गृहस्थस्य निषिद्धः यथा ॥
कालिकापुराणे उपवासं महा
ष्टम्यां पुत्रवान् समाचरेत् यथा
तथैव पूतात्मा व्रती देवीं प्रपूज
येत् नवम्यां बलिदानन्तु कर्तव्य
वै यथाविधि जपं होमं च विधि
वत् कुर्यात्तत्र विभूतये अत्रत
वम्यां होमश्रुतेः पूर्वाषाढायु
ताष्टम्यां पूजा होमाद्युपायनं ॥
इति श्रुतेश्च उभयत्र एकतरस्मि
न्वा होमः प्राप्तः पूजया नव
म्यामेव दक्षिणा देया अथाष्ट
म्यादि केवल महाष्टमी केवलम
हानवमी कल्पा यथा भद्रका।
ली पटे कृत्वा तत्र संपूजयेत् द्वि
जः आश्विने शुक्लपंचम्यां वाष्टम्यां
विधितस्तत्तः उपोषितो द्विजो येहि
पूजयेत्तनरेवता इति विष्णुधर्मो
त्तरे यच्च कस्यामपि अष्टम्यां नवम्यां
वा पुत्रसाधकः पूजयेद्वरदां देवीं याङ्ग

भावेन चेतसा इति कालिकापु
राणे दुर्गाया ध्यानं यथा जटा
जूटसमायुक्तामर्द्धेन्दुकृतशेख
रां लोचनत्रयसंयुक्तां पूर्णेन्दु
सदृशाननां अतसीपुष्पवर्णाभां
सुप्रतिष्ठां सुलोचनां नवयौवन
संपन्नां सर्वाभरणभूषितां सुचा
रुदशनां तद्वत् पीनोन्नतपयो
धरां त्रिभंगस्थानसंस्थानां म
हिषासुरमर्दिनीं मृणालायतसं
स्पर्शदशबाहुसमन्वितां त्रिशूलं
दक्षिणे ध्येयं खड्गं चक्रं क्रमादधः
तीक्ष्णबाणं तथा शक्तिं दक्षिणेषु
त्रिवेशयेत् खेटकं पूर्णचापं च पा
शमंकुशमेव च घंटां वा परशुं वा
पि वामतः सन्निवेशयेत् अधस्ता
न्महिषं तद्वद्विशिरस्कं प्रदर्शयेत्
शिरश्छेदोद्भवं तद्वद्दानवं खड्गपाणि
नं हृदि शूलेन निर्भिन्नं निर्यदन्त्रवि
भूषितं रक्तरक्तीकृताङ्गं च रक्त
विस्फुरितेक्षणं वेष्टितं नागपा
शेन भ्रुकुटीभीषणाननं सपा।
शवामहस्तेन धृतकेशं च दुर्गया
वमद्रुधिरवक्त्रं च देव्याः सिंहं प्रद
र्शयेत् देव्यास्तु दक्षिणं पादं समं
सिंहोपरिस्थितं किंचिदूर्ध्वं तथा वाम

मंगल्यं महिषासुरि शत्रुक्षयंकरी
देवीं दैत्यदानवदर्पघ्नां प्रसन्न व
दनां देवीं सर्वकामफलप्रदां ॥
तत्पश्चान्नव तद्रूप ममरः सप्ति
वेशायेत् उग्रचंडा प्रचंडा च चंडो
ग्रा चंडनायिका चंडा चंडवती
चैव चंडरूपातिचंडिका अभिः श
क्तिभिरष्टाभिः सततंपरिवेष्टितां
चिंतयेत्कमलं धात्रीं धर्मकामार्थ्यी।
मोक्षदां इति ध्यात्वा महास्नान पूर्वक
षोडशोपचारादिना वलिदानादि
भिः पूजयित्वा आवरणं पूजयेत् ॥
अथ दशम्यां कृत्यं संक्षेपेणाह
यीहृदशम्यां शावरोत्सवैः देवी
यात्राकाले निर्मञ्छनविधिमाह स्र
जात्वाकरे देवीपुरतः भस्मापिष्ट
प्रदीपाद्ये स्रुतादूर्वादि पल्लवैः
ओषधीभिश्च मेध्याभिः सर्वबीजै
र्यवादिभिः नवम्यां पर्वकाले
तु यात्राकाले विशेषतः यः कु।
र्यात् श्रद्धया वीर देव्या नीराजनं
नरः शंख भेर्यादि निनदै र्जयश
ब्देश्च पुष्कलैः यावन्तो दिवसान्
वीर देव्यां नीराजनं कृतं तावत्।
कालं सहस्राणि इन्द्रलोके महीय
ते यस्तु कुर्यात् प्रदीपेन सूर्यलोके
महीयते तद्दिने अपराजिता पूज
नं यथा आश्विने शुक्लपक्षस्य द
शम्यां पूर्वाह्णे तथा पूर्वदक्षिणे नकु
वीत पूजनं चापराजितं तद्दिने रा
जायात्रां कुर्यात् यथा दशमी।
यः समुल्लंघ्य ग्रामान्ते पूजनेन्नृपः
तस्य संवत्सरं राज्ये न क्वापि विज
यो भवेत् स्वयमशक्तो खड्गादि।
यात्रा कर्तव्या यथा कार्यवशात्
स्वयमगमे भूभर्तुः [illegible] वा
र्यां छत्रायुधायमिष्टं देवपिंडं नि
गीमं कुर्यात् खंजनदर्शने फलादि
यथा हस्तागतेन मित्रे यथा दिशा
खंजनं याते नृपः पश्येत् तयाम
यानस्यादि नगरानिर्दशमुपैति कु।
त्वा नीराजनं राजा वलं वृद्धौ यथा
वलं शोभनं खंजनं पश्येत् जल
गोगोष्ठसन्निधौ अश्वेषु गोषु ग
जवाजिमहोरगेषु राज्यप्रदः कु
शालदः शुचिशाद्वलेषु भस्मास्थि
केशनखलोमतुषेषु दृष्टो दुःख
ददाति वक्रगः खलखंजरीटः
अशुभं खंजनं दृष्ट्वा देवब्राह्मणपू
जनं दानं कुर्वीत कुर्याच्च स्नानं सर्वौ
षधीजलैः अथ विसर्जनं नौ
यानेन रयानेन वानीता भगवती

शिवां स्रोतोजले प्रक्षिपेत्पुः क्री
डा कौतुक मंगलैः शबरोत्सवैः पेत
यस्तु शबरोत्सवेन हि यः तस्य रु
ष्टा भगवती शापं दद्यात् सुदा
रुणं इति लिख्यादि दुर्गायाश्चि
तवे विसर्जनमंत्रो यथा दुर्गे
देवि जगन्मातः स्वस्थानं गच्छ
पूजिते संवत्सरव्यतीते तु पुनरा
गमनाय वै निमज्जांभसि देवि त्वं
चंडिकाप्रतिमा शुभा पुत्रायुर्धन
वृद्ध्यर्थं स्थापितासि जले मया वि
सर्जनानंतरं [illegible]
वधारणं कृत्वा तस्य जलेनैव
मिर्मन्त्रैर्यजमानमभिषिंचेत् यथा
ओं उत्तिष्ठ ब्रह्मणस्पते देवा यज्ञेन
स्तेमहे उप प्रयन्तु मरुतः सुदानव।
इंद्र प्राशूर्भवा सचा ओं सुरास्त्वामभि
षिंचतु ब्रह्म विष्णुमहेश्वराः वासु
देवो जगन्नाथ स्तथा संकर्षणः प्रभुः
प्रद्युम्नश्चानिरुद्धश्च भवंतु विजयाय
ते आखंडलोऽग्निर्भगवान् यमो वै नै
ऋतस्तथा वरुणः पवनश्चैव ध
नाध्यक्षस्तथा शिवः ब्रह्मणा स
हितः शेषो दिक्पालाः पान्तु ते स
दा कीर्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्र
द्धा क्रिया मतिः बुद्धिर्लज्जा वपुः शांतिस्तुष्टि
कांतिश्च ॥
मातरः एतास्त्वामभिषिंचंतु धर्म
पालाः ससंयताः आदित्यश्चंद्र
मा भौमो बुध जीव सितार्कजाः
ग्रहास्त्वामभिषिंचंतु राहुः केतु
श्च तर्पिताः ऋषयो मुनयो गावो
देवमातर एव च देवपत्न्यो ध्रुवा ना
गा दैत्याश्चाप्सरसां गणाः अस्त्राणि
सर्वशस्त्राणि राजानो वाहनानि
च ओषधानि च रत्नानि कालस्या
वयवाश्च ये सरितः सागराः शैला
स्तीर्थानि जलदा नदाः देव दानव
गंधर्वा यक्ष राक्षस पन्नगाः एते त्वा
मभिषिंचंतु धर्मकामार्थसिद्धये
इति दृष्टं वैदिके मंत्रे पुराणपद्धतिः
अथ दुर्गानाम महात्म्यं नवार्णस्य
तृतीयार्णः पंचमस्वरसंयुतः क
वर्गस्य तृतीयार्णो वह्निस्तस्याध
रिस्थितः द्वितीयस्वरसंयुक्तो ना
मेदं परिकीर्तितं आरोग्यस्य च सं
पत्तेर्नस्य च महोदये नावेदप
रमो हेतु र्मुक्तये भवसंगिनां क
लिकाले विशेषेण महापातकि
नामपि निस्तारबीजं विज्ञेयं ना
मसंस्मरणं प्रिये पदद्वारे स्तोपि
स्यात् परद्रव्यापहारका सोपि पापा
न्मुच्यते यदि स्याद्गतिपा।

नकी ब्रह्महत्या सुरापानं स्तेयं गु
र्वङ्गनागमः एतेभ्योऽपि विमुच्ये
त यदि नाम स्मरेत् सुधीः इति
रुद्रयामलः दुर्गा दुर्गेति दुर्गेति
दुर्गानाम परं मन्त्रं यो जपेत् सत
तं चेद् जीवन्मुक्तः स मानवः
महोत्पाते महारोगे महाविपदि
संकटे महादुःखे महाशोके
महाभये समुत्पन्ने यः स्मरेत्
सततं दुर्गां जपेत् यः परमं मन्त्रं
स जीवल्लोकोऽदेवेशानीलकेव
तमाप्नुयात् इति मुण्डमालात
न्त्रं दुर्गाध्यक्षः पुं दुर्गरक्षकः तस्य
लक्षणं यथा अनाहार्य्यस्त्रप्र
रक्षन् यथा प्राज्ञः कुलोत्पन्नः दुर्गा
ध्यक्षः स्मृतो राज्ञः स्नायुक्तः सर्व
कर्मसु इति मत्स्यपुराणं ॥
दुर्गानवमी स्त्री कार्त्तिकशुक्ल
नवमी सा त्रेतायुगाद्या तत्र जगद्धा
त्रीपूजा कर्त्तव्या यथा योगिनी
तन्त्रे कार्त्तिके शुक्लपक्षे तु नवम्यां
च विशेषतः प्रभाते च जगद्धा
त्रीं पूजयेद्दीपमालया तन्त्रोक्त
वेदिकाले पूजयेद्दुर्गां मन्त्रेणैका
न्तरेणैव नाना बलि विधानेन
गीत वाद्य परः सन् कार्त्तिकस्य
सिते पक्षे नवम्यां च विशेषतः
कृत्वैवं साधकश्रेष्ठो लभेद्राज्य
मकण्टकं कुब्जिकातन्त्रे कार्त्तिके
शुक्लपक्षे तु नवम्यां जगदम्बिकां
दुर्गां प्रपूजयेद्भक्त्या धर्मकामा
र्थसिद्धये शक्तिसंगमतन्त्रे का
र्त्तिकस्य सिते पक्षे नवम्यां जगदी
श्वरीं त्रिकालमेककालं वा वर्षे
वर्षे प्रपूजयेत् निर्माय प्रतिमां
शास्त्रा जगद्धात्र्या विधानतः पूज
यित्वा परदिने प्रतिमान्तां विसर्जये
त् एवं कृत्वा चक्रवर्त्ती भवेत् साधक
सत्तमः पुत्रपौत्रधनैश्वर्य्यसंयुता
स्य भवेत् पुरी दासदासीगणै
र्युक्तो मुक्तः स्यात् पापसंकटात्
विशेषतो वस्तुयुक्तां नवमीं प्राप्य
साधकः पूजयित्वा स्तम्भयीतां ल
भेद्वाञ्छितं फलं भविष्यमासे श्र
तर्भिर्य्यत् पुण्यविधिना पूज्यवेदि
कां तत्र फलं लभते वीर नवम्यां
कार्त्तिकस्यैव इति तिथितत्त्वं ॥
दुर्गाहः पुं भूमिजगुग्गुलुः ॥
इति राजनिर्घण्टः ॥
दुर्घोषः पुं स्त्री भल्लूकः इति रा
जनिर्घण्टः ॥
निदिनरवः नहतित्रि ॥ ॥

दुर्जनः त्रि खलः इत्यमरः दुर्ज
नः परिहर्त्तव्यो विद्ययालंकृतो।
पिसः मणिना भूषितः सर्पः कि
सौ न भयंकरः इति चाणक्यः ॥
दुर्जयः पुं कार्त्तवीर्य्यराजवंशोद्भ
वानन्तपुत्रः इति कूर्म्मपुराणं दुर्ज
यः दुःखेन जीयते सौ तत्र त्रि।
दुर्जरा स्त्री ज्योतिष्मतीलता इति
राजनिर्घण्टः दुर्जरेत्रि ॥
दुर्ज्ञानं क्ली व्यसनं असमञ्जसा
तेति इति मेदिनी असमंजसं इ
ति त्रिकाण्डशेषः ॥
दुर्दीनः पुं कलहः वनसमरः
इति राजनिर्घण्टः अशान्ते त्रि
दुर्द्दिनं क्ली मेघाच्छन्नदिनं
इत्यमरः दृष्टिः यथा चनाव्य।
कारे हृष्टो चदुर्द्दिनं कवयो विदुः
इति भोजः सुदिनं दुर्द्दिनं चैव स
र्वकर्मोद्भवं भवं तत् कर्म्मतपसां
साध्यं कर्मणां च शुभाशुभं इति
ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे
यदच्युतकथालापरसपीयूषव
र्जितं तद्दिनं दुर्द्दिनं मन्ये मेघा
च्छन्नं न दुर्द्दिनं इत्युद्भटः ॥
दुर्द्धरूटः पुं नास्तिकः इति जटा
धरः
दुर्द्दिता स्त्री लताविशेषः इति ज
टाधरः ॥
दुर्द्रुमः पुं हरित्पलाण्डुः इति
राजनिर्घण्टः ॥
दुर्द्धरः पुं नरकविशेषः ऋषभो
षधिः इति मेदिनी पारदः। भल्ला
तकः इति राजनिर्घण्टः ॥
महिषासुरस्य सेनापतिविशेषः
यथा दुर्द्धरं दुर्मुखं चोभौ शरैर्नि
न्ये यमक्षयं इति चण्डी दुःखेन
धार्यते इति हेमचन्द्रः ॥
दुर्द्धर्षा स्त्री नागदमनी कन्थारी
वृक्षः इति राजनिर्घण्टः दुःखधर्ष
णीये त्रि दुर्द्दुरूटः पुं युक्तिभिना
गुरुवाक्यममन्यमानः इति तन्त्रवे
यनी दुर्नाम क्ली अर्शोरोगः इति रा
जनिर्घण्टः ॥
दुर्नामकं क्ली अर्शोरोगः इत्यमरः।
दुर्नामा न पुं स्त्री दीर्घकोषिका कि
ञ्चुकः इति भाषा इत्यमरः ॥
दुर्नामारिः पुं सूरणः इति राज
निर्घण्टः ॥
दुर्नाम्नी स्त्री दुर्नामा इति शब्दर
त्नावली ॥
दुर्बलः त्रि कृशः तत्पर्य्यायः अ
मांसः २ छातः ३ इत्यमरः ॥

शान्तः ४ शाजः ५ शितः ६ अवलः ७ इति शब्दरत्नावली ॥
दुर्बला स्त्री अम्बुशिरीषिका इति भावप्रकाशः ॥
दुर्भगा स्त्री पतिस्नेहरहिता दुःस्त्री इति भाषा तत्पर्यायः विरक्ता २ इति त्रिकाण्डशेषः द्विष्टा ३ निन्दा ४ सौभाग्यरहिता ५ इति शब्दरत्नावली ॥
दुर्भिक्षं क्ली भिक्षाया अभाविका लः अकाल इति भाषा यथा दुर्भिक्षमल्पं स्मरणं विधाय इत्युद्भटः भिक्षायाः अभावो निष्फलत्वं निन्य अव्ययीभाव समासः यद्देशे यत्र काले तद्देशे तत्काल योग्य। शस्यादिकं न जायते तद्देशे तदा याच्यमानद्रव्यालाभात् दुर्भिक्षं जातमिति व्यवह्रियते सद्भिरिति
दुर्मनाः स त्रि चिन्ताद्व्याकुलचित्तः तत्पर्याय विमनाः २ अन्तर्मनाः इत्यमरः शतावरी स्त्री इति राजनिर्घण्टः ॥
दुर्मरा स्त्री दूर्वा इति जटाधरः। श्वेतदूर्वा इति राजनिर्घण्टः ॥
दुर्मुखः पुं वानरविशेषः नागभेदः इति मेदिनी अश्वः इति हेमचन्द्रः महिषासुरसेनापतिविशेषः यथा दुर्धरो दुर्मुखश्चोभौ शरैर्निन्ये यमक्षयं इति चण्डी ॥
दुर्मुखः त्रि अप्रियवादी तत्पर्यायः मुखरः २ अबद्धमुखः ३ इत्यमरः दुर्मूल्यं क्ली महार्घं इति लोकप्रसिद्धं ॥
दुर्मेधाः त्रि मन्दमेधाः इति व्याकरणं ॥
दुर्मोहः पुं काकतुण्डी इति राजनिर्घण्टः ॥
दुर्योधनः पुं स्वनामख्यातः कुरुवंशोद्भवराजविशेषः स धृतराष्ट्रज्येष्ठपुत्रः कुरुपाण्डवयुद्धे भीमेन हतः तत्पर्यायः कुरुराट् २ गान्धारेयः ३ सुयोधनः ४ इति त्रिकाण्डशेषः ॥
दुर्लभः त्रि दुष्प्रापः इति मेदिनी अतिप्रशस्तः इति शब्दरत्नावली प्रियः इति हेमचन्द्रः दुर्लभं प्राकृते वाक्यं दुर्लभः क्षेमकृत् ॥ सुतः दुर्लभा सद्रूपी भार्या दुर्लभः स्वजनः प्रियः इति चाणक्यः सर्वत्र सुलभा गङ्गा त्रिषु स्थानेषु दुर्लभा हरिद्वारे प्रयागे च गङ्गासागरसंगमे इति कर्मपुराणं ॥

दुर्लभः पुं कच्छुरः इति मेदिनी कर्चूर इति राजनिर्घण्टः ॥
दुर्लभा स्त्री श्वेतकण्टकारी दुरालभा इति राजनिर्घण्टः ॥
दुर्व ई वधे इति कविकल्पद्रुमः
दुर्वचः क्ली मन्दवाक्यं यथा अस्हं दुर्वचा ज्ञानेभ्यो नतिमेरोदवन इत्युद्भटः दुःखकथ्ये अदन्ते त्रि यथा अपि वागधिपस्य दुर्वचं वचनं तद्विदधीत विस्मयं इति भारविः दुर्वर्णं क्ली रजतं इत्यमरः एलवालुकं इति मेदिनी मन्दवर्णे त्रि ॥
दुर्वर्णकं क्ली रजतं इति हेमचन्द्रः
दुर्वाक् च त्रि कद्वदः इति हेमचन्द्रः दुष्टवाक्ये स्त्री ॥
दुर्वादः पुं स्तुतिपूर्वकदुर्वाक्यं। इति जटाधरः निन्दितवाक्यं च ॥
दुर्वासाः स पुं मुनिविशेषः स अत्रिमुनिपुत्रः शंकरांशजातः इति श्रीभागवते तत्पर्यायः कृशाश्विः २ इति त्रिकाण्डशेषः तस्य भार्या और्वमुनिकन्या कन्दली इति ब्रह्मवैवर्ते श्रीकृष्णजन्मखण्डं मन्दवस्त्रयुक्ते त्रि ॥
दुर्विधः त्रि दरिद्रः इत्यमरः खलः इति मेदिनी मूर्खः इति शब्दरत्नावली ॥
दुर्विनीतः पुं अविनीताश्वः तत्पर्यायः शूकलः इति हेमचन्द्रः अविनीतमात्रे त्रि ॥
दुर्वृत्तः त्रि दुर्जनः यथा दुर्वृत्तवृत्तशमने तव देवि शीलं इति चण्डी दुर्हृत् द त्रि शत्रुः इत्यमरः दुष्टचित्ते त्रि ॥
दुर्हृदयः त्रि दुष्टान्तःकरणः इति शब्दार्थकल्पतरुः ॥
दुल क उत्क्षेपे इति कविकल्पद्रुमः ॥
दुलिः पुं मुनिविशेषः कमठी स्त्री इति मेदिनी ॥
दुली स्त्री दुलिः इत्यमरटीकायां भरतः ॥
दुश्चरः पुं शम्बुकः इति हारावली भल्लूकः इति राजनिर्घण्टः ॥ दुर्गमे त्रि ॥
दुश्चर्मा न पुं अप्रावृतमेढ्रः यथा दुश्चर्मा गुरुतल्पगः इति स्मृतिः तत्पर्यायः द्विनग्नकः २ चण्डः ३ शिपिविष्टः ४ इति हेमचन्द्रः ॥ कोठरोगः इति राजनिर्घण्टः दु।
श्चिक्यं क्ली लग्नात् तृतीयस्थानं यथा

एवं मेषुरग मास्पदंमदनभेया
मित्र मस्तपुनेषुनंचापिसहस्र
हेन हिवुंक पाताल मंभोपिच
उष्णिकंसहजेवदंतिमुनयोरि
पफं ततोद्वादशो षट्कोणंरिपु
मंदिरेनवम मे आद्यंत्रिकोणं
पुनः इतिदीपिका ॥
उष्ठवनः पुं इंद्रः इत्यमरः॥
उष इ र य ञ वैकृते अशुद्धी
भाव इति यावत् इतिकविक
ल्पद्रुमः उष्करं क्ली आकाशं
इतिशब्दार्थकल्पतरुः उःखे
नकरणं उःखेणक्रियमाणेत्रि
इतिमुग्धबोधं ॥ उष्कर्म क्लीपा
प यथा उष्कर्मजान्यरोगाया
तिचैवक्रमात् शमं जपैःसुरा
र्चनैर्होमैर्दानै स्तेषां शमोभवे
त् इति शातातपीय कर्मविपा
कः उःकुलीनः पुं चोरनामगं
धद्रव्यं इतिशब्दरत्नावली उःकु
लोद्भवे त्रि इतिशब्दार्थकल्पत
रुः उःकृतं क्लीपापं इत्यमरः॥
उःकीतं त्रि महार्घं यथा कीतामू
ल्पेनयोद्रव्यंउष्कीतमन्यतेकयी वि
केतःप्रतिदेयंतत् तस्मिन्नेवाकृा
विद्यते इतिप्रायश्चित्ततत्वे ॥

नारदः ॥
उष्ख क्ली उःखं इत्यमरटीका
यांभरतः ॥
उःखदिरः पुं खदिरवृक्षभेदः तत्
पर्य्यायः कांबोजी २कालस्कंधः ३
गोरटः ४ आमरजः ५ पत्रतरुः ६
वक्रसारः ७ सारखदिरः ८ महा
सारः ९ वृहत्खदिरः १० अस्यगुणाः
कटुत्वं उष्णत्वं तिक्तत्वं रक्तव्रणो
त्थदोषकण्डूतिविषवीसर्पकुष्ठरक्
षोन्मादभूतनाशित्वंच इति राज
निर्घण्टः ॥
उष्टं क्ली कष्टं कठइति ख्यातं इति
शब्दचंद्रिका ॥
उष्टः त्रि दुर्बलः अधमः इतिविश्वः
उष्टलवः पुं शाकोत्पभूर्वहः गर्न्ध।
गरु इतिभाषा तत्पर्य्यायः गलिः २
इति हेमचंद्रः ॥
उष्टा स्त्री पुं अश्ली इति शब्दरत्नाव
ली उष्टु व्य निंदा इत्यमरः ॥
उष्टः त्रि अविनीतः इत्युणादिकोषः
उष्पत्रः पुं चोरनामगंधद्रव्यं इत्य ॥
मरः उष्पर्णः पुं दुरालभा इत्यमरटी
कायांभरतः उःस्वरूपेण त्रि। उ
ष्प्रयर्षी स्त्री दुरालभा खजूरी ॥

इति राजनिर्घण्टः ॥
उष्प्रयर्षणी स्त्री वार्ता कीइत्यमरः
उष्प्रधर्षिणी स्त्री दुष्प्रधर्षिणी इत्य
मरटीकायां भरतः कंटकारी इ
तिराजनिर्घण्टः वृहती इतिभा
वप्रकाशः ॥
उष्पवेशा स्त्री केथारीवृक्षः इति
राजनिर्घण्टः ॥
उष्मंतः पुं चंद्रवंशीयराजविशे
षः सचैनिपुत्रः तस्यपुत्रो भरत
राजचक्रवर्त्ती पत्नीशकुंतला इ
तिश्रीभागवतं ॥
उस्सयः पुं कुक्कुरः कुक्कुटः इति
शब्दार्थकल्पतरुः ॥
उह ल न ञ उहि दोहन इति
यावत् इतिकविकल्पद्रुमः ॥
उह इर अर्द्दने वध इति यावत्
इतिकविल्पद्रुमः ॥
उहिता स्त्री कन्या इत्यमरः क
न्यादानपात्रापात्रंयथा कृत्वापरी
क्षांकांतस्पृहणेतिकामिनीवरं
वरायगुणहीनायवृद्धायज्ञानिने
तथा दरिद्रायचमूर्खायरोगिने।
कुत्सितायच अर्मतेकोपिष्ठायचात्य
तदुर्मुखायच पापलायांगहीनाय
चद्वाय वधिराय व जडाय चैव।

मूर्खाय क्लीवतल्पायपापिने ब्र
ह्मरत्नां लभेत् सोपि यः स्वकन्यां
ददाति च शांताय गुणिने चैव यु
नेच विदुषेपिव वैसवायस्ततां
दत्वादशा वापी फलं लभेत् ॥
कन्याविक्रयेदोषो यथा यः कन्या
पालनंकृत्वा करोतिविक्रयं य
दि विपदा धनलोभेन कुंभीपा
कंसगच्छति कन्यामूत्रपुरीषंच
तत्रभक्षतिपातकी कृमिभि र्दंशि
तःकाकैर्यावदिंद्राश्चतुर्दश मृत
श्चव्याधयोनौच स लभेजन्मनि
श्चितं विक्रीणीतेमांस भारं वह
न्येवदिवानिशं इतिव्रह्मवैवर्त्ते प्र
कृतिखण्डे कन्यादान फलं यथा
दशवापी समाकन्या दीयतेब्राह्म
णाय तत् वेदज्ञाय पवित्राय
चापनिग्रह शालिने संध्या यज्ञ
वेदपाठकारिणे सत्यवादिने प्र
सन्नप्रदत्ता कन्याच दशवापीफल
प्रदा त्रिसंध्याकारिणे सत्यवा
दिने गृहशालिनोवेदज्ञायचवि
प्रायदत्तार्द्धफलदायिनी प्रतिग्र
ह गृहीतायसंध्याहीनायनिष्प्रभः
मूर्खाय दत्ताकन्याचसाचतफलदा
यिनी परदारगृहीताय याजकायद्वि

चशाठाय संध्याहीनाय वाप्यकफ
लदासुता सर्वसंध्याव्नगायत्रीविही
नायशाठायच विप्राद्भवाय दंडया
वाप्यर्द्धफलदासुता पापिनेप्य
जानायविप्रदेवोद्भवायच दत्ता
चाण्डालतुल्यायविड्वषे विप्राय
सत्यवादिने जितेंद्रियायदत्तया
विशाखापीफलाप्रदा षष्ठिवर्षस
हस्राणि दिव्य रूपं विदायच एवं
भूतायदत्ताच मोदते विष्णुमंदिरे
दत्वाकन्यांसुशीलांचहराय हर
येथवा नारायण स्वरूपंच भवे
देव कृतोष्कृते विष्णुभक्तोयदा
कन्यांददातिविष्णुप्रीतये सलभे
द्धरि दास्यंचफलंविप्राद्भवायच
विवाहानंतरेकन्याया भर्तृगृहग
मन समयेपित्रादीनां रोदनंशास्त्र
सिद्धं यथा दुर्वाससा सह और्वक
न्यायाः कंदल्या विवाहे कन्या सम
र्पणं कृत्वा मोहाद्रुरोदव मह
र्षीमवाप समुनिः स्वकन्या विर
हातुरः अपत्य भेद शोकोषः स्वा
त्मारामे न मुंछति क्षणेन चे
तनां प्राप्य बोधयामासकन्य।
कां मूर्छितो तातविच्छेदाद्दंती
शोक संयुता ॥ ।

इतिब्रह्मवैवर्त्तेप्रकृतिखंडेश्रीकृष्णज
न्मखण्डे ॥
दुहितृः पतिः पुं जामाता इत्यमर
टीकासारसुंदरी ॥
दुहं क्ली दोहनयोग्यं दोह्य इति
व्याकरणं ॥
दु ओ दु य खेदे इतिकविकल्पद्रुमः
दुराशः त्रि पीडायुक्तः दुःखेन दा
शयितेयः इतिसिद्धांतकौमुदी ॥
दूत्मसांतोपि ॥
दुडुतः त्रि व्यसनप्राप्तः विपद्युक्तः
दुःखेनदम्यतेयः इति संक्षिप्त
सारः ॥
दुष्ठः त्रि अधमः दुःसंध्यायतियः
इतिसिद्धांतकौमुदी ॥
दुणाशः त्रि दुःखेननष्टः दुःखेन
नाशयतेयः इति सिद्धांतकौमुदी
दुतः पुं वार्त्ताहरः तत्पर्यायः ॥
संदेशहरः २ इत्यमरः संदिष्टक
थकः ३ इति शब्दरत्नावली ॥
तस्य लक्षणं यथा यथोक्तवादी।
दूतः स्याद्देशभाषा विशारदः शा
क्तः क्लेशसहो वाग्मी देशकाल
विभागवित् विज्ञातदेशकाल
श्च दूतः स्यात् समहीक्षितः वक्ता
नयस्यायः काले सदूतो नृपते
र्भवेत् ॥ ॥

इति मत्स्यपुराणं अपिच मेधावी
वाक्पटुः प्राज्ञः परचित्तोपलक्ष
कः धीरो यथोक्तवादी च एषदू
तो विधीयते इति चाणक्यं अन्यच्च
परेंगितज्ञः परवाक्यार्थस्या
पि तत्ववित् सदोत्पन्नमतिधीरो
दूतः स्यात् सोपिदीपने [illegible] दूतं
चैव प्रकुर्वीत सर्वशास्त्रविशारदं
इङ्गितज्ञं तथा सम्यं दक्षंसत्कु।
लसंभवं अनुरक्तः शुचिर्दक्षः स्मृ
तिमान्देशकालवित् वपुष्मान्
वीतभीर्वाग्मीदूतोराज्ञः प्रशस्य
ते दूतएवहि सन्धत्तेभिनत्त्येवहि
संगतान् विग्रहार्थोमितार्थश्च
तथाशासनहारकः दूतास्त्रयो
मात्यगुणैः समैः पादार्द्धवर्जि
तैः विग्रहार्थकार्यवशात्तथा
सनं न करोतियः मितार्थः का
र्यमात्रोक्तोनकुर्यादुत्तरोत्तरं य
थोक्तवादी संदेशहारकोलेख
हारकः तत्रदूतो व्रजन्नेवचिंत
येदुत्तरोत्तरं वाक्यविशेषं भू
पाय कदाचित्स्ववेश्मनि दूतो
हि नलिखन् किंचित् निर्णीता
र्थविनिश्चये पृच्छ्यमानोपि न
ब्रूयात् स्वामिनःकार्यवैशसं इति

युक्तिकल्पतरुः अथदूतेवर्णनीया
नि निजप्रभुतेजः श्रीविक्रमोन्नत्य
करवाक्यं १ शत्रुक्षोभकरचेष्टा २
अथर्षणीयता ३ दक्षता ४ निर्भय
त्वं ५ इतिकविकल्पलता ॥
दूतघ्नी स्त्री कदंबपुष्पी इति शब्द
चंद्रिका ॥
दूतिः स्त्री दूती इतिशब्दरत्नावली
दूतिका स्त्री दूती इतिशब्दरत्नाव
ली दूती स्त्री सारिका इति राज
निर्घण्टः दौत्यकर्मणि नियुक्ता स्त्री
स्त्रीपुंसोः संदेशप्रापिका तत्प
र्यायः संचारिका २ इत्यमरः ॥
दूतिः ३ दूतीका ४ दूतिका ५
इतिशब्दरत्नावली दौत्यव्यापा
रपारंगमा तस्याः संघट्टन विर
हनिवेदनादीनि कर्माणि इति
रसमंजरी ॥
दूतीका स्त्री दूती इतिशब्दरत्नाव
ली दूत्यं क्ली दूतकर्म दूतस्यभावः
इत्यमरः दूतस्यभावः इतिमे ।
दिनी ॥
दूनः त्रि अध्यादिना म्लानः इत्यम
रः उपतप्तः यथा पित्तेन दूनेरस
नेसितापि तिक्तायते हंसकुलाव
तंस इति नैषधं ॥ ॥

दुष्पः त्रि वलवान् इति संक्षिप्तसा
रेउणादिवृत्तिः ।
दूरं त्रि अनिकटं असन्निकृष्टं त
त्पर्य्यायः विप्रकृष्टं २ इत्यमरः ।
दूरदर्शनः पुं गृध्रः इति राजनि
र्घण्टः । दूरदर्शी न् पुं पण्डितः इत्यम
रः । गृध्रः इति त्रिकाण्डशेषः । दी
र्घदर्शके त्रि ॥
दूरदृक् पुं पण्डितः इति शब्दर
त्नावली । गृध्रः इति हेमचन्द्रः ।
दीर्घदर्शके त्रि ॥
दूरमूलः पुं मुञ्जतृणं इति रा
जनिर्घण्टः ॥
दूरवेधी न् त्रि दूरनिक्षेप्यास्त्र
तत्पर्य्यायः दूरापाती २ इति
हेमचन्द्रः ॥
दूरेरितेक्षणः त्रि केकरः इति
शब्दमाला ॥
दूर्य्यं क्ली विष्ठा इति शब्दरत्नाव
ली । शटी इति राजनिर्घण्टः ।
दूर्वा स्त्री स्वनामख्यात घासः ।
तत्पर्य्यायः शतपर्विका २ स
हस्रवीर्य्या ३ भार्गवी ४ रुहा ५
अनन्ता ६ इत्यमरः । तिक्तपर्वा ७
दुर्म्मरा ८ वक्रवीर्य्या ९ हरिता
१० हरिताली ११ ॥
कच्छरुहा १२ शुक्लायाः पर्य्यायः
शतवीर्य्या १ गण्डाली २ शकुलाक्ष
कः ३ गोलोमी ४ इति जटाधरः ।
शतपर्वा ५ सितदूर्वा ६ सिता ७
इति रत्नमाला । अस्या गुणाः रक्त
पित्त कण्डु त्वग्दोषनाशित्वं इति
राजवल्लभः ॥
दूलिका स्त्री नीली इति शब्द
रत्नावली ॥
दूली स्त्री नीली इति शब्दरत्नाव
ली । दूष्य क्ली दूष्यं वस्त्रगृहं इत्य
मरटीका सारसुन्दरी ॥
दूषकः त्रि दोषोत्पादकः तत्
पर्य्यायः पांशनः २ इति त्रिका
ण्डशेषः ॥
दूषणः पुं रावणभ्रातृखरसेना
पतिः इति रामायणं । दोषे क्ली
दूषणारिः पुं श्रीरामः इति शब्द
रत्नावली ॥
दूषिः स्त्री दूषिका इति शब्दरत्ना
वली । दूषिका स्त्री नेत्रमलं पिचु
टि इति भाषा इत्यमरः । तत्पर्य्या
यः पिञ्चोडकं २ दूषिः ३ दूषी ४
इत्यमरटीकायां भरतः । दूषीका
पिञ्जटः ६ पिञ्जटः ७ इति शब्दर
त्नावली तलिका इति मेदिनी ॥

५

दूषितः त्रि प्राप्तदोषः तत्पर्य्यायः
अभिशस्तः २ वाच्यः ३ कारितः
४ इति हेमचन्द्रः ॥
दूषिता स्त्री दूषणप्राप्ता कन्या त
त्पर्य्यायः सक्षेदा २ धर्षकारि
णी ३ प्रमादिका ४ इति शब्दरत्ना
वली । दूषी स्त्री दूषिका इत्यमर
टीकायां भरतः ॥
दूषिका स्त्री दूषिका इति शब्दरत्ना
वली ॥
दूषीविषं क्ली ओषधादिभिरवीर्य्य
विषं इति हेमचन्द्रः । आदिपदात् दा
वाग्निवायुरौद्रशोषितविषं स्वभा
वतो गुणहीनं विषं अस्य गुणाः
उदर रोग प्लीह गुल्म कुष्ठ प्रमे
ह नाशित्वं इति राजवल्लभः । यथा
जीर्णं विषघ्नौषधिभिर्हतं वा दावा
ग्निवातातपशोषितं वा स्वभावतो
वा गुणविप्रहीनं विषं हि दूषीविष
तामुपैति इति माधवकरः ॥
दूष्यं क्ली वस्त्रं वस्त्रगृहं इति मेदि
नी । पूयं इति हेमचन्द्रः ॥
दुष्यः त्रि दूषणीयः इति मेदिनी ।
दुष्या स्त्री हस्तिकक्षरज्जुः कचदाडि
इति भाषा तत्पर्य्यायः कक्ष्या २
वरत्रा ३ इति हेमचन्द्रः । चूषा ४ ।
इत्यमरः ॥
दृ उ. स आदरे इति कविकल्पद्रुमः
दृ उ श आदरे इति कविकल्पद्रुमः
दृक् श स्त्री चक्षुः इत्यमरः । दर्शनं
बुद्धिः इति मेदिनी ॥
दृक् त्रि वीक्षकः इति मेदिनी ॥
ज्ञाता इति शब्दरत्नावली ॥
दृकं क्ली छिद्रं इति संक्षिप्तसारे
उणादिवृत्तिः ॥
दृकाणः पुं द्रेक्काणः इति जातकः ।
दृक्कर्णः पुं सर्पः इति हेमचन्द्रः ॥
दृक्काणः पुं द्रेक्काणः इति ज्योति
षं । दृक्प्रसादा स्त्री कुलत्था कुल
त्थाञ्जनं इति राजनिर्घण्टः ॥
दृक्क्रिया स्त्री शोभा इति राज
निर्घण्टः ॥
दृक्श्रुतिः पुं सर्पः इति हलायु
धः । दृगध्यक्षः पुं सूर्य्यः इति श
ब्दार्थकल्पतरुः ॥
दृग्गोलः पुं खगोलान्तर्गत गो
लविशेषः यथा स्वस्वस्तिके चा
धः स्वस्तिके चान्तः कीलकौ कृता
तयोः प्रोतमथ दृङ्मण्डलं कार्य्यं त
त्सर्ववृत्तेभ्यः किञ्चिन्न्यूनं कार्य्यं यथा

खगोलान्तर्भ्रमति यद्येक एव ग्रहो
लस्तदैकमेव दृग्गोलं यो यो ग्रहो
यत्र यत्र वर्त्तते तस्य तस्योपरि परि
भ्रामेदमेव विम्बस्य दृग्गोलं शङ्का
दिकं दर्शनीयं अथवा पृथक् पृ
थगष्टौ दृग्गोलानि रचयेत्
तत्राष्टमं त्रिभलग्नस्य तच्च दृ
क्क्षेप मण्डलं तस्मिन् खगोले
अक्षवचिक्रयोर्नलिकाद्वयं बद्धा
तन्नलिकाधारमेव खगोलाद्ब
हिरङ्गुलत्रयान्तरे दृग्गोलं रच
येत् कथितैः खगोलवृत्तैर्वस्य
मानैर्भगोलवृत्तैः क्रान्तिमण्डला
द्यैर्यो निबध्यते स दृग्गोलः य
तोऽग्राकुज्याः प्रम समशङ्क्वाद्य
वत्तेत्राणि दृग्गोले जातानि भ
गोलवृत्तानि खगोलवृत्तमिलि
तानि तत्प्रयत्नेगोलबन्धे सम्यग्नो
पलक्ष्यन्ते इति दृग्गोलः कृतः इ
ति सिद्धान्तशिरोमणिः ॥
दृग्विषः पुं नागः इति हेमचन्द्रः
दृढं क्ली लोहं इति शब्दचन्द्रिका
अतिशयः इत्यमरः ॥ दृढः त्रि
स्थूलः अतिशयः प्रगाढः बल
वान् इति मेदिनी कठिनः इत्यमरः
दृढकण्टकः पुं ताडफलकवृक्षः ।
पलश्चाँकडा इति भाषा इति शब्द
चन्द्रिका ॥
दृढकाण्डं क्ली दीर्घरोहिषकं इ
ति राजनिर्घण्टः ॥
दृढकाण्डः पुं वंशः इति राजनि
र्घण्टः ॥
दृढकाण्डा स्त्री पातालगरुडील
ता इति राजनिर्घण्टः ॥
दृढगात्रिका स्त्री मत्स्यण्डी इति
शब्दचन्द्रिका ॥
दृढग्रन्थिः पुं वंशः इति राज नि
र्घण्टः ॥
दृढच्छदं क्ली दीर्घरोहिषकं इति
राजनिर्घण्टः ॥
दृढतरुः पुं धववृक्षः इति राज
निर्घण्टः ॥
दृढतृणः पुं मुञ्जतृणं इति राज
निर्घण्टः ॥
दृढतृणा स्त्री बल्वजा इति राजनि
र्घण्टः दृढनकः पुं यावनालशरः
इति राजनिर्घण्टः ॥
दृढदंशकः पुं जलजन्तुविशेषः हा
गर इति भाषा इति शब्दकल्पतरुः
दृढनीरः पुं नारिकेलवृक्षः इ
ति राजनिर्घण्टः ॥ ॥

दृढपत्रः पुं वंशः इति राजनिर्घण्टः
दृढपत्री स्त्री बल्वजा इति राजनि
र्घण्टः दृढपादा स्त्री यवतिक्ता
इति राजनिर्घण्टः ॥
दृढपादी स्त्री भूम्यामली इति रा
जनिर्घण्टः ॥
दृढप्ररोहः पुं प्लक्षवृक्षः इति रा
जनिर्घण्टः ॥
दृढफलः पुं नारिकेलवृक्षः
इति राजनिर्घण्टः ॥
दृढबन्धिनी स्त्री श्यामालता इ
ति शब्दचन्द्रिका ॥
दृढमुष्टिः पुं खड्गादिः कृपणे
त्रि इति विश्वः ॥
दृढमूलः पुं मुञ्जतृणं मन्थान
कतृणं इति राजनिर्घण्टः नारिकेलः
इति शब्दार्थकल्पतरुः ॥
दृढरङ्गा स्त्री स्फटी इति राजनिर्घ
ण्टः दृढलता स्त्री पातालगरुडी
इति राजनिर्घण्टः ॥
दृढलोमा न् पुं स्त्री शूकरः इ
ति शब्दचन्द्रिका कठिन लोमयु
क्ते त्रि दृढवल्कलः पुं लकुचः पू
गः इति राजनिर्घण्टः ॥
दृढवल्का स्त्री अम्बष्ठा इति राज
निर्घण्टः दृढवीजः पुं चक्रमर्द्द वदरः
वर्बुरः इति राजनिर्घण्टः ॥
दृढसन्धिः त्रि निश्छिद्रः तत्पर्यायः
संहतः २ इत्यमरः ॥
दृढसूत्रिका स्त्री मूर्वा इति शब्द
चन्द्रिका ॥
दृढस्कन्धः पुं क्षीरिकावृक्षः इति
जटाधरः ॥
दृढत्वरा स्त्री बल्वजा इति राज
निर्घण्टः दृढाङ्गं क्ली हीरकं इति रा
जनिर्घण्टः दृतः त्रि आदृतः आदरार्थ
दृधातोः कर्मणि क्त प्रत्ययेन निष्पन्नः
दृता स्त्री जीरकः इति शब्दचन्द्रिका ॥
दृतिः पुं चर्मपुटकः मत्स्य इति मेदि
नी प्रथमस्य पर्यायः खल्लः २ इ
ति हेमचन्द्रः ॥
दृतिधारकः पुं वृक्षविशेषः आक
नपाता इति भाषा तत्पर्यायः आ
नन्दी २ मूषिकारातिः ३ वामनः ४
इति शब्दचन्द्रिका ॥
दृतिहरिः पुं कुक्कुरः इति मुग्धबो
धव्याकरणं ॥
दृन् व हिंसा इति मुग्धबोधटीका
दुर्गादासः
दृन्फू पा क्लेशे इति कविकल्पद्रुमः
दृन्भूः स्त्री सर्पः चक्रं इति मेदिनी
दृन्भूः पुं वज्रं सूर्यः इति हेमचन्द्रः

राजा इति शब्दरत्नावली ॥
ग्रन्तकः इति संक्षिप्तसारे उणादिवृत्तिः ॥
दृप श वाधने इति कविकल्पद्रुमः दृपकि संदीपने इति कविकल्पद्रुमः दृप नि य उ इ र हर्षे गर्वे। इति कविकल्पद्रुमः ॥
दृप्तः त्रि गर्वितः इति धरणिः ॥
दृप्रः त्रि दृप्तः इत्युणादिकोषः
दृफ य प श क्लेशे इति कविकल्पद्रुमः दृब्धः त्रि ग्रथितः इत्यमरः भीतः इति भयार्थदृभधातुदर्शनात् ॥
दृभं श ई कि गुम्फने ग्रथन इति यावत् इति कविकल्पद्रुमः ॥
दृभ ई कि भये इति कविकल्पद्रुमः
दृम्फ क उ. न संघाते राशीकरणे इति यावत् इति कविकल्पद्रुमः
दृभ ई कि भये इति कविकल्पद्रुमः
दृम्फ क उ. न संघाते राशीकरणे इति यावत् इति कविकल्पद्रुमः ॥
दृसः स्त्री सर्पः इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥
दृश इ र औ प्रेक्षणे चाक्षुषज्ञाने इति यावत् इति कविकल्पद्रुमः ॥
दृशत् ई स्त्री पाषाणः इत्यमरः ॥ निष्पेषणशिलापट्टे इति मेदिनी ।
दृशद्वती स्त्री नदीविशेषः साख्यार्यावर्त्तस्य पूर्वसीमा कात्यायनी इति मेदिनी ॥
दृशा स्त्री चक्षुः इति शब्दचन्द्रिका
दृशाकांक्षं क्ली पद्मं इति शब्दचन्द्रिका ॥
दृशानं क्ली ज्योतिः इति मेदिनी
दृशानः पुं विरोचनः इति मेदिनी आचार्यः इत्युणादिकोषः ॥ लोकपालः ब्राह्मणः उपाध्यायः इति संक्षिप्तसारे उणादिवृत्तिः
दृशिः } स्त्री चक्षुः इति शब्दरत्नावली
दृशी }
दृशोपमं क्ली श्वेतपद्मं इति शब्दचन्द्रिका ॥
दृश्यं त्रि दर्शनीयं द्रष्टव्यं इति व्याकरणं ॥
दृषत् स्त्री पाषाणः निष्पेषणशिला इति मेदिनी ॥
दृषत्सारं क्ली मुण्डायसं इति राजनिर्घण्टः ॥
दृष्टं क्ली स्वपरचक्रजभयं इत्यमरः ईक्षिते त्रि यथा दृष्टदोषेपि विषये ममत्वाकृष्टचेतनः इति वं।
शीदृष्टरजाः स्त्री जातरजस्का तत् पर्यायः मध्यमा २ इत्यमरः ॥ पोष्पा इति राजनिर्घण्टः ॥

दृष्टान्तः पुं उदाहरणं शास्त्रं मरणं इति मेदिनी ॥
दृष्टिः स्त्री चक्षुः इत्यमरः बुद्धिः। दर्शनं इति मेदिनी ग्रहाणां दृष्टिकथनं यथा तृतीयगृहे दशमगृहे च शनेः पूर्णदृष्टि रन्येषां पाददृष्टिः पंचमगृहे नवमगृहे च गुरोः। पूर्णदृष्टि रन्येषामर्द्धदृष्टिः चतुर्थगृहे अष्टमगृहे च कुजस्य पूर्णदृष्टि रन्येषां त्रिपाददृष्टिः सप्तमगृहे सर्वेषां पूर्णदृष्टिः पंचम गृहे सप्तमे नवमे द्वादशे च राहोः पूर्णदृष्टिः द्वितीये दशमे च त्रिपाददृष्टिः तृतीये षष्ठे चतुर्थे अष्टमे चार्द्धदृष्टिः ग्रहाणां दृष्टभावनिर्णयो यथा स्थिति भवने एकादशे च राहोर्दृष्टभावः स्थितिभवने द्वितीये षष्ठे एकादशे द्वादशे चान्येषां दृष्टभावः यथा। प्रमाणं यथा तृतीये दशमे चैव। पाददृष्टिरुदाहृता अर्द्धदृष्टिश्च नवमे पंचमे च प्रकीर्तिता चतुर्थेचाष्टमे चैव पादोना परिकीर्तिता सप्तमे पति पूर्णा च फलमेवं प्रकल्पते तृतीय दशमावार्किः पश्यन्पूर्णफलप्रदः त्रिकोणगानगुरुः र्मेवचतुर्थाष्टमगान् कुजः स्मृतः मदन नवोत्थपूर्णदृष्टिः मरारेर्युगलदशम राशौ दृष्टिमात्रा त्रयाः सहज रिपु चतुर्थेष्टमे चार्द्ध दृष्टिः स्थिति भवन मुपान्त्यं नैव दृष्टं पहिराहोः स्वस्थानंच द्वितीयच षष्ठमेकादशं तथा द्वादशाख्यंन पश्यन्ति शेषं पश्यन्ति ते ग्रहाः इति ज्योतिषतत्त्वं ॥
दृष्टिकृतं क्ली स्थलपद्मं इति शब्दचन्द्रिका ॥
दृष्टिकृतं क्ली स्थलपद्मं इति शब्दरत्नावली ॥
दृष्टिगुणः पुं वाणादिलक्ष्यं इति शब्दमाला ॥
दृष्टिबन्धुः पुं खद्योतः इति शब्दरत्नावली ॥
दृष्टिविक्षेपः पुं कटाक्षः इति। हलायुधः ॥
दृह ई }
दृह } वृद्धौ इति कविकल्पद्रुमः
दृहितः त्रि वृद्धिप्राप्तः दृहधातोः कर्मणि क्तेन निष्पन्नः ॥
दॄ म भये इति कविकल्पद्रुमः ॥
दॄ य गि विदारे इति कविकल्पद्रुमः
दॄ गि भये इति कविकल्पद्रुमः ॥

दे ङ. पालने इति कविकल्पद्रुमः
देदीप्यमानः त्रि पुनःपुनरतिशयेन वा दीप्यते यः अतिशय दीप्तिविशिष्टः इति व्याकरणं ॥
देवं त्रि दातव्यं दानीयं इति ॥ व्याकरणं ॥
देव ऋ ङ. देवने क्रीडन इत्यावन् इति कविकल्पद्रुमः ॥
देवं क्ली इंद्रियं इति मेदिनी ॥
देवः पुं देवता नाट्योक्तौ राजा इत्यमरः राजा मेघः इति मेदिनी पारदः इति राजनिर्घण्टः ब्राह्मणानामुपाधिभेदः यथा देव पूर्वं नराख्यं स्यात् शर्म वर्मादिसंयुतं इति स्मृतिः ॥ कायस्थादीनां पद्धतिविशेषः तस्य विवरणं कायस्थशब्दे द्रष्टव्यं
देवकः पुं यदुवंशीय राजविशेषः स श्रीकृष्णस्य मातामहः इति श्रीभागवतं ॥
देवकर्दमः पुं सुगंधिद्रव्यविशेषः स श्रीखण्डागुरुकर्पूरकुंकुम समैर्मिश्रितैर्भवति इति राजनिर्घण्टः
देवकात्मजा स्त्री देवकी इति । शब्दरत्नावली । देवकाष्टः स्त्री देवदारु इति रत्न ॥ ॥माला देवदारु प्रभेदः । तत्पर्य्यायः पूतिकाष्ठं २ भद्रकाष्ठं ३ सकाष्ठकं ४ स्निग्धदारुकं ५ काष्ठदारु ६ अस्य गुणाः तिक्तत्वं उष्णत्वं रूक्षत्वं श्लेष्मानिलापहत्वंच इति राजनिर्घण्टः ॥
देवकिरी स्त्री मेघरागस्य भार्य्या यथा ललिता मालसी गौरी नाटी देवकिरी तथा मेघरागस्य रागिण्यभवंतीमाः सुमध्यमाः अस्याः स्वरूपं यथा भ्रमंतीनंदनेषण्मा पुष्पप्रचय तत्परा ख्याता देवकिरी हेमाकरार्पित सखीकरा ॥ इति संगीतदामोदरः ॥
देवकी स्त्री देवकराजकन्या सा वसुदेवपत्नी श्रीकृष्णमाता तत्पर्य्यायः देवकी २ कृष्णजननी ३ देवकात्मजा ४ इति शब्दरत्नावली इयं कश्यपपत्नी अदितेरंशजाता यथा देवकी रोहिणी चेमे वसुदेवस्य धीमतः रोहिणी सुरभिर्देवी अदितिर्देवकी त्वभूत् इति महाभारते हरिवंशः अपिच कश्यपो वसुदेवश्च देवमाता च देवकी पूर्वपुण्यफलेनैव संप्राप श्रीहरिं सुतं इति ब्रह्मवैवर्त्ते ॥ ॥

श्रीकृष्णजन्मखण्डं ॥
देवकीनंदनः पुं श्रीकृष्णः इति शब्दरत्नावली ॥
देवकीसूनुः पुं श्रीकृष्णः इति हेमचंद्रः ॥
देवकुलं क्ली विमानमुखं देउल इति भाषा इति हारावली अस्य विवरणं चैत्यशब्दे द्रष्टव्यं ॥
देवकुरुम्बा स्त्री महाद्रोणा इति ॥ राजनिर्घण्टः ॥
देवकुसुमं क्ली लवंगं इत्यमरः ॥
देवखातं क्ली देवखातकं इत्यमरः टीकायां भरतः ॥
देवखातकं क्ली पुं अकृत्रिमजलाशयः अपौरुषेयं देवकुण्डमित्यन्ये इति सुभूतिः नागादि कुंडमकृत्रिममिति स्वामी तत्पर्य्यायः खातं २ इति भरतः अखातं ३ इत्यमरः दैवविनिर्म्मितं ४ इति शब्दरत्नावली ॥ गुहा इत्यमरटीकायां भरतः देवखातबिलं क्ली गुहा इत्यमरः देवगंधा स्त्री महामेदा इति राजनिर्घण्टः ॥
देवगांधारी स्त्री श्रीरागस्य भार्य्या। यथा गंधारी देवगांधारी मालवश्रीश्च सारवी रामकीर्य्यपि रागिण्यः श्रीरागस्य प्रियाइमे इति संगीतदामोदरः अस्या गानसमयः ॥ शिशिर ऋतौ तृतीय प्रहरावधि राज्यर्द्ध पर्य्यंतं ॥
देवगायनः पुं गंधर्वः इति हेमचंद्रः ॥
देवगिरी स्त्री रागिणीविशेषः इति हलायुधः सा सोमेश्वर मते वसंत रागस्य भार्य्या वसंत ऋतौ सदा गेया भरतमते हिंदोलरागपुत्र नागध्वनि भार्य्या संगीतदर्पण मते तु नटकल्याण भार्य्या अस्याः स्वरूपं यथा अन्यभि रामचनश्यामतनुः तुंगपीनस्तनी हारकंठभूषणा क्षीणकटिमध्या श्यामलचकोरनयना सुभंगपाणी च अस्या गानसमयः हेमंते दिवा चतुर्थप्रहरावधिरात्र्यर्द्धपर्य्यंतं देवगुरुः पुं बृहस्पतिः इति पुराणं देवगृहं क्ली सूर्य्य चंद्रादीनां ज्योतिर्मण्डलानि यथा मन्वन्तरेषु सर्वेषु ऋक्षे सूर्य्यग्रहाश्रयात् तानि देवगृहाणि स्युः स्थानाख्यानि भवंतिहि इति मत्स्यपुराणं देवालयश्च देवचिकित्सको पुं अश्वि

नीकुमारो इतिहलायुधः द्विवचनां
तोऽयं देवच्छंदः पुं हारविशेषः स
शतयष्टिकः इत्यमरः अष्टोत्तरश
तयष्टिकाऽयमिति केचित् इति
भरतः देवजग्धं क्ली देवजग्धकं इतिहेमचंद्रः
देवजग्धकं क्ली कत्तृणं इत्यम
रः देवटः त्रि शिल्पी इत्युणादि।
कोषः देवटी स्त्री गंगाचिल्ली
इतिहारावली ॥

देवतरुः पुं मंदारः पारिजा।
तः संतानः कल्पवृक्षः हरिचं
दनं इत्यमरः चैत्यवृक्षः इति
त्रिकाण्डशेषः ॥

देवता स्त्री देवं युतिं क्रीडाम्वा
तनोतिया तत्पर्य्यायः अमरः
२ निर्जरः ३ देवः ४ त्रिदशः ५
विबुधः ६ सुरः ७ सुपर्वा ८ सु
मनाः ९ त्रिदिवेशः १० दिवौकाः
११ आदितेयः १२ दिविषत् १३ ले
खः १४ अदितिनंदनः १५ आदि
त्यः १६ ऋभुः १७ अस्वप्नः १८
अमर्त्यः १९ अमृतान्धाः २०
बर्हिर्मुखः २१ क्रतुभुक् २२ गी
र्वाणः २३ दानवारिः २४ वृंदा
रकः २५ दैवतं २६ इत्यमरः
स्वाहाभुक् ॥ ॥

२७ दनुजद्विट् २८ सुपत् २९ द्योषत्
३० स्वर्गी ३१ शोभः ३२ निलिम्पः ३३
सुचिरायुः ३४ स्थिरः ३५ इति श
ब्दरत्नावली तस्याः संख्या त्रय
स्त्रिंशत् कोटयः यथा सदारा वि
बुधाः सर्वे स्वानां स्वानां गणैः सह
त्रैलोक्ये तत्र यस्त्रिंशत् कोटिसं
ख्या यथा भव इतिपद्मोत्तर खण्डे
गणदेवता यथा । आदित्या स्तु
षिता विश्व साध्या भास्वर मा
रुताः महाराजिक रुद्रा श्च वस
वो गणदेवताः आदित्या द्वादशप्रोक्ता
कीर्त्तिताः आभास्वरा श्चतुः षष्टि ।
र्वाताः पंचाशदूनकाः महा राजिक
नामानो द्वेशते विंशति स्तथा ।
रुद्रा एकादश प्रोक्ता वसवोऽ
ष्टौ समीरिताः इतिशब्दरत्नावली
तेषां चत्वारो वर्णा यथा आदित्याः
क्षत्रियाः स्तेषां विशश्च मरुत स्त
था अश्विनौच स्मृतौ शूद्रौ तपस्युग्र
समास्थितौ स्मृतास्त्वाङ्गिरसा देवा
ब्राह्मणा इति निश्चयः इत्येतत्
सर्वदेवानां चातुर्वर्ण्यं प्रकीर्त्तितं
इतिमहाभारते मोक्ष ॥ ॥

तुषिता स्त्रिंशद्देवाहि विश्वेदेवा दश प्रोक्ताः संख्या द्वादश + १२

धर्मः वैस्नवानां पंचदेवता यथा
यत्र यत्र सुराः पूज्या गणेशाद्यस्तु
कर्म्मणि विस्नुर्च्चेने तत्र तत्र वैस्न
वानां हि वैस्नवाः विश्वक्सेनं सस
नकं सनातन मतः परं सनंदं सन
त्कुमारंच पंचैवं पूजयेत्ततः इति
पाद्मोत्तरखण्डे देवषट्कं यथा
गणेशंच दिनेशंच वह्निं विस्नुं
शिवं शिवां देवषट्कंच संपूज्य
नमस्कृत्य विचक्षणः इति ब्रह्म
वैवर्त्ते प्रकृतिखण्डे अपिच आदि
त्यं गणनाथंच देवी रुद्रं यथा क्र
मं नारायणं विष्णुद्धाख्य मंते च
कुलदेवताः इत्याह्निकतत्वं ॥

व्यक्तिविशेषस्य उपास्य देवता य
था यायस्याभिमता पुंसः साहि
तस्यैव देवता किंतु कार्य्य विशेषे
ण पूजिता चेष्टदा न्तृणां विशेषा।
न सर्वदानायें नियमो ह्यन्यथा
न्यपाः न्यपाणां दैवतं विस्नु स्तथै
वच पुरंदरः विप्राणामाग्निरादि
त्या ब्रह्माचैव पिनाकधृक् देवा
नां दैवतं विस्नु र्दानवानां त्रिशूल
भृत् गंधर्वाणां तथा सोमो यक्षा।
णामपि कथ्यते विद्याधराणां वाग्दे
वी साध्यानां भगवान् हरिः रक्षसां
शंकरो रुद्रः किंन्न ॥ ॥

राणांच पार्वती ऋषीणां दैवतं ब्र
ह्मा महादेवश्च शूलभृत् मनूनां
स्यादुमा देवी तथा विस्नुः सभा
स्करः गृहस्थानांच सर्वेस्नु ब्रह्मा
वै ब्रह्मचारिणां वैखानसानामंवि
कास्याद्यतीनांच महेश्वरः भूतानां
वान्रुद्रः कूष्माण्डानां विनायकः
सर्वेषां भगवान् ब्रह्मा देव देवः
प्रजापतिः इत्येवं भगवान्ब्रह्मा स्व
यं देवो ऽभ्यभाषत इति कूर्म्मपुराणं

सामान्य देवत्वद्दून दिने यथा ।
तत्रोक्तनक्षत्राणि उत्तरफल्गुण्यु
त्तराषाढोत्तरभाद्रपद्रोहिणीचि
त्रानुराधामृगशिरोरेवतीपुष्योऽ
श्विनीहस्ता शतभिषा श्रवणास्वा
ती पुनर्वसुर्धनिष्ठा तत्रतिथयः
प्रभाः तत्रचेद्दस्तृतीय दशम सप्त
म तन्मेकादशस्थः शोभनः प्र
थ सामान्य देवप्रतिष्ठादिने तत्र
मासाः माघफाल्गुनचैत्र वैशाख
ज्यैष्ठाः हरिशयनात् पूर्वमाषा
ढश्च तत्र नक्षत्राणि धनिष्ठाश
तभिषाश्लेषा मघा पुनर्वस्वश्वि
नीभरणीकृत्तिका विशाखा भि
न्नानि तत्रतिथयः प्रभाः तत्रल
ग्नानि वृषमिथुनकन्या धनुर्मीन
सेतिकानि तत्र चंद्रः शोभनः लग्ना

पेक्षया बृहस्पतिः केंद्रस्थः शोभनः।
लग्नापेक्षया भृगुस्तृतीयषष्ठैका
दशस्थः शोभनः इति ज्योतिषं ॥
देवताडः पुं वृक्षविशेषः देताडा
इति ख्यातः तत्पर्यायः वेणी २
खरा ३ गरी ४ जीमूतः ५ इत्यमरः
अगरी ६ खरागरी ७ गरागरी ८
इति नद्दीकायां भरतः देवताडी
९ आखुविषहा १० इति जटाधरः
आखुः ११ विषजित् १२ महा
छदः १३ कदंवः १४ खजाक १५
देवताडकः १६ इति रत्नमाला ॥
राहुः अग्निः इति मेदिनी ॥
घोषकलता इति विश्वः ॥
देवताडकः पुं देवताडः इति
रत्नमाला ॥
देवताधिपः पुं इंद्रः इति शब्द
रत्नावली ॥
देवत्वं क्ली देवभूयं देवसायुज्यं
इत्यमरः देवस्य भावः कर्म वा
इति संक्षिप्तसारव्याकरणं ॥
देवदंडा स्त्री नागवला इति रा
जनिर्घण्टः ॥
देवदत्तः पुं बुद्धानुजः इति त्रि
काण्डशेषः अर्जुनशंखः शा
रीरस्थ पंचवायुमध्यगत वायुवि
शेषः इति ॥ ॥

शब्दार्थकल्पतरुः विजृंभने देव
दत्तः स्फुरस्फटिकसन्निभः इति
सारदातिलकटीका संज्ञाविशेषः
यथा देवदत्तादि संज्ञाशब्दस्य स
र्वलिंगभाजित्वाभावात् जातित्व
मायाति इति दुर्गादासः ॥
देवदत्ताग्रजः पुं बुद्धः इति हे
मचंद्रः ॥
देवदानी स्त्री घोषकाकृति इति
घोषा इति भाषा इति रत्नमाला।
देवदारु क्ली वृक्षविशेषः तत्प
र्यायः शक्रपादपः २ पारिभद्रकः
३ भद्रदारु ४ द्रुकिलिमं ५ पीतदारु
६ दारु ७ पूतिकाष्ठं ८ इत्यमरः।
सुरदारु ९ दारुकं १० स्निग्धदारु ११
अमरदारु १२ शिवदारु १३
शाम्भवं १४ भूतहारि १५ भवदारु
१६ भद्रवत् १७ इंद्रदारु १८ मस्त
दारु १९ सुरभूरुहः २० इति भा
वप्रकाशः सुराह्वः २० देवकाष्ठं २१
इति रत्नमाला अस्य गुणाः ॥
तिक्तत्वं उष्णत्वं श्लेष्मानिल
लभूतदोषनाशित्वंच इति राज।
निर्घण्टः लघुत्वं स्निग्धत्वं उष्णत्वं
कटुपाकित्वं विबंधान शोथाम
तंद्रा हिक्का ज्वरास्र प्रमेह पीनस

श्लेष्म श्वास कण्डू समीरनाशित्वं
च इति भावप्रकाशः तस्य लेपन
गुणाः कौतिदत्व आमदोष विवं
धार्शः प्रमेह ज्वर नाशित्वंच इति
राजनिर्घण्टः ज्वर चूतताः लक्ष्मी
रक्षोविघ्ननाशित्वं इति राजव
ल्लभः ॥
देवनालिका स्त्री महाकालः इ
ति राजनिर्घण्टः ॥
देवदाली स्त्री लताविशेषः घघर
वेल इति ख्यातः तत्पर्यायः जी
मूतकः २ कंटफला ३ गरा ४ ग
री ५ वेणी ६ महाकोषफला ३ ग
रा ४ गरी ५ वेणी ६ महाकोषफ
ला ७ कटुफला ८ घोषा ९ कदंवी १०
विषहा ११ कर्कटी १२ सारमूषि
का १३ कृतकोशा १४ आखुविषहा
१५ दाली १६ रोमशपत्रिका १७ देवताडः
२० अस्या गुणाः तिक्तत्वं उष्णत्वं क
टुत्वं पाण्डुकफदुर्नाम श्वासकास
कामलाभूत नाशित्वंच तस्याः फ
लस्य गुणाः तिक्तत्वं कृमि श्ले।
ष्म गुल्म शूलार्शोवातनाशित्वं
संसनत्वंच पीता गरा खरस्पर्शा
विषघ्नी गरनाशिनी इति राजनि
र्घण्टः देवदासी स्त्री वनवीजपूरकः
इति

राजनिर्घण्टः वेश्या इति शब्दा
र्थकल्पतरुः ॥
देवदीपः पुं लोचनं इति शब्दर
त्नावली ॥
देवदुंदुभिः पुं गंधपर्णासः सर
क्ततुलसी इति रत्नमाला देवा
नां दुंदुभि वाद्यंच ॥
देवदूती स्त्री वनवीजपूरकः इ
ति राजनिर्घण्टः ॥
देवदेवः पुं शिवः ब्रह्मा इति
शब्दरत्नावली ॥
देवद्रोणी स्त्री देवयात्रा इति हा
रावली ॥
देवद्र्यङ् त्रि देवपूजकः देव स
मीपगन्ता इत्यमरः ॥
देवधान्य क्ली धान्यविशेषः देधा
न इति भाषा जोआर इति हिंदी
भाषा तत्पर्यायः यवनालः २
योनलः ३ जूर्णाह्वयः ४ जोनाला ५
वीजपुष्पिका ६ इति हेमचंद्रः ॥
देवधूपः पुं गुग्गुलुः इति रत्नमा
ला देवनं क्ली व्यवहारः जिगी।
षा क्रीडा इति मेदिनी लीलोद्या
ने इति त्रिकाण्डशेषः पद्मं इति
शब्दचंद्रिका परिदेवनं इत्य म
रटीकायां भरतः द्युतिः स्तुतिः

कांतिः गतिः शोकः इत्यमरटी
कायांमधुरेशः स्मृत इतिस्वा
मी ॥
देवनः पुं पाशकः इत्यमरः
देवनंदी न पुं इंद्रद्वारपालः इति
हेमचंद्रः ॥
देवनलः पुं नलभेदः तत्पर्य्या
यः देवनालः २ महानलः ३
वन्यः ४ नलोत्तमः ५ स्थूलना
लः ६ स्थूलदंडः ७ सुरनालः
८ सुरद्रुमः ९ अस्य गुणाः अति
मधुरत्वं हृष्यत्वं ईषत् कषायत्वं
नलादधिकवीर्य्यत्वं रस कर्म।
णिशास्त्रत्वंच इति राज नि
र्घंटः ॥
देवना स्त्री क्रीडा सेवा इतिश
ब्दरत्नावली ॥
देवनालः पुं देवनलः इति
राजनिर्घंटः ॥
देवपतिः पुं इंद्रः इतिहेमचंद्रः
देवपत्नी स्त्री मधालकं इति।
त्रिकाण्डशेषः देवानां भार्य्या
च देवपथः पुं देवानांपन्थाः
तत्पर्य्यायः छायापथः २ सोमधा
रा ३ नभःसरित् ४ इति त्रिकांड
शेषः देवपर्णं क्ली सुरपर्णं इतिरा
जनिर्घंटः ॥

देवपुत्रिका स्त्री स्पृक्का इति रा
जनिर्घंटः ॥
देवपुत्री स्त्री स्पृक्का इतिजटाधरः
देवपूः स्त्री अमरावती इति ज
टाधरः ॥
देवप्रश्नः पुं ग्रह नक्षत्रादि च
रितजिज्ञासा तत्पर्य्यायः उपश्रुतिः
२ इतिहेमचंद्रः ॥
देवप्रियः पुं पीतभृंगराजः व
कपुष्पः इति राजनिर्घंटः
देवबला स्त्री सहदेवी त्रायमाणा
इति राजनिर्घंटः ॥
देवबल्लभः पुं पुन्नाग वृक्षः इत्यमरः
देवब्रह्मा न पुं नारदमुनिः इति
हेमचंद्रः ॥
देवभवनं क्ली अश्वत्थः इतिश
ब्दचंद्रिका स्वर्गश्च ॥
देवभूः पुं देवः इतिशब्दरत्नाव
ली स्वर्गश्च ॥
देवभूतिः स्त्री मंदाकिनी इति
शब्दरत्नावली ॥
देवभूयं क्ली देवत्वं देवसायु
ज्यं इत्यमरः ॥
देवमणिः पुं भर्गः कौस्तु
भः अश्वरोमावर्त्तः इति।
मेदिनी ॥ ॥

महामेदा इति राजनिर्घंटः ॥
देवमाता * स्त्री अदितिः इति त्रिका
ण्डशेषः ॥
देवमातृकः त्रि वृष्ट्यंबुसंपन्नव्रीहि
पालित देशः इत्यमरः ॥
देवमानकः पुं कौस्तुभमणिः इ
तिशब्दरत्नावली ॥
देवमासः पुं गर्भस्याष्टममासः
तत्पर्य्यायः गर्भाष्टमः २ इति त्रि
काण्डशेषः देवानांमासः समनु
ष्यमाने त्रिंशद्वर्षात्मकः देवयजिः
पुं देवपूजकः मुनिःयर्थश्रेयो हि
त्वान् देवयजीन् निहत्य इति।
भट्टिः ॥
देवयज्ञः पुं होमः इति हेमचंद्रः
देवयात्रा स्त्री देवगमनं तत्पर्य्यायः
देवद्रोणी २ इति हारावली ॥
देवोत् सवादिच ॥
देवयानं क्ली देवविमानं देवरथः
इतिशब्दार्थकल्पतरुः ॥
देवयानी स्त्री शुक्राचार्य्यकन्या
सा ययाति राजपत्नी इतिश्री भा
गवतं ॥
देवयुः त्रि धार्मिकः लोकयात्रिकः
इति मेदिनी देवे पुं इतिशब्दर ॥
त्नावली ॥ ॥

देवयोनिः पुं स्त्री देवएव योनि
र्निदानभूतो यस्य सः तद्यथा।
विद्याधराः १ अप्सरसः २ यक्षाः ३
राक्षसाः ४ गंधर्वाः ५ किन्नराः ६
पिशाचाः ७ गुह्यकाः ८ सिद्धाः ९
भूतगणः १० इत्यमरः ॥
देवरः पुं पत्युः कनिष्ठभ्राता।
देओर इतिभाषा तत् पर्य्यायः
देवा २ इत्यमरः ज्येष्ठस्त्वप्यमरः
इत्य भरतः ॥
देवरथः पुं देवानांविमानः इति
हलायुधः सच पुष्पकादिः ॥
देवराजः पुं इंद्रः इतित्रिकाण्ड
शेषः तस्यनामानि यथा इंद्रः
सुरपतिः शक्रो दितिजः पवना
ग्रजः सहस्राक्षो भगांकश्च कश्य
पाग्रजएवच बिडौजाश्च सुना
सीरो मरुत्वान् पाकशासनः
जयंतजनकः श्रीमान् शचीशो
दैत्यसूदनः वज्रहस्तः कामस
खा गोत्रभी वृत्रनाशनः वृत्रहा
वासवश्चैव दधीचिदेहनिस्तकः
जिष्णुश्च वामनभ्राता पुरुहूतः पु
रंदरः दिवस्पतिः शतमखः सुत्रा
मा गोत्रजिद्विभुः लेखर्षभो बलारा
तिर्जंभभेदी सुराश्रयः संक्रंदनोदु।

देव देवं इति हृदात्मके देवा ना नटनाच्चैव देवाट इति सं स्तिनं इति वराह पुराणे ॥
देवात्मा न पुं अश्वत्थः इतिश ब्दचंद्रिका ॥
देवानांप्रियः पुं स्त्री छागः इ तित्रिकांडशेषः जाल्मः इति हेमचंद्रः ॥
देवापिः पुं प्रतीपराजः पुत्रः स सुमेरु समीपे कलाप ग्रा मेयोगी भूत्वा आस्ते स कलौ लमं चंद्रवंशं पुनः सत्ययुगे। भावयिष्यति इतिश्रीभागवतं स च ऋषी प्रजातिरपध्यातः॥ इति मत्स्यपुराणं ॥
देवाभीष्टा स्त्री ताम्बुली इतिश ब्दचंद्रिका ॥
देवायतनं क्ली देवालयः य था नदेवायतनंगच्छेत्कदाचि द्वाःप्रदक्षिणं नपीडयद्वावस्त्रा णिन देवायतनेष्वपि इति कू र्मपुराणे देवायुधं क्ली शक्र धनुः इति हेमचंद्रः ॥
देवानामसृंच ॥ देवार्ह क्ली सरपर्णं इतिराजनिर्घंटः॥
देवाह्री स्त्री सहदेवीलता इति राजनिर्घंटः ॥
देवालयं क्ली स्वर्गः देवगृहं इति शब्दार्थकल्पतरुः॥
देवाला स्त्री रागिणीविशेषः इतिहलायुधः
देवावासः पुं अश्वत्थवृक्षः इति त्रिकांडशेषः ॥
देवाश्वः पुं इंद्रघोटकः उच्चैःश्र वा इति हलायुधः ॥
देविका स्त्री नदीविशेषः इति शब्दरत्नावली तस्याःपरिमाणं यथा अर्द्धयोजन विस्तारा पंच योजनमायता एतावद्देविकामाऊ देवर्षिपरिसेविता इतिपाद्मेभू मिखंडे पुष्करः इति भावप्रका शः देवसंबंधिनित्रि ॥
देविलः त्रिधार्मिकः इत्युणादि कोषः देवी स्त्री दुर्गा इतिधरणी नाटेकोक्तनाभिषेकाराजपत्नी इत्यमरः मूर्वी स्पृक्का इति मेदि नी सामान्यदेवपत्नी यथा देवी नादक्षिणायने इतिस्मृतिः ब्राह्म णस्त्रीनामोपपदं यथा देवता हिस्त्रियोमताः इत्युद्वाहतत्वं ॥ ज्ञापिच देव्यनाश्चस्त्रियःसर्वाद संताःस्मृदयोनयः इतिकर्मवि पाकः ॥

देवीकोटः पुं बाणपुरं इति त्रिका ण्डशेषः॥
देवेज्यः पुं बृहस्पतिः इतिशब्द रत्नावली ॥
देवेष्टः पुं महामेदा गुग्गुलः इ तिराजनिर्घंटः देववांछितेति
देवेष्टा स्त्री वनबीजपूरकः इ तिराजनिर्घंटः ॥
देवोद्यानं क्ली देवानांवनं तद्य। था वैभ्राज मिश्रकं शिवकावणं चैत्ररथं इति त्रिकांडशेषः देशः पुं भूगोलस्थानविशेषः इतिसि द्धांतमंजरी जनपदे जनपदे। समुदाये जनपदैकदेशे सजल निर्जल स्थानमात्रेच इत्यमरटीका यां भरतः सत्रिविधः जांगलः अनूपः साधारणश्च तत्पर्यायः जनपदः १ नीवृत् २ विषयः ३ उ पवर्तनं ४ इतिराजनिर्घंटः प्रदे शः ५ राष्ट्रं ६ इति शब्दरत्नावली अथ देशवर्णनीयानि रत्न १ खनि २ द्रव्यं ३ पण्यं ४ धान्यं ५ करोद्भवः ६ दुर्गग्रामः ७ जनाधि क्यं ८ नदीमातृकतादि ९ अथ ग्रामेवर्णयानि धान्यं १ लता २ दृ ता ३ सरः ४ पशुपुष्टिः ५ क्षेत्रं ६ अरघट्टः ७ केदारः ८ ग्रामेयीसुखं ९ विभ्रमः १० इतिकविकल्पलता अथ मध्य देशीय जनपदा यथा तास्विमे कुरुपांचालाः शाल्वा। श्चैव सजांगलाः शूरसेना भद्र कारा बोधका सपटच्चराः मत्स्याः किराताः कुल्पाश्च कुन्तयः का ति कोशलाः आवंताश्च भूलिंगाश्च लोकैश्चबोधकैः सह मध्यदेशपा जनपदाः प्रायशः परिकीर्तिताः अथउदीच्यादेशा यथा वाह्लीका वाटधानाश्च आभीराः कालतोय काः परंधाश्चैवशूद्राश्च पल्हवाश्चा त्तखंडिकाः गांधारा जवनाश्चैव सिंधुसौवीरमद्रकाः शाकाद्रुह्याः पुलिंदाश्चपारदाहारमूर्तिकाः रामठाः कंठकाराश्च केकया दे शमानिकाः क्षत्रियोपनिवेशा श्च वैश्य शूद्र कुलानिच आत्रेयो थ भरद्वाजः प्रस्थलाः सदशेरकाः लम्पका तलगानाश्च सैनिकाः सह सांगजैः एते देशा उदीच्यास्तु प्राच्यान्देशान्निबोधतः अथ प्रा च्या देशा यथा अंग वंगा मद्गुरका अंतर्गिरिवर्गिराः ततःप्रवंगामाते गामलया मलवर्तिकाः सदमानराः प्रति

विस्तयाभार्गवागेयमालवाः प्रा
ग्ज्योतिषाश्च पुण्ड्राश्च विदेहास्ताम्र
लिप्तकाः शाल्वा मागधगोनर्द्दा
प्राच्या जनपदाः स्मृताः अथ दक्षि
णापथदेशा यथा तथापरे जन
पदा दक्षिणापथवासिनः पाण्ड्रा
श्च केरलाश्चैव चोलाः कुल्यास्तथै
व च सेतुका मूषिकाश्चैव कुपथा
वासवासिकाः महाराष्ट्रा माहिष
काः कलिङ्गाश्चैव सर्वशः कावे
राश्च सहैषीके राटव्याः शवरा
स्तथा पुलिन्दा विन्ध्यमूषीका वै
दर्भा दण्डकैः सह कुलीयाश्च ।
शिरालाश्च रूपसास्तापसैः सह ।
तथा तैत्तिरिकाश्चैव सर्वे कारस्करा
स्तथा नासिकाद्याश्च ये चान्ये ये चै
वान्तरनर्मदाः भानुकच्छाः स।
माहेयाः सह सारस्वतैस्तथा ॥
कच्छीयाश्च सुराष्ट्राश्च आनर्त्ताश्चा
र्बुदैर्विन्ध्यवासिनः अथ विन्ध्यवा
सि देशा यथा मालवाश्च करू
षाश्च मेकलाश्चोत्कलैः सह उ
त्तमार्णा दशार्णाश्च भोजाः किष्किं
धकैः सह तोषलाः कोशलाश्च
त्रैपुरा वैदिकास्तथा तुमुरास्तु
म्बुराश्चैव षट्सा निषधैः सह अनूप
स्तुण्डिकेराश्च वीतिहोत्रा अवन्तयः ॥
एते जनपदाः ख्याता विन्ध्यपृष्ठनि
वासिनः पर्वताश्रयि देशा यथा
अतो देशान् प्रवक्ष्यामि सर्वताश्च
षिणश्च ये निर्हारा हंसवर्णाश्च
कुपथा अपथाः खशाः ॥
कुथप्रावरणाश्चैव ऊर्णा दर्भाः स
मूहकाः त्रिगर्त्ता मण्डलाश्चैव कि
राताश्चामरैः सह इति मत्स्य
पुराणं अपि च देशव्यवस्था दे
वेशि कथ्यते शृणु तत्परा वै
द्यनाथं समारभ्य भुवनेशान्तगं ।
शिवे तावद्वङ्गाभिधो देशो यात्रा
यां नहि दुष्यति रत्नाकरं समार
भ्य ब्रह्मपुत्रान्तगं शिवो वङ्गदेशो
मया प्रोक्तः सर्वसिद्धिप्रदर्शकः
जगन्नाथात् पूर्वभागात् कृष्णा
तीरान्तगः शिवे कलिङ्गदेशः स
प्रोक्तो वाममार्गपरायणः कलि
ङ्गदेशमारभ्य पञ्चाष्ट योजनं शि
वे दक्षिणस्यां महेशानि कालिं
गः परिकीर्त्तितः सव्वलरण स
मारभ्य यावद्देवो जनार्दनः ताव
त् केरलदेशः स्यात् तन्मध्ये सिद्ध
केरलः रामेश्वरात् वंकटेशात् हृ
सकेरलनामकः अनन्तशैलमारभ्य
यावत् ॥

स्यादध्यमं परे तावत् सर्वेश
नामा तु केरलः परिकीर्त्तितः
शारदामठमारभ्य कुङ्कुमाद्रित
टान्तकं तावत् काश्मीरदेशः
स्यात् पञ्चाशद्योजनान्तकं का
लेश्वरं श्वेतगिरिं त्रैपुरं नीलपर्वतं
कामरूपाभिधो देशो गणेशगि
रिमूर्द्धनि त्रिपञ्चकं समारभ्य म
ध्ये चापि नी शिवे मार्जारतीर्थ
राजेन्द्र कोलापुरनिवासिनी ता
वद्देशो महाराष्ट्रः कर्णाट स्वामि
गोचरः जगन्नाथादूर्द्धभाग मवी
कु श्रीभ्रमराम्बिकान्त तावदन्ध्राभि
धो देशः सौराष्ट्रं स्मरणादूर्ध्वं कोंक
णात् पश्चिमे तीर्थे समुद्रप्रान्त
गोचरं हिङ्गुलाजान्तको देवि दश
योजनदेशान्तः सौराष्ट्रदेशो दे
वेशि तस्मात् गुर्ज्जराभिधः श्रीशै
लं तु समारभ्य चोलेशान्मध्यभा
गतः तैलङ्गदेशो देवेशि ध्याना
ध्ययन तत्परः रत्नाविकां समार
भ्य मलयाद्रस्तगो शिवे मलयाला
भिधो देशो मन्त्रसिद्धिप्रवर्त्तकः रा
मनाथं समारभ्य श्रीरङ्गान्तं विले
श्वरि कर्णाटदेशो देवेशि साम्राज्य
भोगदायकः ताम्रपर्णीं समासाद्य ।
शैलाद्दक्षिणोर्द्ध्वतः अवन्ती सञ्ज्ञ
को देशः कालिका तत्र तिष्ठति ।
भद्रकाली महापूर्वे रामदुर्गाच्च प
श्चिमे श्रीविदर्भाभिधो देशो वैदर्भी
तत्र तिष्ठति गुर्जरात् पूर्वभागे तु
द्वारकातो हि दक्षिणे मरुदेशो
महेशानि उष्ट्रात् पत्ति परायणः
श्रीकोङ्कणादधोभागे तापीतः
पश्चिमे परे आभीरदेशो देवे
शि विन्ध्यशैलव्यवस्थितः अव
न्तीतः पूर्वभागे गोदावर्या स्तथो
त्तरे मालवाख्यो महादेशो धन
धान्यपरायणः द्रविडतैलङ्गयो
र्मध्ये चोलदेशः प्रकीर्त्तितः लं
वकर्णाश्च ते प्रोक्तास्तत्तद्देशान्त
रे भवेत् कुरुक्षेत्रात् पश्चिमे तु
तथा चोत्तरभागतः इन्द्रप्रस्थान्म
हेशानि दशयोजनकद्वये पाञ्चा
लदेशो देवेशि सौन्दर्यगर्वभूषि
तः पाञ्चालदेशमारभ्य म्लेच्छाद्द
क्षिणपूर्वतः काम्बोजदेशो देवे
शि वाजिराशिपरायणः वैदर्भ
देशादूर्द्ध्वं च इन्द्रप्रस्थाच्च दक्षिणे
मरुदेशात् पूर्वभागे वैराटः प
रिकीर्त्तितः काम्बोजाद्दक्षभागे तु
इन्द्रप्रस्थाच्च पश्चिमे पारद्देशो

विस्तयाभार्गवांगेयमालवाः प्रा
ग्ज्योतिषाश्चपुण्ड्राश्च विदेहास्ताम्र
लिप्तकाः शाल्वा मागधगोनर्दा
प्राच्याजनपदाःस्मृताः अथदक्षि
णापथ्यदेशा यथा तथापरेजन
पदादक्षिणापथ वासिनः पांड्या
श्चकेरलाश्चैवचोलाःकुल्यास्तथै
वच सेतुकामुषिकाश्चैवकुपथा
वारवासिकाः महाराष्ट्रा माहिष
काकलिंगाश्चैव सर्वशः कावे
राश्चसहैषीके राटव्याः शवरा
स्तथा पुलिंगा विंध्यमूषीका वै
दर्भा दण्डकैः सह कुलीयाश्च।
श्रिरालाश्चरूपसास्तापसैःसह।
तथा तैत्तिरकाश्चैवसर्वेकारस्करा
स्तथा नासिकायाश्चयेचान्येयेचै
वोत्तरनर्मदाः भानुकच्छाः स।
माहेयाः सह सारस्वतैस्तथा॥
कच्छीयाश्चसुराष्ट्राश्चआनर्त्ताश्च
र्बुदैःसह इत्येतेअपरांताश्च
शृणुयेविंध्यवासिनः अथ विंध्यवा
सि देशा यथा मालवाश्चकरू
षाश्चमेकलाश्चोत्कलैः सहउ
त्तमार्णादशार्णाश्चभोजाः किंकि
धिकैः सह तोषलाः कोशलाश्च
त्रैपुरावैदिकास्तथा तमुरास्तं
बुराश्चैव पट्टमाश्चिषधैः सह अनुपा

स्तुंडिकेराश्च वीतिहोत्रा अवंतयः॥
एते जनपदाख्याता विंध्य पृष्ठनि
वासिनः पर्वताश्रयि देशा यथा
अतोदेशान् प्रवक्ष्यामि सर्वताश्र
यिणश्च ये निर्हारा हंस वर्णाश्च
कुपथा अपथाःखशाः॥
कुथप्रावरणाश्चैव ऊर्णा दर्भाः स
मुद्रकाः त्रिगर्त्तामण्डलाश्चैव कि
रातास्तामरैःसह इति मत्स्य
पुराणं अपिच देशव्यवस्था दे
वेशि कथ्यते श्रृणु तत्रपरा वै
द्यनाथं समारभ्य भुवनेशान्तगं।
शिवेतावद्वंगाभिधो देशो यात्रा
यानहि दृश्यति रत्नाकरं समार
भ्यब्रह्मपुत्रांतगं शिवो वंगदेशो
मयाप्रोक्तः सर्वसिद्धि प्रदर्शकः
जगन्नाथात् पूर्वभागात् कृष्णा
तीरान्तगं शिवे कलिंगदेशः स
प्रोक्तोवाममार्ग परायणः कलि
ग देशमारभ्य पंचाष्ट योजनं शि
वे दक्षिणस्यां महेशानि कालिं
गःपरिकीर्त्तितः सबलत्वेण स
मारभ्ययावद्देवो जनार्द्दनः ताव
त् केरलदेशःस्यात् तन्मध्येसिद्ध
केरलः रामेश्वरात्समारभ्यक्टपात् द
सकेरलनामकः अनंतशैलमारभ्य
यावत्॥

स्याद्ब्रह्मं परे तावत् सर्वेश
नामा तु केवलः परिकीर्त्तितः
शारदामठ मारभ्य कुंकुमाद्रित
टान्तकं तावत् काश्मीर देशः
स्यात् पंचाशद्योजनान्तकं का
लेश्वरंश्वेतगिरिं त्रैपुरं नीलपर्वतं
कामरूपाभिधो देशो गणेश गि
रिमूर्द्धनि त्रिपंचकं समारभ्यम
ध्ये चोपिनी शिवे मार्ज्जार तीर्थ
राजेंद्र कोलापुरनिवासिनी ता
वद्देशो महाराष्ट्रः कर्णाट स्वामि
गोचरः जगन्नाथाद्दर्द्धभाग मर्वा
क्श्रीभ्रमरात्मिकात् तावदंध्राभि
धोदेशः सौराष्ट्रस्यणसादरं कोंक
णात् पश्चिमे तीर्थे समुद्र प्रांत
गोचरे हिंगुलाजांतको देवि दश
योजनदेशान्तः सौराष्ट्र देशो दे
वेशि तस्मात् गुर्ज्जराभिधः श्रीशै
लंतु समारभ्य चोलेशान्मध्य भा
गतः तैलंग देशो देवेशि ध्याना
ध्ययन तत्परः सरोदिकां समार
भ्यमलयाद्रसंतगं शिवे मलयाला
भिधोदेशोमंत्रसिद्धिप्रवर्त्तकः रा
मनाथंसमारभ्य श्रीरंगास्तं विले
श्वरि कर्णाट देशो देवेशि साम्राज्य
भोगदायकः ताम्रपर्णीसमासाद्य।

शैलाद्दशिखरोर्द्धतः अवंती सञ्ज्ञ
को देशःकालिका तत्र तिष्ठति।
भद्रकालीमहापूर्वेरामदुर्गाच्चप
श्चिमाश्री विदर्भाभिधोदेशोवैदर्भी
तत्र तिष्ठति गुर्ज्जरात् पूर्वभागे तु
द्वारकाता हि दक्षिणे मरुदेशा
महेशानि उष्णात् पत्ति परायणाः
श्रीकोंकणा दथोभागे तापीतः
पश्चिमे परे आभीर देशो देवे
शि विंध्यशैलेव्यवस्थितः अव
तीतः पूर्वभागे गोदावर्य्या स्तथो
त्तरे मालवाख्यो महादेशो धन
धान्य परायणः द्रविड तैलंगयो
र्मध्ये चोलदेशः प्रकीर्त्तितः लं
बकर्णाश्च ते प्रोक्तास्तेतद्देशात
रेभवेत् कुरुक्षेत्रात् पश्चिमे तु
तथा चोत्तर भागतः इंद्रप्रस्थान्म
हेशानि दश योजनक द्वये पांचा
ल देशो देवेशि सौंदर्य्य गर्वभूषि
तः पांचालदेश मारभ्य म्लेच्छाद्द।
क्षिण पूर्वतः कांबोज देशो देवे
शि वाजि राशि परायणः वैदर्भ
देशाद्दुर्द्धुच इंद्रप्रस्थाच्च दक्षिणे
मरुदेशात् पूर्वभागे वैराटः प
रिकीर्त्तितः कांबोजाद्दक्ष भागेतु
इंद्रप्रस्थाच्च पश्चिमे पारस्यदेशो

महेशानि महाशूरत्व कारकः
गंडकी तीर मारभ्य चम्पारण्यं त्त
कंशिवे विदेहभूः समाख्यातानेरं
भ्रक्राभिधः सत्त कांबोजदेशमा
रभ्यमहाम्लेच्छात्तपूर्वके वाह्लीक
देशो देवपि अश्वोत्तपत्ति पराय
णः तमकुण्डं समारभ्य रामक्षेत्रा
न्तकंशिवे किरात देशो देवशि
विंध्य शैलेवतिष्ठति करतोयां ।
समारभ्य हिंगुलाजान्तकं शिवे ।
मूलतान देशो देवपि महाम्ले
च्छपरायणः हिंगुपीठं समार
भ्यमक्केशांतं महेश्वरि खुरासा
नाभिधोदेशो म्लेच्छमार्ग पराय
णः तन्मध्ये चोत्तरेदेवि पेराकः
परिकीर्तितः काश्मीरं तु समार
भ्यकामरूपात्त पश्चिमे भोटान्त
देशोदेवेशिमानसेशाच्च दक्षिणे
मानसेशाद्दत्तपूर्वे चीनदेशः प्र
कीर्तितः कैलासतीरे समारभ्य सर
युपरितः परे अमरखा महेशानि
महाचीनाभिधो भवेत् जलेश्वरं
समारभ्ययोगिन्यंतंमहेश्वरि नेपा
लदेशो देवेशि शिलहट्टेश्वरा
प्रिये गणेश्वरं समारभ्य महोद
धन्तंगंशिवे शिलहट्टाभिधोदेशः प
र्वतेतिष्ठतिप्रिये वंगदेशांसमार
भ्यभुवनेशांतगं शिवे गौडदेशः
समाख्यातः सर्वविद्या विशारदः
गोकर्णेशात् पूर्वभागे आर्ण्य
वर्तात्तचोत्तरे तैरभुक्तात् पश्चि
मेतु महा पूर्याश्च सर्वतः महा
कोशलदेशश्च सूर्यवंशपराय
णः व्यासेश्वरंसमारभ्य तमकुण्डा
न्तकंशिवे मगधाख्यो महा देशो
यात्रायांनहिदृश्यति दक्षोत्तरक्रमे
णैव क्रमात् कीकटमागधौ चरणा
द्रिंसमारभ्य गृध्रकूटान्तकं शिवे ता
वत् कीकटदेशः स्यात्तदंतर्मागधो
भवेत् जगन्नाथपात्तदेशाच्छोत्तक
लः परिकीर्तितः कामगिरिं समा
रभ्यद्वारकांतं माहेश्वरि श्रीकुंत
लाभिधोदेशो कृतमूलं महेश्वरि
कामगिरेर्द्दक्षभागेमरुदेशात्तथो
त्तरे कृतदेशः समाख्यातः शूरास्त
त्रवसंतिच अश्वाम्बरं समारभ्य को
टिदेशास्तमध्यगो समुद्रप्रांतदेशो
हि कोंकणः परिकीर्तितः वलप
ज्ञात् कामरूपात् मध्यभागे तु के
कयः मागधाद्दक्ष भागे तु विंध्या
त् पश्चिमतः शिवे सौरसेनाभिधो
देशः सूर्यवंश प्रकाशकः ॥

1433

हस्तिनापुर मारभ्य कुरुक्षेत्राच्च
दक्षिणे पांचाल पूर्वभागेतुकुरु
देशः प्रकीर्तितः मरुदेशात् पूर्व
भागेकामाद्रेर्द्दक्षिणेशिवे सिंह
लाख्यो महा देशः सर्वदेशोत्तमो
त्तमः शिलहट्टात् पूर्वभागेका
मरूपात्तथोत्तरे पुलेधि देशोदे
वेशि नरनारायणः परः गणेश्व
रात् पूर्वभागेसमुद्राक्तत्तरेशिवे
कच्छ देशः समाख्यातः सदेश
म्लेच्छसादरं पुलिंदाक्षतरे भागेक
च्छाच्च पश्चिमे शिवे मत्स्य देशः
समाख्यातोमत्स्याकल्पकारकः
वैराट पाण्डयो मध्ये पूर्व दक्ष
क्रमेण तु मद्रदेशः समाख्यातो
माद्री ह्या तत्र तिष्ठति पुरसेनात्
पूर्वभागेगण्डकाः पश्चिमेशिवे
सौवीर देशो देवेशि सर्वदेशोथ
माधमः अवंतीतः पश्चिमेतु ।
वैदर्भोद्दक्षिणोत्तरे नाट देशः स
माख्यातो वर्वरे श्मशानं पार्वति मा
यापुरं समारभ्य सप्तशृंगात्तथोत्तरे
वर्वराख्या महादेशः सैंधवेश्मशान सा
दरं लंकाप्रदेशमारभ्य मक्कांते पर
मेश्वरि सैन्धवाख्यामहादेशः पर्वते
तिष्ठति प्रिये एतेषट्पंचाशद्देशे ।
शामया प्रोक्तामहेश्वरि एतन्म
ध्येः पिदेवेशिदेशभेदाह्यनेकशः
कोटिशः सन्तिदेवेशि एतेमुख्याः
प्रकीर्तिताः रहस्यातिरहस्यञ्च
गोप्तव्यंपशुसंकटे इति संक्षेप
तः प्रोक्तं किमन्यत् श्रोतुमिच्छसि
इति शक्तिसंगम तंत्रेण पटलः
देशाकः त्रि शास्त्रा इति हेमचंद्रः
देशाकारी स्त्री रागिणी विशेषः
हनुमन्मते मेघ रागस्य भार्या
अस्याजातिः संपूर्णः गृहं षड्ज
स्वरः गानसमयः वर्षत्तौ निशांतः
अस्याः स्वरूपं सुंदरस्त्री तिलप्र
सूननासकमलपत्राक्षी दाडिमस्त
नी गौरांगी बिंबोष्ठी मुक्ताहारके
ठी कर्पूरचंदन लिप्तांगी स्नालिका
रा नायकेन सहोपविष्टाहावभाव
कटाक्षान् कुर्वती संगीत दर्पण ।
गते अस्या गानसमयः प्रात वैराटी
रागिण्यासह अस्याः स्वरूपं नाय
केन सह केलि कौतुक रताप्रपा
मकेशाभारा जितशरत् पूर्णच
न्द्रानना अनंगराजितांगी कांच
नकलसयुतिहारकुचा कम्र ।
लनयनात्सड्भाषिणी इति सं
गीतशास्त्र देशाकूपं स्त्री उ

चितं इत्यमरः ॥
देशाखी स्त्री रागिणी विशेषः ह
नुमन्मते हिंदोल रागस्य द्वितीय
रागिणी तस्याजातिः षाड्व गृ
हांशन्यासस्वरः गानसमयः वसंत
र्त्तौ पूर्वाह्नः अस्याः स्वरूपं स्वरूपा
नारीचंद्रवदनाक्रोधना कलह
प्रियारोमहर्षा निष्कोषकरवालक
रा मल्लवत् पूत्पवगुंठितवाक्र
वक्षाः वलमर्द्दिनकस्तस्यापित
शत्रुपक्षा सर्वदास्वसमीपस्यापि
त नायकाच रागमालामते त
तस्याः स्वरूपं मल्लवत् परस्परम
ल्लक्रीडायां नियुक्तास्ताक्रीडामल्ल
काष्ठेन तेषणा प्रक्षराद्युन्मीलन
भूमिलग्ननादिरूपाकलनाषम
ते वसंतरागस्य भार्या संगीतदर्प
ण मते अस्याः जातिः संपूर्णाः अ
स्याः स्वरूपं कर्पूरादपि कमनीयां
गी कमलराजितनयना हर्षयु
क्ता रसिका अतिधीरा किंचित्
संकुचिता दीर्घभुजा मल्लद्युति।
मोचिनीच इति संगीतशास्त्रं देशा
नरं क्ली समेकलेकयोर्मध्यरेखा
स्वरूप देशाख्यदेशयोरन्तरयोजनं,
इति सिद्धांतरहस्य ये उदयांतर कर्म
णा लंकायां मोदयिका ग्रहा
जाता स्ते देशांतर कर्मणा स्फुटो
दयिकाः स्युः तच्च द्विविधं पकरू
वीपरं द्वितीयं याम्यान्तरं तच्चरसं
स्कृतं यथा येनेन लंकोदय
कालिका स्ते देशांतरेण स्फुटो
दये स्युः देशांतरं प्रागपरं तथा
न्यत् याम्योत्तरं तच्चर संज्ञ मुक्तं
इति सिद्धांतशिरोमणिः ॥
देशांतर परिभाषायां वृद्धमनुः
वाचो यत्र विभिद्यंते गिरिर्वाप्य
वधायकः महानद्यंतरं यत्र तद्दे
शांतर मुच्यते देशनाम नदी भे
दान्निकटोपि भवेद्यदि तत्र देशांत
रं प्रोक्तं स्वयमेव स्वयंभुवा दश।
रात्रेण या वार्त्ता यत्र न श्रूयते
ऽथवा बृहस्पतिः देशांतरं वदंत्ये
के षष्टियोजनमायतं चत्वरिंश
द्वदंत्येके त्रिंशदेके तथैवच ॥
इत्युदाहृतत्वे श्रुति द्वय वचनोक्त
वागादियोजनादिभेदस्तामञ्जस्या
र्थमेवं व्याख्यायते त्रितय वैशिष्ट्ये
त्रिंशद्योजनाभ्यंतरेऽपि तद्वैशिष्ट्ये न
ऽपरि पक वैशिष्ट्यवत्त्वात्रिंशद्योज
नोपरि वाणी गिरि महानद्यंतरे
तत्तद्भेदाभावेपि षष्टियोजनोपरि
वैदेश्यमिति शुद्धिचिंतामणिः ॥

देशिकः पुं पथिकः इति हेम
चंद्रः गुरुः यथा देशिकोमूल
मंत्रेण इत्यागमः ॥
देशिनी स्त्री तर्जनी इति शब्दर
त्नावली ॥
देशी स्त्री रागिणी विशेषः ह
नुमंमते दीपकरागस्य भार्या
अस्याजातिः षाडवः गृहांशऋष
भस्वरः गानसमयः ग्रीष्मर्त्तौ
मध्याह्नः अस्याः स्वरूपं स्वरूपा
नारी हरिहसनाअलंकृता यौव
न मदेन कामासक्ता सतीनायक
शयनागारमागत्य निधुवन रता
च भरत मतेन मेघरागस्यरागि
णी सोमेश्वरमते वसंतरागस्य
पत्नी संगीतदर्पणमते हिंदोलरा
गस्य भार्या तस्या गान समयः या
मयुगलं तस्याः स्वरूपं निद्रायुक्त
नयनाआलस्ययुक्ता प्रियाभिमु
खी नायकस्य निद्रा भंजनार्थं म
नोमंजरतानेगायंतीरमणोत्कयार
चितवेशाभूषणगणशोभिता।
गौरांगी परिहितहरिद्वर्णशाटिका
इति संगीत शास्त्रं
देश्यं क्ली पूर्वपक्षः इति शब्दरत्ना
वली देशोद्देत्रि ॥ ॥
देस्तुः त्रि दाता उर्द्द मः इति हेमचं
द्रः रजकः इति संक्षिप्तसारोणादि
वृत्तिः ॥
देहः पुं क्ली शरीरं इत्यमरः ॥
न्यायमते पृथिव्या देहं योनिजं
जरायुजमंडजंच अयोनिजं स्वेद
जोद्भिदादिकं नारकिणां शरीर
मप्पः योनिजं जलीयं देहमयो
निजंवरुणलोके प्रसिद्धं तैजसंदे
हमयोनिजं सूर्यलोके प्रसिद्धं
वायोर्देहमयोनिजंतदेवपिशाचा
दीनां इति सिद्धांत मुक्तावली ॥
अथनरक भोग देह विवरणं
तत्र यमप्रतिसावित्रीप्रश्नः ॥
स्वदेहे भस्मसात्भूते याति लो
कांतरं नराः केन देहेनवाभोगं
भुंजतेचशुभाशुभं सुचिरं क्ले
शभोगेन कथं देहो विनश्यति
देहो वा किंविधा ब्रह्मन् तन्मे
व्याख्यातु मर्हसि यमस्योत्तरं
श्रुणु देह विवरणं कथया
मि यथा गमं पृथिवी वायु रा
काशं तेज स्तोय मिति स्फुटं
देहिनां देहबीजंच सृष्टःसृ
ष्टि विधौ परं पृथिव्यादि पं
चभूतैर्योदेहोनिर्मितो।

दैत्यारिः पुं विष्णुः इत्यमरः ॥
देवता इति मेदिनी ॥
दैत्याहोरात्रः पुं दैत्यानां दिवा ।
निशं समनुष्यमानेन वर्षैकसंख्यः
इति शाब्दार्थकल्पतरुः ॥
दैनं स्त्री दीनता दिनसंबंधिनि त्रि
दैनंदिनं त्रि दिने दिने भवं स्वार्थ
स्मेप्रतिदिनं इति निपातनसाध्यं
दैनंदिनप्रलयः पुं प्रलयविशेषः
यथा चतुर्दशेन्द्रावच्छिन्ने ब्रह्मणो
दिनमुच्यते तावती ब्रह्मणो रात्रिः
सा च ब्राह्मी निशा न्त्य कालरात्रिश्च
सात्त्वेषा वेदेषु परिकीर्तिता एवं
सप्तकल्पजीवी मार्कण्डेयो महातपाः
ब्रह्मलोकादयः सर्वलोकादयस्था
स्तत्रैव उत्थिते नैव सहसा सं
कर्षणमुखाग्निना चंद्रार्कब्रह्मपुत्रा
श्च ब्रह्मलोकं गता इन्द्र ब्रह्मरात्रेव्य
तीते तु पुनश्चाससर्ज विधिः तस्य
ब्राह्मी निशा सा च क्षुद्रप्रलय उच्य
ते देवाश्च मुनयश्चैव मन्त्रगंधर्व
राक्षसाः एवं त्रिंशद्दिवारात्रैर्ब्रह्म।
णो मासएव च वर्षं द्वादशमासैश्च ब्र
ह्मसंबंधि चैव हि एवं पंचदशाब्दे च
गते च ब्रह्मणोऽन्त्य दैनंदिनस्य प्रल
यो वेदेषु ॥

परिकीर्तितः अहोरात्रि सा प्रो
क्ता वेदविद्भिः पुरातनैः तत्र स
र्वे प्रनष्टा च चंद्रार्कादिदिगीश्व
राः आदित्या वसवो रुद्रा मनविन्द्रा
मानवादयः ऋषयो मुनयश्चैव
गंधर्वा राक्षसादयः मार्कंडेयो लो
मशश्च पेचकश्चिरजीविनः इंद्र
द्युम्नश्च जनपति श्चाकूपारश्च क
च्छपः नाडीजंघो बकश्चैव सर्वे
नष्टाश्च तत्रवै ब्रह्मलोकादयः स
र्वे लोकानामालयास्तथा ब्रह्मलो
कं ययुः सर्वे ब्रह्मलोकादयः ।
स्तथा गते दैनंदिने ब्रह्मा लो
कांश्च ससर्ज पुनः एवं शाता
युषं ध्येनं परमायुश्च ब्रह्मणः
इति ब्रह्मवैवर्ते प्रकृतिखण्डं ॥
दैनारं त्रि दीनारमितस्वर्णजात
वस्तु दीनारभवं दीनारस्येदं
वेति क्षप्रत्ययः ॥
दैनिकी स्त्री दिनभृतिः एकदि
नकर्ममूल्यं इति शब्दमाला ॥
दैन्यं स्त्री कार्पण्यं इति हेमचंद्रः
दीनता यथा याकुन्दैन्यपरीतिर्यस्य
कलहायंते मिथस्तत्र कुलानं हरिवस
स्थितो गुरवो निस्तरत्यादीवःकथं कथ्य
तो इति मदरातिमिश्रः दैपं त्रि दीपसं

1439

बन्धि दीपस्येदमिति तस्येदमित्यण्प्रत्ययः
दैर्घ्यं स्त्री दीर्घत्वं तत्पर्यायः
आयामः २ आरोहः ३ इत्यमरः
आरोहस्थाने आनाह इति भरतः
दैलीपिः पुं दिलीपराजपुत्रो रघुः
दिलीपस्यापत्यमिति इञ्प्रत्ययः
दैवं स्त्री देवतीर्थं तत्तु दक्षिणाह
स्ताङ्गुल्यग्रवर्ति इत्यमरः देवसंब
न्धिनि त्रि यथा प्रदीप्तोपि तदोय
स देहस्तस्याप्युविर्भवेत् नापि दै
वं न वा पित्र्यं यावत् पूर्णो न वत्स
रः इति श्राद्धतत्त्वं विवाहविशे
षेपुं इत्युद्वाहतत्त्वं अस्य विवरणं
उद्वाहशब्दे द्रष्टव्यं दिवि भवे त्रि दै
वं स्त्री पुं भाग्यं इत्यमरः ॥
दैवाधीनं जगत्सर्वं जन्मकर्मशुभा
शुभं संयोगाश्च वियोगाश्च न च
दैवात् परं बलं कृष्णायत्तं च त
दैवं स दैवात् परतस्ततः भजंति
सततं संतः परमात्मानमीश्वरं ।
दैवं वर्द्धयितुं शक्तः क्षयं कर्तुं स्व
लीलया न दैव वद्धस्तद्भक्तश्चा
विनाशी च निर्गुणः इति ब्रह्मवैव
र्ते गणेशखण्डं मनुरुवाच दैवे
पुरुषकारे च किं ज्यायस्तद्ब्रवीहि मे
अत्र मे संशयो देवच्छेत्तुमर्हसि

शोषतः मत्स्य उवाच स्वमेव कर्म
दैवाख्यं विद्धि देहान्तरार्जितं त
स्मात् पौरुषमेवेह श्रेष्ठमाहु
र्मनीषिणः प्रतिकूलं यथा दै
वं पौरुषेण विहन्यते मंगलाचा
रयुक्तानां नित्यमुत्थानशीलि
नां येषां पूर्वकृतं कर्म सात्त्विकं
मनुजोत्तम पौरुषेण विना तेषां
केषाञ्चिद्दृश्यते फलं कर्मणाप्रा
प्यते लोके राजसस्य तथा फलं
कृच्छ्रेण कर्मणा विद्धि तामसस्य
तथा फलं पौरुषेणाप्यते राजन्
मार्गितव्यं फलं नरैः दैवमेव
विजानंति नराः पौरुषवर्जिताः
तस्मात्त्रिकालसंयुक्तं दैवेन सफ
लं भवेत् पौरुषं दैवसंपत्त्या का
ले फलति पार्थिव दैवं पुरुषकार
श्च कालश्च मनुजोत्तम त्रयमेव
मनुष्यस्य पिंडितं स्यात् फलावहं कृ
षेर्वृष्टिसमायोगात् दृश्यन्ते फल
सिद्धयः तास्तु काले प्रदृश्यंते नैवा
काले कथंचन तस्मात् सदैव क
र्तव्यं सधर्मं पौरुषं नृभिः । ए
वं ते प्राप्नुवंतीह परलोके फ
लं ध्रुवं नालसाः प्राप्नुवन्त्य
र्थांश्च न दैवपरायणाः ॥

तस्मात् सदैवयत्नेन पौरुषे यत्न
माचरेत् त्यक्तालस्यान्दैवपरान्
मनुष्यांस्त्यान शुक्लान्शकृषान्
हि लक्ष्मीः अनविष्ययत्नाहृणेने
त्यैपेद्रतस्मात् सदोस्यानवनाहि
भाव्य इतिमत्स्यपुराणे १४५ अ
ध्यायः ॥ दैवकी स्त्री कृष्णमा
ता वसुदेवपत्नी इतिश्रीभा
गवतम् देवकीनन्दनः पुम्
श्रीकृष्णः इत्यमरः दैवकाविदा
स्त्री दैवज्ञा इतिशब्दरत्नावली
दैवपाठिते त्रि दैवतः त्रि।
गणकः इत्यमरः अस्योत्प
त्ति यथा देवब्राह्मणयनापहा
री धूमान्यनरकेभुक्त्वा शतज
न्मसूचिक नानाविधपक्षिकः।
मि हृतभार्याश्वेशहीनव्याधि
युत शावकस्वर्णकार सवर्णवणि
गश्चवनसेवि विप्रब्राह्मणगणको
भूत्वा दैवज्ञोपजीविविप्रोभव
ति ॥ अपिच लाक्षालोहादिव्या
पारी रसादिविक्रयीचयः सयाति
नागवेष्टेच नागैर्वेष्टितपवच वसे
त्सवलोमसमानाब्दे तत्रैवनागदेशि
तः ततोभवेत् सगणकोवैद्य सा।
सप्तजन्मसु गोपश्चवर्म्मकारश्च
हेगकारस्ततःशुचिः इतिब्रह्म

वैवर्त्तेप्रकृतिखण्डम् ॥
दैवज्ञा स्त्री दैवज्ञनार्थ्या प्रश्ना
दिनाशुभाशुभज्ञा लक्षणादिना
शुभाशुभनिरूपिणी तत्पर्य्या
यः विप्रश्निका २ ईक्षणिका ३
इत्यमरः दैवतः पुं क्ली देवता
इत्यमरः देवतास्तम्भहे क्ली दे
वसम्बन्धिनि त्रि दैवदीपः।
पुं चक्षुः इतित्रिकाण्डशेषः
दैवसम्बन्धि प्रदीपश्च दैवपरः
त्रि दैवनिष्ठः तत्पर्य्यायः
पङ्गविष्ठः २ इतिहेमचन्द्रः ॥
दैवप्रश्नः पुं प्राकृतशुभाशुभक
र्म्मजिज्ञासा तत्पर्य्यायः उ
पश्रुतिः २ इतित्रिकाण्डशे।
षः दैवयुगम् क्ली देवानांयु।
गं तच्चदेवमानेन द्वादशसहस्र
वर्षं मनुष्यपरिमाणेन चतुर्यु
गमाने इतिशब्दार्थकल्पतरुः
दैवलकः पुं भौतः भूतसेवकः
इतिहारावली देवलसम्बन्धि।
नि त्रि दैवलेखकः पुं मौहूर्त्तिः।
गणकः इतित्रिकाण्डशेषः ॥
दैववाणी स्त्री आकाशवाणी अ
मानुषीवाक् तत्पर्य्यायः चित्रो।
क्तिः २ छायाशकटी ३ दैवप्रश्नः ४
उपश्रुतिः ५ इतित्रिकाण्डशेषः संस्कृत

वाक्य यथा संस्कृतं नाम दैवी वा
गन्वाख्याता महर्षिभिरिति दण्डी
गीर्वाणवाणी वदनं मकंद संकीर्त्त
नंचेत्सुभयं हि लोके सुदुर्लभमिति
वोपदेवः ॥
दैवाकरिः पुं शनिः यमः यमुनायां
स्त्री यतेषामुदाहरणं यथा सम्प्रति
दैवाकरिनः पारमितान्धवि तारुण
करिनःनाप्यकोपिविशेषः स्वा।
हितराशिवशान्ननुशेषः ॥
इतिकाव्यादयकृतसंगीतकं दैवा
त्व हठात् यथा दैवादयोगवल
ने किल मानवन्याः इतिकाव्यो
दयः ॥
दैवाहोरात्रः पुं देवानामेकदि
वसः समनुष्याणांसंवत्सरः
इतिशब्दार्थकल्पतरुः ॥
दैविकः त्रि देवसंबंधी दैवेभवः
इतिव्याकरणं दैवी स्त्री देवसंबं
धिनी यथा ब्रह्मोपास्यमिति।
स्फुरन्त्यपि हृदिवाग्वर्त्तिकावा
सनाकान्तामेयमनर्काहेत्तगहना
दैवी सत्ता यातना इति प्रांतिश
तकं चिकित्साविशेषः।
यथा आसुरी मानुषी दैवी चिकि
त्साविविधामता इतिवैद्यकं ॥

दैव्यं क्ली दैवं भाग्यं इत्यमर
टीकायां भरतः ॥
दैशिकं त्रिदेशसंबंधि भवार्थे
ष्णिकप्रत्ययेन सिद्धं संबंधवि
शेषः यथा कालभावयोःस
मनीतिसूत्रे भावः सत्त्व तच्चद्वि
विधं कालिकं दैशिकंचेतिका
रकचक्रे भवानंदसिद्धान्तवागीशः
देशनिष्ठविशेषणता इतिनै
यायिकाः दैष्टिकः पुं दिष्टेन भ
वः भाग्याधीनज्ञानः कालेनजा
तः इतिव्याकरणं ॥
दैहिकं त्रि देहसंबंधि यथा भी
ष्मणाभैरवाणांमवतिस्वविहिता
दैहिकी गोपिनाञ्ची इतिकुर्द्धिका
नेत्रेःत्तरयोगः ॥
दो य छेदे इति कविकल्पद्रुमः ॥
दोः स पुं बाहुः इत्यमरः ॥
दोः शिखरे क्ली स्कन्धः इति रा
जनिर्घण्टः ॥
दोःसहस्रभृत् पुं कार्त्तवीर्य्यार्ज्ज
नः इति हेमचंद्रः वाणराजाच।
दो स ग्या पुं अर्थोपजीविकविः।
वन्तः गोपालः इति मेदिनी
दोहन कर्त्तरित्रि ॥

दोग्ध्री स्त्री गौः इति राजनिर्घ-
ण्टः ॥ दोधूयमानः त्रि पुनःपुन-
रतिशयेन वा दोलनविशिष्टः
इति व्याकरणं ॥ दोग्ध्यः पुं गोव-
त्सः । यथा देवस्य दोधकदम्ब-
तलस्य श्रीधर भावक नाम प-
देमे कण्ठ नालस्य विनिर्गम-
काले स्वल्पमपि त्वामेष्यति
योगं इति छन्दोमञ्जरी ॥
दोधकः पुं छन्दोविशेषः ।
यथा आद्यचतुर्थमहीन नित-
म्बे सप्तमके दशमे च तथान्त्ये
यत्र गुरुप्रकटस्मररोगे तत्क-
थितं तद्दोधकवृत्तम् इति श्रु-
तबोधः ॥ दोधूयमानः
त्रि पुनःपुनः रतिशयेन वा कम्प-
विशिष्टः यथा नभस्तदा संग-
भयेव साध्वी दोधूयमाना वहती
पताका इति कर्ममञ्जरी प्रलयेपि
दोधूयमानाः परमाणवस्तिष्ठ-
न्ति इति शिरोमणिः ॥ दोरकः
पुं स्त्री वीणा नेत्रबन्धनरज्जुः ॥
इति शब्दार्थकल्पतरुः ॥ दोर्गुडः
पुं अंगिनहस्तः । तत्पर्यायः कृशः
२ वाक्कण्ठः ३ इति जटाधरः ॥ दोर्ग्रहः
त्रि बलवान् तत्पर्यायः कैरातः २
ताभः ३ इति हारावली ॥ ।

भुजस्य ग्रहणं तस्य वा ख्यातदोर्दण्डः
पुम् बाहुरूपदण्डः । यथा दोर्दण्डे
न समो न वास्ति भुवने प्रत्यर्थि विश्वः
स्वयं इत्युद्भटः ॥ दोर्मध्यं क्ली
बाहुमध्यभागः वाज्ञ इति भाषा
इति शब्दार्थकल्पतरुः ॥ तत्प-
र्यायः भुजकोटरः २ खण्डिकः ३
कक्षा ४ इति हेमचन्द्रः ॥
दोलः पुं दोलनम् उत्पाते भावे
घञ् प्रत्ययेन निष्पन्नः श्रीकृष्णस्य
यात्राविशेषः अस्य प्रमाणं यथा वि-
शेषतः कलियुगे दोलोत्सवो वि-
धीयते फाल्गुने च चतुर्दश्यां म-
ष्टमे यामसंज्ञके अथवा पौर्णमा-
स्यां प्रतिपत् सन्धिसम्मितौ ह-
जयेद्विविधैः फल्गुचूर्णै-
श्च तद्विधैः सितरक्तैर्गौर पीतैः
कर्पूरादि विमिश्रितैः हरिद्रादा-
रयोगाच्च रंग रम्यैः ~~[illegible]~~
मनोहरैः अन्यैर्वा रंग रम्यैश्च
प्रीणयेत् परमेश्वरं एकाद-
श्यां समारभ्य पञ्चम्यन्तं समा-
पयेत् पञ्चहानि त्र्यहाणि ता दोलो-
त्सवो विधीयते दक्षिणाभि-
मुखं कृष्णं दोल यानं सकृ-
न्नराः दृष्ट्वापराधनिचयैर्मुक्ता

स्ते नात्र संशयः इति पाद्मे पा-
तालखण्डे अपि च जैमिनिरु-
वाच फाल्गुने मासि ऊर्व्वीन्द्र दो-
लारोहणमुत्तमं यत्र कौडति
गोविन्दो लोकानुग्रहणाय वै
प्रत्यक्षी देवदेवस्य गोविन्दाख्यान्तु
कारयेत् प्रासादं पुरतः ऊर्ध्वात्
षोडश स्तम्भमुच्छ्रितं चतुरस्रं च
वहीरं मण्डपं वेदिकान्वितं चारुच-
न्द्रतपं माल्य चामर ध्वज शोभितं
भद्रासनं वेदिकायां श्रीपर्णीका-
ष्ठनिर्म्मितं फल्गुनात् सर्वं प्रऊर्वी
तत्पञ्चाहानि त्र्यहाणि वा फाल्गु-
न्याः पूर्वतो विप्राश्चतुर्द्दश्यां नि-
शामुखे वक्त्रात् सर्वं प्रऊर्वीतदो-
लमण्डपपूर्वतः पतत् सर्वं प्रऊ-
र्वीत दोलमण्डप पूर्वतः गोविन्दानु-
गृहीतेन तु याज्ञेन तत्र कीर्तितं प्रा-
चार्य्यवरणं कृत्वा वह्निं निर्म्मथ्य तो-
ऽत्र भूमिं संस्कृत्य विधिवत् त-
ण्डाशिमहोक्षितं सपवं कार-
यित्वात वह्निं तत्र विनिक्षिपेत्
पूजयित्वा विधानेन कृष्णं वि-
धिना कृत्वेत् गोविन्दं पूजयित्वा तु
भ्रामयेत् सप्तवें विभुं तस्मिन्काले
हरिं दृष्ट्वा सर्वपापैः प्रमुच्यते यत्रा

तरन्तयेद्वह्निं यावद्यात्रा समाप्यते
प्रातर्यामे चतुर्द्दश्यां गोविन्दं प्र-
तिमां प्रभौ वासयित्वा हरे रथेषु
जयेत् पुरुषोत्तमं उपचारा वधि-
ष्ठेल प्रत्यक्षी मपि पूजयेत् ॥
ततो वस्त्रं च वसनं मालां च द्विज-
सत्तमाः अर्घ्यायां विन्यसेन्मन्त्रं
परं ज्योतिर्विभावयन् ततश्च प्र-
तिमासाक्षात् जायते पुरुषोत्त-
मः रत्नान्दोलिकयानं वै नयेत्
स्नानस्य मण्डपं नानातूर्य्यनिनादै-
श्च शंखध्वनिपुरःसरं जयशब्दैः स्त-
पास्तोत्रैः पुष्पवृष्टिभिरेव च छ-
त्र ध्वज पताकाभिश्चामरव्यजनै-
स्तथा नीरन्तरं दीपिकाभिस्तथा
ऽर्थ्यान्महोत्सवं आगच्छति तन-
दाद्देवाः पितामहपुरोगमाः इ-
न्द्रप्रभृतिगणैः सार्द्धं गोविन्दस्य म-
होत्सवं भद्रासने धिवासेन ॥
पूजयेदुपचारैः महास्नानस्य
विधिना स्नपनं तस्य कारयेत् ।
पञ्चामृतैश्च सर्वैर्वै तैः शामन्यत-
मेनवा स्नानोत्तेगंधतोयेन श्रीख-
ण्डेनाभिषेचयेत् संशोध्य भूषये-
देवं वस्त्रालंकार माल्यकैः नीरा-
जयित्वा संहत्य प्रासादं प्रविशे-
येत् सप्तकृत्वस्ततो देवं दोलमण्ड

पमानयेत् ससंस्कृतायांरथ्यायांप
ताकातोरणादिभिः अयोदेशेमंड
पंत समन्ताद्भ्रामयेत्ततः कुर्हदेशे
पुनः समस्तद्रवैर्यात्समवे या
त्रावसानेचपुनर्भ्रामयेदेकवि।
शति इयंलीलाभगवतः पिता
महस्तुविरिता राजर्षिणेंद्रद्युम्ने
नकारिता पूर्वमेव हि फल पु
ष्पावस्त्रैस्सुशाखाभिः परिकल्प्य
ते वृंदावनांतरे रम्य मत्तसार
स वारिणि कोकिलाराव मधुरे
नाना पक्षिगणाकुले नानोपशो
भारचितेकालगुरु सुधूपिते।
प्रफुल्ल केतकी षण्ड गंधामो
दि दिगंतरे मल्लिका शोकपुन्ना
गचम्पकैरुपशोभिते ततकान
नान्तर्गते मंडपे चारुतोरणे
भूषितेमाल्यवसनचामरैरुपशो
भिते रत्नवेद्यांदोलिकायां तन्म
ध्ये वासयेत् प्रभुं अनर्घरत्नच
टितकुण्डलोद्भासितश्रुतिं तथा
स्थानं यथा शोभं दिव्यालंकार
रंजनं विकचांबुजमध्यस्थं विष्णु
यात्राश्रियायुतं शंखचक्रगदा
पद्मधारिणंवनमालिनं सुप्रसन्नं
सनासाक्षपीनवक्षः स्थलोज्वलं पु
रोव्योमस्थिते देवे ब्रह्माद्ये नतक

धरैः कृतांजलि पुटै भक्तराज
यशोहैरभिष्टुतं गंधर्वैरप्सरोभि
श्च किन्नरैः सिद्धचारणैः हाहा
हूहूप्रभृतिभिः सत्वरंदिव्यगाय
ने श्रद्ध पूर्विकया तत्र गीत वा
दित्रिकादिभिः नेत्रांबुजसहास्रे
पूज्यमाने मुदान्वितैः विकिरद्भिः
सर्वदिव्यगंधचंदनजंरजः उपवे
शयास्य गोविंदं पूजयेदुपचारकैः
वल्लवीवृन्दमध्यस्थकदंबैनरुमूल
गं हावहास्यविलासैश्च क्रीडमानं
वनांतरे गोपीभिश्चैव गोपालैर्ली
लांदोलिकयानघ चिंतयित्वाज
गन्नाथंविकिरेत्कंच चूर्णकैः सक
र्पूरैः रक्तपीतसुक्षौदैस्तसमंततः
दिव्यैर्वस्त्रैर्दिव्यमाल्यैः दिव्य गंधैः सु
धूपकैः चामरान्दोलनैः गीतैः स्तु
तिभिश्च समर्चितं आन्दोलयेत्तदो
लिकास्थं समवारान् शनैः शनैः
तदायपश्यंतियेकृष्णंभक्तिस्तेषां न
संशयः ब्रह्महत्यादि पापानां पंचा
नां संक्षयो भवेत् त्रिवारं दोलयेद्दे
वं सर्वपापापनोदनं भक्तानुग्रा
हकं पुंसां भुक्तिमुक्त्येककारणं।
लीलाविचेष्टितं यस्य कृत्रिमं सह
जंयथा अंबःसंच लयकरं मलाविद्या

निवर्तकं पश्यन् द्वितीयं हरति
गोहत्याद्युपपातकं त्रिणेत्पश्ये
त् पापानि तृतीये नात्रसंशयः
दृष्ट्वा दोला स्थितं देवं सर्वपापैः
प्रमुच्यते आध्यात्मिके राधिदैव
राधिभूते विमुच्यते इमां यात्रां
कारयित्वा चक्रवर्ती भवेन्नृपः
ब्राह्मणस्तु चतुर्वेदी ज्ञानवान्जा
यते ध्रुवं इति स्कांदे उत्कलखं
डे द्विचत्वारिंशोध्यायः तस्यास्व
पवस्था यथा यदा अरुणोद
य काले पौर्णमासीलाभस्तदैव
दोलयात्रा उभयदिने अरुणोदय
काले पौर्णमासी लभे पूर्वदिने संग
वमध्याह्नकालव्यापित्वात् त्रिसं
ध्याव्यापित्वेन तिथे बलवत्वाच्च।
यदा तिथि त्वय वशादरुणोदय
काले न पौर्णमासी लाभ स्तदाक
दाचित् सहाय भावेन चतुर्दश्या
दः पतेन पूर्वदिने अरुणोदयं
विना पूर्वाह्णे पौर्णमासी लाभः प
रदिने मुहूर्तमात्र तिथि लाभः
तदा फल्गुत्सवः पूर्वदिने युग्म
वचनात् दोषादिति निरस्त उभय।
दिने कर्मयोग्य प्रशस्तकाल प्राप्त
तिथि संदेह एवयुग्मवचनप्रवृत्तेः

एवं पंचमी पर्यन्ता सुतिथिषु तन्कर
णेअनयैवदिशाव्यवस्थाज्ञेयेति इति
दोलयात्रानिर्णयः चैत्रे मासि दोलस्य
प्रमाणं गारुडे चैत्रेमासिसितेपक्षे
दक्षिणाभिमुखं हरिं दोलारूढं स
मभ्यर्च्य मासमान्दोलयेत् कलौ त
त्रिसूत्रा च पद्मपुराणे ऊर्जे रथे म
धौ दोला श्रावणे तंत पर्व च चैत्रे
मदन कारोप्रकुर्वीत जगत्पथः
विष्णुं दोला स्थितं दृष्ट्वा त्रैलोक्य
स्यान सखो भवेत् तस्मात् कार्यप्र
ते न्यास्का दोलाहे उत सर्वं कुरु प्र
पदोलोत् सवविधिः चैत्रस्य शु
क्लद्वादशं प्राप्त प्रातः कृत्य समाप्य च
नित्यपूजां विधायाथ कुर्याद्दोलो
त्सवं व्रती तदर्थं च विशेषेणैव।
विधादिकमर्पयेत् संमान्य वैष्णवां
लेश्च गीतनृत्यादि कारयेत् महा
नीराजनं कृत्वा प्रदद्यात् चतुर्दिश्
दि गंधानुलेप चूर्णानि विविधानि
विभागशः संतोष्यवैष्णवांस्तैश्च
गीतनृत्यादिभिः प्रभुं तत्राभ्य
र्ण्यः प्रमत्तः सन् दोलामारोह
येत्कुभां नीता वहि वेदिकायां
मुत्तमायां यथा विधि अभ्यर्च्या
न्दोलयेत् कृष्णं सर्वलोकाव
लोकिते एव म भ्यर्च्चयेत् यामे

यामे त्वान्दोलयन् प्रभुं महोत्
सवेन गमयेद्दिनं रात्रिंच यत्नतः
एवं जागरणं कृत्वा वैष्णवैः स
ह वैष्णवः प्रणम्य प्रार्थ्य निर्म
ञ्छ्य कृत्स्नं स्वालयमानयेत् चै
त्रेमासि सितेपक्षे तृतीयायां
रमापतिं दोलारूढं समभ्यर्च्य
मासमान्दोलयेत् कलौ यत्
फाल्गुनस्य राकायां कुर्वन्त्याफ
ल्गुनीयदा तदा दोलोत्सवः
कार्य्य स्तत्र श्रीपुरुषोत्तमे इ
ति हरिभक्तिविलासः ॥

दोला स्त्री नीलिनी उद्यानादि
षु क्रीडार्थं काष्ठादिमयो हिंदोल
कः हिंदला इति भाषा तत्पर्य्या
यः प्रेंखा २ इत्यमरः दोली ३ स्व
द्दाला ४ दोलिका ५ इतिश
ब्दरत्नावली प्रेंखः ६ इति भरत
धृत रत्नकोषः दोलिका ७ हिंदो
ला ८ इतिहारावली दोला द्वारा
भ्रमण गुणाः वात कोपनत्वं भ्र
मस्थैर्य्य बलाग्निकारित्वंच इति
राज वल्लभः ॥
अस्य विवरणं चतुर्दोल ।
शब्दे द्रष्टव्यं ॥ दोलायमानः
त्रि दोलनविशिष्टः यथा ।
दोलायमानं गोविंदं मञ्चस्थं
मधुसूदनं रथस्थं वामनं दृ
ष्ट्वा पुनर्जन्म न विद्यते इत्युत्क
लखण्डं ॥

दोलिका स्त्री हिंदोला इतिहा
रावली ॥

दोली स्त्री दोला झूली इति।
भाषा इतिशब्दरत्नावली॥

दोषः पुं दूषणं पापं इति मे
दिनी वातपित्त कफाः इति श
ब्दचंद्रिका गोवत्सः इतिशब्द
रत्नावली काव्यगुणेतरः सचर
साद्यपकर्षकः यथा मुख्यार्थ
हतिर्दोषो रसश्च मुख्यस्तदाश्रया
द्वाच्यः तत्र पददोषा यथा दुष्टं
पदं श्रुतिकटु च्युत संस्कृत म
प्रयुक्तमसमर्थं निहतार्थं मनुचि
तार्थं निरर्थक मवाचकं त्रिधाश्ली
लं संदिग्ध मप्रतीतं ग्राम्यं नेया
र्थ मथ भवेत् क्लिष्टं अविमृष्ट
विधेयांशं विरुद्धमति कृत् समा
सगतमेव वाक्यदोषा यथा
प्रतिकूल वर्ण मुपहत लुप्त
विसर्गं विसंधि हतवृत्तं न्यूना
धिककथितपदं पतत् प्रक
र्षं समाप्त पुनरात्तं ॥
अर्द्धान्तरैक वाचक मभवन्मत

योग मनभिहित वाच्य मपद
स्थ पद समासं संकीर्णं गर्भि
तं प्रसिद्धिहतं भग्न प्रक्रम म
मत परार्थंच वाक्य मेवं तथा
अर्थदोषा यथा अर्थोऽपुष्टः
कष्टो व्याहत पुनरुक्त दुष्क्रम
ग्राम्याः संदिग्धो निर्हेतुः प्र
सिद्धि विद्या विरुद्धश्च अन
वीकृतः सनियमानियम वि
शेषाविशेषपरिवृत्तः साकां
क्षोऽपदयुक्तः सहचर भिन्नः
प्रकाशित विरुद्धः विध्यनुवा
दायुक्त स्त्यक्त पुनः स्वीकृतोऽ
श्लीलः रसदोषा यथा व्यभि
चारिरसस्थायि भावानां शब्द
वाच्यता कष्ट कल्पनया व्य
क्तिरनुभाव विभावयोः प्रतिकू
लविभावादि ग्रहो दीप्तिः पुनः
पुनः अकाण्डे प्रथनच्छेदावंग।
स्याप्यतिविस्तृतिः अंगिनोऽन
नुसंधानं प्रकृतीनां विपर्य्ययः
अनंगस्याभिधानंच रसे दोषाः।
स्युरीदृशाः उक्तपदादि दोषाः स्था
न विशेषेक्कचिद्गुणा भवंति इति
काव्यप्रकाशः दोषविशेषा यथा
यतः प्रभवति क्रोधः कामो वा भरत
र्षभ शोकमोहौ विधित्सा परासु
त्वंच तद्वदलोभो मान सूर्य्या मीर्ष्या
च कुत्सासूय्याकृपाभयम् इतिशान्ति
धर्म्मः। आचमनं विना भक्षणादे
र्भावो यथा मधुपर्केच सोमे।
च ताम्बूलस्यच भक्षणे फलमूलेचे
तद्दोषं नदोषं प्राह वै मनुः ॥ इ।
तिकूर्म्मपुराणम् ॥ द्वात्रिंशत् प्र।
कारदोषा यथा यानैर्वापादुकै
र्वापि गमनं भगवद्गृहे देवोत्
सवाद्यसेवाच अप्रणामस्तदग्रतः
उच्छिष्टे चैवचाशौचे भगवद्वन्द
नादिकम् एकहस्तप्रणामस्तु त
थाचैकं प्रदक्षिणं पादप्रसारणं।
चाग्रे तथापर्य्यंकबन्धनम् शय
नं भक्षणंचापि मिथ्याभाषणमे
वच उच्चैर्भाषा मिथोजल्पो रोदना
दिचविग्रहः निग्रहानुग्रहौचैव।
स्त्रीषु च क्रूरभाषणम् कम्बला
वरणंचैव परनिन्दापरस्तुतिः
गन्धे भेगं निजस्तोत्रं देवतानिवे
दनंतथा अपराधा स्तथाविंशा
द्वात्रिंशत्परिकीर्त्तिताः इति।
पाद्मेपातालखण्डम् ॥ अन्या
न्नावसादोषेण कर्म्मदोषा हरि
हता उन्नादोमात्रदोषेण पितृ
दोषेण मूर्खिता इतिचाणक्यं।
दोषकः सं गोवत्सः इतिशब्द

रत्नावली ॥
दोषग्राही[न] त्रि दोषग्रहणकर्त्ता त
त्पर्य्यायः खलः २ पुरोभागी ३।
द्विजिह्वः ४ मत्सरी ५ इति हला
युधः विस्मृत्य सर्वदोषान् गुणा
न् गृह्णाति साधवः दोषग्राही गुण
त्यागी चालनीव हि दुर्जनः इति
प्रयोगः ॥
दोषज्ञः त्रि पंडितः इत्यमरः।
चिकित्सकः इति हेमचंद्रः।
दोषविषयकज्ञानयुक्तश्च दो।
षत्रयं क्ली वातपित्तकफाः इ
ति राजनिर्घण्टः ॥
दोषा स्त्री रात्रिः भुजः इति।
मेदिनी ॥
दोषा च नक्तं रजनौ इत्यर्थः ॥
इत्यमरः निशामुखे इति हेम ॥
चंद्रः ॥
दोषाकरः पुं चंद्रः यथा मूल।
त्रिकोण निज मंदिरगोथ पूर्णो
मित्रर्क्ष सौम्य ग्रहगोऽथ त
दीक्षितो वा यामित्र वेध विहि
तान पहत्य दोषान् दोषाक
रः सुखमनेकविधं विधत्ते
इति ज्योतिस्तत्त्वे दोषा
णामाकरश्च दोषाक्लेशी।
स्त्री वृन्तवर्त्तरिका इति राज
निर्घण्टः ॥
दोषातनः त्रि रात्रिभवः इति
व्याकरणं ॥
दोषातिलकः पुं प्रदीपः इति
त्रिकाण्डशेषः ॥
दोषास्यः पुं प्रदीपः इतिशब्द
चंद्रिका ॥
दोषिकः पुं रोगः इति शब्द
चंद्रिका ॥
दोषी[न] त्रि दोषयुक्तः अपरा
धी दोष शब्दादस्त्यर्थे इन् ॥
प्रत्ययेन निष्पन्नः ॥
दोषैकदृक्[श] त्रि दोषमात्रदर्शी
योगुणांत्यक्त्वाकेवलंदोषमेव
पश्यतिसः दोषे एकस्मिन्नेव ज्ञा
नं यस्य सः इतिभरतः तत्पर्य्यायः
पुरोभागी २ इत्यमरः ॥
दोस्यः पुं क्रीडा कौतुकः सेवा
सेवकः इति त्रिकाण्डशेषः ॥
दोःस्थितेति ॥
दोहः पुं दोहनपात्रं इति शब्द
चंद्रिका दुग्धं दोहनंचेति मुक्त
पत्रिलब्धं ॥ ॥
दोहजं क्ली दुग्धं इति शब्दा
॥ ॥ ॥ ॥

कल्पतरुः ॥
दोहडिका स्त्री छंदोविशेषः ॥
दोहा इति भाषा इतिछंदोमंज
री अस्य विवरणंछंदः शब्द स
प्रोक्षेद्रष्टव्यं ॥
दोहदं क्ली इच्छा इत्यमरः ॥
दोहदः पुं क्ली गर्भिण्यभिलाषः
साद इति भाषा तत्पर्य्यायः दौ
र्हृदं २ श्रद्धा ३ लालसा ४ इतिहे
मचंद्रः जातजः ५ इति रत्नकोषः
गर्भचिह्नं इति भरत धृतकोषांत
रं ॥ दोहदलक्षणं क्ली वयः
संधिः गर्भः इतिमेदिनी ॥
दोहदवती स्त्री अन्नपानादि
द्रव्यविशेषाभिलाषवती गर्भ
वती इतिभरतः तत्पर्य्या।
यः श्रद्धालुः २ इत्यमरः गर्भि
णीकर्त्तव्याकर्त्तव्यं यथा दिमा
गर्भ मधाधत्तकश्यपः प्राह।
तां पुनः त्वया यत्नो विधातव्या।
अस्मिन् गर्भेवरानने संवत्सर
प्रांतत्वेकमस्मिन्नेव तपोवने सं
ध्यायां नैव भोक्तव्यं गर्भिण्या वर
वर्णिनि नस्थातव्यं नगंतव्यं वृक्ष
मूलेषु सर्वदा नोपस्करेषु पवि
शेन्मुषलोलूखलादिषु ॥।
जलंच नावगाहेत शून्यागारं
च वर्जयेत् वल्मीकेषु नति
ष्ठेत न चोद्विग्न मना भवेत् ॥
विलिखेन्न नखैर्भूमिं नांगारे
ण न भस्मना न शयालुः सदा
तिष्ठेद्व्यायामंच विवर्जयेत् न
तुषांगारभस्मास्थिकपालेषु
समाविशेत् वर्जयेत् कलहं
लोके गात्रभंगंचवर्जयेत् न
मुक्तकेशा तिष्ठेत नाशुचिः
स्यात्कदाचन न शयीतोत्त
र शिरा नचापरशिराः क्वचित्
न वस्त्रहीनानोद्विग्ना नचार्द्रचरणा
सती नामंगल्यांवदेद्वाचं न च हा
स्याधिकाभवेत् कुर्य्याच्च गुरुशुश्रू
षां नित्यमंगल तत्परा सर्वौषधी
भिः कोसेनवारिणास्नानमाच
रेत् कृतरक्षासुभूषाच वास्तुपूज
नतत्परा तिष्ठेत् प्रसन्नवदना भ
र्त्तुः प्रियहितेरता दानशालात्तती
यायां पार्व्वस्नानक्रमाचरेत् इति
वृत्ता भवेन्नारी विशेषेणतुगर्भि
णी यस्तुतस्याभवेत्पुत्रः स्थिरायु
र्वृद्धिसंयुतः अन्यथागर्भपतन म
वाप्नोतिनसंशयः तस्मात्वमनया
दृष्ट्या गर्भेऽस्मिन्यत्नमाचर इति
मत्स्यपुराणम् ॥

दोहदान्विता स्त्री दोहदवती
इति हेमचंद्रः
दोहनं क्ली स्तनादुग्ध निःसा
रणं दोया इति भाषा दुहधा
तोर्भावे ल्युट् प्रत्ययेन निष्पन्नं
दोहनी स्त्री दोहनपात्रं तत्प
र्य्यायः सेचनं २ पारी ३ दोहः
४ दोहनं ५ इतिशब्दरत्नावली
दोहलः पुं दोहदः इच्छा इति
शब्दार्थकल्पतरुः ॥
दोहलवती स्त्री दोहदवती इ
ति शब्दार्थकल्पतरुः ॥
दोहली स्त्री अशोकवृक्षः इति
राजनिर्घण्टः ॥
दोह्यापनयः पुं दुग्धं इतित्रि
काण्डशेषः ॥
दोहीयान् स त्रि अतिशयदो
हकः दोहिशब्दादीयस् प्रत्यय
निष्पन्नः दोग्धं त्रिदोहनीयं दु
ग्धे दोग्धव्यं इतिव्याकरणं ॥
दौःसाधिकः पुं द्वाःस्थितः द्वा
रपालः इतित्रिकाण्डशेषः ॥
दौकूलं त्रि दुकूलेनावृत।
रथादि इत्य मरटीकायां भ
रतः दौत्यं क्ली दूत्य दूतस्य भावः
दूतस्य कर्म इत्यमर टीकायां
भरतः ॥
दौरात्म्यं क्ली दुरात्मनोभावः दु
रात्मनः कर्म दुर्निन्दित आत्मा य
त्र: धृतिः बुद्धिः स्वभावः शरीरं
वायस्य स दुरात्मा तस्य भाव क
र्मार्थे ष्यप्रत्ययः ॥
दौर्गंध्यं क्ली दुर्गन्धितधर्मः दुर्गंध
धिः दुर्गंधस्य भावः दुर्गंधस्येदं वेत्य
र्थे ष्य प्रत्ययः ॥
दौर्जन्यं क्ली दुर्जनत्वं दुर्जनस्य भा
व इदंवेत्यर्थे ष्य प्रत्ययः ॥
दौर्बल्यं क्ली दुर्बलता अल्पबलत्वं
दुर्बलस्य भाव इत्यर्थे ष्य प्रत्ययः
दौर्भागिनेयः पुं दुर्भगापुत्रः इ
तिशब्दरत्नावली तस्याः कन्या दौ
र्भागिनेयी ॥
दौर्भाग्यं क्ली दुर्भगस्य दुर्भगाया
वाभावः दुर्भगत्वं यथा भुक्त्वा
पितृगृहे नारी भुंक्ते स्वामि गृहे
यदि दौर्भाग्यं जायते तस्याः ॥
शापतिकुलदेवताः इतिज्योति
स्तत्वं दुर्भाग्यमेव दौर्भाग्यं ॥
इतिस्वार्थे ष्य प्रत्ययः ॥ ॥
दौर्मनस्यं क्ली दुर्मनसोभावः दुः
खनिबंधन चित्तावसादः इतिवेदी

1451

टीकायांनागोजीभट्टः ॥
दौर्वीणं क्ली इष्टपर्णी हवीरसः
इति मेदिनी ॥
दौर्हृदं क्ली इच्छा दोहदं इति
हेमचंद्रः दौलेयः पुं कच्छपः
इतिहेमचंद्रः ॥
दौल्मिः पुं इंद्रः इति शब्दार्थ
कल्पतरुः ॥
दौवारिकः पुं द्वाररक्षकः त
त्पर्य्यायः द्वाःस्थः २ द्वास्थि
३ दाण्डी ४ वेत्रधरः ५ इतिहला
युधः प्रतीहारः ६ प्रतिहारः ७ द
ण्डिकः ८ द्वारी ९ वेतालः १० द्वारपा
लकः ११ दौःसाधिकः १२ वर्मवृक्षः
१३ गवीटः १४ दण्डपाशकः १५ इति
शब्दरत्नावली द्वाःस्थितः १६ वेत्र
धारकः १७ वर्मवृक्षः १८ दण्डवा
सी १९ इतित्रिकाण्डशेषः तस्यल
क्षणं यथा प्रांशुः सुरूपो दक्षश्च प्रि
यवादीनचोद्धतः चित्तग्राहश्च सर्वे
षां प्रतीहारो विधीयते इति मत्स्य
पुराणं इंगिताकारतत्वज्ञो बल
वान् प्रियदर्शनः अप्रमादी सदा
दक्षः प्रतीहारः स उच्यते इति।
चाणक्यः ॥
दौष्कुलेयः त्रिदुष्कुलोद्भवः निंदित
वंशाज्जातः दुष्कुल शब्दात भवार्थे
ढेय प्रत्ययः ॥
दौष्मंति पुं दुष्मंतराजपुत्रः भरतभ
रतराजः इतित्रिकाण्डशेषः ॥
दौहित्रः पुं स्त्री दुहितुरपत्यं इति
हेमचंद्रः तत्पर्य्यायः कुतपः २।
इति शब्दरत्नावली श्रीणिश्राद्धे प
वित्राणि दौहित्रं कुतपस्तिलाः दौ
हित्रं खड्गं मित्याहुः रपत्यं दुहितुस्त
ला: कपिलायाहुतं चैव दौहित्र।
मिति चोच्यते इति मार्कण्डेय पुरा
णं पौत्र दौहित्रयो लौके विशेषो ना
स्ति कश्चन तयोर्हि माता पितरौ सं
भूतौ तस्य देहतः इति दाय भागः
दौहित्रोपि ह्यमुत्रैनं संतारयति
पौत्रवदिति मनुः ॥
द्यावापृथिव्यौ स्त्री स्वर्गपृथिव्यौ
इति हेमचंद्रः ॥
द्यावाभूम्यौ स्त्री स्वर्गपृथिव्यौ।
इति हेमचंद्रः ॥
द्यावाक्षमे स्त्री स्वर्गपृथिव्यौ इति
हेमचंद्रः द्विवचनान्तोयं ॥
द्युल अभिसर्पणे इतिकविक
ल्पद्रुमः द्यु क्ली दिनं गग
णं स्वर्गः इति विश्वः ॥
॥

द्युः पुं अग्निः इति मेदिनी ॥
द्युगः पुं पक्षी इति राजनिर्घण्टः
द्युगणः पुं अहर्गणः तस्यानय
नाह कश्चित्कल्पगतोऽर्कसमा
गणोऽथवा युगे गत मास सम
न्वितः खदहनै र्गुणित स्तिथि
संयुतः पृथगतोऽधिक मास स
माहतात् रविदिनाप्तफलाधिक
मासकैः कुदिनैः सहितो द्यु
गणो विधोः पृथगतः पतिता
वम संगुणाहिधुदिनाप्तगतावम
वर्जितः ॥ भवति भास्कर वासर
पूर्वको दिन गणोरवि मध्यम ।
सावनः अधिक मास दिन त्त
य शेषतो द्यु चटिकादिक ।
मत्र न गृह्यते इति सिद्धान्त
शिरोमणिः ॥
द्युत ई ङ. दीप्तौ इति कविकल्पद्रुमः
द्युत् पुं किरणः इति हेमचन्द्रः
द्युतिः स्त्री दीप्तिः शोभा इत्यमरः
रश्मिः इति मेदिनी ॥
द्युतिकरः पुं ध्रुवः इति भूरिप्र
योगः दीप्तिकारके त्रि द्युतितं त्रि दी
प्तिविशिष्टं द्योतितं इति मुग्धबोधव्या
करणं द्युतं क्ली लग्नात् सप्तमराशिः
इति ज्योतिस्तत्त्वं ॥

द्युनिशं क्ली अहोरात्रः इति व्याक
रणं यथा भवति किं द्युनिशं
द्युनिवासिनां इति सिद्धान्त शि
रोमणिः ॥
द्युनिवासी न् क्ली देवता स्वर्ग
वासी इति सिद्धान्त शिरोमणिः
द्युपतिः पुं सूर्य्यः इति हेमचन्द्रः
इन्द्रश्च ॥
द्युमणिः पुं सूर्य्यः अर्कवृक्षः
इत्यमरः ॥
द्युमयी स्त्री विश्वकर्मकन्या सा
सूर्य्य पत्नी इति त्रिकाण्डशेषः
द्युम्नं क्ली धनं इत्यमरः बले इ
ति मेदिनी ॥
द्युवा न् पुं सूर्य्यः इत्युणादिकोषः
द्यौः इति संक्षिप्तसारे उणादि
वृत्तिः ॥
द्युषत् द् पुं देवः इति त्रिकाण्ड
शेषः ग्रहः इति गोलाध्यायः ॥
द्यूतः पुं क्ली पाशकादिक्रिया
तत्प्राणिकरणकक्रीडा जुवा ॥
इति भाषा ॥
तत्पर्य्यायः अक्षवती कैतवं इ
पणः ४ इत्यमरः ॥ द्यूतं
समाह्वयं चैव राजा राष्ट्रान्निवर्त्त
येत् ॥

राजान्त करणावेतौ द्वौ दोषौ पृथि
वीक्षितां प्रकाशमेतत्तास्कर्य्यं य
द्देवन समाह्वयौ तयोर्नित्यं प्रती
घाते नृपतिर्यत्नवान् भवेत् ॥
द्यूतं समाह्वयं चैव यः कुर्य्यात्
कारयेत वा तान् सर्व्वान् घात
येद्राजा शूद्रांश्च द्विजलिङ्गिनः
अप्राणिभिर्यत् क्रियते तल्लोके
द्यूतमुच्यते प्राणिभिः क्रियते
यस्तु स विज्ञेयः समाह्वयः द्यूत
मेतत् पुरा कल्पे दृष्टं वैरकरं
महत् तस्माद्द्यूतं न सेवेत हास्या
र्थमपि बुद्धिमान् इति मनुः ।
कंकउवाच किं ते द्यूतेन राजेन्द्र
बहुदोषेण मानद देवने बहवो ।
दोषास्तस्मात्तत् परिवर्ज्जयेत् श्रु
तस्ते यदि वा दृष्टः पाण्डवोऽपि युधि
ष्ठिरः स राज्यं सुमहत् स्फीतं भ्रातॄंश्च
त्रिदशोपमान् द्यूते हारितवान् स
र्व्वं तस्माद्द्यूतं न रोचये इति महाभा
रते विराटपर्व्व ॥
द्यूतकरः त्रि द्यूतकर्त्ता जुयारी इति
भाषा तत्पर्य्यायः धार्त्तः २ धूर्त्तः ३ अ
क्षधूर्त्तः ४ अक्षदेवी ५ दुरोदरः ६ द्यू
तकृत् ७ कितवः ८ कलकोहलः ९
इति शब्दरत्नावली ॥

द्यूतकारः } द्यूतकारयिता सभ्य
तकारकः } त्रि सहियार इति ख्यातः
इति भरतः तत्पर्य्यायः सभिकः
२ इत्यमरः सभीकः ३ इति शब्द
रत्नावली ॥
द्यूतकृत् त्रि द्यूतकरः अक्षक्री
डकः इत्यमरः ॥
द्यूतपूर्णिमा स्त्री कोजागर पूर्णि
मा इति त्रिकाण्डशेषः ॥
द्यूतपौर्णमी स्त्री द्यूतपूर्णिमा
इति भूरिप्रयोगः ॥
द्यूतप्रतिपत् द् स्त्री कार्त्तिकशु
क्लप्रतिपत् सा च कौमुदी यथा
तेष्वर्थी कार्त्तिके तस्य शुक्लायाम
तिपत्तिथिः विख्याता महती त
त्र कौमुदी सा स्मृता बुधैः ऊ शाहे
न महीते यामुदा हर्षेव वै द्विज
यातत्तैः सर्व्वशावृत्तैः सा च वै
कौमुदी स्मृता इति पाद्मोत्तर
खण्डे अत्र तिथौ बलि दैत्यरा
जादिकार्य्यं तद्यथा वामन
पुराणे कार्त्तिक शुक्लपक्ष
मधिकृत्य बलिं प्रति भगवद्वा
क्यं वीरप्रतिपदा नाम तवभा
वी महोत्सवः अत्र त्वां नरशार्दू
ल हृष्टाः पुष्टाः स्वलंकृता पुष्प

दीप प्रदानेन पूजयिष्यंति मानवाः अ
त्र मंत्रः बलिराज नमस्तुभ्यं विरोचन
सुतप्रभो भविष्येंद्र सुराराते पूजेयं प
तिगृह्यतां ब्रह्मपुराणे तु बलिराजे
तिमंत्रस्य पूर्वं मंत्रेणानेन राजेंद्र स
मंत्री सपुरोहितः इत्यर्द्धं पश्चाद
पश्चादपि एवं पूजां नृपः कृत्वा रा
त्रौ जागरणं चरत् इत्युक्तं पुन
र्ब्रह्मपुराणे शंकरश्च पुरा द्युतं
ससर्ज सुमनोहरं कार्तिके शु
क्लपक्षेतु प्रथमेऽहनि भूपते।
जितश्च शंकर स्तत्र जयं लेभे।
च पार्वती अतोर्थाच्छंकरो दुःखी
गौरी नित्यं सुखोषिता तस्मात्
द्युतं प्रकर्त्तव्यं प्रभाते तत्र मान
वैः तस्मिन् द्युते जयो यस्य तस्य
संवत्सरः शुभः पराजयो वि
रुद्धश्च लब्धनाशकरो भवेत्
भविष्यान्तरे यो यो यादृशभा
वेन तिष्ठत्यस्यां युधिष्ठिर हर्ष
दैन्यादिना तेन तस्य वर्षं प्रया
ति हि महापुण्या तिथिरियं
बलिराज्य प्रवर्द्धिनी स्नानं।
दानं शतगुणं कार्तिके या
तिथिर्भवेत् इति तिथितत्त्वं
द्युतबीजं क्ली कपर्दकः इति त्रिकां

डोषः द्युतस्य कारणं च ॥
द्युनं क्ली लग्नात्सप्तमराशिः यथा
धीस्थानं पंचमं ज्ञेयं यामित्रं सप्तमे
स्मृतं द्युनं द्युनं तथास्तारव्यं षट्
कोणं रिपुमंदिरं इति ज्योति
स्तत्त्वं ॥
द्यै न्यक्करणे इति कविकल्पद्रुमः
द्यातः पुं प्रकाशः आतपः ॥
इत्यमरः ॥
द्योतनं क्ली दर्शनं इति हेमचंद्रः
प्रकाशने इति द्युत धातो र्भावे
ऽनट् प्रत्ययः ॥
द्योतनः पुं दीपः इत्युणादिकोषः
द्योतितं त्रि द्युतितं दीप्तं इति मुग्ध
बोधव्याकरणं ॥
द्योभूमिः पुं पक्षी इति शब्दचंद्रि
का स्वर्गपृथिव्योः स्त्री द्वित्वे ॥
द्योषत्[प] पुं देवः इति शब्दरत्नाव
ली द्यौः[गौ] स्त्री स्वर्गः आकाशं इत्यम
रः द्योत्रं क्ली ज्योतिः इति संक्षिप्त
सारे उणादिवृत्तिः ॥
द्रगडः पुं वाद्यविशेषः दगड इति
भाषा तत्पर्य्यायः प्रतिपत्तर्य्यः ॥
२ इति त्रिकाण्डशेषः ॥ द्रंगः
त्रि पुरी इति हेमचंद्रः ॥

द्रंक्षणं क्ली तोलकं इति शब्दमा
ला तत्पर्य्यायः कोलं २ वटकं ३
कर्षार्द्धं ४ इति वैद्यकपरिभाषा
द्रढिमा[न] पुं दृढता दृढस्य भा
वः इति इमन प्रत्ययेन साध्यं ॥
द्रढिष्टः त्रि दृढीयान् अयमन
योरेषां वा अतिशयेन दृढः इत्य
र्थे इष्ट प्रत्ययेन साध्यः ॥
द्रप्सं क्ली घनेतरदधि वयादइ
इति भाषा इत्यमरः अस्य रूपा
न्तराणि द्रप्सं २ द्राप्सं ३ त्रप्सं ४
इति तट्टीकायां भरतः ॥
द्रम गतौ इति कविकल्पद्रुमः
द्रवः पुं परीहासः पलायनं।
इत्यमरः रसः गतिः इति वि
श्वः वेगः इति शब्दरत्नावली
द्रवजः पुं गुडः इति राजनिर्घंटः
द्रवजातवस्तुमात्रंच ॥ द्रवणं
क्ली गमनं क्षरणं अनुतापः इति
द्रु धातो र्भावे ऽनट् प्रत्ययः ॥
द्रवत्वं क्ली द्रवस्य भावः तद्द्वि
धं यथा सांसिद्धिकं द्रवत्वं स्या
त् नैमित्तिक मुदाहृतं सांसिद्धिक
न्तु सलिले द्वितीयं क्षिति तेज
सोः परमाणौ जले नित्यमन्यतो

ऽनित्यमुच्यते नैमित्तिकं वह्नि
योगात्तपनीयघृतादिषु ॥ द्र
वत्वं स्यन्दने हेतुर्निमित्तं संग्रहे
तु तत् इति भाषापरिच्छेदः ॥
द्रवत्पत्री स्त्री शिम्बीभेदः इ
ति राजनिर्घंटः ॥
द्रवन्ती स्त्री नदी इति शब्दरत्नाव
ली मूषिकपर्णी मूषाकाणीछो
टाइति भाषा अनी इति च हिंदी भाषा
तत्पर्य्यायः शंबरी २ चित्रा ३ न्यग्रो
धी ४ शतमूलिका ५ प्रत्यक्श्रे
णी ६ वृषाचंडा ७ पत्रश्रेणी ८
आखुकर्णिका ९ मूषिककर्णी ११
प्रतिपर्णशिफा १२ सहस्रमूली १३
विक्रांता १४ अस्या गुणाः मधुरत्वं
शीतत्वं रसबंधकारित्वं ज्वरक्रिमि
नाशित्वं शूल शमनत्वं रसायनत्वं
च इति राजनिर्घंटः ॥
द्रवरसा स्त्री लाक्षा इति राजनि
र्घंटः द्रवाधारः पुं चुलुकः इति
शब्दार्थकल्पतरुः द्रवद्व्यवस्थाप
त्रंच द्रविडी स्त्री रागिणी विशेषः
इति हलायुधः द्रविणं क्ली धनं
कांचनं बलं इत्यमरमेदिनीकरौ
द्रविणनाशनः पुं शोभांजनवृक्षः

इतिशब्दरत्नावली ॥
द्रविणोदाः पुं अग्निः यथा द्
विणोवस्त मिश्रुकं यजेच द्रविणं
ततः ददातित द्रवानेव द्रविणो
दास्ततोभव इतिवाराहपुराणं ॥
द्रव्यकरणं क्ली अद्रवस्य द्रवक
रणं गलानइति भाषा इतिचित्रप्र
येन साध्यं ॥
द्रव्यं क्ली पित्तले वित्ते धृष्टि।
व्यादि विलेपने क्लीबं भेषजे
भव्ये द्रुमविकारे त्रि इति ॥
मेदिनी जतु विनयः। इति
हेमचंद्रः मद्यं यथा सुरा।
हंतपिबेद्द्रव्यं इतिकुलार्णवतं
त्रे ॥ न्यायमते तत्त्व विशे।..
यथा क्षितिरप् तेजो मरुद्व्योम
कालो दिग्देहिनो मनः तेषां
साधर्म्यादि यथा क्षित्यादी।
नांनवानां तद्द्रव्यत्व गुण योगि
ता क्षितिर्जलं तथा तेजः पव
नो मन एवच परापरत्व मूर्त्तत्व
क्रियावेगाश्रया अमी कालखा
त्मदिशां सर्वगतत्वं परमं महत्
क्षित्यादि पंचभूतानि चत्वारि स्प
र्शवंतिहि द्रव्यारंभश्चतुर्षुस्याद
थाकाश शरीरिणां अप्राप्यह
न्निः क्षणिको विशेषगुणइष्यते
रूपद्रवत्वप्रत्यक्षयोगिस्यात् प्र
थमंत्रिकं गुरुणीद्वेरसवतीद्वयो
नैमित्तिकोद्रवः आत्मानो भूतव
र्गाश्चविशेषगुणयोगिनः इतिभा
षापरिच्छेदः ॥ द्रव्यहस्तभक्षणा
दि दोषादोषोयथा उच्चावचात्र
पानेषु द्रव्यहस्तो भवेन्नरः ॥
भूमौ निःक्षिप्य तद्द्रव्य माचम्या
भ्युक्षयेत्ततः तैजसं वै समादा
य यद्युच्छिष्टो भवेद्द्विजः भूमौ
निःक्षिप्य तद्द्रव्य माचम्याभ्युक्ष
येत्ततः यद्यद्द्रव्यंसमादायभवे
उच्छेषणान्वितः अनिधायैवतद्द्र
व्यमाचान्तःशुचितामियात् वस्त्रा
दिषुविकल्पःस्यात्तत् संस्पृष्ट्वाचाच
मेदिह अरण्येऽनुदकेरात्रौचौरव्या
घ्राकुलेपथि कृत्वा मूत्रं पुरीषंवा
द्रव्यहस्तो न दुष्यति इति कूर्म्म
पुराणं ॥
द्रा ल स्वप्ने पलायने इतिकवि
कल्पद्रुमः द्राक् अव्य द्रुतं शीघ्रं
इत्यमरः द्राख ऋ शोषे अलम
र्थे इतिकविकल्पद्रुमः ॥

द्राघ ऋ ङ श्रमे आयामे शक्तौ
इतिकविकल्पद्रुमः ॥
द्राघिमा न् पुं दीर्घत्वं दीर्घस्यभा
व इत्यर्थे इमन् प्रत्यये द्राघादेशेन
सिद्धः इति व्याकरणं भूगोलस्य
दीर्घता इत्याधुनिक ज्योतिषिकाः
द्राघिष्ठः त्रि अतिदीर्घः इत्यमरः
द्राड ऋ ङ विभेदे इति कवि क
ल्पद्रुमः ॥
द्राणः त्रि सुप्तः पलायितः इति
द्राधातोः कर्त्तरिक्तप्रत्ययेननिष्पन्नः
द्रापः पुं पंकः आकाशः कपर्दी
मूर्खः इतिशब्दार्थकल्पतरुः
द्रामिलः पुं चाणक्यमुनिः इति
हेमचंद्रः ॥
द्रावः पुं गमने स्रवणे अनुतापः
इति द्रुधातोर्भावेघञ्प्रत्ययः ॥
द्रावकं क्ली सिक्थकं इतिराज
निर्घण्टः स्त्रीहृद्रोगस्य ऊषधवि
शेषः अस्यविवरणं महाद्राव।
कशब्दे द्रष्टव्यं ॥
द्रावकः पुं प्रस्तरभेदः विद
ग्धः ॥ द्रावकः पुं प्रस्तरभे
दः विदग्धः मोषकः इतिमे
दिनी शिङ्गः इतिशब्दमाला
रसभेदः इति ॥ ॥
शब्दरत्नावली हृदयग्राही द्रव
कारकः इतिधरणिः ॥
द्रावककंदः पुं तैलकंदः इति
राजनिर्घण्टः ॥
द्रावकरं क्ली सेतटंकणं इति
राजनिर्घण्टः ॥
द्रावणं क्ली कतकफलं निर्मली
इतिभाषा इतिरत्नमाला विद्राव
णंच द्राविका स्त्री लाला इतिश
ब्दरत्नावली द्राविडः त्रि देशवि
शेषजातः संख्याभेदः वेधमुख्यः
इतिमेदिनी कर्चूरः इतिराजनिर्घ
ण्टः पंचद्राविडाः यथा द्राविडः१
कर्णाटः२ गुर्जराटः३ महाराष्ट्रः ४
तैलङ्गः५ कार्णाटाश्चैव तैलङ्गा
गुर्जरा राष्ट्रवासिनः आन्ध्राश्चद्रा
विडाः पंचविंध्यदक्षिणवासिनः
इतिस्कंदपुराणं ॥
द्राविडकं क्ली विड्लवणं इति
राजनिर्घण्टः ॥
द्राविडकः पुं वेधमुख्यकः जिं
अच षष्ठी इतिभाषा इत्यमरः ॥
द्राविडकः पुं द्राविडकः इतिश
ब्दरत्नावली ॥
द्राविडी स्त्री एला इतिराजनिर्घण्टः
द्राव्यं त्रि श्रवणगामनीयं श्रवण

दारणीयं अवश्यपाकुनयनीयं ।
इति द्रु धातो रवश्यमर्थार्थेऽण
प्रत्ययः ॥
द्राह स ऊ जागरे निःक्षेपे इति
कविकल्पद्रुमः ॥
द्राव ई काङ्क्षे घोरकृते इति
कविकल्पद्रुमः ॥
द्राक्षा स्त्री फलविशेषः दाख इ
ति किशमिश इति च भाषा तत्प
र्य्यायः मृद्वीका १ गोस्तनी २ स्वा
द्वी ४ मधुरसा ५ इत्यमरः चारुफ
ला ६ कृष्णा ७ प्रियाला ८ तापस
प्रिया ९ गुच्छफला १० रसाला ११ अ
मृतफला १२ अस्या गुणाः अति म
धुरत्वं अम्लत्वं शीतत्व पित्तार्त्ति दाह
मूत्रदोष नाशित्वं रुच्यत्वं वृष्यत्वं
सन्तर्पणत्वं च इति राजनिर्घण्टः
स्निग्धत्वं शीतवलकारित्वं हृ
द्यत्वं तृष्णा वायु रक्त पित्त तत
दीण स्कंतो गतो इतिकविकल्प
द्रुमः ता नाशित्वं च इतिराजवल्लभः
द्रुस्तुतो गतो इतिकविकल्पद्रुमः
द्रुन र अनुतापे इतिकविकल्पद्रुमः
द्रुः पुं वृक्षः इत्यमरः गतौ स्त्री इति
शब्दरत्नावली द्रुकिलिमं क्ली
देवदारुवृक्षः इत्यमरः ॥ ।

द्रुघणः पुं मुद्गरः इत्यमरः मुद्ग
दारादि मुद्गराकार लोहमयास्त्र
भेदः इतिभरतः ब्रह्मा कुठारः
इतिमेदिनी भूमिचम्पकः इति
शब्दचन्द्रिका दन्त्यनान्तोपि ॥
द्रुड मज्जने इतिकविकल्पद्रुमः
द्रुड शि मज्जने इतिकविकल्पद्रुमः
द्रुण श ऊस्कीकरणे गतौ वधे
इतिकविकल्पद्रुमः ॥
द्रुणं क्ली धनुः खड्गः इतिहेमचन्द्रः
द्रुणः पुं वृश्चिकः भृङ्गः इति हे
मचन्द्रः पिशुनः इतिशब्दमाला
द्रुणसः त्रि दीर्घनासिकायुक्तः इति
संक्षिप्तसारव्याकरणं ॥
द्रुणहः पुं खड्गपिधानं इति ॥
हारावली ॥
द्रुणा स्त्री ज्या इतिहेमचन्द्रः ॥
द्रुणिः स्त्री द्रोणी इत्यमरटीकायां
भरतः ॥
द्रुणी स्त्री कर्णजलौकाः कच्छ
पी इतिलिङ्गादि संग्रहे अमरभ
रतौ काष्ठाम्बुवाहिनी इतिद्राणी
शब्द टीकायां भरतः ॥
द्रुतं त्रि जातद्रवीभाववहनसवर्ण
दि तत्पर्य्यायः अवदीर्णं १ वि
लीनं २ विद्रुतं ३ इत्यमरः शीघ्रं

द्राविणं इति मेदिनी ॥
द्रुतं क्ली नृत्यविषयकशीघ्र गम
नतत्पर्य्यायः ओघः २ इत्यमरः
शीघ्रलयः इतिमधुः नृत्यगीता
दौ द्रवन्ति गच्छन्ति समुदाय गति
प्रदर्शनार्थ्यकराद्यो ऽत्र इति भ
रतः सांजे द्रुतामध्ययने वृत्तिं प्र
योगार्थेन मध्यमां शिष्याणामु
पदेशार्थे विलम्बितां समाचरेत् इ
ति वेदव्यवस्था ॥
द्रुतः पुं पलायितः द्रुमः इति
धरणिः ॥
द्रुनखः पुं कण्टकं इतित्रिकाण्ड
शेषः ॥
द्रुमः पुं वृक्षः इत्यमरः पारि
जातः कुबेरः इतिमेदिनी ॥
द्रुमनखः पुं कण्टकं इतिहाराव
ली द्रुमव्याधिः पुं लाक्षा इति ।
राजनिर्घण्टः ॥
द्रुमरः पुं कण्टकं इतिहारावली
द्रुमशीर्षं क्ली ऊहिमभेदः यथा
कपिशीर्षं द्रुमशीर्षं तथा चाखो
टशीर्षकं इति ऊहिमभेदाः स्युः
प्रासादिके समुदाहृताः इति श
ब्दरत्नावली ॥
द्रुमश्रेष्ठः पुं तालवृक्षः इतिशब्दार्थ

कल्पतरुः वृक्षश्रेष्ठश्च ॥
द्रुमामयः पुं लाक्षा इत्यमरः ॥
द्रुमारिः पुं हस्ती इतिराजनिर्घण्टः
द्रुमाश्रयः पुं सरटः इतिराजनि
र्घण्टः वृक्षाश्रितमात्रे त्रि ॥
द्रुमेश्वरः पुं तालवृक्षः इति श
शब्दार्थकल्पतरुः ॥ चन्द्रः इ
तिहरिवंशः ॥
द्रुमोत्पलः पुं कर्णिकारवृक्षः
इत्यमरः ॥
द्रुवयं क्ली परिमाणं इत्यमरः ॥
द्रुसल्लकः पुं पियालवृक्षः इति
शब्दरत्नावली ॥
द्रुह य ऊ ल जिघांसे अनिष्ट चिं
तने इति यावत् इतिकविकल्प
द्रुमः द्रुहः पुं पुत्रः इति शब्दार्थ
कल्पतरुः ॥
द्रुहणः पुं ब्रह्मा इतिभरतद्विरू
पकोषः ॥
द्रुहिणः पुं ब्रह्मा इत्यमरः ॥
द्रुही स्त्री दुहिता इति शब्दार्थ
कल्पतरुः ॥
द्रु न अ ग वधे गतौ इतिक
विकल्पद्रुमः ॥
द्रुः पुं स्वर्णं इतिसिद्धान्तकौमु
द्यामुणादिवृत्तिः ॥

द्रुघणः पुं द्रुघणः इतिभरतद्विरूप
कोषः संक्षिप्तसारश्च ॥
द्रुणः पुं द्रुणः वृश्चिकः इतिश
ब्दार्थकल्पतरुः ॥
द्रेक ऋ ङ. स्वनोत्साहे इतिकवि
कल्पद्रुमः ॥
द्रेक्कः } लग्नतृतीयभागैकभागः
द्रेक्काणः } पुं यथा स्व पंचनवमा
नां ये राशीनामधिपा ग्रहाः तेद्रेक्का
णाधिपा ज्ञेयो द्रेक्काणा स्वय एव
हि इतिज्योतिस्तत्वं ॥
द्रै · स्वप्ने इति कविकल्पद्रुमः ॥
द्रोणः पुं क्ली आढकपरिमाणं
आढकचतुष्टयं इतिशब्दरत्नाव
ली ३२ शेर इति लौकिक मानं
तत्पर्यायः घटः २ कलसः ३
उन्मानं ४ लल्वणः ५ अर्म्मणः ६
इतिवैद्यकपरिभाषा द्रोणस्तथा
र्म्मः खलुषोडशांशः इतिलीला
वती द्रोणः पुं द्रोणाचार्य्यः दग्ध
काकः इतिमेदिनी वृश्चिकः इ
तिराजनिर्घण्टः चतुःशतधनुः
परिमित जलाशयः यथा शते
नधनुर्भिः पुष्करिणी त्रिभिः श
तैर्दीर्घिका चतुर्भिः द्रोणः पंचभि
स्तडागः द्रोणाद्दशगुणा वापीइति

जलाशय तत्वं मेघनायकः यथा
त्रियुते शाकवर्षे तु चतुर्भिः शेषि
तः क्रमात् आवर्त्तो विद्धि संवर्त्तं
पुष्करं द्रोणमेव च आवर्त्तो निर्जलो
मेघः संवर्त्तश्च बहूदकः पुष्करो
दुष्करजलो द्रोणः शस्यप्रपूरकः
इति ज्योतिस्तत्वं श्वेतवर्ण लट्टपु
ष्प वृक्षविशेषः घलघसिया इति
हलकसिया इति च भाषा यथा
ब्रह्म विष्णु शिवादीनां द्रोणपुष्पं
सदा प्रियं तत्ते दुर्गे प्रयच्छामि ।
पवित्रान्ने सुरेश्वरि इति स्मार्त्त कृ
तदुर्गोत्सवे प्रयोगः ॥
द्रोणकाकः पुं वनकाकः दाँड़का
क इतिभाषा तत्पर्यायः काको
लः २ इत्यमरः द्रोणः ३ अरण्य
वायसः ४ वनवासी ५ महाप्राणः ६
क्रूरसावी ७ पलप्रियः ८ इति रा
जनिर्घण्टः ॥ काकलः ९ इति
शब्दरत्नावली ॥
द्रोणगंधिका स्त्री रास्ना इति ।
जटाधरः ॥
द्रोणघा स्त्री द्रोणदुघा इतिशब्द
चंद्रिका ॥
द्रोणदुग्धा स्त्री द्रोणक्षीरा इति
हेमचंद्रः ॥

द्रोणदुघा स्त्री द्रोणपरिमितदुग्ध
दात्री गवी तत्पर्यायः द्रोणक्षीरा
२ इत्यमरः द्रोणमाना ३ द्रोणघा ४
पयस्विनी ५ इतिशब्दचंद्रिका ॥
द्रोणदुग्धा ६ इतिहेमचंद्रः ॥
द्रोणपुष्पी स्त्री क्षुद्रक्षुपविशेषः
गूमा इतिख्याता तत्पर्यायः स्व
ल्पपत्रा २ कुम्भयोनिः ३ कुरुम्बि
का ४ चित्रक्षुपः ५ कुम्भा ६ स
पुष्पा ७ चित्रपत्रिका ८ इतिराजनि
र्घण्टः द्रोणा ९ फलेपुष्पा १० इति
भावप्रकाशः अस्या गुणाः कटु
त्वं उष्णत्वं रुच्यत्वं वात कफाग्नि
मान्द्य पित्तवात नाशित्वंच इति ।
राजनिर्घण्टः गुरुत्वं स्वादुत्वं ।
रूक्षत्वं वातपित्त कारित्वं सत्ता
वलवणत्वं स्वादुपाकित्वं भेद
कत्वं आम कामला शोथ त
मकश्वास जन्तु नाशित्वंच इति
भावप्रकाशः गोशीर्षकवृक्षः
घलघसिया इति भाषा इतिरत्न
माला अस्य गुणः कफार्शः ।
कामलाकृमिशोथनाशित्वं इ
तिराजवल्लभः ॥
द्रोणमाना स्त्री द्रोणदुघा इति
शब्दचंद्रिका ॥

द्रोणमुखं क्ली चतुःशतग्राममध्येम
नोहरग्रामः इतिहारावली ॥
द्रोणम्पचः त्रि द्रोणपरिमितवस्तु
पाककर्त्ता इतिमुग्धबोधव्याकरणं
द्रोणभस्त्री द्रोणपुष्पी इतिभाव
प्रकाशः ॥
द्रोणाचार्य्यः पुं भरद्वाजपुत्रः सः
अश्वत्थामपिता कृपीपतिः पाण्ड
वानामस्त्रशिक्षागुरुश्च तत्पर्या
यः द्रोणः २ गुरुः ३ आचार्य्यः ४
कीर्त्तिभाक् ५ भारद्वाजः ६ कुम्भ
योनिः ७ द्रोणाचार्य्यकः ८ इति
शब्दरत्नावली ॥
द्रोणिः स्त्री द्रोणी इत्यमरटीका
याभरतः
द्रोणिका स्त्री नीलीवृक्षः इतिश
ब्दरत्नावली ॥
द्रोणी स्त्री देशविशेषः काष्ठाम्बु
वाहिनी गवादनी इतिमेदिनी ॥
नीलीवृक्षः इतिशब्दरत्नावली
शैलभेदः शैलयोः संधिः इति
हेमचंद्रः इंद्रचिर्भिटी द्रोणील
वणं इति राजनिर्घण्टः नदीवि
शेषः इत्युणादिकोषः द्विसर्पप
रिमाणं १२८ सेर इतिभाषा ॥
तत्पर्यायः वाहः २ गोणी ३ ।

इति वैद्यकपरिभाषा ॥
द्रोणीदलः पुं केतकीवृक्ष इति
हारावली ॥
द्रोणीमुखं क्ली द्रोणमुखं इति
भूरिप्रयोगः ॥
द्रोणीलवणं क्ली उपकर्णाटदे
शप्रसिद्ध लवण विशेषः तत्प
र्य्यायः द्रोणेयं २ वार्द्धेयं ३ द्रोणीजं
४ वारिजं ५ वार्द्धिभवं ६ द्रोणी ७
त्रिकूटलवणं ८ अस्य गुणाः पा
के नात्युष्णत्वं अविदाहित्वं भेद
नत्वं स्निग्धत्वं शूलनाशित्वं अ
ल्पपित्तलत्वंच इति राजनिर्घण्टः
द्रोहः पुं जिघांसा अनिष्टचिंतनं
तत्पर्य्यायः अपक्रिया २ इति हे
मचंद्रः देवद्रोहाद्गुरोर्द्रोहः को
टिकोटि गुणाधिकः इति कू
र्म्मपुराणं ॥
द्रोहचिंतनं क्ली परानिष्टचिन्ता
तत्पर्य्यायः व्यापादः २ इत्यमरः
द्रोहाटः पुं गाथाप्रभेदः मृग
लुब्धकः वैडालव्रतिकः ॥
इति मेदिनी ॥
द्रोही न् पुं द्रोहकः परानिष्ट
चिन्तकः यथा मित्रद्रोही ।
कृतघ्नश्च ये च ॥ ॥

विश्वासघातकाः तेनरा नरकेषां
न्ति यावच्चंद्र दिवाकरौ इति म
भिषिरोपाख्याने ॥
द्रौणायनः पुं अश्वत्थामा इति त्रि
काण्डशेषः ॥
द्रौणिः पुं अश्वत्थामा इति शब्द
रत्नावली ॥
द्रौणिकः त्रि द्रोणपरिमितबीज
वपनयोग्यक्षेत्रे इत्यमरः ॥
द्रौपदी स्त्री द्रुपदराजकन्या त
त्पर्य्यायः पांचाली २ कृष्णा ३
सैरिंध्री ४ नित्ययौवना ५ वेदि
जा ६ याज्ञसेनी ७ इति हेमचंद्रः
अस्याः पंचस्वामि कारणं यथा
वह्निरुवाच शृणु राम महाभाग
सीता संगोपनं कुरु समाहाथ्य
न्तरेचैव रावणो दुष्ट राक्षसः
दुर्निवार्य्यः प्राक्तनेन जानकींच
हरिष्यति रामउवाच सीतांगृ
हीत्वा त्वं गच्छ छायात्वेव तिष्ठ
तु कलत्र वर्जनं कर्म सर्वेषांच
जुगुप्सितं सीतां गृहीत्वा प्रययौ
हुतंतीच कृताशनः सीतायाः
सदृशी छाया तस्थौ श्रीराम सन्नि
धौ सा च छाया हृता पूर्वं रावणेन
वलीयसा समुद्धार तां रामो ॥

निहत्य तं सवान्धवं वह्नौ परीक्षा
कालेच छाया वह्नौ विवेश ह ।
अग्निश्छायां च संरक्ष्य ददौ रामाय
जानकीं साच छाया तप श्चके
नारायण सरोवरे तप श्चकार
दिव्यंच शत वर्षंच शूलिनः वरं
वृणुष्व भद्रं त्व मुवाच शंकरश्च
तां उवाच सा शिवं अथ भर्तृ दुःखे
न दुःखिता पतिन्देहि पंचधा सा
वरं वव्रे त्रिलोचनं सर्व संपत्
प्रदस्तुष्टः तस्यै शम्भुर्वरं ददौ ॥
महादेव उवाच साध्वित्वं पंचधा
ब्रूहि पतिंदेहीति व्याकुला पं
चेंद्राश्च हरेरंशा भविष्यंति प्रि
या त्वत्व तेच सर्वेच पंचेंद्राश्चा
धुना पंचपाण्डवाः साच छाया ।
द्रौपदी च यत्तकुण्ड समुद्भवा कृ
तेयुगे वेदवती त्रेतायां जनका
त्मजा द्वापरे द्रौपदी छाया तेन ।
कृष्णा त्रिहायणी वेदवती कृष्ण
भक्ता च तेन कृष्णा प्रकीर्तिता स्व
र्गलक्ष्मीमहेंद्राणां साच पश्चाद्भवि
ष्यति राजा ददौ फाल्गुनाय कन्या
यास्त्वस्वयंवरे पणबद्धमानरं वीरो
वस्त्वप्राप्तमयाधुना तमुवाचस्वयं
माता गृहाणभ्रातृभिः सह शंभोर्वरे
ण

पूर्वंच पराक्रमात्तराज्ञया द्रौपद्याः
स्वामिनस्तेन हेतुना पंच पांडु
वाः चतुर्द्दशानां मिंद्राणां पं
चेंद्राः पंचपाण्डवाः इति ब्रह्म ।
वैवर्त्ते श्रीकृष्णजन्मखण्डे पंचद
शाधिकशततमोध्यायः द्वंद्वं क्ली मिथुने इति शब्दरत्ना
वली
द्वंद्वं क्ली रहस्यं कलहः मिथुनं
युग्मं इति मेदिनी ॥
द्वंद्वः पुं रोगविशेषः समासभे
दः इति शब्दरत्नावली सतभि
न्नार्थानां पदानां समासः [illegible] वो
पदेवेनास्य च संज्ञा कृता स इत
रेतर योग समाहार भेदेन द्वि
धा भवति इतरेतर द्वंद्वो यथा ॥
हरिश्च हरश्च हरिहरौ अत्र प्रत्ये
कपदप्राधान्यात् द्वित्ववत्त्वं ।
शेषशब्द लिंगतापित्वेच भवति
समाहारद्वंद्वो यथा वाक्च त्वक्
च द्वयोः समाहारः वाक्त्वचं अ
त्र समाहारस्यैकत्वादेकवचनं क्ली
बलिंगत्वंच भवति इति मुग्धबोधं
द्वंद्वचरः पुं चक्रवाकः इति हेम
चंद्रः ॥
द्वंद्वचारी न् पुं चक्रवाकः इति
त्रिकाण्डशेषः ॥

द्वंद्वजः पुं द्विदोषजरोगः इति
निदाने कलहाज्ञातश्च ॥
द्वयं स्त्री द्व्यात्मकं ३६ इतिभाषा
तत्पर्य्यायः उभौ २ द्वौ ३ युगलं
४ द्वितयं ५ युगं ६ द्वैतं ७ यमं ८
द्वंद्वं ९ युग्मं १० यमलं ११ याम
लं १२ इतिहेमचंद्रः ॥
द्वयाग्निः पुं वृक्षभेदः रांचिता
इतिभाषा तत्पर्य्यायः पाठी २
कृस्ताग्निः ३ इतिशब्दचंद्रिका ।
द्वयातिगः त्रि रजस्तमोगुणद्व
यः सत्वगुणयुक्तः इत्यमरः
द्वाः २ स्त्री द्वारं इत्यमरः उपायः
यथा ज्ञानद्वाराभवेन्मुक्तिरिति
ज्ञानशास्त्रं ॥
द्वाःस्थः पुं द्वारपालः इतिशब्द
रत्नावली नंदिकेश्वरः इति भू
रिप्रयोगः ॥
द्वाःस्थितः त्रि द्वारपालः इत्यम
रकोषशब्दरत्नावल्यौ ॥
द्वाःस्थितदर्शकः त्रि द्वारपालः
इत्यमरटीकायांभरतः ॥
द्वाःस्थितदर्शी न त्रि द्वारपालः
इतिभरतधृतरभसः रमाना ।
यश्च द्वाचत्वारिंशत् स्त्री ।
द्वि चत्वारिंशत् ॥ ॥

४२ वेयालिस इतिभाषा इति
व्याकरणं ॥
द्वात्रिंशत् स्त्री द्व्यधिकत्रिंशत् सं
ख्या तत्संख्येयश्च ३२ वत्तिस इ
तिभाषा यथा द्वात्रिंशत्प्रसवे
नार्थ्याश्चत्रिंशत्क्रमेत्रणामिता
दिश्योतिस्तवं ॥
द्वात्रिंशदक्षरी न पुं ग्रंथः इति
त्रिकांडशेषः ॥
द्वात्रिंशल्लक्षणोपेतः पुं महापुरु
षः इतिशब्दार्थकल्पतरुः तल्ल
क्षणानि यथा रागः सप्तसु हस्त
षट्स्वपिशिखो रंगेष्वलं तेगता
विस्तारस्त्रिषु खर्वता त्रिषु तथा
गंभीरताचत्रिषु दैर्घ्यं पंचसु किं
च पंचसमत्वेसंप्रेस्यतेसूक्ष्मताद्वा
त्रिंशद्वर लक्षणः कथमसौ गोपे
षु संभाव्यते इतिश्रीहरिभक्तिर
सामृतसिंधुः रागइतिश्रीमद्व्रजे
श्वरं प्रति कस्यचित् सवयसो ।
गोपस्यवाक्यमिदं सप्तसु नेत्रांत
पाद कर नख तालुधरोष्ठ जि
ह्वान्तेषु षट्सु वक्षः स्कंध
नखनासिका कटिमुखेषु त्रि
षु कटिललाटवक्षःसु केचित्
कटिस्थानेशिरः पठंति ॥

पुनस्त्रिषु ग्रीवा जंघा मेहनेषु पु
नस्त्रिषु नाभि स्वर सत्वेषु पंचसु ना
साभुज नेत्र हनु जानुषु पुनः पंच
सु त्वक् केश रोम दंताङ्गुलिप
र्वसु नैव महापुरुषलक्षणेसा
मुद्रकग्रन्थ प्रसिद्धैः द्वात्रिंशद्वरा ।
णितलक्षणेभ्योऽन्येभ्योपिश्रे
ष्ठानि लक्षणानि यस्य सः गोपे
षु कथमिति भगवदवतारादिषु
ष्वेतादृशत्वाश्रवणादितिभावः
इतिश्रीजीव गोस्वामि विरचिता
दुर्गमसंगमनीनाम्नी टीका ॥
द्वादश न त्रि द्व्यधिकादश १२
वार इति भाषा द्वादशसंख्यात
त्संख्यायाश्च अयनित्यबहुवच
नान्तः त्रिलिंगे समान रूपः इ
तिव्याकरणं द्वादशवाचकानि
यथा सूर्य्यः १ मासः २ राशिः ३ सं
क्रांतिः ४ गुहबाहुः ५ सात्विकोष्टः
६ गुहनेत्रं ७ राजमंडलं ८ इतिक
विकल्पलता ॥
द्वादशः त्रि द्वादशानां पूरणः वा
रासि इत्यादिभाषा इतिव्याकरणं
द्वादशकरः पुं बृहस्पतिः इति
त्रिकाण्डशेषः कार्त्तिकेयश्च ॥

द्वादशपत्रकं स्त्री योगविशेषः य
था पितामहोः पितःपुत्रं साध्यं स
द्वितयेरते सनत्कुमारं प्रोवाच
योगद्वादशपत्रकं शिखास्य
तु ओंकारं मेषोः स्यशिरसिस्थितः
मासो वैशाख नामाच प्रथमं
पत्रकं स्मृतं नकारः शिरसि ।
प्रोक्तो वृषोः स्यशिरसि स्थितः
ज्येष्ठ मासश्च तत् पत्रं द्विती
यं परिकीर्त्तितं मोकारोभुज
योर्युग्मं मिथुनं तत्र संस्थितः ॥
मास आषाढनामा च तृतीयंप
त्रकं स्मृतं भकारं नेत्रयुगलं क
र्कटस्तत्र संस्थितः मासः श्रावण
इत्युक्तश्चतुर्थं पत्रकं स्मृतं गका
रंहृदयंप्रोक्तं सिंहोवसतितत्रचे
मासो भाद्रस्तथा प्रोक्तः पंचमं
पत्रकं स्मृतं वकारंकवचंविद्यात्
कन्यातत्रप्रतिष्ठिता मासश्चाश्व
युजो नाम षष्ठंतत् पत्रकंस्मृतं
तेकारमंत्रग्रामंच तुला राशि
कृताश्रयः मासश्च कार्त्तिकोनाम
सप्तमं पत्रकं स्मृतं वाकारंनाभि
संयुक्तं स्थितस्तत्रचवृश्चिकः मा
सोमार्गशिरोनामतदष्टकंपत्रकं
स्मृतं सुकारं जघने प्रोक्तं ॥

तत्रस्यञ्च पत्रर्धरः प्रुष्येति गदि
तो मासो नवमं परिकीर्त्तितं ॥
देकारश्चोरु युगले मकरोप्यत्र
संस्थितः माघोनिगदितो मासः
पत्रकं दशमं स्मृतं वाकारो।
जानुयुगलेऽभूत्तत्रापिसंस्थितः
पत्रकं फाल्गुनं प्रोक्तं तदेका
दशं मतमं पादौ यकारो मी
नोह्नि सचैत्रेवसतेमुने इदंतु।
द्वादशंप्रोक्तंपत्रंवैकेशवस्यहि
द्वादशार तथा चक्रं यत्नान्निदि
भुजंतथा त्रिव्यूहनेक मूर्त्तिश्च
तथोक्तः परमेश्वरः एतत्तेवाक्तं
देवस्यरूपंद्वादशपत्रकं यस्मिन्
ज्ञातेमुनिश्रेष्ठन भूयो मरणं भ
वेत् इतिवामनपुराणेऽशपंचा
शत्तमो ऽध्यायः ॥
द्वादशलोचनः पुं कार्त्तिकेयः
इतित्रिकाण्डशेषः ॥
द्वादशांशुः पुं बृहस्पतिः इति
भूरिप्रयोगः ॥
द्वादशात्मः पुं बुद्धः इतित्रिका
ण्डशेषः ॥
द्वादशाङ्गुलः पुं विडस्तिः इत्य
मरः द्वादशात्मा सं पुं सूर्यः अर्कवृ
क्षः
इत्यमरः ॥
द्वादशायुः सं पुं कुक्कुरः इतिश
ब्दमाला ॥
द्वादशार्च्चिः सं पुं बृहस्पतिः इ
तिहेमचंद्रः ॥
द्वादशाक्षः पुं कार्त्तिकेयः बुद्धः
इतिहेमचंद्रः ॥
द्वादशाक्षरमंत्रः पुं द्वादशवर्णा
त्मकविष्णु विषयक मंत्र विशेषः
यथा नमो भगवते वासुदेवायोंका
रपूर्वकं महामंत्र मिमंप्राक्फल
तत्ता द्वादशाक्षरं इति पाद्मेक्रि
यायोगसारः ॥
द्वादशी स्त्री तिथिविशेषः सा चंद्र
स्यद्वादशकला क्रियारूपा साच
विष्णुतिथिः यथा त्रैलोक्यगामि
नी देवी लक्ष्मी स्तस्य सदा प्रि
या द्वादशीच तिथि स्तस्य काम
रूपीचजायते ह्यनाशानो भवेयस्तु
द्वादश्यां तत्परायणः स्वर्गवासी
सभवत पुमान् स्त्री वा विशेषतः
मार्गशीर्षीयाधशुक्ल द्वादशी म
त्स्यद्वादशी १ पौषी कूर्म द्वाद
शी २ माघीवराहद्वादशी ३ फा
ल्गुनीनृसिंहद्वादशी ४ चैत्रीवामन

द्वादशी ५ वैशाखी जामदग्न्य
द्वादशी ६ ज्यैष्ठी रामद्वादशी ७
आषाढी कृष्णद्वादशी ८ श्राव
णी बुद्धद्वादशी ९ भाद्रीकल्कि
द्वादशी १० आश्विनी पद्मनाभद्वा
दशी ११ कार्त्तिकी नारायणद्वादशी
१२ एतासां नाम धरणी व्रतं एतत्
करणेमहाफलं इतिवराहपुराणं
अथ पिपीतक द्वादशी नारदीये
वैशाखेशुक्लपक्षे तु द्वादशी वैस
वी तिथिः तस्यां शीतलतोयेन
स्नापयेत् केशवंशुचिः इयं पिपी
तकद्वादशी अत्र षष्ठी सप्तमी क
र्त्तव्या सप्तमी नाष्टमी युता एतेनो
पासनायेह षष्ठ्यामाक्रूपोषणं
एकादश्यांप्रकुर्वीतउपवासंमनीषि
णः उपासनाय द्वादश्यां विष्णोर्यह
र्दियं तथा इति भविष्यपुराणेन
एकादश्युपवासानन्तरं द्वादश्यां
विष्णूपासनाया उक्तत्वात् अत्रापि
तथा व्यवहरंतीति नारायणनारदः
द्वादशीं दयेत्स्युपवासानन्तरं वि
नापि पूजेति इयं पूर्ववचनोक्ता
षष्ठीयुता सप्तमी आषाढादि
द्वादशीषु शयनादिकं अथश्र
वणद्वादशी साभाद्रशुक्ल द्वाद
श्यामेव संभवति भविष्ये ॥
त्र द्वादशी श्रवणेपेता सर्वपाप
हरातिथिः बुधवारसमायुक्ता ततः
शतगुणा भवेत् तामुपोष्यसमाप्नो
ति द्वादश द्वादशी फलं उभयदि
नेतच्छ्रवणैकादशीयुतैवग्राह्या
द्वादशीच प्रकर्तव्या एकादश्यान्वि
ताविभो सदाकार्या च विद्वद्भि
र्विष्णुभक्तैश्चमानवैः इतिस्कांदा
त् यदात्वेकादश्यामेव श्रवणंतदा
तामुपवसेत् तथाच नारदः याः का
श्चित्तिथयः प्रोक्ताः पुण्यानक्षत्रयो
गतः तास्वेव तद्व्रतं कुर्यात् श्रवण
द्वादशीविना भविष्योत्तरेपि एका
दशी यदा तस्मात् श्रवणेन सम
न्विता विजया सा तदा प्रोक्ता भक्ता
नां विजय प्रदा तिथि नक्षत्रसंयो
गे उपवासो यदा भवेत् तावदेव न
भोक्तव्यं यावन्नैकस्य संक्षयः ॥
विशेषेण महीपाल श्रवणं वर्द्ध
ते यदि तिथिक्षयेण भोक्तव्यं द्वाद
श्यां नैव लंघयेत् तिथि क्षयेण
एकादशी तिथिक्षयेणभोक्तव्यं
द्वादश्यां पारयेद्दिनं अर्थः अत्र
हेत द्वादशी मित्यादि यदा ॥
त्वेकादश्युपवासदिनेश्रवणंता
स्मिपरदिने द्वादश्यांश्रवणं न
द्वोपवास ह्यमाह ब्रह्मवैवर्त्तः

एकादशी मुपोष्यैव द्वादशीम
मुपोषयेत् नचात्र विधिलोपः
स्यादुभयो र्देवता हरिः । अत्रस्म
समाप्तेव्रते पूर्व्वे नैव कुर्य्याद्व्रतान्त
रमिति स्मरतेः पारणस्याकरणेन पू
र्व्वोपवाससमाप्ता वुपवासारम्भे वि
धि लोपो न भवेदित्यर्थः हेतुमा
ह उभयोरित्यादि उभयो रुप
वासयोः सामर्थ्ये तु श्रवणद्वादश्ये
वोपोष्या तथाच स्मृतिः वरमे ।
कादशीं त्यक्त्वा द्वादशीं समुपोष
येत् पूर्व्वोपवासजं पुण्यं सर्व्वं प्रा
प्नोत्यसंशयं उपोष्य द्वादशीं पु ।
ण्यां विष्णुऋक्षेण संयुतां एका
दश्युद्भवं पुण्यं नरः प्राप्नोत्यसं
शयं द्वादश्युपवासः काम्यः त
थाच मार्कण्डेय पुराणे द्वादश्या
मुपवासेन श्रवणे नृप सर्व्वशः
चक्रवर्त्तित्व मतुलं संप्राप्नोतितलां
श्रियं कार्त्तिके शुक्ल द्वादशी म
न्वंतरा तथाच भविष्य मत्स्ययोः
आश्वयुक् शुक्ल नवमी द्वादशी
कार्त्तिकी तथा इत्यादिवच
नात् इति तिथितत्त्वं ॥
अग्रहायणशुक्लद्वादशी अखं
डद्वादशी तत्रोपोष्य विष्णुपादप्राप्ति
कामोऽहं द्वादश्यां विष्णुं पूजयिष्ये

इति संकल्प पंचगव्येन स्नाप
यित्वा यथाशक्त्युपचारेण संपू
ज्य यवब्रीहि पूर्णपात्रं गृहीत्वा
ॐ सप्तजन्मसु यत्किंचिन्मया
खंडितं व्रतं भगवंस्त्वत् प्रसादे
न तदखंडं मिहास्तु मे यथा खंडं
जगत्सर्व्वं त्वमेव पुरुषोत्तम तथा
खिलान्यखंडानि व्रतानि मम संतु
वै इति प्रार्थ्य दक्षिणां दद्यात् इति
कृत्यचंद्रिका । अथ तिलद्वादश्युपोष
णतिलाचरणं यथा विष्णुधर्मोत्त
रे मार्गशीर्षे शशधरे माघे मासि
प्रजापते एकादश्यां सिते पक्षे उ
पवासी जितेंद्रियः द्वादश्यां षट्
तिलाचारं कृत्वा पापात् प्रमुच्यते
तिलस्नायी तिलोद्वर्त्ती तिलहोमी
तिलोदकी तिलस्य दाता भोक्ता
च षट्तिली नावसीदति सकृत
षट्तिली भूत्वा सर्व्वपापैः प्रमुच्य
ते त्रिंशद्वर्ष सहस्राणि स्वर्गलोके
महीयते अथ गोविंद द्वादशी ॥
फाल्गुने शुक्ल पक्षस्य पुष्यर्क्षे द्वा
दशी यदि गोविंद द्वादशी ना
म महापातक नाशिनी अत्र
गंगायां पद्मपुराणीयो मंत्रः
महापातकसंज्ञानि यानि या
नि संति मे ॥ ॥

गोविंद द्वादशीं प्राप्य तानि मे ह
र जाह्नवि इति तिथ्यादितत्त्वं ।
अथ द्वादशी जात फलं ॥
वक्ता प्रजः सर्व्वजनानुरागी भू
पालमान्यः स्वतिथि प्रियः स्यात्
चेत् द्वादशी यस्य जनस्य सूतौ प्र
वासहीनो व्यवहारदक्षः इति को
ष्ठीप्रदीपः ॥
द्वापरः पुं सन्देहः युगविशेषः
इत्यमरः तद्युगपरिमाणं यथा ।
अष्टौ शत सहस्राणि वर्षाणां मा
नुषाणि तु चतुःषष्टिसहस्राणि
वर्षाणां द्वापरे युगे ८६४... त
स्य धर्मो यथा अतऊर्द्ध्वं प्रवक्ष्या
मि द्वापरस्य विधिं पुनः तत्र त्रेता
युगे क्षीणे द्वापरं प्रतिपद्यते ॥
द्वापरादौ प्रजानां तु सिद्धिस्त्रेताय
गे तया परिवृत्ते युगे तस्मिंस्ततः
सा विप्रणश्यति ततः प्रवर्त्तते ता
सां प्रजानां द्वापरे पुनः लोभो धृ
तिर्वणिग्युद्धं तत्त्वानामविनिश्च
यः प्रध्वंसश्चैव वर्णानां कर्मणां च
विपर्य्ययः यज्ञे वधः पशोर्दण्डो मा
नो दर्पः क्षमाबलं तथा रजस्तमो
भूयः प्रवृत्ते द्वापरे पुनः आद्ये कृते
न धर्मोऽस्ति स त्रेतायां प्रवर्त्तितः ॥

द्वापरे व्याकुलो भूत्वा प्रणश्य
ति कलौ पुनः वर्णानां द्वापरे ध
र्माः संकीर्य्यंते तथाश्रमाः द्वैधमु
त्पद्यते चैव युगे तस्मिन् श्रुतौ स्मृ
तौ द्विधा श्रुतिः स्मृतिश्चैव निश्च
यो नाधिगम्यते अनिश्चयाधिगम
नाद्धर्मतत्त्वं न विद्यते धर्मतत्त्वे ह्य
विज्ञाते मति भेदस्तु जायते ॥
परस्पर विभिन्नैस्तैर्दृष्टीनां विभ्रमे
ण तु तनो दृष्टि विभिन्नैस्तैः कृ
तं शास्त्राकुलं त्विदं एकं वेदं हि
वैव्यासः संहृत्य पुनः पुनः सं
क्षेपादायुषश्चैव व्यस्यते द्वापरेष्वि
ह वेदश्चैक श्चतुर्द्धा तु व्यस्यते द्वा
परादिषु ऋषि पुत्रैः पुन र्भेदा
द्भिद्यन्ते दृष्टि विभ्रमैः मन्त्र ब्रा
ह्मणविन्यासैः स्वर क्रम विपर्य्य
यैः संहिता ऋग्यजुः साम्नां संहि
ता स्तैः श्रुतर्षिभिः सामान्याद्वै
कृताच्चैव दृष्टि भिन्नैः क्वचित् ब्रा
ह्मणं कल्प सूत्राणि भाष्य विद्या
स्तथैव च अन्ये तु प्रस्थितास्तान्वै
केचित्तान् प्रत्यवस्थिताः द्वापरेषु प्र
वर्त्तंते भिन्नार्थैस्तैः स्वदर्शनैः
एकमाध्वर्य्यवं पूर्व्वमासीद्द्वैधं तत
पुनः सामान्यविपरीतार्थैः कृतं शास्त्रा
कुलं त्विदं ॥

आथर्वणस्य प्रस्थाने वैकृथाव्या
हलीकृतं तथैवाथर्वणं साम्ना
विकल्पैः स्वस्य संक्षयैः व्याकृ।
तो द्वापरेष्वर्थः क्रियते भिन्न दर्शि
तैः द्वापरे सन्निवृत्ता स्ते वेदा नश्य
न्ति वै कलौ तेषां विपर्ययोत्पन्ना
भवन्ति द्वापरे पुनः अदृष्टिमरणं चै
व तथैव व्याध्युपद्रवाः वाङ्मनः
कर्मभि र्दुःखै र्निर्वेदो जायते त
तः निर्वेदाज्जायते तेषां दुःखं मोक्ष
विचारणा विचारणाच्च वैराग्य
वैराग्याद्दोष दर्शनं दोषाणां द
र्शनाच्चैव ज्ञानोत् पत्तिश्च जाय
ते तेषां मेधाविनां पूर्वं माद्ये स्वा
यंभुवे ऽन्तरे उत् पद्यन्तीह शा
स्त्राणां द्वापरे परिपंथिनः आयुर्वे
द विकल्पाश्च अंगानां ज्योतिषस्य
च अर्थशास्त्र विकल्पाश्च हेतु।
शास्त्रविकल्पनं प्रक्रिया कल्पसू
त्राणां भाष्यविद्या विकल्पनं स्मृ
ति शास्त्रप्रभेदाश्च प्रस्थानानि पृ
थक् पृथक् द्वापरेष्वभिवर्त्तन्ते म
ति भेदा स्तथान्नृणां मनसा कर्म
णा वाचा कृच्छ्राद्वार्त्ता प्रसिध्यति
द्वापरः सर्व भूतानां काय क्लेश
परस्कृतः लोभो धृतिर्वणिग्युद्ध

स्तत्त्वाना मविनिश्चयः वेदशास्त्र
प्रणयनं धर्माणां संकरस्तथा व
र्णाश्रम परिध्वंसः काम द्वेषौ तथै
व च पूर्णं वर्ष सहस्रे द्वे परमायुस्त
दा नृणां निःशेषे द्वापरे तस्मिन्
तस्य संध्या तु पादतः गुणहीना
स्तिष्ठन्ति धर्मस्य द्वापरस्य तु तथै
व संध्या पादेन अंशस्तस्य प्रतिष्ठि
तः इति मत्स्य पुराणे १४४ अध्यायः
द्वारं क्ली निर्गमनं अभ्युपायः
इति मेदिनी आद्यस्य पर्यायः ॥
द्वाः २ प्रतीहारः ३ इत्यमरः ॥
वारकं ४ इति शब्दरत्नावली ॥ गृहहितशुभदं द्वारं प्राकारस्य
गृहस्य च न मध्य देशे कर्तव्यं
किंचिन्न्यूनाधिके शुभं इति ब्रह्म
वैवर्त्ते श्रीकृष्णजन्मखण्डे ॥
द्वारकः ५ द्वारका इति शब्दरत्ना
वली ॥
द्वारकंटकः ५ कवाटं इति श
ब्द रत्नावली ॥
द्वारका स्त्री स्वनामख्यात पु
री तत् पर्यायः द्वारावती २॥
द्वारवती ३ वनमालिनी ४ द्वा
रिका ५ अब्धिनगरी ६ द्वारकः
७ इति शब्दरत्नावली ॥
तस्या निर्माणप्रकारो यथा श्रीकृष्ण

उवाच हे समुद्र महाभाग स्थलं च श
त योजनं देहि मे नगरार्थं च पश्चाद्दा
स्यामि निश्चितं नगरं कुरु हे का
रीत्रिषु लोकेषु दुर्लभं रमणी
यं च सर्वेषां कमनीयं च योषितां
वांछितं चापि भक्तानां वैकुंठ सदृ
शं परं सर्वेषामपि स्वर्गानां परं पर
मभीप्सितं दिवानिशं खगश्रेष्ठस
न्निधौ विश्वकर्मणः स्थितिं कुरु
महाभाग यावन्निर्मितिर्द्वारका
विश्वकारुरुवाच द्वारकां च कि
माकारां करोमि जगतां विभो कथ
यत्व महाभाग निर्माण क्रम मीश्व
र भगवानुवाच शतयोजनपर्यंतं
नगरं समनोहरं पद्मरागे मरक
ते रिंद्रनीलैः रत्नमैः रुचकैः पा
रिभद्रैश्च पालंकैश्च स्यमंतकैः गो
धकैर्गालिमैश्च वज्रकांतादिभि
स्तथा सूर्यकांतादिभिश्चैव पुष्पै
श्च स्फटिकाकृतैः हरिद्वर्णैश्च म
णिभिः श्यामैर्गौरैश्चैव गोरो
चनाभैः पीतैश्च दाडिम बीज रूप
कैः पद्मबीज निभैश्चैव नीलैः क
मल वर्णकैः मणिभिः कज्जला
कारैरुज्ज्वलैश्च परिष्कृतैः श्वेत
चम्पक वर्णाभैः लम्भकां च सन्नि
भैः स्वर्णमूल्यशतगुणैः ॥

रीषद्गैश्च रूपकैः परिष्टैश्च वरि
ष्ठैश्च मणिश्रेष्ठैश्च पूजितैः यथा
विधानं यद्योग्यं यत्र यद्युक्तमीप्सि
तं मणीनां हरणं चैव यत्संख्या दि
मालयात दिवानिशं करिष्यंति या
वन्निर्माणं शर्वकं यक्षैश्च समभि
लक्षैः कुबेर प्रहितैरपि वेतालल
क्षैः कूष्माण्ड लक्षैः शंकर योजि
तैः दानवै र्ब्रह्मरक्षोभिः शैलक
न्या नियोजितैः कुरु दिव्यं च प
त्नीनां सहस्राणां च षोडश अन्य
पत्नीजनस्यापि चाष्टाधिक शतस्य
च शिविरं परिखा युक्तं मध्यैः प्रा
कारवेष्टितं युक्तं द्वादश सारं च
सिंहद्वार परस्कृतं युक्तं चित्रैर्वि
चित्रैश्च कृत्रिमैश्च कपाटकैः नि
षिद्ध रत्न रहितं प्रसिद्धैश्च परस्कृ
तं सत्वानां च द्ववेर्थप्राङ्गनं च त
थैव च यत्र नाम्नाश्च मंदिरं किंक
राणां तथैव च सर्वप्रसिद्धं निलय
मुग्रसेनस्य भूभृतः आश्रमं सर्व
तो भद्रं वसुदेवस्य मत् पितुः क
थितं लोकशिक्षार्थं कुरु कार्यं
विना पुरीं प्रभक्ताणां चाप्यध।
नो गच्छ वत्स यथा सुखं विश्व
कर्मा हृष्टचित्तस्तु जगाम पद्मिनास
ह समुद्रस्य समीपं च वटमूलं म

नोहरं सभापतत्मनन्मंचकारुस्त्र
पतिणा सह स्वप्ने द्वारवतींरम्या
ददर्शगरुडस्तथा यत्किंचित्क
थितंकारुः कृष्णेन परमात्मना
तदेवलक्षणंसर्वंददर्शनगरेमुने
कारुहसंति स्वप्नेचसर्वेतेशिल्प
कारिणः गरुडंगरुडाश्चान्येवल्ल
वेतश्चपतिणः वुद्धाददर्शगरु
डोविश्वकर्माच लज्जितः ग्रतीव
द्वारकां रम्यां शतयोजनविस्तृतां
व्रह्मादीनांच नगरं विजित्यचवि
राजितां तेजसा छादितां सूर्य
रत्नानांच परिष्कृतां वासुदेव उ
वाच पेत्लकीतीर्थतुल्या सा किं
तीर्थं द्वारकापरं सर्वतीर्थपराश्रे
ष्ठा द्वारका वकृपुणपदा यस्याः
प्रवेश मात्रेण नराणां जन्मखंड
नं दानंच द्वारकायांच श्राद्धंच दे
वपूजनं चतर्गुणंच तीर्थानां गं
गादीनांच भूमिप इति बल्लवैव
र्तेश्रीकृष्णजन्मखंडे ॥
द्वारकेशः पुं श्रीकृष्णः इति
शाह रत्नावली ॥
द्वारदातः पुं वरदातः भू
मीसह वृक्षः ॥ इति भा
वप्रकाशः ॥ ॥
द्वारपालः त्रि द्वाररक्षकः दरवान

इति पारस्यभाषा तत्पर्यायः।
प्रतीहारः २ द्वाःस्थः ३ द्वास्थितः ४
दर्शकः ५ इत्यमरः वेत्रधारकः
६ द्वाःस्थायिकः ७ वर्णत्नकः ८ गा
वीटः ९ दंडवासी १० इति त्रिकांड
शेषः द्वारस्थः ११ क्षत्ता १२ द्वारपा
लकः १३ दौवारिक १४ वेत्री १५
उत्सारकः १६ दण्डी १७ इति
हेमचंद्रः अस्य विवरणं दौवा
रिक शब्दे द्रष्टव्यं ॥
द्वारपालकः पुं द्वारपालः इति
शाहरत्नावली ॥
द्वारपिण्डी स्त्री देहली इतिजटा
धरः द्वारयंत्रं क्ली तालकं ताला
इति ख्यात इतिच भाषा इति हे
मचंद्रः ॥
द्वारवती स्त्री द्वारका इतित्रिका
ण्डशेषः ॥
द्वारवलिभुक् जं पुं वकः इति
त्रिकाण्डशेषः ॥
द्वारस्थः पुं द्वारपालः इति हेम
चंद्रः ॥
द्वारावती स्त्री द्वारका इति ॥
हेम चंद्रः ॥ अयोध्यामथुरामा
या काशी कांची अवंतिका
पुरी द्वारावती चैव सप्तैताः।
मोक्ष दायिका ॥ ॥

एतास्तुपृथिवीमध्येनगर्यपन्तेक
दाचन पुरीद्वारावती विस्तोःपांच
जन्योपरिस्थिता मुक्तिदा एताः
सर्वाश्च एकचगणिताः सुरैःया
नियानिच क्षेत्राणि काशीप्रामिक
राणि षट् इतिभूतशुद्धि तंत्रे ॥
द्वारिकः पुं द्वारपालः इत्यमर।
टीका सारसुंदरी ॥
द्वारिका स्त्री द्वारकापुरी इति
शाहरत्नावली ॥
द्वारी न् त्रि द्वारपालः इतिशाहर
त्नावली ॥
द्वाविंशतिः स्त्री द्व्यधिकविंशतिः
वाइश इति भाषा इतिव्याकरणं
द्वासप्ततिः स्त्री द्विसप्ततिः यथा
द्वासप्ततिश्चवंध्यायामितिज्योति
स्तत्वे द्वास्थः पुं द्वारपालः इत्यम
रटीकायांभरतः ॥
द्वास्थितः पुं द्वारपालः इत्यमर
टीकायांभरतः ॥
द्वास्थितदर्शकः पुं दौवारिकः इ
त्यमरटीकायांभरतः ॥
द्विः अ द्विवारौ इतिसुवृप्रत्ययेन
साध्यं द्विशब्दस्य पुंसि रूपं द्वौ
स्त्रियां क्लीवेचद्वे तद्वाचकानि

यथा पक्षः १ नदीकूलं २ अश्विधा
रा ३ रामपुत्रः ४ चक्षः ५ हस्तः ६
स्तनः ७ इतिकविकल्पलता स
हचरो यथा इंद्राग्नी १ नारदपर्व
तौ २ अश्विनीकुमारौ ३ भार्याप
ती ४ इतिमहाभारतेवनपर्व ॥
द्विकं क्ली द्वयं यथा अशीतिभा
गे गृह्णीयान्मासाद्वाडुपिकःश
तात् द्विकंशतंवा गृह्णीतो न भ
वेदर्थकिल्विषी इत्याह्निकतत्वे
द्विकः पुं काकः कोकः इति मे
दिनी ॥
द्विककारः पुं काकः इतिशाह
रत्नावली ॥
द्विककुत् द् पुं उष्ट्रः इति हेमचंद्रः
द्विगुः पुं षट् समासान्तर्गतस्स
मासविशेषः स तु संख्या पूर्व प
दानां समासः वोपदेवेनास्य ग
संज्ञा कृता स च त्रिविधः तद्धिता
र्थः १ समाहारः २ उत्तरपदपर
श्च ३ तद्धितार्थोपि द्विविधः त
द्धित प्रत्यय मात्रस्य अजादेर्हसा
देवी अर्थे विषये इत्येकः अप
त्यार्थस्यादिकं त्यक्ता अजादेस्त
द्धितस्यार्थे वाच्ये इत्यपरः तद्धि
तार्थ ॥

विषयो यथा द्वयो मीत्रो रपत्यं
द्वैमातुरः पंचानां नापितानामप
त्यं पांचनापितिः तद्धितार्थ वा
च्या यथा पंचभि र्गोभिः क्री
तः पंचगुः समाहारो यथा ।
पक्षाणां सर्वेषां समाहारः त्रि
सर्वं समाहारे अदंतानां स्त्रीत्वं
पात्रादेस्तु क्लीबत्वं उत्तर पद य
रो यथा पंचगावो धनं यस्य स
पंचगवधन इत्यादि इति मुग्ध
बोधटीकायां दुर्गादासः ॥
द्विगुणं त्रि द्वाभ्यां पूरणं अंकद्वया
भ्यांघातः इतिलीलावती ॥
द्विगुणाकृतं त्रि वारद्वयकृष्टक्षेत्रं
दोचसा भैंइइतिभाषा इत्यमरः ॥
द्विजं पुं संस्कृतब्राह्मणः यथा ज
न्मनाब्राह्मणोज्ञेयः संस्कारै र्द्वि
ज उच्यते इतिस्मृतिः क्षत्रियः वै
श्यः इतिमेदिनी दंतः अण्डजः
सर्पादिसर्पमत्स्यादिः इत्यमरः
तेषु रूढत्वं: इतिराजनिर्घण्टः
द्विजातित्रि ॥
द्विजकुत्सितः पुं श्लेष्मांतकवृ
क्षः इतिराजनिर्घण्टः शब्दमाला
च द्विजदासः पुं शूद्रः इति राज
निर्घण्टः द्विजानां दासेति ॥
द्विजन्म न् पुं ब्राह्मणः दंतः पक्षी
इति शब्दरत्नावली क्षत्रियः ॥
वैश्यश्च द्विवार जन्मयुक्ते त्रि ॥
द्विजपतिः पुं चंद्रः इति त्रिका
ण्डशेषः ॥
द्विजप्रपा स्त्री आलवालं तत्पर्या
यः तलं २ विलं ३ तलं ४ इति त्रि
काण्डशेषः ॥
द्विजप्रिया स्त्री सोमलता इति
राजनिर्घण्टः द्विजस्यप्रियवस्तु
नित्रि द्विजराजः पुं चंद्रः कर्पूरः इत
मरः अनंतः गरुडः इति मे
दिनी ॥
द्विजलिंगी न् पुं क्षत्रियः इतित्रिका
ण्डशेषः ब्राह्मणवेशधारिणित्रि
द्विजबंधुः पुं अब्राह्मणः सभद्देव
त्तादिः यथा स्त्री शूद्र द्विजबंधूनां
त्रयीनश्रुतिगोचरा इतिस्मृतिः ॥
द्विजव्रणः पुं दंतार्बुदः इति रा
जनिर्घण्टः ॥
द्विजब्रुवः पुं ब्राह्मणब्रुवः सवजा
मात्रोपजीवीब्राह्मणः इति हेम
चंद्रः यथा मम मब्राह्मणे दानं
द्विगुणं ब्राह्मणब्रुवे अधीते शत

साहस्र मनंतं वेदपारगे इति
स्मृतिः ॥
द्विजसमः पुं राजमाषः बरबटी
इतिभाषा इतिशब्दचंद्रिका ॥
द्विजसेवकः पुं शूद्रः इति शब्द
रत्नावली त्रिवर्णसेवाकर्मेतित्रि
द्विजा स्त्री रेणुका नाम गंधद्रव्यं
इत्यमरः भार्गी इति मेदिनी ॥
पालकी इतिशब्दचंद्रिका ॥
द्विजांगी स्त्री कटुका इति राज
निर्घण्टः ॥
द्विजातिः पुं ब्राह्मणः इत्यमरः
अण्डजः इतिमेदिनी क्षत्रियः।
वैश्यः यथा शूद्रा द्विजातिभि ।
र्जातो न भूमे र्भागमर्हति इति
स्मृतिः ॥
द्विजायनी स्त्री यज्ञोपवीतं इति
शब्दरत्नावली ॥
द्विजालयः पुं कोटरं इतिशब्द
चंद्रिका द्विजानां गृहंच ॥
द्विजिह्वः त्रि सर्पः सूचकः इत्य
मरः खलः इतिमेदिनी चोरः।
दुः साध्यः इतिशब्दरत्नावली
द्विजोत्तमः पुं ब्राह्मणः इति
हलायुधः ॥
द्वित १ पुं पुत्रः इत्यमरः द्वेष्टरि
त्रि द्विठः पुं वह्निजाया स्वाहा
विसर्गः इतिकेतनुकारीयतंत्र
ठकारद्वयं द्वितयं क्ली द्वयं इति
हेमचंद्रः द्वितीयं त्रि द्वयोः पू
रणं द्वयं इतिहेमचंद्रः ॥
द्वितीयः पुं पुत्रः इति त्रिकाण्ड
शेषः ॥
द्वितीया स्त्री गेहिनी भार्या इत्य
मरः तिथिविशेषः सा चंद्रस्य
द्वितीय कला क्रिया रूपा शुक्ल
पक्षे २ कृष्णपक्षे १७ एतदंकेवो
धिता इति ज्योतिषं सा च अश्वि
नीकुमारयो र्जन्मतिथिः यथा
ब्रह्मोवाच रूपंकांतिरनोपमं
भिषक्त्वं सर्ववस्तुषु सोमपत्वं
च लोकेषु सर्वमेतद्भविष्यति म
हातपा उवाच यतन्न सर्वं द्विती
यायां महाभागा ब्रह्मणा पुरा द
त्तंयस्मात्ततस्तेषां तिथीनां स
नमातिथिः एतस्यां रूपकामस्तु
पुष्पाहारो भवेन्नरः संवत्सरंशु
चि र्नित्यं सुरवत्रूपी भवेन्नरः ॥
अश्विभ्यां ये गुणाः प्रोक्ता स्तेतु
सापि भवेत्तिव इतिवराहपुराणे
अत्रजातफलं निखिलं गुणा ॥

गभीरो दानशीलो दयालुः स
त्सलक्षमुद चंद्रः सत्कवितोः ति
ष्णुः निजभुज वल गर्वाच्छादिता
राति वर्गो भवति विपुल कीर्त्तिर्यो
द्वितीया प्रसूतः इति कोष्ठीप्र
दीपः अथ रथ द्वितीया स्कंदपु
राणे आषाढस्य सितेपक्षे द्विती
या पुष्यसंयुता तस्यां रथे समा
रोप्य रामं मां भद्रया सह यात्रो
त्सवं प्रवर्त्याथ प्रीणयेच्च द्वि
जान् वहून् ऋक्षाभावे तिथौ
कार्य्या सदा साप्रीतये मम साया
त्रा मां जगन्नाथं अथ मनोरथ द्वि
तीया सा श्रावणस्य शुक्ल द्वितीया
मनोरथ द्वितीयायां दिवा वासुदे
वार्च्चनं रात्रौ चंद्रोदये र्घ्यं नक्तंच
भोजनादिकं यथा विष्णुधर्म्मो
त्तरे देवमभ्यर्च्य पुष्पैस्तु धूप
दीपानुलेपनैः उद्गच्छन्तं तथा बा
लेन्दौ दद्यादर्घ्यं समाहितः ॥
नक्तं भुंजीत च नरो यावत्तिष्ठति चं
द्रमाः अस्तं गतेन भुंजीत व्रतभं
ग भयान्नरः अथ भ्रातृद्वितीया
लिंगपुराणे कार्त्तिके तु द्वितीया
यां शुक्लायां भ्रातृ पूजनं यात
कुर्य्याद्दिनपर्यन्ति भ्रातरः समजन्म
नि तस्या इति शेषः महा ॥

भारते कार्त्तिके शुक्लपक्षे तु द्वि
तीयायां युधिष्ठिर यमो यमुनया
पूर्व्वं भोजितः स्व गृहे स्वयं तस्मा
न्निज गृहे पार्थ न भोक्तव्यमतो वु
धैः यत्नेन भगिनीहस्ताद्भोक्तव्यं
पुष्टिवर्द्धनं दानानि च प्रदेयानि
भगिनीभ्यो विशेषतः तथा य
मं च चित्रगुप्तं च यमदूतांश्च पूज
येत् अर्घ्यश्चात्र प्रदातव्यो यमाय
सहजद्वयैः सहजद्वये भगिनी
भ्रातृभिः अर्घ्यमंत्रः ॐ एह्येहि मा
र्त्तण्डज पाशहस्त यमांतक लोक
धरामरेश भ्रातृ द्वितीया कृत दे
वपूजां गृहाण चार्घ्यं भगवन्नमस्ते
यमुनाग्रज पाहि मां किंकरैः सार्द्धं
सूर्य्यपुत्र नमोस्तु ते यमुनां च संपूज्य
नमस्कुर्य्यात् ॐ यम स्वसर्न्नमस्ते
स्तु यमुने लोक पूजिते वरदा भव
मे नित्यं सूर्य्यपुत्रि नमोस्तु ते अ
न्नं दत्वा पठति भ्रातस्तवानुजा
ताहं भुंक्ष्व भक्तमिदं शुभं प्रीतये य
मराजस्य यमुनाया विशेषतः ज्ये
ष्ठ तदाग्रजाताहमिति वदेत् तथा
यम द्वितीयायां यात्राया मरणाभ
वेत् अनध्याय द्वितीया यथा प्रेको
चैचा ॥

द्वितीयास्ताः प्रेतपक्षे गते तथा ।
याच कोजागरे जाते चैत्रावल्याः
पंचमिया चाश्विनीस्य समाप्ते च द्वि
तीया या भवेत्तिथिः प्रयत्नेन
स्वनध्यायः पुराणैः परिकीर्त्ति
तः इति निश्चितत्वं पक्षयो माघ
मासस्य द्वितीयां परिवर्जयेत् ।
इति विष्णुपुराणं ॥
द्वितीयाकृतं त्रि वारद्वयकृष्टक्षेत्रं
दोचसा भूंई इति भाषा इत्यमरः
द्वितीयाभा स्त्री दारुहरिद्रा इति
शब्दचंद्रिका ॥
द्वित्राः त्रि द्वौ वा त्रयो वा इमे इति सं
क्षिप्तसारः नित्यबहुवचनांतोयं
यं द्विदन् [न] त्रि दंतद्वययुक्त वृषा
दिः इति हेमचंद्रः ॥
द्विदाम्नी स्त्री रज्जुद्वययुक्ता गौः इ
ति मुग्धबोधव्याकरणं ॥
द्विदहः पुं गणेशः इति त्रिकाण्ड
शेषः ॥
द्विधा अ द्विप्रकारं इति मुग्धबो
धं द्विधागतिः पुं कुम्भीरः इति
हेमचंद्रः द्विप्रकारगतियुक्ते त्रि
द्विधातुः पुं गणेशः इति शब्द
रत्नावली धातुद्वये क्ली ॥

द्विधात्मकं क्ली जातीकोषं इति
शब्दचंद्रिका ॥
द्विधालेख्यः पुं हिन्तालवृक्षः इ
ति राजनिर्घण्टः द्विप्रकारलेख
नीये त्रि द्विनमणकः पुं कुस्मर्मी इति
हेमचंद्रः द्विपः पुं स्त्री हस्ती इत्य
मरः नागकेशरे पुं इति रत्नमाला
द्विपथं क्ली पथद्वयं दोमाला पू
थ इति भाषा तत्पर्य्यायः चतु
ष्पथः २ इति हेमचंद्रः द्वौ पन्था
नौ यत्रेत्यर्थे त्रि ॥
द्विपदः पुं स्त्री मनुष्यः देवः
पक्षी राक्षसः यथा द्विपदेपि
च न भेदान्न देव पक्षि राक्षसाः
इति मुग्धसारः ॥
द्विपदराशिः पुं मिथुनं तुला
कुंभः कन्या धनुषः पूर्वार्द्धं ।
यथा मिथुन तुला घट कन्या
द्विपदाख्याश्चाप पूर्वभागश्च इ
ति ज्योतिस्तत्वं ॥
द्विपमदः पुं हस्तिमदः इत्यरा
जनिर्घण्टः ॥
द्विपर्णी स्त्री वनकोली इति र
त्नमाला पर्णद्वययुक्ते त्रि ॥
द्विपात् ई त्रि द्वौ पादौ यस्य सः पाद

द्वयस्कः इति मुग्धबोधव्याकरणं
द्विपाद्यं क्ली द्विगुणदण्डः इत्यमरः
द्विपायी न पुं हस्ती इति हारावली
द्विपृष्ठः पुं राजभेदः तत्पर्यायः
ब्रह्मसंभवः २ इति हेमचंद्रः ॥
द्विमास्तनः पुं गणेशः इति हे
मचंद्रः ॥
द्विमुखः पुं राजसर्पः इति हला
युधः मुखद्वय युक्ते त्रि ॥
द्विमुखा स्त्री कर्करी गाडु इति
भाषा इति शब्दचंद्रिका जलौकाः
जोँक इति भाषा इति हलायुधः ।
द्विमुखाहिः पुं सर्पविशेषः दुमुँ
खिनी इति भाषा तत्पर्यायः आ
हीरलिः २ राजाहिः ३ राजसर्पः ४
द्विमुखः ५ सर्पभुक् ६ इति हला
युधः द्विमुखोरगः पुं राजसर्पः
इति जटाधरः ॥
द्विमूर्द्धः त्रि मस्तकद्वययुक्तः
इति मुग्धबोधव्याकरणं ॥
द्विरदः पुं स्त्री हस्ती इत्यमरः
द्विरदान्तकः पुं सिंहः इत्यराज
निर्घण्टः ॥
द्विरशनं क्ली वारद्वयभोजनं
यथा मुनिभि र्द्विरशनं प्रोक्तं
विप्राणां ॥

मर्त्यवासिनां नित्यं अहनि च
भमस्विनां सार्द्ध प्रहर यामांतः
इति तिथ्यादितत्वं ॥
द्विरसनः पुं सर्पः इति हारावली
द्विरापः पुं हस्ती इति शब्दमाला
द्विरुक्तः त्रि द्विवारकथितः यथा
द्विरुक्त पदादीर्घः इति मुग्धबो
धलक्षणं ॥
द्विरुक्तिः स्त्री द्विवार कथनं इ
ति संक्षिप्तसारः ॥
द्विरूढा स्त्री द्विवारविवाहिता त
त्पर्यायः दिधिषुः २ पुनर्भूः ३
इति हेमचंद्रः ॥
द्विरूपः पुं द्याकार शाह्लादिः य
था द्विरूपकोषादिः द्विवारयंथा
वृत्तिः यथा द्विरूपचंद्रादि पादः
रूपद्वय युक्ते त्रि ॥
द्विरेफः पुं स्त्री भ्रमरः वर्वरे त्रि
इत्यमरः ॥
द्विवर्षा स्त्री द्विहायनी द्विवर्षव
यस्का गौः इत्यमरः ॥
द्विवर्षिका स्त्री द्विवर्षा गौः इ
ति हेमचंद्रः ॥
द्विवर्षीणः त्रि द्विवार्षिकः द्विव
र्षवयस्कः इति पाणिनीयव्याकर
णं द्विवार्षिकः त्रि द्विवर्षभवः वत्सर

द्वयजातः इति व्याकरणं ॥
द्विवाह्निका स्त्री दोला इति शब्द
माला ॥
द्विविदः पुं वानरविशेषः इति
हेमचंद्रः स श्रीरामेणहतः ॥
समुद्रस्यान्तरे तीरे द्विविदो नाम
वानरः एकाह्निकज्वरं हंति तस्य
नामानुकीर्त्तनात् इति ज्योतिषं
द्विवेशरा स्त्री लघुरथः तत्पर्या
यः गन्त्री २ लघ्वी ३ इति हारावली
द्विशः स्त्र व्य द्वौ द्वौ इति वीप्सार्थेव
शस् प्रत्ययः ॥
द्विशफः पुं द्विखुरपशुः यथा गौ
रजो महिषः हरिणः शूकरो गव
यो रुरुः द्विशफाः पशवश्चेमे अ
विरुष्ट्रश्च सत्तम इति श्रीभागवतं
द्विष ले न द्वे वैरे इति कविकल्प
द्रुमः ॥
द्विषंतीतापः त्रि द्विषंतीतपतिः
स्त्री शत्रुतापकः इति संक्षिप्त सा
र व्याकरणं ॥
द्विषन् त्रि शत्रुः इत्यमरः ॥
द्विषन्तपः त्रि शत्रुन्तपः शत्रुता
पजनकः इति संक्षिप्तसारव्या
करणं द्विष्टं क्ली ताम्रं नाम्रे ॥
इत्यमर टी ॥ ॥

का सारसुंदरी द्वेषविषये त्रि ।
द्विष्टः त्रि द्वयोः स्थितिर्यः उभय
स्थः यथा संयोगस्य द्विष्टत्वे
ति जगदीशः ॥
द्विसप्ततिः स्त्री द्व्यधिक सप्ततिः
७२ बाहत्तर इति भाषा इति
ज्योतिषं ॥
द्विसहस्राक्षः पुं अनंतदेवः इ
ति हेमचंद्रः ॥
द्विसीत्यं त्रि वारद्वयकृष्टक्षेत्रं
दोचस्सा भुँई इति भाषा तत्पर्या
यः द्विगुणाकृतं २ द्वितीयाकृतं ३
शम्बाकृतं ४ संबाकृतं ५ द्विहल्यं
६ इत्यमर भरतौ ॥
द्विःस्विन्नान्नं क्ली सिद्धतण्डुलं
यथा द्विःस्विन्नमन्नं पर्युषितं च
देशविशेषके नात्यन्तशास्त्रवि
शुणां भक्षणाच निवेदने अभ
रुंधयती नोच विधवा ब्रह्मचारि
णां ताम्बूलं च यथा ब्रह्मनूतन्ये
ते वर्त्तनी एवं इति ब्रह्मवैव
र्त्तब्रह्मखण्डं ॥
द्विहल्यं त्रि द्विधाकृष्टक्षेत्रं इत्य
मरः ॥ द्विहायः पुं हस्ती इति
शब्दरत्नावली द्विहायनी स्त्री
द्विवर्षा गौः इत्यमरः ॥ ॥

द्वीन्द्रियग्राह्यः पुं इन्द्रियद्वयग्रहणीय
गुणः स च संख्यादि सप्तद्रवत्व
स्नेहस्वरूपः यथा संख्यादिरपर
त्वान्तो द्रवत्वं स्नेह एव च एते द्वी
न्द्रियग्राह्या अथ स्पर्शान्त्यशब्दकाः
इति भाषापरिच्छेदः ॥
द्वीपं क्ली व्याघ्रचर्म इति द्वीपिश
ब्दटीकायां भरतः द्वीपः पुं क्ली
वारिमध्यगतं जलवेष्टित भू
मिः तत्पर्यायः अन्तरीपं २
इत्यमरः द्वीपान् पाति यथा।
सूर्यः सुमेरुं प्रदक्षिणी कुर्वन्
अर्द्धं द्वीपस्य प्रकाशयति अर्द्धं।
तमसाच्छादयतीति तदा भगव
दुपासनोपचितातिक्रान्त पुरु
ष प्रभावः प्रियव्रतो राजा सूर्य
रथ समवेगेन ज्योतिर्मय रथेन
रजनीमपि दिनं करिष्यामीति
प्रतिज्ञां कृत्वा सप्तवारं द्वितीय
सूर्य इव सूर्यमनु सूर्यक्रामत्
अस्य रथचरणनेमिपरिखाताः
सप्तसिन्धव आसन् यैरेव सिन्धु
भिः पृथिव्याः सप्तद्वीपाः कृताः
ते जम्बु १ प्लक्ष २ शाल्मलि ३ कु
श ४ क्रौञ्च ५ शाक ६ पुष्कर ७ सं
ज्ञकाः तेषां पूर्वस्य द्विस्तारमाणे
उत्तरत्तस्ततो द्विगुणेन विस्तारमाणेन प

रिमाणं भे सिन्धुभ्यो बहिः समर
चिताः यथा सिन्धुभ्यो बहिरेकै
कशो द्वीपाः एवं द्वीपानामपि ब
हिः सिन्धवः स प्रियव्रतः बर्हिष्म
ती गर्भजानन्वगतानात्मजान् आ
ग्नीध्रेध्मजिह्व यज्ञबाहु हिरण्य
रेतो घृतपृष्ठ मेधातिथि वीतिहो
त्र संज्ञकान् यथा संख्येन एकै
कस्मिन् द्वीपे एकैकमधिपतिं
विदधे इति श्रीभागवतीय पं
चमस्कन्धः अपि च मनोः स्वायंभु
वस्यासन् दश पुत्रास्तु तत्समाः यै
रियं पृथिवी सर्वा सप्तद्वीपा सपत्त
ना स समुद्राकरवती प्रतिवर्षं
निवेशिता स्वायंभुवेऽन्तरे पूर्वं मा
घे त्रेता युगे तदा प्रियव्रतस्य पुत्रै
स्तैः पौत्रैः स्वायंभुवस्य तु प्रियव्रता
त्प्रजावन्तो वीरात् काम्याप्रजाय
त कन्या सा तु महाभागा कर्दम
स्य प्रजापतेः कन्ये द्वे दश पुत्रा
श्च सम्राट् कुक्षिश्च ते उभे मेधाग्नि
बाहु मित्रास्तु त्रयो योग परायणाः
जातिस्मरा महाभागा न राज्याय म
नोदधुः प्रियव्रतोऽभ्यषिञ्चत्तान्
सप्त सप्तसु पार्थिवान् द्वीपेषु तेषु
धर्मेण द्वीपांस्तांश्च निबोध मे जंबु

द्वीपे तथाग्नीध्रं राजानं कृतवान्
पिता प्लक्ष द्वीपेश्वरश्चापि तेन
मेधातिथिः सुतः शाल्मले तु
वपुष्मन्तं ज्योतिष्मन्तं कुशाह्वये
क्रौञ्च द्वीपे द्युतिमन्तं हव्यं शा
काह्वये सुतं पुष्कराधिपतिं चै
व सवनं कृतवान् सुतं इति मा
र्कण्डेय पुराणं भूमेरर्द्धं क्षार
सिन्धोरुदक्स्थं जम्बुद्वीपं प्राहु
राचार्यवर्याः अर्द्धेऽन्यस्मिन्
द्वीप षट्कस्य याम्ये क्षार क्षीरा
द्यम्बुधीनां निवेशः शाकं ततः
शाल्मलमत्र कौशं क्रौञ्चं च गोमे
दकं पुष्करं च द्वयोर्द्वयोरन्तरमे
कमेकं समुद्रयोर्द्वीपमुदाहरन्ति
इति सिद्धान्तशिरोमणिः ॥
द्वीपकर्पूरजः पुं चीनकर्पूरः इ
ति राजनिर्घण्टः ॥
द्वीपखर्जूरं क्ली महापारेवतं इ
ति राजनिर्घण्टः ॥
द्वीपजं क्ली महापारेवतं इति रा
जनिर्घण्टः ॥
द्वीपवती स्त्री नदी भूमिः इति मे
दिनी ॥
द्वीपवान् पुं समुद्रः नदः इति

मेदिनी ॥
द्वीपशत्रुः पुं शतावरी इति राज
निर्घण्टः ॥
द्वीपिका स्त्री शतावरी इति रा
जनिर्घण्टः ॥
द्वीपिनखः पुं व्याघ्रनखः इति
राजनिर्घण्टः ॥
द्वीपिशत्रुः पुं शतमूली इति
जटाधरः ॥
द्वीपी न् पुं चित्रकः व्याघ्रः इति
राजनिर्घण्टः ॥
द्वीप्यः त्रि द्वैप्यः द्वीपभव इत्यर्थे
ष्य प्रत्ययः ॥
द्वे स्पर्द्धने संवरणे इति यावत्
इति कविकल्पद्रुमः वरणे स्वी
कार इति यावत् इति गोविन्दभ
ट्टः द्वेधा वा द्विप्रकारे इत्यव्यक
रणं द्वेषः पुं शत्रुता तत्पर्यायः
वैरं २ विरोधः ३ विद्वेषः ४ द्वेष
णं ५ इति शब्दरत्नावली अस्य
कारणं द्विष्टसाधनता ज्ञानं इ
ति भाषापरिच्छेदः ॥
द्वेषणं क्ली द्वेषः इति शब्दरत्ना
वली द्वेषणः त्रि शत्रुः इत्य
मरः द्वेषी न् त्रि शत्रुः इति हेमचन्द्रः

द्वेष्टा त्रि विद्वेषकर्त्ता इतिद्विष धातो स्तृण् प्रत्ययेन साध्यः ॥
द्वेषः त्रि द्वेषविषयः विद्वेषार्हः तत्पर्यायः अप्रियः २ इत्यमरः ॥
द्वैगुणिकः त्रि वृद्ध्याजीवः इति हेमचंद्रः द्विगुणं गृह्णातियः इत्यर्थेष्णिक प्रत्ययः ॥
द्वैतं क्लीद्वयं इति हेमचंद्रः ॥ लोकादिद्वयं एकायनोसाविति श्लोक व्याख्यायां श्रीधरस्वामी ॥
द्वैतवादी न त्रि जीवेश्वरयोर्भेदवादी ईश्वरातिरिक्त जीव वक्ता तस्य मतं यथा परमात्मनो जीवात्मा पृथक् तन्न्याय्ये केषांचिन्मते प्रकृतिरतिरिक्ता केषांचिन्मते प्रकृतिरदृष्टमात्रे पर्यवसिता एवं जीवस्य पृथक् अत्र प्रमाणं जन्म कर्ममरणानां प्रतिनियमाद्युगपत् प्रवृत्तेश्च पुरुषबहुत्वंसिद्धं त्रैगुण्यविपर्य्ययाच्चैव इति सांख्यमतं तत्रेश्वरः सर्वज्ञः परमात्मा एक एव जीवः प्रतिशरीरं भिन्नः विभुर्नित्यश्च इति गौतममतं इहब्रह्मणो जीवेनरत्न प्रतिपादनात् ॥
तयो रद्वैतं नाभिमतं नेतरयोरुपपन्ने भेद व्यपदेशाच्च मुक्तोपसृप्य व्यपदेशादाकाशोर्थान्तरत्वादिव्यपदेशाज्ञेयमात्रस्यालिंगाच्चेति सूत्रैर्मोक्षेपि तयोर्द्वैत निरूपणाच्च इति गोविंद भाष्यमतं यतोद्वैतमते श्रुतिरेव प्रमाणं श्रुत्या यत् फलति तदेव सर्वाध्यात्मविद्या प्रतिपादकश्रुतीनां तात्पर्य्यं इति रामानुजमतं च ॥
द्वैतीयीकः त्रि द्वितीयः यथा द्वैतीयीकतया मितोऽयमगमत्तस्य प्रबंधे महाकाव्ये चारुणिनैषधीयचरिते सर्गो निसर्गोज्वलः इति नैषधं ॥
द्वैधं अ द्विप्रकारं इति व्याकरणं एकेन संधि रपरेण विग्रहः ॥ इति द्वौप्रकारौ द्वैधं निपातितं ॥ इत्यमरटीकायां भरतः विवादः इति त्रिकाण्डशेषः ॥
द्वैपः पुं द्वीपिचर्म्माहतरथः इत्यमरः द्वीपसंबंधिनि व्याघ्रचर्म संबंधिनि च त्रि ॥
द्वैपायनः पुं व्यासः इतिहेमचंद्रः

1483

द्वैप्यं त्रि द्वीपसंबंधि द्वीपशाहात् इदमर्थे ष्यप्रत्ययेनसाध्यं इति व्याकरणं ॥
द्वैमातुरः पुं गणेशः इत्यमरः जरासंधः इतिमेदिनी द्विमातृजे त्रि इति हेमचंद्रः द्वयो र्मात्रो रपत्यं इति मुग्धबोधं ॥
द्वैमातृकः पुं नदी वृष्टि जलोद्भूतधान्य भृतोदेशः इतिराजनिर्घंटः द्वैषणीया स्त्री नागवल्लीभेदः इति राजनिर्घंटः ॥
द्व्यंगुलं त्रि अंगुलिद्वयपरिमितं यथा अर्कांगुलाश्च सच्छायाकाष्ठी द्व्यंगुलमूलिका शंकुश्छाया भवेत्तत्र तच्छायांपरिकल्पयेत् इति ज्योतिषतत्वं द्वेअंगुली परिमाणमस्य इतिव्युत् पत्त्या सिद्धं द्वयोरंगुल्योः समाहारः इतिवाक्ये अंगुलिद्वय मात्रे क्ली इतिमुग्धबोधं ॥
द्व्यंजलं त्रि अंजलिद्वयपरिमितं द्वावंजलीपरिमाणमस्याः इतिव्युत्पत्त्या सिद्धं द्वयोरंजल्योः समाहारः इतिवाक्ये अंजलिद्वय मात्रे क्ली इति मुग्धबोधं ॥
द्व्यणुकं क्ली परमाणुसमवेतद्रव्यं परमाणुद्वयात्मकं तच्च प्रत्यक्ष विषयं यथा विषयो द्व्यणुकादिस्तुवलाणुकेन उदाहृतः तस्य परिमाणमनित्यं यथा अनित्ये द्व्यणुकादौ तु संख्याजन्य मुदाहृतं इतिभाषापरिच्छेदः ॥
द्व्यन्यः त्रि द्वाभ्यामन्यः इतिपंचमीतत्पुरुषः द्वे अन्ये यस्य इति बहुव्रीहिः द्वयोरन्ययोः समाहारः इतिवाक्ये क्ली ॥
द्व्यर्थः त्रि अर्थद्वय युक्त शब्दादिः अस्य प्रमाणं राघव पाण्डवीयादि ग्रंथे द्रष्टव्यं ॥
द्व्यष्टं क्ली ताम्रं इत्यमरः ॥
द्व्यहः पुं अहर्द्वयं द्वे अहनी समाहृते इतिपुंलिंगसंग्रहे भरतः द्व्यक्षरं क्ली वर्णद्वयं द्वयोरक्षरं अक्षरद्वय युक्त शब्दादौ त्रि ॥
द्व्यात्मकः पुं मिथुन कन्या धनु मीनराशयः यथा चरस्थिरद्व्यात्मकनामधेया मेषा दयोऽमी क्रमशः प्रदिष्टाः इति ज्योतिस्तत्वं ॥
द्व्याह्निकः त्रि दिनद्वयभवः द्व्यहेभव इत्यर्थेष्णिक प्रत्ययः ॥

य यकारः स तवर्गचतुर्थो वर्णोऽयं जनो न विशश्च अस्योच्चारणस्थानं

दंतः इतिव्याकरणं अस्य स्वरू
पं यथा धकारं परमेशानि कु
ण्डलीमोक्षरूपिणी आत्मादि
तत्त्वसंयुक्तं पञ्चदेवमयं सदा पं
चप्राणमयं देवि त्रिशक्तिसहितं
सदा त्रिबिन्दुसहितं वर्णं धका
रं हृदि भावय पीतविद्युल्लता
कारं चतुर्वर्गप्रदायकं इति काम
धेनुतन्त्रे त्रिकोणरूपरेखा यात्र
यो देवा वसन्ति च विश्वेश्वरी विश्व
माता वामनःस्कन्धनःस्थिता इ
ति वर्णोद्धारतन्त्रं ॥
धं क्ली धने इति मेदिनी ॥
धः पुं ब्रह्मा कुवेरः धर्मः इति
मेदिनी ॥
धक्क क नाशने इति कविकल्प
द्रुमः धटः पुं तुला तराजु इतिधा
जा इति च भाषा इत्यमरः तुला
राशिः यथा सिंहो वृषश्च मेषश्च
कन्या धन्वी घटो घटः अर्कादीनां
त्रिकोणानि मूलानि दशायः क्र
मात् इति ज्योतिस्तत्त्वं तुला परी
क्षा इति परीक्षातत्त्वं अस्य विव
रणं तुला शब्दे द्रष्टव्यं ॥
धटकः पुं चतुर्दश वल्ल परिमाणं
त्रिचत्वारिंशद्रक्तिका इति लीला
वती ॥
धटी स्त्री चीरवस्त्रं इति मेदिनी
कौपीनं इति त्रिकाण्डशेषः ॥
धटीदानं क्ली गर्भाधानानन्तरं स्त्री
सम्प्रदानकचीरवस्त्रदाने यथा
मूल श्रवण हस्तेषु पुष्यादित्यम
घासु च मृगपौष्णे धटी देया सौम्य
वारे शुभे तिथौ इति ज्योतिःसारसं
ग्रहः धण शब्दे इति कविकल्प
द्रुमः धत्तूरः पुं धुस्तूरः इति हेमच
न्द्रः धन रवे इति कविकल्पद्रुमः
धन लि २ धान्यो धान्यमिह धान्य
क्रिया धान्यात् पादनं इति क
विकल्पद्रुमः ॥
धनं क्ली स्नेहपात्रं इति शब्दरत्ना
वली गोधनं इति मेदिनी ॥
जीवनोपायः तत्पर्य्यायः द्रव्यं २
वित्तं ३ स्वापतेयं ४ रिक्थं ५
ऋक्थं ६ वसु ७ हिरण्यं ८ द्रवि
णं ९ द्युम्नं १० अर्थः ११ राः १२ वि
भवः १३ इत्यमरः काञ्चनं १४ ल
क्ष्मीः १५ भोगं १६ सम्पत् १७ वृ
द्धिः १८ श्रीः १९ व्यवहार्य्यं २० इ
ति राजनिर्घण्टः धनभागिनो
दायशब्दे द्रष्टव्याः धनाभागिनो
यथा कुब्जवामनषण्डानां क्लीवानां

श्वित्रिणामपि उन्मत्तानां तथान्धानां
धनभागो न विद्यते शय्यासनस्था
न मात्रच्छाया चात्र भुजि क्रिया
एतावद्दीयते देयं नार्थभागहरा
हि ते इति वामनपुराणे ३५ अ
ध्यायः अधना यथा त्रय एवा
धना राजन् भार्य्या दासस्तथा सु
तः यत्ते समधिगच्छन्ति यस्य ते त
स्य तद्धनं इति मात्स्ये ३१ अध्यायः
धनस्य प्राणत्वमुक्तं यथा
धेदनद्रविणं नाम प्राणा एते ब
हिश्चराः स तस्य हरते प्राणान् यो
यस्य हरते धनं इति कौर्मे २१ ॥
अध्यायः अपराबाधमक्लेशं प्र
यत्नेनार्जितं धनं स्वल्पं वा बहुलं
वापि देयमित्यभिधीयते अपराबा
धं परपीडारहितं अक्लेशं पात्र
क्लेशाजनकं तामसं धनं यथा
पार्श्विकद्यूतचौर्य्यार्त्तिप्रतिरूप
कसाहसैः व्याजेनोपार्जितं य।
त्तत्कृष्णं समुदाहृतं पार्श्विकः
पार्श्वतया योऽर्जयति आर्त्ती पर
पीडया प्रतिरूपेणाकृत्रिमरत्ना
दिना साहसेन समुद्रयान गिर्य्या
रोहणादिना व्याजेन ब्राह्मणवेशे
नम्लेच्छादिना कृष्णं तामसं राजसं।
धनं यथा कुसीद कृषि वाणिज्य शु
ल्क शिल्पानुवृत्तिभिः कृतोपकारा
दाप्तं च राजसं समुदाहृतं अनुग्र
हा सेवया सात्त्विकं धनं यथा श्रु
तशौर्य्यतपःकन्या शिष्ययाज्यान्व
यागतं धनं सप्तविधं शुद्धं मुनि
भिः समुदाहृतं श्रुतेनाध्ययनेन
शौर्य्येण जयादिना तपसा जप
होमदेवार्च्चादिना कन्यागतं कन्य
या सहागतं श्वशुरादेर्लब्धं शिष्या
गतं गुरुदक्षिणादिना याज्यागतं
आर्त्विज्यलब्धं अन्वयागतं दाया
देभ्यो लब्धं शुद्धं सात्त्विकं इति प्र
श्रितत्वे देवल नारदौ ॥ धन
प्रयोग नक्षत्राणि यथा अश्विनी
पुनर्वसुः पुष्यः उत्तरफल्गुनी
हस्ता पूर्वाषाढा उत्तराषाढा
श्रवणा धनिष्ठा शतभिषा उत्त
र भाद्रपत् रोहिणी इति ज्योतिषं
धन प्रयोग निषेधो यथा आर्द्रे
यमद्वंद्वे मघात्रयं च शक्रद्वयं वा
तद्युगं मघेशाः कार्य्या न चैतेषु ध
नप्रयोगो मद्योगतो ग्राह्यमृणं न
देयं इति समयप्रदीपः अर्थप्र
शंसा यथा अर्थेभ्योऽथ प्रवृद्धेभ्यः
संवृत्तेभ्यस्ततस्ततः क्रियाः सर्वाः प्र

वर्त्तन्ते पर्वतेभ्य इवापगाः अर्थे
न हि विप्रकृतस्य पुरुषस्याल्पचेत
सः विच्छिद्यन्ते क्रियाः सर्वा ग्री
ष्मकुसरितो यथा सोऽयमर्थं प
रित्यज्य सुखकामः सुखैधितः
पापमाचरते कर्त्तुं तदा दोषः प्रव
यस्यार्थास्तस्य मित्राणि यस्या
र्थास्तस्य बान्धवाः यस्यार्थाः स पु
मान् लोके यस्यार्थाः स च पण्डितः
यस्यार्थाः स च विक्रान्तो यस्यार्थाः
स च बुद्धिमान् यस्यार्थाः स महा
भागो यस्यार्थाः स गुणाधिकः अ
र्थस्यैते परित्यागे दोषाः प्रव्याहृ
तामया राज्यमुत्सृजता धीर येन
बुद्धिस्त्वया कृता यस्यार्थो धर्म
कामार्थास्तस्य सर्वं प्रदक्षिणं अ
धनेनार्थकामेन नार्थः शक्यो विवि
त्वता हर्षः कामश्च दर्पश्च धर्मः
क्रोधः शमो दमः अर्थादेतानि स
र्वाणि प्रवर्त्तन्ते नराधिप येषां न
श्यत्ययं लोकश्चरतां धर्मचारि
णां तेऽर्थास्त्वयि न दृश्यन्ते दुर्दिने
ष्विव ग्रहाः इति रामायणे यु
द्धकाण्डे श्रीरामं प्रति श्रीलक्ष्मण
वाक्यं अर्थनिन्दा यथा अर्थमनर्थं
भावय नित्यं नास्ति ततः सुखलेशः स
त्यं पुत्रादपि धनभाजां भीतिः सर्व
त्रैषा विहिता नीतिः इत्यादि मोह
मुद्गरे द्रष्टव्यं अन्यद्रव्यार्थे भग
वता धनहरणं यथा ॥ राज
न् यमनुगृह्णामि हरिष्ये तद्धनं
शनैः ततोऽधनं त्यजन्त्यस्य स्व
जना दुःखितं इति श्रीभाग
वते ॥

धनकेलिः पुं कुवेरः इति त्रि
काण्डशेषः ॥

धनकुः स्त्री करेणुपर्णी इति
त्रिकाण्डशेषः ॥

धनञ्जयः पुं अग्निः चित्रकवृक्षः
इत्यमरः अर्जुनः नागभेदः ॥
सतजलाशयाधिपतिः देहमारु
तः स च शरीरवात्य पंचवायन्तर्ग
तः इति मेदिनी अर्जुनवृक्षः इति
रत्नमाला धनञ्जयस्तथा घोषम
हारजत वर्णिकः ललाटे चोर
सि स्कन्धे हृदि नाभौ त्वगस्थिषु इ
ति सुभद्रा तिलकटीकायां राघव
भट्टः धनदः पुं कुवेरः इत्यमरः
दातरि त्रि इति मेदिनी द्विजलहस्तः
इति राजनिर्घण्टः ॥

धनदानुजः पुं रावणः इति ।
शब्दरत्नावली ॥

धनदायी पुं अग्निः इति शब्दरत्ना
वली धनदातरि त्रि ॥

धनदाक्षी स्त्री लताकरञ्जः इति
राजनिर्घण्टः ॥

धनेदा स्त्री बुद्धशक्तिभेदः इति
त्रिकाण्डशेषः ॥

धनपतिः पुं कुवेरः इति धनञ्जयः
अस्य उत्पत्तिर्यथा महातपा
उवाच ब्रह्मणश्चास्यां वसुपते रु
त्पत्तिं पापनाशिनीं यथा वायुः
शरीरस्थो धनदः संबभूव ह अ
यं शरीरं यत्तस्मिन् वायुरेव ।
स्थितो भवत् प्रयोजनान्मूर्त्तिम
त्वमादिशत् देवदेवताः तत्रा
मूर्त्तस्य वायोस्तु उत्पत्तिः कीर्त्ति
तेमया तां शृणुष्व महाभागक
थ्यमानां मयानघ ब्रह्मणः स
जतः सृष्टिं मुखाद्वायुर्विनिर्ययौ
प्रचण्डः शर्करावर्षी तं ब्रह्मा प्रत्य
षेधयत् मूर्त्तो भवस्व शान्तश्च ।
तथोक्तो मूर्त्तिमान् भवन् सर्वे
षां चैव देवानां यद्वित्तं फलमे
व च तत् सर्वं पाहि येनोक्तं ।
तस्माद्धनपतिर्भवेत् तस्य ब्रह्मा
ददौ तुष्टस्तिथिमेकादशीं प्रभुः
तस्यामनाग्निपक्वाशी यो भवेन्निय
तः शुचिः तस्मात्तु धनदो देवस्तु
ष्टः सर्वं प्रयच्छति एषा धनपते
र्मूर्त्तिः सर्वकिल्विषनाशिनी ॥
य एतां शृणुयाद्भक्त्या पुरुषः प
ठेदपि वा सर्वकाममवाप्नोति स्वर्ग
लोकञ्च गच्छति इति वराहपुराणं

धनपिशाचिका स्त्री धनाशा
तत्पर्यायः तृष्णा २ इति हाराव
ली धनपिशाची स्त्री तृष्णा धन
लोभः इति त्रिकाण्डशेषः ॥

धनप्रिया स्त्री काकजम्बुः इति
राजनिर्घण्टः ॥

धनवती स्त्री धनिष्ठानक्षत्रं इ
ति जटाधरः ॥

धनवान् तु त्रि धनविशिष्टः
धनी इति हलायुधः ॥

धनस्यकः पुं गोक्षुरः इति ।
शब्दचन्द्रिका ॥

धनहरी स्त्री चोरनामगन्धद्रव्यं
तत्पर्यायः राक्षसी २ चण्डा ३
क्षेमः ४ दुष्पत्रः ५ गणहास
कः ६ इत्यमरः धनहारके इ
नत्तः त्रि ॥

धनाधिपः पुं कुवेरः इत्यमरः ।
अस्य ध्यानं यथा कुवेरञ्च मव
दयामि कुण्डलाभ्यामलंकृते हा

स्केयूर रचितं सिताम्बरधरं प्र
भुं गदाधरं चकर्त्तव्यं वरदं मुकु
टान्वितं वरयुक्तविमानस्थमेव
स्थवापिकारयेत् वर्णेन पीतव
र्णेन गुह्यकैः परिवारितं महोद
रं महाकायं अष्टग्रहसमन्वितं
गुह्यकैर्बहुभिर्युक्तं धनव्यग्रकरै
स्तथा इति मत्स्यपुराणं ॥
धनाध्यक्षः पुं कुवेरः इति हला
युधः धनाधिकृतः तहविल
दार इति खाजांचि इति च भाषा
तस्य लक्षणं यथा लोहवस्त्रा
जिनादीनां रत्नानां च विधानवि
त् वित्तानां फल्गुसाराणां मना
हार्य्यः शुचिः सदा निपुणश्चा
प्रमत्तश्च धनाध्यक्षः प्रकीर्त्तितः
आयद्वारेषु सर्व्वेषु धनाध्यक्षस
मा नराः व्ययद्वारेषु च तथा क
र्त्तव्याः पृथिवीक्षिता इति मत्स्य
पुराणे १८९ अध्यायः धना
शा स्त्री धनलोभः यथा जीर्य्यं
ति जीर्य्यतः केशा दन्ता जीर्य्यन्ति
जीर्य्यतः धनाशा जीविताशा च
जीर्य्यतोऽपि न जीर्य्यति इति विष्णु
पुराणं धनाश्रीः स्त्री रागिणीविशे
षः धानसी इति भाषा हनुमन्मते श्रीरा
गस्य तृतीय भार्य्या अस्या जातिः षाडु।
वः शुद्धैषड्जस्वरः गानसमयः द्वि
मार्गे द्वितीय प्रहरः कस्यचिन्मते
दिवावसाने रागमालायामस्या
रूपं वियोगिनी रमणी रक्तवसना
विच्छेद वेदनया दुर्व्वला कृशा च
एकाकिनी वकुलेहृत्तलेलापवि
ह्यारुदती कलनाथमते मेघराग
स्य चतुर्थी भार्य्या भरतमते माल
कोशपुत्र गान्धाररागस्य पत्नी
इति संगीतशास्त्रं ॥
धनिकः पुं धन्याकं इति मेदिनी
अस्मिन्नर्थे क्लीवमिति राजनिर्घण्टः
धरः इति हेमचन्द्रः ॥
धनिकः त्रि साधुः धनी इति मे
दिनी धनिका स्त्री साधुः नारी
इति मेदिनी वधूः इति हेमचंद्रः
युवती इति शब्दरत्नावली ॥
प्रियंगुवृक्षः इति शब्दचंद्रिका ॥
धनिष्ठा स्त्री अश्विन्यादि सप्तविं
शति नक्षत्रान्तर्गत त्रयोविंशनक्ष
त्रं तत्पर्य्यायः श्रविष्ठा २ इत्यमरः
वसुदैवता ३ इति ज्योतिषं ॥
अस्याः स्वरूपं यथा मत्तकोपरि
समागते धने मर्दलाकृति निपंच
तारके यांतिकां निमति मेघल ।
ग्रतः सारसादिरमध्य सल्लिपिकाः

इति कालिदासः कृतरात्रिलग्ननि
रूपणे तत्रजातस्य फलं आचार
ज्ञानादरचारुशीलो धनाधिशाली
बलवान् दयालुः यस्य प्रसूतौ च भ
वेद्धनिष्ठा महत् प्रतिष्ठा सहितो
च भवेद्धनिष्ठा महत् प्रतिष्ठा सहि
तो नरः स्यात् इति कोष्ठीप्रदीपः
धनी न त्रि धनवान् तत्पर्य्यायः
इभ्यः २ आढ्यः ३ इत्यमरः आढ्यो
वाहीत्तिनो नाम्ना यवीयानपि यो
भवेत् भो भवत् पूर्व्वकं त्वेन मभि
भाषेत धर्म्मवित् इति कूर्म्मपुराणे
१२ अध्यायः शुद्ध शरीरं मानुष्य
गुणाढ्यो साध्व उच्यते इति श्री
भागवतं ॥
धनीका स्त्री युवती इति शब्दर
त्नावली धनीयकं क्ली धन्याकं
इति शब्दरत्नावली ॥
धनुः स पुं पियालवृक्षः धनुर्ध
रे त्रि इति मेदिनी ॥
धनुः स पुं क्ली शरनिःक्षेपयं
त्रं धनुक इति भाषा तत्पर्य्यायः
चापः २ धन्व ३ शरासनं ४ को
दण्डं ५ कार्म्मुकं ६ इष्वासः ७ इत्य
मरः स्थावरं ८ गुणी ९ शराव
पः १० धनु ११ ॥ ।
त्पणता १२ त्रिणता १३ इति त्रिकां
डशेषः अस्त्रं १४ धनुः १५ इति
जटाधरः तस्य लक्षणं यथा धनु
स्त्रिविधं प्रोक्तं शार्ङ्गं वांशन्तथैव
च कोमलं वर्णहफलानयो ग्
ण उदाहृतः सर्व संपत्तिकर
णं सम्यग्ध्यायते धनुः विपदो
मुष्टि वैषम्यतः शंगे भंग माव्हेत्
इति युक्तिकल्पतरुः धनुर्वि
द्यारंभदिनं यथा शनि भौम गु
र्व्वानेषु वारेषु स्वतिथ्या हरौ मत्र
हे चाप विद्याया आरंभः शुभ
दो मतः इति ज्योतिःसारसंग्रहः
विद्यारंभोक्तनक्षत्राणि तत्र च
भानि चतुर्हस्त परिमाणं का
ना इति भाषा यथा चतुर्विंशां
गुलो हस्त स्तच्चतुष्कं धनुः स्मृ
तं इति जलाशयतत्वं ॥
मेषादिद्वादशराशयन्तर्गतन
वमराशिः तत्पर्य्यायः तौक्षि
कः २ इति दीपिका अस्य दे
वता पूर्व्वार्द्ध मनुष्याकार शो
षार्द्धाश्वाकार धनुर्धारी पु
रुषः स मूला पूर्वाषाढ़ा स
मस्तोत्तराषाढ़प्रथम पाद
न भवति शीर्षोदयः पीतः स

णिवर्णो चापर्वनचरः महाशाहकरः
सर्वदिक्स्वामी हर्षभाग् हृतः त्वरि
पवर्णाः उग्रः पितृप्रकृति विमर्षी
अल्पसंतानः अल्पस्त्रीसंगः अग्नि
राशिः धनुराशिजातफलं यथा
क्रोधी इतवाक् गुणमतिः स्मृतिः
मातः स्वभावी सर्वलोकालापी च
इति जातकचन्द्रिकादयः अपि
च वक्रकला कुशलः प्रबलो
महान् विमलता कलितः सर्व
लोकि भाक् प्राशधरे हि धनुर्ध
रो नरो धनकरो न करोति ध
नव्ययं तल्लग्नजातफलं यथा
धनुर्लग्ने समुत्पन्नो नीतिमान्
धनवान् सुखी कुलमध्ये प्रधा
नश्चप्रान्तः सर्वस्य पोषकः इति
कोष्ठीप्रदीपः धनुः पुं चापः
राशिविशेषः पियालवृक्षः इ
ति सिद्धान्तकौमुद्यामुणादिवृ
त्तिः ॥
धनुःपटः पुं पियालवृक्षः
इति शब्दचन्द्रिका ॥
धनुःशाखा स्त्री मूर्वा इति
शब्दचन्द्रिका ॥
धनुःश्रेणी स्त्री मूर्वा महेन्द्र
वारुणी इति राजनिर्घण्टः ॥

धनुर्गुणा स्त्री मूर्वा इति शब्दचन्द्रिका
धनुर्द्रुमः पुं वंशः इति राजनिर्घण्टः
धनुर्धरः त्रि धनुर्धारी तिरन्दाज ॥
इति भाषा तत्पर्यायः धन्वी २
धनुष्मान् ३ धानुष्कः ४ निषंगी ५
अस्त्री ६ तली ७ धनुर्भृत् ८ इति हे
मचन्द्रः धनुर्धारी ९ त्रि धनुर्धरः तस्य
लक्षणं यथा प्रस्थवलयकक्ष
गजाश्वरथकोविदः धनुर्धारी भवे
द्दान्तः सर्वक्लेशसहः शुचिः इति
मत्स्यपुराणे १८९ अध्यायः ॥
धनुर्भृत् पुं धनुर्धरः इति हेमचन्द्रः
धनुर्मध्यं क्ली चापमध्यभागः त
त्पर्यायः लस्तकः २ इत्यमरः ॥
धनुर्माला स्त्री मूर्वा इति शब्द
चन्द्रिका ॥
धनुर्व्यासः पुं धन्वयासः दुराल
भा इत्यमरटीकायां रायमुकुटः ।
धनुर्लता स्त्री सोमवल्ली इति रा
जनिर्घण्टः ॥
धनुर्वृक्षः पुं धन्वनवृक्षः वंशः
भल्लातकः अश्वत्थः इति रा
जनिर्घण्टः ॥
धनुष्करः पुं धानुष्कः धनुः
करे यस्य इति व्यधिकरणे
बहुव्रीहि समासः ॥ ॥

धनुष्पटः पुं पियालवृक्षः इत्यमरः
धनुष्मान् पुं धनुर्धरः इत्यमरः
धनुः स्त्री धनुः इति जटाधरः
धाम्नसंचये धनुषि च पुं इति मेदि
मस्तारोणादिवृत्तिः ॥
धनेयकं क्ली धन्याकं इत्यमरटीका
यां भरतः ॥
धनेश्वरः पुं कुबेरः इति हेमचन्द्रः
धन्वः पुं अश्वकर्णवृक्षः इति रा
जनिर्घण्टः ॥
धन्यः त्रि पुण्यवान् सुकृती इत्यम
रः स्वनामा पुरुषो धन्यः पित्रा
मा च मध्यमः अधनो भ्रातृनामा
च मातृनामाधमाधमः इति गोपी
चन्द्रस्तन पद्यं धन्यत्वकथनं यथा
सनत्कुमार उवाच विस्तीर्णे वा
लुकामध्ये कच्छपः शतयोजनः
भीतस्त्वकं पितस्तत्र दृष्टोऽङ्गः खी ।
चशङ्कितः निःश्वासितो राघवेन
मीनेन च महात्मना धन्योसीति
मयोक्तश्च नाहं धन्य उवाच सः ॥
क्षीरोदसागरो धन्यो जन्तवो य
त्र महिधाः भवान् धन्योसि
क्षीरोद तेनोक्तो नाहमेवच ध
न्या वसुंधरा देवी यत्रैव सम ।
सागराः ॥ ॥

धन्यासि वसुधे त्युक्ता नाहमेवेत्यु
वाच सा धन्योऽनन्तो ममाधारः
कुलाधाश्चो नागराड्विभुः धन्योसी
त्युक्तः पन्नगो धन्योनाहमुवाचसः
धन्यश्च भगवान् ब्रह्मा विधाता ज
गतामपि धन्योसि तत्र धाता च
धन्यो नाहमुवाच सः धन्यो महे
श्वरो देवो योगीन्द्राणां गुरोर्गुरुः
धन्योसीत्युक्तः शम्भुश्च धन्यो ना
हमुवाच सः धन्यो गणेश्वरो दे
वो देवानां प्रवरः परः देवेषु ध
न्यो मान्यो सीत्युक्तो गणपतिर्म
या नाहं धन्यो मुनिश्रेष्ठ सन्ति
श्रुत्वा वचः धन्या वेदाश्चत्वा
रः कर्माणि यद्व्यवस्थया ॥ तस्मा
द्धन्याश्च ते वेदा गच्छ तत्र मनी
षिणः यूयं धन्याश्च मान्याश्च
मुक्ता वेदाम्यानतः कुतस्तेन व
यं धन्या यतः संस्थाश्च सांप्रतं वयं
व्यवस्था कर्म्मरोपयज्ञोवः फलदः
स्वयं तस्माद्धन्यः सएवापि गच्छ
गच्छ महामुने धन्योसि यज्ञसंयो
सीत्युक्तस्तत्र मया विभो कुतुस्ते
न वयं धन्या धन्यं कर्म्म शुभं मते
शुभकर्मासि धन्यत्वे नाहं धन्य मु
वाच तत् श्रीकृष्णः परमात्मा च ध
न्या मान्यश्च निश्चितं ॥ ॥

धन्योऽसीतिमवोचक्ष दक्षिणाभिः
सहैतिवृ इत्युक्तो भगवतायज्ञक
र्त्रिन्तं सर्वकारणं इतिब्रह्मवैव
र्त्ते श्रीकृष्णजन्मखण्डे ८० अध्या
यः ॥ धन्यव्रतं क्ली धनजनकव्रत
विशेषः कुवेरः पूर्वमद्रासीत्
एतद्व्रतं कृत्वा धनपतिरभूत्
इतिवराहपुराणं ॥
धन्या स्त्री आमलकी इतिमेदि
नी धन्याकं इति हेमचन्द्रः ॥
धन्याकं क्ली धनिया इतिख्यातं
शस्य तत्पर्य्यायः छत्रा २ वि
तुन्नकं ३ कुस्तुम्बुरु ४ इत्यमरः
धान्यकं ५ धन्यं ६ धनिकं ७ ध
धनीयकं ८ कुस्तुम्बरी ९ धा
न्याकं १० तुम्बुरु ११ धन्या १२
तेनुरी १३ धनेयकं १४ इति भ
रत धृत कोषान्तरं ॥ धानकं
१५ धान्यं १६ धानेयं १७ धनि
का १८ छत्राधान्यं १९ सुगन्धि
२० शाकयोग्यं २१ सूक्ष्मपत्रं २२
जनप्रियं २३ धान्यबीजं २४ बीज
धान्यं २५ वेधकं २६ इति राज
निर्घण्टः कुनटी २७ धेनि
का २८ धन्यकं २९ धाना ३० धा
नेयकं ३१ इतिभावप्रकाशः ॥
अस्य गुणाः ॥ ॥

मधुरत्वं शीतत्वं कषायत्वं । पित्त
ज्वर कास तृषा छर्द्दि कफ ना
शित्वं दीपनत्वञ्च इ ति राज
निर्घण्टः ॥ स्निग्धत्वं वृष्यत्वं मूत्र
लत्वं लघुत्वं तिक्तत्वं कटुत्वं ॥
वीर्य्यकारित्वं पाचनत्वं रोचनत्वं
ग्राहित्वं स्वादुपाकित्वं त्रिदोषद
ह श्वासासार्शःकृमि नाशित्वञ्च
आर्द्रस्य तद्गुणं स्वादु विशेषात्
पित्तनाशनं इति भावप्रकाशः ॥
शिलायां साधु सम्पिष्टं धान्यकं
वस्त्र गालितं । शर्करोदक सं
मिश्रं कर्पूरादि सुसंस्कृतं । न
वीने मृण्मये पात्रे स्थितं पित्त
हरं परं ॥ इतिराजनिर्घण्टः ॥
धन्व न क्ली धनुः स्थलं इतिमे
दिनी धन्वं क्ली धनुः इत्यमर
टीकायांभरतः ॥
धन्वगः पुं धन्वनवृक्षः इति भा
वप्रकाशः ॥
धन्वदुर्गं क्ली निर्जलदेशः इ
ति महाभारते राजधर्म्मः
धन्वनः पुं वृक्षविशेषः ॥
धामनि इतिभाषा ॥ इतिर
त्नमाला तत्पर्य्यायः ॥

रक्तकुसुमः २ धनुर्वृक्षः ३ महाब
लः ४ रुजासहः ५ पिच्छिलकः ६
वृत्तस्वादुफलः ७ अस्यगुणाः कटु
त्वं उष्णत्वं कषायत्वं कफनाशित्वं
दाह शोष करत्वं ॥ ग्राहित्वं ॥
कण्ठामय शमनत्वञ्च इति राज
निर्घण्टः ॥
धन्वन्तरिः पुं देववैद्यः स भगव
दवतारः यथा धन्वन्तरिश्च भग
वान् स्वयमेवकीर्त्तिर्नाम्ना नृणांपु
रुरुजोरुज आशु हन्ति यज्ञे च भा
गममृतायु रवावरुन्ध आयुष्यवे
दमनुशास्त्यवतीर्य्य लोके सवै
भगवतः साक्षात् विष्णो रंशांश
सम्भवः धन्वन्तरि रिति ख्यात आ
युर्वेददृगिज्यभाक् इतिश्रीभाग
वतं नारायणांशो भगवान् स्वयं
धन्वन्तरि र्महान् पुरा समु द्र
मथने समुत्तस्थौ महोदधेः स
र्ववेदेषु निष्णातो मन्त्रतन्त्र वि
शारदः शिष्यो हि वैनतेयस्य श
करस्योपशिष्यकः इतिब्रह्मवैव
र्त्ते श्रीकृष्णजन्मखण्डे ५१ अध्यायः
अस्यैव काश्यपस्य काशिराजः त
स्यदीर्घतमाः पुत्रोभूत् धन्वन्तरि
स्तद्दीर्घतमसोभूत् नहिंससिद्धका
र्य्यः ।

कारणः सकल सम्भूयशेष ज्ञा
नविद्भगवता नारायणेन चाती
त सम्भूतौ तस्मैवरो दत्तः काशि
राजगोत्रेवतीर्य्य त्वमष्टधा स
म्यगायुर्वेदंकरिष्यसि यज्ञभाक्
त्वंभविष्यसीति तस्य च धन्वन्तरेः
पुत्रः केतुमान् केतुमतो भीमर
थः तस्यापिदिवोदासः इतिविष्णु
पुराणं अस्यार्थः संसिद्धकार्य्यका
रणः जरादि रहित देहेन्द्रियः ।
सेयत देहेन्द्रिय इतिवा सकलसं
भूतिषु सर्वेष्वपि जन्मसु अशेष
ज्ञानवित् सर्वशास्त्रवित् अती
त संभूतौ क्षीराब्धौ जन्मनि अ
ष्टधा अष्टाङ्गमायुर्वेदं तदुक्तं
लघुवाग्भटे । कायबालग्रहो
र्द्ध्वाङ्ग शल्य दंष्ट्रा जरा विष अ
ष्टावंगानि तस्याहुश्चिकित् ॥
सा येषु संस्थितेति इतितट्टीका
यांस्वामी दिवोदासः इति त्रि
काण्डशेषः विक्रमादित्य राजस्य
नवरत्नान्तर्गतरत्नविशेषः य
था धन्वन्तरि क्षपणकामरसिं
ह शङ्कु वेताल भट्ट घटकर्पर
कालिदासाः ख्यातो वराहमिहिरो
नृपतेः सभायां रत्नानि वै वररुचि र्नव
विक्रमस्य इति नवरत्न ॥ ॥

धन्वन्तरिग्रस्ता स्त्री कटुकी इति शब्दचन्द्रिका ॥

धन्वयवासः पुं दुरालभा इत्यमरटीकायां भरतः ॥

धन्वयवासकः पुं दुरालभा इति राजनिर्घण्टः ॥

धन्वयासः पुं दुरालभा इत्यमरः ॥

धन्वा न पुं मरुदेशः इत्यमरः ॥

धन्वी न त्रि धनुर्धरः इत्यमरः विदग्धः इति विश्वः ॥

धन्वी न पुं दुरालभा अर्जुनवृक्षः बकुलः इति राजनिर्घण्टः पार्थः इति विश्वः ॥

धम ध्माने इति कविकल्पद्रुमः सौत्रोऽयं धातुः ॥

धमः त्रि अग्निसंयोगकर्त्ता शब्दकर्त्ता इति धम धातोः पचा। दिवादन प्रत्ययेन साध्यः ॥

धमकः पुं कर्मकारः इत्युणादिकोषः ॥

धमनः पुं नलः इत्यमरः ॥ भस्त्राध्मापके क्रूरे च त्रि। इति मेदिनी ॥ ॥

धमनिः स्त्री धमनी इति शब्दरत्नावली ॥ ।

धमनी स्त्री नाडी हट्टविलासिनी इत्यमरः हरिद्रा ग्रीवा इति हेमचन्द्रः पृश्निपर्णी । इति राजनिर्घण्टः नलिका इति भावप्रकाशः ॥

धम्मिल्लः पुं संयताः कचाः खोपा इति भाषा इत्यमरः कुसुमगर्भो मौक्तिकपद्मरागलतिकादिना वहिः संयतो बद्धः केशकलापः इति भरतः ॥

धरः पुं पर्वतः कार्पासतूलकः कूर्मराजः वसुभेदः इति मेदिनी

धरणं क्ली मानभेदः सप्तचतुर्विंशतिरक्तिकारूपः इति लीलावती पलदशमांशः इति वैद्यकं धारणं इति मेदिनी ॥

धरणः पुं अद्रिपतिः लोकः स्तनः धान्यं दिवाकरः इति हेमचन्द्रः सेतुः इति त्रिकाण्डशेषः ॥

धरणिः स्त्री पृथिवी इत्यमरः

धरणिधरः पुं विष्णुः इति हलायुधः ॥

धरणी स्त्री पृथिवी इति मेदिनी शाल्मलिवृक्षः इति शब्दचन्द्रिका

नाडी कन्दविशेषः तत्पर्य्यायः धारणीया २ धीरपत्री ३ सुकन्दकः ४ कन्दालुः ५ वनकन्दः ६ कन्दाढ्यः ७ हेमकन्दकः ८ अस्या गुणाः मधुरत्वं कफपित्तामयरक्तदोषकुष्ठकण्डूतिनाशित्वञ्च इति राजनिर्घण्टः ॥

धरणीकन्दः पुं धरणीनाममूलविशेषः इति राजनिर्घण्टः ॥

धरणीकीलकः पुं पर्वतः इति शब्दरत्नावली ॥

धरणीधरः पुं विष्णुः इति हेमचन्द्रः कच्छपः इति राजनिर्घण्टः पर्वतः यथा यो जातो धरणीधरेन्द्रतनया नाथाङ्घ्रिपाथोरुहा सम इत्यादि गोपीनाथतर्काचार्य्यः

धरणीपूरः पुं समुद्रः इति शब्दरत्नावली ॥

धरणीप्लवः पुं समुद्रः इति त्रिकाण्डशेषः ॥

धरणीश्वरः पुं शिवः इति शब्दरत्नावली ॥

धरणीसुता स्त्री सीता इति हेमचन्द्रः

धरा स्त्री पृथिवी इत्यमरः गर्भाशयः मेदः इति मेदिनी ॥ नाडी इति राजनिर्घण्टः ॥ महा। दानविशेषः यथा अथातः सम्प्रवक्ष्यामि धरादानमनुत्तमम् पापत्रयकरं नृणाममङ्गल्यविनाशनं कारयेत् पृथिवीं हैमीं जम्बुद्वीपानुकारिणीं मर्य्यादापर्वतवतीं मध्ये मेरुसमन्वितां लोकपालाष्टकोपेतां नववर्षसमन्वितां नदीनदप्रान्तोपेतां सप्तसागरवेष्टितां महारत्नसमाकीर्णां वसुरुद्रार्कसंयुतां हेम्नः पलसहस्रेण तदर्द्धेनापि शक्तितः शतत्रयेण वा कुर्य्यात् द्विशतेन शतेन वा कुर्य्यात् पञ्चपलादूर्द्ध्वमशक्तोऽपि विचक्षणः तुलापुरुषवत् कुर्य्याल्लोकेशावाहनं बुधः ऋत्विङ्मण्डपसम्भारभूषणाच्छादनादिकं ॥ वेद्यां कृष्णाजिनं कृत्वा तिलानुपरि विन्यसेत् तथाष्टादश धान्यानि रसांश्च लवणादयः तथाष्टौ पूर्णकलसान् समन्तात् परिकल्पयेत् वितानकञ्च कौशेयं फलानि विविधानि च तथांशुकानि रम्याणि श्रीखण्डशकलानि च इत्येवं रचयित्वा तामधिवासनपूर्वकं शुक्लमाल्याम्बरधरः शुक्लाभरणभूषितः प्रदक्षिणान्ततः कृत्वा गृहीतकुसुमाञ्जलिः

पुण्यं काले महामाघ मस्नाने
नाभुदीरयेत् नमस्ते सर्व देवानां
त्वमेव भवने यतः धात्री च सर्व
भूतानामतः पाहि वसुंधरे वसु
न्धारयसे यस्मात्तस्माद्धात्रीव नि
र्मलं वसुंधरा ततो जाता तस्मा
त्पाहि भयाच्छिवान् चतुर्मुखोपि
नाभ्यंके तस्मात्पवनवाचले अनंता
ये नम स्तस्मात्पाहिसंसारक
र्दमात् त्वमेवलक्ष्मीर्गोविंदे शि
वे गौरीति संस्थिता गायत्री ब्रह्म
णः पार्श्वे ज्योत्स्नाचंद्रे रवौ प्रभा
बुद्धि र्वृहस्पतौ ख्याता मेधामुनि
षु संस्थिता विश्वव्याप्य स्थिता
यस्मा त्ततो विश्वंभरा स्थिता धृ
तिः स्तमा स्थिरा हैरण्यी हरषी व
मृमती रसा पंचाभिर्मू र्तिभिः पा
हि देवि संसार कर्दमात् एवमु
च्चार्यंता देवीं ब्राह्मणेभ्यो निवे
दयेत् धरार्द्धं वा चतुर्भागं गुरवे
प्रतिपादयेत् शेषं चैवाथ कृति
ग्भ्यः प्रतिपाद्य विसर्जयेत् अ
नेन विधिना यस्तु दद्याद्देवीं धरां
बुधः पुण्यकालेन संप्राप्ते स प
दं याति वैष्णवं विमानेनार्क व
र्णेन किंकिणीजालमालिना
नारायण पुरं गत्वा कल्पत्रय
मथो वसेत् पितृ पुत्र प्रपौत्रा
स्तु तारयेदेकविंशतिं ॥ इति प
वति य इत्यंयः श्रृणोतीह नि
त्यं गतकल्मषविमानैर्मुक्तदेहः
समंतात् दिव ममर वधूभि र्गी
तिसंप्राथ्यमानः पुरममर सदृ
क्षैः सेविते चंद्रमौलेः इतिमत्स्य
पुराणे २५८ अध्यायः ॥
धराक्षजः पुं मंगलग्रहः इ
तिहेमचंद्रः ॥
धराकदंब पुं धाराकदंबवृक्षः
इति हारावली ॥
धराधरः पुं विष्णुः पर्वतः इ
ति मेदिनी ॥
धरामरः पुं ब्राह्मणः यथा ये
नैष्कर्म्ये भागवते पुराणं नाराधि
तो यैः पुरुषः पुराणः मुकुंद
यैर्न धरामराणां तेषां वृथा जन्मन
राधमानां इति पौराणिकाः ॥
धरित्री स्त्री पृथिवी इत्यमरः ।
धरिमा न पुं रूपं इत्युणादिकोषः
तुला यथा तथा धरिम मेयानां
प्रत्नादभ्यधिकेवधः इति मनुः
धरुणः पुं ब्रह्मा । स्वर्गः ॥
नीरं ॥ सम्मतं इतिमेदिनी ।

धर्तव्यं त्रि धारणीयं स्थानव्यं ॥
पतनीयं इति धृ धातोः कर्मणि
तव्य प्रत्ययेन साध्यं भावेक्ली
धर्त्रं क्ली गृह इत्युणादिकोषः ।
कृतः धर्मः इति संक्षिप्तसारोणा
दिवृत्तिः ॥
धर्मः पुं क्ली प्रभावत् तत्पर्या
यः पुण्यं १ श्रेयः २ सुकृतं ३ वृषः
४ इत्यमरः न्यायः ॥ स्वभावः ॥
आचारः उपमा क्रतुः अहिंसा
उपनिषत् इति मेदिनी दानादिकं
क्ली इतिहेमचंद्रः धर्मः
पुं धनुः यमः सोमपः इति मे
दिनी सत्संगः अर्हन् इति हेम
चंद्रः ॥ देवता विशेषः स ब्र
ह्मणो दक्षिणस्तनाज्जातः तस्य
भार्या दक्षस्य त्रयोदश कन्याः
तस्य चतुर्दशापत्यानि यथा पत्न्यां
श्रद्धायां ऋतं मैत्र्यां प्रसादः २ द
यायां अभयं ३ शांतौ सुखं ४ तु
ष्ट्यां मुदं ५ पुष्ट्यां गर्वः ६ क्रियायां
योगः ७ उन्नतौ दर्पः ८ बुद्धौ अ
र्थः ९ मेधायां स्मृतिः १० मूर्त्यां
नरनारायणौ ११ तितिक्षायां
क्षेमः १२ ह्रीसंज्ञायां प्रश्रयः १३
इतिश्रीभागवतं ॥ ॥
अपिच श्रद्धा लक्ष्मी धृतिस्तुष्टिः
पुष्टिर्मेधा तथा क्रिया बुद्धि र्ल
ज्जा वपुः शांतिः सिद्धिः कीर्तिस्त्र
योदशी पत्न्यर्थं प्रतिजग्राह धर्मो
दाक्षायणीः प्रभुः विष्णुपुराण
मतेसिद्धिस्थाने ऋद्धिरप्यस्ति
तासामपत्यानि यथा श्रद्धा का
मंच श्री र्दर्पं नियमं धृतिरात्मजं
संतोषं च तथा तुष्टि र्लोभं पुष्टिर
सूयत मेधाश्रुतं क्रिया दंडन
यं विनयमेवच बोधं बुद्धिस्तथा
लज्जा विनयं वपु रात्मजं व्यवसा
यं प्रजज्ञे वै क्षेमं शांतिरसूयत सु
खं सिद्धि र्यशः कीर्तिरित्येते ध
र्मसूनवः कामान्नंदी सुतं हर्षं
धर्म पौत्र मसूयत अधर्म वं
शो यथा । हिंसाभार्या त्वधर्मस्य
तस्यां जज्ञे तथानृतं कन्याच नि
कृतिस्ताभ्यां स्ततो ह्वो नरकं भयं
मायाच वेदना चैव मिथुनं त्व
मेतयोः भयाज्जज्ञेऽथवैमाया
मृत्युं भूतापहारिणं वेदनास्व
सुतंचापि दुःखंजज्ञेऽथरौरवात्
मृत्योर्व्याधिजराशोकतृष्णाः
क्रोधश्चजज्ञिरे दुःखोत्तराः स्मृ
ताः सर्वे सर्वे चाधर्मलक्षणाः ते
षां भार्यास्ति पुत्रो वा सर्वे ते ह्यूर्ध्वरेत

सः इति मार्कण्डेयपुराणं ॥
धर्म्मोत्पत्तिर्यथा अथातः सं-
प्रवक्ष्यामि धर्म्मस्य महतोऽस्य मा-
हात्म्यञ्च स्थितिञ्चैव तन्निबोध न-
राधिप सर्व्वब्रह्माश्रयः शुद्धः परा-
त्परसंस्थितः स सिसृक्षुः प्रजा-
स्तद्वत्पालनं चाप्यचिन्तयत् तस्य
चिन्तयतः सम्यग्दक्षिणाङ्गेन कुण्ड-
लः प्रादुर्ब्बभूव पुरुषः श्वेतमा-
ल्यानुलेपनः तं दृष्ट्वोवाच भग-
वांश्चतुष्पात्त्वं कृते युगे त्रे-
तायां त्रिपदश्चासौ द्विपदो द्वापरे
भवेत् कलावेकेन पादेन प्रजाः
पालयते प्रभुः षड्गुणो ब्राह्मणा-
नां स त्रिधा तत्र व्यवस्थितः द्वि-
धा विप्रेकधा शूद्रे स्थितः सर्व्व-
गतः प्रभुः गुणद्रव्यक्रियाजा-
तिचतुष्पादः प्रकीर्त्तितः त्रि-
सूत्रोऽसौ स्मृतो वेदे ससंहितपद-
क्रमः तथाद्यन्ते ओंकारद्विशि-
राः सप्तहस्तवान् उदात्तादि त्रि-
भिर्व्वद्ध एवं धर्म्मो व्यवस्थितः ॥
ब्रह्मोवाच अद्य प्रभृति ते धर्म्म
तिथिः स्यात्त्रयोदशी यस्यामुपोष्य
पुरुषो भवन्तं समुपार्ज्जयेत् कृत्वा
पापसमाचारं तस्मान्मुच्यति मानवः
इति वराहपुराणं तस्य पुत्रा यथा ध-
र्म्मस्य भार्य्याऽहिंसाख्या तस्याः पु-
त्रचतुष्टयं संप्राप्तं मुनिशार्द्दूल
योगशास्त्रविचारकं ज्येष्ठः स-
नत्कुमारो भूत् द्वितीयश्च सना-
तनः तृतीयः सनको नाम चतु-
र्थश्च सनन्दनः सांख्यवेत्तारमप-
रे कपिलं वोढुमासुरिं दृष्ट्वा पञ्च-
शिखं श्रेष्ठं योगयुक्तं तपोनिधिं
ज्ञानयोगं न ते दद्युर्ज्ज्यायांसोऽपि
कनीयसां इति वामनपुराणं ॥
धर्म्मलक्षणं यथा पात्रे दाने मतिः
कृत्स्ने मातापित्रोश्च पूजने श्रद्धा
बलिर्गवां ग्रासः षड्विधं धर्म्मलक्ष-
णं इति पाद्मोत्तरखण्डं ॥ धर्म्मो-
त्ति यथा ब्रह्मचर्य्येण सत्येन तप-
सा च प्रवर्त्तते दानेन नियमेना-
पि क्षमा शौचेन वल्लभ अहिं-
सया सुशान्त्या च अस्तेयेनापि
वर्त्तते एतैर्दशभिरङ्गैस्तु धर्म्ममेव
प्रसूचयेत् इति पाद्मभूमिखण्डं
धर्म्ममूलं यथा अद्रोहश्चाप्यलो-
भश्च दमो भूतदया तपः ब्रह्म-
चर्य्यं ततः सत्यमनुक्रोशः
क्षमा धृतिः सनातनस्य धर्म्म-
स्य मूलमेतद्दुरासदं ॥ इति
मत्स्यपुराणं ॥ कलेर्द्दशसह-
स्रवर्षान्ते धर्म्मोदयो हरेः पदे ॥

गमिष्यन्ति यथा शालग्रामो हरेर्मू-
र्त्तिर्ज्जगन्नाथश्च भारतं कलेर्द्दश स-
हस्रान्ते ययौ त्यक्त्वा हरेः पदं सर्व्वे
च धर्म्माः सत्यञ्च वेदाश्च ग्रामदेवताः
व्रतं तपः अनशनं ययुस्तैः सार्द्ध-
मेव च इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे
धर्म्माधारस्थानानि यथा यत्र
स्थानं न वा धारो वदामि श्रूयतां
विभो वैष्णवेषु च सर्व्वेषु यतिषु ब्र-
ह्मचारिषु पतिव्रतासु प्राज्ञेषु वा-
नप्रस्थेषु भिक्षुषु तपेषु धर्म्मशी-
लेषु सत्सु स्वदेशस्थजातिषु द्विज-
सेविषु शूद्रेषु सत्संसर्गिस्थितेषु च प-
शुश्रूषने पूर्णो धर्म्म राजविराजसे
युगे युगे नवाधारा एते पुण्यतमा
जनाः ॥ अपि च अश्वत्थवट वि-
ल्वेषु तुलसीवन्दनेषु च देवार्च्चेषु
च पुष्पेषु विद्यमानोऽस्मि शास्त्रिषु
देवालयेषु तीर्थेषु सन्तोषसद्गृहे-
षु च वेदवेदाङ्गश्रवणे जनेषु च स-
भासु च श्रीकृष्णगुणनामोत्की-
र्त्तिषु क्रुतिगीतस्थलेषु च ब्रतस्नातपो-
साय यज्ञसाद्विस्थलेषु च दीक्षाप-
रीक्षापथ गोष्ठगोचरभूमिषु ग-
वां गृहेषु गोष्ठेषु विद्यमानो हि पश्य-
सि कृशता तेन भविता धर्म्मे तेषु ॥
स्थलेषु च धर्म्मागम्यस्थानानि य-
था एतदन्येषु कृशता यदग्र-
म्यञ्च नतस्पृण पुंश्चलीषु तद्गृ-
हेषु शूद्रेषु नरघातिनां नरघाति-
षु नीचेषु मूर्खेषु च खलेषु च दे-
वतागुरु विप्रेषु पाल्यानां धन-
हारिषु असत्कारेषु धूर्त्तेषु चौरे-
षु रतिभूमिषु उदरोदरसुरापान-
कलहानां स्थलेषु च शालग्राम-
साधुतीर्थपुराणरहितेषु चाद-
स्युग्रस्तेषु देवेषु तालच्छायासु
गर्व्विषु असिजीवि मसीजीविदे-
वलग्रामयाजिषु वृषवाहस्वर्ण-
कार जीवहिंसोपजीविषु भर्त्तृति-
द्विनारीषु स्त्रीजितेषु च पुंसु च
दीक्षासन्धिविष्णुभक्तिविहीनेषु
द्विजेषु च स्त्रीग कन्याविक्रयिषु
स्वयोषिद्विक्रयिषु च शालग्राम-
सरग्रेष्य भूमिविक्रयिषु प्रभो ॥
मित्रद्रोहि कृतघ्नेषु सत्य विश्वास-
घातिषु शरणागतहीनेषु स्था-
प्तिनघ्नेषु तेषु च शश्वन्मिथ्याकि-
शीलेषु तथा सीमापहारिषु का-
मात् क्रोधात् तथा लोभात् मिथ्यासाक्षि-
प्रदातृषु पुण्यकर्म्मविहीनेषु पुण्यक-
र्म्मविरोधिषु स्थानभ्रमेषु निन्द्येषु नाथि-

कार स्तवप्रभो इति ब्रह्मवैवर्त्ते श्री
कृष्णजन्मखण्डे ५२ अध्यायः देवा
दीनां धर्मो यथा स्कन्द उवाच
किंलक्षणो भवेद्धर्मः किमाचरण
सत्क्रियः यमाश्रित्य न सीदन्ति
देवाद्यास्तु तद्वन्तो ऋषय ऊचुः
देवानां परमो धर्मः सदा यज्ञादि
काः क्रियाः स्वाध्याय वेद वेत्तृत्व
विष्णुपूजारतिः स्मृतिः दैत्यानां
बाहुशालित्वं मात्सर्य्य युद्ध सत्
क्रिया विदनं नीतिशास्त्राणां हर
भक्तिरुदाहृता सिद्धानामुदितो
धर्मो योगयुक्ति रनुत्तमा स्वाध्याये
ब्रह्मविज्ञानं भक्तिर्द्वाभ्यामपि स्थि
रा उत्कृष्टोपासनं ज्ञेयं नृत्य वाद्ये
षु वादित्वा सरस्वत्यां स्थिरा भक्ति
र्गान्धर्वो धर्म उच्यते विद्याधरत्व म
तुलं विज्ञानं पौरुषेमतिः विद्या
धराणां धर्मोऽयं भवान्यां भक्ति रे
व च गान्धर्व विद्यावेदित्व भक्तिः
स्थाणौ तथा स्थिरा कौशल्य स
र्वशिल्पेषु धर्मः किंपुरुषः स्मृतः
ब्रह्मचर्य्यममानित्वं योगाभ्यासर
तिर्दृढा सर्वत्र कामचारित्वं धर्मो
ऽयं पैतृकः स्मृतः ब्रह्मचर्य्यं यता
शित्वं जप्य ज्ञानं च राक्षस नियमा

धर्मवेदित्व मार्षं धर्मं प्रचक्षते
स्वाध्याय ब्रह्मचर्य्यं च दानं यजनमे
व च अकार्पण्य मनायासं दया हिं
सा प्रमादयः जितेन्द्रियत्वं शौचं च
मांगल्यं भक्ति रुच्यते शङ्करे भा
स्करे देव्यां धर्मोऽयं मानवः स्मृ
तः धनाधिपत्यं भोगानि स्वाध्या
यं शंकरार्चनं अहंकारमशौचं च
धर्मोऽयं गुह्यकेष्विति अविवे
कत्वा याज्ञानं शौच ह्वानि रसत्य
ता पिशाचानामयं धर्मः सदावा
मिष गृध्नता योनयस्तु द्वादशे
ताः सह धर्मैश्च राक्षस ब्रह्मणा
कथिताः पुण्याह्वादशैव गतिप्र
दाः इति वामनपुराणे ११ अध्यायः
धर्माधर्म लक्षणं यथा ॥ अ
हिंसा लक्षणो धर्मो हिंसा चा ध
र्म लक्षणा इति महा भारतं ॥
वेदप्रणिहितो धर्मो ह्यधर्म स्तद्वि
पर्य्ययः इति श्रीभागवत विहित
क्रियया साध्यो धर्मः पुंसां गुणोम
तः प्रतिषिद्ध क्रियासाध्यः ॥

परदाराभिमर्षित्वं परार्थेषु च लोलु
पा स्वाध्याय स्तवके भक्ति धर्मो
यं राक्षसः स्मृतः ४ १४ त्रि०

स गुणोऽधर्म उच्यते इति धर्मदी
पिका ॥
धर्मकर्म न क्ली धर्मकार्य्यमुभाद
ष्टप्रतिपादयक्रिया यथा वेदप्रणि
हितं धर्मकर्म तन्मंगलपरं इति ब्र
ह्मवैवर्त्ते प्रकृतिखण्डे ॥
धर्मकायः पुं बुद्धः इति त्रिकाण्ड
शेषः ॥
धर्मकीलः पुं शासनं राजशासनं
इति पुरवर्गो त्रिकाण्डशेषः ॥
धर्मकीलकः पुं ब्रह्मशासनं इति
पुरवर्गो शब्दरत्नावली ॥
धर्मकेतुः पुं बुद्धः इति शब्द
रत्नावली ॥
धर्मचक्रः पुं बुद्धः इति शब्दरत्नाव
ली धर्मचक्रः पुं जिनः इति धरणिः
धर्मचारिणी स्त्री जाया इति शब्द
रत्नावली ॥
धर्मचिन्ता स्त्री पुण्यभावना तत्प
र्य्यायः उपाधिः २ इत्यमरः ॥
धर्मचिन्तनं क्ली धर्मचिन्ता इति है
मचन्द्रः ॥
धर्मज्ञः त्रि धर्मज्ञानविशिष्टः
यथा धर्मज्ञस्य कृतज्ञस्य श्री
निषेवी दृढव्रतः इति विरा
टपर्वणि ॥ ॥

धर्मणः पुं वृक्षभेदः धामिनिया
इति भाषा सर्पविशेषः धेमना
इति भाषा इति मेदिनी ॥
धर्मत्वं क्ली वृत्तिमत्वं आधेयत्व
मिति यावत् यथा गगणादे र्वृत्ति
मत्व लक्षण धर्मत्वाभावादिति
जगदीशः धर्मद्रवी स्त्री गंगा इ
ति त्रिकाण्डशेषः ॥ धर्मधातुः
पुं बुद्धः इति त्रिकाण्डशेषः ॥
धर्मध्वजी न त्रि जीविकार्थ्यजटादि
धारी तत्पर्य्यायः लिंगवृत्तिः २
इत्यमरः ॥
धर्मपत्तनं क्ली मरिचं इत्यमरः
धर्मपुरी तत्पर्य्यायः आवंती २
इति त्रिकाण्डशेषः ॥
धर्म पत्रं क्ली यज्ञोडुंबरः इति
शब्दचन्द्रिका ॥
धर्मपुत्रः पुं युधिष्ठिरराजः इ
ति त्रिकाण्डशेषः नरनाराय
णावृषी इति पुराणं धर्मतः
कृत पुत्रः धरमवेटा इति भाषा
यथा यावद्युजेटि धर्मपुत्र पर
म्पराणामखिलक्षत्रिय श्रेणी
श्रोणितेन पिच्छिला वसुमती
कोऽस्मा मधास्मात् पदं । त्रै
लोक्याभय दान दक्षिण भुजा

वहस्म दिव्यादयो देवोऽयं दिन
कृत् कुलैक तिलकोन माभवि
ष्यदि इति महानाटकं ॥
धर्मभाणकः पु भारतादिपाठ
कः इति त्रिकाण्डशेषः ॥
धर्मयुः त्रि धर्मविशिष्टः धार्मि
कः इति धर्म शब्दादस्त्यर्थे यु
प्रत्ययेन निष्पन्नः ॥
धर्मयुक् ज त्रि धर्मयुक्तः धा
र्मिकः धर्म युनक्तीत्यर्थे क्विप्
प्रत्ययेन साध्यः धर्मराजः पु जि
नः यमः इत्यमरः नरपतिः ॥
युधिष्ठिरः इति शब्दरत्नावली
धर्मवान् न त्रि धर्मविशिष्टः।
पुण्यवान् इति शब्दरत्नावली
धर्मवासरः पु पौर्णमासी इ
ति त्रिकाण्डशेषः ॥
धर्मवाहनः पु शिवः इति त्रि
काण्डशेषः धर्मस्य याने।
स्त्री धर्मशास्त्रं स्त्री मन्वा
दिप्रणीतशास्त्रं ॥
तत् पर्यायः स्मृतिः २ध
संहिता ३ इति हेमचंद्रः ॥
धर्मशास्त्र प्रयोजका यथा।
मन्वत्रि विष्णु हारीत याज्ञव
ल्क्योशनोंगिराः यमापस्तम्ब

संवर्त्ताः कात्यायन बृहस्पती प
राशरव्यास शंखलिखितादक्षगो
तमौ शातातपो वशिष्ठश्च धर्म
शास्त्र प्रयोजकाः इति स्मृतिः ॥
एते प्रधानानि अन्येः पि संति ॥
अस्मिन् देशे प्रचलित धर्मशास्त्रा
णि यथा मलिम्लुचे दायभागेसं
स्कारे शुद्धिनिर्णये प्रायश्चित्ते विवाहे
च तिथौ जन्माष्टमीव्रते दुर्गोत्
सवे व्यवहारतत्वे कादश्यादिनिर्ण
ये मठागमवनोत् सर्गेवृषोत् सर्गे
व्रयेवने प्रतिष्ठायां परीक्षायां ज्यो।
तिषे वास्तुसत्त्वके दीक्षायानाह्नि
केकृत्ये देवे श्रीपुरुषोत्तमे ॥
सामश्राद्धे यजुःश्राद्धे प्रदक्तम
विकारणे इमस्टाविंशति स्याने
तत्वं वदामि यत्नतः इति रघुनं
दन महाचार्य्यः ॥
धर्मशीलः त्रि धार्मिकः यथा
धर्मशीला वदान्यश्च वृद्धश्च।
समदर्शनः ॥ इति ॥
विराटपर्व ॥
धर्मसंहिता स्त्री स्मृतिशा
स्त्रं इत्यमरः ॥
धर्मसावर्णिः पु एकादशोम
नुः अस्ति ॥

मन्वन्तरे धर्मसेतुरवतारः वैधृत
इंद्रः विहंगम कामगमाद्या देवाः
अरुणादयः सप्तर्षयः सत्यधर्मा
दयो मनुपुत्रा भविष्यंति इति श्री
भागवते भविष्यधर्मपुत्रस्य सा
वर्णिस्यान्तरे श्रृणु विहंगमाः का
मगमा निर्माणरतय स्तथा त्रि
कारा भविष्यंति एकैकस्त्रिश
कोगणः मासर्त्त्व दिवसायेव नि
र्माणरतय स्तेते विहंगमा रात्रौ।
योग्यमुहूर्त्ताः कामगोगणः इंद्रो
वृषाख्यो भविता तेषां प्रख्यात वि
क्रमाः हविष्मांश्च धनिष्टश्च अ
षिस्य स्तथारुणिः निश्चर श्चान
घश्चैव वृष्टि श्चान्यो महामुनिः
सप्तर्षयोऽन्तरे तस्मिन्नग्नितेजा
श्चसप्तमः सर्वानुगः सुशर्माच
देवानीकः पुरुद्वहः हेमधन्वा
दृढायुश्च विभातु स्तत् सुता नृपाः
इति मार्कण्डेयपुराणं ॥
धर्मसूनः पु युधिष्ठिरराजः इ
ति शब्दरत्नावली ॥
धर्मसूः पु धूम्राटपक्षी इति।
शब्दरत्नावली ॥
धर्मक्षेत्रं स्त्री कुरुक्षेत्रं यथा ॥
॥ ब्रह्म ॥ ।

वेदिः कुरुक्षेत्रे पंचरामहृदाम्भरं
धर्मक्षेत्रं कुरुक्षेत्रं द्वादशयोजना
वधि इति हेमचंद्रः अपिच
तरंतुकारंतुकयो यदंतरं राम
हृदानांच मचक्रुकस्य च एतत्
कुरुक्षेत्र समंत पंचकं प्रजापतेरु
त्तरवेदि रुच्यते इति भारतपाठे
धर्मधारे त्रि ॥
धर्मात्मा न पु धर्मशीलः यथा
महर्षिर्भगवान् व्यासः कृत्वेमां
संहितां पुरा श्लोकैश्चतुर्भि र्धर्मा
त्मा पुत्रमध्यापयत् शुकं इति म
हाभारते धर्माधर्मपरीक्षणं स्त्री
परीक्षा विशेषः यथा अधुना सं
प्रवक्ष्यामि धर्माधर्म परीक्षणे वृ
हंणां याचमानानां प्रायश्चित्तार्थि
नां नृणां रानतं कारयेत् धर्म मथ
मं सीसकायसं लिखेत् भूर्जे पटे
वापि धर्माधर्मौ सितासितौ अभ्यु
क्ष्यपंचगव्येन गंधमाल्यैः समर्च
येत् सितपुष्पस्तु धर्मः स्यादधर्मो
ऽसितपुष्पधृक् एवं विधायोप
लिप्य पिण्डयो स्तौ निधापयेत्
गोमयेन मृदावापि पिण्डौ का
र्य्यौ समंमतः मृद्भाण्डक उप
हते स्याप्ये चानुपलक्षितौ

उपलिप्ते स्वचौदेशे देव ब्राह्म
ण सन्निधौ आवाहयेत् ततो
देवान् लोकपालांश्च पूर्ववत्
धर्म्मावाहनपूर्वन्तु प्रतिज्ञा प
त्रकं लिखेत् यदि पापविमु
क्तो ऽहं धर्म त्वामागमय करे
अस्तु हस्तेऽन्यमकरे पापमा।
यातु धर्म्मतः अभियुक्तस्तयो
श्चैकं प्रगृह्णीताविलम्बितः धर्म्मे
गृहीते शुद्धः स्यादधर्म्मेन स हीय
ते एवं समासतः प्रोक्तं धर्म्मा ध
र्म्मपरीक्षणं इति मिताक्षरा ध
र्म्माधिकरणं क्ली राज्ञो विचारस्था
ने यथा धर्म्मशास्त्रानुसारेण अर्थ
शास्त्रनिरूपणं यत्राधिक्रियते स्था
ने धर्म्माधिकरणं हि तत् इति वीर
मित्रोदये कात्यायनवचनं ॥
पुरुषान्तरतत्त्वज्ञाः प्राशवश्चाप्य
लोलुपाः धर्म्माधिकरणे कार्य्या
जनाह्वानकरा नराः इति मत्स्य
पुराणे १८९ अध्यायः ॥
धर्म्माधिकरणिः पुं धर्म्माध्यक्षः
तस्य लक्षणं यथा समः श
त्रौ च मित्रे च सर्व्वशास्त्रविशा
रदः विप्रमुख्यः कुलीनश्च ध
र्म्माधिकरणे भवेत् इति मत्स्य।
पुराणे १८९ अध्यायः ॥
धर्म्माधिकरणी न् पुं धर्म्माधिकरण
विशिष्टः यज्ज इति इंराजी भाषा त
त्पर्य्यायः धर्म्माध्यक्षः १ धार्म्मिकः २
इति हेमचन्द्रः प्राड्विवाकः ४
अक्षदर्शकः ५ इत्यमरः ॥
धर्म्माध्यक्षः पुं धर्म्माधिकरणी इ
ति हेमचन्द्रः कुलशीलगुणोपे
तः सर्व्वधर्म्मपरायणः प्रवीणः
प्रेषणाध्यक्षो धर्म्माध्यक्षो विधीय
ते इति चाणक्यं ॥
धर्म्मारण्यं क्ली तपोवनविशेषः
तस्य नाम कारणं यथा स धर्म्मः
पीडितः सर्व्वे सोमेनाद्भुतकर्म्मणा
ताराजिहीर्षता पत्नी भ्रातुरङ्गिर
सस्य च सोम्ययाधीषितस्तेन ब
लिना क्रूरकर्म्मणा अरण्यं गहनं
घोरं प्रविवेश तदा प्रभुः ब्रह्मणा
च यदारण्यमिदं धर्म्मत्वयाश्रितम्
चिरं विभो नाम्ना भविष्यति तेन
धर्म्मारण्यमिति प्रभो इति वरा
ह पुराणं ॥
धर्म्मासनं क्ली विचारासनं बें
च इति इंराजी भाषा यथा ध
र्म्मासनमधिष्ठाय संवीताङ्गः स
माहितः प्रणम्य ॥ ॥

लोकपालेभ्यः कार्य्यदर्शनमा
रभेत् इति मनुः ॥
धर्म्मिणी स्त्री रेणुका इति रा
जनिर्घण्टः धर्म्मी न् त्रि धर्म्मवान्
पुण्यशीलः इति शब्दरत्नावली
धर्म्मोपदेशकः पुं गुरुः इति
हेमचन्द्रः ॥
धर्म्म्यः त्रि धर्म्मादनपेतः धर्म्मयुक्तः
यथा धर्म्म्याद्धि युद्धाच्छ्रेयोऽन्य
त्क्षत्रियस्य न विद्यते इति श्री।
भगवद्गीता न्यूनाधिकविभक्ता
नां धर्म्म्यः पितृकृतः स्मृतः इति
दायभागः ॥
धर्म्म्यविवाहः पुं विवाहविशेषः
स च पञ्चविधः ब्राह्मदैवार्षगान्ध
र्व्वप्राजापत्यरूपः अधर्म्म्यविवा
हस्त्रिविधः आसुर राक्षस पैशा
चरूपः यथा धर्म्म्येष्वेव विवाहेषु
काल परीक्षणं नाधर्म्म्येषु इत्यु
द्वाहतत्त्वे ॥
धर्षः पुं प्रागल्भ्यं अमर्षः।
शक्तिबन्धनं संहतिः हिंसा।
इति धृष धातोर्भावे घञ् प्रत्य
येन साध्यः ॥
धर्षकः त्रि नटः इति शब्द।
रत्नावली ॥ ॥
धर्षकारिणी स्त्री दूषितकन्या
इति शब्दरत्नावली ॥
धर्षणं क्ली परिभवः रतिः इ
ति मेदिनी धर्षशब्दार्थोऽप्यत्र ॥
धर्षणिः स्त्री बन्धकी वृषलः
इति संक्षिप्तसारोणादिवृत्तिः
धर्षणी स्त्री धर्षिणी असती ॥
इत्यमरटीकायां भरतः ॥
धर्षिणी स्त्री पुंश्चली इत्यमरः
धर्षितं क्ली रतिः मैथुनं इति
त्रिकाण्डशेषः कृतधर्षणे त्रि
धर्षिता स्त्री असती इति श
ब्दरत्नावली ॥
धलण्डः पुं हफकाण्डकवृक्षः
धलखांकडा इति भाषा इति शब्द
चन्द्रिका धव इ गाछ इति कविक
ल्पद्रुमः धवः पुं पतिः नरः इत्य
मरः धूर्त्तः इति मेदिनी स्वनाम
ख्यातवृक्षः तत्पर्य्यायः धुरन्ध
रः २ शाकटाख्यः ३ इति रत्न
माला ॥ हफतरुः ४ गौरः ५
कषायः ६ मधुरत्वक् ७ शुक्ल
वृक्षः ८ पाण्डुतरुः ९ धवलः १०
पाण्डुरः ॥ अस्य गुणाः कषायत्व
कटुत्वकफानिलनाशित्व ॥
पित्तप्रकोपनत्व रुच्यत्व दीपन।

त्वंच अन्यच्च शीतत्वं प्रमेहदार्ढ्यः
पाण्डुपित्तकफापहत्वं मधुरत्वं
लवरत्वं तिक्तत्वंच तत्फले
ईषन्मधुरं इतिराजनिर्घण्टः
धवलः पुं धववृक्षः चीनकर्पू
रः इतिराजनिर्घण्टः वृषश्रेष्ठः
शुक्लः सुन्दरे त्रि इत्युणादिको
षः श्वेतगुणयुक्ते त्रि इत्यमरः
श्वेतमरिचे क्ली इति राजनिर्घण्टः
रागविशेषः भरतमते हिन्दोल
रागस्याष्टमपुत्रः इति संगीत
शास्त्रं ॥
धवलपक्षः पुं हंसः इति राज
निर्घण्टः शुक्लपक्षश्च ॥
धवलपाटली स्त्री सितपाटलि
का इतिराजनिर्घण्टः ॥
धवलमृत्तिका स्त्री खटिनी इति
राजनिर्घण्टः ॥
धवलयावनालः पुं यावनाल
विशेषः तत्पर्यायः पाण्डुरः २
तारतण्डुलः ३ नन्दकौंतिविस्ता
रः ४ हंसः ५ मौक्तिकतण्डुलः ६
अस्य गुणाः गौल्यत्वं बल्यत्वं
वृष्यत्वं रुच्यप्रदत्वं त्रिदोषघ्न।
श्रीगुल्मव्रणनाशित्वंच इति
राजनिर्घण्टः ॥ ॥

धवला / धवली } स्त्री शुक्लागौः इत्यमरः
धवलोत्पलं क्ली कुमुदं इति
राजनिर्घण्टः ॥
धवाणकः पुं वायुः इत्युणादिको
षः धवित्रं क्ली मृगचर्मरचितव्य
जनं इत्यमरः ॥
धाञ् लि न धारणे पुष्टौ दाने।
इति कविकल्पद्रुमः ॥
धाः पुं ब्रह्मा धारकः इति मेदि
नी बृहस्पतिः इत्येकाक्षरकोषः
धाकः पुं वृषः आहारः इत्युणा
दिकोषः अन्नं स्तम्भः इति सं
क्षिप्तसारेउणादिवृत्तिः ॥
धाटी स्त्री शस्त्रसम्पातगमने ॥
तत्पर्यायः प्रपातः २ अभ्यवस्क
न्दः ३ अभ्यासादनं ४ इतिहेमच
न्द्रः धाणकः पुं दीनारभागः इ
त्युणादिकोषः ॥
धातकी स्त्री पुष्पविशेषः धाइ
फुल इति भाषा तत्पर्यायः
वह्निपुष्पी २ ताम्रपुष्पी ३
धावनी ४ अग्निज्वाला ५ सु
भिक्षा ६ पार्वती ७ बहुपुष्पि
का ८ कुमुदा ९ सीधुपुष्पी १०
कुंजरा ११ मद्यवासिनी १२ गुच्छपुष्पी

१३ संघपुष्पी १४ रोध्रपुष्पिणी १५
तीव्रज्वाला १६ वह्निशिखा १७ म
द्यपुष्पा १८ इतिराजनिर्घण्टः धा
तुपुष्पी १९ धातुपुष्पी २० धातु
पुष्पिका २१ धात्री २२ धातुपुष्पिका
२३ इतिशब्दरत्नावली अस्या गुणाः
कटुत्वं उष्णत्वं मदकारित्वं विषघ्न
वाहिकातिसारविसर्पव्रणनाशि
त्वंच इति राजनिर्घण्टः शीतत्वं र
क्तपित्तनाशित्वं इतिराजवल्लभः
धाता * पुं ब्रह्मा इत्यमरः विष्णुः
इतिहलायुधः पालके त्रि इति।
मेदिनी धारकः इति धरणिः
भृगुमुनिपुत्रः तस्य भार्या मेरु
कन्या आयतिः तस्य सुतः मृक
ण्डुः तस्यच मार्कण्डेयः इतिश्री
भागवतं ॥
धातुः पुं शरीरधारक वस्तूनि
तद्यथा कफः वात पित्तं ॥
शरीरदूषणाद्दोषा मलिनीकर
णान्मलाः धारणाद्धातवस्तेस्यु
र्वात पित्त कफा नृप इति वै
द्यकं रसः रक्तं मांसं मेदः अ
स्थि मज्जा शुक्रं महाभूतानि
तद्यथा पृथिवी ॥ ॥

जलं ॥ तेजः वायुः आकाशः
तद्गुणा यथा गंधः रसः ॥
रूपं स्पर्शः शब्दः इंद्रियाणि
यथा चक्षुः श्रोत्रं घ्राणं जि
ह्वा त्वक् अश्मविकृतिः ॥
स्वर्णगैरिक मनःशिलादि श
ब्दयोनिः साच साधु शब्द प्रकृ
तिः भूपच पठ प्रभृतिः स्वर्णा
दिः इत्यमर भरतौ नवधात
वो यथा हेम तारार नागाश्च ता
म्रवंगेच तीक्ष्णकं कांस्यकं कां
तलौहश्च धातवो नव कीर्तिताः
इति सुखबोधः अष्टधातवो ॥
यथा हिरण्यरजतंकांस्यताम्रं
सीसकमेव च रंगमायसं रैत्यं
चधातवोष्टौ प्रकीर्तिताः इति
दानसागरः अपिच सुवर्णं रज
तं ताम्रं लौहकृष्णंच पारदं व
गंचसीसकंचैव इत्यष्टौ देवसंभ
वाः इति वैद्यकं ॥ सप्तधातवो
यथा स्वर्णं रूप्यंच ताम्रंच रंग
यशदमेवच सीसं लौहंच सप्त
तेधातवो गिरिसंभवाः इति भा
वप्रकाशः ताम्रायुत पति यथा
स्मृण तत्वेन मे भूमे कथ्यमान

मयानघे एकाग्रंचित्त माधाय ये
नतां मम प्रिये पूर्वैकमलपत्रा
क्षि गुडाकेशो महासुरः तामहं रू
पं समादाय ममैवाराधने रतः
तेन चह त्वा मयायोगी कंससत्वेनात
रात्मना गुडाकेश महाभाग ब्रूहि
किंकरवाणि ते चक्रेण वधमि
च्छामि त्वया मुक्तेन केशव वेशा
ल्लय तमासस्य शुक्लपक्षेन द्वाद
शी मम तेजोमयं चक्रं बाधयि
ष्यत्यसंशयं तेदेवचक्रेणावि
पाटितो सौ प्रायोपि मां भगवन्
मधातुः तामंत्र तन्मांसम
स्तक्सवर्णमस्थीनि रूप्यवक्त
धातवश्च रंगाश्च सीसं त्रपु धातु
तेस्यं कांस्यं च रीतिश्च मलं स्तते
षां पतन्नागवैतः कार्यं मम प्रि
यकरैः सदा एवं तासं समुत्प
न्ना मितिमे रोचते हि तत् इति व
राहपुराणे हरितालं हरेर्वीर्य्यं
लक्ष्मी वीर्य्यं मनःशिला पारदं
शिववीर्यं स्यात् गंधकं पार्वतीरजः
इति वैद्यकं समोपधातवो यथा मा
क्षिकं तुत्थकाभ्रं च नीलांजनशिला
लकाः रसकश्चेति विज्ञेया एते समो
पधातवः शरीरस्य सप्तधातु भव
समोपधातवो यथा स्तन्यं रजश्च
नारीणां काले भवति गच्छति।
शुद्ध मांसभवः स्नेहो यः सा सं
कीर्तिते वसा स्वेदो दंता स्तथा
केशा स्तथैवौजश्च सप्तमं इति।
धातुभवा ह्येयोपते समोपधातवः
इति सुखबोधः॥
धातुकासीसं क्ली कासीसं इति
हेमचंद्रः॥
धातुघ्नं क्ली कांजिकं इति हेमचंद्रः
धातुनाशनं क्ली कांजिकं इति
त्रिकाण्डशेषः॥
धातुपः पुं शरीरस्य प्रथमधातुः
रस इति ख्यातः इति शब्दचंद्रिका
धातुपुष्पिका स्त्री धातृपुष्पिका
धाइफुल इति भाषा इति शब्दर
त्नावली धातुपुष्पी स्त्री धात।
की इति भावप्रकाशः॥
धातुभृत् पुं पर्वत इति शब्दर
त्नावली धातुपोषके त्रि॥
धातुमाक्षिकं क्ली माक्षिकं इति
राजनिर्घण्टः धातुमारिणी स्त्री
सर्जिका सोहागा इति भाषा॥
इति शब्दचंद्रिका॥
धातुराजकं क्ली रेतः इति श
ब्दचंद्रिका॥

धातुवल्लभं क्ली टंकणं इति राज
निर्घण्टः॥
धातुवादी न् पुं कारंधमी इति
हारावली॥
धातुवैरी न् पुं गंधकः इति शब्द
चंद्रिका॥
धातुशेखरं क्ली कासीसं इति।
हेमचंद्रः॥
धातुपलः पुं कठिनिका इति
हारावली॥
धातृपुत्रः पुं सनत्कुमारः इति
शब्दरत्नावली ब्रह्मणः सनत्कुमा
रे च धातृपुष्पिका स्त्री धातकी।
इत्यमरः धातृपुष्पी स्त्री धातकी
इति शब्दरत्नावली॥
धात्रं क्ली भाजनं इति संक्षिप्तसा
रोणादिवृत्तिः॥
धात्रिका स्त्री आमलकी इति रा
जनिर्घण्टः॥
धात्री स्त्री माता उपमाता क्षितिः
आमलकी इति मेदिनी॥ अथ।
धात्र्याधातु पत्तिकारणं हेदामर
एतान्मुरथस्य विस्फो मोहायते।
दायरुद्रवाकारा दाशक्तिं स्तव
॥ ॥ ॥ ॥
तो देवान् प्रति सा आह अहमे
व त्रिधा भिन्ना तिष्ठामि त्रिविधै
र्गुणैः गौरी लक्ष्मीः स्वधा चेति
रजः सत्वतमो गुणैः तत्र गत्वा
तथा कार्य्यं विधास्यते च ताः स्व
राः ता स्तथा तान् सुरान् दृष्टा
प्रणतान् भक्तवत्सलाः बीजा
नि प्रदर्ददुस्तेभ्यो वाक्यानि जगदुस्त
दा इमानि देवा बीजानि विस्तर्य
गावति वपति निर्वपथ ततः कार्य्य
भवतां सिद्धिमेष्यति ह्वि तेभ्यस्त
त्र बीजेभ्यो वनस्पत्यः स्त्रियोऽभ
वन् धात्री च मालती चैव तुलसी
च त्रयोत्तम धात्र्युद्भवा स्मृता धा
त्री मा भवा मालती स्मृता गौरी
भवा च तुलसी तमः सत्वरजो गु
णैः स्त्रीरूपिण्यो वनस्पत्यो हृ
ष्टो विष्णु स्तदात्रय उत्तस्थौ संभ्र
माद्धृदा रूपातिशयविभ्रमात् अ
स्या माहात्म्यं यथा स्मरणाद्धात्री
माहात्म्यं सर्व्वपापहरं शुभं यमरा
हरिणा प्रोक्तं वशिष्ठं प्रतिनारद
धात्री वत्सरणां धात्रीमात्रवत्
उद्धृतेन प्रयाद्वायुः पयः पाने
स्नानादे धर्म्मसंचय मलक्ष्मीनाश
ने सद्यो प्रत्रनिर्वाण मेवच॥

विघ्नानि नैव जायन्ते धात्री स्नाने
नैवेद्यके तस्मात् त्वं कुरु विप्रेन्द्र
धात्री स्नानं हि यत्नतः प्रयास्य-
सि हरेर्धाम देवत्वं प्राप्य नारद
यत्र यत्र मुनिश्रेष्ठ धात्रीस्नानं स-
माचरेत् तीर्थे वापि गृहे वापि त-
त्र तत्र प्रियः स्थितः धात्रीस्नाना-
नि दिवसे यस्यास्थीनि कलेवरे
प्रक्षालितानि विप्रेन्द्र न स स्याद्ग-
र्भसम्भवः धात्रीफलेन विप्रेन्द्र
येषां केशाश्च रञ्जिताः ते नराः
केशवं यान्ति नाशयित्वा कलेर्म-
लं धात्रीफलं महापुण्यं स्नाने पुण्य-
तरं स्मृतं पुण्यात् पुण्यतरं वत्सभ-
त्तमं मुनिपुङ्गव न गङ्गा न गया
पुण्या न काशी न च पुष्करं एकैव
च यथा पुण्या धात्री माधववासरे
कार्त्तिके मासि विप्रेन्द्र धात्रीस्नानं
समाचरेत् यश्च तज्जलमश्नीयात्
सो ऽश्वमेधमवाप्नुयात् धात्रीफलं
स्मरेद्यस्तु सदैव मुनिसत्तम प्रा-
ग्जन्मनिकृतात् पापात् मुच्यते ।
नात्र संशयः संस्मरेद्यस्तु धात्रीतां
मद्धरति मानवः मुच्यते पातकैः
सर्वैर्मनोवाक्कायसम्भवैः धात्रीफ-
लान्यमावास्यासप्तमीनवमीषु रविवा-
रे च संक्रान्तौ ॥

संस्मरेन्मुनिपुङ्गव यस्य गेहे मुनि-
श्रेष्ठ धात्री तिष्ठति सर्वदा तस्य गे-
हे न गच्छन्ति प्रेत कुष्माण्डराक्षसाः
धात्री स्नाने हरेर्नाम्नि जागरे हरि-
वासरे जन्मवन्ध्यो विनश्येत हय-
मेधायुतं फलं स्नायादामलकैर्य-
स्तु कार्त्तिके हरिवल्लभ परितोषं
समायाति तस्य वै माधवः स्वयं
धात्रीच्छायां समाश्रित्य कुर्य्यात्
श्राद्धं तु यो मुने मुक्तिं प्रयान्ति
पितरः प्रसादात्तस्य वै हरेः मू-
र्द्धि पाणौ मुखे कण्ठे देहे च मुनिस-
त्तम धत्ते धात्रीफलं यस्तु स महा-
त्मा सपुण्यभाक् धात्रीफलकृता-
हारो नरो नारायणो भवेत् यः क-
श्चिद्देहे वा लोके धत्ते धात्रीफलं
मुने प्रियो भवति विष्णोः स मनु-
ष्याणां च का कथा धात्रीफलानि
यो नित्यं वहते करसंपुटे तस्य ना-
रायणो देवो वरमेकं प्रयच्छति
धात्रीफलं न भोक्तव्यं कदाचि-
त् करसंपुटात् य इच्छेद्विपुलान्
भोगानन्ते यो मुक्तिमिच्छति धात्री
फलकृतां मालां कण्ठस्थां यो वहेन्न
हि स वैष्णवो न विज्ञेयो विष्णु-
भक्तिप ॥ ॥

रोपि च तथाज्ञा तुलसी माला
धात्रीमाला विशेषतः तथा रुद्रा-
क्षमालापि धर्मकामार्थमिच्छ-
ता यावत्तिष्ठति कण्ठस्था धात्रीमा-
ला नरस्य हि तावत्तनसि तस्यापि
प्रसन्नो भवति केशवः यावद्दिनानि
वहते धात्रीमालां करे नरः तावद्यु-
ग सहस्राणि वैकुण्ठे वसतिर्भवेत् सर्व-
देवमयी धात्री वासुदेव मनः प्रिया
आरोपणीया सेव्या च सेवनीया स-
दा बुधैः एतत्ते सर्वमाख्यातं धात्र्या
माहात्म्यमुत्तमं श्रोतव्यं च सदा स-
द्भिश्चतुर्वर्गफलप्रदं इति पाद्मोत्त-
रखण्डे १२० अध्यायः अपि च तु-
लसीह्रदमाश्रित्य यायात्स्त्रियं ।
तिरेवताः आमलकाप्यपि प्रात-
तास्तापचवसेति च शुभं वाशु-
भं वापि यत्कर्मामलकीतले क्रि-
यते मानवैर्विप्र भवेत्तत्सर्वमक्षयं
पवित्रैर्नैतैः पत्रैर्धात्र्या यः पूज-
येद्धरिं स मुक्तः पापजालेन साधुम-
लभते हरेः धात्री च तुलसी देवी
नतिष्ठेत्यत्र जैमिने स्थानं तदप-
वित्रं स्यात्तच्च पुण्यक्रियाफलेन
धात्र्या हीनं तुलस्या च तिलैर्यव
समूहं च अलक्ष्मीः पातकं सर्वकलि-
स्नेनेन ॥

तोषितः धात्रीकाष्ठस्य मालां च
यो वहेन्मतिमान्नरः तत्सर्वं फल-
ये प्रोक्तं शुभं वाशुभमेव वा ॥
यस्तु धात्रीफलं भुङ्क्ते मानवो
ऽखिलतत्त्ववित् तेह्यभ्यन्तर-
स्यापि सर्वपापं विनश्यति ॥
धात्रीफलमयी मालां वहते
द्विजसत्तमः ब्रवीमि मुण्डमाहा-
त्म्यं सर्वपापहरं शुभं श्मशानेपि
यदा मर्त्य स्नानस्याद्देवयोगतः
गङ्गामरणजं पुण्यं स प्राप्नोति
न संशयः नित्यं शृङ्गाति यो धात्री-
तुलसीमूलकर्द्दमं दिने दिने
लभेत् पुण्यं सो ऽश्वमेध शताधि-
कं वै धात्रीतले च यो हूते सर्व-
देवगणाश्रयं स ददाति हरेर्गे-
हाते नास्त्यत्र संशयः सर्वदेव-
मयी धात्री विशेषात् केशव-
प्रिया सम्यग्वक्तुं गुणांस्तस्या ब्र-
ह्मनापि न शक्यते इति क्रिया-
योगसारे १२ अध्यायः ॥
धात्रीपत्रं स्त्री तालीशपत्रं इति
राजनिर्घण्टः आमलकीदलं च
धात्रीपुत्रः पुं नटः इति हेमचन्द्रः
उपमाता स्तनश्च ॥
धात्रीफलं क्ली आमलकी इति

जटाधरः ॥
धात्रेयी स्त्री धात्रेयिका इति धा
त्रीशब्दात् स्वेयेईपुप्रत्ययेननि
ष्पन्ना धात्रेयिका स्त्री धात्री धाई
इति भाषा यथा पठेद्धात्रेयिका
वाक्यमाम्मुखी वाप्युदङ्मुखः
इति चतुर्थी प्रकरणे तिथितत्वं
धानकं क्ली धन्याकं इति राजनि
र्घण्टः धाना स्त्री भृष्टयवः धन्या
कं अभिनवः अंकुरः भिन्नः चू
र्णसक्तवः इति मेदिनी हेमचं
द्रौ धानाः स्त्री भृष्टयवः वक्तव
चनांतोयं शब्दः इत्यमरः यवा
स्तु निस्तुषा लाजाः स्मृता धाना
इति स्त्रियां धानाः स्युर्ईजेरा चू
र्णा स्तद्रसदाग्रुरवस्थानाः तथा
मेदः कफच्छर्दिनाशान्धः संप्र
कीर्त्तिताः इति राजनिर्घण्टः
धानाकाः स्त्री धानाः नित्यव
हुवचनांतोऽयं शब्दः इति शब्द
रत्नावली धानाचूर्णं क्ली भृ
ष्टयवचूर्णं सक्तवः इति हेम
चंद्रः ॥ धानी स्त्री पीलुवृक्षः इ
ति राजनिर्घण्टः आधारः धीयते
धार्य्यते ऽनया धारे अनट् ङिता।
दीपू यथा मत्स्यधानी राजधानी
इत्यादि भरतः ॥
धानुष्कः त्रि धनुर्धरः इत्यमरः
धानुष्का स्त्री अपामार्गवृक्षः इ
ति शब्दचंद्रिका ॥
धानुष्यः पुं वंशः इति राजनिर्घ
ण्टः धानेयकं क्ली धन्याकं इति।
राजनिर्घण्टः ॥
धानेयकं क्ली धन्याकं इति जटाधरः
धान्या स्त्री छत्रीका पलाइच इति
भाषा इति शब्दचंद्रिका ॥
धान्यं क्ली चतुस्तिलपरिमाणं इति
शुभंकरः धन्याकं पदिपेलं ॥
सतुषतण्डुलादि धान इति भाषा
तत्पर्य्यायः ओषधं २ ओगाईं ३।
अन्नं ४ अन्धं ५ जीवसाधनं ६ स्तं
वकरिः ७ व्रीहिः ८ नत्र सुकथा
न्यगुणाः त्रिदोषशमनत्वं तेजो
बलातिशयवीर्य्यवृद्धिदात्वंच
शूमी धान्य गुणाः गुरुत्वं हिम
त्वं विबंधदात्वंच ॥
तृणधान्यगुणाः वातात्मकत्वं ॥
शिशिरत्वंच इति राजनिर्घण्टः ॥
धान्यंत्रिविधं हेमतोद्भवः शालिः १
ग्रीष्मजः षष्टिकः २ शरत्काल
भव आशुः ३ एतेषां गुणास्तत्त
त्शब्दे द्रष्टव्याः ॥ वापित ॥

धान्यगुणाः गुरुत्वं अवापित ।
धान्यगुणाः वापितधान्यगुणात्
किंचिद्धीनः रोप्यातिरोप्यधान्य
गुणाः लघुत्व शीघ्रपाकित्वं गुणो
त्तरत्वं अदाहित्वं दोष हरत्वं च।
ल्पत्वं मूत्र विवर्द्धनत्वंच ॥
नव धान्यं अभिष्यन्दि संवत्सरा
त्स्थितं धान्यं लघु संवत्सरद्वया
दूर्द्धं धान्यं वात प्रकोपनं उक्तं
लघुतरं पुंस्त्वयाति शुकधान्यं
शमी धान्यंच यत् सराद्दूर्द्धं प्र
शस्तं शमी धान्यं वर्षादतीतं ॥
वातकृत् उक्तं ॥ अभिनवं तत्
प्रायेण गुरु नवा यवगोधूममा
षतिला हिताः पुराणा विरसा
रुक्षा न तथार्थकराः अन्तर्भव
व्याधिहृतं अपर्य्यागतं अभूमि
जं नवं च धान्यं न गुणवत् अका
लजातं धान्यं विरसं सर्वधान्य प्रक
षणं च इति राजवल्लभः ॥
वृत्तादौ अवत्यागे वर्जनीय धान्या
नि यथा एकादश्यां विशेषेण स्वत्र
माघे परित्यजेत् फलं मूलं जलादी
नि किंचिद्दत्तं प्रकल्पयेत् अन्नं तथा
मसंभूतं तिथि जेयदि जायते धान्या
नि विविधानीह जगत्यां ॥ ॥
शुक्र यत्नः ब्राम माष मसू
राढ्य धान्यकोद्रव सर्षपाः मुद्ग
को राजमाषाश्च लमरो न्नमर
स्तथा यवगोधूम मुद्गाश्च तिलकं
गु कुलत्थकाः गवेधुकाश्च नीवा
रा आतकश्च कलायकाः माणु
को वज्रकोरंकः कीचको वड्कं
स्तथा तिलका श्यामकाद्याश्च
धान्यानि कथितानि वै ॥ एतं
कान्या समुद्भूत मंत्रं भवतिशो
भने अन्नत्यागे व्रते भक्ष मेतद्दे
ववि वर्जयेत् इति पाद्मोत्तरखं
डे । अथ धान्य छेदन दिनं ॥
तत्र तिथयः रिक्तातिरिक्ताः वा
राः रवि शुक्र सोम बुध बृहस्प
तीनां नक्षत्राणि कृत्तिका भर
णी अश्लेषा पूर्वभाद्रपत् धनि
ष्ठा पूर्वषाढा ज्येष्ठा चित्रा उत्तर
फल्गुनी उत्तराषाढा उत्तरभा
द्रपत् एतानि तत्र चंद्रः शोभ
नः लग्नानि वृष सिंह वृश्चिक
कुंभ मिथुन तुला कन्या धनुः
पूर्वार्द्ध स्वकीय जन्मलग्न मक
रसंक्रान्तिकानि अथ धान्य स्थापन दि
ने तत्र नक्षत्राणि भरणी अश्लेषा
आर्द्रा कृत्तिका विशाखा पूर्वफल्गुनी

पूर्वाषाढा पूर्वभाद्रपत् ज्येष्ठा म
घा भिन्नानि नक्षत्राणि शुभग्रहा
णां लग्नानि मकर वृष सिंह वृश्चि
क कुम्भ मिथुन कन्या धनुर्मीन सं
ज्ञकानि अथ धान्यादिवृद्धिदानादि
ने तत्र नक्षत्राणि श्रवणा धनिष्ठा
शतभिषा विशाखा उत्तरफल्गुनी।
उत्तराषाढा उत्तरभाद्रपत् रोहिणी
रेवती पुनर्वसुः पुष्यः अश्विनी ज्ये
ष्ठा एतानि वाराः बुधभिन्नाः इति
ज्योतिषं ॥

धान्यकं क्ली धान्याकं इति राज
निर्घण्टः धान्यकोष्ठकं क्ली धान्य
रक्षार्थगृहं गोला इति भाषा इति ह
लायुधः धान्यचमसः पुं चिपिट
कः इति त्रिकाण्डशेषः धान्यधेनुः
स्त्री दानार्थ धान्य निर्मितधेनुः॥
यथा विषुवे चायने वापि कार्त्ति
क्यां तु विशेषतः तदिदानीं प्रवक्ष्या
मि धान्यधेनुविधिं परं यां दत्त्वा स
र्वपापेभ्यः शशाङ्क इव राहुणा॥
दश धेनु प्रदानेन यत्फलं राजस
त्तम तत्सर्वमेक माप्नोति व्रीहि
धेनु प्रदानतः कृष्णाजिनं ततः
कृत्वा प्राग्वदत्र स न्यसेद्बुधः।
गोमयेनानुलिप्तायां शोभनाया
स्तसंयुता सूर्ययेहृदि मध्यतः।
वेदनिर्घोषमङ्गलैः उत्तमा धान्य
धेनुः स्याद्द्रोणैः श्चापि चतुर्दशैः।
मध्यमा च तदर्द्धेन विज्ञशाठ्येन
कारयेत् चतुर्थांशेन धेन्वावै व
त्सं तु परिकल्पयेत् कर्णबे शुक्ल
शृङ्गे तु राजत तत्र संयुता गोरू
पः पूर्ववद्घ्राणमगुरुं चंदनं तथा
मुक्ताफलमया दंता घृत दोहम
यं मुखं प्रशस्तं पत्र श्रवणा कांस्य
दोहनकान्विता इक्षुयष्टिमयाः
पादाः क्षौमपुच्छ समन्विता ना
ना फल समोपेता रत्नगर्भ सम
न्विता पादुकोपानहौ छत्रे भाज
नं तर्पणं तथा॥ इत्येवं रचयित्वा
तां कृत्वादी पार्चनादिकं पुण्यका
ले च संप्राप्य स्नातः शुक्लाम्बरो गृ
ही त्रिः प्रदक्षिणमाहृत्य मंत्रेणाने
न कीर्त्तयेत् नवविप्र महाभागवे
द वेदाङ्ग पारग॥ यामेतां च मया
दत्तां गृह्णीष्व त्वं द्विजोत्तम प्रीयतां
मम देवेशो भगवान्मधुसूदनः
त्वमेका लक्ष्मि गोविन्दे स्वाहा या
च विभावसोः शक्रे शचीति विख्याता
मेधा मुनिषु सत्तम तस्मात् सर्वमयी
देवी धान्यरूपेण संस्थिता एव मुच्चार्य
तां धेनुं ब्राह्मणाय निवेदयेत् दत्तां प्रद

क्षिणं कृत्वा तं तमापृच्छ्य द्विजोत्तमं
यावच्च पृथिवी सर्वा वसुरत्नानि
भूपते तावत् प्रलयं समाधिकं
व्रीहियेनोश्च तत्फलं तस्माच्चरेद्र
दानमेतद्भुक्तिमुक्तिफलप्रदं इ।
हलोके च सौभाग्यमायुरारोग्य
वर्द्धनं विमानेनार्कवर्णेन किं
किणीरत्नमालिना स्तूयमानोऽप्स
रोभिश्च प्रयाति शिवमन्दिरं यावच्च
स्मरते जन्म तावत् स्वर्गे महीयते
ततः स्वर्गात् परिभ्रष्टो जम्बुद्वीपप
तिर्भवेत् एवं हरेण चोक्तीर्णो श्रु
त्वा वाक्यं नरोत्तम सर्वपापविशु
द्धात्मा रुद्रलोके महीयते इति व
राहपुराणं ॥

धान्यमायः पुं धान्यविक्रयी इ।
ति संक्षिप्तसारव्याकरणं ॥

धान्यवर्द्धनं क्ली वार्द्धुष्यं धानेर
वाडी इति भाषा इति त्रिकाण्ड
शेषः ॥

धान्यराजः पुं यवः इति राज
निर्घण्टः ॥

धान्यबीजं क्ली धन्याकं इति राज
निर्घण्टः ॥

धान्यवीरः पुं माषः इति राज।
निर्घण्टः ॥

धान्यशीर्षकं क्ली धान्यमञ्जरी धा
नेर शीष इति भाषा इति जटाधरः
धान्याकं क्ली धन्याकं इति हेमचन्द्रः
धान्याचलः पुं दानार्थधान्यनि
र्मितपर्वतः तस्य विधानं यथा
प्रथमो धान्यशैलः स्याद्द्वितीयो
लवणाचलः गुडाचलस्तृतीय
स्तु चतुर्थो हेम पर्वतः पंचमस्ति
लशैलः स्यात् षष्ठः कार्पासप
र्वतः सप्तमो घृतशैलश्च रत्नशै
लस्तथाष्टमः राजतो नवमस्त
द्वद्दशमः शर्कराचलः वक्ष्ये वि
धानमेतेषां यथा वदनुपूर्वं।
शः अयने विषुवे पुण्ये व्यती
पाते दिनक्षये शुक्लपक्षे तृती
यायामुपरागे शशिक्षये वि
वाहोत्सव यज्ञेषु द्वादश्या
मथवा पुनः शुक्लायां पंच
दश्यां वा पुण्यर्क्षे वा विधानतः
धान्य शैलादयो येपि देयाः॥
शास्त्र विज्ञानतो तीर्थे वायतने
वापि गोष्ठे वा भवनाङ्गने मंडपं।
कारयेद्भक्त्या चतुरस्रं मुदङ्मुखं
प्रागुदक् प्रवणं तद्वत् प्राङ्मुखं
च विधानतः गोमयेनानुलिप्ता
यां भूमावास्तीर्य वैकुशान् तन्म

येपर्वतंऋष्याद्विष्कंभ पर्वतान्वितं
धान्यद्रोणसहस्रेण भवेद्गिरिरिहो
त्तमः मध्यमः पंचशतिकः कनि
ष्ठः स्यात्त्रिभिः शतैः मेरुर्महाव्री
हिमयस्तु मध्ये सुवर्णवृक्षत्रय
संयुतः स्यात् पूर्वेण मुक्ताफल
वज्रयुक्तो याम्ये च गोमेदक पु
ष्परागैः पश्चाच्च गारुत्मतनील
रत्नैः सौम्येन वैडूर्य सरोजरागैः
श्रीखंडखंडैरभितः प्रवालल
तान्वितः शुक्तिशिलातलः स्या
त् ब्रह्माथ विष्णुर्भगवान्पुरारि
र्दिवाकरोप्यत्र हिरण्मयः स्या
त् मूर्द्ध्यवस्थानममत्सरेण
कार्यास्त्वनेकैश्च पुनर्द्विजौघाः
चत्वारि शृंगाणि च राजतानि नि
तंवभागेष्वपि राजतः स्यात् त
थेक्षुवंशावृतकंदरस्तु घृतोदक
प्रस्रवणैश्च दिक्षु शुक्लांवराण्य
प्युपरावलीस्यात् पूर्वेण नीलानि
च दक्षिणेन वासांसि पश्चादथ
कर्वुराणि रक्तानि चैवोत्तरतो घ
नाली रौप्यान्महेंद्रप्रमुखांस्तथाष्टौ संस्था
प्य लोकाधिपतीन्क्रमेण नानाफला
लीच समंततः स्यान्मनोरमंमाल्यवि
लेपनंच वितानकंचोपरि पंचवर्णम।
म्लान पुष्पाभरणंसितंच इत्यंनिवेश्यामरशैलमग्र्यं ॥

मेरोस्तु विष्कंभगिरीन् क्रमेण तुरी
यभागेन चतुर्दिशंच संस्थापयेत्
पुष्पविलेपनाढ्यान् पूर्वेण मंद
रमनेकफलावलीभिर्युक्तं यवैः
कनकभद्रकदम्बचिह्नैः कामेन
कांचनमयेन विराजमानमाकार
येत् कुसुमवस्त्रविलेपनाढ्यं क्षी
रारुणोदसरसाथवनेनचैवरौप्ये
णशक्तिघटितेन विराजमानं या
म्येन गंधमदनश्च निवेशनीयो गो
धूमसंचयमयः कलधौतजंवा हे
मेन यक्षपतिनाद्रुतमानसेन व
स्त्रैश्च राजतवनेन च संयुतः स्यात् प
श्चात्तिलाचलमनेकसुगंधिपुष्पं सौ
वर्णपिप्पलहिरण्मयहंसयुक्तं ॥
आकारयेद्रजतपुष्पवनेन तद्वद्वस्त्रा
न्वितं दधिसितोदसरस्तथाग्रे संस्था
प्य तं विपुलशैलमथोत्तरेण शै
लं सुपार्श्वमपि माषमयं सवस्त्रं पु
ष्पैश्च हेमवटपादपशेखरं तमाकार
येत् कनकधेनु विराजमानं मा
क्षीकभद्रसरसाच वनेन तद्वद्रौप्ये
णभास्वरवता च युतं विधाय।
होमश्चतुर्भिरथवेदपुराणविद्भि
र्दान्तैरनिंद्यचरिताकृतिभिर्द्विजेंद्रैः
पूर्वेण हस्तमितमत्र विधाय कुण्ड

कार्यस्तिलैर्यवघृतेन समित्कुशैश्च
रात्रौ च जागरमनुद्धतगीततूर्यैरा
वाहनंच कथयामि शिलोच्चया।
नां त्वं सर्वदेवगणधामनिधे विरु
द्धमस्मद्गृहेष्वमर पर्वत नाशया
शु क्षेमं विधत्स्व कुरु शांतिमनु
त्तमां नः संपूजितः परमभक्तिमता
मया हि त्वमेव भगवानीशो ब्रह्मा
विष्णुर्दिवाकरः मूर्तामूर्त्तजगद्बीज
त्वंनः पाहि सनातनः यस्मात्त्वं लोक
पालानां विश्वमूर्त्तेश्च मंदिरं रुद्रा
दित्यवसूनांच तस्माच्छांतिं प्रय।
च्छ मे यस्मादशून्यममरैर्नारीभि
श्च शिरस्तव तस्मान्मामुद्धराशेष
दुःखसंसारसागरात् एवमभ्यर्च्य
तं मेरुं मंदरं चाभिपूजयेत् ॥ य
स्माच्चैत्ररथेनत्वं भद्राश्वेन विशे।
षतः शोभसे मंदर क्षिप्रमतस्तु
ष्टिकरो भव यस्माच्चूडामणिर्ज
म्बूद्वीपे त्वं गंधमादन गंधर्ववनशो
भावानतः कीर्त्तिर्दृढास्तु मे य
स्मात्त्वं केतुमालेन वैभ्राजेन वने
न वा हिरण्मयाश्वत्थशिरस्त।
स्मात् पुष्टिर्ध्रुवास्तु मे उत्तरैः
कुरुभिर्यस्मात् सावित्रेण वनेन
च सुपार्श्वराजसे नित्यमतः श्रीर
क्षयास्तु मे ॥ एव ॥ ॥

मामस्त्वतान्सर्वान् प्रभाते विमले
पुनः स्नात्वाथ गुरवे दद्यान्मध्य
मंपर्वतोत्तमं विष्कम्भपर्वतान्द
द्यादृत्विग्भ्यः क्रमशो मुने गाश्च
दद्याच्चतुर्विंशदथवा दश नारद
शक्तितः सप्तवाष्टौ वा पंच दद्याद
शक्तिमान् एकापि गुरवे देया क
पिलाथपयस्विनी पर्वतानामशे
षाणामेष एव विधिः स्मृतः तएव
पूजने मंत्रास्तएवोपस्करा मताः
ग्रहाणां लोकपालानां ब्रह्मादी
नांच सर्वदा स्वमंत्रेणैव सर्वेषु हो
मः शैलेषु पठ्यते उपवासी भवेन्नि
त्यमशक्तोनक्तमिष्यते विधानंस
र्वशैलानांक्रमशः शृणु नारद ॥
दानकालेचयेमंत्राः पर्वतेषुच।
यत्फलं अन्नंब्रह्मयतः प्रोक्तमन्ने
प्राणाः प्रकीर्त्तिताः अन्नाद्भवंति
भूतानि जगदन्नेन वर्त्तते अन्नमे
व ततो लक्ष्मी रन्नमेव जनार्द्दनः
धान्यपर्वतरूपेण पाहि तस्मान्न
गोत्तम अनेन विधिना यस्तु द
द्याद्धान्यमयं गिरिं मन्वन्तर शतं
साग्रं देवलोके महीयते अप्सरो
गण गंधर्वैराकीर्णेन विराजता ॥
विमानेन दिवः पृष्ठमायाति सुर
सेवितः ततः कर्मक्षयेराज मा ॥

ग्रोतीहनसंशयः इतिमत्स्य ॥
पुराणं ॥
धान्याम्लं क्ली कांजिकं इत्यमरः
धान्याम्लं शालिचूर्णानां कोद्र
वादिकृतं भवेत् धान्याम्लं धान्य
योनित्वात् प्रीणनं लघुदीपनं
अरुचौ वातरोगेषु सर्वेषामेवाप
नेहितं इतिभावप्रकाशः ॥
धान्यारिः पुं मूषिकः इतिराज
निर्घण्टः धान्यस्पर्शश्रोत्रि ॥
धान्यात्तमः पुं शालिधान्यं इति
राजनिर्घण्टः ॥
धाम न क्ली गृहं देहः त्विट् ॥
प्रभावः इत्यमरः रश्मिः ॥
स्थानं जन्म इति मेदिनी ॥
धामकः पुं माषकपरिमाणं
इति वैद्यकपरिभाषा धाम ।
निधिः पुं सूर्यः इतिजटाधरः
धामनी स्त्री धमनी इति शब्द
चंद्रिका ॥
धामार्गवः पुं अपामार्गः
इत्यमरः ॥
घोषकः इति मेदिनी पीत
घोषकः इतिरत्नमाला ॥
धाय्यः त्रि धारणकर्त्ता इति
मुग्धबोधव्याकरणं ॥ ॥

धाय्याः त्रि धारणकर्त्ता पोषणकर्त्ता
यथा भूरसिभूमिरस्यदितिरसिवि
श्वस्यधाय्या इत्याद्यधिवासमंत्रः ॥
धाय्यः पुं पुरोहितः इतिमुग्धबो
धव्याकरणं ॥
धाय्या स्त्री अग्निसमिन्धनार्थऋक्
अग्निप्रज्वालनमंत्रः इत्यमरः ॥
धारं क्ली वर्षोद्भवंजलं तद्द्विविधं
गांगं १ सामुद्रंच २ यथा यदा स्या
दाश्विने मासि सूर्य्यः स्वातीविशा
खयोः तदाम्बु जलदैर्मुक्तं गांग
मुक्तं मनीषिभिः अन्यदाम्लगाशी
बीदि नक्षत्रेषु यदम्बुदैः ।
अभिवृष्टमिदं तोयं सामुद्र मिति
संज्ञितं तयोर्गुणा कृतप्रदंपित्तक
फापहंच निर्दोषं मिष्टं लघु तच्च
नित्यं गुणाधिकं व्योम्नि गृहीतमा
त्रः सामुद्रं सलिलंशीतंकफ ।
वातकरंगुरु चित्रायामाश्विने त
च्च गुणाढ्यं गांग वद्भवेत् ॥
पतितं भुवि तत्तोयं गांगंसामु
द्रमेव वा स्वस्वाश्रयवशात्त ॥
छेदन्यदन्यद्रसादिकं इति
राज निर्घण्टः ॥

\+ गांगंजलं जलं स्वादु सुशीतलंच

1519

धारः पुं शरावान्तरे ऋणं इतिमे
दिनी जलधरासारवर्षणं इति
हेमचंद्रः प्रान्तः गभीरः इति
शब्दरत्नावली ॥
धारकः पुं कलसः तस्योत्पत्ता
दि यथा ब्रह्मोवाच उत्पत्तिल
क्षणमानं कथयामि महामुने
धारकाः कलसाश्चैव येनलोके
प्रकीर्त्तिताः अमृतेमथ्यमानेतु
सर्वदेवैः सुरासुरैः मन्थानंमेर
रुंकृत्वा नेत्रं कृत्वा तु वासुकिं उ
त्पन्नमस्तेतत्रमहावीर्यपराक्र
मे तस्मायंधारणार्थायकलसः
परिकीर्त्तितः कलां कलां गृ
हीत्वावैदेवानांविश्वकर्मणा ।
निर्म्मितोऽयं सुरै र्यस्मात् कल
सस्तेन उच्यते कलसस्य मुखे ब्र
ह्मा ग्रीवायांतु महेश्वरः मूले ।
तु संस्थितो विष्णु र्मध्ये मातृगणाः
स्थिताः शेषास्तु देवताः सर्वा
वेष्टयंतिचतद्दिशं कुक्षौतु साग
राः सप्तसप्तद्वीपास्तुसंश्रिताः न
क्षत्राणिग्रहाः सर्वे तथैव कुलपर्व
ताः हिमवान् हेमकूटश्च निषधो
मेरुरेवच रोहितो माल्य वन्तश्च
स्तूर्यकोनिश्च पर्वताः गंगा सर

स्वती सिंधुः सुभगा यमुना न
दी ऐरावतीशतद्रुःतथा वै
तरणीनदी गोदावरी नर्मदाच
महीनाममहानदी कुरुक्षेत्रंप्र
यागश्चपुष्करंसेतुदकं अमरे
श्वरः पुण्डरीकं गंगा सागर प
वच पृथिव्यां यानि तीर्थानि
कलसे निवसंति ते शुद्धाः
शांतिश्च पुष्टिश्च प्रीतिर्गायत्रि
रेवच ऋग्वेदोऽथ यजुर्वेदः
साम वेदस्तथैवच अथर्व वे
द संहिताः सर्वे कलस संस्थि
ताः नवैव कलसाः पुण्याः
शंभुमूर्त्ति समुद्भवाः गोभ्यो
पगोभ्यो मरुतः स्वस्वदश्च त
थापरः मनोहरः खलभद्रः पं
चमः परिकीर्त्तितः विरजस्त
नुहृषश्चषष्ठसप्तमकावुभौ ॥
अष्टमस्त्विद्वियोपेतो नवमो
विजयः स्मृतः नवैवकलसाः
ख्याता अधिदेवं निबोधत ॥
मृणावत स यथा तेषां दिशां
मासो व्यवस्थितः नवमोयः समा
ख्यातो विजयो नाम नामतः शिव
स्तत्र स्थितः साक्षात्सर्वपाप हरः स
र्भः हितीन्द्रो ज्येष्ठ कलसो हितो
योजल संभवः तृतीयःपवन ॥

स्चैव चतुर्थस्तु हुताशनः पंच मोयजमानस्तु षष्ठस्त्वाकाशसं भवः सोमस्तु सप्तमः प्रोक्तआदि त्यश्चनथाष्टमः एते चोत्पादिता देवाः शिवेनाधिष्ठिताः पुरा ईड स्यमूर्त्तय आशो सूर्य्यातानवमः शिवः क्षितीडःपूर्वतोन्यास्यःप श्चिमेजलसंभवः वायव्येवायवो न्यास्याग्नेये अग्नि संभवः नैर्ऋ तेयजमानस्तु ऐशान्याकाशसंभ वः सोम्य उत्तरतो योज्य सौरंदक्षि णतोन्यसेत् मध्येवंकलसानां तुसर्वदृपंविचिंतयेत् कलसा नांमुखेब्रह्मा ग्रीवायां विस्तुरेव हि मध्ये मातृगणाः सर्वेसंह्लादेवाश्च पन्नगाः ऊर्द्ध्वेतु सागरास्तेषांस महीपाचमेदिनी श्रियाचैवतथो माचगंधर्वाश्चयक्षाः ॥ पंचभू तास्तथाधारास्तेषामवक्रताः स्थिताः पूर्णाः पूतेन तोयेन सि द्धास्त्वेकांतलोमुने सरित्सरः स्वानेनतडागेनजलेनवा वापी कूपोद्भवेनवा सामुद्रेणसुखाव हाः सर्वमंगलमांगल्याः सर्वकि ल्विषनाशकाः अभिषेके सदाशा ताः कलसाईदृशाः शुभाः यात्रा विवाहकालेवा प्रतिष्ठा यज्ञकर्म णि योजनीया विशेषेण सर्वकाम प्रसाधकाः ग्रहान् धारयते यस्मा न्मानरा विविधास्तथा इतिनाश्रम स्वाचोरास्तेन ते धारकाः स्मृताः एकैकांतकलंमूर्त्तो क्षित्यादीनां यथाक्रमं संस्थाप्य संस्थिता यस्मा त्तेनतेकलसाः स्मृताः हैमराजत ताम्रावास्मन्मयालक्षणान्विताः पंचमांगुलवैपुल्य मुत्सेधः षो डशांगुलः कलसानांप्रमाणंतु मख महांगुलभवेत् इतिदेवीपुराणं धारणकर्त्तरि धारणं क्ली विधारणं धरण इति भाषा इति मेदिनी ॥

धारणा स्त्री बुद्धिः इतिराजनिर्घंटः न्यायपथस्थितिः तत्पर्य्यायः सं स्था २ मर्य्यादा ३ स्थितिः ४ इत्यमरः योगांग विशेषः इतिमेदिनी तत्तत्स द्वितीय वस्तुन्यंतरेंद्रिय धारणं इति वेदांतसारः धेयेचित्तस्यस्थिरबंध ने इति हेमचंद्रः तस्मात् समस्त शक्तीनां माधारे तत्र चेतसः ॥ कुर्वीत संस्थितिं सातु विज्ञेया सुद्धधारणा इति विस्नु ॥ । पुराणं ॥

धारणी स्त्री नाडिका बुद्धोक्तमंत्र भेदः इति मेदिनी श्रेणी इति हेम चंद्रः ॥

धारणीया स्त्री धरणीकंदः इति राजनिर्घंटः धार्य्यत्रि ॥

धारयित्री स्त्री पृथिवी इति शब्द रत्नावली ॥

धारा स्त्री अश्वानांपंचधागतिः। तद्यथा आस्कन्दितं १ धौरितकं २ रेचितं ३ वल्गितं ४ प्लुतं ५। इत्यमरः सैन्याग्रिमस्कंधः छटा। दिक्छिद्रं संततिः द्रवस्यप्रपातः खड्गादेर्निशितमुखं इति मेदिनी उत्कर्षः रथचक्रं इतिहेमचंद्रः यशः अतिवृष्टिः समूहः इति शब्दरत्नावली घनासारवर्षं। णं सदृशः इतिविश्वः दक्षिण देशस्य पुरीविशेषः इतिविक्र मचरितं अथज्वरादिशांत्यर्थं। श्रीनरसिंहादिमूर्ध्निजलधाराप तनविधिः तथा महाज्वरग्रस्ते धारांदेवस्यमूर्द्धनि संतन्तानार सिंहस्यकुर्य्याद्वा कारयेत् द्विजैः होमंच भोजनंचैव तस्यदोषःप्र शाम्यति इति नृसिंह पुराणं

धाराकदम्बः पुं कदम्बवृक्ष। प्रभेदः ॥ ॥ केलिकदम इति भाषा तत्पर्य्या यः प्रावृष्यः २ पुलकी ३ भृङ्ग वल्लभः ४ मेघाभः ५ प्रियकः ६ नीपः ७ प्रावृषेण्यः ८ कलंबकः ९ इतिराजनिर्घंटः धाराकदंबकः ए इतित्रिकाण्डशेषः ॥

धाराङ्कुरः पुं नाशीरः शीकरः घनोपलः इति मेदिनी ॥

धाराङ्गः पुं तीर्थं खड्गः इति। हेमचंद्रः ॥

धाराटः पुं चातकः मेघः तुरंगः मत्तहस्ती इतिशब्दरत्नावली ॥

धाराधरः पुं मेघः खड्गः इतिमे दिनी धाराफलः पुं मदनवृक्षः इति राजनिर्घंटः ॥

धारावनिः पुं वायुः इति त्रिका ण्डशेषः ॥

धाराविषः पुं खड्गः इतित्रिका ण्डशेषः ॥

धारासंपातः पुं महावृष्टिः तत पर्य्यायः आसारः २ इत्यमरः ॥

धारास्नुही स्त्री त्रिधारस्नुही नेकांटासिज इतिभाषा इतिरा जनिर्घंटः धारिणी स्त्री धरणी इति शब्दरत्नावली शाल्मलिव तः इति शब्दचंद्रिका ॥

धारी न पुं पीलुवृक्षः इतिजटाधरः
धारविशिष्टे त्रि ॥
धारुः त्रि धानकर्त्ता इतिजटाधरः
धार्त्तराष्ट्रः पुं कृष्णवर्णचंचुचरण
युक्तहंसः गैंड्डिहांस इति भाषा।
इत्यमरः सर्पविशेषः धृतराष्ट्र
पुत्रः इतिमेदिनी ॥
धार्त्तराष्ट्रपदी स्त्री हंसपदी इ
तिराजनिर्घण्टः ॥
धार्म्मिकः त्रि धर्मशीलः तत्पर्य्या
यः देवधुः २ इति जटाधरः ॥
धार्य्यं त्रि धारणीयं यथा धाता
नुराध वस्त्रपुष्पविशाखहस्तावि
त्रोत्तराश्विपवनादिभिरेवतीषु ज
न्मर्त्ते जीव बुध भृगु दिना स्त्रवा
दौ धार्य्यनवंवसनमीश्वरविप्रत
यो इति समयप्रदीपः ॥
धाव उ ऊ. जवे शीघ्रगतौ स्वजि
भृद्धीकरणे इतिकविकल्पद्रुमः
धावकः त्रि धावनकर्त्ता शीघ्र
गमनकर्त्ता धाउडिया इतिभाषा
इतिधावधातोर्ण्वकप्रत्ययेनिनि
ष्पन्नः धावनं क्ली गमनं
शुद्धिः इति मेदिनी ॥
धावनिः स्त्री पृश्निपर्णी ॥
इत्यमरः ॥ ॥

धावनिका स्त्री कंटकारिका इ
तिरत्नमाला ॥
धावनी स्त्री पृश्निपर्णी इतिमेदि
नी कंटकारी धातकी इति राज।
निर्घण्टः ॥
धावितः त्रि गतः मार्ज्जितः इति
धावधातोःक्तप्रत्ययेन निष्पन्नः
धासाः स पुं पर्वतः इति वैदिक
प्रयोगः ॥
धि श धृतौ इति कविकल्पद्रुमः ॥
धिक् अ निर्भर्त्सने निंदा इत्यमरः
धिक्कारः पुं धिक् तत्पर्य्यायः।
नीकारः २ अवहेलं ३ अमाननं ४
क्षेपः ५ निकारः ६ अनादरः ७
इति शब्दरत्नावली ॥
धिक्कृतः त्रि निर्भर्त्सितः असत्क
रणादिना धिगित्यस्य करणं धि
क्कारो निंदा धिगितः धिक्कृतः धि
क्कृतो इति भर्त्सितो धिक्कृत इति
धावन् इतिभरतः तत्पर्य्यायः ॥
अपध्वस्तः २ इतिप्राणिवर्गे अमरः
निंदितमात्रे कृत धिक्कारस्यप्राणि
वर्गोक्तस्य पर्य्यायान्तर मिदं
अप्राणि विषयार्थं धिगस्तुतो
इति कृतः शब्दितो धिक्कृतः ॥
इतिभरतः ॥ ॥

४

तत्पर्य्यायः अवकीर्णः २ इति
विशेष्यनिघ्नवर्गे अमरः ॥
धिक्क्रिया स्त्री निंदा इति हेम।
चंद्रः धिग्वणः पुं वर्णसंकरवि
शेषः तस्य चर्मकार्य्यं सत ब्राह्म
णाद्योयोगवांजातः इति मनुः।
धियांपतिः पुं पूर्वजिनविशेषः
मंजुघोष इति ख्यातः इति त्रि
काण्डशेषः आत्मा ध्यातएव
धियाम्पतिरितिप्रयोगदर्शनात्
धिव ई न प्रीतौ गतौ इति क
विकल्पद्रुमः ॥
धिष लिङ् रवे इतिकविकल्प।
द्रुमः धिषणः पुं बृहस्पतिः इ
त्यमरः धिषणा स्त्री बुद्धिः इत्य
मरः धिष्ण्यं क्ली स्थाने गृहे नक्ष
त्रे अग्निः इत्यमरः शक्तिः इति
मेदिनी ॥
धिष्ण्यः पुं अग्निः शुक्राचार्य्यः।
इतिशुक्रकाण्डे भरतः ॥
धिष्ण्यं क्ली धिष्ण्यं इत्यमरटीका
यांभरतः हेमचंद्रश्च ॥
धिन्व ऊ. संदीपे क्लेशो जीवे इति
कविकल्पद्रुमः ॥
धी ऊ. य ङो आधारे अनादरे ॥

इति कविकल्पद्रुमः ॥
धी स्त्री बुद्धिः इत्यमरः धी ॥
तः त्रि पीतः इतिधे धातोः क्त
प्रत्ययेन निष्पन्नः ॥
धीतिः स्त्री पिपासा इतिहेमचंद्रः
धीदा स्त्री कन्या मनीषा इति।
हेमचंद्रः ॥
धीन्द्रियं क्ली ज्ञानेंद्रियं तद्यथा
मनः १ नेत्रं २ श्रोत्रं ३ त्वक् ४
रसना ५ घ्राणं ६ इत्यमरः ॥
धीमान् पुं बृहस्पतिः पंडितेत्रि
इतिमेदिनी ॥
धीमती स्त्री बुद्धिमती इत्यमरः
धीरं क्ली कुंकुमं इति मेदिनी ॥
धीरः पुं ऋषभौषधिः इति रा
जनिर्घण्टः बलिराजः इति श
ब्दरत्नावली ॥
धीरः त्रि धैर्य्यान्वितः स्वैरः पं
डितः इतिमेदिनी बलयुतः ॥
इति शब्दरत्नावली मंदः इति
त्रिकाण्डशेषः विनीतः इति संदि
प्तसारोणादिवृत्तिः ॥
धीरत्वं क्ली धीरता यथा शामल्यो
दार्य्यमाधुर्य्य शोभा धीरत्वकांतयः
दीप्तिश्चायत्नजा भाव हाव हेलाः

स्त्रियोंगजाः इति हेमचंद्रः।
धीरपत्नीस्त्री धरणीकंदः इति
राजनिर्घण्टः ॥
धीरस्कंधः पुं महिषः इतिहे
मचंद्रः ॥
धीरा स्त्री काकोली महाज्यो
तिष्मती इतिराजनिर्घण्टः।
मानावस्थायांमध्या प्रगल्भा।
नायिका भेदः अस्या लक्षणं
व्यंग्य कोप प्रकाशा धीरा।
मध्याया धीरायाः कोप व्यं
जिकागीः प्रौढा धीरा यास्तु
रत्यावौदास्य सा द्विविधा ज्ये
ष्ठाकनिष्ठाच मध्या धीरा य।
था लोलालि पुंजे व्रजतो नि
कुंजे स्फारा बभूवुः श्रमवारिधा
राः देहेसमीहे भवतो विधातुं।
धीरं समीरं नलिनी दलेन प्रौ
ढाधीरा यथा नो तल्पं भजसे
न जल्पसि सुधाधारानुकारा गि
रो दृक्पातं कुरुषेनवा परिजने
कोप प्रकाशच्छलात् इत्थंकेतक
गर्भगौरिदयिते कोपस्य संगोपनं
किंस्यादेव नचेत् पुनः सहचरी कु
वीत सा विस्मितं इति रसमंजरी
धीराधीरा स्त्री मानावस्थायाम

प्रगल्भा नायिका भेदः अस्या।
लक्षणं व्यंग्याव्यंग्य कोप प्रका
शा मध्याया धीराधीरायाः को
पव्यंजिके वचन रुदिते। प्रौ
ढा धीराधीराया रत्यावौदास्य त
र्जन ताडनादिव कोपस्य प्रका
शकं सा द्विविधा ज्येष्ठा कनिष्ठा
च मध्याधीराधीरा यथा कां
तानुरागा चतुरोसि मनोहरोसि
नाथोसि किंच नवयौवन भूषि
तोसि इत्थंनिगद्य सहसा वद
ने प्रियस्य निःश्वस्य बास्प ललि
तानिहिता दृगंताः प्रौढाधीरा
धीरा यथा तल्पोपांत मपेयुषि
प्रियतमे साचीकृत ग्रीवया कांकु
काकुल वाचि साचि हसितं स्फु
र्जत्कपोल श्रिया हस्तन्यस्तकरे
पुनर्मृगदृशालाक्षारसक्षालित
प्रौष्ठीप्रेष्ठमरुत्थमांसलरुचो विस्फा
रिताष्ट्रयः इति रसमंजरी ॥
धीललितिः स्त्री दुहिता इति हारावली
धीवा ने पुं स्त्री धीवरः यथा वकु
धीववी वकुधीवा इति मुग्धबोधं
धीवरः पुं कैवर्त्तः इत्यमरः ॥
धीवरी स्त्री धीवरपत्नी कैवर्त्ती

इति मुग्धबोधं मत्स्यवेधिनी
इत्युणादिकोषः ॥
धीशक्तिः स्त्री बुद्धिसामर्थ्यं
तत्पर्य्यायः निष्क्रमः २ इत्यम
रः साचाष्टधा यथा शुश्रूषाश्र
वणंचैवग्रहणं धारणं तथा ऊ।
हापोहार्थविज्ञानं तत्वज्ञानंच धी
गुणाः इति भरतः ॥
धीसखः पुं मंत्री इति हेमचंद्रः
धीसचिवः पुं मंत्री इत्यमरः ॥
धु न न कम्पे इति कविकल्पद्रु
मः धुः स्त्री कम्पने इत्येकाक्षरको
षः धुतः त्रि त्यक्तः विधूतः इ
ति मेदिनी ॥
धुनिः स्त्री नदी इत्यमरटीकायां
भरतः ॥
धुनी स्त्री नदी इत्यमरः धुनी
नाथः पुं समुद्रः इति राज।
निर्घण्टः ॥
धुन्धुमारः पुं कुवलयाश्वराजः
सत्वहृहृदश्वपुत्रः इति पद्मपुरा
णं शक्रगोपः गृहधूमः पहालि
कः इति मेदिनी ॥
धुरंधरः पुं धवद्रुमः इति रत्न
माला वृष लांगलादिभारवोढा
तत्पर्य्यायः धूर्वहः २ धुर्य्यः ३ धौरेयः

४ धुरीणः ५ इत्यमरः धुर्वोढ
कमात्रे त्रि ॥
धुरा स्त्री धूः भारः इत्यमरटी
कायां भरतः ॥
धुरीणः त्रि भारवाहः इत्यमरः
धुरीयः पुं अनड्वान् इति राज
निर्घण्टः भारवोढरि त्रि ॥
धुर्य्यः त्रि धुरंधरः इत्यमरः ऋ
षभौषधौ अनडुहि च पुं इति
राजनिर्घण्टः ॥
धुर्वे ई हिंसे इति कविकल्पद्रु
मः धुवका स्त्री ध्रुवका धुया
इति भाषा इत्युणादिकोषः ॥
धुवनः पुं अग्निः इति सिद्धां
तकौमुदी ॥
धुवित्रं क्ली यज्ञाग्नि ज्वालना
र्थमृगचर्मीरचितव्यजनं इ।
त्यमरः ॥ धुस्तूरः पुं धुस्तू
रः इत्यमरटीकायां भरतः ॥
धुस्तूरः पुं क्षुपविशेषः धुत
रा इति भाषा तत्पर्य्यायः उन्म।
त्तः २ कितवः ३ धूर्त्तः ४ कन
काह्वयः ५ मातुलः ६ मदनः ७
इत्यमरः धत्तूरः ८ इति हेमचंद्रः
शठः ९ मातुलकः १० श्यामः ११
शिवशेखरः १२ स्वर्णचूडः १३ का

हलाप्रियः १४ खलः १५ कंव
फलः १६ मोहनः १७ कलभः १८
मत्तः १९ शैवः २० इतिराजनिर्घ
ण्टः देविका २१ नटी २२ महा
मोही २३ शिवप्रियः २४ अस्य
गुणाः मदवर्णाग्निवातकारित्व
ज्वरकुष्ठकालिताव्रणश्ले
ष्मकण्डूकृमिविषनाशित्वं क
षायत्वंमधुरत्वं तिक्तत्वं उष्णत्वं
गुरुत्वंच इतिभावप्रकाशः क
टुत्वं कांतिकारित्वं त्वग्दोषत्व
र्त्तूभ्रमनाशित्वंच इति राजनि
र्घण्टः मूर्च्छाकारित्वं वह्निपि
त्तनाशित्वंच इतिराजवल्लभः
धूस्त उ: संदीपने क्लेशे जीवे
इति कविकल्पद्रुमः ॥

धू त्त
धू नति
धू शिक
धू नत्ति } कम्पे इतिकविकल्पद्रुमः।

र धूः स्त्री यानमुखं रथादेर
ग्रभागः इत्यमरः भावः चिंता
इत्येकाक्षरकोषः ॥
धूकः पुं वायुः इत्युणादिको
षः धूर्त्तः कालः इति संक्षिप्त
सारोणादिवृत्तिः ॥ ॥

धूतः त्रि कंपितः भर्त्सितः इ
तिमेदिनी त्यक्तः इत्यमरः ॥
तर्कितः इतिधरणिः ॥
धुतः त्रि कम्पितः धूधातोः क्तः
ल्वादित्वान्नस्य नादेशः इति संक्षि
प्तसारव्याकरणं ॥
धूनकः पुं वह्निवल्लभः धूना इ
तिभाषा इतित्रिकाण्डशेषः ॥
धूननं क्ली कम्पनं काँपान इति
भाषा इतिव्युत्पत्ति धूधातोरनदास
र्थं धूनिः स्त्री कम्पनं धूधातोः।
क्तिस्थाने ल्वादित्वान्निः इति कवि
कल्पद्रुमटीकायांदुर्गादासः ॥
धूप क दीप्तौ इतिकविकल्पद्रुमः
धूप तापे इतिकविकल्पद्रुमः।
धूपः पुं गंधद्रव्यविशेषोत्थधूम
स्तद्विशिष्टे तत्पर्य्यायः गंधपिशा
चिका २ इतिहेमचंद्रः षडंगधूपो
यथा गुग्गुल्वगुरु उशीर शर्करा
मधुचंदनैः धूपयेदाज्यसंमिश्रैर्नी
चैर्देवस्य देशिकः अन्यच्च सिता
ज्यमधुसंमिश्रं गुग्गुल्वगुरुचंदनं
षडंग धूप मेतत्तु सर्व देवप्रियं
सदा दशांगो यथा रोग रो
गहर रोगद केशाः स्वरतरु ॥

जत्त लघु पत्र विशेषाः वक्रवि
वर्ज्जितवारिज मुद्रा धूपवर्त्तिरि
ह सुंदरि भद्रा अन्यच्च मधुमुक्त
हुतंगंधो गुग्गुलागुरुशैलजं स
रलं सिल्हः सिद्धार्थ दशांगो धूप
उच्यते षोडशांगो यथा गुग्गुलं
सरलं दारु पत्रं मलय संभवं की
वेरमगुरुकुष्ठंगुडं सर्ज्जरसंघनं ह
रीतकीनखीलाक्षाजटामांसीच
शैलजं षोडशांगंविदुर्धूपंदैवे।
पित्र्येच कर्म्मणि इति तंत्रसारः
केशवाचार्य्यो षोडशांग धूपो।
यथा मस्तकं गुग्गुलुः कुष्ठं
कर्पूरं मलयोद्भवं देव दारु
जटामांसी जातीकोषंच वाल।
क मुरामांसी त्वगुरुकं त्वगुशी
रंच केशरं एला तथा तेजपत्रं
सर्वमेतत्समाख्यातं धूपोऽयं षोड
शांगः स्याद्गोविंद प्रीतिकारकः
द्वादशांगो यथा गुग्गुलश्चंद।
नं पत्रं कुष्ठंचागुरु कुंकुमं ॥ जा
तीकोषंच कर्पूरं जटामांसीच
वालकं त्वगुशीरंच धूपोऽसौ
द्वादशांगः प्रकीर्त्तितः ॥ दशां
गो यथा ॥ कर्पूरंकुष्ठमगुरु
गुग्गुलु ॥ ॥

र्मलयोद्भवं केशरं वालकं पत्रं।
त्वग्जातीकोष मुस्तं सर्वमेतद्धु
तं युतं दशांगो धूप ईरितः ॥
अष्टांगो यथा गुग्गुल्वगुरुकं ते
जपत्रं मलय संभवं कर्पूरं वाल
कं कुष्ठं नूतनं कुंकुमं तथा अष्टां
गः कथितो धूपो गोविंद प्रीति
दः प्रभुः पंचांगो यथा चंदनं।
कुंकुमं नूतनं कर्पूरं गुग्गुलोऽगुरु
धूपोऽयं हुत संयुक्तः पंचांगः
समुदाहृतः मुकुंद धूपे वर्ज्जनी
य द्रव्यं यथा पेतवंशाल निर्य्या
सं पद्मकं सरलंचतत् वचा मधुरि
कातैलं गंधकाष्ठं कलम्बकं गं
टंकणं तालं हिंगुलंच मनःशि
ला कक्कोलमूषरंहीवी गंधमाद्री
रसांजनं अष्टवर्गः शटी मेथीशि
लाजिद्गंथ चंदनं कुंडुरुं रेणुकं रा
स्नाजमोदाशतपुष्पिका हरिद्राजी
रकं कस्तूरीच रक्तचंदनं कर्च्चूर
कं मरुवकं यवानीग्रंथिकं तथा शै
लजं धातकी पुष्पं मरीचं मोचरसा
दिकं मुकुंद धूपे देवर्षे सर्वमेतद्वि
वर्जयेत् इति पाद्मोत्तरखण्डं ॥
धूपदानविधिर्यथा मध्यमाना
मिकाभ्यांतु मध्यपर्वणि देशिकः

अंगुष्ठाग्रेणदेवेशि धृत्वा धूपं।
निवेदयेत् धूपस्थाने समभ्यर्च्य
तर्ज्जन्या वामयास्पृशन् धूप मा
जन मन्त्रेण प्रोक्ताभ्यर्च्यहृदाण
ना उत्तीर्य्यदृष्टिपर्य्यन्तंघण्टां वा
म दिशि स्थितां वादयन्वामह
स्तेनदत्तहस्तेन चार्पयेत् ॥
इति तंत्रसारः गंध माल्यम
दत्वाधूपदानेदोषो यथा अदत्वा
गंधमाल्यानि यो मे धूपं प्रयच्छ
ति ऊणपो जायते भूमे यावत्था
त्रोनसंशयः वर्षाणि चैकविंशा
निश्रयस्कारनिवासकः तिष्टते
तत्रमहाभागे एवमेतन्नसंशयः
इतिवराहपुराणं विषघ्न धूपो
यथा सक्तुः सर्ज्जरसोपेतः स
र्षपापलवालकैः सवर्णा तस्क
रत्नरोः क्रसमे रर्ज्जनस्पत धूपो
वासगृहेहंतिविषेन दर्दुर सवी।
स्पाः नक्कत्या कर्म्मणा स्तत्र
धूपो ऽयं यत्र दह्यते ॥
सर्पनिर्मोचन धूपो यथा ॥
कार्पासास्थि भुजंगस्य तथा
निर्मोचनं भवेत् सर्प निर्मो
चनोधूपः प्रशस्तः सततं ॥
गृहे इति ॥

मत्स्यपुराणे ९२ अध्यायः
धूपनः पुं शालवृक्षनिर्यासः
धूना इति भाषा तत्पर्य्यायः शा
लवेष्टः २ सर्ज्जरसः ३ वह्निवल्ल
भः ४ इतिशब्दमाला ॥
धूपवृक्षः पुं सरलवृक्षः इति
त्रिकाण्डशेषः ॥
धूपवृक्षकः पुं सरलवृक्षः इति
शब्दरत्नावली ॥
धूपागुरु क्ली दाहागुरु इति रा
जनिर्घण्टः ॥
धूपांगः पुं श्रीवेष्टः इतिराज।
निर्घण्टः ॥
धूपायितः त्रि संतप्तः अध्वादिना
आन्तः इत्यमरभरतौ दत्तधूपश्
हादि यथा प्रदीप परिदीपिते
विविधधूपधूपायिते इतितंत्र।
प्रमोदः ॥
धूपार्ह क्ली कृष्णागुरु इतिरा
जनिर्घण्टः धूपयोग्यत्रि ॥
धूपितः त्रि सन्तापितः अध्वादि
नाक्रान्तः इत्यमरभरतौ दत्तधू
पः यथा यवादिना दोहदधू
पितोद्रुमः इतिवृक्षायुर्वेदः॥
धूमः पुं आर्द्रेन्धनप्रभ॥
वः धूंया इति ॥ ॥

भाषा तत्पर्य्यायः भम्भः २ मरु
द्वाहः ३ खतमालः ४ शिखिध्व
जः ५ अग्निवाहः ६ तरी ७ इति
त्रिकाण्डशेषः अस्य गुणः वात
पित्तवृद्धिकारित्वं इतिराजवल्ल
भः सच मेघाञ्जनयोर्जनकः ॥
धूमकेतनः पुं अग्निः केतुग्रहः
इति मेदिनी ॥
धूमकेतुः पुं अग्निः उत्पात
विशेषः स धूमान्तो तारका।
इत्यमरभरतौ ग्रहभेदः इति।
विश्वः केतवश्शिखावंतिज्यो
तींषिस्थिराण्युत्पातरूपाणि
तदुदयेकालाशुद्धिर्यथा धूम
केतौ समुत्पन्ने ग्रहणेचंद्रसू
र्य्ययोः ग्रहाणां संगरेचैवनक्ष
त्राणां मंगल क्रियां उल्कापाते।
च त्रिदिनं धूमे पंच दिनानिच।
वज्रपातेदिनंचैकं वर्जयेत्स
र्वकर्मसु इतिगर्गवचनं भोज
राजः ग्रहेरवीदोर्धरणीप्रकंपे
केतूद्गमोल्कापतनादि दोषे।
व्रते दशाहानिवदंति तज्ज्ञा
स्त्रयो दशाहानिवदंतिकेचि
त् वज्रकेतूद्गमोत्पातग्रहणे
चेंद्रसूर्य्ययोः प्रयाणंतत्रनेतत्त्वः स
प्तरात्र मतः परं ॥

ब्राह्मणःक्षत्रियो वैश्य स्पनेत्।
कर्मत्रिरात्रकं शूद्रस्त्वेकाचैक
रात्रंसर्वकर्मसमाचरेत् इतिमल
मासतत्त्व अथकेतूनां संख्याने
शत मेकाधिक मेके सहस्र म
परेवदंति केतूनां बहुरूप मेक
मेव प्राह मुनि नारदः केतुं तथा
च पराशरः शतमेकाधिकं केतु
नांभवंति तेषां षोडश स्तत्र नि
त्यासजाः द्वादशादित्य संभवाः
दशाद्दसमत्व विलयेन रुद्रको
धजाः सप्त पैतामहाः पंचदश
वर्षेवैद्दालिकस्य पुत्राः सप्तद
श मरीचि कश्यप ललाटजाः
पंचचप्रजापति सहजाः त्रयो
विभावसुजाः धूमोऽथवशेकः
चतुर्दशामख्यमानेऽसते सोमेन
सह संभूताः एकस्तु ब्रह्मकोप
जः गर्गादयः सहस्रंवदंति त।
थाच गर्गः अनित्योदयचाराणा
मप्यभानांचदर्शनं आगंतूनां
सहस्रं स्याद्ग्रहाणां संनिबोधम
नारदोऽथमतिरेक मेव केतव
द्रूपं प्राह यथा दिव्यांतरीक्ष
भौमस्य एकः केतुः प्रकीर्त्तितः
शुभाशुभ फलंलोके ददात्यस्तम

योदये तत्र धूमकेतुलक्षणं उ
क्तविपरीतरूपेण शुभकरो धूमके
तुरुत्पन्नः इंद्रायुधानुकारी विशे
षतो हि त्रि चूलो वा ह्रस्वतनुः प्र
सन्नइत्यस्माउक्तात् योविपरीतो वि
शेषतः शक्रचापरूपकेतुरुत्प
न्नः स धूमकेतुः स च न शुभकरः पा
पं करोतीत्यर्थः इंद्रधनुःसदृशो
न शुभकर एव तथा हि शिखि ।
त्रिशिखश्च विशेषतः पापफलदः
तथा च समयसंहितायां श्चिर ।
स्थितोऽतिदृष्टश्चलितः स्निग्ध
मूर्त्तिरुदगुदितः ह्रस्वतनुः प्रस
न्नः केतुर्लोकस्याभावाय न शुभो
विपरीतो विशेषतः शक्रचापसं
काशः द्वित्रिचतुश्चूलो वा दक्षि
णसंस्थश्च मस्तककरः इति भट्टोत
पलकृतवराहसंहिताटीका ॥
धूमगंधिकं क्ली रोहिषतृणं इ
ति भावप्रकाशः ॥
धूमजाङ्गजं क्ली वज्रक्षारं इति
राजनिर्घण्टः ॥
धूमध्वजः पुं अग्निः इति हेमचंद्रः
धूमप्रभा स्त्री धूमान्धकारनरकः
इति हेमचंद्रः ।
धूममहिषी स्त्री कुज्झटी इति ।
त्रिकाण्डशेषः ॥
धूमयोनिः पुं मेघः मुस्तकः इ
त्यमरः ॥
धूमलः पुं कृष्णलोहितवर्णः त
द्युक्ते त्रि इत्यमरः ॥
धूमसंहतिः स्त्री धूमसमूहः इति
हलायुधः ॥
धूमसी स्त्री रोटिकाविशेषः य
था माषाणां दालय स्नाये स्था
पितास्त्यक्तकंचुकाः आतपेशो
षिताः पात्रेपिष्टाः स्ता धूमसीस्म
ता धूमसीरचितासैव प्रोक्ता भर्भु
रिकावुधैः भर्भुरीकफपित्तघ्नी किं
चिद्वातकरी स्मृता इति भावप्रका
शः धूमाभः पुं धूम्रवर्णः इति श
ब्दमाला तद्वति त्रि ॥
धूमावती स्त्री दशमहाविद्यान्त
र्गतविद्याविशेषः अस्या ध्यानं ।
यथा विवर्णा चंचला दुष्टा दीर्घा
च मलिनांबरा विमुक्तकुंतला ।
रूक्षा विधवा विरलद्विजा काक
ध्वजरथारूढा विलंबितपयोध
रा सूर्पहस्तातिरूक्षाक्षा धूतहस्ता
वरान्विता प्रवृद्धघोणा तु भृशं
कुटिला कुटिलेक्षणा क्षुत्पिपा
सार्दिता नित्यं भयदा कलहास्पदा
जपेत कृष्ण चतुर्दश्यां पुरश्च

रण सिद्धये इति तंत्रसारः ॥
धूमिका स्त्री कुज्झटिका इति त्रि
काण्डशेषः ॥
धूमोत्थं क्ली वज्रक्षारं इति राज
निर्घण्टः ॥
धूमोर्णा स्त्री यमपत्नी इति त्रिका
ण्डशेषः ॥
धूमोर्णापतिः पुं यमः इति ॥
हारावली ॥
धूम्या स्त्री धूमसमूहः इत्यमरः
धूम्याटः पुं पक्षिविशेषः फिङ्गा ।
इति भाषा तत्पर्यायः कलिङ्गः
२ भृङ्गः ३ इत्यमरः ॥
धूम्रः पुं श्यामरक्तमिश्रितवर्णः
तत्पर्यायः धूमलः २ कृष्णलोहि
तः ३ तद्वति त्रि इत्यमरः ॥
तुरुष्कः इति राजनिर्घण्टः ॥
धूम्रकः पुं उष्ट्रः इति जटाधरः
धूम्रपत्रा स्त्री क्षुपविशेषः त ।
त्पर्यायः धूम्राह्वा २ सुलभा ३
स्वयंभुवा ४ गृध्रपत्रा ५ गृध्राणी ६
कृमिघ्नी ७ श्रीमलापहा ८ अस्या
गुणाः रसे तिक्तत्व शोफ कृमिका
मनाशित्व उष्णत्व रुच्यत्व अग्निदी
पन कारित्वंच इति राजनिर्घण्टः
धूम्रमूलिका स्त्री मूली तृणं
इति राजनिर्घण्टः ॥
धूम्रलोचनः पुं कपोतः इति
राजनिर्घण्टः शुंभासुरसेनापतिः
यथा हे धूम्रलोचनाशु त्वं स्वसै
न्यपरिवारितः तामानय बलाद्दु
ष्टां केशाकर्षणविह्वलां इति
मार्कण्डेयपुराणं ॥
धूम्रवर्णः पुं तुरुष्कः इति राज
निर्घण्टः कृष्णलोहितवर्णयुक्ते
त्रि धूम्रवर्णा स्त्री अग्नेः सप्तजि
ह्वान्तर्गतजिह्वाविशेषः इति ज
टाधरः धूम्रा स्त्री शशाण्डुली
इति राजनिर्घण्टः ॥
धूम्रिका स्त्री शिंशपावृक्षः इ
ति राजनिर्घण्टः ॥
धूर ई उ. य वेध गतौ इति क
विकल्पद्रुमः ॥
धूर्जटिः पुं शिवः इत्यमरः ॥
धूर्तं क्ली विड्लवणं इति राज
निर्घण्टः
लोहकिट्टं इति हेमचन्द्रः ॥
धूर्त्तः पुं धुस्तूरवृक्षः इति मे
दिनी चोरकः इति राजनिर्घण्टः
धूर्त्तः त्रि द्यूतकृत् वंचकः शोषस

पर्य्यायः मायी २ इति हेमचंद्रः
विटः ३ इति मेदिनी ॥
धूर्त्तकः पुं शृगालः इतिशब्दर
त्नावली धूर्त्तश्च ॥
धूर्त्तकृत् पुं धुस्तूरः इति शब्द
माला वंचककारके त्रि ॥
धूर्त्तजन्तुः पुं मानुषः इतिशब्द
चंद्रिका ॥
धूर्त्तमानुषा स्त्री रास्ना इति श
ब्द चंद्रिका ॥
धूर्धरः धुरंधरः इत्यमरटीका।
यां रमानाथः ॥
धूर्वहः त्रि धुरंधरः इत्यमरः ॥
धूर्वी स्त्री रथाग्रभागः तत्पर्य्या
यः यानमुखं २ वधूः ३ इतिहेम
चंद्रः धूलकं क्ली विषं इतिशब्द
चंद्रिका धूलिः स्त्री पार्थिवचूर्णं धू
लाइतिभाषा तत्पर्य्यायः रेणुः
२ पांशुः ३ रजः ४ इत्यमरः धूली ५
पांसुः ६ इतिभरतः रजः ७ क्षि
तिकणः ८ क्षोदः ९ चूर्णं १० त्र
सं ११ महीद्रवः १२ वातकेतुः १३
नभःकेतुः १४ कणः १५ क्षितिक
णः १६ इति शब्दरत्नावली दीय
स्वहा तत्तच्छायाछिन्नकेशनता
दिकं। अज मार्जार ॥ ।

रेणुः खलतिपुण्यंपुराकृतं इ
तिकर्मलोचनः अजरजः खर
जस्तथा सम्मार्जनी रजः स्त्रियः
पादरजो राजन् शक्रादपिहरेत्
श्रियं इति लक्ष्मीचरित्रं ॥
धूलिका स्त्री कुज्झटिका इतिश
ब्दरत्नावली ॥
धूलिकेदारः पुं वप्रः क्षेत्रं ।
इतित्रिकाण्डशेषः ॥
धूलिगुच्छकः पुं पटवासकः फ
ल्गुचूर्णं इति त्रिकाण्डशेषः ॥
धूलिध्वजः पुं पवनः इति त्रिकाण्ड
शेषः ॥
धूलिपुष्पिका स्त्री केतकी इति रा
जनिर्घण्टः ॥
धूलीकदम्बः पुं नीपः तिनिशः ॥
वरुणद्रुमः इति मेदिनी ॥
धूलीकदंबकः पुं नीपः इति जटाध
रः धूलीपटलः पुं उड्डीयमानधूली
समूहः यथा धूलीपटलेधूमत्वभ्रमे
तत्रासत्ता धूमत्वेन । इत्यादि सामान्य
लक्षणायांशिरोमणिः ॥
धूश कः
धूष कः
धूस कः
} कांतिकृतौ शोभायुक्त। करणे इति यावत् इति कविकल्पद्रुमः ॥

धूसरः पुं ईषत्पांडुवर्णः त
द्वतित्रि इत्यमरः उष्ट्रः गर्द्दभः
कपोतः इतिराजनिर्घण्टः तै
लकारः इति हेमचंद्रः ॥
धूसरवस्तूनि यथा धूलिः १ लूता
२ करभः ३ गृहगोधिका ४ कपो
तः ५ मूषिकः ६ रङ्कुः ७ काककंठः
८ खरादिः ९ इतिकविकल्पलता ॥
धूसरच्छदा स्त्री श्वेतबुह्ना इति र
त्नमाला ॥
धूसरपत्रिका स्त्री हस्तिशुण्डीक्ष
पः इतिराजनिर्घण्टः ॥
धूसरा स्त्री पांडुरफलीक्षुपः इ
तिराजनिर्घण्टः ॥
धूसरी स्त्री किन्नरीभेदः इतिमे
दिनी धुस्तूरः पुं धुस्तूरशब्द
इत्यमरटीकायां भरतः ॥
धृङ. अवध्वंसे पतन इतियाव
त् इति कविकल्पद्रुमः ॥
धृ ञ
धृश ङ.
} स्थितौ धृतौ इति। कविकल्पद्रुमः
धृ क धृत्या इति कविकल्पद्रुमः
धृजं
धृज इ
} गतौ इतिकविकल्प
धृतः त्रि धारणविशिष्टः धरा
इति ॥

भाषा अवध्वस्तः पतित इति
यावत् स्थितः इति धृ धातोः
कर्मणि कर्त्तरि च क्त प्रत्ययेन नि
ष्पन्नः धृतराष्ट्रः पुं दुर्य्योधनपि
ता सपत्नीकपुत्रः विचित्रवीर्य्य
क्षेत्रेव्यासाज्जातः इति महाभारतं
सराजा नागभेदः इति मेदिनी ॥
पक्षिभेदः इतिविश्वहेमचंद्रौ धृ
तराष्ट्री स्त्री हंसपत्नी इतिमेदिनी
धृतिः पुं इष्टिः इति मेदिनी ॥
धृतिः स्त्री तुष्टिः योगभेदः ॥
धैर्य्यं धारणं इति मेदिनी ॥
सुखं इति हेमचंद्रः षोडश मा
तृकांतर्गत त्रयोदश मातृका।
इति भवदेवः अष्टादशाक्षरपाद
त्रि छंदोमात्रं इति छंदोमंज
री धृति योगजातफलं य
था धृति योग सम्भूत पुत्रः प्राज्ञः
संहृष्ट मानसः वावदूकः स
भायां च सुशीलो विनयान्वितः
इति कोष्ठीप्रदीपः ॥
धृतवरी स्त्री भूमिः इति संक्षिप्तसा
रोणादिवृत्तिः ॥
धृता न पुं धर्म्मः विप्रः समुद्रः
ग्रन्तरीक्षं मेधावी ॥ विष्णुः ॥

इतिसंक्षिप्तसारोणादिवृत्तिः ॥
धृष उ संहतौ हिंसे इति क।
विकल्पद्रुमः ॥
धृष ञि स्वा न प्रागल्भ्ये इतिक।
विकल्पद्रुमः ॥
धृष क ङ शक्तिबंधे शक्तेर्बंधन
इतियावत् इतिकविकल्पद्रुमः
धृष स्वा कि अमर्षे क्रोध इति।
यावत् अभिभव इति महमल्लः
इति कविकल्पद्रुमस्तट्टीकाच
धृषुः पुं दक्षः इत्युणादिकोषः
संघातः प्रगल्भः इतिसंक्षिप्त
सारोणादिवृत्तिः ॥
धृष्टः त्रि प्रगल्भः इति मुग्धबोध
व्याकरणं निर्लज्जः तत्पर्य्यायः
धृष्णक् २ वियातः ३ इत्यमरः ॥
धृष्णुः ४ दक्षक ५ इति त्रिकाण्डशे
षः चतुर्विधपत्यन्तर्गत पतिविशे
षेपुं तस्यलक्षणं यथा भूयो निः
शंकः कृतदोषोपि भूयो निवारि
तोपि भूयः प्रश्रयपरायणः इ
तिरसमंजरी ॥
धृष्णा स्त्री असती इति शब्दरत्नाव
ली धृष्णक् जे त्रि निर्लज्जः इत्यमरः
धृष्णिः पुं किरणः इत्यमरः ॥

धृष्णुः त्रि धृष्टः इतित्रिकाण्डशेषः
कंचिकायां पुं इतिशब्दचंद्रिका
धे ट पाने इतिकविकल्पद्रुमः
धेनुः पुं समुद्रः इति हेमचंद्रः ॥
नदः इतिमेदिनी ॥
धेना स्त्री नदी भारतीभेदः इति
हेमचंद्रः ॥
धेनिका स्त्री धन्याकं इति भाव
प्रकाशः ॥
धेनुः स्त्री नवसूतागौः तत्प
र्य्यायः नवसूतिका २ इत्यमरः ॥
नवप्रसूतिका ३ इतिशब्दरत्नावली
दानीयदशधेनवो यथा यास्तुपा
पविनाशिन्यः प्रव्यक्तदश धेनवः
तासांस्वरूपंवक्ष्यामि नमामिच
धनाधिप प्रथमा गुडधेनुः स्या
द्घृतधेनु स्तथापि वा तिलधेनुस्तृ
तीया च चतुर्थी जलसंज्ञिका ॥
क्षीरधेनुश्च विख्याता मधुधेनुस्त
थापि वा । सप्तमी शर्कराधेनु
र्दधिधेनु स्तथाष्टमी रसधेनुश्च
नवमी दशमी स्यात् स्वरूपतः
कुंभाः स्यु इव धेनूनां मितरा।
सांतराशयः सुवर्णधेनुमप्य
त्र केचिदिच्छंति मानवाः ॥
नवनीतेन तैलेन ॥ ॥

तथान्येत्तमहर्षयः एतदेव विधा
नं स्यात्तएवोपकराः स्मृताः मंत्रा
वाहनसंयुक्ताः सदा पर्वणि पर्वणि
यथा श्राद्धं प्रदातव्या भुक्ति मुक्ति
फलप्रदाः गुडधेनु प्रसंगेन सर्वा
स्तव मयोदिताः अशेष यज्ञ फ
लदाः सर्वपापहराः शुभाः व्रता
नामुत्तमा यस्माद्विशोक द्वादशी
व्रतं तदङ्गत्वेन चैवात्र गुडधेनुः।
अयनस्पने अयने विषुवे पुण्ये व्य
तीपाते ऽथ वा पुनः गुडधेन्वाद
यो देया उपरागादि पर्वसु इति
मत्स्यपुराणे ७६ अध्यायः ॥
पूर्वोक्त धेनूनां दान विधय स्तत्त
त्प्राब्दे द्रष्टव्याः ॥ अथ कपिला
धेनु दानादि फलं होतोवाच ।
अथातः संप्रवक्ष्यामि कपिला धे
नुमुत्तमां यत् प्रदानान्नरो याति
विष्णुलोक मनुत्तमं पूर्वोक्तेन वि
धानेन दद्याद्धेनुं सवत्सकां सर्वा
लंकारसंयुक्तां सर्वरत्नसमन्वितां
कपिलायाः शिरोग्रीवे सर्वतीर्था
नि भामिनि पितामह नियोगाच्च नि
वसंति हि नित्यशः प्रातरुत्थाय यो
मर्त्यः कपिला गल मस्तकात् च्यु
तं तत्र भक्त्या पानीयं शिरसा वंदते शुचिः

सतेन पुण्यतोयेन तत्क्षणाद्
ग्धकिल्विषः त्रिंशद्वर्ष कृतं पापं
दहत्यग्नि रिवेन्धनं कल्य मुत्थाय
योमर्त्यः कुर्य्यात्तासां प्रदक्षिणं प्रद
क्षिणी कृता तेन पृथिवी स्यात् व
सुंधरे प्रदक्षिणेनचैकेन श्रद्धायुक्ते
नतत् क्षणात् दशजन्म कृतं पा
पं तस्य नश्यत्यसंशयं कपिलाया
स्तमूत्रेण स्नात्वा चैव शुचिव्रतः स
गंगादिषु तीर्थेषु स्नातो भवति मा
नवः तेन स्नानेन चैकेन भावयुक्ते
न वै नरः यावज्जीव कृतात् पापान्मु
च्यते नात्र संशयः गोसहस्रं तु
योदद्यादेकां च कपिलां नरः मम
मेतत्समं प्राह ब्रह्मा लोकपिताम
हः गवामस्थि न लंघेत मृतेगंधे
न दूषयेत् यावज्जिघ्रति तं गंधं
तावत्पुण्येपस्तु पूर्यते गवां कण्डू
यनं श्रेष्ठं तथाच परिपालनं तत्प
गोप्रदानस्य भयरोगादि पाल
ने तृणोदकानि यो दद्यात्तद्धि
तानांगवाह्निकं सोश्वमेध फलं दि
वं लभते मानवोत्तमः विमाने वि
विधैर्दिव्यैः कन्याभिरभिरक्षितैः।
सेव्यमानस्तुगंधर्वैर्दीप्यमानो यथा
ग्रयः एकादश प्रकार कपिला

लक्षणं यथा सुवर्णकपिला प्र
थमा द्वितीया गौरपिङ्गला तृतीया चै
वरक्ताक्षी चतुर्थी गुडपिंगला ॥
पंचमी बभ्रुवर्णा स्यात् षष्ठी च
श्वेतपिंगला सप्तमी श्वेतपिंगाक्षी
अष्टमी कृष्णपिंगला नवमी पाट
ला ज्ञेया दशमी पुच्छपिंगला ए
कादशी खुरश्वेता एतासां सर्वल
क्षणा सर्वलक्षणसंयुक्ता सर्वाल
कारसुंदरी ब्राह्मणाय च दातव्या
सर्वसुक्ति प्रदायिनी भुक्तिमुक्ति प्र
दानेषां विष्णुमार्ग प्रदायिनी इति
कपिलामाहात्म्यं । अथोभय मु
खी धेनु दानादि विधानं हेमो ।
वाच अतः परं महाराज्ञोभयमु
खाः समासतः विधानं यद्वदा
दोहेधरणाः कथितं पुरा तदहं
संप्रवक्ष्यामि तत्पुण्यफलं च यत्
धरण्युवाच । यत्त्वया कपिलाना
म पूर्वमुत्पादिता प्रभो होमधेनुः
सदापुण्या सा ज्ञेया कति लक्षणा
विधेन्वः कपिलाः प्रोक्ताः स्वयमे
व स्वयंभुवा प्रस्तूयमाना दानेन किं
पुण्यं स्यात्तमाधव एतदिच्छाम्यहं श्रो
तुं विस्तरेण जगद्गुरो श्रीवराह उवाच
श्रृणुष्व भद्रे तत्त्वेन पवित्रं पापनाशनं

यं श्रुत्वा सर्वपापेभ्यो मुच्यते नात्र
संशयः कपिला अग्निहोत्रार्थाय ।
ज्ञार्थे च वरानने उद्धृत्य सर्वतेजां
सि ब्रह्मणा निर्मिता पुरा पवि
त्राणां पवित्रं च मंगलानां च मंगलं
पुण्यानां परमं पुण्यं कपिला च व
सुंधरे तपसस्तपएवाग्र्यं व्रतानां
व्रतमुत्तमं दानानां परमं दानं
निधीनां हेतुरव्ययं पृथिव्यां यानि
तीर्थानि गुह्यान्यायतनानि च पवि
त्राणां च पुण्यानि सर्वलोकेषु सं
दधि होतव्यान्यग्निहोत्राणि सायं प्रा
तर्द्विजातिभिः कपिलाया घृतेनेह
दध्ना क्षीरेण वा पुनः जुह्वते साग्नि
होत्राणि मंत्रैश्च विविधैः सदा ।
पूजयन्तिथीं श्चैव परां भक्ति ।
मुपागताः तेयांत्यादित्य वर्णैश्च
विमानैर्द्विज सत्तमाः सूर्यमण्ड
लमध्येन ब्रह्मणा निर्मिता पुरा
कपिलाया पिंगलाक्षी सर्वसौख्य
प्रदायिनी सिद्धिबुद्धि करी देवी
कपिलानन्तरूपिणी पूर्वोक्ता या
स्तु कपिलाः सर्वलक्षणलक्षिताः
एताः पुण्याः समाख्याताः कपिलास्तव
मे ने सर्वा स्तेना महाभागा स्तारयं
ति न संशयः संगमेषु प्रशस्ता च

सर्वपापप्रणाशिनी अग्निपुच्छा
अग्निमुखी अग्निलोमा ऽनलप्र
भा तथाग्नेयी सदा देवी सुवर्णा
ख्या प्रवर्तते शूद्रात्कपिलाप्रति
ग्रहे दोषो यथा गृहीत्वा कपि
लां शूद्रात् कामतः सदृशो भवे
त् पतितः स द्विजातीनां चांडाले
सदृशो हि सः न तस्मात्प्रतिगृ
ह्णीयात् शूद्राद्विप्रः प्रतिग्रहं हरा
ते प्रतिहर्तव्याः स्वाशिस्तल्पा इवा
धरे सर्वकाले हि सर्वे वेवर्जिताः
पितृदेवतैः असंभाष्याः प्रतिग्रा
ह्याः शूद्रास्ते पापकर्मिणः पिबं
ति यावत् कपिलां तावत्तेषां पिता
महाः भूमेर्मलं समश्नंति जायंते
विड्भुजश्चिरं शूद्रस्य कपिला
क्षीरादि पाने दोषो यथा तासां क्षी
रं घृतं वापि नवनीतमथापि वा ॥
उपजीवंति ये शूद्रास्तेषां गतिम
थो श्रृणु कपिलाजीविनः शूद्राः
क्रूरा गच्छंति रौरवं रौरवे तु महा
रौद्रे वर्षकोटिशतं धरे ततो पि शु
क्राः कालेन श्वानयोन्यां व्रजंति ते
श्वानयोन्याविमुक्तस्तु विष्ठायां जा
यते कृमिः विष्ठायां तेषु पापिष्ठा
दुःखी तिष्ठंति तमसाः भूयो भूयो जाय

स्ते घोरं न विंदति ब्राह्मणश्चै
वयो विद्वान् ऊर्ध्वा तेषां प्रतिग्र
हं ततः प्रयत्नमेधावी पितर
स्तस्य घोरके न तं विप्रं तु संभाष
येच्चैवैकासनं विशेत् स निर्व
र्जनीयो हि दूरात् ब्राह्मणो धरे
य स्तेन सह संभाषस्तथा चैकास
नं व्रजेत् प्राजापत्यं चरेत् कृच्छ्रं
तेन शुध्यति स द्विजः अथासन्न
प्रसव कपिलादानफलादि
एकस्य गो प्रदानस्य सहस्रेण
तु पूर्यते किमन्यैर्वक्तुमि दीनैः
कोटिसंख्यानविस्तरैः श्रोत्रि
याय दरिद्राय सत्कृत्याया हि ता
ग्रये आसन्न प्रसवां धेनुं दानार्थं
प्रतिपालयेत् कपिलाद्यं प्रसूता
तावद्दातव्या च द्विजन्मने जाय
मानस्य वत्सस्य मुखं योन्यां प्र
दृश्यते तावत्सा पृथिवी ज्ञेया या
वद्गर्भं न मुंचति धेन्वा यावंति रो
माणि सवत्साया वसुंधरे ताव
त्यो वर्षकोट्यस्तु ब्रह्मलोकादिभिर
र्चिताः वसंति ब्रह्मलोके वै येव
वे कपिलां प्रदाः सुवर्णशृंगीयः
कृत्वा रौप्यमथ खुरास्तथा ब्रा
ह्मणस्य करे दत्वा सवर्णरौप्यमेव च

कपिलायाः सदापुच्छं सलिलमस्य
करे न्यस्तेन उदकं च करे दद्याद्वाचया
स्पृहयाविते सर्वमुद्राहृता तेन स
शैलवनकानना रत्नपूर्णा भवेद्
सा पृथिवी नात्र संशयः पृथिवीद
नतुल्येन दानेनैतेन वै नरः नंदि
नो याति पितृभि र्विस्वाद्यं परमं
पदं ब्रह्मस्वहारी गोघ्नश्च भ्रूणहा
पापदेहकः महापातकयुक्तोऽपि
वंचकोऽब्रह्मदूषकः निन्दकोऽब्रह्म
णानां च तथा कर्मोपदूषकः ए
तैः पातकयुक्तोऽपि गवां दानेन मु
च्यते यश्चाभयमर्वोदद्यात्प्रभ
न कनकान्वितां तद्धितं पयसाह्वा
रः पायसेनापि वा भवेत् सवर्णा
समहस्तेण तदर्हं नापि भामिनि
तस्यार्द्धं शतेनापि पंचाशच्च त
दर्द्धकं विवर्जयेत् इमा मे अग्र
मृत्वीमभ यत्रशोमास्त्वे ममवंश
विहृद्यर्थं सदा स्वस्तिकरी भव गो
शरीरे देवतानिवेशो यथा दंतेषु
रुतो देवा जिह्वायां तु सरस्वती।
खुरमध्ये तु गंधर्वाः खुराग्रेषु तु
पन्नगाः सर्वसंधिषु साध्याश्च च
न्द्रादित्यौ तु लोचने ककुदि सर्व
नक्षत्रं लांगुले धर्म आश्रितः अ

श्रितः अपाने सर्वतीर्थानि प्रस्रावे
जाह्नवी नदी नानाद्वीपसमाकीर्णा
श्चत्वारः सागरास्तथा ऋषयो रोम
कूपेषु गोमये पद्मधारिणी रोमसु
संति विद्याश्च लक्ष्मीः शोषयन्हृय
धैर्य्यं धृतिश्च दंतेषु पुष्टिर्हृदि स्त
र्थैव च विद्याशांतिर्मतिश्चैव संततिः
परमा तथा गच्छंती मनुगच्छेति
पतां गावैन संशयः यत्र गावो जग
न्नदेवदेव पुरोगमा यत्र गावस्त
त्र लक्ष्मीः सांगो धर्मश्च शाश्वतः स
र्वरूपेषु ता गावस्तिष्ठन्त्यभिमताः स
दा गावः पवित्रामंगल्या देवानाम
पि देवताः यस्याः सुम्भ घनेऽभक्ता
सम्पदेभ्यः प्रमुच्यते इति वराहपु
राणं ॥

धैवव स्मिति... या लज्जा...

धेनुकः पुं असुरविशेषः स श्री
कृष्णेन हतः इति श्रीभागवतं ॥
षोडशरतिबंधान्तर्गतद्वादशबं
धः यथा समीप्स्त्रियं समालिंग्य।
स्वयं सम्मोहनेन पुनः लघु
लिंगं वालयेद्यो बंधोऽयं धेनुकः
स्मृतः इति रतिमंजरी ॥
धेनुकसूदनः पुं श्रीकृष्णः इ
ति त्रिकाण्डशेषः ॥ ॥

धेनुका स्त्री हस्तिनी गौः इति
मेदिनी ॥
धेनुदुग्धं क्ली चिर्भिटः इति रा
जनिर्घण्टः गोदुग्धं च ॥
धेनुदुग्धकरः पुं गर्जरः इति रा
जनिर्घण्टः ॥
धेनुष्या स्त्री बंधके स्थिता गौः।
इत्यमरः याबंधकेन दत्ता अर्थ्यं।
नीतरानसा गौ महिषी वा याऽत्र।
गृहबंधके स्थिता सा धेनुष्येति
वृद्धाः इति भरतः ॥
धैनुकं क्ली धेनुसमूहः इत्यमरः
धैर्य्यं क्ली धीरता धीरस्य भाव
इत्यर्थे ष्यञ्प्रत्ययः तस्य लक्षणं
यथा स्थिरचित्तोन्नतिर्या तु तद्धै
र्य्यमिति कीर्त्यते इत्युज्ज्वलनील
मणिः
धैवतः पुं सप्तस्वरान्तर्गतषष्ठस्व
रः सत्तु नारदमते अश्वस्वरतुल्यः
तानसेनमते भेकस्वरतुल्यः।
अस्योच्चारणस्थानं ललाटं आ
करणमते दंतः अयं क्षत्रियवर्णः
अस्य जातिः षाडवः अस्य तानं ४९
प्रत्येकताने ४८ समुदायेन ॥
२३५२ भवंति इति संगीतशास्त्रं।
गत्वा नाभेरधो भागं वस्तिं ॥

प्राप्योर्द्ध्वगः पुनः धावन्निव च यो
याति कंठदेशं स धैवतः अस्य
स्कन्दस्त्रिस्वः इति संगीतदामो
दरः ॥
धोड़ः पुं सर्पविशेषः धोड़ इति
भाषा तत्पर्य्यायः राजिलः २
डुण्डुभः ३ डुण्डुभः ४ इति शब्दर
त्नावली ॥
धोर ऋ गतिचातुर्य्ये इति कवि
कल्पद्रुमः ॥
धोरणं क्ली सर्ववाहनं हस्त्यश्व
रथदोलादि इत्यमरः अश्वप्रच
मगतिः तत्पर्य्यायः धौरितकं २
धोरण्यं ३ धोरितं ४ इति हेम।
चंद्रः ॥
धोरणिः स्त्री परम्परा इति जटा
धरः ॥
धोरितं क्ली धोरणं अश्वप्रचमग
तिः इति हेमचंद्रः ॥
धौरितकं क्ली धौरितकं इत्यम
रटीकायां रमानाथः ॥
धौतं त्रि मार्जितं धौतं इति भा
षा तत्पर्य्यायः निर्णिक्तं २ शोधि
तं ३ मृष्टं ४ क्षालितं ५ इति हे
मचंद्रः रूप्यौतं स्त्रिया धौतं।
यद्धौतं रजकेन च ॥ ।

धौः ततिर्ज्ञानीयादृशा दक्षिणपश्चिमे इति कर्मलोचनं ॥
धौतं क्ली रूप्यं इति राजनिर्घण्टः ॥
धौतकटः पुं सूत्ररचितभाण्डं । धोकडा इति ख्यातः तत्पर्य्यायः । स्योनः २ स्यूतः ३ प्रसेवकः ४ । इति जटाधरः स्यूनः ५ स्योनः ६ इति भरतधृतकोषान्तरं ॥
धौतकोषजं क्ली पत्रोर्णं इति शब्दरत्नावली ॥
धौतकौषेयं क्ली पत्रोर्णं इत्यमरः कौषेयमेव धौतं प्रक्षालितं पत्रोर्णं खं वट लकुचादि पत्रेषु क्रिमिभि रूर्णायाः कृतत्वात् पत्रसंबंधिनी ऊर्णा अत्रेति पत्रोर्णं इति भरतः ॥
धौतशिलं क्ली स्फाटिकं इति । त्रिकाण्डशेषः ॥
धौमकः पुं देशविशेषः इति केचित् ॥
धौरः पुं धवद्रुमः इति भावप्रकाशः ॥
धौरितकं क्ली अश्वानां पंचविधगत्यन्तर्गतगतिविशेषः इत्यमरः तत्र सम्यक् गति रास्कन्दितं नाम इति ख्यातं ततोऽधिका चतुरा गतिः इति भरतः ॥
धौरेयः त्रि रथलांगलादिभारवोढा इत्यमरः अनडुहि पुं इति राजनिर्घण्टः ॥
धौर्तिकं त्रि धूर्तस्येदं धूर्तस्वभावः इति धूर्तशब्दात् ठिकप्रत्ययेन निष्पन्नः ॥
धौर्य्यं क्ली अश्वस्य प्रथमगतिः इति हेमचन्द्रः ॥
ध्मा अग्निसंयोगे शब्दे इति कविकल्पद्रुमः ॥
ध्माकारः पुं लोहकारकः इति हलायुधः ॥
ध्वांक्षः पुं काकः मत्स्यभक्षकपक्षी इत्यमरः तक्षकः भिक्षुकः इति मेदिनी ॥
ध्वांक्षजंघा स्त्री काकजंघा इति राजनिर्घण्टः ॥
ध्वांक्षजंबुः स्त्री काकजंबुः इति राजनिर्घण्टः ॥
ध्वांक्षतुण्डी स्त्री काकनासालता इति राजनिर्घण्टः ॥
ध्वांक्षदंती स्त्री काकतुण्डी इति राजनिर्घण्टः ॥
ध्वांक्षनखी स्त्री काकनखी इति राजनिर्घण्टः ॥ ॥

ध्वांक्षनाम्नी स्त्री काकोडुम्बरिका इति राजनिर्घण्टः ॥
ध्वांक्षनाशिनी स्त्री हपुषा इति भावप्रकाशः ॥
ध्वांक्षनासा ⎫
ध्वांक्षनासिका ⎭ स्त्री काकनासालता इति राजनिर्घण्टः
ध्वांक्षपुष्टः पुं कोकिलः इति हारावली ॥
ध्वांक्षमाची स्त्री काकमाची इति राजनिर्घण्टः ॥
ध्वांक्षवल्ली स्त्री काकनासा इति राजनिर्घण्टः ॥
ध्वांक्षादनी स्त्री काकतुण्डी इति राजनिर्घण्टः ॥
ध्वांक्षारातिः पुं पेचकः इति । हलायुधः ॥
ध्वांक्षी स्त्री काकोलिका इति मेदिनी ध्वांक्षोली स्त्री काकोली इति राजनिर्घण्टः ॥
ध्यामं पुं परिमाणं आलोकः । ध्यानं इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥
ध्याद्द ई कांक्षे घोररुतौ इति कविकल्पद्रुमः ॥
ध्यातं त्रि चिंतितं यथा ध्यातं । चित्रमदृष्टं निष्ठं न च पुनर्विष्णोः पदं शाश्वतमित्यादि शान्तिशतकं ॥
ध्यानं क्ली चिंतनं इति ध्यैधातोर्भावे ऽनट् धारणाविषये एकप्रत्ययसंततिः इति हेमचंद्रः ॥ अद्वितीयवस्तुनि विच्छिद्य विच्छिद्यान्तरेन्द्रियवृत्तिप्रवाहः इति वेदान्तसारः तद्रूपप्रत्ययैकाग्रसन्ततिश्चान्यनिस्पृहा तद्ध्यानं प्रथमैरंगैः षड्भिर्निष्पाद्यते नृप अस्यार्थः तद्रूपस्य धारणासिद्धस्य वस्तुनः प्रत्यया यस्यां सन्ततौ सा एकाग्रा विच्छिन्ना सन्ततिः अन्यनिस्पृहा विषयान्तरेणाव्यवधीयमाना विजातीयप्रत्ययान्तरितः सजातीयप्रत्ययप्रवाहो ध्यानमित्यर्थः तच्च प्रथमैर्यमादिभिर्धारणान्तैः षड्भिरंगैर्निष्पाद्यते इति विष्णुपुराणटीका च । श्रीकृष्ण उवाच सर्वदेवाः प्राकृतिका यावन्तो मूर्तिधारिणः अहमात्मा नित्यदेही भक्तध्यानानुरोधतः इति ब्रह्मवैवर्ते जन्मखण्डं ॥
ध्यानयोगः पुं ध्यानरूपयोगः यथा विविक्तसेवी लघ्वाशी यतवाक्

कायमानसः ध्यानयोगपरो नि-
त्यं वैराग्यं समुपाश्रितः इति श्री-
भगवद्गीतायां १८ अध्यायः ॥
ध्यामं क्ली दमनकवृक्षः । गंधतृ-
णं श्यामलेति इति मेदिनी ॥
ध्यामकं क्ली रोहिषतृणं इति रा-
जनिर्घण्टः ॥
ध्यामान पुं परिणामः चिंतायां ।
क्ली इत्युणादिकोषः ॥
ध्येयः त्रि ध्यातव्यः ध्यानीयः ।
चिंतनीयः यथा ध्येयः सदा स-
वितृमंडलमध्यवर्त्ती नारायणः
सरसिजासनसन्निविष्टः इत्या-
दि श्रीनारायणध्यानं ॥
ध्यै चिन्तने इति कविकल्पद्रुमः
ध्रज इ । ध्रज । } गतौ इति कविकल्पद्रुमः
ध्रण । ध्वाने इति कविकल्पद्रुमः
ध्रस ग उ उञ्छे इति कविकल्पद्रुमः
ध्रस क उत्क्षेपे उञ्छे इति कवि-
कविकल्पद्रुमः ॥
ध्राख ऊ शोषे अलमर्थे इति
कविकल्पद्रुमः ॥
ध्राघ ऊ ङ. प्राक्रौ इति कविकल्प-
द्रुमः ध्राजिः स्त्री वातालिः वृक्षवात्या स-

इति भाषा इत्युणादिकोषः ॥
ध्राड ऋ ङ शीर्णौ विभेदे इति या-
वत् इति कविकल्पद्रुमः ॥
ध्राडिः पुं पुष्पचयः इत्युणादिको-
षः ध्राक्ष इ कांक्षे घोररुतौ इति
कविकल्पद्रुमः ॥
ध्रिज गतौ इति कविकल्पद्रुमः
ध्रु शि । ध्रु नि } स्थैर्य्ये सपर्णे इति कविकल्पद्रुमः ॥
ध्रुवं क्ली निश्चितं तर्कः इति मे-
दिनी आकाशं इति हेमचंद्रः
ध्रुवं त्रि सततं शाश्वतं इ-
ति मेदिनी स्थिरं निश्चितं ॥
इति हेमचंद्रः ॥
ध्रुवः पुं शंकुः हरः विष्णुः
वटः उत्तानपादजः वसुभेदः
योगभेदः इति मेदिनी ॥ स्था-
णुः इत्यमरः शालपर्णी इति
त्रिकाण्डशेषः ध्रुवकः इति सं-
गीतदामोदरः ध्रुवलोकोन ॥
पत्ति यथा प्रियव्रतोत्तानपा-
दौ मनोः स्वायम्भुवस्य तु ।
द्वौ पुत्रौ सुमहावीर्य्यौ धर्म्म-
ज्ञौ कथितौ मम ॥
तयोरुत्तानपादस्य सुरुच्या-

मुत्तमः सुतः अभीष्टायामभूद्विज
पितुरत्यंत वल्लभः सुनीतिर्ना-
मया राज्ञस्तस्याभून्महिषी द्विज
सनातिप्रीतिमांस्तस्यां तस्याभूत्
ध्रुवः सुतः राजासनस्थितस्या-
ङ्के पितुर्भ्रातरमाश्रितं दृष्ट्वोत्त-
मं ध्रुवश्चक्रे तमारोढुं मनोरथं
सपत्नी तनयं दृष्ट्वा तमङ्कारोहणो-
त् सुकांक्षं पितुस्तथा सुरु-
चिर्वाक्यमब्रवीत् पुनः राजासनस-
र्व भूमस्तं श्रयकेनतं योग्यं ममैव
पुत्रस्य किमात्मा क्लिश्यते त्वया
उत्तरज्ञ पितरं बालस्तत्कामा-
त्मभाषितं जगाम कुपितो मातुर्निजा-
या द्विज मंदिरं तं दृष्ट्वा कुपितं पुत्रमी-
षत् प्रस्फुरिताधरं सुनीतिरंकमा-
रोप्य मैत्रेयेदमभाषत वत्सकः को
कोप हेतुस्ते कश्चत्वां नाभिनंदति ।
को वजानाति पितरं तव यस्ते परा-
ध्यति इत्युक्तः सकलं मात्रे कथ-
यामास तद्यथा सुरुचिः प्राहभू-
पाल प्रत्यक्ष मतिगर्विता सुनीति-
रुवाच सुरुचिः सत्यमाहेदं स्व-
ल्पभाग्योसि पुत्रक नहि पुण्य-
वतां वत्स सपत्नैरेवमुच्यते यदि

चेदुःखमत्यर्थं सुरुच्या वचनात्त-
व तत्पुण्योपचये यत्नं कुरु सर्व-
फलप्रदे पराशर उवाच निर्जगा-
म गृहात्मातुरित्युक्ता मातरं ध्रुवः
पुराच्च निर्गम्य ततः स्तद्वाह्योपवनं
ययौ स ददर्श मुनींस्तत्र सप्त पूर्वा-
गतान् ध्रुवः निर्जगाम वनात् ।
स्मात् प्रणिपत्य सप्तार्षीन् मधु-
संज्ञं महापुण्यं जगाम यमुनातटं
यत्रैव देव देवस्य सान्निध्यं हरिमे-
धसः सर्वपाप हरे तस्मिन् तपस्ती-
र्थे च कारसः पदांगुष्ठेन संपीड्य
यदा च वसुधां स्थितः तदा समस्त-
वसुधा चचाल सहपर्वतैः भग-
वानपि सर्वात्मा तन्मयत्वेन तोषितः
गत्वा ध्रुव मुवाचेदं चतुर्भुजवपुर्हरिः
उत्तानपादे भद्रंते तपसा परितोषि-
तः वरदोहमनुप्राप्तो वरं वरय सु ।
व्रत ध्रुव उवाच भगवन् सर्वभूतेश
सर्वस्यास्ते भवान् हृदि किमज्ञातं
तव स्वामिन् मनसा यन्मयेप्सितं
नैतद्राजासनं योग्य मजातस्य म-
मोदरात् इति गर्वादवोचन्मां सप-
त्नीमातुरुच्चकैः आधारभूतं जग-
तः सर्वेषा मुत्तमोत्तमं प्रार्थयामि

कायमानसः ध्यानयोगपरो नि
त्यं वैराग्यं समुपाश्रितः इति श्री
भगवद्गीतायां १८ अध्यायः ॥
ध्यामं क्ली दमनकवृक्षः । गन्धतृ
णं श्यामलेऽपि इति मेदिनी ॥
ध्यामकं क्ली रोहिषतृणं इति रा
जनिर्घण्टः ॥
ध्यायमानः पुं परिणामः चिन्तायां ।
क्ली इत्युणादिकोषः ॥
ध्येयः त्रि ध्यातव्यः ध्यानीयः ।
चिन्तनीयः यथा ध्येयः सदा स
वितृमण्डलमध्यवर्त्ती नारायणः
सरसिजासनसन्निविष्टः इत्या
दि श्रीनारायणध्यानं ॥
ध्यै चिन्तने इतिकविकल्पद्रुमः
ध्रज इ }
ध्रज } गतौ इतिकविकल्पद्रुमः
ध्रण • ध्वाने इतिकविकल्पद्रुमः
ध्रस ग उ उञ्छे इतिकविकल्पद्रुमः
ध्रस क उत्क्षेपे उञ्छे इति कवि
कविकल्पद्रुमः ॥
ध्राख ऋ शोषे अलमर्थे इति
कविकल्पद्रुमः ॥
ध्राघ ऋ ङ. शक्तौ इतिकविकल्प
द्रुमः ध्राजिः स्त्री वातालिः चूर्णवाता
स
इति भाषा इत्युणादिकोषः ॥
ध्राड ऋ ङ शीर्णे विभेदे इति या
वत् इति कविकल्पद्रुमः ॥
ध्राडिः पुं पुष्पचयः इत्युणादिको
षः ध्राक्ष इ कांक्षे घोररुते इति
कविकल्पद्रुमः ॥
ध्रिज गतौ इतिकविकल्पद्रुमः
ध्रु शि } स्थैर्ये सपर्णे इति क
ध्रु त्रि } विकल्पद्रुमः ॥
ध्रुवं क्ली निश्चिते तर्के इति मे
दिनी आकाशं इति हेम चन्द्रः
ध्रुवं त्रि सन्तते शाश्वते इ
ति मेदिनी स्थिरे निश्चिते ॥
इति हेमचन्द्रः ॥
ध्रुवः पुं शङ्कुः हरः विष्णुः
वटः उत्तानपादजः वसुभेदः
योगभेदः इति मेदिनी ॥ स्था
णुः इत्यमरः शालिपर्णी इति
त्रिकाण्डशेषः ध्रुवकः इति सं
गीतदामोदरः ध्रुवलोकोत्त ॥
पत्ति यथा प्रियव्रतोत्तानपा
दौ मनोः स्वायम्भुवस्य तु ।
द्वौ पुत्रौ सुमहावीर्यौ धर्म
ज्ञौ कथितौ तव ॥
तयोरुत्तानपादस्य सुरुच्या

मुत्तमः सुतः अभीष्टायामभूद्द्विज
पितुरत्यन्तवल्लभः सुनीतिर्ना
मया राज्ञस्तस्याभून्महिषी द्विज
स नातिप्रीतिमांस्तस्यास्तस्याभू
द्ध्रुवः सुतः राजासनस्थितस्या
ङ्कं पितुर्भ्रातरमाश्रितं दृष्ट्वोत्त
मं ध्रुव श्चक्रे तमारोढुं मनोरथं
सपत्नी तनयं दृष्ट्वा तमङ्कारोहणो
त्सुकं प्रेम्णा पितुस्तथारूढं सुरु
चिर्वाक्यमब्रवीत् एतद्राजासनं स
र्वभूभृत्संश्रयकेतनं योग्यं ममैव
पुत्रस्य किमात्मा क्लिश्यते त्वया
उत्तमस्य पितुरङ्के बालस्त्वमुक्त्वा मा
त्रभाषितं जगाम कुपितो मातुर्निजा
या द्विज मन्दिरं तं दृष्ट्वा कुपितं पुत्रमी
षत् प्रस्फुरिताधरं सुनीतिरङ्कमा
रोप्य मैत्रेयेदमभाषत वत्सकः को
कोप हेतुस्ते कश्च त्वां नाभिनन्दति ।
कोऽवजानाति पितरं तव यस्तेऽपरा
ध्यति इत्युक्तः सकलं मात्रे कथ
यामास तद्यथा सुरुचिः प्राह भू
पाल प्रत्यक्षमतिगर्विता सुनीति
रुवाच सुरुचिः सत्यमाहेदं स्व
ल्पभाग्योऽसि पुत्रक नहि पुण्य
वतां वत्स सपत्नैरेवमुच्यते यदि
चेद्दुःखमत्यर्थं सुरुच्या वचनात्त
व तत्पुण्योपचये यत्नं कुरु सर्व
फलप्रदे पराशर उवाच निर्जगा
म गृहान्मातुरित्युक्त्वा मातरं ध्रुवः
पुराच्च निर्गम्य ततस्तद्बाह्योपवनं
ययौ स ददर्श मुनींस्तत्र सप्त पूर्वा
गतान् ध्रुवः निर्जगाम वनात् ।
स्मात् प्रणिपत्य सप्तानृषीन् मधु
संज्ञं महापुण्यं जगाम यमुनातटं
यत्रैव देवदेवस्य सान्निध्यं हरिमे
धसः सर्वपापहरे तस्मिन् तपस्ती
र्थे चकार सः पदाङ्गुष्ठेन संपीड्य
यदा च वसुधां स्थितः तदा समस्त
वसुधा चचाल सह पर्वतैः भग
वानपि सर्वात्मा तन्मयत्वेन तोषितः
गत्वा ध्रुवमुवाचेदं चतुर्भुजवपुर्हरिः
उत्तानपादे भद्रं ते तपसा परितोषि
तः वरदोऽहमनुप्राप्तो वरं वरय सु ।
व्रत ध्रुव उवाच भगवन् सर्वभूतेश
सर्वस्यास्ते भवान् हृदि किमज्ञातं
तव स्वामिन् मनसा यन्मयेप्सितं
नैतद्राजासनं योग्यं अजातस्य म
मोदरात् इति गर्वादवोचन्मां सप
त्नीमातुरुच्चकैः आधारभूतं जग
तः सर्वेषामुत्तमोत्तमं प्रार्थयामि

प्रभोस्थानंत्वन् प्रसादाद्दवतोत्य
श्रीभगवानुवाच त्रैलोक्यादपि
केस्थानेसर्वताराग्रहाश्रयः भ
विष्यति न संदेहो मत्प्रसादाद्भवा
न्ध्रुव सूर्यात् सोमात् तथाभौ
मात् सोमपुत्राद्बृहस्पतेः सिता
र्कतनयादीनां सर्वर्क्षाणां तथा
ध्रुव सप्तर्षीणां मशेषाणां ये
च वैमानिकाः सुराः सर्वेषाम्
परिस्थानं तव दत्तं मया ध्रुव इति
विष्णुपुराणे ११ अध्यायः ध्रुवयो
गजातफलं यथा नरोनर्त्तिवा
र्णीसदा वक्तृपद्मेचरीकर्त्तिका
वंवरीभर्त्ति वंधून् ध्रुवाख्ये प्रसू
तिर्यदा तस्यकीर्त्ति र्दिगन्तेनिता
न्ते भवेद्वारुमूर्त्तिः इतिकोष्ठीप्र
दीपः ध्रुवगणो यथा उत्तरफल्गु
नी १ उत्तराषाढा २ उत्तरभाद्रपद ३
रोहिणी ४ इतिज्योतिषं तारा वि
शेषः यथा मेरोरुभयतो म
ध्ये ध्रुवतारे नभस्थिते निरक्ष
देशसंस्थानामुभयेक्षितिजाश्रि
ते भवतः ध्रुवयो र्वेड मादिम
प्रवहानिलैः पर्य्येमजस्तनमहा
ग्रहकक्षा यथाक्रमं इति सूर्य्य
सिद्धान्ते १२ अध्यायः ॥
ध्रुवकः पुं स्थाणुः इति हेमचन्द्रः
गीताङ्गविशेषः धुया इति भाषा
तस्य लक्षणं यथा उत्तमः षट्
पदः प्रोक्तो मध्यमः पंचमः स्मृतः
कनिष्ठश्चतुर्भिः स्याद्ध्रुवकोऽ
यं मयोदितः उक्तंद्विखण्डमुद्ग्रा
हद्विखण्डं ध्रुवकेमतं ततोद्वि
खण्डआभोगे तालमान रसैः स
ह आभोगेकविनामस्यात्तथाना
यकनाम च उद्ग्राहः प्रथमं गीत्वा
ध्रुवस्तस्मादाभोग ध्रुवको ततः
उद्ग्राहः प्रथमः पादः कथितः पू
र्वसूरिभिः गीत्वा पूर्वपदं न्यासो
यत्र स ध्रुवकोमतः यत्रैवकवि
नामस्यात् स आभोग इतीरितः
ध्रुवकादिषु सर्वेषु भवेदेवंविधः
क्रमः सत्र षोडशविधः यथा ज
यंतः शेखरोत्साहो मधुरो निर्म्म
लस्तथा अनलः कमलश्चैवसा
नंदश्चन्द्रशेखरः सुखदःकुमुदो
जायी कंदर्पो जयमंगलः ति
लको ललितश्चेति ध्रुवकाः
षोडश स्मृताः ॥ एकादशा
क्षर पदादेकैकाक्षर ॥

वर्द्धितैः खण्डैः ध्रुवाः षोडशास्युः
षट्त्रिंशत्पत्तनावधि द्विखण्डे रक्तै
रेव पदनेकमिहेष्यते उद्ग्राह ध्रु
वकाभोगैरित्थं षट्पद निर्ण
यः पंचपादेन ध्रुवके पदे नैके
न तद्भवः चतुष्पादेन ध्रुवके प
देनैकेन तद्भव एवंनास्येव तद्भ
वः इति सङ्गीतदामोदरः ॥
ध्रुवका स्त्री ध्रुवका धुया इति भा
षा संज्ञा इत्युणादिकोषः ॥
ध्रुवा स्त्री जहूः वटपत्राकृति य
ज्ञपात्रं इत्यमरः मूर्वा शाली ॥
शालपर्णी गीतभेदः धुया इति
भाषा इतिमेदिनी साध्वी स्त्री ।
इतिशब्दरत्नावली ॥
ध्रेक अ उ. स्वने उत्साहे इति क
विकल्पद्रुमः उत्साहो वृद्धि रि
ति चन्द्रः औद्धत्यमिति क्षीरस्वामी
स्वनेन उत्साहः स्वनोत् साह इ
ति केचित् तन्मते शब्देनात् ।
सहते इत्यर्थः इति तट्टीकायां ।
दुर्गादासः ॥
ध्रै तृप्तौ इतिकविकल्पद्रुमः ॥
ध्वंसः पुं नाशः यथा जन्याभाव
त्वंध्वंसत्वमिति सिद्धान्तमुक्तावली
ध्वंसु स्त्री ध्वंसः गमनं अधः
पतने इतिध्वंसधातोर्भावे अन
ट् प्रत्ययः ॥
ध्वंसी न पुं सर्वतसंभवपीलुवृक्षः
इतिशब्दरत्नावली ध्वंसविशिष्टे
त्रि ध्वंसी स्त्री त्रसरेणुपरिमाणं य
था जालान्तरगते सूर्य्य करे ध्वंसी
विलोक्यते त्रसरेणुस्तुविज्ञेय स्त्रिं
शता परमाणुभिः इति वैद्यक
परिभाषा ॥
ध्वज, ध्वज १ } गतौ इति कविकल्पद्रुमः
ध्वजः पुं शौण्डिकः इति मेदिनी
ध्वजः पुं क्ली पताका खट्वाङ्ग
मेढ्रं चिह्नं इति मेदिनी ॥
गर्वः दर्पः इतिशब्दरत्नावली
पूर्वदिशागृहं इतिहेमचन्द्रः ॥
पताकादण्डः तत्पर्य्यायः केत
नं २ इत्यमरटीकायां भरतः ॥
ध्वजयुक्ति र्यथा सेना चिह्नक्षिती
शानां दर्शयेद् ध्वज इतिस्मृतः सप
ताको निष्पताकः स ज्ञेयो द्विवि
धो बुधैः पताकासार्द्धदैर्घ्येण दंड
स्तु पृथिवीभुजां सपताकध्वजं
स्यात् यदा हस्तपरिन्यसेत् ॥

स्तंभशोभनं पंकवर्णैर्विचित्रंवाद्यघंटा
चामर भूषितं किंकिणीजालको
पेतंवर्हिपत्र विभूषितं । मुक्ता
दि वर्णैर् विभावितः क्रमाद्या कार
येत् ध्वजं दण्डाग्राद्धरणीं यावत्
हस्तैकं विस्तरेण तु महाध्वजं तं वि
ख्यातं सर्वकाम प्रदंशुभं ध्वजेन र
हितो विप्र प्रासादस्तु वृथा भवेत्
पूजाहोमादिकं सर्वं जपाद्यं यत्कृ
तं नरैः शिव सर्वस्य देवेभ्यस्तु गृह
द्याद्वाहनैरुपशोभितं तुरंगमेन
सूर्यस्य हरस्य वृषचिन्हितं ॥
विष्णो गरुडांकितं दुर्गायै सिंहचि
न्हितं कार्यं ध्वजपताकाद्यमन्य ।
थान कथंचन गरुड लक्षणमा
ह नारदपंचरात्रे उपेन्द्रस्याग्रतः
पक्षी गृध्रकेशः कृतांजलिः ।
सप्तजानुगतो भूमौ महीदोम ।
स्तिमेवित्रनः पतितजदोजराक्षि
वेगनासोनरांगकः द्विबाहुः पतद्
रूपकर्मवानिनतापनः विस्तृ
तौ मेरु प्रतिपाद्य द्विजोद्धयान् ध्वजे
विरुषा वेशमनः निर्दहन्त्याशुपापा
निमहापातकजान्यपि इति प्रति
ष्ठानंत्र यथ ध्वजविक्षविधिः ॥
सिंहाद्युपाध्येयस्वपस्य विष्ठ

हा अन्या हारस्या स्पते वत्स न
तस्य विद्युतं भयं कापि संस्थाम
हामाया सर्वशत्रुविनाशिनी ह
षयस्येप्सितं दद्यात् वत्से ध्रुवं य
उत्तमं देहे विद्यार्थकामेन वर्हि
णे सतत मिहृदा गरुत्मता महा
माया सर्वरोगविनाशिनी महि
षस्या महामारीः शमयेत् ध्वज
संस्थिता करिणा सर्वकार्येषु न
पैः कार्या त्रिशूलिनी पन्नस्याच
त्रिका रौप्या धर्मकामार्थमोक्षदा
मेतस्या सर्वभयहा नित्यं ॥
पद्मनिपातनात् स्मृता देव
राजेन्द्रनीलेन पलकरावरा भ
वत्ते सिद्धकामस्य चिह्नाग्रे संख्य
वस्थिता गंध पुष्पार्चितं कृताव
स्त्रहेमसवर्चितं फलशालिय
वस्त्र विवर्द्धमान विभूषितं शोभ
ने उच्छ्रयेस्वयं पताकां च मनोर
मा चामरंकलसंशोभमानपत्रं
वितानकं भवते सिद्धकामस्यत
पसः फलदायकं नमो विश्वेश्वरी
दुर्गे हामेदेवं दृष्टाति ध्वजं समुच्छ्र
यिष्यामि वरसाधीश सर्वं वहा अथ
ध्वजदान विधिः विश्वेश्वर उवाच ॥
यदेवस्य महाभगा वत्स विश्वपा

परा तदहं श्रोतुमिच्छामि ध्वजदा
ने विधानतः अगस्त्य उवाच य
था त्वं पृच्छसे वत्स तथा श्लोके
ण वदामि प्रश्नः पूर्वतया तेन
शंभुगीतं प्रकाशितं शुकस्य भा
वयुक्तस्य तदहं ते महात्मनः कथ
यामि यथान्यायं ध्वजदानं महाफ
लं शुक उवाच देवाध्वज प्रमाण
तु विधिं तस्य लांछनं दीयते च
यथा नाथ तदशेषं ब्रवीहि नः ईश्व
र उवाच प्रागुक्तं कृमिजं वापि ध्वजं
केशविवर्जितं नवं समं चकृदना
च प्रासादाद् द्विगुणं वर्धितं समं प्र
दंत्तमरउत्सुभ्रशैलंवा धातुजं हि
वा तस्मिन् पटे लिखेत् सिंहस
वैलक्षणालंकृतं रोचनासहस्रं
द्वेण हेमलेखाय हर्षया प्रासा
दाद्दिलमानं च दिनिं विस्तरतः
करं ध्वजापादेन कर्जया हर्षाये
ह्नि देवताः सर्वोवाहनलांछ
नलांछिताः सहजेनच किंकि
णी चामरोपेता होरा दर्पणशो
भिताः कृतहोमामहाप्राज्ञः स
हकार दलाविताना महामंगा
लशब्देन देव्याः कुंभान् प्रपूजये
त् सर्वोपधारने च यथाविभ
वविस्तरैः कन्यकाब्राह्मणान्भो

न्पदधिपायसशर्करैः भूतानां त
वलिंदत्वा तथा तमुपरोहयेत्
सर्वकामानवाप्नोति विद्याधर
पतिर्भवेत् मोदते विविधान्भो
गान्सर्वविद्यार्थपारगः अथ
वा हेमं रूप्यं वा वार्तपार्थिव
शैलजं कारयेन्मृगराजेन्द्र म
हार्करि महापट्टं महानाव क
रोमत्वात मुक्ताफलपदप्र
दे एवंविधं तनतः कृत्वा त्वम्या
पूजयेच्छिवां सोपवासः शुचि
र्देवः सर्वदंभविवर्जितः क
न्यकाः पूजयित्वा तु विप्रान् वे
दविदस्तथा देव्या भक्ताः स
दाचारास्त्रिकाल हवने रताः
ते यथा शक्ति तत् तोष्या ध्वजारो
हण कर्मणि कन्या देव्या स्व
यं प्रोक्ता कन्यारूपा तु मूलि
नी यावद्दलन योनी स्याताव
देवी सदाविहा द्विजो ब्रह्मा शि
वो विष्णुः स्वकीय व्रत पालकः
पूजितैस्तैः सदा शुक सर्वदेवा
स्तु पूजिताः दीनान्धकृपणानां
तु यमदेयं तु शक्तितः यथास
वेगनो देवी तदुद्दिष्य तत्र भवे
त् नाना भक्ष्याद्यन्न दधिह्रवान्न्
कर्णिकान्वितं वलिदेसर्वभूते

भ्या दश दिश निवेदयेत् वज्रेशो
णा तथा जम्मा ग्रहविंशान्तरापि
वा सिंहस्तम्भसमारोप्यसर्वमंग
ल शान्तिं वेदध्वनिमहामंत्रका
लिकां चण्डिकापरं न्यसेत्सिंहप
रं श्रेयेद्यावद्दश पूर्वं कल्पितं एवं
तवस्त्रसंवीतंसर्वाभरणभूषि
तं देव्यामहाध्वजंन्यसेच्छोषाण
मपि विन्यसेत् तत्र विशिष्टरु
द्राणांसोमसूर्य्यदिवौकसां ध्व
ज दानं महादानं सर्वदानोत्त
मंमतं यावन्तो दीयन्ते शुक्र ध्व
जः प्रासादमूर्द्धनि तावन्तम
वेहत् सप्रासादो देववाञ्छितः
न्यस्य ध्वजं सदा भूतानाना गंध
र्वे सादसः विद्रवंति महात्मा
नो नानावाधांचकुर्वते तस्मा
देव गृह द्वार पुरपर्वतपत्तेन
उच्छिताः शान्तिकामाय ध्वजाः
शुक्रस्य हिताः नदि वान्यहज
दानात्तमं भारते क्वचित् दान
मिष्टं च पुष्टं च देव्या दीपनथैवव
प्रानेन विधिना यस्तु ध्वजं शुक्रनि
वेदयेत् सर्वकामानवाप्नोति सन
रः शिवतां व्रजेत् तस्य दर्शन सं
भाषादपि पापरतानराः विमु
क्ताः सर्वपापभ्यो दिव्यांतिनस

शयः राज्ञा चानेन विधिना देवीलां
छनरंजितं शोभचक्रतृषनार्दहं
सवर्हिणवारणैः सावारो भक्ति
मास्थाय ध्वज यष्टिं समुच्छेयत्
ततस्य संगेरस्तुकेन्यायेन च वै
रिणः नैव शस्त्र व्रण पीडा भवे
च्छा स समुच्छ्रयेत् इति देवीपुराणं
ध्वजद्रुमः पु तालवृक्षः माङ्गृतः
इति राजनिर्घण्टः ॥
ध्वजप्रहरणः पु वायु इति शब्द
रत्नावली ध्वजभंगः पु क्लीवत्व
जनक रोगविशेषः तस्य निदानं
यथा अत्यम्ल लवण क्षार विरु
द्धाशनभोजनात् तथांबुपानादि
षमात् पिष्टान्नगुरुभोजनात् द
धिक्षीरानूप मांस सेवनाद्व्याधि
कर्षणात् कल्याणीगमनाच्चा
पि वियोनिगमनादपि दीर्घरोगस्त्री
विरोधक्लेशा तथैव च रजस्वला ।
दुर्गंधां दुष्टयोनिंच तथैवव प
रित्रुता ईदृशीं प्रमदां मोहात्तस्य
दि गच्छति मानवः चतः पश
भिगमनाच्छेफस ह्याभिघाततः
अधावनाच्च मेढ्रस्य शस्त्र दंत
नखक्षतात् काष्ठप्रहार निष्पेष
शूकानां च निषेवनात् रेतसश्च
प्रतीघातात् ध्वजभंगः प्रवर्तते इति चरकः

तस्य विकं यथा शुक्रेविरात् प्रषि
षेत शुक्रं शोणितमेव वा तोदोत्य
र्थं वृषणयो र्मेढ्रं धूपायतीवच इति
वाभटः अपि च तस्य भावे रक्तपैत्तो
विद्रध्मो मेदनिदाते ध्वजः पततथो
वृषणश्चैव सद्यः प्रजायते भस्मैर
त्नांस्लवणे रति माच्चोपसेवितैः
सोम्य धान्न दयाहुष्टः क्लैव्यं तदप
रं स्मृतं व्यतिव्यवायशीलोयो न
च वाजिक्रिया रतः ध्वजभंगमवा
प्नोति स शुक्र क्षय हेतुकं असाध्यं
सहजं क्लैव्यं मर्मच्छेदाद्भवंच यत्
असाध्यानां विशिष्टानां कार्यो वा
जीकरो विधिः तस्य चिकित्सा यथा
सुवर्णं सुवर्चा शुभा धन्व धन्याह्वे
तयोग योगे प्रशस्तं समस्थं सहो
वा दशांशे पचेत् पाकमूरस्तदाने
जपत्रं हरिद्रा सपिष्टं विधोशुद्धि
हेतोः समस्तं सपिष्टं विधेयं स
गंधायहद्वो पदेपणात् समस्ता
स्य गंधा समस्य विचूर्णं शुभं वा
रि दत्वा गुणं वेदयुक्तं यदा शोष
भूतं तदा योग योगे पचेत् पाक
विज्ञो भृशं दर्वि चालात् पचेत्रा
विडंगं हूनस्यापि तल्पे विदारी

सपस्या तथा तेन वैद्यः ॥
तथा शाल्मली तोय दत्ते सम
स्य वितार्थ्या वतिष्टहृतं योगरा
जः इति वैद्यकं ॥
ध्वजवान् त्रि कृतनपुंसकः ब्राह्म
णब्राह्मणं चानयित्वा तस्यैव शि
रः कपाल मादाय तीर्थान्यनुसं
चरेत् यथा शिरः कपाली ध्वज
वान् भिक्षाशी कर्म वेदयन् ब्रह्म
हा द्वादशाब्दानि मितभुक् शुद्धि
माप्नुयात् ध्वजवान् हत्वा शव
शिरो ध्वजमिति मनुस्मरणात्
अन्यच्छिरः कपालदण्डाग्रस
मारोपितं ध्वज शब्द वाच्यं गृ
ह्णीयादिति मिताक्षरा ॥
ध्वजिनी स्त्री सेना इत्यमरः ॥
ध्वजी न ब्राह्मणः पर्वतः रथः
सर्पः घोटकः इति मेदिनी ॥
मयूरः इति राजनिर्घण्टः शौ
ण्डिकः इति हेमचन्द्रः ॥
ध्वजोत्थानं स्त्री शक्रोत्सवः
इति त्रिकाण्डशेषः पतत् भाद्र
शुक्लद्वादश्यांभवति इतिस्मृतिः
ध्वण • ध्वाने इति कविकल्पद्रुमः
ध्वन सि रवे इति कविकल्पद्रुमः

ध्वन न क शब्दे इतिकविकल्पद्रुमः ध्वनः पुं शब्दः इति भरतद्विरूपकोषः ॥

ध्वनमोदी न पुं भ्रमरः इतिशब्दरत्नावली ॥

ध्वनिः पुं शब्दः इत्यमरः मृदंगादिशब्दः यथा शब्दो ध्वनिश्च वर्णश्च मृदंगादिभव ध्वनिः कंठसंयोग जन्मानो वर्णास्ते कादयोमताः इति भाषापरिच्छेदः उत्तमकाव्यं यथा इदमुत्तममतिशयिनि व्यंग्ये वाच्याद्ध्वनि र्बुधैः कथितः इतिकाव्यप्रकाशः ॥

ध्वनिग्रहः पुं श्रोत्रं इतित्रिकाण्डशेषः शब्दज्ञानंच ॥

ध्वनितः त्रि शब्दितः कृतस्वनमृदंगादिः इति भरतः तत्पर्य्यायः स्वनितः २ इत्यमरः ध्वनिकाव्ययुक्तवाक्यादिश्च ॥

ध्वनिनाला स्त्री वीणा वेणुः काहलः इति मेदिनी

ध्वनिविकारः पुं काकुः शोकभयादिना शब्द विकृतिः इति हेमचंद्रः ॥

ध्वन्स उ ङ गतौ भ्रंशे अधः पतन इति यावत् इतिकविकल्पद्रुमः ॥

ध्वस्त त्रि च्युतं गलितं इत्यमरः ॥ नष्टंच ॥

ध्वानः पुं शब्दः इत्यमरः ॥

ध्वांतः क्ली अंधकार इत्यमरः

ध्वांतचित्तः पुं खद्योतः इति शब्दरत्नावली ॥

ध्वान्तशात्रवः पुं श्योणाकवृक्षः इतिशब्दचंद्रिका सूर्य्य चंद्राग्न्यश्च ध्वांताराति पुं सूर्य्यः इति हेमचंद्रः चंद्राग्नीच ॥

ध्वांतोन्मेषः पुं खद्योतः इति त्रिकाण्डशेषः ॥

ध्वृ॰ कौटिल्ये इतिकविकल्पद्रुमः

न नकारः तवर्ग पंचम व्यंजन विंशवर्णः अस्योच्चारणस्थानं दंतः इति व्याकरणं तत्पर्य्यायः ॥ मेषः २ दीर्घी ३ सैारिः ४ इति वीजाभिधानं न त्स्वरूपं यथा ॥ नकारम्परमेशानि कोटिविद्यु ल्लताकृतिं पंच देवमयं वर्णं स्वयं परमकुण्डली पंचप्राणात्मकं वर्णं हृदिभावय पार्वति इतिकामधेनु। तंत्रः वामतः कुण्डली रेखा कुर्द्धो यः क्रमतः स्थिता चंद्रसूर्य्याग्निरूपा सा मात्रा वाणी प्रकीर्त्तिता इति वर्णोद्धारतंत्रं ॥

न अ निषेधः उपमा इति मेदिनी अस्यस्य पर्य्यायः नहि २ अ ३ नो ४ अभावः ५ इत्यमरः अना ६ ना ७ इति भरतः ॥ नञर्थश्च ॥

नः पुं सुगतः बंधः द्विरण्डः स्तनः इतिमेदिनी रत्नं इत्ये। कान्तरकोषः द्वितीया चतुर्थी षष्ठी वहुवचनान्तस्यास्मच्छब्दस्य स्थाने नरूपायंच ॥

नः द्वन्द्वः त्रि ह्रस्वनासिकः इति हेमचंद्रः नः श्यकः त्रि नाशकः इति सिद्धांतकौमुद्यामुणादिवृत्तिः नष्टा त्रि नाशाश्रयः इति नशधातोः स्त्रिया णुनागम निष्पन्नः नकुटं क्ली नासिका इति शब्दमाला नकुलः पुं जन्तुविशेषः नेउल इतिवंगीयभाषा तत्पर्य्यायः ॥ पिंगलः २ सर्पहा ३ वभ्रुः ४ इतिहेमचंद्रः सूचीवदनः ५ सविः ६ लोहितानन ७ तस्यमांसगुणाः पिच्छिलत्वं वातनाशित्वं श्लेष्मपित्त कारित्वंच इति राजनिर्घंटः पाण्डुराजस्य चतुर्थ पुत्रः समाद्रीगर्भे अश्विनीकुमार जातः इति महाभारतं पुत्रः इति शब्दमाला शिवः यथा युधिष्ठिरस्यया कन्या नकुलेन विवाहिता पूजिता सहदेवेन सा कन्या वरदा भवेत् इति कुब्जिका विदग्धमुखमण्डने कुल रहितेति ॥ नकुलाख्या स्त्री गंधनाकुली इति राजनिर्घंटः ॥

नकुली स्त्री कुक्कुटी मांसी इतिमेदिनी शंखिनी इतिधरणिः कुंकुमं इतिहेमचंद्रः ॥ हकारः इति वीजाभिधानं नकुलस्य भार्य्याच ॥

नकुलीशः पुं भैरवविशेषः यथा नकुलीशः कालिपीठे दक्षपदांगुलीमम इतिपीठमाला हकारः यथा हकारो नकुलीशोपिदृंसः प्राणोङ्कुशः प्रियेमहेशो नकुलीचैव वराहो गगणं रविः लिंगं मूलेण

महाशून्यः प्राणश्च परमेश्वरि
इति हकार पर्य्यायेवीजाभिधानं
नक्तलेशा स्त्री रास्ना इत्यमरः ॥
नक्कु क नाशने इति कविकल्प
द्रुमः नक्तं स व रजनौ इत्यमरः
नक्तं क्ली रात्रिः लक्षणया नक्त
व्रते यथा उपवासात्परं भैक्षं भि
क्षात्परमयाचितं अयाचितात्
परं नक्तं तस्मान्नक्तेन वर्त्तयेत् देवै
स्तु भुक्तं पूर्व्वाह्णे मध्याह्ने ऋषिभि
स्तथा अपराह्णे पितृभिर्भुक्तं स
न्ध्यायां गुह्यकादिभिः सर्व्ववेला
मतिक्रम्य नक्ते भुक्तमभोजनं ॥
वामाचारोमहादेवो नक्तेनैवाढ
वेह्नाणं इति देवीपुराणं ॥
नक्तकः पुं कर्पटः न्याकुडा इ
तिभाषा इत्यमरटीकायां भरतः
नक्तचारी न पुं विडालः पेचकः
इति त्रिकाण्डशेषः रात्रिचर
मात्रे त्रि ॥
नक्तंचरः पुं राक्षसः इति ह
लायुधः गुग्गुलुः इति जटाध
रः चौरः पेचकः राक्षसः
नक्तमालः पुं करञ्जवृक्षः
इत्यमरः नक्तमुखा स्त्री।
रात्रिः इति हलायुधः ॥

नक्तव्रतं क्ली दिवाभोजनाभावविशिष्ट रात्रि भोजनं यथा हविष्य
भोजनं स्नानं सत्यमाहारलाघवं
अग्निकार्य्यमधःशय्यां नक्तभोजी
षडाचरेत् इति भविष्यपुराणं ॥
नक्ता स्त्री कलिकारी ईशालांगुला
इतिभाषा इति राजनिर्घण्टः ॥
नक्रं क्ली अग्रदारु फाणकाठ इति
भाषा नासिका इति मेदिनी ॥
नक्रः पुं कुम्भीरः इत्यमरः ॥
नक्रराजः पुं जलजन्तुविशेषः।
हाङ्गर इति भाषा तत्पर्य्यायः।
ग्राहः २ जलकिरातः ३ जलाटकः ४
इतिहारावली ॥
नक्रा स्त्री नासिका इतिशब्दरत्ना
वली ॥
नख सर्पणे इतिकविकल्पद्रुमः
नखं क्ली पुं अंगुलीकंटकः न
हइति हिन्दीभाषा तत्तउपधातु
विशेषः गर्भस्थ वालकस्य षष्ठ
मासे भवति इतिसुखबोधः तत्प
र्य्यायः पुनर्भवः २ कररुहः ३
नखरः ४ इत्यमरः कामाङ्कुशः ५
करज ६ पाणिजः ७ अंगुलीसम्भवः ८
पुनर्नवः ९ इतिराजनिर्घण्टः क
राग्रजः १० करकंटकः ११ ॥

स्मरांकुशः १२ रतिरत्नः १३ क
रकंटः १४ करांकुशः १५ इति
शब्दरत्नावली रतिक्रीडायां।
नखाघात स्थानानि यथा ॥
नखाघातः मदान्धानाय यथास्था
नानि कर्मसु पार्श्वयोः स्तनयोश्चै
व ऊर्व्वोश्चैव नितम्बके कक्षस्थ
ले च कर्णानेकपालेवाऽऽमूल
के ग्रीवायां कंठदेशेच नखाघा
ते समाचरेत् तथा सर्व्वशरीरेषु
नखं दद्यात् शनैः शनैः इतिका
मशास्त्रं न नखैर्विलिखेद्भूमिं।
गांच सहे शयेन्नहि न स्वांगेनख
वाद्यैवै ऊर्य्याज्ञ्जलिना पिबेत्
इति कूर्म उपविभागे १५ अध्यायः
नखं क्ली स्त्री सुगंधिद्रव्यविशे
षः नखी इति ख्यातः तत्पर्य्यायः
शुक्तिः २ शंखः ३ खुरः ४ कोल
दलं ५ इत्यमरः करजाख्यः ६
व्याघ्रखुरः ७ नखः ८ व्याघ्रनखः
९ नखी १० द्विधा शंखनखाख्या।
न्या शुक्राख्या वदरीछदः इतिर
त्नमाला कररुहः ११ सिंवी १२ शफः
१३ चलः १४ कोशी १५ करजः १६ हनुः
१७ नागहनुः १८ पाणिजः १९ वदरीपत्रः
२० शुष्कः २१ पण्यविलासिनी २२ संधि

नालः २३ पाणिरुहः २४ इति
राजनिर्घण्टः व्याघ्रायुधं २५ चक्र
कारकं २६ स्वल्पनखस्य पर्य्यायः
नखी १ हनुः २ हट्टविलासिनी ३
तयोर्गुणाः ग्रहश्लेष्मवातास्त्र
रक्षोघ्न नाशित्वं लघुत्वं उष्णत्वं
शुक्रलत्वं वर्ण्यत्वं स्वादुत्वं व्रण
विषालक्ष्मी मुखदौर्गन्ध्यनाशि
त्वं पाकरसयोः कटुत्वंच इति भा
वप्रकाशः कण्डु भूत विनाशित्वं
इति राजनिर्घण्टः रक्तोष्णत्वं इति
राजवल्लभः शैलरुहं व्याघ्रन
खं हनु हट्टविलासिनी शुषि
रांजनकेशी च कपोतांघ्रि नं
लीखुरः स्वल्पपत्र स्वसेत्स्य
क्ति नखरी वदरीकदा महास्त्र
सौ शंखनखः शंखाख्यो गंध
सारणः इति भरत धृतवाच
स्पतिः ॥ नखः पुं खण्ड इति
हेमचंद्रः नखरुहः पुं नापितः
इति त्रिकाण्डशेषः ॥ नखनि
ष्पावः पुं निष्पावीभेदः तत्पर्य्या
यः अंगुलिफला २ वृत्तनिष्पा
विका ३ ग्राम्या ४ नखगुच्छफला ५
ग्रामजनिष्पावी ६ नखफलिनी ७
अस्या गुणाः कषायत्व मधुरत्व।

कंठशुद्धिकरत्वं मेध्यत्वं दीपनत्वं
त्वं रुचिकारित्वंच इति राज
निर्घण्टः ॥
नखपर्णी स्त्री वृश्चिकालुपः इ
तिराजनिर्घण्टः ॥
नखपुंखी स्त्री एका इतिराजनि
र्घण्टः नखमुचं क्ली धनुः इतिसं
क्षिप्तसारव्याकरणे नखस्पृमोच
केति नखरः पु क्ली नखः इत्यमरः
नखरंजनी स्त्री नखच्छेदनास्त्रवि
शेषः नरुणा इति भाषा यथा
अनंतनचरणेणपात्र चारिणी मल
हारिणी पुनर्भवच्छेदकरीयंगेव
नखरंजनी इतिश्याष्योंग्केकाव
नखरायुधः पु सिंहः व्याघ्रः अ
कुटः इति राजनिर्घण्टः ॥
नखराह्वः पु करवीरवृक्षः इ
तिराजनिर्घण्टः ॥
नखराह्वः पु करवीरवृक्षः इ।
तिराजनिर्घण्टः ॥
मधुरी स्त्री नखी इतिशब्दमा।
ला नखवृक्षः पु नीलवृक्षः इति
राजनिर्घण्टः ॥ नखशाखः पु
दरकुशाखः इतिशब्दरत्नावली
नखांकं क्ली व्याघ्रनखी इति
शब्दरत्नावली ॥

नखाङ्कं क्ली नली इतिकाचिद्रत्न
माला नखायुधः पु व्याघ्रः इति
राजनिर्घण्टः सिंह अकुटोच ॥
नखालिः पु दक्षिणावर्तः इति शु
ष्कचंद्रिका नखश्रेणी च ॥
नखालुः पु नीलवृक्षः इति राज
निर्घण्टः ॥
नखाशी न पु पेचकः इतित्रि
काण्डशेषः नखभक्तकमात्रेति।
नखी स्त्री नखनामगंधद्रव्यं इत्य
मरः सिंहे इनन्तः पु इति राज
निर्घण्टः विदारणक्षमनखयुक्त
पशुमात्रं यथा नखिनांच नदी
नांच शृंगिणां शस्त्रपाणिनां वि
श्वासोनैव कर्तव्यः स्त्रीषुराजकु
लेषु च इतिचाणक्यः ॥
नगः पु पर्वतः वृक्षः इत्यमरः ॥
नगजः पु हस्ती इत्यमरटीकासा
रसुंदरी पर्वतजात वस्तुमात्रेत्रि
नगजा स्त्री क्षुद्रपाषाणभेदा इति
राजनिर्घण्टः ॥
नगणा स्त्री लता विशेषः नषाफ
टकी इतिभाषा तत्पर्यायः पाष
णभेदी १ गिरिणा २ स्फुटबंधनी ४
ज्योतिष्मती ५ इतिलता ६ इङ्गुदी
७ इति रत्नमाला ॥

1557

नगनंदिनी स्त्री दुर्गा इतिशब्दरत्ना
वली ॥
नगपतिः पु हिमालयपर्वतः इति
त्रिकाण्डशेषः चंद्रश्च ॥
नगभित् पु पाषाणभेदनः इति
राजनिर्घण्टः इंद्रश्च ॥
नगभूः पु क्षुद्रपाषाणभेदा इति
राजनिर्घण्टः पर्वतजाते त्रि ॥
नगरं क्ली नगाइवप्रासादादयः सं
तियत्र शहर इतिभाषा तत्पर्यायः
पूः २ पुरी ३ पुरिः ४ पुरं ५ नगरी ६
पत्तनं ७ पट्टनं ८ पट्टनी ९ पुटभेद
नं १० पटभेदनं ११ स्थानीयं १२ निग
मः १३ इत्यमरभरतौ केचित्तुनगर
पत्तनस्थानीयानां भेदमाहुः तत्र
पुरादित्रयं पुरे पत्तनादिद्वयं पत्तने
स्थानीयादिद्वयं स्थानीये इतिमम
न्ते यत्राष्टशतग्रामीय व्यवहारस्था
नं मध्यवर्तितत् नगरं यत्रराजात
त्सविचारकाश्चतिष्ठन्ति तत्पत्तनं।
प्राकारादिना दुर्गं योजन विस्तीर्
र्णं नगरं स्थानीयं केचित्तु पुरनगर
योरपि भेद माहुः बहुग्रामीय
व्यवहार स्थानं पुरं तत्र प्रधान
भूतं नगरं इतिभरतः अथनगर
र निर्माणकालः स्थिरराशिगते।

भानौचंद्रेच स्थिरभोदये शुद्धे।
काले दिने चैव नगरं कारयेन्नृपः
तस्य लक्षणं भविष्योत्तरे दीर्घ
वा चतुरस्रंवा नगरं कारयेन्नृपः
तत्प्रस्थं वर्तुलंचापि कदाचिदपि
कारयेत् दीर्घं पादैकप्रसरं चतु
रस्रं समाचितं त्रिभिः पादैः स
मं प्रस्थं वर्तुलं वलयाकृति ॥
दीर्घं स्याद्दीर्घकालाय सर्वसम्पत्ति
हेतवे चतुरस्रं चतुर्वर्गफला
य पृथिवीभुजः प्रस्थं त्रिशक्तिना
शाय वर्तुलं वक्ररोगकृत् राज्ञः
स्व हस्ते दशभी राजहस्त उदाहृ
तः राजहस्तैश्च दशभी राजदंड
उदाहृतः राजदण्डैश्च दशभी
राजच्छत्र मुदाहृतं राजच्छत्रैश्च
दशभी राजकाण्ड उदाहृतः रा
जकाण्डैश्च दशभी राजपुरुष उ
च्यते राजधानी तु कथिता दश
भीराजपूरुषैः राजधानी तु क
थिता दशभी राज पूरुषैः राज
धानी दश गुणा राजदेव मु
दाहृतं समेव परिमाणानि
प्रोक्तानि पुरपत्तने भयत्रा भोग
संपत्ति मर्त्यकीर्ति सुखार्थिनां रा
मदेवेण नृपतिः पुरपत्तनमारभे
त् लक्ष्मीमेयः क्षमा सौख्यं पंच

ते भंगपक्तता समृद्धिविनं नाम
श्च मंगलंचवलंद्वयः सामान्य भोग
संपत्तिरितिषोडशकीर्त्तिताः यथा
र्थसंज्ञा नगरामनिनात्तत्ववेदिना
इतियुक्तिकल्पतरुः ॥
अपिच नृपावासः पुरी प्रोक्ताचि।
शाम्बरमपीष्यते पक्तनो यत्र नद्या
सो नगरं चैकतःस्थितं मिश्रेत्तवर्व
टं नाम नदी गिरि समाश्रयं विप्रा
श्चविप्रसत्याश्रयत्रचैव वसंतिहि
सत्त्रग्राम इतिप्रोक्तः शूद्राणां वास
एव च पण्यक्रियादि निपुणोऽश्चा
त्तवर्णप जने पुते अनेकजाति स
वंधं नैकशिल्प समाकुलं सर्वदे
वत संबधं नगरंत्वभिधीयते इ
ति विष्णुपुराणटीकायांश्रीधर
स्वामि धृत भृगु वचनं अपिच
नगरे सर्वतोभद्रं कर्मव्यं कुमारी
पुरमेव वा चतुष्पथ चतुर्थकं स
र्वकाम फलावहं छिन्नकर्णं वि
नासं च उःस्थितं कुशदुर्वलं नग
रं न प्रशंसंति गर्भविद्धं विभेदि
तं अयतःस्वल्पग्रासारं छिन्नग्रा
णं विदुर्बुधाः हिमवंवे कर्णहीनं
नेत्र कुपामध्यं कृशोविदुः उः
स्थितं निम्नग्राम्यन्तनेकंनेधनं
दुर्बलं सौम्य सर्वसत्त्वोत्कादं।
स्थितं वारुणं वश्यं याम्यमायुःप्रदं
पूर्वेण नगरं प्रीतिवर्द्धनं ईशावासव।
मध्यं सर्वरोगप्रसवप्रदं मध्यं च
तत्पथ्योपेतं नच तं पीडयेत् क्वचि
त् ब्रह्मस्थानं हितं विप्र शिवस्तत्र
सदा स्थितः चतुर्विंशतिनाशस्तु ह
स्तानष्ट शतं परं अत्र मध्ये प्रश
संतिक्लेशात् कष्टविवर्जितं अ
थ किच्छुशतान्यष्टौ प्राक्मुख्यंनि
वेशनं नगरार्द्धं च विष्कम्भंखेटं
ग्रामं ततोऽर्द्धतः नगराद्योजनं खे
टं खेटाद्ग्रामोऽर्द्धयोजनः द्विक्रोश
परमा सीमा क्षेत्रसीमा चतुर्धनुः
त्रिंशद्धनुर्भिर्विस्तीर्णो देशमार्ग
स्तैः कृतः विंशद्धनु ग्राममार्गः
सीमामार्गो दशैव तु धनूंषि दश वि
स्तीर्णः श्रीमान् राजपथः कृतः नृ
वाजिरथनागानामसम्बाधः सुस
चरः धनूंषि चैव चत्वारि शाखा र
थ्यास्तु निर्मिताः त्रिकरोऽथोपर
थ्यास्तु द्विकरा स्युपरथ्यिका जं
घापथ श्चतुष्पाद स्त्रिपादस्य गृहा
न्तरं वृतीपाद स्तर्द्धपादः प्राग्वंश
पादकः स्मृतः इति देवीपुराणं
नगरघातः पुं हस्ती इति सं।
क्षिप्तसारव्याकरणं ॥ ॥

नगरी स्त्री स्त्री नगरं इत्यमरः
नगरीवकः पुं काकः इति त्रि
काण्डशेषः
नगरोत्था स्त्री नागरमुस्ता इति
राजनिर्घण्टः ॥
नगरौषधिः स्त्री कदली इति श
ब्दचन्द्रिका ॥
नगाटनः पुं वानरः इति त्रि।
काण्डशेषः ॥
नगाधिपः पुं हिमालयपर्वतः
इति जटाधरः ॥
नगाश्रयः पुं हस्तिकंदः इति।
राजनिर्घण्टः नगवासिनि त्रि
नगौकाः स पुं पक्षी इत्यमरः
सरभः सिंहः इति मेदिनी ॥
काकः इति शब्दचन्द्रिका नग
वासिनि त्रि ॥
नग्नः त्रि विवस्त्रः नेंगट इति भा
षा तत्पर्यायः अवासाः २ दिग
म्बरः ३ इत्यमरः तथाच भृगुः
विकक्षोऽनुत्तरीयश्च नग्नश्चावस्त्र
एव वा श्रौतस्मार्त्ते तथा कर्म न न
ग्नश्चिन्तयेदपि विकक्षः प।
रिधानासंहृतकक्षः तथाच
योगियाज्ञवल्क्यः परिधा
नाद्बहिः कक्षा निबद्धा ह्यासु
री भवेत् स्मृतिः वामे पृष्ठे
तथा नाभौ कक्षत्रयमुदाहृतं
एभिः कच्छैः परीधत्ते यो विप्रः
स शुचिः स्मृतः बौधायनः
नाभौ धृतं च यद्वस्त्रमाच्छाद
यति जानुनी अन्तरीयं प्रशस्तं
तदाच्छन्नमुभयोस्तयोः ॥
आचारचन्द्रिकायां द्विकच्छः क
च्छशेषश्च मुक्तकच्छस्तथैव
च एकवासा अवासाश्च नग्नः
पंचविधः स्मृतः इत्याह्निकतत्त्वे
न नग्नः स्त्रियमीक्षेत न पुरुषं वा
कदाचन नच मूत्रं पुरीषं वा न
वै संस्पृष्ट मैथुनं नोच्छिष्टः स
विशेषेण न नग्नः स्नानमाचरे
न्न गच्छेन्नपठेद्वापि नचैव स्वं
शिरः स्पृशेत् इति कूर्मपुराणे
उपविभागे १५ अध्यायः ॥
पारिभाषिकनग्नो यथा येषां कु
ले न वेदोऽस्ति न शास्त्रं नैव च
व्रतं ते नग्नाः कीर्त्तिताः सद्भि
स्तेषामन्नं विगर्हितं इति मार्क
ण्डेयपुराणे सदाचाराध्यायः।
ऋग्यजुःसामसंज्ञेयं त्रयीव
र्णावृतिर्द्विज एतां मुञ्चति
यो मोहात् स नग्नः पातकी स्मृ
तः यस्तु संत्यज्य गार्हस्थ्यं वानप्र
स्थो न जायते परिव्राडपि मैत्रेय

स नग्नः पापकृत्तरः इति विष्णु
पुराणे १८ अध्यायः नग्नः पु
वंदी क्षपणकः इति विश्वमेदि
न्यौ शेषस्य पर्य्यायः नग्नाटकः
२ निर्ग्रंथकः ३ भदन्तः ४ दिगम्ब
रकः ५ इति हारावली नग्नकः
पुं नग्नः नजाते लज्जते इति नग्नकः
ओ नज ऊी व्रिडि इत्यस्मात् क्तः
सल्वाद्योदिति नः मनीषादि।
त्वात् जस्यगः स्वार्थेकः इति व्या
करणं नग्नजित् पुं राजविशेषः
स च श्रीकृष्णपत्न्या नाग्नजित्या
जनकः यथा नग्नजिन्नाम कोश
ल्य आसीद्राजातिधार्म्मिकः त
स्यासत्याभवेत्कन्या देवी नाग्न
जिती नृप इति श्रीभागवतदश
मस्कंधः नग्नहू स्त्री नग्नहूः इ
ति भरतधृतामरमाला ॥
नग्नहूः पुं नानाद्रव्यकृतसुरावी
जं वा खर इति ख्याते इति भरतः
तत्पर्य्यायः किण्वं २ इत्यमरः
कण्वं ३ नग्नहू ४ इति तट्टीका ॥
नग्ना स्त्री विवस्त्रा नारी तत्पर्य्यायः
कोहवी २ कोटवी ३ नग्निका ४
नग्नयोषित् ५ इति शब्दरत्नावली
नग्नाटः पुं दिगम्बरः इति हला
युधः नग्नाटकः पुं दिगम्बरयोगी

इति हारावली ॥ नग्निका स्त्री
अप्राप्तरजस्का तत्पर्य्यायः गौ
री २ अनागतार्त्तवा ३ विवस्त्रा
तत्पर्य्यायः कोहवी २ कोटकी ३
कोटरी ४ इत्यमरस्तट्टीका च।
नञ ओ ऊ ई व्रिडि इति कविकल्प
द्रुमः नञ्च अभावसंज्ञकं स
मासे स्थितस्यास्य स्याने स्वरे परे
अन् व्यंजने परे अकारो विकल्पेन
भवति यथा अनंतः नान्तः अ
च्युतः नच्युतः अस्यार्थाः षट्
सादृश्यं १ यथा अब्राह्मणः अ
भावः २ यथा अपापं अन्यत्वं ३
यथा अघटः पटः अल्पत्वं ४
यथा अनुदरी कन्या अप्राश
स्त्यं ५ यथा अकेशी विरोधः ६
यथा असुरः इति मुग्धबोधटी
कायां दुर्गादासः ॥ नञः
भावे निषेधे च स्वरूपार्थेप्यति
क्रमे ईषदर्थे च सादृश्ये तद्वि
रुद्ध तदन्ययोः इति मेदिनी ॥
नकारश्च ॥
नट नृते हिंसे इति कवि
कल्पद्रुमः ॥
नट क भ्रंशे लिषि इति कवि
कल्पद्रुमः ॥
नटः पुं शैलालकवत्तः नर्त्तकः

नेडुया इति भाषा । तत्पर्य्यायः
शैलाली २ शैलूषः ३ जायाजीवः
४ कृशाश्वी ५ भरतः ६ इत्यमरः ॥
सर्व्ववेशी ७ भरतपुत्रकः ८ धात्री
पुत्रः ९ रंगजीवः १० रंगावतारकः
११ इति हेमचंद्रः ॥ अशोक वृ
क्षः इति मेदिनी किष्कुपर्व्वा नल
इति भाषा इति जटाधरः ॥
वर्णसंकर जाति विशेषः यथा
शौचिकाच्छौण्डिकाज्जातो नटोव
रुडएव च इति पराशरपद्धतिः ॥
व्रात्यायां क्षत्रियाज्जात इतिमनुः ॥
हनूमन्मते दीपक रागस्य रागिनी
अस्या जातिः संपूर्णा । गृहं षड्ज
स्वरः ग्रीष्मर्त्तौ दिवसांते गानसम
यः रागमालायामस्याः स्वरूपं
रक्तवर्णा नारी नवयौवना सा
लेहता अश्वारूढा पुरुषवत्
परिहितवसना निष्कोष करवा ।
लं धृत्वा शत्रुनाक्रममाणा इति
संगीतशास्त्रं नारदपुराण मते ।
श्रीरागस्य पुत्रः नटनं क्लीं नृत्यं इत्यमरः ॥
नटनारायणः पुं रागविशेषः ह
नूमन्मते मेघरागस्य तृतीय पुत्रः
भरतमते दीपक रागस्य तृतीय

पुत्रः सोमेश्वरमते कल्लिनाथम
ते च षड्रागाणां शेषरागः ।
तस्य भार्य्याः षट् यथा त्रोटकी
१ त्रिभंगी २ पूर्वी ३ गांधारी ४ व
राभा ५ सिंधुमल्लारी ६ सोमेश्वर
मते तस्य रागिण्यः यथा कामदा
१ कल्याणी २ आभीरी ३ नाटकी ४
सारंगी ५ नटहम्मीरी ६ रागिणी
भिः सहास्य हिमर्त्तौ गानसमयः इति
संगीतशास्त्रं ॥
नटभूषणं क्लीं हरितालं इति ।
रत्नमाला ॥
नटमण्डनं क्लीं हरितालं इतिहे
मचंद्रः ॥
नटवरः पुं नटश्रेष्ठः यथा वर्हापी
डं नटवरवपुः कर्णयोः कर्णिकार
मिति श्रीभागवतं ॥
नटसंज्ञकः पुं गोदंताख्यहरिताले
इति त्रिकाण्डशेषः नटश्च ॥
नटांतिका स्त्री लज्जा इति हारावली
नटी स्त्री नटीनामगंधद्रव्यं इत्यमरः
वेश्या इति शब्दरत्नावली ॥ ।
नटपत्नी च ॥
नटेश्वरः पुं शिवः इति हेमचंद्रः ॥
नड क भ्रंशे इति कविकल्पद्रुमः ।
नडः पुं नलतृणं इत्यमरः जाति ।

भेदः इति पुंनपुंसक संग्रह टी
कायामघुरेशः ॥
नडकीयः त्रि लसमूहदेशः इति
हेमचंद्रः ॥
नडप्रायः त्रि नलवकुलदेशः नत
पर्य्यायः नडकीयः २ नड्वान् ३ न
ड्वलः ४ इति हेमचंद्रः ॥
नडमीनः पुं चिलिचिममत्स्याः न
लमीन इत्यमर दर्शनात् उलयोरै
क्यनडसंहतिः स्त्री नडसमूहः त
त्पर्य्यायः नड्या २ इत्यमरः नडसं
चयः ३ इति शब्दरत्नावली ॥
नडहः त्रि कान्तः ललितः इति ।
भूरिप्रयोगः ॥
नड्या स्त्री नडसमूहः इत्यमरः ।
नड्वलः त्रि नलवकुलदेशः इत्य
मरः नड्वान् त्रि नलवकुलदेशः इत्य
मरः नड्वाभूः स्त्री कुहिमः इति भूरि
प्रयोगः ॥
नतं क्ली तगरपादी तगरमूलं इ
ति मेदिनी ॥
नतः पुं जन्मनाडिकाविशेषः तद्य
था असकृत् कर्मणा येन यातिदृक्
तुल्यतां दिवि नतोन्नतो नतः सा
प्यौ भावाः खेट बलानि षट् ॥
दिनार्द्धान्नतिताजन्मनाडिकाननता
डिका पूर्वापरार्द्धजातस्यप्राक् परा
ख्या दिने भवेत् रात्रे गत चटी शे
षघटी दिनार्द्ध संयुता परपूर्वाभि
धा ज्ञेया रजन्यां नत नाडिका ॥
इति कोष्ठीप्रदीपः ॥
नतः त्रि कुटिलः नम्रः इति मे ॥
दिनी ॥
नतद्रुमः पुं लताशालः इति र ।
त्नमाला ॥
नतनासिकः त्रि अल्पनासिकायुक्तः
खांदा इति भाषा तत्पर्य्यायः ॥
अवटीटः २ अवनाटः ३ अवभ्रटः ४
इत्यमरः ॥
नताङ्गी स्त्री नारी इतिराजनिर्घण्टः
नतिः स्त्री नमनं नम्रता यथा ॥
नीति भूमिभुजां नति र्गुणवतां
ह्रीरंगनानांधृति र्दम्पत्योः शिशा
वो गृहस्य कविता बुद्धेः प्रसादो
गिरां लावण्यं वपुषः स्मृतिः स
मनसः शांति र्द्विजस्यक्षमाशक्तस्य
द्रविणं गृहाश्रमवतां स्वास्थ्यं सतां
मण्डनं इतिनवरत्नं ॥
नद इ ३ संहृथि आनंदयुक्तभावे
इति कविकल्पद्रुमः ॥
नदः पुं पुंवाचकाकृत्रिम स्वाताव
च्छिन्नजल प्रवाहः सचसिंधुभैरवशो
णः ।

दामोदर ब्रह्मपुत्रादिः तत्पर्य्यायः
पुनर्वहः २ भिद्यः ३ उद्यः ४ सरस्वा
न् ५ इतिहेमचंद्रः अष्टषष्टिस्तुतो
र्थानि नदाश्च दश कोटयः इति
इतिपाद्मेभूखण्डे ८५ अध्यायः न
दनुः पुं मेघः इत्युणादिकोषः ।
सिंहः इतिशब्दमाला ॥
नदीस्त्री अष्टसहस्त्रधनुरन्तर्नगा
मनाया साच गंगा यमुना सरस्वती
कावेरी गोदावरी प्रभृतिः तस्या ।
लक्षणमाह छंदोगपरिशिष्टं धनुः
सहस्राण्यष्टौ चगतिर्यासांन विद्यते
नता नदीशब्द वहा गर्त्तास्ताः परि
कीर्त्तिताः इतितिथितत्वं तत्पर्य्या
यः सरित् २ तरंगिणी ३ शैवलि ।
नी ४ तटिनी ५ कूलिनी ६ धुनी ७
स्रोतस्वती ८ द्वीपवती ९ स्रवंती
१० निम्नगा ११ आपगा १२ इत्यमरः ।
कूलिनी १३ धुनिः १४ स्रोतस्विनी १५
स्रोतोवहा १६ सागरगामिनी १७
अपगा १८ इति भरतः निर्झरि ।
णी १९ सरस्वती २० समुद्रगा २१
कूलंकषा २२ कूलवती २३ शै
वालिनी २४ सिंधुः २५ समुद्रकां ।
ता २६ सागरगा २७ कर्षू २८ रो
धोवती २९ वाहिनी ३० नद्वल ।
गुणाः स्वच्छत्वं लघुत्वं दीपनत्वं
पाचनत्वं रुच्यत्वं तस्मापहत्वं ।
पथ्यत्वं मधुरत्वं ईषद्रूक्षत्वंच ॥
सर्वा गुर्वी प्राग्मुखीवाहिनीस्या
ल्लघ्वीपश्चाद्वाहिनी निश्चयेन दे
शेदेशे तद्गुणा सा विशेषात्रेषा
धत्तेगौरवं लाघवंच प्रायो ज्ञेय
ह्यागुर्व्यो लघ्व्यः शीघ्रवहा स्मृताः
नद्याः पाषाणसिकता वाहिन्यो
विमलोदकाः हिम वत् प्रभवा
श्चजलंतास्वमृतोपमं विंध्यात्
प्राचीप्राच्यवाचीप्रतीची याचोदी
ची स्यान्नदी सा क्रमेण वातारो
पं श्लेष्मपित्तार्त्तिलोपं पित्तोद्रेकं
पथ्यपाकंचधत्ते पारियात्रभवा
याश्चविंध्याद्रिप्रभवाश्चयाः शि
रोरुग्रोग कुष्ठानांता हेतुः श्ली
पदस्यच इतिराजनिर्घण्टः भा
रतवर्षे नद्यो यथा गंगा सिंधुः स
रस्वती शतद्रुः वितस्ता विपाशा
चंद्रभागा सरयुः यमुना इराव
देविका कुहूः गोमती धूतपापा
बाहुदा दृषद्वती कौशिकी निश्ची
रा गण्डकी चक्षुष्मती लोहिता इ
त्येता हिमवत् पादनिःसृताः वेदस्मृ
ती वेदवती सिंधुः अपर्णा चंदना ।

महावरा रोहिपारा चर्म्मण्वती वि
दिशा वेत्रवती वयंती इत्येताः पा
रिपात्रोद्भवाः शोणज्योतीरथा
नर्म्मदा सुरसा मन्दाकिनी दशार्णा
चित्रकूटा तमसा पिप्पलाकर।
तोषा पिशाचिका चित्रोत्पला वि
शाला वंजुकावालुकावाहिनी
शुक्तिमती विरजा पंकिनी रिवी।
इत्येता ऋक्षप्रसूताः मणिजाला
सुभा तापी पयोष्णी शीघ्रोदा वे
ण्णा पाशा वैतरणी वेदी पाला
कुमुद्वती तोयाइशी शंसा गिरा
पता विन्ध्यपादोद्भवाः गोदाव।
री भीमरथी कृष्णा वेण्णा वंजु
ला तुंगभद्रा सुप्रयोगा वाह्यका
वेरी शतमाला ताम्रपर्णी पु
ष्पावती उत्पलावती इत्येताम
लयजाः त्रियामा ऋषिकुल्या।
इक्षुला त्रिदिवा लांगूलिनी वंशधा
रा महेन्द्रतनया ऋषिका लघती
मंदगामिनी पलाशिनी इत्येताः शु
क्तिमत्प्रभवाः एताः प्राधान्येन कु
लपर्वततनयाः शेषास्तु तनयाः इति
वराहपुराणे कैलासपार्श्वसंभूतं पुण्यं
शीततलं शुभं मन्दोदकं नाम सरः पयस्तु
दधिसन्निभं तस्मात्प्रभवते दिव्या नदी मन्दा

किनी शुभा दिव्यं च चैत्ररथं तत्र।
तस्यास्तीरे महद्वनं प्राग्भागेण कै
लासात् दिव्यं सौगंधिकं गिरिं सर्व
धातुमयं दिव्यं शवलं पर्वतं प्रति
चन्द्रप्रभो नाम गिरिः सशुक्लो रत्न
सन्निभः तत्समीपे सरो दिव्यं अ
च्छोदन्नाम विश्रुतं तस्मात् प्रभव
ते दिव्या नदी ह्यच्छोदका शुभा त
स्यास्तीरे वनं दिव्यं महच्चैत्ररथं शुभं
तस्मिन् गिरौ निवसति मणिभद्रः
सहानुगः यक्षः सेनापतिः क्रूरै
र्गुह्यकैः परिवारितः पुण्या मन्दाकि
नी चैव नदी ह्यच्छोदका शुभा।
महीमण्डलमध्येन प्रविष्टे ते महो
दधिं कैलासाद्दक्षिणे प्राच्यां शिवं
सर्वौषधिं गिरिं ततः शिलामयं दि
व्यं शवलं पर्वतं प्रति ॥ लोहितो हे
मशृंगस्तु गिरिः सूर्य्यप्रभो महान्
तस्य पादे महद्दिव्यं लोहितं सुम
हत् सरः तस्मात्प्रभवते पुण्या
लौहित्यश्च नदो महान् देवार।
ण्यं विशोकं च तस्य तीरे महद्वनं
तस्मिन् गिरौ निवसति यक्षो।
मणिधरो वशी सौम्यैः सधार्मिकै
श्चैव गुह्यकैः परिवारितः कै
लासात् पश्चिमोदीच्यां ककुद्मा।
नौषधी गिरिः ककुद्मति च।

रुद्रस्य उत्पत्तिः ककुद्मतः तदं
जनं लोककृतं शैलं त्रिककुदं प्र
ति सर्वधातुमयं तत्र सुमहद्वैद्यु
तो गिरिः तस्य पादे महद्दिव्यं मा
नसं सिद्धसेवितं तस्मात्प्रभवते पु
ण्या सरयूर्लोकपावनी कैला।
सात् पश्चिमा प्राच्या दिव्यः सर्वौ
षधिर्गिरिः अरुणः पर्वतश्रेष्ठो
रुक्मधातुविभूषितः भवस्य द
यितः श्रीमान् पर्वतो हेमसन्निभः
तस्य पादे महद्दिव्यं सरः काञ्चनवा
लुकं तस्य पादात्प्रभवति शैलो
दं नाम तत्सरः तस्मात् प्रभव
ते पुण्या नदी शैलोदका शुभा।
सा चक्षुशीतयोर्मध्ये प्रविश्य प
श्चिमोदधिं अम्भुतरेण कैलासं
शिवं सर्वौषधिं गिरिं गौरं तु पर्व
तश्रेष्ठं हरितालमयं प्रति हिर
ण्यशृंगः सुमहान् दिव्यौषधिम
यो गिरिः तस्य पादे महद्दिव्यं।
सरः काञ्चनवालुकं रम्यं बिन्दुस
रो नाम यत्र राजा भगीरथः गंगा
र्थे सत्रराजर्षिः उवास बहुलाः
समाः तत्र त्रिपथगा देवी प्र
थमं तु प्रतिष्ठिता सोमपादात् प्र
सृता सा सप्तधा प्रतिभज्यते भव
सप्तांशोपतिता स ॥ ॥

रुद्धा योगमायया ततो विसर्ज्जया
मास समस्तोतांसि गंगाया त्रीणि
प्राचीमभिमुखं प्रतीचीं त्रीण्येव
वच स्रोतांसि त्रिपथाया स्तु सप्त
धैतत्सप्तधा नलिनी ह्लादिनी चैव
पावनी चैव प्राच्यगा शीता चक्षु
श्च सिन्धुश्च तिस्रस्तावे प्रतीच्यगाः
सप्तमी त्वनुगा तासां दक्षिणेन भ
गीरथं तस्माद्भागीरथी सापि प्र
विष्टा दक्षिणोदधिं सप्तैताः प्लाव
यन्ति स्म वर्षन्तु हिमसाह्वयं प्रसू
ताः सप्त नद्यस्तु शुभा बिन्दुसरोद्भ
वाः नानादेशान् प्लावयन्ति स्म
म्लेच्छप्रायांश्च सर्वशः ॥ स
लिलान् कुस्तुरांश्चीनान् वर्व
रान् यवनान् खशान् सतु कुलो
श्च कुलत्थांश्च अंगलोकावरा
श्च यान् कृत्वा द्विधा हिमवन्तं
प्रविष्टा दक्षिणोदधिं अथ वीत
मरूंश्चैव कालिकांश्चैव शूलिकान्
तुषारान् वर्ब्बरान् कारान् पह्ल
वान् पारदान् शकान् एता ज
नपदान् चक्षुः प्लावयन्तुदधिं
गता दरदान् कुष्मांश्चैव गां
धारान् औरसान् कुहून् शिवशैल
निद्रुमस्कृत बसातीन समतेज।
सा सैन्धवारहकावेरान् कुपथान्

भीमरोरुकान् श्रुतामुखांश्चोर्द्धमरु
न् सिंधुरेतान्निषिवते गंधर्व्वान् किन्न
रान् यक्षान् रक्षो विद्याधरोरगान्
कलापग्रामकांश्चैव तथा किंपुरु।
षान्नरान् किरातांश्च पुलिंदांश्च कु
रून् वै भरतानपि पांचाल कौशि
कान्मत्स्यान्मागधांगांस्तथैव च
ब्रह्मोत्तरांश्च वंगांश्च ताम्रलिप्तांस्त
थैव च एतान् जनपदानार्य्यान्
गंगा भावयते शुभा ततः प्रतिह
ता विंध्यप्रविष्टा दक्षिणोदधिं त
तस्तु ह्लादिनी पुण्या प्राचीमभिमु
खा ययौ प्लावयंत्युपकांश्चैव नि
षादानपि सर्वशः धीवरान्दृषि।
कांश्चैव तथालीनमुखानपि के
रलानेकवर्णांश्च किरातानपि चै
व हि कालंदरान्विवर्णांश्च कुशि
कान् स्वर्गभूमिकान् सा मण्डले
समुद्रस्य तिरो भूत्वा तु सर्वशः
ततस्तु पावनी चैव प्राचीमेव दि
शं ययौ कुपथान् प्लावयंती सा
इंद्रद्युम्नसरांस्यपि तथा खरप
थान्देशान् वेत्रशंकुपथानपि
मध्ये चोज्जानक मरून् कुथप्रा
वरणानपि इंद्रद्वीपान् समुद्रे सा
प्रविष्टा लवणोदधिं ततस्तु पा
वनी प्रायात् प्राचीं प्राशां जवेन

जवेन तु तोमरान् प्लावयंती सा हं
समार्गान् समूहकान् पूर्वान् द
शांश्च सेवंती भित्वा सा बहुधा गि
रिं कर्णप्रावरणान् प्राप्य गता सा
श्वमुखानपि सिकता पर्वतम
रून् गत्वा विद्याधरान्ययौ वामि
मण्डलकोष्ठे तु सा प्रविष्टा महत्
सरः तासां नद्युपनद्यश्च शतशोः
सहस्रशः उपगच्छंति ता नद्यो
यतो वर्षति वासवः हेमकूटस्य
पृष्ठे तु सर्पाणां मत्सवः स्रुतः स
रस्वती प्रभवति तस्मात् ज्योतिष्म
ती तया अवगाहे तोभयतः समु
द्रौ पूर्वपश्चिमौ सरो विष्णुपदं ना
म निषधे पर्वतोत्तमे तस्मात्तद्य
प्रभवति गंधर्वी नकुला चते मेरोः
पार्श्वात् प्रभवति चंद्रप्रभोम
हान् जंबुश्चैव नदी पुण्या यस्यां जां
बुनदं स्मृतं पयोस्तु ह्रदो नीलः
सशुभ्रः पुण्डरीकवान् पुण्डरी
का पयोदा च तस्माद्वे संप्रसूयते
सरस्तु सरसश्चैव स्मृत मुत्तरमा
नसं मृगा च मृगकांता च तस्माद्वै
संप्रसूयते ह्रदाः कुरुषु विख्याताः
पद्ममीनकुला कुलाः नाम्ना ते विज
या नाम महाह्रदा द्विप सन्निभाः तेभ्यः
शांता च माध्वी च ह्रदेभ्यो संप्रसूयतः ॥

इति मत्स्यपुराणे १२१ अध्यायः ॥
अथ सिप्रादिसप्तनद्युत्पत्तिकार
णं एवं विवाह्य विधिवत् सौवर्णे
मानसाचले अरुंधती वसिष्ठस्तु
मोदमापतयासह तत्रयत्पति
ततोयं मानसाचलकंदरे विवाह
वस्थार्थीयशांत्यर्थं च सुधा कृतं
ब्रह्मविष्णुमहादेवपाणिभिः समु
दीरितं तत्तोयं समथा भूत्वा पतितं
मानसाचलात् हेमाद्रेः कंदरे सा
नौ सरस्याञ्च पृथक् पृथक् ततो
यं पतितं तस्मिं प्रदेव भोगेप सरोव
रे तेन सिप्रा नदी जाता विस्तृता
प्रथिता क्षितिं महाकौषी यथा।
ते च यद्धारि पतितं तत्ततः कौषिकी
नाम सा जाता विश्वामित्राच्च तारि
ता उमा क्षेत्रे यत् पतितं तोयं तेन
महानदी कावेरी नाम सा जाता
तदा कावेरसंसृता महाकालस
रः श्रेष्ठे पतितं तज्जलं गिरेः ॥
हिमाद्रेः पार्श्वभागे तु दक्षिणांशं
अस्तन्निधौ गोमंति नाम ते जाता
नदी गोमत्युदीरिता मैनाकोना
मयः पुत्रः शैलराजस्य च प्रियः
यस्तु तस्मिन् समुत्पन्नो मनको
दरतः पुरा तत्र पतितं तोयं।

तस्माज्जाता महानदी देविकाख्या
महादेव प्रेरिता सागरं प्रति ॥
ततोयं संगतं कश्यपाद्वंसा वञ्चस
न्निधौ तेनाभूत् सारस् नाम्ना नदी
पुण्यतमा शुभा याम्येभांसि महा
पार्श्वस्थारण्यवारण्य सन्निधौ हिम
वत्कन्दरे याम्ये इरावद्ह्रद मध्यतः
इरावती नाम नदी ततस्तु जाता सरि
द्वरा एताः सर्वाः स्नान पानात्स
र्वाणां जाह्नवी यथा फलं ददतिम
त्यानां दक्षिणोदधिगाः सदा धर्मा
र्थकाममोक्षाणां वीज भूताः सना
तनाः महानद्यस्तु समेताः सर्वदा
देव भोगदाः एवं नद्यः समुत्पन्नाः
सदा पुण्यतमोदकाः अरुंधत्याव
शिष्ठस्य विवाहे देवसन्निधौ इति का
लिकापुराणे २२ अध्यायः नद्या
दीनां रूपद्वयं यथा नद्यश्च पर्वताः
सर्वे द्विरूपाश्च स्वभावतः तोयं
नदीनां रूपं तु शरीरमपरं तथा
स्थावरं पर्वतानांतु रूपं कायस्तु
थापरः शुक्तीनां मध्य कम्बूनां तथै
वांतर्गता तनुः वहि रस्थिस्वरूपं तु
सर्वे देव प्रवर्त्तंते एवं जलं स्थावर
श्च नदी पर्वतयो स्तथा अन्तर्वसति
कायस्तु सततं तोपपद्यते । श्रा

प्याय्यते स्थावरेण शरीरं पर्व्वत
स्य तु ॥ तथा नदीनां कायस्तु
तोयेनाप्याय्यते सदा नदीनांका
मरूपित्वं पर्व्वतानान्तथैव च ॥
जगत् स्थित्यै पुरा विष्णुः कल्पया
मास यत्नतः तोयहानौ नदीरूपं
स्वंजायते सततं द्विजाः विशी
र्णस्थावरेरूपं स्वंजायते गिरिकाय
गं इति कालिकापुराणे २२ अध्यायः
नदीकदम्बः पुं महाश्रावणिका।
इति राजनिर्घण्टः नदीसमूहेऽक्ली
नदीकान्तः पुं समुद्रः इज्जलहस्ता।
सिंधुवारकः इति मेदिनी ॥
नदीकान्ता स्त्री जम्बुवृक्षः काक
जंघौषधिः इति मेदिनी लता इ
ति हेमचंद्रः ॥
नदीकूलप्रियः पुं जलवेतसः इ
ति जटाधरः ॥
नदीजं क्ली स्रोतोंजनं इति हेम
चंद्रः ॥
नदीजः पुं अर्ज्जनवृक्षः इतिरत्न
माला यावनालशरः हिज्जल
वृक्षः इति राजनिर्घण्टः नदी।
जातेत्रि ॥
नदीजा स्त्री अग्निमंथवृक्षः इति
राजनिर्घण्टः ॥

नदीनरस्थानं क्ली घट्टः इति भूरि
प्रयोगः नदीभिन्नस्थानंच ॥
नदीनः पुं समुद्रः इति त्रिकाण्ड
शेषः वरुणः यथा अयं नदीन
इत्यायुत्तरनैषधः ॥
नदीनिष्पावः पुं धान्यभेदः तत्प
र्य्यायः कटुनिष्पावः २ कर्व्वुरः ३
नदीजः ४ अस्य गुणाः तिक्तत्वं ।
कटुत्वं अम्लपदत्वं गुरुत्वं वातल
त्वं कफदत्वं रूक्षत्वं कषायत्वं वि
षदोषनाशित्वंच इति राजनि।
र्घण्टः ॥
नदीमातृकः त्रि नद्यम्बुसम्पन्नव्री
हिपालितदेशः इत्यमरः ॥
नदीवंकः पुं वंकुरः वौंक इति
भाषा इति शब्दमाला ॥
नदीवटः पुं वटीवृक्षः इतिराज
निर्घण्टः ॥
नदीसः त्रि नद्यवगाहनदक्षः न
दीस्नान कुशलः इति भट्टिटीका
यां भरतमल्लिकादयः नदीष्णः इति
युक्तपाठम् यथा ततो नदीसा
न् शिक्षितानित्यादि भट्टिः न।
दीसर्ज्जः पुं अर्ज्जुनवृक्षः इत्यमरः
नदेयी स्त्री नादेयी भूमिजम्बुः।
इति शब्दचंद्रिका ॥८ ।

नद्धः त्रि बद्धः उद्गमः इति ॥
मेदिनी ॥
नद्धी स्त्री चर्म्मरज्जुः इत्यमरः
नद्याम्रः पुं समष्ठिला वृक्षः
इति राजनिर्घण्टः ॥
ननंदा स्त्री भर्तृभगिनी ननद
इति भाषा तत्पर्य्यायः ननान्दा २
नंदिनी ३ नंदा ४ पतिस्वसा ५।
इति शब्दरत्नावली ॥
ननान्दा स्त्री ननंदा इति शब्दर।
त्नावली ॥
ननु व्य प्रश्नः इच्छा अवधारणं
निश्चयः अनुज्ञा अनुमतिः ॥
अनुनयः सांत्वनं आमंत्रणं ।
संबोधनं एषांप्रत्येकमुदाहर।
णानि यथा प्रश्नेनन्वधीष्महे
अवधारणेननुगच्छामः अनुज्ञा
यांसर्वैर्ननुस्नायतां अनुनयेननु
चण्डिप्रसीदामंत्रणेननुदेव।
विरोधोक्तिः इत्यमरभरतौ विति
ग्रहः अनुप्रश्नः परकृतिः ॥
अधिकारः संभ्रमः इति मेदिनी
आक्षेपः प्रत्युक्तिः वाक्यारम्भः
इति हेमचंद्रः उत् प्रेक्षालं ।
कारव्यंजकं यथा । मन्ये ।

शंकेध्रुवंप्रायोनूनमित्येवमादयः
उत्प्रेक्षाव्यंजकानिव इतिकाव्यचंद्रिका
ननुच व्य विरोधोक्तिः इत्यमरः
ननुचेति समुदितं विरोध वचने
ननुचेति समुदितं विरोध वचने
ननु शब्दो विरोधोक्तौ चकारात्
ननुचेतिवा इति भरतः ॥
नंदः पुं विष्णुः यथा आनंदोनं
दनोनंदः इति शांतिपर्व्व नरपति
भेदः स तु महा नंदि सुतः क्षत्रि
यवंशांतः गोपभेदः सचश्रीकृष्ण
पिता आनन्दः निधिविशेषः इ
ति पुराण शब्दरत्नावल्यो नंदः
पुरा द्रोणनामा वसुरासीत् यथा
द्रोणो वसूनां प्रवरो धरया सह
भार्य्यया करिष्यमाण आदेशान्
ब्रह्मण स्तमुवाचह जातयोनौ म
हादेव भुविविश्वेश्वरे हरौ भक्तिः
स्यात् परमा लोके ययाञ्जोदुर्ग
तिंतरेत् स्वस्तीत्युक्तः सभगवान्
व्रजे द्रोणोमहायशाः जज्ञेनंद इतिख्या
तोयशोदा सा धराऽभवत् इति
श्रीभागवते दशमस्कंधे ८ अध्या
यः ॥ वेणुविशेषः यथा महा

नन्दस्तथानंदोविजयोऽथजयस्तथा
चत्वार उत्तमा वेग्रा मातंगा मुनि
संमताः दशांगुलो महानंदोनंद
एकादशांगुलः इति संगीतदा
मोदरः ॥
नंदकः पुं विस्नुखड्गः इत्यमरः
भेकः इतित्रिकाण्डशेषः हर्षके
कुलपालके च त्रि इतिमेदिनी ॥
कृस्नपिता आनंदः आनंदका
रकश्च ॥
नंदकिः स्त्री पिप्पली इति शब्द।
चंद्रिका ॥
नंदकी न पुं विस्नुः यथा शंखभ्रुनं
दकीचक्रीशार्ङ्गधन्वा गदाधरः इ
तिशांतिपर्व्व ॥
नंदगोपिता स्त्री रास्ना इतिशब्द
चंद्रिका नंद गोप जन्मभूम्यादि
श्च ॥ नंदथुः पुं आनंदः इति
शब्दरत्नावली ॥
नन्दनं क्ली इन्द्रवनं इत्यमरः
हर्षकेत्रि। इति मेदिनी ॥
नंदनः पुं स्त्री सुतः इति मे
दिनी ॥
भेकः इति शब्दरत्नावली ॥
आनंदकारकः विस्नुः यथा आन

न्दोनंदनो नंदइत्यादिशांतिपर्व्व
नन्दनजं क्ली हरिचंदनं इतिराज
निर्घुण्टः हर्षजातेत्रि ॥
नंदनंदनः पुं श्रीकृस्नः इतिशब्द
रत्नावली तस्यलीला संवरणा
नंतरमहिषीणांदस्युहस्त गतत्व
कारणं यथा व्यास उवाच कः
स्त्रहत्थान स गांगेयान इत्यास्त
सर्व कौरवान आभीरेभ्य स्त्रभव
तः कः स्त्रहत्थान पराभवं ॥
पार्थैतत् सर्व भूतस्य हरेर्लीला
विचेष्टितं त्वया यत् कौरवाधस्ता
यदाभीरैर्भवान जितः गृहीता
दस्युभि र्योश्च भवता शोचिताः
स्त्रियः तदण्यहं यथा हंते कथ
यामि तवार्जुन अष्टावक्रः पुरा
विप्रो जलवास रतोभवत् वर्ष
वृगणान् पार्थ गृणन् ब्रह्म स
नातनं जितेष्वसुरसंघेषु मेरुपृ
ष्ठे महोत्सवः बभूव तत्र ग
च्छन्त्यो ददृशुस्तंवरस्त्रियः ॥
रंभातिलोत्तमाद्यास्तु शतशोऽ
थ सहस्रशः तुष्टुवुस्तंमहात्मानं
प्रशशंसुश्च पाण्डव आकंठ मग्नं
सलिले जटा भार धरंमुनिं विनया

1571

वनताश्चैनं प्रणेमुस्तोत्र तत्पराः
यथा यथा प्रसन्नोऽसौतुष्टुवुस्त
तथा तथा सर्वास्ताः कौरव श्रेष्ठ
वरिष्ठन्तः द्विजन्मनां श्रीअष्टाव
क्र उवाच प्रसन्नोहं महा भागा
भवतीनां यदीष्यते मत्तस्तद्व्रि।
यतां सर्वं प्रदास्याम्यतिदुर्लभं ॥
श्रीपराशर उवाच रम्भा तिलो
त्तमाद्या स्तं वैदिकोऽप्सरसोऽब्रु
वन् प्रसन्ने त्वय्यसंप्राप्तं किमस्मा
कमिति द्विज इतरास्त्वब्रुवन विप्र
प्रसन्नो भगवान् यदि तदिच्छामः
पतिं प्राप्तं विप्रेन्द्रपुरुषोत्तमं ॥
श्रीव्यास उवाच एवं भविष्यती
त्युक्त्वा शोत्ततार जलान्मुनिः तमु
त्तीर्णंच ददृशु र्विरूपं वक्रमष्टधा
तं दृष्ट्वा गूहमानानां यासां हासः
स्फुटोभवत् ताः शशाप मुनिःको
पमवाप्य कुरुनंदन श्रीअष्टावक्र
उवाच यस्माद्विरूपरूपं मां मत्वा
हास्यावमानना भवतीभिः कृता त
स्मादेष शापं ददामिवः मत्प्रसादेन
भर्त्तारं लब्ध्वा तु पुरुषोत्तमं मच्छा
पोपहताः सर्वा दस्यु हस्तंगमिष्य
थ एवंतस्य मुनेः शापादष्टावक्र।
स्य केशवं भर्त्तारं प्राप्यता या
ता दस्यु हस्त वरांगनाः ॥

तत्वयानात्रकर्त्तव्यः शोकोऽल्पोपि
हि पाण्डव तेनैवाखिल नाथेन स
र्वं तदुपसंहृतं इति विस्नुपुराणे
३८ अध्यायः ॥
नंदनंदिनी स्त्री दुर्गा इति शब्द
रत्नावली ॥
नंदनमाला स्त्री कृस्नप्रीतिकृ
न्मालिकाविशेषः यथा भूप नं
दनमालात्तु कुरुतेकृस्नवेश्मनि
देवकन्याहृतैर्लेवैः सेव्यते सुर
नायकैः इति द्वारका माहात्म्य हृ
रिभक्ति विलास धृत विस्नुधर्मो
त्तरं नंदना स्त्री दुहिता इतिजटाधरः
नंदंतः पुं पुत्रः राजा मित्रं ।
इतिसंक्षिप्तसारोणादिवृत्तिः ॥
नन्दयन्तः त्रि आनंदजनकः इ
तिसिद्धान्तकौमुद्यामुणादिवृत्तिः
नंदपालः पुं वरुणः इतिशब्द
रत्नावली ॥
नंदपुत्री स्त्री पार्व्वती इति त्रि
काण्डशेषः ॥
नंदा स्त्री गौरी आलिंजरः नादा इ
ति भाषा तिथिविशेषः ताश्च उभ
य पक्षयोः प्रतिपत् षष्ठी ।
कादश्यः इति मेदिनी ननान्दा
इति शब्दरत्नावली सम्पत् इति

हेमचंद्रः दुर्गायां नंदा नाम ॥
कारणं यथा एवमुक्ता भवं ब्र
ह्मा पुनर्देवीं समब्रवीत् तथा
देवि मदनकार्य्यकर्म्मण्यचाम्पद
स्थितः भविष्यमहिषाख्यस्यासु
रस्य विनाशने एवमुक्ता ततो
ब्रह्मा सर्वदेवाश्च पार्थिव यथा
गता ततो जगाम देवी स्थाप्य हि
मे गिरौ संस्थाप्य नंदिता यस्मा
त्तस्मान्नंदा ततो भवेत् इति व
राहपुराणं अपिच नंदनेश्वर
लोकेषु नंदने वसतेः यथा हि
माचले महापुराणे नंदादेवी त
तः स्मृता तस्या माहात्म्यादि य
था। यथा गंगा नदीनांतु उत्तम
त्वे व्यवस्थिता तद्वद्भगवती नं
दा उत्तमत्वेन संस्थिता मासे भा
द्रपदे देवि शुक्लपक्षे व्रजेत सदा
तस्योत्था श्रावणाषाढे मन्य।
था न कदाचन तेषां च चंद्रना
गस्तु पीडां कुर्य्यात् सलोचने न
गच्छन्ति सुराः सिद्धाः किंपुनर्मा
नुषादयः विषघातहताः केचि
त् विषघातप्रपीडिताः विमु
च्यंते नरा देवियांति देव्याः ॥
प्रसादतः इति देवी पुराणं

नंदात्मजः पुं श्रीकृष्णः इति श
ब्दरत्नावली दुर्गायां स्त्री ॥
नंदिः पुं स्त्री धूतांगं आनंदः ॥
नंदिकेश्वरे पुं इति मेदिनी ॥
विष्णुः यथा नंदि ज्योति र्नंदिरे
श्वर इत्यादि शांतिपर्व ॥
नंदिकः पुं नंदीवृक्षः इति श
ब्दरत्नावली आनंदश्च ॥
नंदिका स्त्री इंद्रक्रीडास्थानं ॥
इति शब्दमाला अलिंजरः इति
शब्दरत्नावली षष्ठीतिथिः य
था कन्यासंस्थे रवौ शक्रमुक्ला
मारभ्य नंदिका इति तिथितत्वं।
प्रतिपदेकादशीषोच ॥
नंदिकेश्वरः पुं शिवद्वारपालः
तत्पर्य्यायः नंदी २ शालंकाय
नः ३ तांडवतालिकः ४ इति त्रि
काण्डशेषः नंदीश्वरः ५ तण्डुः ६
इति हेमचंद्रः पुराणविशेषश्च ॥
नंदिघोषः पुं अर्जुनस्यरथः बं
दिजनघोषः इति मेदिनी ॥
मंगलघोषणाच ॥
नंदितरुः पुं धवद्रुमः इति भा
वप्रकाशः ॥
नंदिनी स्त्री उमा गंगा ननान्दा ॥
वशिष्ठधेनुः इति मेदिनी। रेणु।

रेणुका इति राजनिर्घण्टः साच
धेनुः सुरभिकन्या यथा दिलीप्र
ति वशिष्ट वाक्यं पुरा शक्रमुप।
स्थायतवोर्वीं प्रति यास्यतः प्र।
सीत कल्पतरु छाया माश्रिता सु
रभिः पथि इमां देवीं प्रमुस्तांतां
अत्वा सपदि सत्वरः प्रदक्षिण क्रि
यातीत स्तस्याः कोप मनीजनः अ
वजानासि मां यस्मादतस्ते न भवि
ष्यति मत् प्रसूति मनाराध्य प्रजे
ति त्वां शशाप सा इति वादिन एवा
स्य होतु राकृति साधने अनिंद्या
नंदिनी नाम धेनु राववृते वनात्
इति रघुः तस्याः प्रभावो यथा
वशिष्ठस्याश्रम पदं ब्रह्म स्थान
मनुत्तमं अपश्यज्जयतां श्रेष्ठो
विश्वामित्रो महामनाः ततो व
शिष्ठो भगवान् कथांते मुनिसत्त
मः विश्वामित्र मिदं वाक्य मुवाच
प्रहसन्निव आतिथ्यं कर्तुमिच्छा
मि बलस्यास्य महाबल तव चै
वाप्रमेयस्य यथार्हं प्रतिगृह्यतां ॥
वाढमित्येव गाधेयो वशिष्ठं प्र
त्युवाच ह एवमुक्तो महातेजा
वशिष्ठो जपतांवरः आजुहाव त
तः प्रीतः कल्माषी ॥ ॥

धूत कल्मषां भोजनेन महार्हेण स
त्कारं तद्विधत्स्व मे एवमुक्ता व
शिष्ठेन शवला शत्रु सूदन विदधे
विविधान् कामान् यस्य यस्य यथे
प्सितान् सान्तः पुरजनो राजा स
ब्राह्मण पुरोहितः मुक्तः परम ह
र्षेण वशिष्ठमिद मब्रवीत् गवां
शत सहस्रेण दीयतां शवला म
म एवमुक्तस्तु भगवान् वशिष्ठो
मुनिसत्तमः विश्वामित्रेण धर्मा
त्मा प्रत्युवाच महीपतिं कारणैर्व
हुतीराजन्नदास्ये नंदिनीं तव का
मधेनुं वशिष्ठोसौ न तत्याज य
दामुनिः ततः स्वशवलां राजा
विश्वामित्र स्तदाहरत् तस्या हु
म्भारवाज्जाताः काम्बोजा रवि
सन्निभाः ऊधस स्त्वभिसंजाताः
पह्लवाः शस्त्र पाणयः योनिदे
शाच्च यवनाः शकृद्देशाच्छका
स्तथा रोमकूपेषु च म्लेच्छा स्त
था सकिरातकाः तैस्तन्निसू
दितं सैन्यं विश्वामित्रस्य तत्क्षणात्
स पदाति गजं साश्वं स रथं रघुनं
दन इति रामायणे आदिकाण्डे
नंदिनी तनयः पुं व्याडिमुनिः स
चाभिधान कारकः इति हेमचंद्रः

नंदिनीसुतः पुं व्याडिमुनिः इति
जटाधरः ॥
नंदिवर्द्धनः पुं शिवः पक्षान्तः
पुत्रः इतिमेदिनी मित्रं इतिश
ब्दरत्नावली ॥
नंदी स्त्री दुर्गा यथा सुराःसुस्थि
दशादेवानंदिनी तुनुभिर्मता ते
षांचवादिनी नंदी ईशानात् वि
दशेश्वरी इतिदेवीपुराणं ॥
नंदी पुं गर्दभाण्डवृक्षः वटवृ
क्षः इतिमेदिनी शिवद्वारपालः
सशिवांशः शालंकायनमुनि
पुत्रः यथा अन्यच्च ते प्रवक्ष्या
मि परंगुह्यं वसुंधरे तपतस्तु
स्तपमुनेरौद्रेण समं सुतं ते
प्राप्स्यामि परंभावंज्ञात्वादेवोम
हेश्वरः स्वदेवत्वपरंरूपं धृत्वा द
ष्टिस्तथावहं शालंकायनपुत्र।
त्वं योगमाया समाश्रितः प्रा
प्नोति त्वं नमानानिदर्शितापा
र्श्वमास्थितः माया योगबलो
पेतस्त्वद्दो वै स्थूलपार्थिव।
कु रूपवान् गणानां श्रेव वसु
धादित्य सन्निभः सतं नन्दा
यतेजातं ममैवाराधनेस्थितः
सततंनन्दायतेजातं ममैवाराध
नेस्थितः अथ नंदी प्रहस्याह म
हादेवात्तया मतिं उत्तिष्ठ मुनिशा
र्दूल सफलस्ते मनोरथः त्वद्
द्दिताणंगाज्ञातोस्मि पुत्रस्तेशापि
मांप्रभो त्वया तपःसमारब्धमीश्व
रेण समं सुतं प्राप्स्यामीति ततो
मत्तं सदृशोन्यो न कश्चन विद्य
तेतितत्वाहंवै जातोस्मि स्वयमेव
हि इति वराहपुराणं सेव कल्या
न्तरेशिवांशजशिलादमुनेः पुत्रः
यथा जजाप रुद्रमनिशंयत्नं
हीमहागणः प्रीतस्तस्यमहादेवो
देव्या सहपिनाकधृक् दत्वावाम
समानत्वंमस्यवचनमेवच अथ
हर्षिः सधर्मात्मा शिलादोनामध
र्मवित् आराधयन् महादेवं पुत्रा
र्थीवृषभध्वजं तस्य वर्षसहस्रान्तेत
प्यमानस्य विश्वकृत् सर्वःसोमोऽथ
विधिन्नोवरदोस्मीत्यभाषत सववे
वरमीशानं वरेण्यं गिरिजाप
तिं अयोनिजं सुतमभीष्टं तया
चैवोमयासमं तथास्तित्या
ह भगवान् देव्यासहमहे ॥
श्वरः पश्यतस्तस्य विप्रर्षे ॥
॥ ॥ ॥ ॥

रेतथानंगतोविभुः ततोपियत्तः
स्वाश्रमंशिलादो धर्मवित्तमः
चकर्षलांगलेनोर्वीभित्वाहृष्टप
तशोभनः सम्वर्तकानलप्रख्यः
कुमारःप्रहसन्निव रूपलावण्य
सम्पन्नस्तेजसा भासयन् दिशः कु
मारस्तस्याः प्रतिमोमेघगंभीरया
गिरा शिलादंतातताते तिप्राह
नंदी पुनः पुनः तदृष्ट्वा नंदिनं
जातं शिलादः परिषस्वजे मुनि
भ्योदर्शयामासये तदाश्रमवा
सिनः इति कूर्मे ४ अध्यायः ॥
नंदीमुखी स्त्री तंद्रा इतिहेमचंद्रः
नंदीवृक्षः पुं कोंकणदेशप्रसि
द्धसगंधिवृक्षः विशेषः तत्पर्य्या
यः तूणीकः २ तुणिकः ३ तूणी
४ पीतकः ५ कच्छपः ६ नंदी ७ कु
बेरकः ८ कोलः ९ अस्य गुणाः
कटुत्वं तिक्तत्वं शीतत्वं पित्तश्ले
ष्मदाह शिरोर्तिस्वेदकुष्ठनाशि
त्वं संग्राहित्वं तुष्टिवीर्य्य दात्व
च इति राजनिर्घण्टः ॥
अश्वत्थाकारः क्षीरवान् स्वना
मप्रसिद्धो वृक्षः इति भरतः
नंद इति ख्यातो वृक्ष इति के
चित् तत्पर्य्यायः तुन्नः २ कु।
बेरकः ३ कुणिः ४ कच्छः ५ कां
तलकः ६ इत्यमरः तालिः ७ इ
तिभरतः नंदिवृक्षः ८ कृणिः ९
नंदः १० नंदिकः ११ नंदिवृक्षकः १२
इतिशब्दरत्नावली मेषशृंगी वृ
क्षः इति रत्नमाला स्थाली वृ
क्षः इति भावप्रकाशः ॥
नंदीशः पुं नंदी इति हेमचंद्रः
भरतोक्त तालप्रभेदः यथा।
सिंहनंदननंदीशचंद्रविम्बद्विती
यकाः तस्य लक्षणं यथा गोल
घुर्गौ लघुःस्मृ तस्ताले नन्दीश्व
रमतः इति संगीतदामोदरः ॥
नंदीश्वरः पुं शिवः इति शब्दर
त्नावली नंदीशतालः इति सं
गीतदामोदरः शिवद्वारपालः
तस्य शिवपार्षदत्वकारणं य
था ततस्त्रेतायुगे काले नंदी
नाम महामुनिः आराधयिष्णुः
शर्वं तपस्तेपे सुदारुणं ततस्तु
भगवान् प्रीतस्तस्मै विप्राय
शंकरः उवाच च वचः साक्षा
त्तस्मिंवरदः प्रभुः वरान्
वृणीष्व विप्रेंद्र यानिच्छसि म
हामते तोस्ते सर्वान् प्रयच्छा
मि दुर्लभानपिमारिष इत्युक्तोसौ

भगवता शर्वेण मुनिपुंगव मे
वाचवरदं देवं प्रहृष्टेनान्तरात्म
ना यदि प्रीतोसि भगवन् अनु
क्रोशा तया मम अनुग्राह्यो त्वहं
देवत्वयावश्य सुराधिप यथा
नान्यभवेद्भक्ति स्त्वयि नित्यं महे
श्वर तथाहंभक्तिमिच्छामिसर्व
भूताशयेत्वयि एतत्त वचनं श्रु
त्वा नंदिनःसमहेश्वरःमहेश्वा
वाच तं प्रीत्या ततो मधुरया गि
रा मदुपधारी मत्तेजा स्थिदत्तः
सर्वगुणोत्तमः भविष्यसिनस
न्देहो देवदानवपूजितः अने
नैवशरीरेणजरामरणवर्जितः
दुष्प्राप्य मवाप्याते दैवैर्गणे
श्वरीगतिः पार्षदानांवरिष्ठश्च
मामकानो ह्लिनोतम नंदीश्वर
इतिख्यातोभविष्यसिनसंशयः
अद्यप्रभृति देवाश्च देवकार्य्ये।
षु सर्वतः त्वं प्रभु भविता लो
के मत् प्रसादान्मुनीश्वर त्वामे
वाभ्यर्च्चयिष्यंतिसर्वभूतानि स
र्वतः सतः समभिवांछतं अ
हंदपार्षदाधिप यस्तांहेशिस
मां द्वेषियस्ता मनुसमा मनु नाव
यो रेतरं किंचिदंवरानिलयोत्वि
हारे नदत्तिरो निरं त्वया ॥

स्थेयंगणाधिप वामेनविभुना
वापिमहाकालेन सर्वदा इति
वराहपुराणं ॥
नंदीसरः स क्ली इंद्रसरोवरः इ
ति शब्दमाला ॥
नंद्यावर्त्तः पुं ईश्वरसद्म विशेषः
इत्यमरः तस्य लक्षणं यथा।
दक्षिणानुगतालिंदत्रयंयत्प
श्चिमामुखं पूजनीयोत्तरच्छायं
नंद्यावर्त्तं वदंति तत् इति भरत
धृतसोजः तगरद्रुमः इति विश्वः
मत्स्याभेदः तस्य गुणः संग्रा।
हित्वं कफपित्त विनाशित्वंच
इति राजवल्लभः ॥
नपुंसकं क्ली क्लीवं हिजिड़ा इति
भाषा इत्यमरः तस्य कारणं य
था उभयोर्वीजसाम्येनायते वै
नपुंसकं इति सुखबोधः ॥
नपुंसकगर्भस्य चिह्नं यथा
नापुंसकंयदागर्भोभवेद्गर्भो तु
दाकृतिः उन्नते भवतः पार्श्वे।
पुरस्तदुदरंमहत् नपुंसक
विशेषानाह आसेक्याश्च सुगं।
धिश्च कुंभीक ईर्ष्यक स्तथा॥
आसी सप्तकावोद्धया अश्च
क्रोशणसंज्ञकः ॥ ॥

तेषांलक्षणमाह । पित्रो ।
स्त्वल्पवीर्य्यत्वादासेक्यःपुरु
षोभवेत् स शुक्रं प्राश्य लभते
ध्वजोन्नतिमसंशयं यःपूति
योनौ जायेत सहि सौगंधिको
भवेत् स्वगुदे ब्रह्मचर्य्याद्यः
स्त्रीषुपुंवत् प्रवर्त्तते स कुंभी
क इतिज्ञेयो गुदयोनिस्तुसस्मृ
तः दृष्ट्वाव्यवाय मन्येषां व्यवाये
यःप्रवर्त्तते ईर्ष्यकः सतु विज्ञे
यो दृष्टियोनिश्च सस्मृतः यो
भार्य्यायामृतौ मोहादंगनेव प्र
वर्त्तते तत्र स्त्रीचेष्टिताकारो जा
यतेषण्ढसंज्ञकः इति भावप्र
काशः नप्ता [र] पुं पुत्रकन्ययोः
पुत्रः नाति इतिभाषा तत्पर्य्यायः
पौत्री २ सुतात्मजः इतिहेमचंद्रः
नप्त्री स्त्रीपुत्रकन्ययोःपुत्री।
नातिनी इतिभाषा तत्पर्य्यायः
पौत्री सुतात्मजा २ इत्यमरः
नप्त्रा च पौत्रिका पैतिरभ
सः सुतस्यसुतायाश्च तनूजा
यानप्त्री पुत्रस्य पुत्री अपत्यं पौ
त्री अतएव पौत्रोपि नप्ता इत्यमरः।

टीकायांभरतः ॥ नभः पुं श्रावण
मासः इति शब्दरत्नावली ॥
नभः[स] क्ली आकाशं इत्यमरः
नभःक्रांती त पुं सिंहः इतिश
ब्दमाला ॥
नभःप्राणः पुं पवनः इति त्रि
काण्डशेषः ॥
नभःसत् [२] पुं देवः इति त्रिका
ण्डशेषः ॥
नभःसरित् स्त्री स्वर्गंगा इति त्रि
काण्डशेषः ॥
नभःस्थितः पुं नरकविशेषः इ
तिहेमचंद्रः आकाशस्थितेत्रि ॥
नभश्चमसः पुं चंद्रः विज्ञाश्रयः
इंद्रजालं इति मेदिनी ॥ ।
नभश्चरः पुं पक्षी विद्याधरः ॥
मेघः वायुः इति मेदिनी ॥
नभश्चक्षुः पुं सूर्य्यः इतिशब्द
माला नभसं क्ली आकाशं य
था नभसंत्वं मेघवर्त्मविहाय
समितिनिगमः नभसंगमः
पुंपक्षी इत्यमरः नभस्यः पुंभा
द्रमासः इत्यमरः नभस्वान् पुं
वायुः इत्यमरः नभाः [स] पुं श्रा
वणमासः मेघः घ्राणं वर्षाः ॥

विसतंतुः पतद्ग्रहः इति मेदिनी
पलितशीर्षे इति धरणी ॥
नभाकं क्ली नभः इत्युणादिको
षः नभोगजः पुं मेघः इति त्रिका
ण्डशेषः ॥
नभोगतिः स्त्री आकाशगमनं
यथा प्रडीनोड्डीन संडीन उयना
नि नभोगतौ इति हेमचंद्रः ॥
नभोद्रुहः
नभोद्वीपः
नभोधूमः } पुं मेघः इति शब्दमाला ॥
नभोनदी स्त्री स्वर्गंगा इति भूरि
प्रयोगः ॥
नभोमणिः पुं सूर्य्यः इति हेम
चंद्रः ॥
नभोम्बुपः पुं चातकपक्षी इति
हेमचंद्रः ॥
नभोरजः स क्ली अंधकारः ।
इति शब्दमाला ॥
नभोरेणुः स्त्री कुज्झटिका इ
तित्रिकाण्डशेषः ॥
नभोलयः पुं धूमः इति शब्दर
त्नावली ॥
नभ्यं त्रि नभसंबंधि नभसेदं
मित्यर्थेस्य प्रत्ययः ॥ ।

नभ्राट् ज पुं मेघः इति हेमचंद्रः
नमः स अनतिः इत्यमरः त्यागः
हनः इत्युणादिकोषः ॥
नमतः पुं प्रभुः धूमः नटः ।
इत्युणादिकोषः ॥
नमसः पुं अनुकूलः इत्युणा
दिकोषः ॥
नमसितः त्रि कृतनमस्कारः
पूजितः तत्पर्यायः नमस्यितः २
अर्हितः ३ अपचायितः ४ अर्चि
तः ५ अपचितः ६ इत्यमरः ॥
नमस्कारः पुं विषभेदः इतिश
ब्दचंद्रिका ॥ नतिकरणं तत्तु ।
करशिरःसंयोगादि स्वापकर्ष
बोधकव्यापारविशेषः इति मुग्ध
बोधटीकायां दुर्गादासः सर्वेषा
पि नमस्कुर्य्युः सर्वावस्थासु सर्व ।
दा अभिवादयेदित्यनुवृत्तौ शातः
नाप्रयतायाप्रयतश्च इतिश्रुति
त्वं स्त्रियो नमस्या वृद्धाश्च वय
सापत्न्येव ताः इति स्मृत्यर्थसारः
देवं विप्रं गुरुं दृष्ट्वा न नमेद्यस्तु सं
भ्रमात् स कालसूत्रं व्रजति याव
चंद्रदिवाकरौ ब्राह्मणं च गुरुं दृष्ट्वा
न नमेद्यो नराधमः ॥ ॥

यावज्जीवन पर्य्यन्तं मद्युचिर्यवनो
भवेत् इति ब्रह्मवैवर्त्ते श्रीकृष्ण
जन्मखण्डे ॥ देवतायतनं दृष्ट्वा
दृष्ट्वा च देविनं तथा नमस्कारं न
कुर्य्याद्यः प्रायश्चित्ती भवेन्नरः स
भार्यायज्ञशालायां देवतायतने
षु च प्रत्येकं तु नमस्कारो हंति पु
ण्यपुराकृतं उपविश्य नमेत् मूढो
दीर्घायुर्ब्राह्मणो वदेत् स मूढो ।
नरकं याति ब्राह्मणो यात्ययोगति
हरस्थजलमध्यस्थं धावंतं मद ।
गर्वितं क्रोधवंतं विजानीयात्
नमस्कारं च वर्जयेत् पुष्पहस्तो
वारिहस्त तैलाभ्यंगो जलस्थितः
आशीः कर्त्ता नमस्कर्त्ता उभयो
र्नरकं भवेत् इति कर्मलोचनं मातुः
पितुः कनीयांसं न नमेद्वयसाधि
कः नमस्कुर्य्याद्गुरोः पत्नीं भ्रातृजा
यां विमातरं यमः अभिवादयतः पू
र्वमाशिषं न प्रयच्छति यद्दुष्कृतं ।
भवेत्तस्य तस्माद्रागो प्रपद्येत स्व
स्तीति ब्राह्मणो ब्रूयात् आयुष्मानि
तिराजनि वर्द्धतामिति वैश्येषु शूद्रे
ष्वारोग्यमेव च इति मलमासतत्वं
गुरुपत्नीं तु युवतीं नाभिवादयेत् ।
पादयोः कुर्वीत वंदनं ॥ ।

भूयो भगो वोऽहमिति ब्रुवन् वि
शेष्य पादग्रहणं मन्वह्नं चाभिवा
दनं गुरुदारेषु कुर्वीत सतां धर्म
मनुस्मरन् अभिवादनशीलः ।
स्य नित्यं वृद्धेषु धर्मतः असावह
म्भो नामेति सम्यक् प्रणति पूर्वकं
आयुरारोग्यसिद्ध्यर्थं तंद्रादि परि
वर्जितः आयुष्मान्भव सौम्येति वा
च्यो विप्रोभिवादने अकारश्चास्य
नाम्नोन्ते वाच्यः पूर्वाक्षरः प्लुतः
यो न वेत्त्यभिवादस्य द्विजः प्रत्य
भिवादनं नाभिवाद्यः स विदुषा
यथा शूद्रस्तथैव सः सव्यस्त
पाणिना कार्य्यमुपसंग्रहणं गु
रोः सव्येन सव्यस्प्रष्टव्यो दक्षि
णेन तु दक्षिणः लौकिकं वैदि
कं चापि तथाध्यात्मिकमेव वा ।
आददीत यतो ज्ञानं तं पूर्वमभि
वादयेत् ब्राह्मणं कुशलं पृ
च्छेत् क्षत्रबंधुमनामयं ॥
वैश्यं क्षेमं समागम्य शूद्रमारोग्य
मेव तु अभिवादनीया गुरवो ॥
यथा उपाध्यायः पिता ज्येष्ठो भ्रा
ता चैव महीपतिः मातुलः श्व
शुरस्त्राता मातामह पितामहौ ।
वर्णज्येष्ठः पितृव्यश्च पुंसेते गुरवः

स्मृताः माता मातामही गुर्वी पितृ
मातृश्च सोदराः श्वश्रूः पितामही
ज्येष्ठा धात्रीव गुरवः स्त्रियः इत्युक्तो
गुरुवर्गोऽयं मातृतः पितृतो द्विजाः
अनुवर्त्तनमेतेषां मनोवाक्कायक
र्म्मभिः गुरून् दृष्ट्वा समुत्तिष्ठेदभि
वाद्य कृताञ्जलिः इति कूर्म्मपुराणे
॥ अध्यायः अथ समथा नति ल
क्षणानि त्रिकोणं मथ षट्कोणं
मर्द्धचन्द्रं प्रदक्षिणं दण्डमष्टाङ्गम्
ग्रंच समथा नति लक्षणं ऐशानी
वाथ कौवेरी दिक् कामाख्या प्र
पूजने प्रशस्ता स्थण्डिलादौ च स
र्व्वमूर्त्तेस्तु सर्व्वतः त्रिकोणादिव्य
वस्थां च यदि पूर्व्वमुखो यजेत् प
श्चिमात् शांभवीं गत्वा व्यवस्था
यदि पूर्व्वमुखो यजेत् पश्चिमात्
शांभवीं गत्वा व्यवस्थां निर्द्दिशेत्त
दा यदोत्तरमुखः कुर्य्यात् साधको
देवपूजनं तदा याम्यात्तु वायव्यां ग
त्वा कुर्य्यात् संस्थितिं दक्षिणाद्वा
यवीं गत्वा दिशं तस्याश्च शांभवीं।
ततोऽपि दक्षिणं गत्वा नमस्कारस्त्रिकोणव
त् त्रिकोणोऽयं नमस्कारस्त्रिपुराप्रीति
दायकः १ दक्षिणाद्वायवीं गत्वा वायव्या
त् शांभवीं ततः ततोऽपि दक्षिणं गत्वा तां
सत्काग्रे प्रविश्यैव पश्चिमो रादसी।
गत्वा ततश्चाप्युत्तरां दिशं उत्तराच्च त
थाग्नेयीं भ्रमणं हि त्रिकोणवत् ष
ट्कोणोऽयं नमस्कारः प्रीतिदः शि
वदुर्गयोः २ दक्षिणाद्वायवीं गत्वा
तस्माद्व्यावृत्य दक्षिणं गत्वा योऽसौ
नमस्कारः सोऽर्द्धचन्द्रः प्रकीर्त्तितः ३
सकृत् प्रदक्षिणं कृत्वा वर्त्तुलाकृ
ति साधकः नमस्कारः कथ्यते।
ऽसौ प्रदक्षिण इति द्विजैः ४ त्य
क्त्वा स्वमासनं स्थानं पश्चाद्गत्वा
नमस्कृतिः प्रदक्षिणं विना या
तु निपत्य भुवि दण्डवत् दण्ड
स्तूच्यते देवैः सर्व्वदेवौघमोददः ५
पूर्व्ववद्दण्डवद्भूमौ निपत्य हृदये
न तु चिबुकेन मुखेनाथ नासया
त्वलिकेन च ब्रह्मरन्ध्रेण कर्णाभ्यां
यद्भूमिस्पर्शनं क्रमात् तदष्टाङ्ग
इति प्रोक्तो नमस्कारो मनीषिभिः ६
प्रदक्षिणत्रयं कृत्वा साधको वर्त्तुला
कृतिः ब्रह्मरन्ध्रेण संस्पर्शः क्षिते
र्यः स्यात्तु नमस्कृतौ स उग्र इति देवौ
घैरुच्यते विष्णुतुष्टिदः ७ नदीनां
सागरो यादृग् द्विपदां ब्राह्मणो यथा
नदीनां जाह्नवी यादृग्देवानामिव
चक्रधृक् नमस्कारेषु सर्व्वेषु तथै
वोग्रः प्रशस्यते त्रिकोणाद्यैर्नमस्का
रैः कृतैरेव तु भक्तितः चत ॥

चतुर्व्वर्गलभेद्भक्तो न चिराद्देवसा
धकः नमस्कारो महायज्ञः प्री
तिदः सर्व्वतः सदा सर्व्वेषामपि दे
वानामन्येषामपि भैरव योऽसावु
ग्रो नमस्कारः प्रीतिदः सततं ह
रेः महामाया प्रीतिकरः स नम
स्कारगणोत्तमः इति कालीपुराणे
नमस्कारी स्त्री खदिरिका शाकः
लाजालुः इति ख्यातः इति केचित्।
किन्तु रभसेन वराहक्रान्ता लज्जा।
लुः समङ्गा जलकारिकेति खदि
रिकायां सङ्कोचपत्री लज्जालुरि
ति लज्जालुकायां पठितं अञ्जलि
रूपपत्रत्वाद्दलेन नमस्कारं व्यञ्ज
कत्वात् नमस्कारशीलेव नमस्का
री इत्यमरटीकायां भरतः॥
नमस्यः त्रि नमस्कारयोग्यः य
थाश्विनो नमस्याहृदाश्च वयस्या
पस्येवताः इति मलमासतत्त्वं
नमस्या स्त्री पूजा इत्यमरः॥
नमसितः त्रि पूजितः इत्यमरः
नमितः त्रि जातनमस्कारः न।
मोऽस्य जातः इत्यर्थे इतच्प्रत्ययनि
ष्पन्नः नामितः यथा अवनःश्या
लश्यामास्तनगारिमोज्ञारससाः
सखीः कोवा कोपी इति नमित
मूर्द्धा न पिबति इति विदग्धमाध
वनाटकं नमुचिः पुं कन्दर्पः दै
त्यभेदः इति मेदिनी सयथा क
श्यपस्य दनुर्न्नाम भार्य्यासीद्द्वि
जसत्तम तस्यां तु द्वौ सुतावास्तां
सहस्राद्वाहुलाधिको ज्येष्ठः
शुम्भ इति ख्यातो निशुम्भश्चाप
रोऽसुरः तृतीयो नमुचिर्न्नाम म
हाबल समन्वितः इति वामने ५२
अध्यायः नमुचिद्विट् पुं इन्द्रः
यथा विसृष्टचक्रेण नमुचिद्विषा
बलीयइत्यमस्यास्य महर्द्धिवं
दिवः इति माघः॥ नमुचि
सूदनः पुं इन्द्रः इत्यमरः॥
नमेरुः पुं रुद्राक्षः इति भूरि
प्रयोगः सुरपुन्नागः इति राज
निर्घण्टः। नमोगुरुः पुं नम
स्कारैर्गुरुः ब्राह्मणः इति का
विनशब्दरत्नावली॥ नम्र ग
तौ इति कविकल्पद्रुमः नम्र
त्रि नतः इति हलायुधः नमकः
पुं वेतसः इति भावप्रकाशः
नते त्रि नय उ गतौ इति कविक
ल्पद्रुमः नयः पुं नीतिः त।
त् पर्य्यायः॥ नायः २॥

इत्यमरः घृतविशेषः इति मे
दिनी नैगमादि इति हेम।
चंद्रः स्याद्येनेत्रविचित्रे इति
शब्दरत्नावली ॥
नयनं क्ली चक्षुः इत्यमरः म
यते नीयते प्राप्यते इत्यस्मान्ना
वे ऽनट्प्रत्ययः ॥
नयनी स्त्री कनीनी इति शब्द
चंद्रिका नयनोत्सवः पुं प्रदी
पः इति शब्दरत्नावली चन्द्र
न्द्रस्तवक्ष नयनोपान्तः पुं।
अपांगः इति राजनिर्घण्टः ॥
नयनौषधं क्ली पुष्पकासीसं
इति हेमचंद्रः ॥
नयपीठी स्त्री अक्षकांगे द्यूत
प्रतिभाषा इति त्रिकाण्डशेषः
नयविशारदः पुं नीतिशास्त्र
स्वज्ञः यथा षाड्गुण्यविधि
तत्वज्ञो देशभाषाविशारदः
सांधिविग्रहिकः कार्य्यो राज्ञा
नयविशारदः इति मात्स्ये।
९९ अध्यायः ॥
नर्वं क्ली रामकर्पूरतृणं इति
मेदिनी ॥
नरः पुं मनुष्यः इत्यमरः पुरु
षः इति राजनिर्घण्टः विष्णुः अर्ज

नः इति मेदिनी शंकुः इति लीला
वती अथ नरजन्म कारणं ॥
पितृः पुत्रोत्तरोनरः अन्यच्च।
विषमाया निधौ हिमं कर्प्याजंत
कन्यकां समायोगरूपं नूनं के
चिदाफर्मनीषिणः इति स्वबो
धः चतरश्रीतिलकोन गोज।
न्मा तत्परं नरः ततस्तु बालणा
अस्मादभयं नात्र संशयः इति
पाद्मोत्तरखण्डे ७५ अध्यायः ॥
नरकः पुं देवरात्रिप्रभेदः इत्यु
णादिकोषः दैत्यविशेषः सह
थिव्या गर्भे वराह देवाज्जातः ॥
यथा रजस्वलाया गोत्राया ग
र्भे वीर्य्येण पावित्रिणः यतो जात
स्ततो भूतो देवपुत्रोपि सोऽसुरः
तस्य नाम कारणं यथा मातु
षस्य शिर स्तत्र मृतस्य प्राप्य
बालकः स्वशिर स्तत्र विन्यस्य
हृदस्तस्थौ तेन तदा नरस्य शी
र्षस्य शिरो निधाय स्थितवान्
यतः तस्मात्तस्य मुनिश्रेष्ठो नर
कं नामचैव्यधात् तस्य राज्ये य
था श्रीभगवानुवाच करतोया
सत्यगंगा पूर्वभागावधिश्रिता या
वत् ॥

1583

लितकांतास्ति तावद्देशं पुरंभ
दा अत्रदेवी महामाया योगनि
द्रा जगतप्रसूः कामाख्या रूप
मादाय सदा तिष्ठति शोभना अ
त्रास्ति नदराजोऽयं लौहित्या ब
ह्मणः सुतः अत्रैव दश दिक्।
पालाः स्वेस्वेपीठे व्यवस्थिताः अ
त्र स्वयं महादेवो ब्रह्मा चाहं वस
वेदा चंद्रः सूर्यश्च सततं वसतेः
त्रैवपुत्रक सर्वेक्रीडार्थमायाता
रहस्यदेशमुत्तमं अत्रश्रीः सर्व।
तोभद्राभोग्यमत्र सदा वक् अत्रैव
हि स्थितो ब्रह्मा प्रांतस्त्वं स्वस
ड्रैह ततः प्राग्ज्योतिषाख्येयं पु
री शक्रपुरी समा अत्र त्वं वस
भद्रं ते स्वाभिषिक्तो मया स्वयं ॥
कृतदारः सहामात्यैराजा भूत्वा
महाबल तस्य महिषी माया।
यथा ततो विदर्भराजस्य पुत्री
मायाकन्यां हरिः पुत्रार्थे वरया
मास नरकस्य समां गुणैः तामु
द्वाह हृषीकेशा स्तस्मिन् पुरवरे
स्वयं तया समं स तनयं राजत्वेना
भ्यषेचयत् तस्य पुत्रा यथा।
अतन्मयोचजायायाकालेन नरकः
कमात् भगदत्तं महाशीर्ष मदवंत
समालिनं चतुरो जनयामास ॥

पुत्रांस्तान् अदितेः सुताः महासत्वा
न्महावीर्य्यान् देवैरप्यदुरासदान्।
इति कालीपुराणे ३९ अध्यायः ॥
कष्टजनकस्थाने न पर्य्यायः ना
रकः २ निरयः ३ दुर्गतिः ४ इत्यमरः
नरकसंख्या यथा उष्णोर्द्ध नरकाः
शक्रकोट्यः पंचाशन्मानतः ॥
चत्वारिंशन्मितं तेषां प्रधानं तत्रि
बोधत उष्णोर्द्धे पातालेकालाग्नि
रुद्रस्य पुरोर्द्धे अवीचिः कृमिभ
क्ष्यश्च तथा वैतरणी महान् कू
टशाल्मलि रुच्छास पुरम्पर्वत
रौरवं निरुच्छासः पूतिमांसस्त
मलानास्थितं जलं क्रकचच्छेद ॥
स्तथा पंकं कणगा यसमुतापिवं
पूतिपूर्णस्तथा मेदस्तम्भस्त्ररुधि
रं वसा तामिस्त्र स्वपतणाश्वती
त्वासिस्त्रनपुंसकः लोहतम स्थि
यो भीमा अंगार राशिकोपरि कुं
भीपाकः क्षारसेवः संजीवनस्त
तापनं कालसूत्रं महापंकधी
तो लंबरमेवच अंबरीषं तथा
घोरं महारौरव संज्ञकः सूची
मुखेत्वयं तप्ततैलं तप्तत्रपु स्त
था असिपत्रं तथा षास्त्र भूमिर्वा
गयहारिका इति देवीपुराणं ॥
नरकागामिनो यथा यम उवाच।

नगच्छंति नरा घोरान् बहवोऽध
मनिर्मितान् यथाश्च सर्वतेस्तत्र
माप्नुवंति तपोधने विस्तरेण तन
त्सर्वं ब्रवीमि मुनिसत्तम श्रूय
तां तन्महाभाग एकतावैचोपधा
रय नाग्निविन्नरकं याति न सत्
पुत्री न भूमिदः ग्रहस्थ शतवर्षी
च वेदानां चैव पारगः पतिव्रता
न गच्छंति सत्यवाक्याश्च ये नराः
अजिताश्चाशठाश्चैव स्वामिभ
क्ताश्च ये नराः तिलगाश्च हिर
ण्यं च पृथिवीं चापि शास्त्रतो ब्रा
ह्मणेभ्यः प्रयच्छंति न गच्छंति न
संशयः स्वदारनिरताः शांताः प
रदारविवर्जिताः सर्वभूतान्स भू
तान्सर्वभूतानुकंपकाः नग
च्छंति नरकं देवि यापिष्टं तमसावृ
तं यातनास्थानसंपूर्णं हाहाप्र
तिभयस्वनं तान्नवंतो द्विजाग्र्येव
येचविद्यापरंगताः उदासीना न
गच्छंति स्वाध्यायेचरताः नराः
न गच्छंत्यत्र दातारः सर्वभूतहि
तेरताः शुश्रूषका मातृपि
त्रोर्नगच्छंति संशयः अहिंसका
नगच्छंति ब्रह्मचर्यव्यवस्थिताः
पतिव्रता दानवंतो द्विजभक्ताश्च ये
नराः यथाशक्तियजमानाश्च सततं ।
जितप्रवच वाक्रमांसस्करायेचयेद्विजा
आहिताग्नयः गुरुचिन्तानुपा ।
लाश्चकृतिनो मौनयंत्रिताः नि
त्यस्वाध्यायिनो दांताः सदास
भ्याश्च ये नराः मानवान् पूज
यंतो वै आत्मभावेन भाविताः
अपर्वमैथुना ये च न गच्छंति
द्विजोत्तमाः ब्राह्मणाश्रमरतं
च शास्त्रवृत्तिं न संशयः निरा
शाः सर्वकामेभ्यो निराशाः सुजि
तेंद्रियाः न गच्छंति हि ते घोरं यत्र
ते पापकर्मिणः इति वराह पु
राणे नरकगामिनो यथा नार
द उवाच दुष्कर्मीणमपि वक्ष्यामि
नरकं यैः प्रयांति हि सर्वेष्वेव
तु कार्येषु देव पर्वेषु भूमिप
घ्नंति पुत्रान् पशून् हन्त्वान् ब्रा
ह्मणातिक्रमः कृतः गुर्वर्थं वा
भयार्थं वा वञ्चयित्वा महीपते
येऽन्यतं कथयंति स्म ते वै निर
य गामिनः प्रपाणां च सभानां
च संक्रमाणां च मारिष आगा
राणां च भेत्तारो नरा निरयगा
मिनः ये परस्वापहर्तारः पर
परस्वानां च नाशकाः स्तेयकाश्च
परिवादिते नरा नरकानगाः स्तव
काः संधिभेत्तारः परद्रव्योपजीविनः
अकृतज्ञाश्च मित्राणां ते वै निरयगा

मिनः पाषण्डदूषकाश्चैव समया
नां च दूषकाः ये प्रमवस्थिताश्चैव ते
वै निरयगामिनः वृत्तिच्छेदं गृहच्छे
दं दारच्छेदं च पार्थिव मित्रच्छेदं त
थाशायाः कृत्वा नरकभागिनः ।
विषमव्यवहाराश्च विषमाश्चैव
वृद्धिषु लाभेषु विषमाश्चैव नरा नि
रयगामिनः कृताशं कृतनिर्वेशं
कृतभक्तं कृतश्रमं भेदं ये व्यप
कर्षन्ति ते वै निरयगामिनः पु
नः संव्यवहाराश्च निष्परीताश्च मा
नवाः प्राणिहिंसाप्रवृत्ताश्च ते वै
निरयगामिनः वेदविक्रयिणश्चै
व वेदानां चैव दूषकाः वेदानां ले
खकाश्चैव ते वै निरयगामिनः
केशविक्रायका राजन् विषविक्रा
यकाश्च ये क्षीरविक्रायकाश्चैव ते
वै निरयगामिनः चातुराश्रम्यवा
ह्याश्च श्रुतिवाह्याश्च ये नराः विक
र्मभिश्च जीवंति ते वै निरयगामिनः
ब्राह्मणानां गवां चैव कन्यानां च म
हामते येऽन्तरं यांति कार्येषु ते वै नि
रयगामिनः शस्त्रविक्रायकाश्चै
कर्त्तारश्च महीपते शल्यानां धनुषां
चैव ते वै निरयगामिनः शिलाभिः
शंकुभिर्वापि श्वभ्रैर्वा मनुजर्षभ ।
ये मार्गमनुरुंधंति ते वै निरयगामि
अगोप्तारश्च राजानो बलिषड्भा
गतस्कराः समर्थाश्चाप्यदाता
रस्ते वै निरयगामिनः क्षांतान्
दांतानथ प्रज्ञान् दीर्घकालस
होषितान् त्यजंति कृतकृत्या
ये ते वै निरयगामिनः बाला
नामथ वृद्धानां दासानां चैव
ये नराः अदत्वा भक्षयंत्यग्रे ते
वै निरयगामिनः इत्येतत् क
थितं राजन् धर्माधर्मविनिर्ण
यं विमृश्य पुरुषः कर्म धर्म
मेव समाचरेत् इति पाद्मे स्वर्ग
खंडे २४ अध्यायः नरकविशेष
गामिपापिनो यथा कूटसाक्षी
तथा सम्यक् पक्षपातेन यो व
देत् यश्चान्यदन्नतं वक्ति स न
रो याति रौरवे भ्रूणहा पुरह
न्ता च गोघ्नश्च मुनिसत्तमा या
न्ति ते नरके रोधे यश्चोच्छ्वासनि
रोधकः सुरापो ब्रह्महा हर्त्ता सु
वर्णस्य च शूकरे प्रयान्ति नरके
यश्च तैः संसर्गमुपैति वै राज
न्यवैश्यहा ताले तथैव गुरुत
ल्पगः तप्तकुंभे स्वसागामी हन्ति
राजभटांश्च यः साध्वी विक्रयकृ
द्वध्यपालः केशविक्रयी तप्तलो
हे तु पच्यंते यश्च भक्तं परित्यजेत्

केशारी ग्रस्थः स्नुषां सुतां वापि
गत्वा महाज्वाले निपात्यते अव
मंता गुरूणां यो यश्चाक्रोष्टा न
राधमः वेददूषयिता यश्च वेदवि
क्रयकश्च यः अगम्यागामी यश्च
स्यात्ते यांति सबलं द्विज चौरो वि
मोहे पतति मर्य्यादादूषकस्तथा
देवद्विजपितृद्वेष्टा रत्नदूषयि
ता च यः स याति कृमिभक्षे वै ।
कृमीशे च दुरिष्टकृत् पितृदेवा
तिथीन् यस्तु पर्य्यश्नाति नराध
मः लालाभक्षे स यात्युग्रे शर
कर्त्ता च वेधके पर्य्यश्नाति परि
त्यज्याग्रादौ भुंक्ते करोति कर्णिनो
यस्तु यस्तु खड्गादिकृन्नरः प्रयां
ति ते विशसने नरके भृशदारुणे
असत्प्रतिग्रहीता तु नरके यात्य
धोमुखे अयाज्ययाजकस्तत्र ।
था नक्षत्रसूचकः वेगीपूयवहश्चै
को याति मिष्टान्नभुङ्नरः वेगी सा
हसकारी पुत्रादीन्वर्ज्जयित्वाप
कमेव मिष्टान्नभुक् लाक्षामांस
रसानां च तिलानां लवणस्य च ।
विक्रेता ब्राह्मणो याति तमेव नर
कं द्विज मार्ज्जारकुक्कुटच्छागश्व
वराहविहंगमान् पालयन्नरकं या
ति तमेव द्विजसत्तम रंगोपजीवी कै

वर्त्तः कुंडाशी गरदस्तथा सूचीमा
हिषकश्चैव पर्वकारी च यो द्विजः पै
त्यां जीवंति जाराज्जाताः कुण्डः नरत्र
भोजी माहिषो महिषोपजीवी य
द्वा महिषीत्युच्यते भार्य्या भगेनोपा
र्जितं धनं उपजीवति यस्तस्याः स
वै माहिषिकः स्मृतः इति स्मृतिः
पर्वकारी धनादिलोभेन पर्वसु
अमावास्यादिक्रिया प्रवर्त्तकः आ
गारदाही मित्रघ्नः शाकुनिर्ग्राम
याजकः रुधिरांधे पतंत्येते सोमं
विक्रीणते च ये मधुहा ग्रामहंता
च याति वैतरणीं नरः रेतःपाना
दिकर्त्तारो मर्य्यादाभेदिनश्च ये ॥
ते कृच्छ्रे यांत्यशौचाश्च कुहकाजी
विनश्च ये असिपत्रवनं याति वन
च्छेदी वृथैव यः औरभ्रिका मृगव्या
धा वह्निज्वाले पतंति वै यांत्येते द्वि
ज तत्रैव यश्चापाकेषु वह्निदः व्र
तेषु लोपको यश्च स्वाश्रमाद्विच्यु
तश्च यः सन्दंशयातनामध्ये प
ततस्तावुभावपि दिवास्वप्नेषु स्क
न्दंति ये नरा ब्रह्मचारिणः पुत्रैर
ध्यापिता ये च ते पतंति श्वभोजने ए
ते चान्ये च नरकाः शतशोऽथ सह
स्रशः येषु दुष्कृतकर्माणः पच्यंते या
तनागताः तथैव पापान्येतानि तथा

न्यानि सहस्रशः भुज्यन्ते यानि तु
ष्वेषु नरकान्तरगोचरैः वर्णाश्र
मविरुद्धं च कर्म कुर्वंति ये नराः ।
कर्मणा मनसा वाचा निरयेषु प
तंति वै अधः शिरोभिर्दृश्यन्ते न
रकैर्दिवि देवताः देवाश्चाधोमु
खान् सर्वानधः पश्यंति नारकान्
स्थावराः कृमयोऽब्जाश्च पक्षिणः
पशवो नराः धार्मिकास्त्रिदशास्त
द्वन्मोक्षिणश्च यथाक्रमं सहस्र
भागप्रथमा द्वितीयानुक्रमास्त
था सर्वे ह्येते महाभाग यावन्मुक्ति
समाश्रया यावंतो जंतवः स्वर्गे ता
वंतो नरकौकसः पापकृद्याति
नरकं प्रायश्चित्तपराङ्मुखः इति वि
ष्णुपुराणे द्वितीयांशे ६ अध्यायः
अपि च कथयामि विचित्राणां क
र्मणां विविधा गतीः ताः शृणुष्व
महाराज याः कृत्वा मोहमाप्नुया
त् परवित्तं परापत्यं कलत्रं पारकं
च यः हरते बुद्धिमोहेन सोऽन्ते म
त्स वशंगतः कालपाशेन संब
द्धो यमदूतैर्महाबलैः तामिस्रेपा
त्यते तावत् यावद्वर्षसहस्रकं तत्र
ताडनमद्भुताः कुर्वंति यमकिंक
राः पापभोगेन सम्मतस्ततो
योनिं तु शौकरीं तत्र भुक्त्वा म

हादुःखं मानुषत्वं गमिष्यति रो
गादि विक्लिन्न तत्र दुर्य्यशो ज्ञा
पकं स्वकं भूतद्रोहं विधायैवं
केवलं स्वकुटुंबकं पुष्णाति पा
पनिरतः सोऽन्धतामिस्रके पतेत्
ये नरा इह जंतूनां वधं कुर्वंति वै
न्रपा तै रौरवे निपात्यंते खाद्यंते
रुरुभिर्यतः यः स्वोदरार्थं भूता
नां वधमाचरति स्फुटं महारौ
रवसंज्ञे तत्पात्यते स यमाज्ञया
यो वै निजं तु जनकं ब्राह्मणं द्वेष्टि
पापकृत् कालसूत्रे महादुःखे
योजनायुतविस्तृते यावंति पशु
रोमाणि गवां द्वेषं करोति यः ता
वद्वर्षसहस्राणि पच्यते यम किं
करैः यो भूमौ भूपतिर्भूत्वा दंडा
योग्यं तु दंडयेत् करोति ब्राह्म
णस्यापि देहदंडं विलोलुपः ॥
सूकरमुखे दुष्टैः पीड्यते यम
किंकरैः पश्चाद्दुष्टासु योनिषु जा
यते पापभुक् ये ब्राह्मणानां ग
वां येन द्रव्यं वित्तं तथाल्पकं
हरिं वा शृणुते मोहाल्लुम्पंति
स्व बलान्नराः ते परत्रापदु
पेव पात्यंते च महाहिताः
योऽर्थं स्वयमुपाहृत्य मधुरं खादति
लोलुपः न देवायनसुहृदे दद।

नरककुण्डनामानि		पापभेदात् कुण्ड विशेष गामिनः	
अस्थिकुण्डं	२०	विष्णुपदे पितृपिण्डदाता	२०
ताम्रकुण्डं	२१	गुर्विणीगामी	२१
लोहकुण्डं	२२	ऋतुस्नाता ऽवीरयो रन्नभुक्	२२
तीक्ष्णकण्टककुण्डं	२३	कटुवाचा स्वामिताडिका	२३
विषकुण्डं	२४	विषेण जीवन हन्ता	२४
चर्म्मकुण्डं	२५	सचर्महस्तेन देवद्रव्य स्पर्शकृत्	२५
तप्तसुराकुण्डं	२६	शूद्रानुस्नातः शूद्रान्नभोजी	२६
प्रतप्ततैलकुण्डं	२७	दण्डेन वृषताडकः	२७
कुन्तकुण्डं	२८	कुन्त लोह वडिशे मी वद्धन्ता	२८
कृमिकुण्डं	२९	मत्स्यभुग्विप्रो हत्यामांसदेवस्यनैवेद्यभुक्	२९
पूयकुण्डं	३०	शूद्रयाजी नत्त श्राद्धभुक्वच्छवदाहीव ब्राह्मणः	
सर्पकुण्डं	३१	श्रीकृत्स्नपदविक्र मस्तकस्य सर्पस्य हन्ता	३१
मशकुण्डं	३२	विधिं दत्वा त्वदमंतं हन्ता	३२
दंशकुण्डं	३३	विधिं दत्वा जीव हन्ता	३३
गरलकुण्डं	३४	मक्षिकां हत्वा मधुग्राही	३४
वज्रदंष्ट्रकुण्डं	३५	अदण्ड्य विप्रयोर्दण्डकृत्	३५
वृश्चिककुण्डं	३६	अर्थलोभात् प्रजादण्डकृत्	३६
			३७
शरकुण्डं	३७	} शस्त्रधारीधावकः संध्यादिविभक्ति	३८
शूलकुण्डं	३८	} हीनश्च ब्राह्मणः	३९
खड्गकुण्डं	३९		
गोलकुण्डं	४०	अल्पदोषेण कारायां प्रजाबंधनकृत्	४०
नक्रकुण्डं	४१	जलाद्दुत्थित नक्रादि हन्ता	४१
काककुण्डं	४२	कामेन परस्त्री वक्त्रः श्रोणिपास्यदृष्टा	४२
संचानकुण्डं	४३	स्वर्णचोरः	४३

1591

नरककुण्डनामानि		पापभेदात् कुण्ड विशेष गामिनः	
वाजकुण्डं	४४	ताम्र लौह चौरः	४४
वज्रकुण्डं	४५	देव देवद्रव्ययो श्चोरः	४५
तप्तपाषाणकुण्डं	४६	देवद्विजयो रौप्य गो वस्त्राणां चौरः	४६
तीक्ष्णपाषाणकुण्डं	४७	देवद्विजयोः पित्तल कांस्य पात्रचौरः	४७
लालाकुण्डं	४८	वेश्यान्नभुक् तद्वृत्ति जीवीच	४८
मसीकुण्डं	४९	म्लेच्छसेवी मसीजीवीच ब्राह्मणः	४९
चूर्णकुण्डं	५०	देवद्विजयोः शस्य ताम्बूलासन चौरः	५०
चक्रकुण्डं	५१	विप्र द्रव्यं हृत्वा चक्रकारी	५१
वक्रकुण्डं	५२	विप्र बांधवयो र्वक्रताकारी	५२
कूर्मकुण्डं	५३	हरिशयने कूर्म्ममांस भुक् ब्राह्मणः	५३
ज्वालाकुण्डं	५४	} देव द्विजयो र्हृत तैलादि स्पृत	५४
भस्मकुण्डं	५५	}	५५
दग्धकुण्डं	५६	देवद्विजयोर्थाद्रीगंधतैलद्रव्याणामपहर्त्ता	५६
तप्तसूर्म्मीकुण्डं	५७	बल (छल) त्वाद्दिना परभूमिहरः	५७
असिपत्रकुण्डं	५८	अर्थलोभात् खड्गेन जीविच्छेदी नरघातीच	५८
क्षुरधारकुण्डं	५९	ग्राम नगरादि दाहकृत्	५९
सूचीमुखकुण्डं	६०	} परकर्णमुखं दत्वा परनिंदकः परदोषा	
गोधामुखकुण्डं	६१	} ख्यायी वेद ब्राह्मण निन्दकश्च	६०
नक्रमुखकुण्डं	६२	गृहे भित्वा वस्त्र गो छाग मेष चौरः	६१
गजदंशकुण्डं	६३	सामान्य द्रव्य चोरः	६२
गोमुखकुण्डं	६४	गज तुरग नर चौरः	६३
		जलपिबद्गोवारकः	६४
कुम्भीपाककुण्डं	६५	} गो स्त्री मित्र भ्रूण ब्रह्महाः गम्या गामी दीक्षासंध्याहीन स्तीर्थप्रतिग्राही ग्रामयाजी देवलः शूद्रसूपकारो वृषलीपतिश्च	६५

नरककुण्डनामानि		पापभेदात् कुण्ड विशेष गामिनः ॥	
कालसूत्रकुण्डं	६६	वेश्यान्नभुक् तत्संसर्गी च	६६
अवटोदकुण्डं	६७	कुलटादि षड्वेश्यागामी द्विजः	६७
अरुन्तुदकुण्डं	६८	चन्द्रसूर्य्यग्रहणे निषिद्धकालभोजी	६८
पांशुभोजकुण्डं	६९	एकस्मैवाक् प्रदत्तकन्याया अन्यस्मैदाता	६९
पाशवेष्टकुण्डं	७०	रत्नापहारी	७०
शूलप्रोतकुण्डं	७१	अभक्त्याशिवलिङ्ग पूजकः	७१
प्रकम्पनकुण्डं	७२	विप्रदण्डकृत् तत्कम्पकृद्भयदायी च	७२
उल्कामुखकुण्डं	७३	सकोपवदना स्वामिनि कटुवादिनी	७३
अन्धकूपकुण्डं	७४	शूद्रभोग्या ब्राह्मणी ॥	७४
वेधनकुण्डं	७५	वेश्या सा च पंच षट् पुंगमनाद्भवति	७५
दण्डताडनकुण्डं	७६	पुंश्चली सा च सप्ताष्ट पुंगमनाद्भवति	७६
जालबन्धकुण्डं	७७	महावेश्या सा चाष्टाधिक पुंगमनाद्भवति	७७
देहचूर्णकुण्डं	७८	कुलटा सा च पुंद्वय गमनाद्भवति	७८
दलनकुण्डं	७९	स्वैरिणी वृषली सा च त्रः पुंगमनाद्भवति	७९
शोषणकुण्डं	८०	धृष्टा पुंश्चली सा च त्रिपुंगमनाद्भवति	८०
कषकुण्डं	८१	सवर्णा परदारी	८१
शूर्पकुण्डं	८२	ब्राह्मणीगामी क्षत्रियो वैश्यश्च	८२
ज्वालामुखकुण्डं	८३	करे तुलसी गंगाजल देवशिलाश्च कृत्वा प्रतिज्ञाकृत तत्पालको मिथ्याशपथी मित्रद्रोही विश्वासघाती मिथ्यासाक्ष्यश्च	८३
जिह्मकुण्डं	८४	नित्यक्रियाहीनो देववाग्नास्तिको मंदोपहासी च	८४
धूमान्धकुण्डं	८५	देव विप्रयो र्धनहारी	८५
नागवेष्टनकुण्डं	८६	वैद्य देवलहस्तिकारी लाक्षा लोह व्यापारी रसादिविक्रयी च ब्राह्मणः	८६

नरकजित् पुं विष्णुः इति त्रिकाण्डशेषः ॥

नरकदेवता स्त्री निरयदेवी तत्पर्य्यायः अलक्ष्मीः २ निर्ऋतिः ३ कालपर्णी ४ इति शब्दरत्नावली नरकस्था स्त्री वैतरणीनदी इति हेमचन्द्रः निरयस्थितेत्रि यथा नरकस्थोऽपि देहं वै न पुनस्त्यक्तुमिच्छति इति श्रीभागवते ॥

नरकान्तकः पुं विष्णुः इति पुराणं नरकामयः पुं प्रेतः इति शब्दरत्नावली निरयरोगश्च ॥

नरकीलकः पुं गुरुघ्नः तत्पर्य्यायः गुरुहा इति हेमचन्द्रः ॥

नरगणः पुं नवनक्षत्रविशेषः तज्जातजनः यथा हस्ता स्वाति मृगाश्विनी हरि गुरुः पौष्णानुराधादितिमूलार्द्रा रोहिणी चोत्तरा। एण भरणी पूर्वाणिभानि त्रयं मेघाश्लेष विशाख मूल वरुण वह्निचित्रा मघाः कथ्यन्ते मुनिभिर्यथाक्रमं वर्णा देवा नरा रक्षसाः इति दीपिका अस्य फलं मानुषेष्टकर्मसंगतमनाः शीलान्वितो धीयुतः इति कोष्ठीप्रदीपः। नरसमूहश्च ॥

नरंगः पुं वरण्डकः नारंगा इति भाषा मेहने स्त्री इत्युणादिकोषः ॥

नरदेवः पुं राजा इति हलायुधः ॥

नरनारायणौ पुं ऋषिविशेषौ तौ श्रीकृष्णार्जुनौ इति महाभारतं ॥ तयोरुत्पत्तिर्यथा अथ विनयनस्तस्य स्वान्तेगम्भार्हनः तत्सर्वं ज्ञापयामास वाहवपुषोरितं ततो देहपरित्यागकर्त्तुं समभवद्यदा तदा देहाग्रव्यानेन नरसिंहं महाबलं शरभो भगवान् भर्गो द्विधामध्ये चकार ह नरसिंहे द्विधा भूते नरभागेन तत्क्षणात् ॥ नर एव समुत्पन्नो दिव्यरूपी महानृषिः तस्य पंचास्यभागेन नारायण इति श्रुतः अभवत् समहात्मा मुनिरूपी जनार्दनः। नरो नारायणश्चोभौ सृष्टिहेतू महामती ययोः प्रभावो दुर्द्धर्षः शास्त्रे वेदे तपः सु च इति कालिकापुराणे २९ अध्यायः ॥ कल्पभेदे तौ धर्मपुत्रौ यथा धर्मस्य दक्षदुहितर्य्यजनिष्ट मूर्त्यां

नारायणो नर इति स्व तपः प्रभावः
दृष्टात्मनो भगवतो नियमावलो
पं देव्य स्त्वनंग पृतना घटितुं न
शेकुः इति श्रीभागवते २ स्कंधे ।
६ अध्यायः ॥
नरपतिः पुं राजा इति शब्दर ।
त्नावली ॥
नरप्रियः पुं नीलवृक्षः इति रा
जनिर्घण्टः नरस्य प्रियवस्तुनि
त्रि नरभूः स्त्री भारतवर्षः इति ।
त्रिकाण्डशेषः नरोत्तमपतिश्च ॥
नरभूमिः स्त्री भारतवर्षः इति श
ब्दरत्नावली ॥
नरमानिनी स्त्री श्मश्रुयुक्तना
री इति त्रिकाण्डशेषः ॥
नरमानिका स्त्री नरमानिनी इ
ति शब्दरत्नावली ॥
नरमाला स्त्री मनुष्यमुण्डमाला
यथा विविध खड्गोग्र धरा नरमा
ला विभूषणा इति चण्डी ॥
नरमालिनी स्त्री श्मश्रुयुक्तना
री इति हेमचंद्रः नरमाला यु
क्ता च नरमेधः पुं नरवधात्मक
यज्ञविशेषः स च कलौ वर्जनीयः
यथा समुद्र यात्रा स्वीकारः कमण्डलु

विधारणं द्विजाना मसवर्णासु क
न्यासूपयम स्तथा देवरेण सुतो
त्पत्ति र्मधुपर्के पशोर्वधः ।
मांसादनं तथा श्राद्धे वानप्रस्था
श्रम स्तथा दत्ताया श्चैव कन्यायाः
पुनर्दानं वरस्य च दीर्घकालं ब्रह्म
चर्य्यं नरमेधाश्वमेधकौ महाप्र
स्थान गमनं गोमेधश्च तथा म
खः इमान् धर्मान् कलियुगे व
र्ज्यानाहुर्मनीषिणः इत्युद्वाहत
त्वे बृहन्नारदीयं ॥
नरवाहनः पुं कुवेरः इत्यमरः ॥
पुरुष यान विशिष्टे त्रि ॥
नरविषाणः पुं राक्षसः इति त्रि
काण्डशेषः ॥
नरसिंहः पुं विष्णुः इति शब्दरत्ना
वली स तु हिरण्यकशिपु वधा
र्थं भगवद्दशावतारान्तर्गतश्चतु
र्थः नृसिंहावतारः इति वराहपुरा
णं नरश्रेष्ठः यथा सुकृत नरप
दे व्याघ्र पुंगव र्षभ कुंजराः सिं
ह शार्दूल नागाद्याः पुंसि श्रे
ष्ठार्थवाचकाः इति विशेष्यनिघ्ने
ऽमरः नरहरिः पुं नृसिंहावतारः
यथा केशव धृत नरहरि रूप जय जग

दीश हरे इति गीतगोविंदः नरा
धिपः पुं नराधिपतिः राजा य
था नराणांच नराधिपः इति ।
श्रीभगवद्गीता ॥
नरान्तकः पुं राक्षसविशेषः स
तु रावणपुत्रः इति रामायणं ॥
नरायणः पुं श्रीनारायणः इति
शब्दरत्नावली ॥
नरी स्त्री नारी इति जटाधरः ॥
नरेंद्रः पुं राजा विषवैद्यः इति
मेदिनी ॥
नर्कुटकं क्ली नासिका इति
हेमचंद्रः ॥
नर्तकः पुं पोटगलः चारणः
केलकः नटः तत्पर्य्यायः ।
सर्ववेशी २ लयालम्बः ३ ताल
रेचनकः ४ इति शब्दरत्नावली
द्विपः इति हेमचंद्रः ॥ नृत्य
कर्त्तृलक्षणं यथा यादृशं नृत्य
पात्रं स्यात्गीते योग्यंच तादृशं ।
नृत्यस्य धारणात् पात्रं नर्तकः
परिकीर्तितः अपिच असंबद्ध प्र
लापी च सदा भ्रुकुटि तत्परः ॥
हास महासचतुरो वाचालो नृत्य
कोविदः इति संगीतदामोदरः ॥

नर्तकी स्त्री नृत्यकारिणी वार इ
ति भाषा तत्पर्य्यायः लासिका २
इत्यमरः लयपुत्री ३ नटी ४
लस्या ५ इति शब्दरत्नावली क
रेणुः इति मेदिनी नलिका नाम
सुगंधिद्रव्यं इति राजनिर्घण्टः
नर्तनं क्ली नृत्यं इत्यमरः ॥
नर्द शब्दे इतिकविकल्पद्रुमः
नर्द गतौ इतिकविकल्पद्रुमः
नर्दटकं क्ली छंदोविशेषः तस्य
लक्षणं यथा यदि भवतो नजौ
भ ज ज ला गुरु नर्दटकं इति
छंदोमंजरी ॥
नर्म क्ली परीहासः इत्यमरः
नर्मकीलः पुं पतिः इति त्रिका
ण्डशेषः ॥
नर्मटः पुं खर्परः सूर्य्यः इति
हारावली ॥
नर्मठः पुं चुचुकं षिड्गः परिहा
सरतः इति शब्दरत्नावली ॥
नर्मदः पुं केलिसचिवः इति मे
दिनी नर्मदा स्त्री पृक्का इति हेमचंद्रः
नदीविशेषः सा विन्ध्य पर्वतान्निः
सृता पश्चिमे तमसा नद्यां प्रविष्टा ॥
तस्याः पर्य्यायः रेवा २ मेकलक

नयमलार्ज्जुनौ भूत्वा श्रीहृंदाव
नेय्यासन्नः दामोदरेण शापनिर्म्मु
क्तौ नत्वा स्वगृहं जग्मतुः इति
श्रीभागवतीयदशमस्कंधः ॥
नलदं क्ली पुष्परसः उशीरं मां
सी इति मेदिनी नलदा नरिति त्रि
नलदंडुः पुं निषधदेशः इति भू
रिप्रयोगः ॥
नलदा स्त्री जटामांसी इति हे
मचंद्रः ॥
नलपट्टिका स्त्री नलादीरमा
इति भाषा इति हारावली ॥
नलमीनः पुं चिलिचिममत्स्यः
इत्यमरः ॥
नलिका स्त्री नाडी सुगंधिद्रव्यभे
दः नली इति ख्यातः इतरापथ्ये
प्रसिद्धा प्रवालाकृतिः पंडारी इति
क्वचित् प्रसिद्धा तत्पर्य्यायः ॥
विद्रुमलतिका २ कपोतवारणा
३ नलिनी ४ निर्म्मध्या ५ सुषिरा
६ ध्माधमानी ७ स्तुसा ८ रक्तदला ९
नर्त्तकी १० नटी ११ अस्या गुणाः तिक्त
त्वं कटुत्वं तीक्ष्णत्वं मधुरत्वं कृमि
वातोदरार्शोघ्नत्वं स्थूलनाशित्वं म
लशोधनत्वंच इति राजनिर्घण्टः

नलिनः पुं प्रणकविशेषः नालि
ता इति भाषा अस्य गुणाः मधुरत्वं
पित्तनाशित्वं शुक्रवर्द्धकत्वंच इ
ति द्रव्यगुणः ॥
नलिनं क्ली पद्मं इत्यमरः नी
लिका जलं इति हेमचंद्रः ॥
नलिनं क्ली पद्मं इत्यमरः नी
लिका जलं इति हेमचंद्रः ॥
नलिनः पुं सारसपक्षी इत्यमरः
क्रूरपाकफलः पानीआमला
इति भाषा इति शब्दचंद्रिका ॥
नलिनी स्त्री पद्मयुक्तदेशः पद्म
समूहः पद्मलता इति भरतः ॥
पद्ममात्रं इति रायमुकुटादयः ॥
तत्पर्य्यायः विसिनी २ पद्मिनी ३
इत्यादि इत्यमरः व्योमनिम्नगा ॥
कमलाकरः इति मेदिनी नलि
का इति राजनिर्घण्टः नारिके
लसुरा इति त्रिकाण्डशेषः ॥
नलिनीरुहं क्ली मृणालं इति रा
जनिर्घण्टः ब्रह्मणि पुं ॥ नलिने
शयः पुं विष्णु इति त्रिकाण्डशेषः नली
स्त्री मनःशिला इति विश्वः नलिका
इति भावप्रकाशः तत्पर्य्यायः सुषि
रा २ विद्रुमलता ३ कपोताङ्घ्रिः ४ नटी ५
इत्यमरः ॥

नलोत्तमः पुं देवनलः इति रा
जनिर्घण्टः
नल्वः पुं किष्कुचतुः शतं चतुः
शतहस्तपरिमितदेशः इत्यमरभ
रतौ नल्ववर्त्मगा स्त्री काकांसी इ
ति शब्दचंद्रिका नल्वपरिमित
पथगामिनि त्रि ॥
नवः पुं स्तवः इति मेदिनी रक्त
पुनर्नवा इति राजनिर्घण्टः नूतन
न त्रि इत्यमरः ॥
नव म त्रि संख्याविशेषः नय
इति भाषा बहुवचनांतोऽयं इ
ति व्याकरणं नववाचका यथा।
अंगद्वारं १ भूखंडं २ कृतरावणम
स्तकः ३ सुधाकुण्डं ४ व्याघ्रीस्तनः
५ सेवधि ६ अंकं ७ रसः ८ ग्रहः
९ इति कविकल्पलता ॥
नवकारिका स्त्री नवोढा इति श
ब्दमाला नूतनः सुश्लिष्टो विवरण
श्लोकः नवीनकर्त्रीच ॥
नवकालिका स्त्री नवीनः इति हारा
वली ॥
नवग्रहाः पुं सूर्य्यादयो नव यथा
नवग्रहमखं कृत्वा नतः कर्म्मस
मारभेत् अन्यथा फलदं पुंसां नका

म्यं जायते क्वचित् इति तिथितत्त्वं ते
षां संस्थानं यथा भूमेर्योजन ल
क्षे तु सौरं मैत्रेय मंडलं लक्षे
दिवाकरस्यापि मण्डलं शशिनः
स्थितं पूर्णे शतसहस्रे तु योज
नानां निशाकरात् नक्षत्रमंडलं
कृत्स्नमुपरिष्टात् प्रकाशते द्विल
क्षे चोत्तरे ब्रह्मन् बुधो नक्षत्रमंड
लात् तावत्प्रमाणभागे तु बु
धस्याप्युशनाः स्थितः अंगारको
पि शुक्रस्य तत्प्रमाणे व्यवस्थितः
लक्षद्वये तु भौमस्य स्थितो देव
पुरोहितः सौरिर्बृहस्पतेश्चोर्द्ध्वं द्वि
लक्षे समवस्थितः इति विष्णुपुराणे
२ अंशे ७ अध्यायः तेषां रथादि य
था योजनानां सहस्राणि भास्कर
स्य रथो नव ईषादण्डस्तथैवास्य
द्विगुणो मुनिसत्तम सार्द्धकोटि
स्तथा सप्त नियुतान्यधिकानि वै
योजनानां तु तस्याक्षस्तत्र चक्रं प्र
तिष्ठितं चत्वारिंशत् सहस्राणि
द्वितीयाक्षो व्यवस्थितः पंचान्या
नि तु सार्द्धानि स्यंदनस्य महा
मते अक्षप्रमाणमुभयोः प्रमा
णं तद्युगार्द्धयोः ॥ ॥

कृत्वोत्त लघुगार्द्धेन कृवाधारो
रथस्य वै द्वितीयेऽक्षे नक्षत्रेसं
स्थितं मानसाचले ह्रयाश्चसप्त
छंदांसि तेषां नामानि मे शृणु
गायत्री च बृहत्युष्णिग्जगती त्रि
ष्टुवेव च अनुष्टुप पंक्तिरित्युक्ता
छंदांसि हरयो रवेः स रथोऽधिष्ठि
तो देवैरादित्यैर्ऋषिभिस्तथा ग
धर्वैरप्सरोभिश्च ग्रामणी सर्परा
क्षसैः स्तुवंति मुनयः सूर्यं ग
धर्वैर्गीयते पुरः नृत्यंत्यप्सरसो
यांति सूर्यस्यानुनिशाचराः वहं
ति पन्नगा यक्षैः क्रियतेऽभीषु सं
ग्रहः वालखिल्यास्तथैवैनं परि
वार्य समासते सोऽयं समगणः
सूर्यमण्डले मुनिसत्तम हिमो
ष्णवारि वृष्टीनां हेतुत्वे समुपाग
तः रथस्त्रिचक्रः सोमस्य कुंदा
भास्तस्य वाजिनः वामदक्षिण
तो युक्ता दश तेन चरत्यसौ वा
युग्नि द्रव्य संभूतो रथश्चंद्रसुत
स्य च पिशंगैस्तुरगैर्युक्तः सोऽष्ट
भिर्वायुवेगिभिः सवरूथः सानुक
र्षो युक्तो भूसंभवैर्हयैः सोपासंग
पताकस्तु शुक्रस्यापि रथो महान् अष्टा

सकांचनः श्रीमान्भौमस्यापि र
थो महान् पद्मरागारुणो रथैः
संयुक्तो वह्निसंभवैः अष्टाभिः
पांडरैर्युक्तो वाजिभिः कांचने
रथे तस्मिंस्तिष्ठति वर्षे वै राशौ
राशौ बृहस्पतिः आकाशसंभवै
रश्वैः शवलैः स्यंदनयुते स
मारुह्य शनैर्याति मंदगामी
शनैश्चरः स्वर्भानोस्तुरगा स्त
ष्टौ भृंगाभा धूसरं रथं सकृद्युक्ता
स्तमेवेय वहंत्यविरतं सदा ॥
तथा केतुरथस्याश्वा अष्टौ तेवा
तरंहसः पलालधूमवर्णाभा
लाक्षारसनिभारुणाः एते म
याग्रहाणां वै तवाख्याता रथा
नव सर्वे ध्रुवे महाभाग प्रवद्धा
वायुरश्मिभिः इति विष्णुपुराणे २
अंशे ८।१०।१२ अध्यायः ॥
ग्रहाणाम् अशुभप्रतीकारः राज
मार्तंडे । दोषो नस्याद्ग्रहाणाम
शिशिरकिरणे ताम्र मिंद्रौच पां
डवस्त्रीपुत्रे प्रवाले शशधर तन
ये शातकुम्भं भुजेन देवाचार्ये च
मुक्तामणिमसुरगुरौ सीसकं सूर्य
सूनो राहौ लौहं तनिष्टे कमलज

तनये राजपट्टं विभर्तुः शान्त ।
कुम्भ सुवर्णं राजपट्टं कर्पूरालो
तिष्ठांते अपि च वुद्धिप्रकाशेऽति
स्फूर्ली दीपिका मूले गोजिह्वा ।
वृद्धदारके वल्लयष्टि सिंहपुच्छी
वाद्याले चंदनं सितं अश्वगंधा
क्रमात् सूर्यादिग्रहदोषोपशांत
ये इति ज्योतिस्तत्वे सजन्मरा
शावधि नवग्रहस्थितिर्यथा के
तुपरस्तव भौम मंदगतयः षष्टाति
संस्थाः शुभाश्चंद्रार्कावपि तव तो
चदशमौ चंद्रः पुनः सप्तमः जी
वः सप्तनवद्वि पंचम गतो युग्मे
प्रसोमात्मजः शुक्रः षड्दशास
प्तवर्जितेतरे सर्वे सुपोते शुभाः
इति दीपिका॥ रविः ३।६।१०।११।
राशयः सोमः ३।६।७।१०।११
शुक्ल पक्षे २।५।९। जन्मर्क्षं वर्जि
त जन्मचंद्रः शुभः मंगलः ३।६।
१०।११॥ बुधः २।४।६।८।१०।११।
१२॥ बृहस्पतिः २।५।७।९।११॥
शुक्रः १।२।३।४।५।८।९।११।१२।
शनिः ३।६।१०।११॥ राहुः ३।६।
१०।११॥ केतुः ३।६।१०।११॥
राशयः ॥ ग्रहाणां राशि ॥३०।

भोगनिर्णयः यथा रविर्मासं नि
शानाथः सपाददिवसद्वयं पक्ष
त्रयं भूमिपुत्रो बुधोऽष्टादशवास
रान् वर्षमेकं सुराचार्यश्चाष्टावि
शद्दिनं भृगुः शनिः सार्द्धद्वयवर्षं
स्वर्भानुः सार्द्धवत्सरं रविः १ मासः
सोमः २।० दिनं कुजः ४५ दिनं
बुधः १८ दिनं बृहस्पतिः १ वत्
सरः शुक्रः २८ दिनं शनिः २॥०
वत्सरः राहुः १॥० वत्सरः ॥
केतुः १॥० वत्सरः इति ज्योतिषं ॥
अथ चंद्रादि षड्ग्रहाणामस्तो
दय ज्ञाने यथा अथोदयास्त
मययोः परिज्ञानं प्रकीर्त्यते ।
दिवाकरकराक्रांतमूर्तीनाम
ल्पतेजसां सूर्याद्यधिकाः प
श्चाद्दृश्या जीवकुजार्कजाः ऊनाः प्रा
गुदयं यांति शुक्रज्ञौ वक्रिणौ
तथा अल्पाविवस्वतस्वतः प्राचा
मस्तं चेद्रुतभागिनः व्रजेत्यभ्य
धिकाः पश्चादुदयं शीघ्रयायि
नः एषां कालांशा यथा एका
दशामरेज्यस्य तिथि संख्यार्कजस्य
च अस्तांशा भूमिपुत्रस्य दश सप्ता
धिका स्ततः पश्चादस्तमयो ह्यभि

हृदयः सोमुहृनेया प्रागस्तउदयः प
श्चादस्तत्वाद्दशभिर्भगोः एवंबुधोह्य
दशभिस्तत्रर्द्दशभि रंशकैः वक्रशी
घ्रगतीवार्कात् करोत्यस्तमयोद
यौ पश्चाधिकैः कालभागैर्दृश्या
स्तैनैरदर्शनाः भवंतिलोकेरवच
राभाजुभागस्त मूर्तयः इति सूर्य्य
सिद्धांतः तेषां मस्तोदय दिन सं
ख्याज्ञानं यथा पूर्णा दि चंद्रा १२२
स्त्रिदशाश्च ३१ देना ३२ वेदाचला ४७
रामकृते ४२ क्रमेण। भौमादिक
स्यास्तदिनानि वक्रे बुधस्य भूपा १६
दशभार्गवस्य पंचांपकस्मादस्त
मयाउदयाद्वा अभ्युदयास्तज्ञानं
यथा तथास्तवक्रात् कुजनेत्रस्त
वक्रेज्ञास्य २२ ऽब्धि ४ विश्वे १३ दिवि
१० नैश्च १२ मासैः महास्तवक्रास्तवि
धौ सितस्य क्रमेणवक्रस्तनवेंडु ।
मासैः १५ गुरोरुदयस्यप्राक्पर ।
श्चात् शुक्रस्यतउदयवक्रमहा
स्तानां प्राक्पश्चात्वाल्य वृद्ध
दिनज्ञानं यथा वृद्धः पुरस्तादुदय
स्यपश्चात्वालश्चयदे १५ वचसाप
तिः स्यात् एवं सितः पंचदिनानिवृ
द्धोवालोभवेत्ताशितिदिनानिवक्रे वृद्धस्तपदे १५

श्चेगुज्ञोमहास्तेवालः पुनस्तमदशा
हमेव इति सिद्धांतमंजरी ॥
अथ नवग्रह स्तोत्रं जवाकुसु
म संकाशं काश्यपेयंमहाद्युतिं
ध्वांतारिंसर्वपापघ्नंप्रणतोस्मिदि
वाकरं १ दधिशंखतुषाराभंक्षी
रोदार्णवसंभवं नमामि शशिनं
भक्त्या शंभो र्मुकुट भूषणं २ ॥
धरणी गर्भ संभूतं विद्युत्पुंज
समप्रभं कुमारं शक्ति हस्तंच
लोहितांगंनमाम्यहं ३ प्रियंगुक
लिकाश्यामं रूपेणाप्रतिमं बुधं
सौम्यं सर्वगुणोपेतं नमामिशा
शिनः सुतं ४ देवतानां ऋषीणां
च गुरुं कनकसन्निभं वंद्यभूतं
त्रिलोकेशं प्रणमामि बृहस्पतिं
५ हिमकुंदमृणालाभं दैत्यानां पर
मं गुरुं सर्व सर्वशास्त्र प्रवक्तारं
भार्गवंप्रणमाम्यहं ६ नीलांजन
चयप्रख्यं रविसूनंमहाग्रहं छा
याया गर्भसंभूतं वंदे भक्त्या शनै
श्चरं ७ अर्द्धकायंमहाघोरं चंद्रादि
त्यविमर्द्दकं सिंहिकायाः सुतंरौद्रं
तं राहुं प्रणमाम्यहं ८ पलालधू
म संकाशंतारागृहविम

र्द्दकं रौद्रं रुद्रात्मकं क्रूरं तंकेतुं
प्रणमाम्यहं ९ ॥ व्यासेनोक्तमि
दं स्तोत्रं यः पठेत् प्रयतः शुचिः
दिवा वा यदि वा रात्रौ शांतिस्तस्य
न संशयः ऐश्वर्यमतुलंचापिआ
रोग्यपुष्टिवर्द्धनं नरनारीप्रियत्वं
चनित्यंतस्योपजायते नलकोग्र
होवायु येचान्ये ग्रहपीडकाः
ते सर्वे प्रशमंयांतिव्यासो ब्रूयात्त्र
संशयः इति श्रीव्यासभाषितंन
वग्रह स्तोत्रं समाप्तं ॥
नवच्छात्रः पुं प्रथम मध्ययनेप्र
वृत्तः नवीनविद्यार्थी त त्पर्य्यायः
क्रियाकारः इतित्रिकांडशेषः ॥
नवतः पुं कुथः करिकंवलः इ
तिहेमचंद्रः ॥
नवभिः त्रि संख्याविशेषः ९
नवे इतिभाषा इतिशब्दरत्नाव
ली नवतिका स्त्री तूलिका इ
ति हारावली ॥
नवतिशःस्त्र वत्कुनवति नव
ति नवतीति दीप्त्यायां चशस
प्रत्ययः नवती स्त्री नवतिः
इतिशब्दरत्नावली ॥

नवदण्डं क्ली राज्ञांछत्रविशेषः।
यथा मनोहरं त्रि कनक दण्डंच
नवदण्डकं छत्रंच त्रिविधं ज्ञेयं
त्रिविधानांमहीभुजां इतियुक्ति
कल्पतरुः अस्यविवरणंछत्रश
ब्देद्रष्टव्यं ॥
नवदलं क्ली पद्मस्यकेशरशामी
पस्थदलं पद्मादीनांजटिकाकार
नवपत्रं तत्पर्य्यायः संवर्त्तिका २।
इत्यमरः संवर्त्तिः ३ संवर्त्ती ४ इति
भरतः सामान्यनूतन पत्रं अतिह
डुचंद्रः दलमात्रं इति मधुः ॥
नवदीधितिः पुं मंगलग्रहः इ
तिजटाधरः ॥
नवदुर्गा स्त्री नवपत्रिका यथा
पत्रिकेनवदुर्गे त्वं महादेवमनोर
मे पूजांसमस्तां संगृह्य रक्षमां त्रि
दशेश्वरि इति वृहन्नंदिकेश्वरपुरा
णं ॥ कुमारिका १ त्रिमूर्त्तिः २
कल्याणी ३ रोहिणी ४ काली ५
चंडिका ६ शांभवी ७ दुर्गा ८ भ
द्रा ९ इति नवनामिका कन्या य
था मंत्रांतरं मयीलक्ष्मीमाहृणां
रूपधारिणीं नवदुर्गात्मिकांसाक्षात्

कन्यामावाहयाम्यहं इति निर्ण
यसिंधुः ॥
नवदोला स्त्री नूतनप्रेंखा अस्या
विवरणं चतुर्दोल शब्दे द्रष्टव्यं ॥
नवदोलारोहण दिनं यथा उपेंद्रमल्ला
हि शिवाग्निवर्जपक्षेंदुतारा ति
थि लग्नयोगे विष्टि दमा पुत्र
यमाह वर्जे दोलादिकारोहण
माघमिष्टं इति समयप्रदीपः ॥
नवधा त्व नवप्रकारः यथा ॥
आचारो विनयो विद्या प्रतिष्ठा ती
र्थदर्शनं निष्ठा वृत्तिस्तपो दानं न
वधा कुल लक्षणं ॥
नवनाडीचक्रं क्ली राज्ञो नवनक्षत्र
युक्तं वक्ररेखा त्रयात्मकचक्रं
यथा जन्माद्यं कर्म्म ततोपि दश
मेकोनविंशकं षोडशाभं समुदय
मष्टादशाभं विनाश संज्ञं त्रयो
विंशं नाड्यः स्युः पंचविंशमान
स मेवं नरः षड्भ्रः स्यात् नव
नक्षत्रो नृपतिः स्वजाति देश भि
षेकर्क्षैः इति ज्योतिस्तत्वं ॥ नवनी
स्त्री नवनीतं यथा अहो हैयंगवीना नो
नवनीता परंमुदा लड्डुकान्नो शर्कराणां
खस्तिका ॥

नां च यतनः इति ब्रह्मवैवर्त्तपुरा
णे श्रीकृष्णजन्मखण्डे ४५ अध्यायः
नवनीतं क्ली गव्यविशेषः माख
न इति नैनी इति च भाषा तत्पर्य्यायः
नवोद्धृतं २ इत्यमरः सरजं ३ मंथ
जं ४ हैयंगवीनं ५ इति रत्नमा
ला दधिजं ६ सारं ७ हैयंगवीनकं
८ अस्य सामान्य गुणाः शीतत्वं
वर्ण बलावहत्वं सुमधुरत्वं
वृष्यत्वं संग्राहकत्वं कफ रुचि
कारकत्वं वात सर्वांग शूलका
श श्रम नाशित्वं सुखकरत्वं ॥
कांति पुष्टि प्रदत्वं चक्षुष्यत्वं स
र्वदोषापहत्वं च तक्रोद्भव गव्यमा
हिषनवनीत गुणाः बालवृद्धा
नां प्रशस्तत्वं बलकारित्वं वातव
र्द्धनत्वं च माहिषनवनीत गुणाः
कषायत्वं मधुरत्वं शीतत्वं वृष्य
त्वं बल्यत्वं ग्राहित्वं पित्तघ्नत्वं
दहत्वं च छाग नवनीत गुणाः
क्षयकाश नेत्रामय कफनाशि
त्वं बल्यत्वं दीपनत्वं च ॥ आवि
कनवनीत गुणाः हिमत्वं लघुत्वं
योनिशूलेकफवातगुदशूले हित
त्वं च पैडकनवनीत ॥ ।

गुणाः क्लिष्टगंधत्वं शीतलत्वं
मेधा नाशित्वं गुरुत्वं पुष्टिस्थौल्य
कारित्वं मंदाग्नि दीपनत्वं च ॥
हस्तिनी नवनीत गुणाः कषाय
त्वं शीतलत्वं लघुत्वं तिक्तत्वं वि
ष्टंभित्वं जंतुपित्तकफ कृमि नाशि
त्वं च अश्वी नवनीत गुणाः ।
कषायत्वं कफ वात नाशित्वं च ।
उष्णत्वं कटुत्वं उस्त्रत्वं ईषद्दा
हापहारकत्वं च ॥ गर्द्दभीनवनी
तगुणाः कषायत्वं कफवातना
शित्वं बल्यत्वं दीपनत्वं पाकेल
घुत्वं मूत्रदोष नाशित्वं च ॥
औष्ट्र नवनीत गुणाः पाके शीत
लत्वं व्रण क्रिमि कफास्त्रवात
नाशित्वं च नारी नवनीत गुणाः ।
रुच्यत्वं पाके लघुत्वं चक्षुष्यत्वं ।
दीपनत्वं सर्वरोग विषनाशित्वं
च अथ साधारण नवनीत गुणाः
शीतं रुच्यं नवोद्धृतं सुमधुरं वृष्यं ।
च वातापहे कासघ्नं क्रिमि नाशनं
कफहरं संग्राहि शूलापहं बल्यं ।
पुष्टिवरं तृषार्त्ति शमनं संताप वि
च्छेदनं चक्षुष्यमहार्त्तिनिर्वपणक
रं दद्युघ्नं च पित्तजित् ॥ प का ।

हास्थुषितं प्रोक्तं मूत्रनेत्रगदं गं
धं अरुच्यं सर्वरोगाढ्यं दधिजं
तद्धितं स्मृतं इति राजनिर्घण्टः
अपिच गव्यनवनीत गुणाः ॥
नवनीतं हितं गव्यं वृष्यं वर्णबला
ग्निकृत् संग्राहि वातपित्तासृक्
क्षयार्शोर्दित कास हृत् तद्धितं
बालके वृद्धे विशेषादमृतं शिशोः
माहिषनवनीत गुणाः नवनीतं
माहिष्यास्तु वातश्लेष्मकरं गुरु दा
हपित्तश्रमहरं मेदः शुक्र विव
र्द्धनं अथ पयसो नवनीतस्य गु
णाः उद्धृतं नवनीतं तु चक्षु
ष्यं रक्तपित्त नुत् वृष्यं बल्यमति
स्निग्धं मधुरं ग्राहि शीतलं ॥
अथ सद्यः समुद्धृत नवनीत गुणाः
नवनीतं च सद्यस्कं स्वादु ग्राहि हि
मं लघु मेध्यं किंचित् कषायाम्ल
मीषत्तक्रांश संक्रमात् ॥ अथ
चिरंतन नवनीत गुणाः सक्षारक
टुकाम्लत्वाच्छर्दिः अर्शः कुष्ठकारकं
श्लेष्मलं गुरु मेदस्यं नवनीतं चिरं
तनं इति भावप्रकाशः नवनीत
नवं वृष्यं ग्राहि वर्ण बलाग्निकृत्
चक्षुष्यं हृद्यं स्निग्धं ग्रहणप्रशो

विकारनुत् दीरोत्थितं हिमंया
हि रक्तपित्तादि रोगनुत् इति
राजवल्लभः ॥
नवनीतकं क्ली घृतं इति राज
निर्घण्टः ॥
नवनीतधेनुः स्त्री दानार्थकृत
नवनीतमय धेनु विशेषः यथा।
नवनीतमयीं धेनुं शृणु राजन् प्र
यत्नतः यां कृत्वा सर्व पापेभ्यो मु
च्यतेनात्रसंशयः गोमयेनानुलि
प्तायां भूमौ गोचर्म्म मात्रतः ॥
कृष्णचर्म्म मृगस्यैवतस्योपरि च
धारयेत् कुंभंतु नवनीतस्य प्रस्थ
मात्रस्य धारयेत् वत्सं चतुर्थ।
भागस्य तस्यातु नरतोन्यसेत् ॥
कृत्वा विधानेन च राजसिंह सुव
र्णशृंगी समुखीच कार्य्या नेत्रे
च तस्या मणिमौक्तिकैस्तु कृत्वा
तथास्यन्तु गुडेनजिह्वां ओष्ठौच
पुष्पैश्च फलैश्च दंताः प्रकल्प्य
सास्नांच सितैश्च सूत्रैः नवनीतस्त
नीराजन्निक्षु पादांप्रकल्पयेत् ता
म्रपृष्ठीं कांस्यदोहां दर्भरोमकृतनकु
वीं स्वर्णशृंगीं रौप्यखुरां पंचरत्न
समन्वितां चतुर्भिस्तिलपात्रैस्तु
संयुतां सर्वतो दिशः प्राच्छाद्यव
स्त्र युग्मेन गंध पुष्पैरलंकृतं।
दिव्य दीपांश्च प्रज्वाल्य ब्राह्मणा
य निवेदयेत् वेद वेदांग विदुषे
आहिताग्निं जितात्मवान् मंत्रां
स्तु पठत मत्याः सर्व धेनुषु ये स्मृताः
पुरा देवासुरैः सर्वैः सागरस्यतु
मंथने उत्पन्नं दिव्यममृतं नव
नीतमिदं शुभं आप्यायनं च भू
तानां नवनीतनमोस्तुते एवमु
च्चार्य्य तां दद्याद्ब्राह्मणाय कुटुंबि
ने धेनुंच दत्वा सुमुदा सोपधानां
नयेद्गृहं विप्रवर्य्यस्य भूयः हवि
ष्यमेवसरसंचोपभुक्तानिशेहितं
धेनुद स्त्रीणि विप्रः यः प्रयच्छ
ति तां धेनुं दीयमानां नरोत्तम।
सर्वपाप विनिर्मुक्तः शिवसा
युज्यतां व्रजेत् पितृभिः पूर्वजैः
सार्द्धं भविष्यद्भिश्च मानवः ॥
विष्णुलोकं व्रजेत्याशु यावदा
कृतसंप्लवं यश्चेदं शृणुयाद्भक्त्या
श्रावयेद्वापि मानवः सर्वपापवि
शुद्धात्मा विष्णुलोके महीयते इ
ति वराहपुराणं ॥
नवपावकः पु नवनाध्यापकः इति

इतिसिद्धान्तकौमुदी ॥
नवफलिका स्त्री नवं नवजातर
जोंगना इतिमेदिनी ॥
नवमः त्रि नवानां पूरणः नवन्नि
इत्यादि भाषा इति व्याकरणं ॥
नवमल्लिका स्त्री नवमालिका
इति शब्दरत्नावली ॥
नवमालिका स्त्री नवमल्लिका
पुष्पं नेयालि इतिमेउयार इति
च भाषा तत्पर्य्यायः अतिमोदा २
शैष्मी ३ ग्रीष्मोद्भवा ४ सप्तला ५
सुकुमारी ६ सुरभिः ७ शुचिमल्लि
का ८ सुगंधा ९ शिखरिणी १० न
वाली ११ इति राजनिर्घण्टः भद्र
वल्ली १२ देवलता १३ इति शब्दचंद्रि
का गंधनिलया १४ मालिका १५ न
वमल्लिका १६ इति शब्दरत्नावली
तस्या गुणाः अतिशैत्यत्वं सुरभि
त्वं सर्वरोगहरत्वंच इतिराजनि
र्घण्टः ॥ नवमी स्त्री तिथिविशे
षः सा चंद्रस्य नवम कला क्रि
या रूपा शुक्लपक्षे ९ कृष्णप
क्षे २४ पंजिकाकार संकेत न प
नदंक बोधिता अस्य नवमी व्य।
वस्था साचाष्टमी युता ग्राह्या ॥
पुत्रमान् भविष्ये मासैश्चतुर्भिर्ये
न पूर्णं विधिना पूज्य चंडिकां।
तत् फलं लभते वीर नवम्यांका
र्त्तिकस्य च तथा भविष्ये मा
घे मासि तु या शुक्ला नवमी लो
कपूजिता महानंदेति सा प्रोक्ता
सदानंदकरी नृणां स्नानं दानं ज
पो होमो देवार्च्चनमुपोषणं सर्वं
तदक्षयं प्रोक्तं यदस्यां क्रियते
नरैः तथा कालिकापुराणं ॥
नवम्यां नववर्षाणि राजन् पिष्ट
शनोभवेत् तस्य तुष्टा भवेद्गौरी
सर्वकाम प्रदा शुभा अद्येत्यादि
नवम्यां तिथ्यावारभ्य नववर्षाणि
यावत्प्रति शुक्लनवम्यां पिष्ट
करभोजननिवृत्ति व्रतमिति सं
कल्पे विशेषः सर्वकाम प्रद
गौरी तोषः फलं इति तिथितत्वं
श्रीरामनवमी व्यवस्था तत्
शाब्दे द्रष्टव्या इयंदुर्गातिथिः
तत्र तस्याः पूजाकर्त्तव्या यथा
ब्रह्मोवाच इयं देवी वरारोहा या
ते शैलं हिमाचलं तत्र पूर्वं सुराः
सर्वे गत्वानंदं तस्याश्चिरं नवम्यां
च महाश्च्या इयं देवी समाधि
ना वरदा सर्व लोकानां भवि

ष्यातिनसंशयः नवम्यांपश्चपिष्टा
शी भविष्यति हि मानवः नारीवा
तस्य संपन्नं भविष्यति मनोगतं
इति वराहपुराणे ॥
कार्त्तिक शुक्ल नवम्यांजगद्धात्री
पूजाप्रमाणियथा प्रपूजयेज्जगद्धा
त्री कार्त्तिके शुक्ल पक्षके दिनोद
येच मध्याह्ने सायाह्ने नवमे हनि
इति मायातंत्रे १२ पटलः ॥ कुम्भ
राशि गते चंद्रे नवम्यांकार्त्तिक
स्यच उषस्यहोदितोभानु दुर्गा
माराध्य यत्नवान् पुत्रासेयपध
नं लेभे लोक सादित्व मेव च
तांतिथिं प्राप्य मनुजः शानि ॥
भौमदिने यदि प्रपूजयेन्महा
दुर्गां धर्म कामार्थ मोक्षदां इति
कात्यायनीतंत्रे ९ पटलः ॥
कार्त्तिके शुक्ल पक्षे त त्रेतायाः
प्रथमेहनि त्रिसंध्यं पूजयेद्देवीं
दुर्गां सम्पत् प्रवृद्धये इत्युत्तर।
कामाख्यातंत्रे ११ पटलः ॥
अथ नवमी जात फलं विरो
ध कर्त्ता सुजनैः रगाम्यः प
रापकारार्थमतिः कुशीलः।
आचार हीनः कृपणः कठो
रः प्रसूति काले नवमी ॥

यदि स्यात् इतिकोष्ठीप्रदीपः ॥
नवयौवना स्त्री युवती तरुण्याद्यः
दिक्कारी २ इति हारावली तल्ल
नी ३ कहेली ४ इति शब्दमाला
नवरंग स्त्री काषस्य मरवाकुली
नानापंचवदानचतुर्ग्रहणात्मक
कुलविशेषः तद्यथा समाने प्रथ
मंदानंद्वितीयंच कनिष्ठके षडुभ्रा
तरि तृतीयंच मध्यश्रेष्ठे चतुर्थकं
तेडोजे पंचमंदानंकर्ष्यादेत द्विधा
ततः ग्रहणं जन्मनि समे कनि
ष्ठेच द्वितीयकं तृतीयं जन्मम ६
ध्यांशे तेडोजेपि चतुर्थकं नवरंग
मितिप्रोक्तं मुख्यानांहिमहागुणं
इतिकुलाचार्यकारिकानवर।
त्ने स्त्री नवप्रकारमणयः तद्यथा
मुक्ता माणिक्य वैडूर्य गोमेदान् व
ज्र विद्रुमौ पद्मरागं मरकतं नीलं
चेति यथा क्रमात् इतितंत्रसारः
नवग्रहदोषशान्त्यै धार्य्याणि न
वरत्नानि यथा वैडूर्य्यं धारयेत्
सूर्य्ये नीलंच प्रगलाच्छने ॥
अथवेनेयेपि माणिक्यं पद्मरागं
शशांकजे गुरौ मुक्ता भृगौ वज्रं
शनौ नीलं विड्डंधाः राहौ ॥

गोमेदकं धार्य्यं केतौ मरकतस्त
था इतिदीपिका विक्रमादित्य
राज सभास्थ नव संख्यकपंडि
ताः यथा धन्वंतरि क्षपणक का
मरसिंह शंकु वेताल भट्ट घट।
कर्पर कालिदासाः ख्यातोवरा
हमिहिरो नृपतेः सभायां रत्ना
निवै वररुचि र्नव विक्रमस्य इ
तिनवरत्नं ॥
नवरात्रं स्त्री आश्विनशुक्लप्रति
पदादि नवमी पर्य्यंत नव दिन।
कर्तव्य दुर्गा व्रत विशेषः तस्या
रंभः देवीपुराणे डामरतंत्रे च
देवीवचः अमायुक्ता न कर्तव्या
प्रतिपत् पूजने मम मुहूर्त्त मा
त्रा कर्तव्या द्वितीयादि गुणान्विताः
पूर्वविद्धा तथा शुक्ला भवेत् प्रति
पदाश्विनी नव रात्र व्रते तस्या न।
कार्य्य शुभमिच्छता अत्रोपवास
दिकमुक्तं हेमाद्रौ भविष्ये एवंच
विंध्यवासिन्यां नवरात्रोपवासतः
एकभक्तेन नक्तेन तथैवायाचिते
नच पूजनीया जनैर्देवी स्थाने स्था
ने पुरे पुरे स्नातैः संमुदितैर्हृष्टैः।

ब्राह्मणैः क्षत्रियै र्नृपैः वैश्यैः शू
द्रैर्भक्तियुक्तैर्म्लेच्छैरन्यैश्च मान
वैः मद्रनरनैः देवीपुराणेपि।
कन्या संस्थे रवौ शक्र शुक्ला मारभ्य
नंदिकां अयाची ह्यथ वैकाशी न
क्ताशी वाप्यवायुदः भूमौ शायीत
चामेश्च कुमारी भोजयेन्मुदा ॥
वस्त्रालंकारदानैश्च संतोष्याः प्र
तिवासरं वलिंच प्रत्यहं दद्याद्दे
वलेंमांसमाषवत् त्रिकालं पूजये
द्देवीं जप स्तोत्र परायणः ॥
स्कांदे मासिचाश्वयुजेशुक्ले नव
रात्रे विशेषतः संपूज्यनवदुर्गांच
नक्तंकुर्यात् समाहितः नवरात्रा
भिधंकर्मनक्तव्रतमिदंस्मृतं ति
थिह्रासे तिथिवृद्धौ नवरात्रमपा
र्थकं अष्टरात्रे न दोषोयं नवरात्र
तिथिक्षयः तत्रपूजाविधिः सा
च जयंतीमादिमंत्रेणनवरात्रे
णवा कार्य्या यथा संकल्पविधा
य घटं संस्थाप्य तत्र देवी मावाह्य
षोडशोपचारैः पूजयित्वा माष
भक्तवलिं कुष्माण्डादिवलिं वा नि
वेदयेत् ततः कुमारी पूजा तदु
क्तं हेमाद्रौ स्कांदे एकैका पू

मार्कण्डेयदेवीपुराणयो ९८ ॥

जयेत् कन्यामेकवृद्ध्या तथैवच
द्विगुणं त्रिगुणं वापि प्रत्येकं नव
कंतुवा तथा नवभिर्लभते भूमि
मैश्वर्यं द्विगुणेन तु एक वृद्ध्या ल
भेत् क्षेममेकैकेन श्रियं लभेत्
अथ कुमारी निर्णयः एक वर्षा
तथा कन्या पूजार्थं तां विवर्जये
त् गंध पुष्प फलादीनां प्रीति
स्तस्या न विद्यते तेन द्विवर्षमा
रभ्य दशवर्ष पर्यंतं कुमारिका
१ त्रिमूर्तिः २ कल्याणी ३ रोहिणी
४ काली ५ चंडिका ६ शांभवी ७ दुर्गा
८ सुभद्रेति ९ नवनामभिस्ताः पूज
नीयाः आसामावाहनमंत्रः यथा
मंत्राक्षरमयीं लक्ष्मीं मातृणां रू
पधारिणीं नवदुर्गात्मिकां साक्षा
त् कन्यामावाहयाम्यहं एव मभ्य
र्चनं कुर्यात् कुमारीणां प्रयत्नतः
कंचुकैश्चैव वस्त्रैश्च गंध पुष्पाक्ष
तादिभिः नाना विधै र्भक्ष्य भोज्यै
र्भोजयेत् पायसादिभिः तासां सा
ज्यत्व माहुः ग्रंथिस्फुटित शीर्णां।
गीरक्त पूज व्रणांकितां जात्यंधां के
करां काणीं कुरूपां तनुरोमशां॥
संत्यजेद्रोगिणीं कन्यां दासी।

गर्भसमुद्भवां तासां जातिविशेषे
फल विशेषो यथा ब्राह्मणी स
र्वकार्येषु च जयार्थे नृप वंश–
लाभार्थे वैश्य वंशोद्भवा सुतार्थे
शूद्रवंशजां दारुणे चांत्यजातां
तां पूजयेद्विधिना नरः अत्र वे
द चंडी पाठउक्तः रुद्रयामले।
एवं चतुर्वेद विदो विप्रान् सर्वा
न् प्रसादयेत् तेषां च वरणं का
र्यं विद पारायणाय वै तथा ए
कोनराभि वृद्ध्या तु नवमीयाव
देवहि चंडीपाठं जपेच्चैव जापये
द्वा विधानतः अत्राश्विनोः सुप्र
जन मुक्तं मदनरत्ने देवीपुराणे।
आश्वयुक् शुक्ल प्रतिपत् स्वाति
योगे शुभे दिने पूर्वं मुनैः अथवा ना
ममण्डमे श्रिय माहरत् तस्मात्सा
सैः नैरैस्तत्र पूज्योसौ आहृत्या सह
पूजनीयाश्च त्वरगा नवमी यावदे
वहि शांतिः स्वस्त्ययनं कार्यं त
था तेषां दिने दिने धान्यं भल्लातकं
कुष्ठं वचा सिद्धार्थकास्तथा एतैव
र्णेनसूत्रेणग्रथितैर्तेषां तु बंधयेत्
वाजीग्रीवायां वारणेः सौरैः शांकैर्म
त्रैः स वैसवैः वैश्वदेवैस्तथा ॥

ग्रैये होमः कार्यो दिने दिने तत्र
गज पूजापि कल्पतरौ ज्येष्ठा
योगे पुरा तत्र गजाश्चाष्टौ महा
बलाः पृथिवी मवहन् पूर्वं स
शैल वन काननां कुमुदैरावतौ
पद्मः पुष्पदंतोऽथ वामनः सुप्र
तीकोंजनो नील स्तस्मात्तास्तत्र पू
जयेत् अथ प्रतिपदादिषु विशे।
षो दुर्गाभक्तितरंगिण्यां भविष्ये
केश संस्कार द्रव्याणि प्रदद्यात्
प्रतिपद्दिने पट्टनेत्रं द्वितीयायां
केश संयम हेतवे दर्पणं च तृ
तीयायां सिंदूरालक्तकं तथा च
तुपर्कं चतुर्थ्यां तु तिलकं नेत्रांज
नं पंचम्यां अंगरागं च शक्त्याऽलं
करणानि च षष्ठ्यां बिल्व तरौ।
बोधं सायं संध्यासु कारयेत् स
प्तम्यां प्रातरानीय गृहमध्ये प्र
वेशयेत् उपोषणं तथाष्टम्यां।
मात्मशक्त्यानुपूजनं नवम्यामुग्र
चंडायाः पूजां कुर्याद्बलिं तथा
संपूज्य पोषणं कुर्यात् दश
म्यां शाबरोत्सवैः अनेन विधि
ना यस्तु देवीं प्रीणयते नरः स्कंद
मालयेद्देवी तं पुत्र धन कीर्तिभिः।

आश्विन शुक्ल पक्षे मूल नक्षत्रे।
सरस्वती स्थापनं यथोक्तं निर्णया
मृते देवीपुराणे मूलेषु स्थापनं
देव्याः पूर्वाषाढासु पूजनं उत्तरा
सु बलिं दद्यात् श्रवणेन विसर्जयेत्
रुद्रयामलेऽपि मूल ऋक्षे सुराधीश
पूजनीया सरस्वती पूजयेत् प्र
त्यहं देव यावद्वैष्णव मृक्षकं ना
ध्यापयेत्तु च लिखेन्नाधीयीत कदा
चन पुस्तके स्थापिते देवि विद्या
कामो द्विजोत्तमः स्त्रीणां च नवरा
त्रे तां दूलादि चर्वणं भवति तदुक्तं
व्रतहेमाद्रौ गारुडे गंधालंकार
तांबूल पुष्पमाल्यानुलेपनं उप
वासे न दुष्यंति दंतधावन मंजनं
एतत् समस्तेकोपवासविषयं॥
हेमाद्रौ आश्विनमासे चैत्रमासे व
ण दशरात्रव्रतमभिधाय अथवा
नवरात्र व्रत मभिधाय अथवा न
वरात्रं च सप्त पंच त्रिकं दिवा द्व
यं देवीपुराणे नवरात्र व्रतेः
शक्तस्त्रिरात्रं चैकरात्रकं व्रतेच
रति यो भक्तस्तस्मै दास्यामि वांछि
तं अथ नवरात्र पारणा निर्ण
यः सा च दशम्यां कार्या ॥

दशम्यां विशेषस्तु भार्गवार्च्चनदी
पिकायां भविष्ये। शमीपूजनं जग
न्नाथ भक्तानामभयंकरं अर्च्चयि
त्वा शमीं वृक्षं मर्च्चयेच्च ततः पुनः
शमीमंत्रः स्कान्दे हेमाद्रौ गोपथ
ब्राह्मणे अमंगलानां शमनीं शम
नीं दुष्कृतस्य च दुःस्वप्न नाशिनीं
धन्यां प्रपद्येहं शमीं शुभां तथा भ
विष्ये। शमी शमयते पापं श
मी शत्रु विनाशिनी॥ अर्ज्जुनस्य
धनुर्धारी रामस्य प्रियवादिनी॥
करिष्यमाणा या यात्रा यथाका
लं सुखं मया। तत्र निर्विघ्नकर्त्रीत्वं
भव श्रीरामपूजिते॥ ॥
अथ बलनीराजने कल्पतरौ॥
तत्र मंत्रः चतुरंगं बलं मह्यं नि
रनिष्टं व्रजत्विह सर्वत्र विजयो मे
स्तु त्वत्प्रसादात् सुरेश्वरि गौडनि
बंधे ज्योतिषे कृत्वा नीराजनं रा
जा बलहृष्टौ यथा क्रमं शोभ
ने खंजनं पश्येत् जल गोष्ठस्य
सन्निधौ इति निर्णयसिंधुः॥
नवरात्रिकं क्ली नवरात्रे यथा।
आश्विने शुक्लपक्षे तु कर्त्तव्यं नव
रात्रिकं प्रतिपदादि क्रमेणैव॥
यावच्च नवमी भवेत् इति भ
विष्योत्तरं॥
नववधूः स्त्री नवोढा नवीनाभा
र्या यथा असंभवद्घनरसा शता
लिगणसेविता करं न सहते रा
जन् भूमिर्नववधूरिव इति ज्योति
काव्यं नववध्वागमनदिनं यथा
अत्र अष्टमदशमद्वादशषष्ठवत्स
र्ये वर्षाणि निषिद्धानि मासा मा
र्गी फाल्गुन वैशाखा विहिताः
पक्षः शुक्लः विहित नक्षत्राणि
पुष्यस्वाती हस्ता धनिष्ठोत्तराषा
ढोत्तरफल्गुन्युत्तरभाद्रपदा रे
वती मृगशिरो रोहिणी पुनर्व्व
सु पूर्वाषाढाः वाराः वृहस्पति
बुध शुक्र सोमानां तिथयो यात्रा
प्रकरणोक्ताः अहस्पर्शवारवे
ला दिक्शूलादीन् परित्यज्यता
रा चंद्र शुद्धौ कालशुद्धौ च कार्य्यं
इति ज्योतिषं अपिच स्वाती मूल
पुनर्व्वसूत्तर करा श्विन्यनुराधाश्वि
नी रोहिण्यः श्रवणा द्विरागमे विधे
या धनिष्ठा मघा भर्त्ते गोचरशोभने
दिन यतो काले पुनःशोभने कुंभा।
जालि रवौ शुभे शुभतिथ्यौ वा।

रादि यात्रादिने वैशाखे मार्गशी
र्षे हि फाल्गुने त्रि शुभेरवौ नव
वध्वा गमं कुर्य्यादन्यमासे विवर्ज्ज
येत् इति मथुरेश चक्रवर्त्तिकृत
सारसंग्रहः॥
नववरिका स्त्री नवोढा इति हारा
वली॥
नववल्लभं क्ली दाहागुरु इति रा
जनिर्घण्टः नवीनप्रिये त्रि॥
नववस्त्रं क्ली नवीनवसनं नूत
नकापड इति भाषा तत्पर्य्यायः
अनाहतं २ आहतं ३ अहतं ४ तं
त्रकं ५ निष्प्रवाणि ६। इतिशब्दर
त्नावली नवाम्बरं ७ इत्यमरः॥
अथ नववस्त्र परिधान दिनं तत्र
वाराः बुध वृहस्पति शुक्राणां।
नक्षत्राणि रोहिणी मृगशिरो म
घानुराधा धनिष्ठा पुष्य विशाखा
हस्ता चित्रोत्तरफल्गुन्युत्तराषाढो
त्तरभाद्रपदाश्विनी स्वाती पुनर्वसु
रेवत्यः धनिष्ठा रोहिणी हस्ता
विशाखा चोत्तरासु च ज्येष्ठा पुन
र्वसु स्वाती चित्राश्विनी च रेवती।
इति सारसंग्रहः अपिच धाता
नुराध वसु पुष्य विशाख हस्ता वि
त्रोत्तराश्वि पवनादितिरेवतीषु।
जन्मर्क्षजीव बुधशुक्रदिनोत्सव
वादौ धार्य्यं नववसनमीश्वर वि
प्र तुष्टौ शीर्णं रवौ सततमम्बु
भि रार्द्रमिंदौ भौमे शुचं बुधदिने
च भवेद्धनाय ज्ञानाय मंत्रिणि भृ
गौ प्रियसंगमाय मंदे मरायचन
वांवरधारणं स्यात् इति सनयप्र
दीपः नवशायकः पुं नवधाभा
पादिजातिविशेषः नवशाक इति
भाषा यथा गोप माली तथा तै
ली तंत्री मोदक वारजी कुलालः
कर्म्मकारश्च नापितो नवशायकाः
इति पराशरसंहिता॥
नवसूतिका स्त्री धेनुः इत्यमरः।
नूतन प्रसवा या च॥
नवांशः पुं मेषादिद्वादशलग्नानां
नवभागः यथा चराणां स त्रिको
णानां तत्राद्या नवांशकाः इति
दीपिका मेषकेशरि धनुषां मेषा
द्यास्तु नवांशकाः वृषकन्याम
गाणां च मकरादि नवांशकाः॥
तुला मिथुन कुंभानां तुलाद्याः
समुदाहृताः कर्किवृश्चिक मीना
नां कर्कटाद्या नवांशकाः स्व

नवांशास्तु राशीनां वर्गोत्तम इति
स्मृतः इति ज्योतिस्तत्त्वं ॥
नवांशा स्त्री कर्कटशृङ्गी इति रा
जनिर्घण्टः पाचनविशेषे स्त्री
यथा विष्णानन्दनाद भूनिम्बैः पंचमू
ली समन्वितैः कृतः कषायो हन्त्या
शु वातपित्तोद्भवं ज्वरं इति वैद्यकं
नवान्नं क्ली नूतनान्नं तन्निमित्त
श्राद्धं यथा वराह उवाच अकृत्वा
यो नवान्नानि मम कर्म परायणः
भुंजंति ये नवान्नानि पैः शाकानि
केन हू नाहं लोभेन वेक्ष्यामि ।
पुन र्भोगेन संदरि अवश्य मेव
कर्त्तव्यं मम कर्म परायणैः ततो
भागवतो भूत्वा नवान्नं यो न का
रयेत् पितर स्तस्य नाश्नंति वर्षा
णि दश पंच च अदत्वा यस्तु भुंजी
त नवान्नानि कथंचन न तस्य ध
र्म्मो विद्येत एव मेतन्न संशयः अ
स्यान्नं ते प्रवक्ष्यामि येन तत्र प्रमुच्य
ते प्रायश्चित्तं महाभागे मम भक्त
सुखावहं उपवासं त्रिरात्रं तु त
त एकेन वा पुनः आकाश शय
ने कृत्वा च तथैव हि निष्पद्यति प
वेन च विधि कृत्वा उदिते च दिवाकरे
पंचगव्यं ततः पीत्वा शीघ्रं मुच्यते
किल्बिषात् य एतेन विधानेन
प्रायश्चित्तं समाचरेत् सर्वसंगान्
परित्यज्य मम लोकाय गच्छति
इति नवान्नभक्षणापराध प्रायश्चि
त्तं इति वराहपुराणं ॥
तस्यानिषिद्धदिनं यथा सूर्येचैव
विशाखाये स्वर तिथौ पापे त्रि ज
न्मान्विते नंदामंद महीज काव्य
दिवसे पौषमध्ये कार्त्तिके मेषु
शाहि शिवेषु विस्र पायने कृत्ते
प्राशिनकूमे श्राद्धं भोजनकं न
वान्नविहितं पुत्रार्थ नाशप्रदं सूर्ये
चैव विशाखगे मार्गशीर्षस्य विंश
ति दशाधिक प्रथमदिन त्रयाव
स्थिते सूर्य्ये स्वरतिथौ त्रयोदशपं
पापे पंचम तारा त्रये उग्रः पूर्वा
त्रय मघा भरण्यः अहि रश्लेषा
शिव आर्द्रा ज्येष्ठा शेषार्द्धरोसूर्य
युगेनेष्वा निशान्तके नवान्नं भोज
नेश्राद्धं जन्मचंद्रे तिथौ न च अ
श्लेषा कृत्तिका ज्येष्ठा मूलाजपद
केषु च भृगु भौमदिने रिक्त ति
थौ नाद्यान्न भोदनं तस्य विधिर्य
था आश्रीयाद्दधि संयुक्तं नवं

विप्राभिमन्त्रितं दीपिकायां । भे
षु ग्राहिशिवान्येषु विभौम शनि
वासरे अन्नप्राशनवत् कुर्यान्नवा
न्नफलभक्षणं अथिकेन हस्तास्वा
ति पुनर्वसु मृगशिरः पुष्यानुरा
धा तथा मूलमघा श्रवणेच रेव
ति धने चित्रा नले वारुणे ब्राह्मे
शाक्र विशाख याम्य नरेग सौम्येन्द्र
जीवाहके चंद्रे शोभन तारके च
शुभदं श्राद्धं नवान्नैः कृतं भोज
राजः त्वाष्ट्रा विष्णु बृहस्पती शशा
धरो मार्त्तण्ड पौष्णादिती मैत्रे चैव
विशाख वायु धनभे मूलाश्वि व
ह्नौ तथा शक्रे वारुणा कृत्तके शुभ
दिने श्राद्धं नवंशस्यं तें नंदा भार्गव
भूमिजेषु नभवेच्छाद्धं नवान्नोद्भवं
इति ज्योतिस्तत्त्वं आश्विनाधिका
रे शुक्लपक्षे नवं धान्यं ज्ञात्वा पक्वं
सुशोभनं गच्छेत् देवी विधाने
न गीत वाद्य पुरःसरः इत्यादि
ना वस्लपुराणेन श्राद्धविधाना
त् अपिच पौषहसंतयोः केचि
न्नवयस्तं प्रवदन्ते धान्यपाक वशा
दन्यपणमाके वनितः स्मृतः इति
मलमासतत्त्वं ॥
नवाम्बरं क्ली नूतनवस्त्र इत्यमरः
नवार्चिः पुं मंगलग्रहः इति त्रि
काण्डशेषः नवशिखा च ॥
नवाहः पुं नवदिनं प्रतिपत्तिथिः
इति विश्वः ॥
नविका स्त्री नवशाहयुक्ता नवंका
यति इति व्युत्पत्ति सिद्धा इति ।
स्वीत्यमकरणोड्गीदासः ॥
नवीनं त्रि नूतनं इत्यमरः ॥
नवोढा स्त्री नूतनविवाहिता त
त्पर्यायः वधूः २ जनी ३ इति ज
टाधरः नववरिका ४ दिक्करी ५
नवयौवना ६ इति हारावली ॥
मुग्धानायिकाभेदः तस्या लक्ष
णं यथा लज्जाभक्त पराधीन रति
र्नवोढा तस्या उदाहरणं यथा ॥
वल्गामीलापार्श्वमाव मनुमुखं
नैव रूच्यते पुनाना मूर्द्धानं न
प्रतिवदनं चुम्बनविधौ हृदि न्य
स्तहस्तालियनिगमनारोपितमना
नवोढा वोढारं रमयति च संतो
पयति च इति रसमंजरी ॥
नवोद्धृतं क्ली नवनीतं इत्यमरः ॥
नूतनाश्रिते त्रि ॥
नव्यं त्रि नूतनं इत्यमरः ॥

नव्यः पुं रक्तपुनर्नवा इति राज
निर्घण्टः स्त्रीति एल स्त्रैनोभा
वे अल्ल नव ग्राह्यान् स्वार्थे येनि
ष्पन्नः नशाकः पुं काकभेदः इ
त्युणादिकोषः ॥
निशाता त्रि नाशाश्रयः इति
नशधातोः कर्त्तरि तृण निष्पन्नः
नश्यत्प्रसूतिका स्त्री मृतवत्
सा तत्पर्यायः नेष्टः २ मृतपुत्रि
का ३ इति हेमचन्द्रः ॥
नश्वरः त्रि नाशप्रतियोगी ध्वंस
योग्यः इति नश धातोः कर्म्मवि
वरप्रत्ययनिष्पन्नः ॥
नष्टः त्रि अदर्शनविशिष्टः तत्प
र्य्यायः तिरोहितः २ इत्यमरः ॥
नाशाश्रयः यथा योगो नष्टः प
रंतप इति श्रीभगवद्गीता ना
शोक्ती ॥
नष्टचन्द्रः पुं सौरभाद्रस्याभयप।
क्षे चतुर्थ्यामुदितचन्द्रः यथा न
ष्टचन्द्रो न द्रष्टव्यो भाद्रे मासि सिता
सिते चतुर्थ्यामुदितोऽमुष्टः प्रति
षिद्धो मनीषिभिः चन्द्रस्तारापह
रणं कलंकमति कुक्करं नोऽस्मद
दाति हे चन्द्र कामतो यदि प ॥

पश्यति अकामतो नरो दृष्ट्वा मंत्र
पूतं जलं पिबेत् तदा शुद्धो भवे
त् सद्यो निष्कलंकी महीतले
सिंहः प्रसेनमवधीत् सिंहो जा
म्बवता हतः सुकुमारक मा रो
दीस्तव ह्येष स्यमन्तकः इति मं
त्रेण पूतं च जलं साधुः पिबन्नुवं
पुरा तारा सुरेरोः पत्नी नवयौवन
संयुता रत्नभूषणभूषाढ्या र
त्नसद्मांवरा सती सुश्रोणी सु
स्मिता रम्या सुंदरी सुमनोहरा
प्रतीव कवरी रम्या मालती मा
ल्य भूषिता सिंदूर बिंदुना सार्द्धं
चारु चंदन बिंदुभिः कस्तूरी बिं
दुना सार्द्धं भाल मध्यस्थलोज्ज्वला
रत्नेन्द्र सारनिर्माण क्वणन्मंजीर
रंजिता सुवक्षोलोचनाश्यामा सु
चारुकज्ज्वलोज्ज्वला सुचारु चा
रु मुक्ताभ दंतपंक्ति मनोहरा र
त्न कुंडल युग्मेन चारुगण्ड
स्थलोज्ज्वला कामिनी सुन्दला
बाला गजेन्द्रमंदगामिनी सुकोमला
चंद्रमुखी कामाधारा च कामुकी स्वर्गे
मंदाकिनी तीरे स्नाता स्त्रियंबरा व
राध्यायंती गुरुपादं सा स्वगृहं गमने
न्मुखी दृष्ट्वा तस्याश्च ॥

सर्व्वांग मनंग बाण पीडितः भा
द्रे च चतुर्थ्यां चन्द्रश्च जहार चेतनं त्र
जन्माने तथैन संप्राप्य रथस्या
रसिको बली रथ मारोहयामा
स करे धृत्वा च तारकां कामास्त्र
तः कामिनीं तां समाश्लिष्य चुचुं
वसः शृंगारं कर्म्म मुधं तेन सद्वा।
च गुरुप्रिया तारकोवाच त्यज
मां त्यजमां चन्द्र सुरेश कुलपांस
क गुरुपत्नी ब्राह्मणी च पतिव्र
तपरायणा गुरुपत्नी संगमने
ब्रह्महत्याशतं लभेत् पुत्रस्त्वं।
तव माता हं धैर्य्यं कुरु सुरेश्वरः
पितृत्वां कृत्वा सद्गुरु र्भस्मी
भूतं करिष्यति गुरुपत्नी विप्र
पत्नी यदि सा च पतिव्रता ब्रह्म
हत्या सहस्रं च तस्याः संगमने
लभेत् पुत्राधिकस्त्वं शिष्यश्चापि
यामत्स्वामिनो भवान् स्वधर्म्मर
त पापिष्ठ मामेवमानं त्यज दा
स्यामि स्त्रीवधं नश्यं यदि मां सेय।
हीष्यसि विलंब्य तारावचनं ताव
संभोक्तुमुद्यतं शशाप तारको
पेन निष्कामा सा पतिव्रता राहु
ग्रस्तो च न ग्रस्तः पापग्रस्तो भ
वान् भव कलंकी यक्ष्मणा ग्रस्तो

भविष्यसि न संशयः चन्द्र मेवं त
दा तुर्णं कामदेवं शशाप सा ने
जस्विना केनचित्त्वं भस्मीभूतो भ
विष्यसि चन्द्रस्तारां गृहीत्वा च क्री
त्वा च रमणं वने क्रोडे निधाय प
ययौ रुदंती तां शुचिस्मितां निर्ज
ने निर्जने रम्य शैले शैले मनोहरे
तत्र दृष्ट्वा स सुरगुरु बलिगेहात्
समागतं प्रणम्य सर्वमुक्त्वा च चं
द्रस्त शरणं ययौ शुक्रस्तं तं बोधया
मास वचनं नीतियुक्तितः शुक्र उ
वाच शृणु वत्स प्रवक्ष्यामि गुरवे
देहि तारकां गुरुपत्नी मातृपरा
त्यज महद्वचनाद्धियो ॥ गुरुपापप्र
योपायं निहन्ति स्म महाफला स
तीनां गुरुपत्नीनां ग्रहणेन बलेन
च ब्रह्महत्या सहस्राणां पातकं
लभते जनः कुंभीपाके पच्यते च
यावद्वै ब्रह्मणः शतं ॥
बृहस्पतिश्च तेजस्वी तां भस्मीक
र्त्तुमीश्वरः न चकार कृपालुश्च तत्
प्रियशिष्येण हेतुना उत्थापत्नी
दृष्ट्वा स गुरारेमे सकाम नः तत
पतेः शापतोऽस्यैव परग्रस्ता
प्रिया सती पतिस्त्रिवस्त्रैर्ब्रह्मला
बोधयित्वा कार्विं विभुः ॥

समानीय निशानाथं तारका स
हितं ब्रज शंभोश्चरणांभोज
चकारच समर्पणं शंभुस्तत्प्रीति
युक्तश्चवासयामास वक्तसि दत्वा
तस्मै पादरेणुं निष्पापं चकार सः
दत्वा तन्मस्तके हस्तं कपालरभयं
ददौ क्षीरोदस्नापयित्वा च प्रायश्चि
त्तेन शंकरः चकार चंद्रं निष्पापं
ब्रह्मणा सहितः प्रभुवि योगेन चं
द्रं योगींद्रो हि खण्डं च चकार सः
दत्वार्द्धं ललाटे च सोप्यर्द्धं ब्रह्म
णः पुरः अतएव महादेवो बभू
व चंद्रशेखरः मृगांको
लज्जितस्तत्र कलंकी देवसंसदि ॥
लज्जायाच स्वयोगेन देहत्यागं चका
रसः तत्र शरीरं च क्षीरोदे ब्रह्मणा
च समर्पितं हरेराज्ञया कृपया ।
सुधा क्षीरोदधे स्तस्य अत्रे श्च तेज
लं तस्य पपात च जले ब्रज तस्मा
द्बभूव चंद्रश्च निष्पापो देवसंस
दि ब्रह्मा च भगवान् शंभुरभिषेकं
चकार तं उवाच च महादेवो
निर्भयं देवसंसदि महादेव
उवाच स्वस्थानं गच्छ पुत्र त्वं
गुरुस्त्रविषयं मुदा पश्चात् ।
स्वपुत्र शापेन यक्ष्मग्रस्तो भ
विष्यसि अर्थपतिवनाशणं
कार्तिमीशाप्रकोभुवि ममाशि
षा यक्ष्मणश्च प्रतिकारो भवि
ष्यति यस्माज्जाद्भवतत्थ्यात्वगु
रुपत्नी दत्ता हृता तस्मात्त्वमि
न्दिनेवत् स पापहर्षेणा युगेयुगे
मा भुंक्ष्व क्षीयते कर्म्मकल्पको
टिशतैरपि अवश्यमेव भोक्त
व्यं कृतं कर्म्म शुभाशुभं देहस्य
योगेन हे वत्स कर्मभोगो न नश्य
ति प्रायश्चित्तात्तस्य देहात्वस्त
मेव भविष्यति तारापहरणाद्व
त्सकलंकश्चंद्रमंडले मृगाङ्क
तं विलग्नं च भविष्यति युगेयुगे
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्म
खण्डे ८०८१ अध्यायः ॥
नष्टचेष्टता स्त्री प्रलयः इत्यमरः
शोकादिना परिस्पंदनाशो न
ष्टचेष्टता तत्र प्रलयः प्रलीयते
ऽनेन प्रलयः ली ङ. य ङो ञ्चिषि
अल् प्रलयः सात्विको भावः मूर्छे
त्यर्थः इति सर्वस्वं हर्ष शोकादि
भिरशेष चेष्टा नाशः प्रलय ।
इत्यर्थः इति भरतः ईहा ॥
मूर्च्छना च नष्टाग्निः पुं
यस्याग्निहोत्रिणः प्रमादादिना

कारणान्तरेण वा अग्निष्टो निर्वा
णः स्यात् सः तत्पर्यायः ।
वीरहा २ इत्यमरः ॥
नष्टाभिसृतं क्ली किंचित् प्रा
म चोर नीत द्रव्यं तत्पर्यायः
लोप्त्रं २ इति हारावली ॥
नष्टेन्दुकला स्त्री कुहूः इत्यमरः
नसा स्त्री नासिका इति त्रिका
ण्डशेषः ॥
नस्तः पु नासिका इति शब्दमा
ला नस्य क्ली इति रत्नमाला पं
चविधनस्यकर्म यथा प्रतिमर्षो
ऽवपीडश्च नस्यं प्रधमनं तथा शि
रो विरेचनं चैव नस्तकर्म तु पंच
धा ईषदुच्छ्वसनात्स्नेहो यावान् व
क्त्रं प्रपद्यते नस्तो निषिक्तं तं विद्या
त्प्रतिमर्षप्रमाणतः प्रतिमर्षश्च न
स्यार्थं करोति च न दोषभाक् शो
धनः स्तम्भनस्स्यादवपीडो द्विधा
मतः अवपीड्य दीयते यस्मादव
पीडस्ततः स्मृतः स्नेहार्थं शून्यशि
रसां ग्रीवा स्कंधोरसां तथा बला
र्थं दीयते स्नेहो नस्य शब्दोऽत्र वर्त्त
ते नस्यस्य स्नेहिकस्याद्देयोस्त
ष्टौ भविंदवः प्रत्येकशो नस्तक
यो
र्देणामिति विनिश्चयः इति वै
द्यकपरिभाषा शुक्तिश्च पाणि
शुक्तिश्च मात्रा स्मिस्त्वः प्रकीर्त्ति
ताः द्वात्रिंशद्विन्दवश्चात्र शुक्ति
रित्यभिधीयते द्विशुक्ती पाणि
शुक्तिश्च देयास्तु कुशले नरैः ।
तैले कफे च वाते च केवले पव
ने वसा दद्यात्तस्य सदा पित्ते स
र्पिर्मज्जा समारुते ध्मापने रेच
ने चूर्णं युञ्ज्यात्तेमुखवायुना
षडंगुल द्विमुखया नाड्या भेषजं
गर्भया सदि भूतिनरं दोषं च
णीत्वा दपकर्षति शिरो विरेचन
द्रव्यैः स्नेहे वी तैः प्रसाधितैः ।
शिरो विरेचनं दद्यात् रोगेषेते
षु बुद्धिमान् गौरवे शिरसः शू
ले जाड्ये स्यन्दे गलामये शोथ
गंड क्रिमि ग्रन्थि कुष्ठापस्मार पी
नसे तोय मद्य गर स्नेह पीताना
पानसिक्तो भुक्त भक्त शिरः
स्नातस्नातुकाम स्रुता सृजां
नवपीनस रोगार्त्त सूतिकाश्वा
स कासिना शुद्धानां दत्तवस्ती
नां तथा नार्त्तवे दुर्दिने अप्यत्रा
त्ययिकेष्याधौ नैषां नस्यं प्रयो

जयेत् न नस्यं स्नानसमाहे नाती
ताधीति वत्सरे नचोन द्वादशे
भूमः कवडे नोनपंचमे नश्मुद्धि
र्ष्णेनवमे नचातिक्रांत सप्तनौ
आजन्म मरणं शस्तं प्रतिमर्षस्त
वस्तिवत् इति सारकौमुदी ॥
नस्ता स्त्री नासाकृतं छिद्रं इ
ति नस्तितं शब्द टीकायां भरतः
नस्ताभेदनदाहाभ्यां कर्णदा १
हास्थिभेदनेः अतिदाहातिवा
हाभ्यां वधेचाद्रावर्णाचरेदिति
स्मृतिः नस्तितः पु नासानिहि
तरज्जवल्ली वहीदि नाक फोडा
वलद इति भाषा तत्पर्य्यायः
नस्योतः २ इत्यमरः ॥
नस्तोतः पु नस्तितः इत्यमर
टीकायां रमानाथः ॥
नस्यं क्ली नासिका देय चूर्णादि
तत्पर्य्यायः नस्तः १ नावनं २ इ
ति रत्नमाला वमनं रेचनं नस्यं
निरूहं आनुवासनं ज्ञेयं पंच
विधं कर्म्म मात्रातस्य प्रवक्ष्यते
इति वैद्यकपरिभाषा नासाया
हिते नस्यं वेयित च त्रि मय,
हे पु इति संक्षिप्तसारव्याकरणं

नस्या स्त्री नासिका यथा त्र
णांगंधवहा नासा नसा नस्या च
नासिका इति भरतधृतसाहसां
कः नस्योतः पु नस्तितः इत्यमरः
नहि अ निषेधः अभावः तत्प
र्य्यायः अ १ नो २ न ३ इत्यमरः
अन ४ अना ५ ना ६ इति भ
रतः ॥
नहुषः पु नागभेदः चंद्रवं
शीयराजभेदः इति मेदिनी
स च पुरूरवसो ज्येष्ठ पुत्रस्यायु
षः सुतः इति पुराणं ॥
नहुषाख्यं क्ली तगरपुष्पं इति
राजनिर्घण्टः ॥
नहुषात्मजः पु ययातिराजा
इति पुराणं ॥
नक्षत्रं क्ली मुक्ता इति राजनिर्घण्टः
तारा तत्पर्य्यायः ऋक्षं २ भं ३ तार
का ४ उडु ५ । इत्यमरः ॥
तारकं ६ इति शाश्वतः तारः
७ इति व्याडिः दाक्षायण्यः ।
तद्यथा अश्विनी १ भरणी २ कृ
त्तिका ३ रोहिणी ४ मृगशिरः ५
आर्द्रा ६ पुनर्वसुः ७ पुष्यः ८
अश्लेषा ९ मघा १० पूर्वफल्गुनी ११

उत्तरफल्गुनी १२ हस्ता १३ चित्रा १४
स्वातिः १५ विशाखा १६ अनुराधा
१७ ज्येष्ठा १८ मूला १९ पूर्वाषाढा २०
उत्तराषाढा २१ श्रवणा २२ धनिष्ठा
२३ शतभिषा २४ पूर्वभाद्रपदा २५
उत्तरभाद्रपदा २६ रेवती २७ इत्यम
रः ज्योतिषश्च एता अभिजिता।
सह अष्टाविंशति नक्षत्राणि भ
वंति आसां क्रमेणाधिदेवता य
था अश्वि १ यम २ दहन ३ कमलज
४ शशि ५ शूलभृत् ६ दिति ७ जीव
८ फणि ९ पितरः १० योन्य ११ र्य्य
म १२ दिनकृत् १३ त्वष्टृ १४ पवन १५
शक्राग्नि १६ मित्राश्च १७ शक्रो
१८ निर्ऋति १९ तोयं २० विश्ववि
रिंचौ २१ हरि २२ वसु २३ वरुणाः
२४ अजपदो २५ अहिर्बुध्न्यः २६ ।
पूषा २७ चेतीश्वरा भानां ॥
आसां गणा यथा उग्रः पूर्वम
घांतकाः ।११।२०।२५।१०।२।ध्रुव
गणस्त्वीणुत्तराणि स्वभं ।१३।२१
२६।४। स्त्रीनादित्यहरित्रयं चरगणः
१५।७।२२।२३।२४। पुष्याश्विहस्ता
८।१।१३। लघुः चित्रामित्रमृगांत्य
भं १४।१७।५। मृदुगणास्तीक्ष्णाःहि

हस्तेंद्र पुक् ९।६।१८। १९। मिश्रो
अग्निः स विशाखे भः ३।१६। मृ
भफलाः सर्वे स्वकृत्ये गणाः
अधोमुखनक्षत्राणि यथा अश्ले
ष ९ वह्नि ३ यम २ पित्र्य १० विशा
ख १६ युक्त पूर्वात्रये ।११।२०।२५।
शतभिषा २४ च नवाप्युक्तानि य
तान्यधोमुखगणानि शिवानि
खिलं विद्याद्यभूमिखनन एव
भूषितानि स्वनक्षत्राचतिनक्षत्रा
णां जन्मसम्पदादिकथनं यथा
जन्म सम्पद्विपत् क्षेमः प्रत्यरिः
साधको वधः मित्रं परम मि
त्रं च जन्मभात्तु पुनः पुनः स
र्वे मंगल कार्य्याणि त्रिषु जन्म
सु कारयेत् विवाह श्राद्ध भैषज्य
यात्रादीनाणि वर्जयेत् यात्रा
यां पथि वंधं कृषि विधौ सर्वार्थ
नाशो भवेत् भैषज्ये मरणं तथा
स्त्रियंतदाहा गृहारंभणे सौरे
रोगसमागमो वक्रविधः आद्ध्य
ना पात्ससथा वादबुद्धि विनाशो नेत्र
विभय प्रामो त्यसा जन्मभे नक्ष
त्रोत्पन्न रोगेषु भोगादि यथा
जन्माधाने निधन भे प्रमरो च वि
पत् करे यदि व्याधिः समुत्पन्नः ॥

क्लेशाय मरणायवा कृत्तिकासु
यदाव्याधिरुत्पन्नंच प्रतिपद्यते न
वरात्रं भवेत् पीडा त्रिरात्रं रोहिणी
षु च मृगशीर्षे पंचरात्रमार्द्रायां
मुच्यते सुभिः पुनर्वसौ तथापु
ष्ये सप्तरात्रं विधीयते नवरात्रं त
थाश्लेषे मासमेकं मघासु च द्वौ
द्वौ पूर्वफल्गुन्यामुत्तरासु त्रि
पंचकं हस्तेषु सप्तमे मोक्षः चि
त्रायामर्द्धमासकं मासद्वयं तथा
स्वात्यां विशाखे दिन विंशतिं
मैत्रे चैव दशाहानि ज्येष्ठायाम
र्द्धमासकं मूलेन जायते मोक्षः
पूर्वाषाढे त्रिपंचकं उत्तरा दि
न विंशत्या श्रवणे द्वौ च मास
कौ धनिष्ठाया मर्द्धमासं वारु ।
ण्यां च दशाहकं नव भाद्रपदे
मोक्षउत्तरासु त्रिपंचकं रेवत्यां
दिन विंशत्या चाहोरात्रं तथाश्वि
नी प्राणैर्विमुच्यते निरंतं भरण्यां
नात्र संशयः कौशिकेन सदा दि
ष्टा नक्षत्र व्याधि संभवाः नक्ष
त्रे प्रति कर्त्तव्यं नक्षत्र पथ्यमा
नता नक्षत्र चक्र भोग बोधकानि
चत्वारि नामाद्यक्षराणि यथा अ
उ इ प द ओ व वि वु धा वे वो क कि ५

कु घ ङ छ ६ के को हि ७ हु
हे हो डु ८ डि डु डे डो ९ ।
म मि मु मे १० मा टा टि टु ११ ।
टे टो प पि १२ पु ष ण ठ १३ ।
पे पो र रि १४ रु रे रो त १५ ।
ति तु ते तो १६ न नि नु ने १७ ।
नो य यि यु १८ ये यो भ भि १९ ॥
भु ध फ ढ २० भे भो ज जि २१ ।
जु जे जो खि ० अभिजित् । खि
खु खे खो २२ ग गि गु गे २३ गो
सा सि सु २४ से सो द दि २५ दु
थ झ ञ २६ दे दो च चि २७ चु चे
चो ल १ लि लु ले लो २ अ ल
शुक्लाख्या कार पुरुषेन ज्ञेयः । कृ
ष्णेन दीर्घो ज्ञेयः । तालव्यशाका
रेण दंत्य सकारो ज्ञेयः इति ज्यो
तिस्तत्वे ॥ नक्षत्रकांतिविस्तारः
पुं ध्रुवक याववालः इति राज
निर्घण्टः ॥ नक्षत्रचक्र स्त्री
मंत्रयन्त्रशास्त्रे षट्चक्रान्तर्ग
त चक्र विशेषः तथाच बृहन्नी
कमे उत्तरादृक्षिणायां त रेखा ।
ऊर्ध्वाधस्तनद्वयी दश रेखाः पश्चि
माग्राः कर्त्तव्या वीरवन्दिते ॥
अकारादि क्षकारान्तान् हि चंद्र ।

वह्नि दस्रान् भूमींदु वेद चंद्रा
श्व अश्लेषान्ते खगोत्रिये द्विभू
नेत्र नेत्र युगर्मारूयेंदु नेत्राग्नि चंद्र
कान् मघादि ज्येष्ठ पर्यन्ते द्विती
यं नवतारकं वह्नि भूमींदु चंद्रा
ब्धयुगमेंदु नेत्र वह्निकान् वेदन
भेदिता वर्णा देवसंघागताः क्र
मात् त्रिवेधे पूर्वोत्तरा त्रयं चैव
भरण्यार्द्रा च रोहिणी इमानि
मानुषाण्याहुर्नक्षत्राणि मनीषि
णः ज्येष्ठा शतभिषा मूलाधनि
ष्ठाश्लेष कृत्तिकाः चित्रा मघा वि
शाखाः स्युस्ताराराक्षसदेवताः
अश्विनी रेवती पुष्यः स्वाती हस्तः
पुनर्वसुः अनुराधा मृगशिरः श्र
वणा देवतारकाः जन्मस्वजातौ
परमा प्रीति र्मध्यमा भिन्नजाति
षु रक्षो मानुषयो र्नाशो वैरं दान
व देवयोः गणपवादमाह गवा
दतत्त्वे प्रणव स्मृत्वा माया व्योम
व्यासी षड्दलः मासाद्यो वकुरपी च
सप्तसाधारणाः स्मृताः शारदायां
जन्म संपत् विपत् क्षेमः प्रत्यरिः सा
धको वधः मित्रं परम मित्रं च जन्मा
दीनि पुनः पुनः जन्मत्रिपंचसप्तानि
वर्ज्ज

नीयानि नक्षत्राणि तथाच राघवभ
ट्टः रसाष्ट नवभद्राणि युगयुग्म
गतान्यपि इतराणि न भद्राणि
नक्षत्राणि स्वनक्षत्रादेव नक्षत्रं
गणनीयं नक्षत्राने स्वनाम्नाद्यक्षर
संबंधि नक्षत्राद्गणनीयं तथाच
पादद्विपेण गणयेत् साधका
द्यक्षरात् सुधीः इति तंत्रसारः ॥
नक्षत्रनेमिः पुं विष्णुः यथा नक्ष
त्रनेमिर्नक्षत्री क्षमः क्षामः समीह
नः इति विष्णुसहस्रनाम चंद्रः
ध्रुवः रेवती स्त्री इति मेदिनी नक्ष
त्रपः पुं उडुपः चंद्रः नक्षत्रं पाती
ति व्युत्पत्त्या सिद्धः नक्षत्र
पुरुषः पुं व्रतविशेषः यथा
अथातो कथयिष्यामि नक्षत्र पु
रुषव्रतं नक्षत्रांगानि देवस्य या
नियाहीह नारद मूलर्क्षं चरणौ
विष्णोर्जंघे रोहिणी स्थिता द्वे
जानुनी तथाश्विन्यौ संस्थिते रूप
षाढिणः आषाढे द्वे तथा चोरू
ह्यस्य फल्गुनीद्वयं कटिस्थाः कृ
त्तिकाश्चैव वासुदेवस्य संस्थिताः
प्रोष्ठपद द्वयं पार्श्वं कृत्दिभ्यां रेव
ती संस्थिता उदरः संस्था त्वनुराधाश्च

विशा हृष्टसंस्थिता विशाखा भुज
योर्हस्तः करद्वयमुदाहृतं पुन
र्वसुरंगुल्यो नखाः सर्वेनथा।
श्लेषे ग्रीवा स्थितानथा ज्येष्ठा श्रवणः
कर्णयोः स्थितः मुखसंस्थस्तथा
पुष्यः स्वाति र्दन्ताः प्रकीर्त्तिताः हनू
द्वे वारुणश्चोक्तो नासापैत्र्यमुदाहृ
तं प्राजापत्यंवनेत्राभ्यां रूपधात्र्याः
प्रतिष्ठिते शिरोभोद्रस्तथाचैवन
क्षत्राणामिदं हरेः विधानं संप्रवक्ष्या
मि यथायोगेन नारद संपूजितो
हरिः कामान् विदधाति यथेप्सि
तान् चैत्रे मास्यसिताष्टम्यां यदा मू
लगतः शशी भगवंतं सहलक्ष्म्या
पूजयेद्व विधानतः नक्षत्र सप्ति
धौ दद्याद्विप्रेंद्राय च भोजनं जानुनी
चाश्विनी योगे पूजयेदथ भक्तितः
दोहदे च हविष्यान्नं पूर्ववद्विज
भोजने आषाढाभ्यां तथा द्वाभ्यां
ह्यूरू पूजयेद्बुधः सलिलं शि
शिरं तत्र दोहदे च प्रकीर्त्तितं।
फल्गुनी द्वितये गुह्यं पूजनीयं
विचक्षणैः दोहदेच पयोगव्यं
देयंच द्विज भोजने कृत्तिकासु
कटिः पूज्या सोपवासै र्जितेन्द्रियैः
देयंच दोहदे विप्राः सगंधिक
समोदकं पार्श्वे भाद्रपदायुग्मे
पूजयित्वा विधानतः गुडं सपा
लिकं दद्याद्दोहदे देव प्रीतिदं
द्वे ऊरू रेवती योगे दोहदे घृत
मोदकाः अनुराधासु जंघे च कुल
त्थांस्तत्र दोहदे श्रविष्ठायां तथा
पृष्ठं शालिभक्तंच दोहदे पुष्यस्
स्वे पूजयेत दोहदे घृतपायसं
स्वाति योगे च दशनान् दोहदे
तिलशष्कुली भुज युग्मं विशा
खासु दोहदे परमोदनं हस्ते ह
स्त्यौ तथा पूज्यौ यावकं दोहदे स्म
तं पुनर्वसावंगुलिश्च पटोलं त
त्र दोहदे दातव्यं केशव प्रीत्यै त्वा
श्लेषासु च भोजनं [illegible]भि
षायां वै पूजयेत्प्रयत्नतः प्रियं
गुरक्तशाल्यन्नं दोहदंच मधुद्विषः
मघासु नासिका पूज्या मधु दद्या
च्च भोजनं [illegible] नयने म
गमांसंच दोहदे चित्रा योगे लला
टंच दोहदे चारु भोजनं भरणीषु
शिरः पूज्यं चारु भक्तंच दोहदे।
सम्पूजनीया विद्वद्भिर्राज्ञीयोगे।
शिरोरुहाः विप्राग्रभो ॥ ।

जयेत्कृता दोहदेच गुडाद्रकं न
क्षत्र योगेष्वेवं संपूज्य जगतः
पतिं नक्तस्तद्दक्षिणां दद्यात् स्त्री
पुंसो श्चारु वाससि छत्रोपानह्यु
गं चैव सप्त धान्यानि कांचनं द्यु
तपात्रंच गां दोग्ध्रीं ब्राह्मणाय।
निवेदयेत् प्रति नक्षत्र योगेन
पूजनीया द्विजातयः नक्षत्रस्ना
यविधाय पृथग्दद्याच्च दक्षिणां
नक्षत्र पुरुषाख्येहि व्रतानां व्रतमु
त्तमं एवं विधानतो ब्रह्मन् नक्षत्रा
रोजनार्द्दनः पूजितो रूपधारीयै
लैः प्राप्ता च सकामिना पत्नमे।
वांछेपरमं पवित्रं धन्यं यशस्य
मुभ्रूपदायि नक्षत्रं पुंसः परमं
विधानं स्मरणषु पुण्यमिदं तीर्थया
त्रा इति वामनपुराणे ७० अध्यायः
नक्षत्रमाला स्त्री सप्तविंशतिमौ
क्तिकक्रृत हारः इत्यमरः नक्षत्र
श्रेणीच सप्तविंशति रूपा श्वैरूप
केरूप रूपकैः स्यान्नक्षत्रमाला।
स्यान्मुक्तावलिरिवोज्वला ॥ इति
संगीतदामोदरः। नक्षत्रेशः पुं चंद्रः
कर्पूरः इत्यमरः ॥
नाक्य नहि अभावः इत्यमरटी
कायांभरतः ॥
ना * पुं पुरुषः इत्यमरः ॥
नाकः पुं स्वर्गः इत्यमरः ॥
नाकनाथः पुं इंद्रः इति त्रिको
डशेषः ॥
नाकनायकः पुं इंद्रः यथा स
र्वतोऽप्यविपदं तरगाधं नाकना
यकनिकेतनमापाइतिनैषधे ५
सर्गः नाकनानायकपुरोहितः
पुं बृहस्पतिः यथा स्वायधर्म्म
तनय पुनस्थितो नाकनायकपु
रोहितःप्रभुः इति ज्योतिस्तत्वं
नाकी न पुं देवता इति हेमचंद्रः
नाकुः पुं वल्मीकः इत्यमरः ॥
मुनिविशेषः पर्वतः इति मे
दिनी ॥ नाकुलः पुं नकुल
पुत्रः इति सिद्धान्तकौमुदी न
कुलसंबन्धिनि त्रि नाकुली
स्त्री कुकुटीकंदः रास्ना चवि
का इति मेदिनी यवतिक्ता श्वे
तकंटकारी कंदविशेषः ना इ
इति ख्याता तत्पर्य्यायः सर्प
गंधा २ सुगंधा ३ रक्तपत्रिका ४
ईश्वरी ५ नागगंधा ६ अहिभुक् ७

सरसा ८ सर्पादनी ९ व्यालगं
धा १० अस्या गुणाः तिक्तत्वं कटु
त्वं उष्णत्वं त्रिदोषानेकविषना
शित्वंच इति राजनिर्घण्टः ॥
नागं क्ली रंगं सीसकं करण
विशेषः इति मेदिनी नागक
रणजातफलं यथा नागोद्भ
वो नागधनाभिलाषी वक्रोक्ति
जालो नितरां कुशीलः क्रोधा
ग्नि संतापित बंधुवर्गो भवेत्पु
मान् किल रंग भूमौ इति कोष्ठी
प्रदीपः वैद्यके रंगे सीसके च
पुं तयोः पाक हीनयोर्दोषा य
था पाक हीनौ नागवंगौ कुष्ठ
गुल्म रुजाकरौ मेहपाण्डुक
रौ वात कफ मस्त करौ पुनः
तयोर्मारणं यथा अश्वत्थचि
ञ्चा त्वक् चूर्णं चतुर्थांशेन निः
क्षिपेत् मृत्पात्रे विद्रुते नागे लो
हदर्व्या च चालयेत् यामैकेन भ
वेद्भस्म तत्तुल्यांच मनःशिला
कांजिकेन द्वयं पिष्ट्वा पचेद्गज
पुटेन च स्वांग शीतं पुनः पिष्ट्वा
शिलया कांजिकेन च पुनः पु
टेच्छरावाभ्यामेवं षड्भिः पुटैर्मृतिः

॥ नागः सिंदूरवर्णाभो म्रियते
सर्वकार्य्यकृत सतिक्त मधुरो
नागो मृतो भवति भस्मसात्
आयुःकीर्त्तिवीर्य्यवृद्धिं करोति से
वनात् सदा रोगान् हंति मृतो ना
गो वंगवद्गुण कारकं इति सु
खबोधः ॥
नागः पुं पन्नगः हस्ती क्रूराचा
री मेघः नागकेशरः पुन्नागः
नागदंतकः मुस्तकः देहानिल
प्रभेदः उत्तरपदस्थितेः श्रेष्ठः ॥
इति मेदिनी उद्गारे नाग इत्युक्तो
नील जीमूतसन्निभः इति सा
रदातिलकटीका ॥ ताम्बूली
देशभेदः इति नानार्थटीकायां
भरतः नगे गिरौ चंदनादि त
रौ वा भवः न गच्छतीति अगाः
नञ्गाः नागाः इति वा । तत्र क
र्कोट प्रभृति देवयोनि मनुष्या
कारः फणलांगुलयुक्तः इति भ
रतः तत्पर्य्यायः काद्रवेयः २ इम
मरः नागोत्पत्ति र्यथा सृजता
ब्रह्मणा सृष्टिं मरीचिः सृति कार
णं प्रथमं मनसा ध्यात स्तस्य ।
पुत्रस्तु कश्यपः तस्य दाक्षायणी

भार्य्या कद्रुर्नाम सुविस्मिता मारी
चो जनयामास तस्यां पुत्रान्महाब
लान् अनंतं वासुकिं चैव कंबलं
महाबलं कर्कोटकंच राजेंद्र
पद्मं चान्यं सरीसृपं महापद्मं त
था शंखं कुलिकं चापराजितं ।
एते कश्यपदायादाः प्रधानाः प
रिकीर्त्तिताः एतेषां तु प्रसूत्या तु
इदमापूरितं जगत् कुटिला हीन
कर्म्माणस्तीक्ष्णास्यास्तु विषोल्ब
णाः दृष्ट्वा संदृश्य मनुजान् भस्म
कुर्युः क्षणाद्ध्रुवं शङ्खगामी यथा
स्पर्शो मनुष्याणां नवाधिय अहन्य
हनि जायेत क्षयः परमदारुणः
आत्मनस्तु क्षयं दृष्ट्वा प्रजाः सर्व्वाः
समंततः जग्मुः शरण्यं शरणं प
रेन्तु परमेश्वरे इमं सेवार्थमूहि ।
एष प्रजाः सर्व्वा महीपते ऊचुः क
मलजं देवं पुराणं ब्रह्मसंज्ञितं ।
देवा ऊचुः देव देवेश लोका
नां प्रसूतिः परमेश्वर त्राहि नस्ती
क्ष्णदंष्ट्रेभ्यो भुजंगानां महात्मनां
अहन्यहनि ये देव पश्यंत्युरगा द
शा मनुष्यं मृगपूर्व्वं वा तत्सर्व्वं भ
स्मसाद्भवेत् त्वया सृष्टिः कृता देव
नीयते सा भुजंगमैः ॥ ।

एतज्ज्ञात्वा तु यद्युक्तं तत् कु
रु महामते ब्रह्मोवाच अहं र
क्षां विधास्यामि भवतीनां न सं
शयः ब्रजध्वं स्वानि धिष्ण्यानि
प्रजापालाः समाध्वसाः एवमु
क्ताः प्रजास्तेन ब्रह्मणा व्यक्तमू
र्त्तिना आगतास्तु प्रजास्तावत्ता
नाहूय भुजंगमान् शशाप पर
मक्रुद्धो वासुकि प्रमुखां स्तथा
ब्रह्मोवाच यतो मन्मभवान्नित्यं
क्षयं नयत मानुषान् भवान्तरे
तथास्मिन्मातुः शापात् सु
दारुणात् भविता निक्षयो घो
रो नूनं स्वायंभुवेऽन्तरे एवमुक्तास्तु
वेपंतो ब्रह्मणा भुजगोत्तमाः
निपत्य पादयोस्तस्य इदमूचु
र्वचस्तदा नागा ऊचुः भगवन्
कुटिला जातिरस्माकं भवता कृ
ता विषोल्बणत्वं क्रूरत्वं दृकु
शस्त्रत्वंच नस्त्वया सम्पादि
तं त्वया देव इदानीं शमयाच्युत
ब्रह्मोवाच यदिनाम मया ।
सृष्टा भवंतः कुटिलाशयाः ततः
किं मनुजान्नित्यं भक्षयध्वं गतव्य
थाः नागा ऊचुः मर्य्यादा कुरु देवे
श स्थानं चैव पृथक् पृथक् नागानां

वचनं श्रुत्वा देवो वचनमब्रवीत्
अहं करोमि वो नागाः समयं मनु
जैः सह तदेकमनसः सर्वे शृणु
ध्वं मम शासनं पाताले वितले चैव
सुतलाख्ये रसातलके दत्तैवै वस्तु
कामानां गृहं तत्र गमिष्यथ तत्र
भोगान् बहुविधान् भुंजध्वं मम
शासनात् तिष्ठध्वं सप्तमं यावद्
आस्तेते पुनः पुनः ततो वैवस्वत
स्यादौ काश्यपेयो भविष्यथ दाया
दाः सर्वदेवानां सुपर्णस्य च धीम
तः तदाप्रसृतिर्वः सर्वाभोद्यते
चित्रभानुना भवतां नैव दोषोऽयं
भविष्यति न संशयः ये वै क्रूरा
भोगिनो दुर्विनीतास्तेषामन्तो भ
विता नान्यथे तत्र काले प्राप्ते म
न्वयधं दशधं तथा परान् चाप
कृतो मनुष्यान् मंत्रौषधे गारुड
मण्डलैश्च वैद्यैर्हिंस्यमानवायेव
रंति तेषां भीते वर्त्तितव्यं न चान्य
थिं त्वं कार्यं चान्यथा वो विनाशः
इत्यीरिते ब्रह्मणा ते भुजंगा ज
ग्मुः स्थानं दानलाख्यं हि सर्वे
तस्युर्भोगान् भुंजमानाः समग्रा
न् रसातलेलीलया संस्थितास्ते
एवं शापं तेन लब्ध्वा प्रसादं च च
तर्म्मस्थानं ततः पाताल निलये
मुदितेनान्तरात्मना पतन् सर्वच
पंचम्यां तेषां जातं महात्मनां अत
स्तियं तिथिर्धन्या सर्वपापहरा शुभा
पतस्यां संयतो यस्तु अन्नेन परि
वर्जयेत् क्षीरेण स्नापयेन्नागान् ॥
तस्य यास्यंति मित्रतां इति वराह
पुराणे पषा शिव भूषणं प्रमा
णं यथा वासुक्याद्याश्चये सर्पा
यथा स्थानं च तेहरे भूषयांचक्रु
रुद्रस्य शिरोबाह्वादिषु ड्डतं इति
कालिका पुराणे शिव विवाहे ८
अध्यायः कंवलाश्वतरनागयोः
सरस्वत्या गान वरप्राप्ति यथा प
वंस्तना नदी देवी विसर्जिकास
रस्वती प्रसुवाच महात्मानं ना
ग मश्वतरे ततः सरस्वत्युवाच
वरं ते कंबल भ्रातः प्रयच्छाम्यु
रगाधिप तदुच्यतां प्रदास्यामि यत्ते
मनस्विवर्त्तते अश्वतर उवाच स
हायं देहि देवि त्वं पूर्वं कंबलमेव
मे समस्तस्वरसंबद्धमुभयोः सं
प्रयच्छ च सरस्वत्युवाच सप्तस्व
रा ग्रामरागाः सप्तपन्नगसत्तम
गीतकानि च सप्तैव तावन्त्यश्चा
पि मूर्च्छनाः तानाश्चै ॥

कोनपंचाशत्तथा ग्रामत्रयं च य
त् एतत् सर्वं भवान् गाता कम्बल
श्चैव ते सखा ज्ञास्यते मत्प्रसादेन
भुजंगेन्द्र परं तथा चतुर्विधपदं ता
लं त्रिःप्रकारः लयत्रयं यति।
त्रयं तथा तोद्यं मया दत्तं चतु
र्विधं एतद्भवान् मत्प्रसादात् प
न्नगेन्द्र परं च यत् अस्यान्तर्गत
मायत्तं स्वरव्यंजनयोश्च यत्।
तदशेषं मया दत्तं भवतः कंब
लस्य च यथा नान्यस्य भूर्लोके
पाताले वापि पन्नग प्रणेतारौ भ
वंतौ च सर्वस्यास्य भविष्यतः ॥
पाताले देवलोके च भूर्लोके चै
व पन्नगौ इत्युक्ता सा तदा देवी
सर्वजिह्वा सरस्वती जगामादृ
र्शनं सद्यो नागस्य कमलेक्षणा
इति मार्कण्डेय पुराणे ॥
कालिय वंश नाश हनने दोषा
यथा तदंड्याजातान् सर्पांश्च हं
ति यो मानवाधमः ब्रह्महत्या
समं पापं भविता तस्य निश्चितं म
स्याद पद्मविक्रे यः करोति दंड
भाउनं द्विगुणं ब्रह्महत्यायाभवि
तान् तस्य किल्बिषं लक्ष्मीर्यास्यति त
त्क्षेहात् शापं दत्त्वा सुदारुणं वं
शार्यर्यशसोहानिर्भविता तस्य
निश्चितं ध्रुवं वर्षशतं कालस्
त्रैयास्यति मद्गिरा इति ब्रह्मवैव
र्त्त पुराणे श्रीकृष्णजन्मखंडे ८९
अध्यायः वास्तुनागस्थितिर्यथा
वास्तु प्रमाणेन तु गात्रकेणवामेन
शेते खलु नित्यकाले त्रिभिस्त्रिमा
सैः परिहृत्य पार्श्वं ते वास्तुनागप्र
वदंति सिद्धाः भाद्रादिके वासव
दिक् शिराः स्यात् मार्गादिके
त्रिषु याम्यमूर्द्धा प्रत्यक् शिराः
स्यात् खलु फाल्गुनादौ ज्येष्ठा
दिके कौबेरशिराः स नागः मूर्द्धि
याते भवेन्मृत्युः पृष्ठस्यात् पुत्र
भार्ययोः जघने ऽर्थक्षयं विद्या
त् सर्वं सम्पत्तथोदरे पकेना
गोडु संपृष्ठो हे वेदीलाण पश्चि
मे त्रिशाले पूर्वतो हीनं कुर्या
द्वा सौम्य वर्जितं केचिद्दक्षिणभा
गे तु वदंत्येकं गृहं बुधाः नको
णेषु गृहं कुर्यात् प्राप्नोति नापिम
ध्यतः कोणे च धनहानिः स्या
दंते विद्भयं भवेत् मध्ये च स
र्वनाशः स्यात्तस्मादेतद्धि वर्जये
त् इति ज्योतिस्तत्त्व ॥

नागकन्दः पुं हस्तिकंदः इति
राजनिर्घण्टः ॥
नागकर्णः पुं रक्तैरंडः इति
राजनिर्घण्टः ॥
नागकिंजल्कं क्ली नागके
शरपुष्पं इति राजनिर्घण्टः
नागकुमारिका स्त्री गुडूची मं
जिष्ठा इति राजनिर्घण्टः ॥
नागकेशरः पुं नागकेसर वृ
क्षः इतिभरतः ॥
नागकेसरः पुं वृक्षविशेषः ना
गेश्वर इतिभाषा तत्पर्यायः
चाम्पेयः २ केसरः ३ कांचना
ह्वयः ४ इत्यमरः केसरः ५ ना
गकेशरः ६ इतिभरतः किंज
ल्कः ७ नागकिंजल्कः ८ नागी
यः ९ कांचनं १० सुवर्णं ११ हेमकिं
जल्कः १२ रुक्मं १३ हेम १४ पिं
जरः १५ फणिकेसरः १६ पन्नग
केसरः १७ तत्पुष्पगुणाः
अल्पोष्णत्वं लघुत्वं तिक्तत्वं क
फ वस्तिवातामयकंठ शीर्षरो
गनाशित्वंच इतिराजनिर्घण्टः
नागगंधा स्त्री नाकुलीकंदः इ
तिराजनिर्घण्टः नागगर्भं
क्ली सिंदूरं ॥ इतिराज ॥

निर्घण्टः ॥
नागच्छत्रा स्त्री नागदंती इति
राजनिर्घण्टः ॥
नागजं क्ली सिंदूरं इति राज
निर्घण्टः रंग इतिहेमचंद्रः ॥
नागजाते त्रि ॥
नागजिह्वा स्त्री शारिवा अन
न्तमूलं इतिरत्नमाला ॥
नागजिह्विका स्त्री मनःशिला
इत्यमरः ॥
नागजीवनं क्ली वंग इति हेम
चंद्रः ॥
नागदंतः पुं हस्तिदंतः गृहान्त
र्गतदारु दांतिया इति दाण्डा इ
तिवभाषा इति मेदिनी ॥
नागदन्तकः पुं नागदंतः भित्ति
दारु द्वयं तत्पर्यायः निर्यू
हः २ इति जटाधरः ॥
नागदंतिका स्त्री वृश्चिकाली
विछिटी इतिभाषा इतिरत्न
माला नागदंती स्त्री कुंभा वेश्या
स्त्री हस्तिनी हातिशुण्डा इतिभा
षा इतिमेदिनी शोषस्य पर्यायः
विशल्या २ सर्पपुष्पी ३ विषोष
धी ४ शुक्लपुष्पा ५ इभदंताक्षा ६
कालेश्री ७ ॥

कामहन्तिका ८ इतिरत्नमाला ॥
श्वेतपुष्पा ९ मधुपुष्पा १० विशो
धिनी ११ नागस्फोता १२ विशाल्या
ती १३ नागच्छत्रा १४ विचक्षणा
१५ सर्पपुष्पी १६ शुक्लपुष्पी १७
स्वाडुका १८ शतदंतिका १९ स्थि
पुष्पी २० सर्पदंती २१ नागिनी २२
अस्या गुणाः कटुत्वं तिक्तत्वं रक्त
त्वं वात कफ गुल्म शूलोदर व्या
धिकंठदोष नाशित्वच इति रा
जनिर्घण्टः ॥
नागदमनी स्त्री लक्ष्यपविशे
षः तत्पर्यायः जंतुः २ जीववती
३ हृक्का ४ रक्तपुष्पा ५ जीववी ६
मलघ्नी ७ उर्द्धषी ८ दुःसहा ९।
अस्या गुणाः तिक्तत्वं उष्णत्वं क
टुत्वं त्रिदोषोदराध्मानदोषनाशि
त्वं कोष्ठशोधन कारित्वंच इति
राजनिर्घण्टः ॥
नागदलोपमं क्ली पत्रषफलं इ
तिरत्नमाला ॥
नागडुः पुं समंतदुग्धा सिज इ
ति भाषा इतिशब्दचंद्रिका ॥
नागनिर्यूहः पुं नागदंतकः इ
ति जटाधरः ॥

नागपत्रा स्त्री नागदमनी इतिभा
वप्रकाशः ॥
नागपत्री स्त्री लक्ष्मणा इतिरा
जनिर्घण्टः ॥
नागपदः पुं षोडशरतिबंधान्तर्ग
तद्वितीयबंधः तस्य लक्षणं यथा
पादौ स्कंधे तथा हस्ते क्षिपेल्लिं
गं भगे लघु कामयेत् कामुको
नारीं बंधो नागपदोमतः इति
रतिमंजरी ॥
नागपाशः पुं स्त्रीणांकरणं व
रुणायुधः इतिमेदिनी साईढ
यावर्मनाम नागपाश इतिस्मृतः
वल्लग्रंथि मयो दृष्टा नागपाशो म
याविवेत्यागमः वेष्टितं नागपा
शेन भ्रुकुटी भीषणाननं मि
तिदेवीपुराणीयध्यानं ॥
नागपाशकः पुं रतिबंधविशे
षः तस्यालक्षणं यथा स्वजंघा
यहमध्यस्थां हस्ताभ्यां धारयेत्
कुचौ रमेन्निःशंकितःकामी बं
धोऽयं नागपाशकः इतिरति
मंजरी नागपुष्पः पुं पुन्नागवृक्षः
नागकेशरः चम्पकः इति मेदिनी
नागपुष्पफला स्त्री कुष्माण्डी इति

राजनिर्घण्टः ॥
नागपुष्पिका स्त्री स्वर्णयूथी इति
राजनिर्घण्टः ॥
नागपुष्पी स्त्री नागदमनी इति
भावप्रकाशः ॥
नागफलः पुं पटोलः इति रा
जनिर्घण्टः ॥
नागबंधुः पुं अश्वत्थवृक्षः इति
शब्दचंद्रिका नागानांबांधवश्च
नागबलः पुं भीमसेनः इति त्रि
काण्डशेषः हस्तिनस्यबलव
तित्रि नागबला स्त्री बलाप्रभेदः
गोरक्षचाउलिया इति गुलशक
री इतिककही इतिच भाषा त
त्पर्यायः गांगेरुकी २ कसा ३
रूक्षगवेधुका ४ इत्यमरः गांगे
रुकी ५ गोरक्षतण्डुला ६ इतिभ
रतः महोदनी ७ खरगंधा ८ चवः (?)
पला ९ महोदया १० महापत्रा ११
महाशाखा १२ महाफला १३ विश्व
देवा १४ अरिष्टा १५ देवदण्डा १६
महागंधा १७ घंटा १८ अस्या गुणाः
मधुराम्लत्वं कषायत्वं उष्णत्वं गुरु
त्वं कण्डुतिकुष्ठवातव्रणपित्तना
शित्वंच इतिराजनिर्घण्टः स्निग्धत्वं।
आयुष्यत्वं वृष्यत्वं ग्राहित्वं क्ष
तक्षीणक्षय रोगेषु हितत्वंच
इति राजवल्लभः ॥
नागभक्षः पुं कुण्डसर्पः इतित्रि
काण्डशेषः ॥
नागमल्लः पुं ऐरावतः इति श
ब्दरत्नावली ॥
नागमाता स्त्री मनःशिला इ
तिहेमचंद्रः मनसादेवी इति श
ब्दरत्नावली ॥
नागमारः पुं केशराजः इति त्रि
काण्डशेषः हस्तिमारके त्रि।
नागयष्टिः स्त्री पुष्करिण्यादि
स्थितकाष्ठविशेषः ररकाठ इ
ति भाषा तत्पर्यायः नागाचला २
इतिजटाधरः ॥
नागरं क्ली शुंठी इत्यमरः मुस्ता
इति मेदिनी रतबंधः इति विश्वः
नागरदेशीयात्तरंच ॥
नागरः पुं देवरः इति त्रिकाण्ड
शेषः नागरंगः इतिशब्दरत्ना।
वली विदग्धे नगरोद्भवे च त्रि।
इति मेदिनी ॥ नागर
कः पुं रतिबंधविशेषः यथा ॥
ऊरुमूलोपरिस्थित्वायोषिद्धृदयं (?)

यदिग्रावांधृत्वाकराभ्यांचबंधयेन्ना
गरकोमतः इतिरतिमंजरी ॥
नागरकं क्ली सिंदूरं इति हेम
चंद्रः नागस्यशोणितंच ॥
नागरघनः पुं नागरमुस्ता इति
राजनिर्घण्टः ॥
नागरंगः पुं वृक्षविशेषः नारं
गीलेबुर गाछ इतिभाषा इत्य
मरः तत्पर्यायः नारंगः २ ना
रंगः ३ नागरः ४ ऐरावतः ५
नागरुकः ६ चक्राधिवासी ७ इ
तिशब्दरत्नावली तत्फलगुणाः
सुरभित्वं विपाके गुरुत्वं दुर्जर
त्वं अत्यम्लत्वं ईषन्मधुरत्वं हृद्य
त्वं वात विनाशित्वंच तत्केशर
गुणः रुच्यत्वं वातहरत्वंच इति
राजवल्लभः ॥
नागरमुस्ता स्त्री मुस्ताप्रभेदः ना
गरमुता इति भाषा तत्पर्यायः
नागरोत्था १ नागरादिघनसंज्ञ
का २ चक्रांका ४ नादेयी ५ चूडा
ला ६ पिण्डमुस्ता ७ शिशिरा ८
वृषध्वांक्षी ९ कच्छरुहा १० चारुके
सरा ११ उच्चटा १२ पूर्णकोष्ठसंज्ञा
१३ कलापिनी १४ अस्यागुणाः तिक्त।
त्वं कटुत्वं कषायत्वं शीतलत्वं
कफ पित्त ज्वरातिसारारुचि तृ
ष्णादाहभ्रम नाशित्वंच इति रा
जनिर्घण्टः ॥
नागराजः पुं शेषः अनंतः यथा
पाताले नागराजे भुजगयुवत
योयस्य गायंति कीर्त्तिं इति क
विकल्पद्रुमः ॥
नागराह्वं क्ली शुंठी इति रा
जनिर्घण्टः ॥
नागरी स्त्री स्नुही इतिशब्दचंद्रि
का विदग्धानारी यथा हंसाभी
रीःस्मरतसकंठसंहेमोनाग
रीभिः इत्युद्भटः नागरप
त्नी नगरभवेत्रि ॥
नागरुकः पुं नागरंगः इति
शब्दरत्नावली ॥
नागरेणुः पुं सिंदूरं इतिराज
निर्घण्टः ॥
नागरेयकः त्रि नगरसंबंधीन
गरस्यायमिति स्येय प्रत्यया
नात्स्वार्थकः ॥
नागलता स्त्री लिंग इति त्रि
काण्डशेषः ॥ नागलोकः
१ पुं पाताले इत्यमरः ।

नागवल्लरी स्त्री नागवल्ली इ
तिभावप्रकाशः ॥
नागवल्लिका स्त्री नागवल्ली
इतिरत्नमाला ॥
नागवल्ली स्त्री तांबुली इत्यमरः
अस्याः पर्यायाः तांबुलवल्लीश
ब्देगुणाश्च तांबूलशब्दे द्रष्टव्याः
साच श्रीवाटाम्लवाटादि नाना
ग्रामस्थस्थान भेदादेव भिन्ना
एकाप्येषा देशस्वभावविशे
षान्नानाकारं यातिकायेगुणोच
श्रीवाटी मधुरा तीक्ष्णा वातपित्त
कफापहा रसाढ्या च रसारु ।
च्या विपाके शिशिरा स्मृता स्या
दम्लवाटी कटुकाम्लतिक्ता
तीक्ष्णा तथोष्णा मलपाकक
री विदाहपित्तास्रविकोपनी
च विष्टम्भदा वात निवर्हणी
च समसी मधुरा तीक्ष्णा कटु रु
ष्णा च पाचनी गुल्मोदराध्मा
नहरा रुचि कृद्दीपनी परा
स्या गुहागरे समशिरा प्रसि
द्धा तत्पर्णचूर्णा तिरसातिरुच्या
सुगंधि तीक्ष्णा मधुरातिरुच्या
संदीपनी पुष्टिकरा च बल्या ॥
विरेचनी वज्रसमगंधिकातिरेणा
म्नाया म्लरसा सुतीक्ष्णा मधुरा रु
च्या हिमा दाहकृत पित्तोद्रेककरा
सदीपनकरी बल्या मुखामोदिनी
स्त्री सौभाग्य विवर्द्धिनी मस्क
री ज्ञेया मदा वल्लभा गुल्माध्मा
नविबंधजिच्च कथिता सा माल
वे त स्थिता अंधिपुष्कलिकाम्ना
मकषायोष्णा कटुस्तथा मलाप
कर्षी कंठस्य पित्तकृद्दाहनाशि
नी हेषणी या कटुलीत्वगाह्वया
दीर्घदला च सा कफवातहरा रु
च्या कटु दीपन पाचनी इति राज
निर्घंटः नागवारिकः पुं राजकुंज
रः हस्तिपः गणस्य राजः गरुडः
मयूरः इतिमेदिनी नागवीरः पुं
शंकरः श्याकरः इति ख्यातः इतित्रि
कांडशेषः नागवीथी स्त्री अश्विन्या
दि नक्षत्र त्रय घटित ग्रह स्थान म
यान्तर्गतोत्तर स्थानस्य पथ वि
शेषः यथा सर्वग्रहाणां त्रीण्येव
स्थानानि द्विजसत्तमाः स्थानं जा
रद्गवं मध्यं तथैरावत मुत्तरं वैश्वा
नरं दक्षिणतो निर्दिष्टमिह तत्वतः
नक्षत्रमध्यमानर दक्षिणमार्गत्रयं

प्रत्येकवीथी त्रयेण त्रिधाभिद्यते
तथाहि त्रिभि स्त्रिभि रश्विन्यादि
नक्षत्रै नागवीथी गजवीथी पै
रावती चेत्युत्तर मार्गे वीथी त्रयं
तथा चोक्तं अश्विनी कृत्तिका या
म्या नागवीथीति शब्दिता इति
विष्णुपुराणे २ अंशे ८ अध्यायः
टीकायां श्रीधरस्वामी कश्यपा
द्यस्य विशेषः यथा नागवीथी
वयासिन्या मिति वह्निपुराणे
द्वितीयोध्यायः ॥
नागमुण्डी स्त्री डुंगरीफलं इति
राजनिर्घंटः ॥
नागसम्भवं क्ली सिंदूरं इत्यमरः
नागसुगंधा स्त्री भुजंगाक्षी स
र्पसुगंधा इति भरतधृतस्वामी ॥
नागस्तोकके क्ली वत्सनाभः इति
राजनिर्घंटः ॥
नागस्फोता स्त्री दंती नागदंती
इतिराजनिर्घंटः ॥
नागहनुः पुं नखनाम गंधद्रव्यं
इतिराजनिर्घंटः ॥
नागाह्वी स्त्री वंध्याकर्कोटकी इ
तिराजनिर्घंटः नागाख्यः पुं ।
नागकेशरः ॥ इति ॥
त्रिकांडशेषः ॥
नागांजना स्त्री नागयष्टिः इति
जटाधरः ॥
नागांजना स्त्री हस्तिनी नागय
ष्टिः इति मेदिनी ॥
नागाधिपः पुं अनंतः इतिहेम
चंद्रः ॥
नागांतकः पुं गरुडः इत्यमरः
नागारातिः पुं वंध्याककोटकी
इतिराजनिर्घंटः ॥
नागालावुः स्त्री कुंभतुंबी इति
राजनिर्घंटः ॥
नागाशनः पुं गरुडः इतिहा
रावली ॥
नागाह्वं क्ली हस्तिनापुरं इति
त्रिकांडशेषः ॥
नागाह्वा स्त्री लक्ष्मणाकंदः
इतिराजनिर्घंटः ॥
नागी स्त्री नागपत्नी इतिमुग्ध
बोधं नागोदं क्ली उरस्त्राणं ।
इतिहेमचंद्रः ॥
नागोदरं क्ली उरस्त्राणं इति
हारावली नाचिकेतः पुं अग्निः
इति त्रिकांडशेषः ॥

नाटः पुं नृत्यं देशविशेषः क
र्णाटक इति ख्यातः इति शब्दर
त्नावली ॥
नाटकं क्ली गद्य पद्य प्राकृत भा
षा मय ग्रंथ विशेषः तत्पर्य्यायः
महारूपकं २ इति त्रिकाण्डशेषः
तस्य लक्षणं यथा नाटकं ख्यात
वृत्तं स्यात् पंचसंधि समन्वितं ।
विलासर्द्ध्यादि गुणवद्युक्तं ना
नाविभूतिभिः सुख दुःख समु
द्भूति नानारस समन्वितं पंचा
दि का दशपरा तत्रांकाः प
रिकीर्त्तिताः प्रख्यातवंशो राजर्षि
धीरोदात्तः प्रतापवान् दिव्योऽथ
दिव्यादिव्यो वा गुणवान्नायको
मतः एक एव भवेदंगी शृंगारो
वीर एव वा अंगमन्ये रसाः स
र्वे कार्य्यो निर्व्वहणेऽद्भुतं चत्वारः
पंच वा मुख्याः कार्य्यव्यापृत पू
रुषाः गोपुच्छाग्र समाग्रन्तु बंध
नं तस्य कीर्त्तितं इति साहित्यदर्प
णे अपि च नाटकं स्यात् प्रकरणं
व्यायोगोऽंकस्तथा डिमः ईहामृगः
प्रहसनं भाणः समवकारकः ॥
वीथीति भरतः प्राहनासे ॥

षु दशरूपकं नाटिका प्रेक्षणं
च त्रोटकं शाकटं तथा गोष्ठी
संलापशिल्पानि भाणी हल्लीश
रासकौ उल्लापकं श्रीगदितं प्रस्था
नं नाट्यरासकं दुर्म्मल्लिकालासि
का चकाव्यं चेत्युपरूपकं स्यात्
मष्टधा सर्व्वान्त लक्षणं तत्र कथ्य
ते प्रख्यातेतिवृत्त नायकं रसमयं
राजर्षि वंशोद्भवं सांकं भंगजया
न्वितं लयमयं ततत् प्राणाश्र
ये भाषावैभवसुंदरं मविलसन्नाना
विलासं वलहृज्जिष्णानमशेष सं
धिसहितं समांग वन्नाटकं ग्रंथेन
देवतानां मनुष्याणां राज्ञां लोके
महात्मनां पूर्ववृत्तानुचरितं प
ख्यातोदात्त नायकं प्रवेशकवि
ष्कंभादिभिः संधिभिरन्वितं इ
तिहासकथारूढं सुखदुःखोद्भवैर्युतं
तं षट् पंच दश सप्त नवांकैर
नुभूषितं नाना विलास लीलाभिः
सर्व्वसिद्धिभिरन्वितं नाना भाव र
सैराढ्यं नाटकं सूरयो विदुः किं
चिद्गर्भविहीनं तत्समाप्तं नाटकं
क्वचित् प्रारंभश्च प्रयत्नश्च प्राप्तिः
संभव एव च नियता च फलप्राप्तिः

फलयोगास्तथापरः इत्यवस्था
पंचकं स्यात् नाटके कार्य्यव
त्सुनः संस्कृतं प्राकृतं भूत भा
षापभ्रंशिका गिरः नाटके निय
ताः शास्त्रा यथा भाषा रसावहा
भाषा विभाषा भेदेन प्राकृतं त
च्चतुर्द्दश मागध्यावन्तिका प्राच्या
शौरसेन्यर्द्धमागधी वाह्लीका ।
दाक्षिणात्या च भाषाः सप्तच प्रा
कृते शाकाराभीर चाण्डाल शावर
द्राविडोद्रजाः वनौकसी विजाती
नां विभाषाः सप्तकीर्त्तिताः कैके
यी शौरसेनी च कांची पांचालमा
गधी द्राविडी पाण्ड्देशी च भूत
भाषाः प्रकीर्त्तिताः वैदर्भी मा
गधी लाटी कांची कौन्जी चोपनागरी
पांचाली षडपभ्रंश भाषाः स्यु
र्देश भेदतः देवतादर्शनां तेषु क
र्तव्यं नाटकं बुधैः राजर्षि दर्शनं
तेषां तेपि दैवैः समा मताः उदाह
रणं मुरारि कवे रनर्घराघवं भव
भूते रुत्तररामचरितं कालिदासस्या
भिज्ञानशाकुन्तलं चेत्यादि इति
नाटक लक्षणं इति संगीतदामोदरः
नाटकः पुं कामाख्यास्थ पर्वतभेदः

यथा येषामस्मिन्नाटकेशैवे शंकर
स्य महाश्रमे नित्यं वसति तत्रेषा
स्तदधीना नपार्व्वती इति कालि
कापुराणे नर्त्तकेपि इति व्या
करणं ॥
नाटाम्रः पुं तरंबुजः तत्पर्य्यायः
चेलालः २ चित्रफलः ३ सखो
ष्णः ४ राजनेमिषः ५ लतापनसः ६
सेड़ः ७ इति त्रिकाण्डशेषः ॥
नाटारः पुं नट्या अपत्यं इति मु
ग्धबोधव्याकरणं ॥
नाटिका स्त्री नाटकविशेषः य
था कैशिकीवृत्तिसंयुक्ता नारीप
रिजनोज्ज्वला चतुर्थसंधिहीना
च नाटिकाल्पनायका इयंस्त्री
रवफल्लातनः स्यात् कैशिकीम
यी महीयं कैशिकीवृत्तिनस्याद
न्यरसाश्रया न कुंजरकराक्रान्तमा
त्रेणाक्रान्तिकदली लक्ष्याविटः
पीठमर्द्दः संत्तयोवाय संत्तयः
षंतः पुरचरो रात्रि ईषद्विशो वि
दूषकः अत्र भार्य्या जितो राजा
नियतः काम मातरेन् प्रेतः
पुरागमांकसो देवीयुगंश्रा प्रिया
सति मत्विणि न्यस्त राज्यस्तु स

एवं संस्थापितः प्रभुः सुवा भूमिपति
प्रायो निसृतः कामं मा चरेत् कन्या
मिह परिणय विषये देवीगुप्ता
महिषी ज्ञानविरहेण पकेत च
तैर्भिर्विकैरुत पायंतिसम्भिन्नरूपना
यके सैव नाटिका प्रबंधकमात्रा ।
टक क्रमाद्रत्नावल्यावली नाटिका
एवमन्यप्रेक्षेहोदयः इति संगीत
दामोदरः ॥
नाटेयः पुं नटस्यापत्यं इति मु
ग्धबोधव्याकरणं ॥
नाटेरः पुं नटीसुतः इति हेम ॥
चंद्रः ॥
नाट्यं क्ली नृत्यगीतवाद्यं तत्
पर्य्यायः तौर्य्यत्रिकं २ इत्यमरः ।
नटानां समूहः इति व्याकरणं ।
नाट्यारंभनक्षत्राणि यथा अनु
राधा १७ धनिष्ठा २३ पुष्यः ८
हस्ता १३ चित्रा १४ स्वाती १५ ज्येष्ठा
१८ शतभिषा २४ रेवती २७ इति
ज्योतिषं नाट्यफलं यथा ॥
देवर्षि क्षितिपालपूर्व्वचरि
तान्यालोक्य धर्म्मोदयस्तत् ।
स्तावाश्रित भूमिकाभिनयने
स्यादर्थसिद्धिः परा ॥

संगीतायुत विघ्नहृति भरतस्तत्
यथा भवं संगता ज्ञानं शंकर से
वयेति कथितं नाट्यं चतुर्व्वेदे
यो यस्य दयितो भावः स तेनाट्ये
निरीक्षते अतः सर्वमनोहारि
नाट्यं कस्य न रंजकं नाट्योत्प
त्तिर्यथा इहानुश्रूयते ब्रह्मा श
क्रेणाभ्यर्थितः पुरा चकाराकृ
ष्य वेदेभ्यो नाट्यवेदं तु पंचमं
उपवेदोऽथर्ववेदाश्च चत्वारः कथि
ताः स्मृतौ तत्रोपवेदो गांधर्व्वः शि
वेनोक्तः स्वयंभुवे तेनापि भरता
योक्तस्तेन मर्त्यप्रचारितः शिवा
ज्ञयेति भरतास्तस्मादस्य प्रयोज
काः इति संगीतदामोदरः ॥
नाट्यधर्म्मिका स्त्री दर्शनार्थ शा
स्त्रोक्तनाट्यं यथा गीतवाद्यनृत्य
त्रयं नाट्यं तौर्य्यत्रिकंच तत् संगी
तं प्रेक्षणार्थेऽस्मिन् शास्त्रोक्ते नाट्य
धर्म्मिका इति हेमचंद्रः ॥
नाट्यप्रियः पुं शिवः इति हेम
चंद्रः ॥
नाट्यशाला स्त्री प्रासादस्थसभा सभी
पगृहं नाटमन्दिर इति ॥
भाषा ॥

यथा नाट्यशाला च कर्त्तव्या द्वार
देशसमाश्रया इति गरुडपुराणं ॥
नाट्यालंकारः पुं नाट्यभूषणे
तुः सत्त्रिषष्टिप्रकारो यथा
सिद्धिर्मनोरथो श्लेषो निरुक्तिश्च
विशेषणं गुणाभिपातं ईहितं वि
चारप्राप्तिनीतयः अभिप्रायः
परीहारो गर्हणानुनयो तथा
अर्थापत्तिः प्रसिद्धिश्च दाक्षिण्यं
प्रियभाषणं अभिमानाख्यानता
श्वी हर्षवोभोद्यमाश्रयाः पश्चा
त्तापः स्पृहाक्रंदौ कपटंच प्रवर्त्त
नं उत्तेजनंच दृष्टान्तः शोभो
दाहरणे अपि सशयोत्तर
संज्ञानो विमलोक्तिः पटोश्च
यः परीवादो नुक्तसिद्धिरत
माध्यवसायकौ प्रोत्साहनं त
त्पतर्कं उपपन्नतर्कणं निवे
दनंच साहाय्यं याच्ञा इच्छा
विशेषणं अभिज्ञानंच साहं
ह्यगुणकीर्त्तनं संशयः विप
र्य्ययातिशयो भूषा दृष्टनिदर्श
नं मानादेशाश्वसंदेशसमीहाश्चैवि
सर्पकाः उल्लेख उपदिष्टौ चेत्यष्ट
षष्टिर्मिता अमी अलंकारा मता

नित्यं नाटकादिषु सूरिभिः इति
संगीतदामोदरः ॥
नाट्योक्तिः स्त्री नाटकविषयक
वचः नटानांकर्म नाट्यं तत्रोक्तिः
नाट्योक्तिः इति भरतः तद्यथा
आर्य्येति ब्राह्मणं तद्वियं महा
राजेति सावी हलेति नीचं ह
ले इति चेटी हंजे इति स्वामिन्
मार्य्यपुत्रेति राजश्यालं राष्ट्रि
येति समाने हंहो इति राजा
नं देवेति सार्व्वभौमं महेति भ
गिनीपति मावुत्तेति संबोधये
त् इति संगीतदामोदरः गणि
काया अज्जुका विद्धति भावः
जनके आवुकः कुमारे युवरा
जे भर्त्तृदारको राज्ञि देवभट्टा
रको राजसुतायां भर्त्तृदारि
का कृताभिषेकायां राज्ञां देवी
इतरासु राज्ञीषु भट्टिनी अवस्था
के अब्रह्मण्यं मातरि अम्बा
बालायां वासु आर्य्यमारिषः
ज्येष्ठभगिन्यां अत्तिका निष्पाद्य
निर्वहणं इत्यमरः नाटिः स्त्री
नाटी इत्यमरटीकायां भरतः ॥

नाडिकं क्ली कालशाकं इति भावप्रकाशः ॥

नाडिका स्त्री षट्क्षणः घडि इति भाषा तत्पर्यायः नाडिका २ घटिका २ इति हेमचन्द्रः घटिकाज्ञानोपायो यथा निमिषो मानुषो योऽयं मात्रामात्रप्रमाणकः तैः पञ्चदशभिः काष्ठा त्रिंशत्काष्ठास्तथा कला नाडिका तु प्रमाणेन कला दश च पञ्च च उन्मानेनाम्भसः सा तु पलान्यर्द्धत्रयोदश हेममाषैः कृतच्छिद्रा चतुर्भिश्चतुरङ्गुलैः मागधेन प्रमाणेन जलप्रस्थस्तु संयुतः इति विष्णुपुराणे नैमित्तिकलयप्रपञ्चविषये निमेषादिक्रमेण प्रथमांशोक्तमेव कल्पप्रमाणमनुस्मारयति निमेष इति सप्तभिः मात्रैव मात्रं प्रमाणं यस्य एकमात्रलघ्वक्षरोच्चारणकालसंमितो हि निमेषः निमेषकालस्तस्य हि मात्रालघ्वक्षरं वदन्तीति श्लोकाण्डोक्तेः नाडिकाज्ञानोपायमाह उन्मानेनेति सार्द्धेन प्रस्थस्य उन्मानेन उन्नीयते अनेनेत्युन्मानं पात्रं अर्द्धेन। योगे त्रयोदश सार्द्धद्वादशेत्यर्थः उन्मानरूपेण घटितानि सार्द्धद्वादश पलानि सा नाडिका सार्द्धद्वादशपलतामनिर्मितपात्रेण सा नाडिका ज्ञातव्येत्यर्थः । किंप्रमाणं तत्पात्रं कार्य्यं तदा मागधेन प्रमाणेन जलप्रस्थस्तु संमित इति सार्द्ध द्वादश पला जलेन हि मागधदेशप्रस्थः पूर्य्यते तत्प्रमाणं पात्रं कार्य्यमित्यर्थात् सिद्धं ननु तथापि पात्रेण कथं नाडिकाज्ञानं क्रियापरिच्छेद्यत्वात् कालस्येत्याशङ्क्य क्रियासिद्धये प्रस्थादि विशिनष्टि हेमेति माषः पञ्चगुञ्जः हेम्नो माषैश्चतुर्भिश्चतुरङ्गुलेन शलाकारूपेण रचितैः कृतच्छिद्रा पतत्यम्भः भवति सार्द्धद्वादश पलतोयं मागधप्रस्थसंमितं मृद्धी यत्पात्रं चतुर्म्माषचतुरङ्गुलहेमशलाकया कृताधश्छिद्रं जले स्थापितं तेन छिद्रेण यावता कालेन नाडिकेति तथा च श्लोकः द्वादशार्द्धपलोन्मानं चतुर्भिश्चतु

रङ्गुलैः स्वर्णमाषैः कृतच्छिद्रं यावत्प्रस्थजलप्लुतं मितिः इति तट्टीकायां श्रीधरस्वामी ॥

नाडिकेलः पुं नारिकेलः इत्यमरटीकायां भरतः ॥

नाडिचीरं क्ली निर्व्वेष्टने नली इति भाषा इति हारावली ॥

नाडिन्धमः पुं स्वर्णकारः इत्यमरः ॥

नाडिंधयः पुं स्त्री नाडीपानकर्त्ता इति मुग्धबोधव्याकरणं ॥

नाडिपत्रं क्ली नाडीचं इति शब्दमाला ॥

नाडी स्त्री नाले व्रणान्तरे शिरा ॥ गण्डदूर्व्वा कुहमचर्य्या षट्क्षणकालः इति मेदिनी तत्पर्य्यायः धमनिः १ शिरा २ इत्यमरः नाडिः ३ नालिः ४ नाली ५ धमनी ६ शिरा ७ इति भरतः धरणी ८ धरा ९ तन्तुकी १० जीवितज्ञा ११ सिरा १२ इति राजनिर्घण्टः कायनाडी त्रिविधा एका वायुवहा अपरा मूत्रविट्शिरस्त वाहिनी अपरा आहारवाहिनी इति भरतः सा तु गर्भस्य बालकस्य सप्तमे मासे भवति इति सुखबोधः ॥ नाडीदुर्गमाह सार्द्धत्रिकोटयो नाड्यो हि स्थूलाः सूक्ष्माश्च देहिनां नाभिकन्दे निबद्धास्तास्तिर्य्यगूर्द्धमधः स्थिताः द्विसप्तति सहस्राणि तासां स्थूलाः प्रकीर्त्तिताः देहे धमन्योधमन्यास्ताः पञ्चेन्द्रियगुणावहाः तासां च सत्त्वसूक्ष्माणि नाडीस्थानानि समस्तानि ये रसं संवहन्ति आप्याय्यन्ते वपुरिदं हि नृणाममीषां अम्भः स्रवद्भिरिव सिन्धुशतैः समुद्रः आपादतः प्रततगात्रमशेषमेषा मामस्तकादपि च नाडि पुरः स्थितेन एतत्सदृश इव चर्मचयेन नद्धकायं तृणामिह शिरा शतसप्तकेन सप्तशतानां मध्ये चतुरधिका विंशतिः स्फुटा स्तासां एका परीक्षणीया या दक्षिणकर चरणविन्यस्ता चतुरधिके विंशतिरुक्ते तिर्य्यक् स्थामी देहिनां नाभिदेशवाम वक्रे तस्य पुच्छं च याम्ये ऊर्द्धे भागे हस्तपादौ च वामे तस्याधस्तात् संस्थितौ दक्षिणे तौ वक्रे नाडीद्वयं तस्य पुच्छे नाडीद्वयं तथा पञ्चपञ्च करे पादे वामदक्षिणभागयोः नासा मध्ये।

पकेति पकस्या पक्षपादार्द्धं प
मनात् दक्षिणेति प्राधान्ये पुरुषा
श्रया यदुक्तं वामेभागे स्त्रिया
योज्या नाडीपुंसस्तुदक्षिणे इति
प्रोक्तोमयादेविसर्वदेहेषुदेहि
नां नपुंसकस्य तु स्त्री पुंस।
यो रन्यतराकार प्रकटता मेप
रूपरीक्षा साम्प्रतन्तस्यादेवक्ष्य
त्रिमस्य तु प्रकृतिस्थता चरणे
निवामस्य तु दक्षिणे ग्रीवे पश्चा
त् पार्श्वस्था दक्षिणस्य तु वाग्रं
थि पश्चात्पार्श्वस्थैव समपदे
शात् करस्था त्वक्स्पते परीक्षा
प्रकार माह सव्येनरोगधृति।
ऊर्ध्वर भागभाजा पीडाथ्यदक्षि
णकरांगुलिका त्रयेण अंगुष्ठ
मूल मधि पश्चिम भाग मध्ये
नाडी प्रभंजन गतिं सततं परी
क्षेत् सव्येन करेण रोगधृतिर्वि
दधार रणमित्यापीडनेहेतुः रो
गानंवातादिपिशुनवायुतां ।
धारणं यथा स्यात्तथा पीडयेति
कश्चित् उरग इति समुदित कफो
ण्णिपरंभाजेति परीक्षा कालेः
पि तयहस्त स्थितये आपीडनस्य
यीनाडीपतत्रापीडनं वातादि पोर्वापर्य ॥

बोधनाय अथैमापीडनानंतरं
तत परीक्षा कालेप्यापीडनस्थि
तिः दक्षिणेति प्रायिकं स्वपरी
क्षायामसम्भवात् त्रयेति योग्य
तयातर्जनी मध्यमानामिका ग्र
हणं पश्चिमेत्यंगुष्ठस्याधो भागः
मूलेतितदुक्तं अंगुष्ठस्य तु मूले
या धमनीजीवसाक्षिणी तस्या ग
ति वशाद्विद्यात् सौख्यं दुःखंच दे
हिनां प्रभंजनगति येति नाड्यन्त
र निरासः सततमिति सस्य दशा
यामपि तदुक्तं भाविरोगाभिरोधा
य सम्यङ्नाडीपरीक्षणमिति ॥
परीक्षणीयमाह वातंपित्तंकफं
द्वंद्वं सन्निपातं स्तथैव च साध्या
साध्य विवेकंच सर्वं नाडी प्रकाश
येत् सन्निपातमिति सामान्यतः
साध्यासाध्यमिति विशेषतन्स्त्रम
र्थः सर्वमित्येन दन्यच्च रोगादिक
मित्युपसंहारः इति नाडी प्रकाशे
प्रथमोद्योतः अथ नाडीज्ञान स
मयमाह प्रातः कृतसमाचारः
कृताचार परिग्रहं सुखासीनः
सुखासीनं परीक्षार्थं मुपाचरे
त् प्रातरिति प्रायिकं मध्या ॥

ह्ने उल्लता इत्युक्तेः निषिद्धका
लमाह सद्यः स्नातस्य भुक्तस्य
क्षुत्तृष्णातप सेविनः व्यायामा
क्रांतदेहस्य सम्यङ्नाडीन बुध्यते
तैलाभ्यंगे च सुप्ते च तथा च भो
जनान्तरे तथा न ज्ञायते नाडी य
थाद्रीनरा नदी स्वप्ने निद्रा का
ले भोजनान्तरे भोजनमध्ये भोज
नावसान मात्रेच वात मूर्च्छादि
क्षणिक रोगे नायं विधिः अथ
वातादि स्वभाव क्रम माह आ
दौच वहते वातो मध्ये पित्तं तथै
व च अंतेच वहते श्लेष्मा नाडि
कात्रय लक्षणं आदावित्तिकफा
णिपीडित द्वितीय क्षणे तत्त
र्जनी निवेशस्थले स्थानभेदस्यक
ग्राध्यवसमानत्वात् स्वस्थतास्त्रा
नार्थमाह भूलता गमन प्राया
स्वच्छा स्वास्थ्यमयी शिरा प्राये
ति बाहुल्येन स्वच्छा परितोजा
ड्यरहिता स्वास्थ्यमयी सुस्थताधि
जिकाच तथा प्रातः स्निग्धमयी
नाडी मध्याह्नेचोष्णता त्विता सा
याह्ने धावमाना च चिरात् रोगविवर्जि
ता चिरादिति अभीतानागतयोर्दोषा
रप्युक्तिः प ॥

थाशितानामेव वातादीनांक्र
मेण गतिमाह वाताद्वक्रगता
नाडी चपला पित्तवाहिणी स्थि
राश्लेष्मवती ज्ञेया मिश्रिते मि
श्रिता भवेत् वक्रेति वायो स्ति
र्यग्गमनात्तिरो वहतीति पवेन
स्वकोपादिनावात्मोद्रिगतिरपि
तानव्या चपलेति वह्नेः रूढत्व
लनाद्दूर्द्धं चंचला स्थिरेति जलस्य
नीचगमनात् तुल्यगा मिश्रिते मि
श्रविक्ता भवति तेन द्विदोषजेउ
भय चिह्ना सर्वजेसर्वचिह्नेति च
पलता स्थिरतयोः समष भेदेना
विरोधः उष्णवक्रादि समास्यक्र
मेण विशेषमाह सर्पजलौका
दि गतिं वदंति विबुधाः प्रभंजनेन
नाडी पित्तेचकाककलावकभेकादि
गतिंविदुः सुधियः राजहंसमयू
राणां पारावतकपोतयोः कुक्कु
टादि गतिं धत्ते धमनी कफसंह
ता आदिनावाते वृश्चिकगतिर्दी
ला थिता आदिशब्देन पित्ते कलि
ग कलविंकादि गतिः कफेगज
वरांगनादिगतिः द्वंद्वजस्यापिडमे
णैवभेदानाह सर्पः सर्पगतिंनाडी

मण्डूकैक पतिं तथा वात पित्त द्व
योद्भूतां प्रवदंति विचक्षणाः भु
जगादि गतिं चैव राजहंसगतिं थ
रं वातश्लेष्मसमुद्भूतां भाषंते त
द्विदो जनाः मण्डूकादि गतिं नाडी
मयूरादि गतिं तथा पित्तश्लेष्म
समुद्भूतां प्रवदंति महाधियः ॥
त्रिदोषजां मप्याह डमरादि ला
वकादि हंसादीनां च विभ्रती गम
नं बातीदीनांच सम धमनी सं
वंधमाधत्ते सम मिति न्यूनाधिक
तानिरासः ।। क समात्पातेन ता
साध्यत्वं तथा लाव तित्तिरि वार्तीक
गमनेन सन्निपाततः कदाचिन्मंदगा
नाडी कदाचिच्छीघ्रगा भवेत् त्रिदोष
प्रभवे रोगे विज्ञेया हि भिषग्वरैः
पित्तक्रमतयाकृच्छ्रसाध्यत्वमसा
ध्यत्वंच सामान्यतः सुखसाध्य।
त्वमाह यदास्वस्थानमाप्नोति तदा
नाडीतथा गतिः तथाहि सुख सा
ध्यत्वं नाडी ज्ञानेन बुध्यते प्रथम
र्थः अपराह्णादौ नाडी वातोल्वणा
प्रथमं वात गत्यैव वहति ततो य
थायथं पित्तादि गत्या तत्र पित्ता।
ल्वणेवातादि गत्या तदा सुखसा

व्यतिरेकेणाव्यतिरेकः तदुक्तमन्यैः
नाडी यथा काल गति स्त्रयाणां
प्रकोप शांत्यादिभिरेव भूयः अ
थासाध्य रूपमाह मंदं मंदं शि
थिलशिथिलंव्याकुलंव्याकुलंवा
स्थित्वा स्थित्वा वहति धमनी या
तिनाशंच सूक्ष्मा नित्यंस्थानात् ॥
स्खलति पुन रप्यंगुलिं संस्पृशेद्वा
भावैरेवंबहुविधविधैः सन्निपाता
दसाध्या मंदंमंदं मुहुरत्रुटं प्र
प्रवहतितियावत् शिथिलेतिस्व
ल्पहतिरूपं व्याकुलेति प्रस्त वदि
तस्ततः वा पाठः समुच्चये स्थि
त्वास्थित्वेत्याद्यस्या च तद्रूपैव गतिः
नाश मदर्शनं गच्छति कदाचिन्ना
डीस्पंदोपि न संभाव्यत इत्यर्थः ॥
सूक्ष्मेति यदि लभ्यते तदा तथैवा
तिसूक्ष्मायः स्थानमंगुष्ठमूलंतस्मा
त् स्खलतिकदापि तत्र नस्पंदत इ
त्यर्थः तदुक्तं हंति च स्थान विच्यु
तेति किंचित् स्फुरतीतिक्वापि
पुनरपीति कियद्विलंबेन अंगुली
मंगुली मूलमेव मित्येवं रूपे वै
कृतिभावे धर्मैः उक्तंचान्यत्र मह
तापपिपीतेन शीतेन तापिना।

शिरा नानाविध गति र्यस्य तस्य
मृत्युर्न संशयः मेहत्याशयाक्लिष्ट
पित्तादिकृततापनिरासः शीतत्व
द्रुतत्वापि मेहति सम्बध्यते तथा
त्रिदोषसंपदेते नाडी मृत्यु काले
पि निश्चला निश्चला स्पन्दसामा
न्याभाववती अतीसारादौ हस्त
पादादि स्वेदादिना स्पंदोपलंभा
त् तथा पूर्वं पित्त गतिं प्रभंज
न गतिं श्लेष्माण माविभ्रती स
तान भ्रमणं मुहुर्विदधती चक्रा
धिरूढामिव तीव्रत्वं दधती कला
पिपतिको सूक्ष्मत्वमातन्वती सा
साध्यां धमनी वदंति सुधियो नाडी
गति ज्ञानिनः अयमर्थः पूर्वमिति
क्रम विपर्यये पित्तादि गतिमती।
वारंवारमेवं क्रमेण चक्रोपरिभ्राम्य
माणामिव तथा तीव्रत्वमति शी
घ्रवेगं एवं च कदाचिन्मयूरवद्गमनं
अथोत्तरोत्तरं कृशता मापादयंती
ति विशिष्टोहेतुः तथा चान्यत्र।
या स्वस्था च स्थिरात्मता या चेयं मां
स वाहिनी याच सूक्ष्मा च वक्रा
च तामसाध्यां विदुर्बुधाः अस्वस्था
सहजेनोष्मवतरा हृथसीरोमृतावा

रुदाचिदिति स्थिरा प्राणधानेनैवग
म्यामानसंदा च मांसवाहिनी मां
साहारइव गतिमती लगुडप्रायेति
ति तदुक्तं मांसेन लगुडाकृतिः
मांसेनसमंवहतीतितदुक्तं तदुप
परितापक प्रकारस्यानुक्तत्वात्।
इयमपि विशिष्ट बोधनाय या च
सूक्ष्मा च वक्रा चेति पृथगिरवाक्या
न्तरमिति असाध्यत्वापवादमाह
भार प्रवाह मूर्छा भय शोक प्र
मुख कारणान्नाडी संमूर्छितापि
गाढं पुनरपि सा जीविते धत्ते ॥
चिरतरकुलभारोद्वहनेनवाविष
वेगधारावाहि रुधिर दर्शनादि
जनितमूर्छया वा राक्षसादि संदर्श
नादि भयेन वापुत्रादिविरहजनि
तशोकातिरेकेणवासंमूर्छितापि
अतिनिस्पंदापि गाढमिति सूक्ष्मा
तंकाशर्यादि योगोपीत्यर्थः पुनरि
तिसाध्यतांयातीत्यर्थः भावांतरमा
दीनां प्रवाह इति तदुक्तं भय शो
कयोः पृथग्विधानात् प्रमुखेन
नेनदेवंतराभिधानं तदुक्तं पति
तः संधितो भेदी नष्ट शुक्रस्य यो
नरः साध्यते विस्मयलक्षणं किं

विनरसुकारणे पतितः उच्चादितः
संचितः अस्थादिसंधानेन संहितः
भेदी अभीसारवान् नष्टसुके यः
द्वात्यादिनाति रमणेन वा सुके द्व
यवान् विस्मयोः साध्यत्वानुमानं
शाम्यतिनावतरति कारणं प्राशु
कं तनदेव अत्यत्रापि तथा भूताभि
संयोगविशेषवदुपस्थिता समांगा
वहते नाडी तथाच नक्रमंगता ॥
अपसत्वेन रोगांगा नाडी तत्र स
न्निपातवत् भूताभिषंगो तथा भू
तसामान्याभिषंगेच देवग्रहादौ ना
डी सन्निपातधर्मशालिनी उपस्थि
ता आपातत एव भवति तत्र तत्
फलप्रदा भेदमाह समेति वात
पित्त कफ स्वभावक्रमवती तथा
क्रम व्यतिक्रमं न गता तस्मादेव प्र
यत्नसुः अपगतो मृत्यु येस्याः
सातथा परमार्थतः सन्निपातवद
पि सन्निपातजन्या न स्यात् इति
तदुक्तं स्वस्थानहीनेषु केषु चद्विमा
क्रांतेषु चनिर्गदाः भवंतिनिश्चलाता
द्योतकिंचित्तत्र्यहण मिति स्वस्था
नहीनदच्चादितः पतते अंगुष्ठमूल
तस्मरण इति तत्सार्थः निर्गदा उपसंग

तिः निर्गदा अपि निश्चला भवंति
हूषण मसाध्यत्व भ्रमः अन्येत्वाहुः
श्लोकं वातकफ द्वष्टपित्ते वहादारु
णं पित्त स्थानं विजानीयात् भेष
जं तस्य कारयेदिति अयमर्थः
वात कफाभ्यां नाडी किंचिद्दृष्ट।
ति दुष्टक्षीणत्वाधिकत्वाभ्यामपि
विशेषाद्दुल्वणं पित्ते विषमवेगेन
वहति तदा तत्र प्रतिकारार्थं भेष
जं कुर्यात् असाध्यता न स्यादिति
यावत् अत्र कश्चित् स्वस्थानच्यवते
यावद्दृमन्या नोपजायते तावच्चि
कित्सा सत्वेपि नासाध्यत्व मितिसि
तिरिति तच्च प्रायिकं वक्रथाव्य
भिचारदर्शनात् हतिच स्थानवि
च्युतेत्यत्र चकारस्यायोग व्यवच्छेद
कत्व मित्यर्थः प्रसंगात् कालनि
र्णयमाह तलता भुजगाकारा नाडी
देहस्य संक्रमात् विशीर्णा क्षीणतां
याति मासांते मरणं भवेत् ॥
कदाचित् महीलतावत् कृशा त
त्वितिवदति मरण वक्रगमना च
कदाचित् सर्पवत् परिभुष्टा तद्व
ति तद्दलवनरवक्रगमना च इति
वैशिष्टेन समस्यदशौतो भेदः उभयवक
त्वात्वंदल ॥

सता मति कृशांतश्च यदा गच्छ
ति देहेति देहक्रम मपेक्षा तेन दे
होपि यदा स्थूलः शोथादिना क
दाचित्त्व कृशः स्यात् तदा द्वितीये
मासि म्रियते इति तथा सत्वाक्र
ति वेगेन शांततां लभते स्वाभाव
समाहात्म्यरणं तस्य यद्येषो प्रो।
यवर्त्तितः स्वत्वादिति दुते दुते
मत कदाचिदिति शांतता मत्त
यलभ्यमानत्वे शोथेति तस्मात्
संवयेत्वनाचिरं मरणाय विरमे
वेत्यर्थः तथा हिमवद्दिशादाना
डीज्वर दाहेनतापितो त्रिदोषस्पर्शि
ति सन्निपातलक्षणमत्वपवभ
वति तदानिशीद्यादक्षिणे पादे त
दा चैषा विशेषतः मुखेनाडीवहे
त्रिसंततस्त दिनतच्छेकं गतिं त
भ्रमरस्येववहेदेकदिने तत कं
देन संदते नित्यं पुनर्लगतिचा
गुलौ मध्ये द्वादशयामान्तं ॥
मृत्यु भवति निश्चितं दक्षिणा
इति पुंसः स्त्रियास्तु वाम एव
तथेति करस्यैव विशेषतो विशेष

ज्ञानार्थं यदि वो भयतोऽपि म
खेपुरोभागेनित्यं सदा वहति तदा
दिन चतुष्टयं प्राप्य भ्रमरस्य पति
भ्रमणं रूपं गमन मिव मुखएव
दृढिवहति तदेकदिनेनांकं देमूले
स्पंदत इति संभाव्यते नित्यं प्रा
यः पुनरंगुलौ तन्मूले कदापि
लगति तदा तस्मादारभ्य द्वादश
प्रहरमध्य एव मृत्युरिति तथा स्थि
रिवत्वाते दिनैकं जीवितं तस्य द्वि
तीये म्रियते ध्रुवं स्थित्वेत्याद्यस्मा
स्थित्वा स्थित्वा विद्युत् स्फुरणमि
वलत्वाते द्वितीय इत्यष्टप्रहारा
हर्हं मित्यर्थः तथा स्वस्थान वि
च्युता नाडी यदा वहति वा न वा ज्वा
ला च हृदये तीव्रा तदा ज्वालावधि
स्थितिः नवेति स्थित्वा स्थित्वेत्यर्थः
इत्यंच यदसाध्यलक्षणं मुक्रम
वस्थानादपवादविरहे सति तस्या
र्थप्रवेशाय यथायथमार्थ्य मतिभि
रवगंतव्य इति तेहूप्रतनुयते ग्रंथगौ
रव भयात् मंदंमंदमिति श्लोकेनत
व तूलता गमनाकारेति विहस्यते

भजतो तदा मत्सुर्दिनत्रयात् यदानिरंतरं ज्वरदाह
तापोद्धस्यैव नाड्याः त्रिदोषे ४ १०

संदत स्थानेकदाचित् न संदते स्वल्प

तानाडीमुखेयस्यविद्युत् द्योति ॥

तस्य तात्कालिक मरण विषयता
न सर्वमिदं सर्वरोग एव वेदितव्य
ज्वरमात्रेत कम एवेति इति नाडीप्र
काशे द्वितीयोध्यायः अथ रोगेषु नि
रूपणीयेषु प्रधानतया प्रथमं
ज्वरनिरूपणमाह तत्र ज्वरशब्देन रू
पे अंग ग्रहेण नाडीनां भवंति मेघ
गः स्रवाः स्रवः प्रवलत्वं याति ज्व
रदाहाभिभूतये सान्निपातिक ज्व
रेण भवंति सर्व वेदनाः ज्वरस्व
रूपमाह ज्वरकोपे च धमनी सोष्णा
वेगवती भवेत् उष्मापित्तादृते ना
स्ति ज्वरो नास्त्यूष्मणा विना उष्मावे
गधरा नाडी ज्वरकोपे प्रजायते अ
स्यच ज्वरे च वक्रा धावंती तथा
च मरुतः स्रवे रमणान्ते निशि।
प्रातस्तप्ता दीपशिखा यथा तत्रापि
विशेषमाह सौम्या सूक्ष्मा स्थिरा
मंदा नाडी सहज वातजा स्थूलाच
कठिना शीघ्रा स्पंदनेतीव मारुते॥
द्रुताच सरला शीघ्रा दीर्घा पित्तज्व
रे भवेत् शीघ्र मारुतेन नाड्यः का
ठिन्याच्च चला तथा मला जीर्णेना
तितरां स्पंदनेच प्रकीर्तितं नाडीतं
तु समा मंदा शीतला श्लेष्म॥

श्लेष्मदोषजा द्वंद्वज माह चंच।
लातरला स्थूला कठिना वात
पित्तजा ईषद्व दृश्यते तस्या मंदा
स्यात् श्लेष्मवातजा निरंतरं खरे
रूक्षे मंदश्लेष्मणि वातलं रूक्ष
वातभवे तस्य नाडी स्यात् पित्तश्ले
ष्मिका सूक्ष्मा शीतला स्थिरा नाडी पि
त्तश्लेष्मसमुद्भवा प्रसंगाद्दाह म
ध्ये करे वहेन्नाडी यदि संतापिता
भवेत् तदा नूनं मनुष्यस्य रुधिरा
पूरिता मलाः आगंतुक रूपभे
दमाह भूत ज्वरे सेकरवाति वेगा
धावंति नाड्यो हि यथा विप्रामाः
तथा एकाहिकेन क्वचन प्रहरे
द्वयेन तु गामा विषमज्वरेण द्वि
तीयके वापि तृतीय तुर्य्ये गच्छंति
तमा भ्रमि वत् क्रमेण अन्यत्रापि
उष्मावेग धरा नाडी ज्वरकोप प्र
जायते उद्वेग क्रोध कामेषु भय
चिंताश्रमेषु च भवत्क्षीणगति
नाडी ज्ञानेच्छा वैद्य सत्तमैः प्रसंगाद
दृष्यायामे भ्रमणे चैव चिंतायां श्र
मशोकतः नानाप्रभाव गमना
शिरा गच्छंति विज्वरे अजीर्णरूप
माह अजीर्णे तु भवेन्नाडी कठिना

परितो जडा प्रसन्नाच द्रुता शुद्धा त
था च प्रवर्त्तते तत्र विशेषमाह
पक्वाजीर्णे पुष्टिहीना मंदमंदं
वहेज्जडा असृक्पूर्णा भवेत्को
ष्णा गुर्वी सामा गरीयसी प्रसं।
गाद्भक्षण ज्ञान माह तुष्टि सं
ल गुडाहारे मांसे च लगुडाकृ
तिः क्षीरे च स्तिमिता वेगा म
धुरे भेक वद्गतिः रंभा गुड व
टाहारे रूक्ष शुष्कादि भोजने वा
तपित्ताभिरूपेण नाडी वहति निः
क्रमं अथ रस ज्ञाने मधुरे वर्हि
गमना तिक्ते स्याज्जूलता गतिः
अम्ले कोष्णा प्लवगतिः कटुके भृं
गसन्निभा कषाये कठिना म्लाना
लवणे सरलाद्रुता एवं द्विविचत्
योगे नानाधर्मवती धरा तथा द्वे
ः ति कठिना नाडी कोमला कठिना
शाने द्रव द्रव्यस्य का स्निग्धे कोमला
कठिनापि च दोषे दृष्यगा ग्रंथिले
वपिष्टे पुष्टेव जायते अग्निमांद्या
धातुक्षयलक्षण माहा मंदाग्नेः क्षी
णधातोश्च नाडी मंदतरा भवेत् तद
के क्षीण धातौ च दाहे नाडी क्षीण
तमा भवेत॥

तथा मंदाग्नेः क्षीणतां याति नाडीरं
साकृति स्पष्टेति अग्नेन आमाश
ये पुष्टि विवर्द्धनेन भवंति नाड्यः
ग्रभुजाभिहताः आहारमांद्यादुप
वासतो वा तथैव नाड्यो भुजगाग्र
नानाः प्रसंगाद्दीप्ताग्नि ज्ञान मा
ह लघ्वी भवति दीप्ताग्नेः लघ्वा
वेगवती मता प्रसंगाद्ग्रहणी
मध्याह्न पादे चहंस गमना करे
मण्डूक संस्रवा तस्याग्निर्मंदता
देहे तद्वा ग्रहणीगदे तथा
भेदेन शांता ग्रहणीगदेन नि
वीर्य रूपातिसार भेदे विलंबि
कायां स्रवगा कदाचिदामाति
सारे पृथुता जडाच अथ विसूचि
का ज्ञाने निरोधे मूत्र शकृतोर्वि
सूच्यादि तितराश्रिताः विसूचिका
भिभूते च भवंति भेक वत्तुमाः
प्रसंगादानाह मूत्रकृच्छ्रज्ञान
माह आनाहे मूत्रकृच्छ्रे च भवे
न्नाडीगरिष्टता शूलज्ञान माह
वातेन शूलेन मरुत्स्रवेन स
देवक्रा हि शिरा वहंती ज्वालाम
यी पित्तविचेष्टितेन साध्या न शू
॥ ले नववह्वरूपा अथ प्रमेह ज्ञान

प्रमेहे ग्रंथि रूपा सा स्तनमा त्वाम
हृषणे विष विष्टम्भ गुल्म ज्ञान
माह उत पित्त सद्रूपा विष विष्टिका
यां विष्टम्भ गुल्मेन च वक्र रूपा अ
न्तर्थ्य वातेन अधः स्फुरन्ती उत्थान
भेदिन्यसमामिकाले गुल्मवि
शेषमाह कश्चित् गुल्मेन कम्पो
ऽथ पराक्रमेण पारावतस्येव ग
तिं करोति अथ भगन्दरज्ञानं
व्रणार्थ्यक विने देहे प्रयाति पैति
कं क्रमे भगन्दरानुरूपेण ना।
डीव्रण निवेदने प्रयाति वाति
कं रूपं नाडी पावक रूपिणी।
अथ वोनादि ज्ञानं वोनस्य प्रा।
ल्याभिहतस्य जंतो वेगावरोधा
त्कलितस्य भूयः गतिंविधत्तेथम
तीगजेंद्र मराल मानेव कपोल्ल
रोन स्त्री रोमादिकमपिरक्तादि
ज्ञान क्रमेण ज्ञानव्यं क्वचित्
मकरोगोल्लेखात् क्वचिद्दोषविस्त
मात्रतः क्वचिद्दृष्टान्त् क्वचित्का
लात्संकीर्ण गदनिर्णयः नाडी प
रिचयज्ञानं प्रायशो नैव दृश्यते
तेनप्राग्ज्ञा मयोक्तं यत्नत्समावेय
मत्नमेः इति श्रीशंकर सेन कवि
राजकृतौ नाडीप्रकाशोत्तरीयो
द्यातः ॥
नाडीकः पुं शाकविशेषः पाट
शाक इति नालिताशाक इति
च भाषा तत्पर्यायः पट्टशाकः
२ नाडीशाकः ३ अस्य गुणाः रक्त
पित्तनाशित्वं विष्टम्भित्वं वात
कोपनत्वंच इति भावप्रकाशः
नाडीकलापकः पुं सर्पाक्षी इ
ति भावप्रकाशः ॥
नाडीकेलः पुं नारिकेलः इति
शब्दरत्नावली ॥
नाडीचः पुं शाकविशेषः नालि
ता इति भाषा तत्पर्यायः केबुकं २
पेचुली ३ पेचुः ४ विषरोचनः ५
इति त्रिकाण्डशेषः नाडीच शा
कं द्विविधं तिक्तं मधुर मेवच ॥
रक्तपित्त हरं तिक्तं क्रिमि कुष्ठवि
नाशनं मधुरं पिच्छिलं शीतं ।
विष्टम्भिकफवातकृत् इति राज
वल्लभः ॥
नाडीचरणः पुं पक्षी इतित्रिकाण्ड
शेषः ॥
नाडीजंघः पुं काकः इतित्रिकाण्ड
शेषः मुनि विशेषः। यथा ॥

९ नाडीजंघः सुरगुरु मुनिर्बकि
ष्ठेऽकालोनासावेतोनयुभक्ष
लदोषोपमाधो न शोषान् इतिम
लमासतत्त्वं बकविशेषः यथा
आजगाम स्व भवनं ब्रह्मलोका
त्तवगोत्तमः नाडीजंघइतिख्यातो
दयितो ब्रह्मणः सखा बकराजो
महाप्राज्ञः कश्यपस्यात्म संभवः
राजधर्मेति विख्यातो व भूवा प्र
तिमो भुवि इतिशान्तिपर्व्वणि ।
राजधर्म्मः ॥
नाडीतरंगः पुं काकोलः हिण्डकः
रततिंडकः इति मेदिनी ॥
नाडीतिक्तः पुं नेपालनिम्बः इति
राजनिर्घण्टः ॥
नाडीदेहः पुं भृंगी इति त्रिका
ण्डशेषः ॥
नाडीनक्षत्रं क्ली जन्मनक्षत्रं त
स्मादृक्षाम षोडशाष्टादशत्रयोविं
शपंचविंशा नक्षत्राणि च यथा ज
न्माद्यकर्म ततो दशामभं सां घा
तिकं षोडशाभ समुदय मष्टादश
भविनाशसंज्ञं त्रयोविंशा नाडसःस्मृ
पंचविंशो मानस मेवं नरः षड्क्षः स्यात्
नव नक्षत्रोऽदपतिः स्वजातिदेशा
भिषकर्क्षैः इति ज्योतिस्तत्त्वं ॥
नाडीविग्रहः पुं भृंगी इति हेम
चंद्रः नडीव्रणः पुं सर्वदा गल
न्व्रणः नालीघा इति भाषा इम
मरः तस्यनिदानं यथा यः शो
थमाममितिपक्क मपेक्षते त्यो
यो वा व्रणं प्रचुर पूय मसाधु
वृत्तः अभ्यन्तरंप्रविशतिप्रविदा
र्यतस्यस्थानानि सर्व्वविदितानि
ततः सपूयः तस्यातिमात्र ग
मनान्नाडीति शब्द्यतेत नाडीव य
द्वहतितेनमतातु नाडी वाता
दि दोष भेदेन तस्य रूपाणि य
था दोषैः त्रिभिर्भवति सा पृथगे
कशस्च संमूर्छितैरपि च शल्य
निमित्ततोन्या । तत्रानिलात् प
रुष सूक्ष्ममुखी सशूला फेना
नुविद्धमधिकं स्रवति क्षपासु ॥
पित्तात्तृषा ज्वरकरी परिदाह यु
क्ता पीतं स्रवत्यधिकमुष्ण मह्नः
स्ववापि ज्ञेया कफाद्बहुघनार्जु
न पिच्छिलास्रा स्तब्धा सकंडु र
रुजा रजनी प्रवृद्धा दाहज्वरे
श्वसनमूर्छनवक्त्रशोषा यस्यां

मेवं समभिहितानि च लक्षणानि नामादिशेत् पवनपित्तकफप्रकोपाद्घोरामसृक्क्षयकरीमिव कालरात्रिं दोषत्रयाभिहितलक्षणदर्शनेन तिस्रो गतीर्व्यतिकरप्रभवास्तु विद्यात् शल्यनिमित्तलक्षणं यथा नष्टं कथञ्चिदनुमार्गमुदीरितेषु स्थानेषु शल्यमचिरेण गतिं करोति सा फेनिलं मथितमच्छमसृग्विमिश्रमुष्णं करोति सहसा सरुजञ्च नित्यम् साध्यकृच्छ्रसाध्ययोर्लक्षणं यथा नाडी त्रिदोषप्रभवा न सिध्येत् शेषाश्चतस्रः खलु यत्नसाध्याः इति माधवकरः विडङ्गत्रिफलाकृष्णाचूर्णं लीढं समाक्षिकं हन्ति कुष्ठं क्रिमीन् मेहनाडीव्रणभगन्दरान् इति गारुडपुराणे ॥

नाडीपाकः पुं नाडीकः पाटशाक इति भाषा इति भावप्रकाशः ॥

नाडीस्नेहः पुं भृङ्गी इति शब्दरत्नावली ॥

नाडीहिङ्गु क्ली हिङ्गुभेदः क । लः पतिहिङ्गु इति हिन्दीभाषा तत्पर्यायः पलाशाढ्यः १ जन्तुका ३ रामठी ४ वंशपत्री ५ पिंडाह्वा ६ सुवीर्या ७ हिङ्गुनाडिका अस्य गुणाः कटुत्वं उष्णत्वं कफवातार्त्तिशान्तिकारित्वं विष्टविबन्धदोषानाहामयनाशित्वञ्च इति राजनिर्घण्टः ॥

नाटकं क्ली मुद्राविरहितनिष्कादि यथा तुलाशासनमानानां कूटकृन्नाणकस्य च एभिश्च व्यवहर्त्ता यः सदाप्यो दमुत्तमम् इति मिताक्षरायां साहसप्रकरणीय याज्ञवल्क्यवचनं ॥

नाथ क्ली विविक्ते मतः शिवः ॥ इति संक्षिप्तसारोणादिवृत्तिः नाथ ऋ ऊ दवे उपतापे इति यावत् आशिषि पेश्वे अर्थने ॥ इति कविकल्पद्रुमः ॥

नाथः पुं प्रेष्यप्रभुः तत्पर्य्यायः अधिपः २ ईशः ३ नेता ४ परिवृढः ५ अधिभूः ६ पतिः ७ इन्द्रः ८ । स्वामी ९ आर्य्यः १० प्रभुः ११ भर्त्ता १२ ईश्वरः १३ विभुः १४ ईशिता १५ इनः १६ नायकः १७ इति हेमचन्द्रः ॥

नाथवान् त्रि पराधीनः इत्यमरः ॥ प्रभुविशिष्टश्च ॥

नाथहरिः पुं पशुः इति मुग्धबोधव्याकरणं ॥

नादः पुं शब्दः इत्यमरः अर्द्धचन्द्राकृतिवर्णः स चानुस्वारवद्व्याख्यः यथा अर्द्धचन्द्रोऽनुस्वारः इति भुवनेश्वरीमन्त्रे कुलानन्दः तत्पर्य्यायः अर्द्धेन्दुः २ अर्द्धमात्रा ३ कलाशक्ती ४ सदाशिवः ५ अव्यर्थी ६ तृतीया ७ विश्वमातृकला ८ परा ९ इति बीजवर्णाभिधाने ब्रह्मस्वरूपघोषविशेषः यथा सच्चिदानन्दविभवात् सकलात् परमेश्वरात् आसीच्छक्तिस्ततो नादस्तस्माद्विन्दुसमुद्भवः नादो बिन्दुश्च बीजञ्च स एव त्रिविधो मतः भिद्यमानात् पराद्विन्दोरुभयात्मा रवोऽभवत् स रवः श्रुतिसंपन्नः शब्दो ब्रह्माऽभवत् परं सकलादिति मूर्त्तिर्नादो घोषः बिन्दुः प्रणवः सर्वबीजञ्च सर्ववर्णप्रभवत्वात् तथा च समाहितात्मनो ब्रह्मन् ब्रह्मणः परमेष्ठिनः हृद्याकाशादभून्नादो वृत्तिरोधाद्विभाव्यते ततोऽभूत् त्रिवृदोङ्कारो योऽव्यक्तः प्रभवः स्वराट् इत्यारभ्य ॥ ततो ॥ दक्षरसमाम्नायमसृजद्भगवानजः इति श्रीभागवते इत्यलङ्कारकौस्तुभस्य द्वितीयस्तबकः ॥ नाभेरूर्द्ध्वं हृदि स्थानान्मारुतः प्राणसंज्ञकः नदति ब्रह्मरन्ध्रान्ते तेन नादः प्रकीर्त्तितः अपि च । आकाशाग्निमरुज्जातो नाभेरूर्द्ध्वं समुच्चरन् मुखेऽभिव्यक्तिमायाति यः स नाद इतीरितः स च प्राणिभवोऽप्राणिभव उभयसंभवः आद्यः कायभवो वीणादिभवस्तु द्वितीयकः तृतीयोऽपि च वंशादिभव इत्थं त्रिधा मतः यदुक्तं ब्रह्मणः स्थानं ब्रह्मग्रन्थिश्च यो मतः तन्मध्ये संस्थितः प्राणः प्राणाद्वह्निसमुद्भवः वह्निमारुतसंयोगान्नादः समुपजायते न नादेन विना गीतं न नादेन विना स्वरः न नादेन विना रागस्तस्मान्नादात्मकं जगत् न नादेन विना ज्ञानं न नादेन विना शिवः नादरूपं परंज्योतिर्नादरूपी परो हरिः इति संगीतदामोदरः ॥

नादेयं क्ली सैन्धवलवणं इति रत्नमाला सौवीराञ्जनं इति राज

निर्घण्टः नदी नद संबंधि जलादौ
त्रि यथा नद्या नदस्य वा नीरं ना
देयमितिकीर्त्तितं अस्यगुणाः
नादेयमुदकं रूक्षं वातलं लघु
दीपनं अनभिष्यंदि विशदं कटु
केकफपित्तनुत् इति भाव प्र
काशः ॥
नादेयः पुं काशतृणे वानीरः
वृक्षः इतिराजनिर्घण्टः ॥
नादेयी स्त्री अंबुवेतसः भूमिजं
बुका वैजयंतिका इत्यमरः ना
गरंगः जवा अग्निमंथः इतिमे
दिनी अग्निमंथः काकजंबु ः ।
इतिराजनिर्घण्टः ॥
नाथ ऋ ड. नाधृ स्वाशिरैश्वर्यो
पतेष इतियावत् इति कविकल्प
द्रुमः नाना अ अनेकार्थे उभया
र्थे विनार्थे इतिमेदिनी ॥
नानाकंदः पुं पिण्डालुः इति
राजनिर्घण्टः बहुमूलेच ॥
नानाध्वनिः पुं काहला वेणुवी
णादि शब्दः इति हारावली ॥
नानारूपः त्रि अनेकप्रकारः त
त्पर्यायः विविधः २ बहुविधः ३
पृथग्विधः ४ इत्यमरः ॥

नानावर्णः पुं बहुविध शुक्लादि
वर्णः इति भरतः तत्पर्यायः चि
त्रं २ किर्मीरः ३ कल्माषः ४ शाव
लः ५ एतः ६ कर्बुरः ७ इत्यमरः
आल्लेख्यत्वप्रियादिश्च ॥
नानाविधः त्रि अनेकप्रकारः वि
विधः यथा तथा नानाविधैः पु
ष्पैः दैवैर्वीरकमाहृतैः इतिहरि
भक्तिविलासे ६ विलासः ॥
नानुद्देश्यं त्रि अनानुदेश्य अकर्मकं
इति व्याकरणं ॥
नान्तं क्ली स्तोत्रे इत्युणादिकोषः
नान्दिकरः पुं नान्दीकरः इत्यमरटी
कायां रमानाथः ॥
नान्दी स्त्री नाटकाद्यादौ मंगलार्थो
देव द्विजादीनां माशीः यथा ।
आशीर्वचन संयुक्ता स्तुतिर्यस्मा
त् प्रवर्त्तते देव द्विज नृपा दीनां
तस्मान्नान्दीतिसा स्मृता केचित्
भेरीप्रायानान्दी इत्यमरटीकायां
भरतः नाटकेविघ्नविघातायाया
दौ नान्दी कार्या यदाह भरतः
यद्यप्यङ्गानिभूयांसिपूर्व रंग
स्य नाटके तथाप्यवश्यं कर्त्त
व्या नान्दी विघ्न प्रशान्तये ॥

देव द्विज नृपादीनामाशीर्वाद
परायणा नंदंति देवता यस्मा
त्तस्मान्नान्दी प्रकीर्त्तिता अस्यश्च दे
वद्विज नृपादीनामाशीर्वचनपू
र्विका नान्दी कार्याबुधै यत्नामंग
लारेणसंयुता गंगा नागपतिः ।
सोमः सुधानंदाश्चयाशिषः पभि
र्नामपदैः कार्यानान्दीधारभिरेकि
ता प्रशस्तपद विन्यासा चंद्रसंकी
र्त्तनान्विता आशीर्वाद परा नान्दीयो
ज्येयं मंगलात्मिका काचिद्द्वाप
दानान्दीकाचिदष्टपदातथा सूत्र
धारः पठेन्नान्दीं मध्यम स्वरमाश्रि
तः इतिमालतीमाधवटीका ॥
समृद्धिः यथा नान्दी समृद्धिरि
ति कथ्यते इत्युदाहृतत्वे ब्रह्म
पुराणं ॥
नान्दीकः पुं तोरणस्तम्भः इति
त्रिकाण्डशेषः ॥
नान्दीकरः त्रि नान्दीश्लोकपाठ
कारी तत्पर्यायः नान्दीवादी २
इत्यमरः केचित् भेरीप्राया नान्दी
तद्वादनशीलः अत्र वदि ॥
कुम्भो वादनार्थो विन्यासः इ
तिभरतः ॥ ॥

नान्दीपटः पुं कूपादिमुखबंधनं त
त्पर्यायः नान्दीमुखः २ वीनाहः ३
इति हेमचंद्रः ॥
नान्दीमुखः पुं कूपादिमुखबंधनं
इति हेमचंद्रः वृद्धिश्राद्धं भक्
पितृगणः यथा नान्दीमुखं पितृ
गणं पूजयेत् प्रयतो गृही इति
विष्णुपुराणं स च पित्रादि त्रिकं
मातामहादि त्रिकंच इति गो
भिल सूत्रं वृद्धिश्राद्धं क्ली यथा
नान्दीमुखे विवाहेच प्रपितामहपू
र्वकं अत्रनान्दीमुख पदस्य श्रा
द्धपरत्वेइत्युदाहृततत्वलिखना
दत्रश्राद्ध परत्वं तदिति कर्म
धर्मता यथा तत्र गोभिलः अथा
भ्युदयिक श्राद्धे युग्मानासादये
त् प्रदक्षिणमुपचारः ऋजवोद
र्भाः यवैस्तिलार्थः संपन्नमितित
सिप्रश्नः दधि बदरात्ताक्ताव्यमि
श्राः पिण्डाः नान्दीमुखाः पित
रः प्रीयंतामितिदैवेवाचयित्वा
नान्दीमुखेभ्यः पितृभ्यः पितामहे
भ्यः प्रपितामहेभ्यो मातामहेभ्यः
प्रमातामहेभ्यो वृद्धप्रमातामहेभ्य
श्चप्रीयंतामितिनस्वधांचप्रयुञ्जीतेति

अपि च स्वधेति पदस्थानेषु स्वाहे-
त्येवं वदेदिह पितॄनिति पदात् सर्व-
त्र वदेन्नांदीमुखानिति कर्मादिषु च
सर्वेषु मातरः सगणाधिपाः पू-
जनीयाः प्रयत्नेन पूजिताः पूजयं-
ति ताः प्रतिमास्वथ शुभ्रासु लि-
खिता वा पटादिषु अपि वाक्षत पुं-
जेषु नैवेद्यैश्च पृथग्विधैः कुड्यल-
ग्नां वसोर्धारां सप्त वारान् घृतेन
तु कारयेत् पंचवारान् वा नाति-
नीचां न चोच्छ्रितां आयुष्याणि च
शांत्यर्थं जप्त्वा तत्र समाहितः ष-
ड्भ्यः पितृभ्यस्तदनु श्राद्धदानमुप-
क्रमेत् वसिष्ठोक्तो विधिः कृत्स्नो
द्रष्टव्योऽत्र निरामिषः अतः परं
प्रवक्ष्यामि विशेष इह यो भवेत् ।
प्रातरामंत्रितान् विप्रान् युग्मानु-
भयत स्तथा उपवेश्य कुशान् द-
द्यादृजूनेव हि पाणिना निपातो
न हि सव्यस्य जान्वेनो विधीयते ।
क्वचित् सदा परिचरेत्तथा पितृ-
वच्च देववत् पितृभ्य इति द-
शेषु उपवेश्य कुशेषु तान् गोत्र-
नामभि समंत्र्य पितॄनर्घ्यप्रदापये-
त् नात्रापसव्यकरणं न पित्र्यं तीर्थं

मिष्यते पात्राणां पूरणादीनि दै-
वेनैव तु कारयेत् ज्येष्ठोत्तरकरा-
न् युग्मान् कराग्राग्र पवित्रकान्
कृत्वार्घ्यं संप्रदातव्यं नैकैकस्यात्र दी-
यते मधु मध्विति यस्तत्र त्रिर्जपो-
ऽशितमिच्छता गायत्र्यनन्तरं सोऽत्र
मधु मंत्र विवर्जितः न चाश्नत्सु
जपेदत्र कदाचित् पितृसंहितां ।
अन्य एव जपः कार्य्यः सोमसामा-
दिकः शुभः यस्तत्र प्रकरोऽन्नस्य
निकोचकः पु अंकोठवृक्षः इत्य
मरः निकोठकः पु निकोचकः इ
त्यमरटीकायांभरतः ॥

निक्वणः पुं वीणाद्यान्यस्य चकि
त्रशोदेः शब्दः तत्पर्यायः निक्वाणः २
क्वाणः ३ क्वणः ४ क्वणनं ५ इत्य
मरः प्रादेरप्युपसर्गाद्वत्तरस्य क्व
णधातोः प्रक्वाणः ६ प्रक्वणः ७
इत्यादयः प्रयोगा भवंति आदि
नाभिक्वाणः अभिक्वणः उपक्वाणः
उपक्वणः इत्यादि इतिभरतः ॥

निक्वाणः पु निक्वण इत्यमरः ।

निखर्वं क्ली दशार्बुदसंख्या दश
सहस्रकोटयः इतिलीलावती ॥
हेमचन्द्रस्य पु लिङ्गोऽप्ययं ॥ यथा
क्षुद्रः खर्वो निखर्वश्चेत्यादि निखर्वः
त्रि वामनः इतिहेमचन्द्रः निखिलं
त्रि समस्तं इत्यमरः निगडः पुं
क्ली हस्तिपादलोहमयपादबंधो
पकरणं आडु इतिलोके इतिच
ख्यातः इतिभरतः तत्पर्यायः शृंखलः २
अन्दुकः ३ इत्यमरः हिञ्जीरः ४ अन्दुः ५
इति शब्दरत्नावली ॥

निगडितः त्रि बद्धः इति हेमचन्द्रः ।

निगणः पु होमधूमः इतित्रिका
ण्डशेषः ॥

निगदः पु भाषणं कथनं तत्प
र्यायः निगादः २ इत्यमरः ॥
उच्चैर्जपः यथा निगदस्तु जने वेद्य
इत्यागमः ॥

निगमः पु वाणिजः पुरी कटः
वेदः वणिक्पथः द्वन्द्व इतिया
दवः इति मेदिनी निश्चयः अ
ध्वा इति हेमचन्द्रः ॥

निगरः पु भोजनं इति राज ।
निर्घण्टः ॥

निगरणं क्ली भक्षणं इतिमेदि ।
नी निगरणः पु गलः इतिमेदिनी
होमधूमः इतिशब्दरत्नावली ॥

निगादः पु कथनं इत्यमरः ॥

निगारः पु निगरणं भक्षणं
इत्यमरः ॥

निगालः पु अश्वगलदेशः इत्य
मरः निगालवान् पु अश्वः इ
ति शब्दचन्द्रिका ॥

निगुः पु मनः इतित्रिकाण्डशेषः ॥
मलं मूलं मनोज्ञं चित्रकर्म इति ।
संक्षिप्तसारोणादिवृत्तिः निगूढः
पु वनमुद्गः इतिहेमचन्द्रः ॥

शुभेति यथा आस्ते विधुः परमनि
गूढ एव मौलौ शंभो रिति त्रि जगा
नौ जनन्निह हृतिः अन्तर्निगूढन
यनानलपुञ्जदाहे जानातिकः स्मय
स्तेवनशीतरश्मेः इत्युद्भटः ॥

निग्रहः पु अनुग्रहाभावः इत्यमरः
बंधनं भर्त्सनं सीमा इतिमेदिनी
करहेमचन्द्रौ चिकित्सा इतिरा
जनिर्घण्टः विष्णुः यथा ॥
प्रग्रहो निग्रहो व्यग्रो नैकशृंगो
गदाग्रजः इति तस्य सहस्रनाम।

निग्राहः पुं निग्रहः यथा निग्राह
स्ते भूयात् इति संक्षिप्तसारव्या ।
करणं ॥

निघः पु विषकुसमः समंतात्
तुल्यारोहपरिणाहः इत्यमर
भरतौ ॥

निघण्टिका स्त्री गुलंचकंदः इ
तिराजनिर्घण्टः ॥

निघण्टुः पु नामसंग्रहः इति हे
मचन्द्रः ॥

निघसः पु आहारः इत्यमरः ॥

निघातिः स्त्री लोहघातनी लोहमय
दण्डः इत्युणादिकोषः ॥

निघुष्टं क्ली घुष्टं घोषणं इति

शब्दरत्नावली ॥
निचुम्बः पुं खरः इत्युणादिकोषः
वायुः खरः मार्गः वराहः इ
ति संक्षिप्तसारोणादिवृत्तिः ॥
निघ्नः त्रि अधीनः इत्यमरः अ
कष्टरत्नं इति लीलावती ॥
निष्प्रयः पुं समरः निष्प्रय इ
ति शब्दरत्नावली ॥
निचिकी स्त्री नैचिकी उत्तमा गौः
इत्यमरटीकायां भरतः ॥
निचितं त्रि पूरितं व्याप्तं इति हे
मचंद्रः ॥
निचुलः पुं इज्जलवृक्षः इत्यमरः
वेतसवृक्षः इति राजनिर्घण्टः ।
निचोलः इति हेमचंद्रः ॥
निचुलकं क्ली निचोलकं इति
हारावली ॥
निचोलः पुं येन स्यूतेनास्यूतेन
वा वस्त्रांतरं माच्छाद्यते पाकुडि
इतिख्यातः इत्यमरभरतौ ॥
तत्पर्यायः निचुलः २ उत्तरच्छदः
३ प्रच्छदपटः ४ इति हेमचंद्रः ।
निचोलकः पुं भटादेश्चोलाकृ
तिसन्नाहः तत्पर्यायः कूर्पासः
२ वारवाणः ३ कंचुकः ४ इति

इति हेमचंद्रः ॥
निच्छविः स्त्री तीरभुक्तिदेशः त्रि
होत इति भाषा इति त्रिकाण्डशे
षः निच्छिविः पुं वर्णसंकरजा
तिभेदः इति जटाधरः यथा झल्लो
मल्लश्च राजन्याद्व्रात्यान्निच्छिविरे
व च नटश्च करणश्चैव खसो द्र
विड एव च इति मनुः ॥
निजं त्रि स्वकीयं नित्यं इत्यमरः
निडीनं क्ली पक्षिगतिविशेषः ॥
शनैर्यानं इति जटाधरः ॥
निणिका स्त्री कलायविशेषः ने
उड़ा इति भाषा तत्पर्यायः सती
ला २ तिणी ३ इति शब्दचंद्रिका
नितम्बः पुं स्त्री कट्याः पश्चाद्भागः
पाछा इति भाषा इत्यमरः ॥
स्कंधः रोधः कटकः कटि मात्रं
इति मेदिनी ॥
नितम्बिनी स्त्री प्रशस्तनितंबवि
शिष्टा इत्यमरः स्त्रीमात्रं इति रा
जनिर्घण्टः ॥
नितरां व्य सततं यथा नागो
त्तरो नागघनाभिलाषी चकोरि
जालो नितरां कपोलः इति
कोषीप्रदीपः ॥

नितलं क्ली सप्तपातालान्तर्गतपा
तालविशेषः इति शब्दरत्नावली
नितान्तं क्ली अतिशयः तद्वति
त्रि इत्यमरः ॥
नित्यं क्ली निरंतरक्रियावचनं त
त्पर्यायः सततं २ अनारतं ३ ।
अश्रान्तं ४ संततं ५ अविरतं ६
अनिशं ७ अनवरतं ८ अजस्रं ९
तद्वति त्रि इत्यमरः प्रत्यवायज
नकीभूताभाव प्रतियोगि यथा
एकादश्यामुपोषणं नित्यं ध्वंस
प्रागभावाप्रतियोगि यथा गग
णं नित्यं अहरह जायमानं यथा
नित्यं क्रीडति कुमाराः अहरह १
क्रियमाणत्वेन विधिबोधितं य
था स्नानतर्पणादिकं नित्यं अन
वच्छिन्नपरम्पराकः यथा वर्णा
नित्याः नित्यः त्रि कालत्रयव्यापी
तत्पर्यायः शाश्वतः २ ध्रुवः ३ सदा
तनः ४ सनातनः ५ इत्यमरः ॥
समुद्रे पुं इति राजनिर्घण्टः ॥
नित्यकर्म न् क्ली प्रत्यवायजनका
भाव प्रतियोगी कार्यं इति स्मृतिः
तद्यथा नित्यं नैमित्तिकं चैव नि
त्य नैमित्तिकस्तथा गृहस्थस्य ।

त्रिधा कर्म तन्निबोधमय पुत्रक
पंचयज्ञाश्रितं नित्यं यदेतत् क
थितं तव नैमित्तिकं तथा चान्यत्
पुत्रजन्मक्रियादिकं नित्यनैमित्ति
कं ज्ञेयं पर्वश्राद्धादि पंडितैः इति
मार्कण्डेय पुराणं ॥ तत्त्यागे दोषो
यथा नित्यानां कर्मणां विप्र तस्य
हानिं रहर्निशं अकुर्वन् विहि
तं कर्म शक्तः पतति तद्दिने प्रा
यश्चित्तेन महता शुद्धिमाप्नोत्यना
पदि एवं नित्यक्रिया हानेः क
र्मी मैत्रेय मानवः संवत् सरं
क्रियाहानिर्यस्य पुंसोऽभिजाय
ते तस्यावलोकनात् सूर्यो नि
रीक्ष्यः साधुभिः सदा स्पृष्टे स्नानं
सचेलस्य शुद्धिहेतुर्महामुने पुं
सो भवति तस्योक्ता न शुद्धिः पाप
कर्मणः इति विष्णुपुराणे ३ अंशे १८
अध्यायः तत्रादौ नित्यकर्मकर
णनिषेधो यथा जाते हैततजे
जाते नित्यकर्म न चाचरेत् नैमि
त्तिकं च तद्यः स्वव्यक्तो न चाच
रेत् लोतके च सम्मत् पत्ने तारक
र्माणि मैथुने धूमोद्गारे तथा वांतौ
नित्यकर्माणि संत्यजेत् इत्येते भुके

त्वजीर्णे च नैव भुक्त्वा च किंचन
कर्मकुर्य्यान्नरो नित्यं स्नानकेऽमृत
केऽन्यथा पत्रपुष्पं चनोत्तमूलं भेषज
त्वेन कल्पिते कणादि पिप्पल्यन्ते
च फलं भुक्त्वा न वाचरेत् जलस्या
पि नरश्रेष्ठ भोजनाद्भेषजादृते नि
त्यक्रिया निवर्त्तेत सह नैमित्तिकैः
सदा जलौकां गृध्रपादं च कृमि
गण्डूपदादिकं कामाद्भेन संस्प
पृश्य नित्यकर्म्माणि संत्यजेत् ॥
विशेषतः शिवापूजां प्रमीतापि
तृको द्विजः यावदन्तं सरपर्य्य
न्तं मनसापि न वाचरेत् महागुरु
निपाते तु काम्यं किंचिन्न वाचरेत्
पार्व्विणं ब्रह्मयज्ञं च श्राद्धं देव
पूजनं च यत् गुरुमातृपितृविप्रे च
प्रह्लत्येव च पाणिना नकुर्य्यान्नि
त्यकर्म्माणि रेतःपाते च भैरव।
इतिकालिकापुराणे ५४ अध्यायः
नित्यगतिः पुं वायुः इतिहेमचन्द्रः
नित्यदा अव्य सर्व्वदा यथा पुराणं।
मधुवनं तत्र सान्निध्यं नित्यदा हरेः
इतिश्रीभागवते चतुर्थस्कन्धः ॥
नित्यदानं क्ली प्रतिदिनकर्त्तव्यदा
न यथा नित्यं नैमित्तिकं काम्यं।
विमलं दानमीरितं अहन्यहनि
यत् किंचिद्दीयतेऽनुपकारिणे ॥
अनुद्दिश्य फलं तस्माद्ब्राह्मणा
य तु नित्यकं इति गरुडपुराणे
नित्यप्रलयः पुं चतुर्व्विधप्रलया
न्तर्गत प्रलयविशेषः यथा नि
त्यः सदैव जातानां यो विनाशो दि
वानिशं इति विष्णुपुराणे (१ अंशे ७
अध्यायः) सदैव दीपज्वालावत्
स्रोतस्विनजातानां दिवानिशं यो ६
विनाशः स नित्यः इति तट्टीका
यां स्वामी ॥
नित्ययौवना स्त्री द्रौपदी इतिहे
मचन्द्रः स्थिरयौवने त्रि ॥
नित्यवैकुण्ठः पुं विष्णोः स्थानवि
शेषः यथा ऊर्द्ध्वं नभसि संविष्टो
नित्यवैकुण्ठ एव च आत्माकाश
समो नित्यो विस्तृतश्चन्द्रबिंबवत्
ईश्वरेच्छासमुद्भूतो निर्लक्ष्योऽप्यनि
राश्रयः आकाशवत् सुविस्तार
श्चाम्बूल्यरत्न निर्म्मितः तत्र नारा
यणः श्रीमान् वनमाली चतुर्भुजः
लक्ष्मीसरस्वतीगंगातुलसीपति
रीश्वरः सुनन्दनन्दकुमुद पार्षदादि
भिरन्वितः सर्व्वेशः सर्व्वसिद्धेशो ॥

भक्तानुग्रहकारकः इति ब्रह्मवै
वर्त्ते प्रकृतिखण्डे ५४ अध्यायः ॥
नित्यहोरं क्ली वैधेतरहोरं ॥
रागग्राम केशच्छेदनं यथा वृ
द्धादिते निष्पाहृदे बुधेज्ञादिव
सेनरः। नित्यहोरे प्रकुर्व्वीत ज
न्ममासे न तु क्वचित् इति ज्योतिः
सागरसारः राजमार्त्तण्डे तु न
स्नान मात्र गमनोत् सकभूषि
तानां मध्यकं भुक्तं रणकाल
निवासनानां संध्यानिशा शनि
कुजार्क दिनेषु रिक्ते होरं हितं प्र
तिपदाष्टि नवापि विष्णा इति ज्यो
तिस्तत्व तत्र मासाः सौराः भाद्र
पौष चैत्रा निषिद्धाः जन्ममासो
पि निषिद्धः तद्दिने वै विहिता वा
रस्तु बुधसोमयोर्विहितः साम
गानां मंगलवारोपि तिथयस्तु नं
दा रिक्ता पूर्णिमामावास्याष्टमी।
भिन्ना विहिताः नक्षत्राणि रेवत्य
श्विनी पुष्यः धनिष्ठा ज्येष्ठा श्रव
णा स्वाती हस्ता मृगशिरः पु
नर्व्वसुः चित्रा राजादे
शाद्विजादेशो विवाहे व्रतस्नानका
ले च वधमोक्षे यज्ञे कर्म्मण्यपि
दीक्षायां निषिद्धमासादिष्वपि का
र्य्यं अशक्तेष्वन्निषिद्धेऽपि दिने के
शव मानर्न्नपुरं पाटलिपुत्रपुरी
महीक्षितौ दितिमदितिं च स्म
रन्तो हौर विधौ भवति कल्याणं
इच्छन्सार्थ्यं कार्य्यं इति ज्योतिष
नित्याः स्त्री पार्व्वती मनसादेवी
इति शब्दरत्नावली शक्तिविशेषः
प्रसृता मंत्रा यथा वाग्भवं काम
वीजं च नित्यक्लिन्नेमदो पुनः द्वे
वह्निः वधूमंत्रो द्वादशार्णोयमी
रितः ध्यानं यथा अर्द्धेन्दुमौलि
मरुणाममराभिवंद्या मंभोज
पाश सृणि शूलि कपाल हस्तां
रक्तांग राग वसनाभरणां त्रिने
त्रां ध्यायेच्छिवस्य वनितां मद वि
ह्वलांगीं इति तंत्रसारः ॥
नित्यानध्यायः पुं सर्व्वथावर्ज्ज
नीयवेदपाठकालादिः यथा
इमान्नित्यमनध्यायान् धीयानो
विवर्ज्जयेत् अध्यापनं च कुर्व्वा
णः शिष्याणां विधिपूर्व्वकं
कर्णस्रवेऽनिले रात्रौ दिवा
पांशु समूहने ॥ एतौ वर्षा
स्वनध्यायौ अध्या यज्ञाः प्रव

तने विद्युत्स्तनितवर्षेषु महो
ल्कानां च संप्लवे आकालिकमन
ध्यायमेतेषु मनुरब्रवीत् एतां
स्त्वभ्युदितान् विद्यात् यदा प्रादुः
ष्कृताग्निषु तदा विद्यादनध्यायमनृ
तौ चाभ्रदर्शने निर्घातभूमिचल
ने ज्योतिषां चोपसर्जने एतानाका
लिकान् विद्यादनध्यायानृ
तावपि प्रादुष्कृतेष्वग्निषु तु विद्यु
त्स्तनितनिःस्वने सज्योतिः स्या
दनध्यायः शेषे रात्रौ यथा दिवा।
नित्यानध्याय एव स्याद्ग्रामेषु न
गरेषु च धर्मनैपुण्यकामानां पू
तिगन्धे च सर्वदा अन्तर्गतशवे ग्रामे
वृषलस्य च सन्निधौ अनध्यायो
रुद्यमाने समवाये जनस्य च उ
दके मध्यरात्रे च विण्मूत्रस्य विस
र्जने उच्छिष्टः श्राद्धभुक् चैव मन
सापि न चिन्तयेत् प्रतिगृह्य द्वि
जो विद्वानेकोद्दिष्टस्य केतनं ॥
त्र्यहं न कीर्तयेद्ब्रह्म राज्ञो राहोश्च
सूतके यावदेकानुद्दिष्टस्य गन्धो।
लेपश्च तिष्ठति विप्रस्य विदुषो देहे
तावद्ब्रह्म न कीर्तयेत् शयानः प्रौ
ढपादश्च कृत्वा चैवावसक्थिकां नाधी
यीत ॥

मिषं जग्ध्वा सूतकान्नाद्यमेव
च नीहारे बाणशब्दे च संध्या
योरेव चोभयोः अमावास्याचतु
र्दश्योः पौर्णमास्यष्टकासु च अ
मावास्या गुरुं हन्ति शिष्यं हन्ति चतु
र्दशी ब्रह्माष्टकापौर्णमास्यौ त
स्मात्ताः परिवर्जयेत् पांशुवर्षे दि
शां दाहे गोमायुविरुते तथा श्व
खरोष्ट्रे च रुवति पंक्तौ च न पठे
द्द्विजः नाधीयीत श्मशानान्ते ग्रा
मान्ते गोव्रजेऽपि वा वसित्वा मैथुनं
वासः श्राद्धिकं प्रतिगृह्य च प्राणि
वा यदि वाप्राणि यत् किंचित्।
श्राद्धिकं भवेत् तदालभ्याप्यनध्या
यः पाण्यास्यो हि द्विजः स्मृतः चौ
रैरुपप्लुते ग्रामे संभ्रमे चाग्निकारिते
आकालिकमनध्यायं विद्यात् सर्वा
द्भुतेषु च उपाकर्मणि चोत्सर्गे त्रिरा
त्रं क्षेपणं स्मृतं अष्टकासु त्वहोरात्र
मृत्वन्तासु च रात्रिषु नाधीयीताश्व
मारूढो न वृक्षं न च हस्तिनं न ना
वं न खरं नोष्ट्रं नेरिणस्थो न यान
गः न विवादे न कलहे न सेनायां
न संगरे न भुक्तमात्रे नाजीर्णे न।
वमित्वा न सूतके अतिथिचा ॥

नचुत्वाप्यमारुते वातिवाभृशं।
रुधिरे च स्रुते गात्राच्छस्त्रेण च प
रिक्षते साम ध्वनावृग्यजुषी ना
धीयीत कदाचन वेदस्याधीत्य
वाप्यन्तमारण्यकमधीत्य च ऋ
ग्वेदो देवदैवत्यो यजुर्वेदस्तु मा
नुषः सामवेदः स्मृतः पित्र्यस्त
स्मात्तस्याशुचिर्ध्वनिः एतद्वि
द्वांसस्त्रयी निष्कर्षमन्वहं
क्रमतः पूर्वमभ्यस्य पश्चाद्वेदम
धीयते पशुमण्डूकमार्जारश्वस
र्पनकुलाखुभिः अन्तरागमने
विद्यादनध्यायमहर्निशं द्वावेव
वर्जयेन्नित्यमनध्यायौ प्रयत्नतः
स्वाध्यायभूमिं चाशुद्धामात्मानं
चाशुचिं द्विजः इति मानवे ४ अध्या
यः नित्यानित्यवस्तुविवेकः पु ब्र
ह्मैव नित्यं वस्तु ततोऽन्यदखिलमनि
त्यमिति विवेचनं इति वेदान्तसारः
नित्याभैरवी स्त्री भैरवीविशेषः अ
स्या ध्यानादिकं षट्कूटा भैरवी।
ध्यानादिवत् ध्यानं यथा बालार्क
कोटिप्रभां देवीं जवाकुसुमसन्निभां
मुण्डमालावलीरम्यां बालसूर्य
समांशुकां स्वर्णकलसा

कारपीनोन्नतपयोधरां पाशां
कुशौ पुस्तकं च तथा च जपमा
लिकां दधतीमिति शेषः इति
तन्त्रसारः ॥
निदं क्ली विषं इति शब्दचन्द्रिका
निदङ्गुः पु मनुष्यः इति शब्दचन्द्रि
का निदर्शनं क्ली दृष्टान्तः उदाहरणं
यथा व्यक्तः प्राप्तेऽपि दृष्टान्ताभ्युभे
शास्त्रनिदर्शने इति नानार्थटी
कायाभरनः ॥
निदर्शना स्त्री काव्यालंकारविशे
षः तस्य लक्षणं। अर्थान्तरप्रवृ
त्तेन किंचित् तत्सदृशं फलं सद
सत्वा निदर्श्यते यदि सा स्यान्निद
र्शना उदाहरणं यथा उदयन्नेव
सविता पद्मेष्वर्पयति श्रियं विभा
वयितुमृद्धीनां फलं सुहृदनुग्र
हं इति दर्पणः ॥
निदाघः पु ग्रीष्मकालः उष्णः
घर्मः इत्यमरमेदिनीकरौ नि
दाघे वर्णनीयानि यथा पाटल
पुष्पं १ मल्लिकापुष्पं २ तापः ३
सरः ४ पथिकशोषः ५ वायुः ६
सेकः ७ शाक्तः ८ प्रपा ९ स्त्री १० स
गल्सा ॥ आम्रादिफलपाकः १२ ॥

इतिकविकल्पलता ॥
निदाघकरः पुं सूर्य्यः इति हारा
वली ॥
निदाघकालः पुं ग्रीष्मर्त्तुः सत्वज्यै
ष्ठाषाढ मासौ यथा प्रचण्डसू
र्य्यः स्पृहनीय चन्द्रमाः सदावगाह
क्षतवारि संचयः दिनान्तरम्यः
भ्युपशान्त मन्मथो निदाघकालः
समुपागतः प्रिये इति ऋतु सं
हारः ॥
निदानं क्ली आदिकारणं इत्यमरः
कारणं वत्सदामादि कारणत्व
यः इति मेदिनी शुद्धिः तपःफ
अवसाने लयाचनं इति हेमचन्द्रः रोगनि
र्णयः इति विश्वः तत्पर्य्यायः रो
गलक्षणं २ आदानं ३ रोगहेतुः
४ इति राजनिर्घण्टः निदानं पू
र्व्वरूपाणि रूपाण्युपशयस्तथा
सम्प्राप्तिश्चेति विज्ञानं रोगाणां
पञ्चधा स्मृतं निमित्त हेत्वायतन
प्रत्ययोत्थान कारणैः निदा
नं माहुः पर्य्यायैः प्राग्रूपं
येन लक्ष्यते इति ॥
माधवकरः ॥ ॥
निदिग्धं त्रि लेपादिनावर्द्धितं ।
तत्पर्य्यायः उपचितं २ इत्यमरः ॥
निदिग्धा स्त्री एला इति शब्दचन्द्रि
का निदिग्धिका स्त्री कण्टकारिका
इत्यमरः एला इति शब्दचन्द्रिका
निदिध्यासनं क्ली पुनः पुनः स्म
रणं अद्वितीयवस्तुनि तदाकारा
कारिताया बुद्धेः स्वजातीय प्रवा
हः इति वेदान्तसारः ॥
निदेशः पुं आज्ञा इत्यमरः ॥
कथनं उपान्तं इति मेदिनी ॥
भाजनं इति धरणिः ॥
निदेशिनी स्त्री दिक् इति राज
निर्घण्टः ॥
निदेष्टा त्रि निदेशाकर्त्ता निदि
शति इति व्युत्पत्त्या तृणप्रत्यया निष्प
न्नः निद्रा स्त्री मेध्यामनः संयोगः
इति जगदीशः सुषुप्त्यवस्थास्वप्ना
वस्था इति चण्डीटीकायां नागभट्टः
घुम इति भाषा तत्पर्य्यायः श
यनं २ स्वापः ३ स्वप्नः ४ संवेशः ५
इत्यमरः सुप्तिः ६ स्वपनं ७ इति
शब्दरत्नावली यथाकाले सेवि
तनिद्रा गुणाः धातुसाम्यत्व म
तन्द्रितत्वं पुष्टिवर्णवलोत्साह ॥
अग्निदीप्तिकारित्वंच ॥ दिवास्व

गुणाः स्निग्धत्वं लट् शूल हिक्का
जीर्णातिसारिणां हितत्वंच ॥
आसीनप्रचलायितस्य उपविश्य
निद्रावशाद्दोलायमानस्य उपवि
श्यनिद्रावशाद्दोलायमानस्यगुणाः
अरूक्षत्वं अनभिष्यन्दित्वंच नि
द्रासात्म्यी कृतानां दिवा रात्रौ च
स्वपतां जाग्रतां वा दोषा न भव
न्ति इति राजवल्लभः ॥
निद्राहीना यथा ऊर्ता निद्राद
रिद्रस्य परप्रेष्यकरस्यच । पर
नारी प्रसक्तस्य परद्रव्य हरस्यच
स्वावस्थमा यथा स्वर्व्वस्वपिति
लक्षणवान् व्याधि मुक्तश्च यो नरः
सावकाशस्तु यो भुंक्ते यस्तु दा
रैर्न्न शङ्कितः इति गारुडे नीति
सारः ॥
निद्राणः त्रि निद्रागतः तत्पर्य्यायः
सुप्तितः २ इत्यमरः ॥
निद्रालुः त्रि निद्राशीलः तत्पर्य्या
यः स्वप्नक् २ शयालुः ३ इत्यमरः
निद्रालुः स्त्री वार्त्ताकी वनवर्व्वरि
का इति राजनिर्घण्टः नली नामगं
धद्रव्य इति शब्दचन्द्रिका ॥
निद्राद्रुः पुं अन्धकारः इति श
ब्दमाला ॥
निद्रासंजननं क्ली श्लेष्मा इति श
ब्दमाला ॥
निधनं क्ली नाशः सत्त्व अदर्शनं
मरणंच कुलं तत्कुलस्यानकु
लसुख्येष्ठ इत्यमर भरतौ ॥
निधनः पुं क्ली मरणं इत्यमरः
वधतारा सा तु जन्म नक्षत्रात्
सप्तमी तारा यथा जन्म सम्पद्वि
पत् क्षेमः प्रत्यरिः साधको वध
इत्यादि प्रत्यरौ लवणं दद्यान्निध
ने तिल काञ्चनं इति ज्योतिस्तत्वे
धनहीनेत्रि ॥
निधानं क्ली निधिः इति हेमचन्द्रः
आधारः यथा निधान भूगर्त्तस
घः सर्व्वं समधिगच्छति इत्याग
मः कार्य्यावसाने प्रवेश स्थाने ।
यथा एतज्ज्ञानावतारणां नि
धानं वीज मव्ययं इति श्रीभा
गवतं निधिः पुं नलिकानाम
गन्धद्रव्य समुद्रः इति राजनि
र्घण्टः जीवकौषधिः इति शब्द
चन्द्रिका आधारः यथा गुणा
निधिः इत्यादयः विष्णवाद्य
स्वामिक भूयात धनविशेषः इति
साचः कुवेरस्य नवधा रत्न वि।
शेषः तत्पर्य्यायः ॥

शेवधिः २ इत्यमरः सेवधिः २
इति भरतः तद्भेदा यथा प
द्मोऽस्त्रियां महापद्मः शङ्खो मक
रकच्छपौ मुकुन्दकुन्दनीलाश्च
खर्वोऽपि निधयो नव इति हारा
वली मार्कण्डेयपुराणे तु खर्वर
हिता अष्टावेव उक्ताः इति
भरतः तल्लक्षणं यथा पद्मिनी
नाम या विद्या लक्ष्मीस्तस्याधि
देवता तदाधारश्च निधयस्ता
न्मे निगदतः शृणु तत्र पद्म म
हापद्मौ तथा मकर कच्छपौ
मुकुन्द नीलौ नन्दश्च शङ्खश्चै
वाष्टमो निधिः सत्यामृद्धौ भ
वन्त्येते सिद्धिः सह भवन्त्यमी
एते ह्यष्टौ समाख्याता निध
य स्तव क्रोष्टुके पद्मिनालोकि
ते चित्तं मनुष्यस्य महामते
यादृक् स्वरूपं भवति तन्मे।
निगदतः शृणु पद्मो नाम
निधिः पूर्वः स यस्य भवति
द्विज स तस्य तत्सुतानाञ्च त
त्पौत्राणाञ्च नान्यगः दाक्षि
ण्यसारः पुरुषस्तेन चाधिष्ठितो
भवेत् सत्त्वाधारो महाभागो यतो
सौ सात्त्विको निधिः सुवर्णरूप्यताम्रा
दिधातूनाञ्च परिग्रहं करोत्य ॥

तितरां सोऽप्यतेषाञ्च क्रयविक्रयं
करोति च तथा यज्ञान् यज्विनां
च प्रयच्छति सम्पादयति कामां
च सद्म्नैव यथाक्रमं सभा देव
निकेतांश्च सकारयति तत्मनाः
सत्त्वाधारो निधिश्चान्यो महापद्म
इति स्मृतः सत्त्वप्रधानो भवति ते
न चाधिष्ठितो नरः करोति पद्म
रागादिरत्नानाञ्च परिग्रहं समौ
क्तिकप्रवालानां तेषाञ्च क्रयवि
क्रयं ददाति योगशीलेभ्यस्तेषा
मावसथांस्तथा स कारयति त
च्छीलः स्वयमेव च जायते तत्प्र
सूतास्तथा शीलाः पुत्रपौत्रक्र
मेण च एषोऽर्द्धि मात्रः सप्तसौ पु
रुषांश्च न मुञ्चति महापद्मस्त
विप्राणां यन्तेसम्प्रजायते ता
मसो मकरो नाम निधिस्तेना
वलोकितः पुरुषोऽप्यतमः प्रा
यः सुशीलोऽपि हि जायते बाण
खड्गर्ष्टि धनुषां चर्म्मणाञ्च परिग्रहं
दशनानाञ्च कुरुते याति मैत्रीञ्च
राजभिः ददाति शौर्य्यवृत्तीनां भू
भुजां ये च तत्प्रियाः क्रयविक्रयञ्च
शस्त्राणां नान्यत्र प्रीतिमेति च एक
स्यैव भवत्येव नरस्य मस्तनान्वगः

द्रव्यार्थं दस्युतो नाशं संग्रामे वापि
सं व्रजेत् कच्छपाख्यो निधिर्यो
सौ नरस्तेनाभिवीक्षितः तमः प्र
धानो भवति यतो सौ तामसो नि
धिः व्यवहारान् शिष्टस्य पण्यजा
तं करोति च कर्मान्तान्नखिलांश्च व
न विश्वसिति कस्यचित् समस्ता
नि यथांगानि निरुद्ध्यास्ते हि क
च्छपः तथावष्टभ्य रत्नानि तिष्ठ
त्याकुलमानसः न ददाति न वा भुं
क्ते तद्विनाशभयाकुलः निधान
मुर्व्यां कुरुते निधिः सोऽप्येकपुरु
षः रजोगुणमयश्चान्यो मुकुन्दो ना
मयो निधिः नरोऽवलोकितस्ते।
न तद्गुणो भवति द्विज वीणा वे
णुमृदङ्गादिगीतवाद्यपरिग्रहं।
करोति वाद्यतां वित्तं नर्त्तकानाञ्च प्रय
च्छति वन्दिमागधसूतानां विटानां
लास्यपाठिनां ददात्यहर्निशं भो।
गान् भुङ्क्ते तैस्तु समं द्विज कुलटा
स्वभिप्रायस्य भवत्यैश्वर्यतद्विधैः
प्रयाति सङ्गमेकं च स निधिर्भ
जते नरं रजःसत्त्वमयश्चान्यो
नन्दो नाम महानिधिः उपैति
स्तम्भ ॥

मधिकं नरस्तेनावलोकितः सम
स्तधातुरत्नानां पण्यधान्यादिक
स्य च परिग्रहं करोत्येष तथैव क्र
यविक्रयं आधारः स्वजनानाञ्च
आगताभ्यागतस्य च सहते ना
वमानोक्तिं स्वल्पामपि महामु
ने स्तूयमानश्च महतीं प्रीतिं व
धाति यच्छति यं यमिच्छति वै
कामं मृदुत्वमुपयाति च वधो
भवन्त्यस्य संतति मभ्येति शोभनां
सन्ततो सप्त च नरान्निधि नन्दो
नुवर्त्तते प्रवर्द्धमानोऽष्टनरम
ष्टभागेन सप्तम दीर्घायुष्यं च
सर्वेषां पुरुषाणां प्रयच्छति
बन्धूनामेव भरणं ये च दूरादु
पागताः तेषां करोति वै नन्दः
परलोके न चादृतः भवत्यस
न च स्नेहः सहवासिषु जाय
ते पूर्वमित्रेषु शैथिल्यं प्रीति
मन्यैः करोति च तथैव सत्त्व
रजसी यो बिभर्त्ति महानिधिः
स नील संज्ञस्तत्सङ्गी नरस्तच्छी
लभाग् भवेत् वस्त्रकार्पासधान्या
दि फलपुष्पपरिग्रहं मुक्ताबि
द्रुमशङ्खानां शुक्त्यादीनां महामुने
काष्ठादीनां करोत्येष यच्चान्यज्जल

संभवं क्रयविक्रयमप्येषांनाम
करमनेमनः तडागानूपुष्करि।
एयश्चतथारामानूकरोतिचवंथ
चसरितांहृदांस्तथारोपयतेन
रः अनुलेपन पुष्पादि भोगभुक्
वापिजायते त्रिपोरुषश्चापि
निधिर्नीलोनामेति विश्रुतः।
रजस्तमोमयश्चान्यः शंखसंज्ञो
ह्ययोनिधिः तेनापिनीयतेविष
तद्गुणात्वंनिधीश्वरः एकस्यैव
भवत्येषनरंनान्यमुपैतिच य
स्य शंखोनिधि स्तस्य स्वरूपंको
ष्टके मृणु एकएवात्मनामृष्ट
मन्नंभुंक्ते नथावरं कदन्नभुक्
परिजनोनचशोभन वस्त्रभृत
न ददातिसुहृद्भार्यासुतपौत्र
स्नुषादिषु स्वपोषणपरःशं
खीनरोभवतिसर्वदा इत्येते।
निधयः ख्यातानराणां मर्थदे
वताः मिश्रावलोकिनो मिश्र
स्वभाव फल दायिनः यथा
ख्यातः स्वभावस्तभवत्येकवि
लोकनात् सर्वेषामाधिपत्येच
श्रीरेषाद्विजपद्मिनी इतिमार्कंडे
यपुराणे निधि लक्षणं ॥
निधिनाथः पुं कुबेरः इतित्रिकांड
शेषः निधीशः निधीश्वरः नि
धिप्रभुः इत्यादयः ॥
निधुवनं क्ली मैथुनं इत्यमरः
नर्म केलिः इतिशब्दरत्नावली
कल्पः इतिमेदिनी ॥
निध्यानं क्ली दर्शनं इत्यमरः॥
निध्वानः पुं शब्दः इतिशब्दरत्ना
वली॥
निनदः पुं शब्दः इत्यमरः नि
नादः पुं शब्द इत्यमरः ॥
निंदकः त्रि निंदाकारकः यथा
न भारा पर्वता भारा न भाराः
सप्तसागराः निंदका हि महा।
भारा भारा विश्वास घातकाः॥
इति कर्मलोचनं ॥
निंदतलः त्रि निंदितहस्तः इति
शब्दरत्नावली ॥
निंदनं क्ली निंदा इतिशब्दरत्नावली
निंदा स्त्री अपवादः उःक्रोति ः इति
शब्दरत्नावली निंदनं तत्पर्यायः
अवर्णः २ आक्षेपः ३ निर्वादः ४
परीवादः ५ अपवादः ६ उपक्रोशः
७ जुगुप्सा ८ कुत्सा ९ गर्हणं १०।
इत्यमरः गर्हा ११ कुत्सनं १२ परि
वादः १३ जुगुप्सनं १४ अपक्रोशः

१५ भर्त्सनं १६ अववादः १७ इति
शब्दरत्नावली गर्हणं १८ धिक्
क्रिया १९ इति हेमचंद्रः हर केश
वभक्तादि निंदायां दोषो यथा॥
हरकेशवयो र्भक्तं यच निंदंति
पापिनः भूदेवान् ब्राह्मणांश्चैव
स्वगुरुंश्च पतिव्रताः यतिं भिक्षु
ब्रह्मचारि सह्वीबीजान् सरांस
था पच्यंतेकाल सूत्रे ते यावच्चं
द्रदिवाकरौ श्लेष्म मूत्र पुरीषेषु
पूरिते तेदिवानिशं भक्षिताः की
टनिकरैः शार्ङ्कुर्वंतिकातराः॥
येनिंदंति च ब्रह्माणं स्रष्टारं ज
गतांगुरुं शिवं सुराणां प्रवरं
दुर्गां लक्ष्मीं सरस्वतीं सीतांच
तुलसींगंगां वेदांश्च वेदमातरं
व्रतंतपस्यां पूजांच मंत्रं मंत्रप्रदं
गुरुं तेपच्यंतेः धकूपेवेचाब्दपुषा
र्द्धं विधेरहो भक्षिताः सर्पसं।
घैश्च शार्ङ्कुर्वंति संततं योनिं
दंति हृषीकेशं देवं साम्यं विद्या
यच विस्नुभक्तिप्रदं वैष्णवपुराणंच
श्रुतेःपरं गायां तदंगजाभेगापीश्चे
स्तरणांश्च सदार्च्चितान् ते पच्य
तेः वटे देवविधानुरायुषासमं
अधोमुखा ऊर्द्ध जंघा सर्प संघैश्च
वेष्टिताः भक्षिता विकृताकारैः
कीटैः सर्पैः समाहितैः अभीव
कातराभीताः शार्ङ्कुर्वंति संततं
पूर्वाश्च मूत्र पुरीषाणि अवं भक्ष
तितोभिताः उल्कांददति हृष्टा
श्चतन्मुखे यम किंकराः त्रिसं
ध्यंतजंनेकृत्वा कुर्वंति दंडताडनं
कुर्वंतिमूत्रपानेच प्रहारै स्तषि
ता भिया तदाकल्पांतरे सृष्टौ स
ष्टेश्च प्रथमेपुनः तेषां भवेत्
प्रतीकार इत्याहकमलोद्भवः
परनिंदाविनाशाय स्वनिंदा य
शसेपरं इति ब्रह्मवैवर्त्तेश्रीकृ
ष्णजन्मखंडे ४०।४१ अध्यायः
वेदनिंदारतान्मर्त्यान्देवनिंदार
तांस्तथा द्विजनिंदारतांश्चैवमन
सापि न चिंतयेत् न चात्मानं प्र
शंसेद्वा परनिंदांश्च वर्जयेत् वे
द निंदां देवनिंदां प्रयत्नेन विवर्ज
येत् यस्तु देवानृषीश्चैव वेदं वा निं
दति द्विजः न तस्य निष्कृतिर्दृष्टा श
स्त्रेष्विह मुनीश्वराः निंदयेद्वैगुरुं
देवं वेद वा सोपबृंहणं कल्पकोटि
शतंसाग्रं रौरवे पच्यते नरः॥

तूष्णीमासीत निंदायां न ब्रूयात्
किंचिदुत्तरं कर्णौ पिधाय गंतव्य
न चैनानवलोकयेत् वर्जयेद्वेप
रेषां तु गृहेषु गर्हणं बुधः नति
द्वेष्योगिनः सिद्धान् वृत्तिनोपाय
तीर्थस्तथा देवतायतनं प्राप्तो देवा
नामाकृतिं तथा इति कौर्म्मे उ।
परिभागे १४ अध्यायः॥
निंदास्तुतिः स्त्री व्याजस्तुतिः य
था निंदास्तुतिभ्यां वाच्याभ्यां गम्य
ते स्तुति निंदयोः निंदया स्तु
र्गम्यत्वे व्याजेन स्तुतिरिति च श्रुत
पद्माव्याजस्तुतिः इति साहित्य
दर्पणः अपि च यदि निंदसि व ।
हेलाति व्याजस्तुतिरसौ मता उदा
हरणं तापसेनापि रामेण जिते
यं भूतधारिणी त्वया राज्ञापि ।
सैवेयं जिता मा भून्मद स्तव इ
ति दंडी कथमवनिपदर्पो यन्नि
शातासिधारादलनगलितमूर्द्ध्नां
विद्विषां स्वीकृता श्रीः ननु ।
तव निहतारे रपसौ किं न नीता
त्रिदिवमपगतांगैर्वल्लभा कीर्त्ति
रेभिः इत्यादौ निंदास्तुतिर्वपुषा
स्वरूपस्य इति काव्यप्रकाशः॥

निंदितः त्रि निंदायुक्तः तत्पर्य्यायः
धिक्कृतः २ अपध्वस्तः ३ निर्भर्त्सि
तः ४ इति जटाधरः॥
निंद्रुः स्त्री मृतवत्सा निंद्यातेः प्र
ज्ञात्वेनासौ निंदि ऊत्तया मित्रा
दौ उणादिकरु प्रत्ययः नेंद्रुः इ
ति च पाठः यथा नष्टापत्यप्रसूति
का नेंद्रुरिति हेमचंद्रः॥
निपः पुं क्ली कलसः इत्यमरः
कदंब वृक्षे पु इति शब्दचंद्रिका
निपठः पुं पाठः इत्यमरः॥
निपतनं स्त्री युद्धभूमि इति मुग्धबोध
टीकायां दुर्गादासः निपाठः पुं पठने इत्यमरः
निपातः पुं मृत्युः इति त्रिकाण्ड
शेषः पतने यथा वने वा हर्म्ये
वा सम कर निपातो हिम करः
इत्यानंदलहरी॥
निपातनं क्ली खलीकारः इति
भरतः अधोनयनं इति सर्वस्व
तत्पर्य्यायः अववनायः २ इत्य
मरः निपातनं ३ इति नयना
नंदः व्याकरणलक्षणानुक्त
पद्म पद ॥ ॥

निपाकः पुं पाकः इति शब्दरत्नावली॥

पदं यथा निपातनादिष्टसिद्धिः य
त्स्वलक्षणेनानुक्तं पदं तत्सर्वं निपात
नात् सिद्धमिति भाष्यं॥ निपात
लक्षणं यथा वर्णागमो वर्णवि
पर्य्ययश्च द्वौ चापरौ वर्णविकार।
नाशौ धातोस्तदर्थातिशयेनयो
गस्तदुच्यते पंचविधं निरुक्तं॥
इति प्राचः इति दुर्गादासः तद्य
था वर्णागमो गवेंद्रादौ सिंहे व
र्णविपर्य्ययः षोडशादौ विकारः
स्यात् वर्णनाशः पृषोदरे इति
कलापपंजी॥
निपानं क्ली कूपसमीपशिलादि
निबद्ध पशुपानार्थकृतकूपोद्द
तांबु स्थानं इति भरतः तत्पर्य्यायः
आहावः २ इत्यमरः गोदोहनपा
त्रं इति त्रिकाण्डशेषः निपुणः त्रि
कार्य्यक्षमः तत्पर्य्यायः प्रवी
णः २ अभिज्ञः ३ विज्ञः ४ निष्णा
तः ५ शिक्षितः ६ वैज्ञानिकः ७
कृतमुखः ८ कृती ९ कुशलः १०
इत्यमरः संख्यावान् ११ मतिमा
न् १२ कुशाग्रीयमतिः १३ कृष्टिः
१४ विदुरः १५ बुधः १६ दक्षः १७
नैदिघः १८ कृतधीः १९ सुधीः २०
विद्वान् २१॥ ॥

कृतकर्मा २२ विचक्षणः २३ विदग्धः २४
चतुरः २५ प्रौढः २६ वोद्धा २७।
विशारदः २८ सुमेधाः २९ सुम
तिः ३० नीष्णः ३१ प्रेक्षावान् ३२ वि
बुधः ३३ विदन् ३४ इति राजनिर्घंटः
निफला स्त्री ज्योतिष्मती इति भा
वप्रकाशः॥
निफेनं क्ली अफेनं इति राज
निर्घंटः॥
निबंधं क्ली गीतं इति शब्दरत्नाव
ली निबंधः पुं अनाहरोगः ग्रं
थसंहतिः इति हेमचंद्रः निबद्ध
तः इति जटाधरः बंधनं। यथा
दैवी सम्पद्विमोक्षाय निबंधा
यासुरी मता इति श्रीभगवद्गीता
निबंधनं क्ली हेतुः इति हेमचंद्रः
उपनाहः सत्ववीणानं ग्रो निबं
धनोर्द्धभागः इत्यमरः बंधनं च
निबंधा पुं निबंधकर्मा ग्रंथ
कर्मा इति व्याकरणं॥
निबंधितः त्रि बद्धः निबंधो स्य
जातः इत्यर्थे इतप्रत्ययनिष्पन्नः
निबर्हणं क्ली मारणं इत्यमरः
निभः त्रि सदृशः इत्यमरः
प्रकाशः व्याजे पुं इति शब्द।

रत्नावली ॥
निभालनं क्ली दर्शनं इतित्रि
कांडशेषः ॥
निभृतं त्रि अतीतं भूतकालः
इति राजनिर्घण्टः ॥
निभृतः त्रि विनीतः निर्जनः यथा
निभृत निकुञ्ज गृहं गतया निशि
रहसि निलीय वसन्तं इतिश्रीज
यदेवः ॥
निमज्जथुः पुं शयनं यथा तल्पे
कान्तैरेः सार्द्धं समेहं पिनि।
मज्जथुं इतिभट्टिः ॥
निमज्जनं क्ली स्नानं अवगाहनं
यथा नास्तिजन्यजनकव्यतिभेदः
सत्यमजजनितोजनदेहः वीद्य
वःखलुतनुमस्तादाहेनिमज्जन
मेवेमि सुधायां इति नैषधे पं
चम सर्गः ॥
निमंत्रणं क्ली नियोजनविशेषः
यत्रयस्याकरणे प्रत्यवायस्तन्निमं
त्रणं यथा इह भुंजीत भवान् य
स्याकरणे प्रत्यवायो नस्यात् त
दामंत्रणं यथा इहआसीत भवा
न् इतिनिमंत्रणामंत्रणयोर्भेदः
इतिमुग्धबोधटीकायांदुर्गादासः

निमयः पुं विनिमयः इत्यमरः
निमिः पुं इक्ष्वाकुराजपुत्रः त
स्यनिमेष स्थितिकारणं यथा
निमिर्नामस्त्रपःखीभिः पुत्राणु
त मद्दीक्ष्वाकुनन्दनोरेभ्याजगाम
वशिष्ठोब्रह्म सम्भवः तस्यपूजा
मकुर्वितंशशापसमुनिन्तंप विदे
ता स्त्वभवस्त्वेति शप्तस्तेनाप्यसौ
पुनः अन्योन्यशापाच्चतयोर्वि
शरीरेविचेतसी जग्मतुःशाप
नाशायब्रह्माणंजगतःपतिं ॥
अथ ब्रह्मणआदेशाल्लोचनेषुव
सन्निमिः निमेषाःस्युर्लोकानां
तद्विश्रामाय नारद इतिमत्स्यपुरा
णे ५५ अध्यायः ॥ मतांतरं यथा
निमिः सहस्त्रसंवत्सरंसत्रमार
भे वशिष्ठंच होतारंवरयामास त
माह वशिष्ठः अहं मिंद्रेणपंचव
र्षशतयागार्थं प्रथमंतरंवृतः ॥
आगत स्तत्रापि ऋत्विग्भविष्यामी
त्युक्ते सोपि तत्काल मेवायोगा।
तमादिष्टिर्यागं मकरोत् स
माप्ते चामरपति यागे त्वरावान्
वशिष्ठ आजगाम तत् कर्मक
र्त्तारं गौतमस्पृष्ट्वा अयं विदेहो

भविष्यतीतिशापं ददौ निमेःश
रीरं सद्योमृत मिव तस्यै यज्ञस
माप्तौ भाग ग्रहणायागतान् देवा
नृत्विज ऊचुः यजमानायवरो
दीयतामिति देवैश्छन्दितोनि
मि राह तदेतावति जगत्यन्यद्
खमस्ति यच्छरीरात्मनो वियोगे
भवति तदहं मिच्छामि सकल
लोचनेषु वस्तुं न पुनःशरीरग्र
हणं कर्त्तुमित्येवमुक्ते देवैरसाव
शेष भूतानां नेत्रेष्ववतारितः
ततो भूतान्युन्मेष निमेषं चक्रुः
इति विष्णुपुराणे ४ अंशे ५ अ
ध्यायः ॥
निमित्तं क्ली हेतुः चिह्नं इत्य।
मरः शकुनः यथा निमित्तानिच
पश्यामि विपरीतानिकेशव। इति
श्रीभगवद्गीता ॥
निमित्तकं क्ली चुम्बने इति शब्द
माला निमित्तेच ॥
निमित्तकारणं क्ली समवायि
कारणासमवायिकारणाभ्यांभि
न्नं तृतीयकारणं यथा घटं
प्रतिकुलालदण्डचक्रसलिल
सूत्रादि इति भाषापरिच्छेदसि
द्धान्त मुक्तावल्यो ॥ ।

निमित्तकृत् पुं काकः इति राज
निर्घण्टः ॥
निमित्तवित् द पुं दैवज्ञः गणकः
इति हेमचन्द्रः ॥
निमिषः पुं विष्णुः यथा निमि
षोःनिमिषः स्रग्वी वाचस्पति
रुदारधीः इतिविष्णुसहस्रनाम
कालविशेषः चक्षुर्निमीलनं
इतिमेदिनी निमीलनं क्ली म
रणं निमेषः इतिहेमचंद्रः ॥
निमीलिका स्त्री व्याजः इतिशब्द
रत्नावली निमीलनेच ॥
निमेषः पुं नैमेषः परीवर्त्तः इ
त्यमरटीकायांभरतः ॥
निमेषः पुं पक्ष्मस्पंदनकालः प
लक इति भाषा तत्पर्य्यायः नि
मिषः २ दृष्टिनिमीलनं ३ इति श
ब्दरत्नावली पुंसो यावत् कालम
कृत्रिमनेत्र विकाशानंतरं पक्ष्मा
कुंचनंजायतेसनिमेषः इत्यमरटी
कायांभरतः अक्षिपक्ष्मपरिक्षेपो
निमेषः परिकीर्त्तितः द्वौ निमेषौ
त्रुटिर्नाम द्वे त्रुटी तलवःस्मृतः इ
त्यग्निपुराणं ॥
निमेषकृत् स्त्री विद्युत् । इति

शब्दमाला ॥
निमेषरुक् पुं खद्योतः इति
त्रिकाण्डशेषः ॥
निम्न त्रि निम्नस्त्वम्नाभ्यासः
शीलमवनतन् निचु इति नावाल
इति च भाषा तत्पर्यायः गभीरं
२ गंभीरं ३ इत्यमरः गभीरकं ४
इति शब्दरत्नावली ॥
निम्नगा स्त्री नदी इत्यमरः नी
चगामिनित्रि ॥
निम्बः पुं वृक्षविशेषः निम इति
भाषा तत्पर्यायः अरिष्टः २ स
र्वतोभद्रः ३ हिंगुनिर्यासः ४ मा
लकः ५ पिचुमर्दः ६ इत्यमरः ॥
अर्कपादपः ७ इति हेमचंद्रः ॥
कैटर्यः ८ वरत्वचः ९ छर्दिघ्नः
१० इति रत्नमाला प्रभद्रः ११ पारिभ
द्रकः १२ काकफलः १३ कीरेष्टः
१४ नेता १५ सुमनाः १६ विशीर्णप
र्णः १७ यवनेष्टः १८ पीतसारकः
१९ शीतः २० इति राजनिर्घण्टः ॥
पिचुमंदः २१ तिक्तकः २२ इति ।
भावप्रकाशः अस्य गुणाः शी
तत्वं तिक्तत्वं कफ व्रण क्रिमि
वमिशोफ शांति कारित्वं बला
सवह्निविष पित्तदोष हृदयविदा
हनाशित्वंच इति राजनिर्घण्टः
लघुत्वं ग्राहित्वं कटुपाकित्वं अ
ग्निवात कारित्वं अहृद्यत्वं श्र
म तृट् कास ज्वरारुचि छर्दि ।
कुष्ठप्रमेहाश्म मेह नाशित्वंच तत्
पत्रगुणाः नेत्रहित कारित्वं कृ
मिपित्त विष सर्वारोचक कुष्ठना
शित्वं वातलत्वं कटुपाकित्वंच
तत्फल गुणाः रसे तिक्तत्वं ॥
पाके कटुत्वं भेदनत्वं स्निग्धत्वं ।
लघुत्वं उष्णत्वं कुष्ठ गुल्मार्शः
क्रिमि मेह नाशित्वंच इति भाव
प्रकाशः ॐतैल गुणाः नात्यु
ष्णत्वं क्रिमि कुष्ठ कफत्वग्दोष
व्रणकण्डूतिशोफ हारित्वं पित्त
लत्वंच इति राजनिर्घण्टः ॥
निम्बपित्त कफ छर्दि व्रण कुष्ठा
स कुष्ठ तृत् निम्बपत्रे इति वा
प्यः करंज निम्बज फलं क्रिमि
कुष्ठ प्रमेह जित् निम्बतैलं तु
कुष्ठं तिक्तं क्रिमिहरंपरं इति
राजवल्लभः ॥
निम्बकः पुं निम्बवृक्षः इति
भूरिप्रयोगः ॥

निम्बतरुः पुं मंदारवृक्षः इत्यमरः
निम्बवाजः पुं राजादनीवृक्षः
इति राजनिर्घण्टः ॥
निम्बूकः पुं वृक्षविशेषः कागजी
नेबु इति भाषा तत्पर्यायः अम्ल
जम्बीरः २ वह्निः ३ दीप्यः ४ वह्नि
बीजः ५ अम्लसारः ६ दंताघातः ७
शोधनः ८ जंतुमारी ९ निम्बूः १०
रोचनः ११ तत्फलगुणाः अम्ल
रसत्वं कटुत्वं उष्णत्वं गुल्मामवात
कास कफार्तिकंठ विच्छर्दिह
रत्वं अग्निवृद्धिकारित्वं चक्षुष्य
त्वं परिपक्वे अतीव रुच्यत्वंच इ
ति राजनिर्घण्टः पाचनत्वं ल
घुत्वं क्रिमि समूहोदर ग्रहनाशि
त्वं तीक्ष्णत्वं वात पित्त कफ शू
लिनां हितत्वं कष्टनष्टरुचि रोच
नत्वं त्रिदोष वह्निक्षय वात रोग
निपीडितानां विष विकलानाम
लग्रहे वद्धगुदे विसूचिकायांच प्र
देयं इति भावप्रकाशः ॥
भागैकं निम्बूजं तोयं षड्भागं ।
शर्करोदकं लवंग मरिचान्वि
तंपानकं पानकोत्तमं निम्बूफल
भवं पानं मत्यन्तं वात नाशनं ।
वह्नि [illegible] समस्ताहार
पाचकं इति राजनिर्घण्टः
नियतः त्रि संयतः यथा कार्त्ति
केशुक्ल पक्षस्य द्वितीयायांन
राधिप शुष्काहारोवर्षमेकं तत्रै
वनियतात्मवान् इति भविष्यपु
राणे द्वितीय कल्पः नित्यः यथा
अग्न्यग्न्याशिद्विमृत्यस्यनियताशु
र्द्धवर्जिता कारणात्वं भवेत्तस्य त्रै
विध्यं परिकीर्तितं इति भाषापरि
च्छेदः नियति स्त्री भाग्यं दैवं इत्य
मरः नियमः इति मेदिनी ॥
नियती स्त्री दुर्गा यथा । स्तुतिः
संस्मरणाद्देवी नियती च नियाम
ता इति देवीपुराणे निरुक्ताध्यायः
नियतेंद्रियः त्रि संयतेंद्रियः ।
इंद्रियदमनशीलः यथा अभ्यासे
स्तुनियतेंद्रिय तत्वसारैः इति चं
डी नियंता त्रि सारथिः इत्यमरः
शास्ता यथा रेखामात्र मपिक्षु
ण्णादामनो वर्त्मनः परं न व्य
तीयुः प्रजास्तस्य नियंतुर्नेमि
वृत्तयः इति रघुः ॥
नियंत्रितः त्रि अवाध्यः अनर्गलः
इति हेमचंद्रः ॥

नियमः पुं शौचं संतोषः तपः
स्वाध्यायः ईश्वरप्रणिधानंच इ
ति वेदांतसारः प्रतिज्ञा अंगीका
र इति यावत् व्रते तच्चोपवासा
दि अनित्यमागंतुसाधने कर्म्म
इत्यमरः मंत्रणा निश्चयः इति
मेदिनी ॥ नियमाः पंच सत्या
या बाह्य माभ्यंतरं द्विधा शौचं
तुष्टिश्च संतोषस्तपश्चेंद्रियनिग्र
हः स्नान मौनोपवासेज्यास्वा
ध्यायोपस्थ निग्रहः तपः क्रोधो
गुरौभक्तिः शौचंच नियमाः स्मृताः
यमाः पंचाथ नियमाः शौचं
द्विविधमीरितं । संतोषस्तप
सो जप्यं वासुदेवार्चनं दमः इति
गरुडपुराणं ब्रह्मचर्य्यमहिंसा
च सत्यास्तेयापरिग्रहान् सेवेत
योगी निष्कामो योग्यतां स्वमनो
नयन् स्वाध्याय शौच संतोष त
पांसि नियतात्मवान् कुर्वीत ब्र
ह्मणि तथा परस्मिन् प्रवणं म
नः एते यमाः सनियमाः पंच
पंच प्रकीर्त्तिताः ॥
इति विष्णुपुराणे ६ अंशे ७ अध्यायः
तपः संतोष आस्तिक्यं ॥
दानं देवस्य पूजनं सिद्धांतश्रवणं
चैव ह्रीर्मतिश्च जपोहुतं दशैते
नियमाः प्रोक्ता योगशास्त्र विशा
रदैः इति तंत्रसारः ॥ कविता
नियमाः यथा वर्णयेत्न सरेष्व
तन्नियमोऽथ प्रदश्यते भूर्जत्वग्
हिमवत्येव मलये ह्येव चंदनं सा
मान्य वर्णने शौक्ल्यं छत्राभ्रः ॥
शुभ्र वाससी कृष्णत्वं केशकाका
दि पयोनिधि पयोमुचो रक्तत्वं र
त्न बंधूक बिंबांभोजविवस्वतां
तथा वसंत एवान्यपुष्टानां कल
कूजितं वर्षास्वेव मयूराणां रु
तं न्यसेच्च वर्णयेत् नियमस्यवि
शेषोऽथ पुनः कश्चित् प्रकाश्यते
कमलासंपदोः कृष्ण हरितो नी
गसर्पयोः पीत लोहितयोः स्वर्ण
परागाग्निशिखादिषु चंद्रेशशै
लयोः कामध्वजे मकर मत्स्ययोः
दानवासुरदैत्यानामेकार्थत्वाभिस
म्मतं वक्रकालजम्मनोऽपि शिवचं
द्रस्य बालता मानवा मौलितोव
र्ण्या देवा श्चरणतः पुनः इति
कविकल्पलतायां १ स्तवके वर्ण्य
स्थितिर्नाम तृतीयं कुसुमं ॥

1709

नियमनं क्ली नियमः यथा तत
श्चाभिधा नियमनात्मता इति का
व्यप्रकाशे द्वितीयोल्लासः बंधनं
यथा वलेर्नियमन मिच्छुरः ॥
नियमितः त्रि कृतनियमः ब
द्धः यथा तदाः संत्रासमेते विज
हितहृदयः क्षणनशोकभङ्गभ
ग्नमहदेहेषु लंकादहननियममी
शायकाः निष्फलेन सौमित्रे ति
ष्पत्रं त्वमपि नहि हर्षान्न बद्ध
मेघनादः किंचिद्भ्रूभंगलीलानि
यमितजलधिं राम मन्वेषयामि
इति महानाटकः ॥
निपातनं क्ली निपातनं इत्य ।
मरटीकायां नयनानंदः ॥
नियमः पुं नियमः इतिशब्दा
वली ॥
नियामकः पुं पोतवाहः इत्य
मरः कर्णधारः नियंता इति
मेदिनी ॥
नियुक्तः त्रि नियोगविशिष्टः अवधारि
तः प्रलम्भः यथा जानामि धर्म्मं नचमे
प्रवृत्तिः जानाम्यधर्म्मं नचमे निवृत्तिः
त्वया हृषीकेश हृदिस्थितेन यथा
नियुक्तोऽस्मि तथा करोमि इत्यादि
कतवं नियुतं क्ली लक्षं इत्यमरः यथा
येकतां नियुते प्रायादिति नियुते
लक्षे इति श्रीधरस्वामी पुंसि स
हस्रमयुतं नियुतं प्रयुतमतं स्त्री
कोटिरर्बुद मिति क्रमाद्दशगु
णोत्तर मिति रत्नकोषः इति भ
रतः दशलक्षं यथा एकं दश
शतंचैव सहस्रमयुतं तथा ॥
लक्षंच नियुतंचैव कोटिरर्बुद
एवच वृंदः खर्व्वो निखर्व्वश्च शं
खपद्मौ च सागरः । अंत्यं मध्यं
परार्द्धंच दश वृद्ध्या यथोत्तरं ॥
इति पुराणं ॥
नियुद्धं क्ली बाहुयुद्धं इत्यमरः
नियोगः पुं अवधारणं इतिदु
र्गादासः आज्ञा इतिहेमचंद्रः ॥
नियोगी न् त्रि नियोगविशिष्टः
नियुक्तः तत्पर्य्यायः कर्म्मसचि
वः २ आयुक्तः ३ व्यापृतः ४ इति
हेमचंद्रः ॥
नियोज्यः त्रि नियोगार्हः प्रभुः ।
इति मुग्धबोधव्याकरणं ॥
नियोजनं क्ली नियोगः प्रेरणं य
था त्वयैतत् क्रियतामिति क्रियाप्र
नियोजनं प्रेरणं इतिदुर्गादासः
नियोज्यः त्रि प्रेष्यः किंकरः ॥
इत्यमरः ॥

निरोद्धा पुं ठक्कुरः इति राजनि
र्घण्टः बाहुयुद्धकारीव ॥
निरंकुशः त्रि अनिवार्यः बाधा
शून्यः इतिजटाधरः ॥
निरंजना स्त्री पूर्णिमा इति श
ब्दमाला अंजनशून्ये त्रि ॥
निरंतरं त्रि निविडं घनं इत्यमरः
अनवकाशः अनवधिः अपरि
धानं अनंतर्धानं अभेदः अ
भादृश्यं अच्छिद्रं अनात्मीयं ॥
अविना अवहिः अनवसरः अ
मध्यं अनंतरात्मा एतेति रूपस
मी पूर्वकोत्तर प्राह्यार्थाः ॥ नि
रंतराभ्यासः पुं स्वाध्यायः इति
त्रिकाण्डशेषः सततावृत्तिश्च
निरपत्रपः त्रि धृष्टः निर्लज्जः
इतिजटाधरः ॥
निरपेक्षः त्रि अनपेक्षः यथा।
अभिधाने पदेऽप्यस्मिन् निरपे।
क्षस्वाकृतिः इति मलमासतत्वे
निरयः पुं नरकः इत्यमरः ॥
निरर्गलः त्रि अनर्गलः अबाधः
इत्यमरः निरर्थकं त्रि निष्फलं तत्प
र्यायः मोघं २ इत्यमरः ॥
निरवः पुं नीरवः रवाभावः इति
नि पूर्व रु धातो रलि निष्पन्नः।
अपालनेच ॥
निरवग्रहः पुं स्वतंत्रः इत्यमरः
वृष्टिप्रतिबंधाभावश्च ॥
निरवहालिका स्त्री प्राचीरं इति
शब्दमाला ॥
निरशनं क्ली भोजनाभावः अन
शनं इति निर पूर्व अश धातो
रनट् प्रत्यय निष्पन्नं ॥
निरसः पुं नीरसः रसाभावः।
रसस्याभावः इति नञ् पुरुषस
मास निष्पन्नः तद्वति त्रि ॥ नि
रसनं क्ली प्रत्याख्यानं इत्यमरः
वधः निष्ठीवनं इतिमेदिनी ॥
निरसा स्त्री निःश्रेणिकातृणं इ
तिराजनिर्घण्टः ॥
निरस्तः त्रि प्रहितबाणः त्यक्तशरः
त्वरितोदितं शीघ्रोच्चारितवचः ॥
निराकरणविशिष्टः तत्पर्यायः ॥
प्रत्यादिष्टः २ प्रत्याख्यातः ३ निरा
कृतः निकृतः ५ विप्रकृतः ६ इ
त्यमरः प्रतिक्षिप्तं ७ अपविद्धं ८
इतिहेमचंद्रः ॥ निरस्तः। प्रे
षितः संत्यक्तः प्रतिहतः इतिमेदिनी
निरस्तदेशः पुं क्षतदेशः पलभाष्य
त्यस्थाने सत पूर्व भद्राम्ब वर्षे ॥
यमकोटिः। रक्षिणे भारते ॥

रताश्च ये इति तर्पण प्रकरणी
याह्निकाचारधृतवचनं ॥
निरिंगिणी स्त्री तिरस्करिणी त
त्पर्यायः अवगुण्ठिका २ पटी ३
यवनिका ४ इतित्रिकाण्डशेषः।
निरिंद्रियः त्रि इंद्रियशून्यः य
था अनेशो क्लीब पतितौजात्य
ध बधिरौ तथा उन्मत्त जड मूका
श्च येच केचिन्निरिंद्रियाः इत्या
दिदायभागः ॥
निरीशं क्ली फालः इत्यमरः।
ईशशून्येनास्तिके च त्रि ॥
निरीषं क्ली निरीशं इत्यमरटी
कायांभरतः ॥
निरीहः पुं विष्णुः यथा निरूपा
धिश्च निर्लिप्तो निरीहो निधनांत
कः इति ब्रह्मवैवर्ते श्रीकृष्णज
न्मखंडे बलाद्विशशात्मकस्थने ७
तत्पर्यायः ईहाशून्ये त्रि यथा नि
रीहस्यहतारणस्य रः इत्युद्भटः ॥
निरीक्षणं क्ली दर्शनं यथा इ
वात्मथात्मा निशिसे विनाह्नविक्ष
र्यालकमनिग्रहाद्वा वासग्रहात
त्संनिरीक्षणाच्च नेत्रे विकारान्
जनयंतिदोषाः इतिमाधवकरः ॥
निरीक्षितं त्रि अवलोकितं यथा नि
रीक्षितं वा गमवीक्षितं च दृष्टा ॥
पिबंती रभसेन तस्य। समानमाने
दमियं दधाना विवेद भेदं नवि
दर्भसुभ्रूः इतिनैषधः ॥
निरुक्तं क्ली वेदांगशास्त्रविशेषः
यथा शिक्षा कल्पो व्याकरणं नि
रुक्तं ज्योतिषं तथा छंदश्चेतिष
डंगानि वेदानां वैदिका विदुः ॥
इति शब्दरत्नावली वर्णागमो
वर्णविपर्ययश्च इत्यादिना नि
श्चयेनोक्तं निरुक्तं इत्यमरटीका
यां भरतः पदभंजनं यथा प्र
स्तावस्तु प्रकरणं निरुक्तं पदभं
जनं इति हेमचंद्रः कथिते त्रि
यथा निरुक्ता प्रकृति हेया इ
तिजगदीशः ॥
निरूढः त्रि संरूढः बोधविशिष्टः
इतिअनिरूढशब्दटीकायांभरतः
निरुद्योगः त्रि निरुद्यमः उद्योग
भावविशिष्टः निर्नास्ति उद्योगो
यस्येतिबहुव्रीहिसमास निष्पन्नः
निरुपद्रवः त्रि उत्पातरहितः
यथा जायंते सर्वशास्त्राणि समित्वं
निरुपद्रवे सोम्यदृष्टिर्भवेद्राजा।
विकल्पेचशुभंवदेत् इतिज्योतिस्तत्व
निरुपमः त्रि उपमारहितः अनु
पमः यथा गौडं राष्ट्रं मनुत्तमं।

निरूपमा तत्रापि राष्ट्रापुरीत्यादि
प्रबोधचंद्रोदयः
निरुपेतः त्रि अनुपेतः उपेता
शून्यः नास्ति उपेता यस्य सः॥
निरूढः पुं निरूढलक्षणाकः श
ब्दः यथा सर्वस्वामि संबंधाधीनं
तत स्वाम्युपमेयत्वद्वयं स्वत्वं
तत्र निरूढो दायशब्दः इति दाय।
भागः निरूढलक्षणा स्त्री शक्ति
तुल्यलक्षणा यथा निरूढलक्ष
णाः काश्चित् काश्चिन्नैव त्वशक्ति
तः इति काव्यप्रकाशटीकायां
महेश्वरः निरूढा स्त्री लक्षणावि
शेषः यथा काचित् लक्षणा वक्ष्ये
दकीभूततत्तद्रूपेण सर्वसर्वेषु प्र
त्यायकत्वात् निरूढा यथा म्ला
रुणपादि प्रकारेण तदाश्रय द्र
व्यानुभावकत्वादरुणादिपद
स्य इति शब्दशक्तिप्रकाशिका
निरूपणं क्ली आलोकः विचा
रः निदर्शनं इति मेदिनी॥
निरूपितः त्रि कृतनिरूपणः
निरुक्तः इति श्रीधरस्वामी य
था निरूपितो बालक एव योगिनां सन्न
क्षणे याज्ञवल्क्ये निर्विविक्तं इति श्रीभा
गवते ?स्कंधे ?अध्यायः निरूहः पुं व
स्तिभेदः यथा वस्तिर्द्विधानुवासाख्यो

निरूहश्चेतिसं॥
ज्ञितः यः स्नेहैर्दीयते स स्यादनु
वासन नामकः कषाय क्षीरतै
लै र्यो निरूहः स निगद्यते इ
ति सारकौमुदी अरुहस्पृत्यः॥
निश्चितं इति मेदिनी निग्रहः
तर्कः इति हेमचंद्रः॥
निरोधः पुं नाशः रोधः इति मे
दिनी निग्रहः इति हेमचंद्रः नि
रोद्धव्यं त्रि रक्षणीयं इति महा।
भारते राजधर्मः॥
निर्ऋतिः स्त्री अलक्ष्मीः इत्यमरः
अस्या उपाख्यानं यथा समुद्र म
थनाद्या निरत्नान्यापुः सुरोत्तमाः
श्रेष्ठं च कौस्तुभं तेषु विप्लवे प्र
दत्तः स्वराः यावदंगीचकारासौ
लक्ष्मीभार्यार्थमात्मनः तावद्वि
ज्ञापयामास लक्ष्मीस्तं चक्रपाणि
नं लक्ष्मीरुवाच असंस्कृत्य कथं
ज्येष्ठां कनिष्ठा परिणीयते तस्मा
न्ममाग्रजामेनामलक्ष्मीमधुसूदन
विवाह्योद्वहमां पश्चादेष धर्मः
सनातनः तस्माद्दर्मं निकाम्यं
तलक्ष्मीमधुसूदन स तदुवाच
इति तद्वचनं श्रुत्वा स विश्वलोक
भावनः उद्दालकाय मुनये ददौ तत
एव तदा ब्राह्मवाक्यानुरोधनतामल
क्ष्मीं ददौ किल स्थूलोष्ठीं अकवद

वर्षे लंका पश्चिमे केतुमालवर्षे
रोमकं उत्तरे कुरुवर्षे सिद्धपुरी।
एताः कूर्मपाद विवराः अन्यो
न्यप्रतिष्ठिताः तासामुपरिगो वि
षुवस्थो दिवाकरो याति तासु।
विषुवच्छायाभावस्तासु तिसृ
तदूपूपेते तत्र दिवामाने रात्रिमानं
च त्रिंशन्नाडिकाः इति सूर्यसिद्धा
तमतं। निराकरणं क्ली निवारणं
निरसनं इति निराकरिष्णुशब्दटी
कायां भरतः॥
निराकरिष्णुः त्रि निराकरणशी
लः तत्पर्यायः क्षिप्नुः इत्यमरः
निराकारः पुं परमेश्वरः ब्रह्म य
था साकारं च निराकारं सगुणं।
निर्गुणं प्रभुं सर्वाधारं च सर्वं च स्वे
च्छारूपं नमाम्यहं अपि च तेजः स्व
रूपो भगवान् निराकारो निराश्रयः
निर्लिप्तो निर्गुणः साक्षी स्वात्मा
रामः परात्परः ध्यायंति योगिन
स्तेजः स्वकीयमशरीरिणं वैष्णवास्ते
वसाकारं कमनीयं मनोहरं कैशि
तर्भुजं शांतं लक्ष्मीकांतं मनोहरं शं
खचक्रगदापद्मधरं पीताम्बरधरं द्वि
भुजं कमनीयं च किशोरं श्यामसुंदरं

शांतं गोपांगना कांतं रत्नभूषण
भूषितं एवं तेजस्विनं भक्तास्सेवंते
सततं मुदा ध्यायंति योगिनो य
त्तु कुत स्ते तेजस्विनं विना अपि च
यो निर्गुणः स निर्लिप्तः शक्ति
भ्यो न हि संयुतः त्रिसत्त्वाश्रि
नः शोक्तो निर्गुणः सगुणो भवे
त् यावंति च शरीराणि भोगार्हा
णि महाभूते प्राकृतानि च स
र्वाणि श्रीकृष्णविग्रहं विना॥
ध्यायंते योगिनस्ते च शुद्धं ज्यो
तिःस्वरूपिणं हस्तपादादि रहितं
निर्गुणं प्रकृतेः परं॥ वैष्णवास्ते
न मन्यंते तद्भक्ताः सूक्ष्मदर्शिनः
कुतो बभूव तज्ज्योतिरहो तेजस्वि
नं विना ज्योतिरभ्यंतरे नित्यं श
रीरं श्यामसुंदरं अतीवामूल्य
सद्रत्नभूषणेन विभूषितं॥
एवं भक्ताश्च ध्यायंते शश्वद्वर
णं सेविनः योगिनो योगरूपं च
काले भक्तिविपाकतः ज्योतिरभ्यं
तरे मूर्तिं पश्यंति कृपया प्रभोः इ
ति ब्रह्मवैवर्ते गणपतिखंडे ४२।७४२
अध्यायः तस्मिन्निवृत्ते विश्वामा
नि यथा जगद्योनिरयोनिस्त्वमनं
तोऽव्ययश्चैव ज्योतिः स्वरूपोऽस

नवः सगुणो निर्गुणोमहान् भक्ता
नुरोधात् साकारेनिराकारो निरंकु
शः निर्व्यूहोनिखिलाधारोनिःशं
कोनिरुपद्रवः निरुपाधिश्च निर्लि
प्तो निरीहोनिधनांतकः स्वात्मारा
मः पूर्णकामोनिमेषो नित्य एव च
स्वेच्छामयः सर्वहेतुः सर्वः सर्वगु
णाश्रयः स्ववेदोऽस्ववेदोदुर्गो दुर्ज
नांतक एव च सुभगोऽदुर्भगोवा
ग्मीदुराराध्योदुरत्ययः वेदहेतु
श्च वेदाश्च वेदांगोवेदविद्विभुः
इतिचत्वारिंशन्नामानिध्यानरूप्या
यः पठेत् दृढभक्तिर्हरेर्दास्य
लभतेवांछितंच यत् इतिब्रह्म
वैवर्त्ते श्रीकृष्णजन्मखंडे ७ अध्यायः
आकारशून्येत्रि। निराकृतः त्रि।
प्रत्याख्यातः निरस्तः इत्यमरः॥
निराकृतिः स्त्री निरसने निराकर
णे इत्यमरः अनाकारे स्वाध्या
येच त्रि इतिमेदिनी निराचारः
त्रि अनाचारः आचारशून्यः नि।
र्गतविधानेआचारो यस्य सः निरात
पा स्त्री रात्रिः इतिशब्दचंद्रिका
आतपशून्येत्रि निराबाधः त्रि
पराभिसंधिविरोधः यथा अ
प्रसिद्धंनिराबाधंनिरर्थनिष्ठ।

योजनं असाध्यं वा विरुद्धं वा पराभा
सं विवर्जयेत् निराबाधं अस्पृहस्य प्र
दीप प्रकाशेनार्थं स्वगृहे व्यवहरति
इतिमिताक्षरा॥
निरामयः त्रि रोगरहितः तत्पर्या
यः वार्त्तः २ कल्यः ३ इत्यमरः
नीरुजः ४ पटुः ५ उल्लाघः ६ ल
घुः ७ अगदः ८ निरातंकः ९।
अनातंकोपि पाठः। इतिराज ॥
निर्घण्टः॥
निरामयः पुं इडिक्कः वनच्छागलः
इतिमेदिनी शूकरः इतिशब्दमाला॥
निरामालुः पुं कपित्थः इति शब्द
चंद्रिका॥
निरालंबा स्त्री आकाशमांसी इति
राजनिर्घण्टः॥
निराशः त्रि आशाशून्यः यथा॥
भूतादेर्ये पठंतीति उल्का ग्रह मघे
नसः निराशाः पितरो यांति शापं
दत्वा सदारुणं इति तिथि॥
तत्वं॥ निरासनं क्ली निरसनं इ
ति निरांपूर्वोसधातोरनट्प्रत्ययनि
ष्पन्नं आसनाभावश्च॥
निराहारः त्रि आहाररहितः यथा
निराहाराश्चयेजीवाः पापे धर्म्मे॥

पौलोमी ११ शक्राणी १२ कासना
शिनी १३ इतिरत्नकोषः करहा
टः इतिविश्वः॥
निर्गूढः पुं वृक्षकोटरं इतिशब्द
रत्नावली॥
निर्ग्रंथः पुं नग्नकः निःस्वः बालि
शः इतिमेदिनी मुनिः इतिहेमचं
द्रः द्यूतकारः इतिजटाधरः ग्रंथि
भ्योनिर्गतः निवृत्तहृदयग्रंथिः
यथा आत्मारामाश्च मुनयो नि
र्ग्रंथा अप्युरुक्रमे इतिभागवतं।
श्लोकटीकायांस्वामी॥
निर्ग्रन्थकः पुं क्षपणः निष्फलः
अपरिच्छदः इतिमेदिनी॥
निर्ग्रथनं क्ली मारणं इत्यमरः
निर्ग्रंथिकः पुं क्षपणः निपुणे
हीनेचत्रि इतिशब्दरत्नावली॥
निर्घंटं क्ली वक्तुमानुषसंकीर्णग्र
हं इति हारावली करशून्यहट्टं।
इतिशब्दरत्नावली हट्टशून्यंच नि
र्घंटः पुं निर्घंटनं। निर्घंटुः गणस
ग्रहः ग्रंथानांसूची निरवातः यथा
धन्वंतरीयमदनादिहलायुधादीन्
विश्वप्रकाशममरकोषमशेषराजान्
आलोक्य लोकविदितांश्च विचिंत्य शाब्दा
न्दृष्ट्वाभिधानगणसंग्रहपक्षसूत्रः निर्घ
शालतल।

परीक्षणनिर्णयेन नाना विधौषध
विचार परायणो यः सोऽर्थीत्ययत्न
सकलमेनमवैतिसर्वं तस्मादयं
जगति भाति निघंटुराजः इति रा
जनिर्घण्टः॥
निर्घातः पुं वायुभिर्हतवायु प्रप
तनजन्यशब्द विशेषः यथा वायुना
भिहतोवायोगगनाच्च पतत्यधः
प्रचण्डघोरनिर्घोषोनिर्घातइति
कथ्यते इति शब्दमाला॥ अपि
च यदांतरीक्षे बलवान् मारु
तोमरुताहतः पतत्यधः स नि
र्घातो जायतेवायु संभवः इति
ज्योतिषं॥
निर्घोषः पुं शब्दमात्रं इत्यमरः॥
निर्जनः त्रि जनशून्यस्थानादि।
विजनः इतिविविक्तादिशब्दटी।
कायांसारसुंदरी॥
निर्जरः पुं देवः इत्यमरः ज
रारहिते त्रि इति मेदिनी सुधा
यां क्ली इति शब्दरत्नावली नि
र्जरसर्षपः पुं देवसर्षपवृक्षः इ
तिराजनिर्घण्टः।निर्जरा स्त्री गुडूची
तालपर्णी इतिमेदिनी॥
निर्जलः त्रि जलशून्यदेशादि इ
तिमुकुटशब्दटीकायांभरतः यडुकं

संग्रामा दशम धृजाय गतिना सं
मूर्छिता निर्झलेनयद्धादशावद्विती
य मतिमत्रैकादशामस्तनी। साष
ष्टी त्वपंचमस्य नवमश्च: सप्तमी
वर्जिता मासोत्पष्टम वदनो यथ
महे तस्या स्तृतीयो भव इतिवल्ला
लसेनः ॥
निर्जितः त्रि पराभवपराजयः। तत्
पर्य्यायः पराजितः १ पराभूतः
२ विजितः ३ जितः ४ इति शब्दर
त्नावली वशीकृतः यथा ध्या
यत स्मरणाम्भोजं भाव निर्जित
चेतसा इति श्रीभागवते १ स्कंधे
६ अध्यायटीकायां स्वामी ॥
निर्जितेन्द्रियग्रामः त्रि यतिः इत्य
मरः ॥ निर्जीवः त्रि जीवात्मर
हितः प्राणिशून्यः यथा चिता
चिन्ता द्वयो मध्ये चिन्ता एव गरीय
सी चिता दहति निर्जीवं चिन्ता द
हति जीवितं इति प्राचः ॥
निर्झरः पुं पर्वतावतीर्णजलप्र
वाहः इति भरतः स्रुता अप्यथा
वा गिरेर्जलप्रवाहः इति मधुः।
पर्वतोद्वेगेन पतज्जले झरा इति
ख्याते इति कोक्कटः तत्पर्य्यायः
झरः २। इत्यमरः

निर्झरी ३ इति शब्दरत्नावली त
ज्जलगुणाः लघुत्वं पथ्यत्वं दी
पनत्वं कफनाशित्वंच इति रा
जवल्लभः सर्व्वोत्कटः ॥
तुषानलः इति मेदिनी ॥
निर्झरी स्त्री निर्झरः इति शब्दरत्ना
वली॥ नदी। यथा। जटा कटाह
संभ्रम भ्रमन्निलिम्पनिर्झरी विलो
लवीचि वल्लरी विराजमान मूर्द्ध
नि धगद्धगद्धगज्ज्वलल्ललाटपट्ट
पावके किशोर चंद्र शेखरे रतिः
प्रतिक्षणं मम इति रावणकृत
शिव स्तोत्रं ॥
निर्झरी न पुं पर्वतः इति त्रिकाण्ड
शेषः ॥ निर्झरिणी स्त्री नदी।
इति त्रिकाण्डशेषः। निर्णयः
पुं अवधारणं तत्पर्य्यायः। निश्च
यः २ इत्यमरः निर्णयनं ३ निच
यः ४ इति शब्दरत्नावली ॥ वि
चारः तत्पर्य्यायः। तर्कः २ ऊहा
३ चर्चा ४ इति त्रिकाण्डशेषः विरोध
परिहारः इति मिताक्षरा अधिक
रणविशेषः यथा विषयो विषय
श्चैव पूर्व्वपक्ष स्तथोत्तरं निर्णयश्चेति
पंचाङ्गं शास्त्रेऽधिकरणं स्मृतं इति।
स्मरति मीमांसा न्यायमते तद ॥

तां विरूपां विभ्रतीं तत्र सर्वदा
रक्तनयनां रूक्षपिंग शिरोरु
हां स मुनि विस्मयाकान्तो मं
गीकृत्य स्वमाश्रयं वेदध्वनि स
माकुलमानयामास धर्म्मवित्
होमधूप सुगंधाढ्यं वेदघोषे।
ण नादितं आश्रमं तं विलोक्याथ
व्यथिता सा ब्रवीदिदं ज्येष्ठोवाच
नहि वासो नु रूपोऽयं वेदध्वनियु।
तो मम नाहं गमिष्ये तो ब्रह्मन्
न यस्मात् स्वमाश्रमं उद्दालक उ
वाच कथं नायासि किंचात्र वर्त्त
ते स्वमतं तव तव योग्या च वस
तिः का भवेत् तदद्य त्वमा ज्येष्ठोवा
च वेदध्वनिर्भवेद्यस्मिन्नतिथीनां
च पूजनं यज्ञदानादिकं यत्र नै
व तत्र वसाम्यहं। परस्परानुरागे
ण दास्पत्यं यत्र विद्यते पितृदेवा
र्च्चनं यत्र तत्र नैव वसाम्यहं दा
न शौचे न विद्येते परद्रव्यापहा
रिणः परदाररता यत्र तत्रास्या
ने रतिर्मम वृद्ध सज्जन विप्रा
णां यत्र स्यादपमाननं निष्ठुरभा
षणं यत्र तत्र सम्यग्वसाम्यहं स तु
उवाच इति तद्वचनं श्रुत्वा विमनव
दनो भवत् उद्दालक स्ततो वाक्यान्
मलक्ष्मीमब्रवीदहं उद्दालक उवाच ॥
अश्वत्थ वृक्ष मूलेस्मिन्नलक्ष्मीः ॥

श्रमं ताडनं आश्रम स्थानमा
लोक्य यावदायाम्यहं पुनः सत
उवाच इति तां तत्र संस्थाप्य जगा
मोद्दालको मुनिः प्रतीक्षती चिरं
तत्र यदा तं न ददर्श सा तदा रु
रोद करुणं भर्त्तृत्यागेन दुःखि
ता ततस्याः क्रंदितं लक्ष्मीर्वैकुण्ठ
भवनेऽशृणोत् तदा विज्ञापया
मास विष्णुमुद्विग्नमानसा लक्ष्मी
रुवाच स्वामिन्मद्भगिनी ज्येष्ठा स्वा
मि त्यागेन दुःखिता तामाश्वास
यितुं याहि कृपालो यद्यहं प्रिया
स्तत उवाच लक्ष्म्या सह ततो वि
ष्णु स्तत्रागात् कृपयान्वितः आ
श्वासयन्नलक्ष्मीं तामिदं वाक्यम
थाब्रवीत् विष्णुरुवाच अश्वत्थ
वृक्ष मासाद्य सदाऽलक्ष्मीः स्थि
रा भव ममांशसंभवो ह्येष आवा
सस्ते मया कृतः मंदवारे सदा
नूनं लक्ष्मी रत्रागमिष्यति अ
स्मृपूपासितो भवेत्तस्मान्मंदवारे
विना किल यस्त्वश्वत्थं सेविष्यति तं
ज्येष्ठा गृहस्थमिताः तेषियं श्रीः क
निष्ठा ते सदा निष्फलतामियात् इति
पाद्मोत्तरखण्डे १६१ अध्यायः ॥
निर्ऋतिः त्रि निरुपद्रवः इति धर
णिः दिक्पालविशेषः पुं। इति

मेदिनी सत नैर्ऋत कोणाधि प
तिः तस्य विवरणं यथा पूर्व
स्यां तस्य कोणस्य रत्नकूटाख्ययोधि
पः यत्रास्ते सततं देवो निर्ऋती
राक्षसेश्वरः खड्गहस्तो महाका
यो वामे चर्मधरस्तथा जटाजूट
समायुक्तः प्रांशु कृष्णाचलोपमः
द्विभुजः कृष्णवस्त्रस्तु गर्दभोप
रिसंस्थितः प्रांतोपांतो विडसर्गि
सहितो वाधिरेव च नैर्ऋत्ये क
ल्पितं बीजं तेन तं परिपूजयेत् र
त्नकूटे समारुह्य निर्ऋतिं रा
क्षसेश्वरं यः पूजयेद्विधानेन चं
डिकां राक्षसेश्वरीं न तस्य रा
क्षसेभ्योस्ति भयं वापि कदाचन
राक्षसाश्च पिशाचाश्च वेतालाश्च
गणनायकाः तं दृष्ट्वा पुरुषं राज
न् सर्व एव प्रविभ्यति इति का
लिकापुराणे ८१ अध्यायः ॥
निर्ऋथ्यः पु सामवेदः इत्युणा
दिकोषः ॥
निर्गः पु देशः इति हेमचंद्रः ।
निर्गतः त्रि निःशेषेण गतः ब
हिः प्राप्तः यथा निर्गतं सुमह
त्तेजस्तस्यैकांशं समागच्छत इति दे
वीमाहात्म्यं ॥
निर्ग्रंथः त्रि ग्रंथशून्यः यथा रूप
यौवनसंपन्ना विशालकुलसंभवाः
विद्याहीना न शोभंते निर्गंधा इव
किंशुकाः इति चाणक्यः निर्ग्रंथ
नं क्ली निर्ग्रंथनं मारणं। इत्य
मरटीकायां स्वामी ॥
निर्ग्रंथपुष्पी स्त्री शाल्मलिवृक्षः
इति शब्दचंद्रिका ॥
निर्गुणः पु सत्वरजस्तमोगुण
हीनः परमेश्वरः यथा साकारं च
निराकारं सगुणं निर्गुणं प्रभुं सर्वा
धारं च सर्वं च स्वेच्छारूपं नमाम्यहं
इति ब्रह्मवैवर्ते गणेशखण्डे १२
अध्यायः गुणभृन्निर्गुणो महान्
इति विष्णुसहस्रनाम च विद्यादि
गुणशून्ये त्रि यथा सगुणो निर्गुणो
वापि सहायो बलवत्तरः तुष
णापि परिभ्रष्टस्तण्डुलो नांकुरा
यते इत्युद्भटः ॥
निर्गुंठी स्त्री निर्गुण्डी इत्यमरटी
कायां मधुः ॥
निर्गुंडी स्त्री नीलशेफालिका।
वृक्षविशेषः निसिंदा इति भाषा
तत्पर्यायः सिंदुकः २ सिंदुवारः
३ इंद्रसुरिषः ४ इंद्राणिका ५।
इत्यमरः सिंधुकः ६ सिंधुवारः ७
इंद्रसुरसः ८ निर्गुंठी ९ इति भ
रतः इंद्राणी १० इति सांजः ॥

भावाप्रकारकत्वे सति तत्प्रकार
कज्ञानं। यथा। वह्निमान् पर्वत
इत्यादि बोधः इति भाषा परिच्छे
दः मद्धर्मावच्छिन्न प्रकारत्वान्
प्रकारत्वानिरूपित यद्धर्मावच्छे
दकावच्छिन्न विशेष्यताशालिज्ञा
नं इति जगदीशः ॥
निर्णयनं क्ली निर्णयः इति श
ब्दरत्नावली ॥
निर्णयपादः पुं चतुष्पादव्यवहा
रांतर्गतव्यवहारविशेषः तत्स्वरूप
मिलितानां सभासदां पराजितोऽय
मित्यवधारणं इति व्यवहारतत्व
निर्णायनं क्ली मातंगापांगदेशः
तत्पर्यायः। निर्याणं २ इति शब्द
रत्नावली ॥
निर्णिक्तं त्रि अपगतमलं शोधितं
इत्यमरः निर्णीतं त्रि कृतनिर्णयः
निश्चयीकृतः यथा निर्णीते व्यव
हारे तु प्रमाणं सफलं भवेत् लि
खितं साक्षिणो वापि पूर्वमावेदितं
न चेत् यथा पंकेषु धानेषु निष्फ
लाः प्रावृषो गुणाः निर्णीत व्य
वहाराणां प्रमाणं सफलं तथा
इति व्यवहारतत्वं ॥
निर्णेजकः पु रजकः इत्यमरः ॥
निर्दयः त्रि परापरारक्तः ॥ दया
शून्यः तीव्रः मत्तः निष्प्रयोजनः
इति शब्दरत्नावली ॥
निर्दयः त्रि दयाशून्यः इति जटाधरः
निर्दरं क्ली निर्भयं सारं कठिने श्व
भ्रेपि च त्रि इति मेदिनी ॥
निर्दहनः पु भल्लातकः इति रा
जनिर्घण्टः अग्निमुख्यश्च ॥
निर्दहनी स्त्री मूर्वालता इति
रत्नमाला ॥
निर्दिग्धः त्रि बली मांसलः इ
ति हेमचंद्रः ॥
निर्दिष्टः त्रि निश्चितः यथा निर्दि
ष्टविषयं किंचिदुपायेन विषयंतन
या अपेक्षितं क्रियश्चैव त्रियापा
दानमिष्यते इति रामतर्कवागीशः
निर्देशः पु आज्ञा इत्यमरः ॥
कथनं उपांतः इति मेदिनी ॥
णि नात्र कालं विचारयेत् इति शु
यागतत्त्वं मासं सेवन स्नानादि वि
शेष नियम स्नात्वा व्रतं कर्त्तव्य
कादाचित्कनिमित्तात् यज्ञे पुत्र
जन्मादि निमित्तकश्राद्धादि य
था नित्यनैमित्तिके कुर्य्यात् प्रय
तः सन् सलिलं च तीर्थस्नानेन ग
जच्छायां प्रेतश्राद्धं तथैव च इति
मलमासतत्त्वं ॥
नैमित्तिकक्रिया स्त्री निमित्तनि
श्चयवदधिकारिकर्त्तव्यकर्म य
था नित्यां नैमित्तिकीं काम्यां क्रि।
यां पुंसामशेषतः समाख्याहि
द्विजश्रेष्ठ सर्वज्ञो ह्यसि मे मतः
और्व उवाच यदेतदुक्तं भवता नि
त्यनैमित्तिकाश्रितं तदहं कथ।
यिष्यामि शृणुष्वैकमना मम
जातस्य जातकर्मादि क्रियाका
ण्डमशेषतः पुत्रस्य कुर्वीत पिता श्रा
द्धं चाभ्युदयात्मकं इति विष्णुपुरा।
णे ३ अंशे १० अध्यायः नैमित्तिक।

दानं क्ली निमित्तनिश्चयवदधिका
रिकर्त्तव्यदानं यथा यत्तु पापोप
शान्त्यर्थं दीयते विदुषां करे नैमित्ति
कं तदुद्दिष्टं दानं सद्भिरनुष्ठितं इति
गरुडपुराणे नैमित्तिकलयः पुं प्र
लयविशेषः यथा चतुर्युगसहस्रा
न्ते ब्राह्मो नैमित्तिको लयः अनावृ
ष्टिश्च कल्पान्ते जायते शतवार्षिकी
उत्तिष्ठन्ति तदादित्या दिवि सप्त दि।
वाकराः तेन पीता जलं सर्वं शोष
यन्ति जगत्त्रये भूर्भुवःस्वः महर्लो
कसंस्था यान्ति जनं जनाः रुद्रो भू
त्वा ततो विष्णुः पातालानि दहत्य
यः विष्णुर्दहति त्रैलोक्यं च मुखोन्मे
घान् सृजत्यलं वर्षन्ते च वर्षशतं
नानावर्णा महाघनाः विष्णुमु
खः श्वसिति वर्षाणां वायुर्हरि
तः विष्णुरेकार्णवे पीत्वा सर्वं व
स्तत्स्वरूपधृक् शेते नैतासने वि
सृष्टे ह्यस्थावरजंगमे समायुग।
सहस्रं सजगद्योऽसदहरिः इति
गरुडपुराणे नैमित्तिकस्नानं क्ली
निमित्तनिश्चयवदधिकारिकर्त्तव्य
स्नानं यथा चाण्डालशवयूपादिस्प
ष्टा स्नानं रजस्वला स्नानादि स्वयदी
स्नातिस्नानं नैमित्तिकं हितत् इत्याह

पुराणं ॥
नैमिषारण्यं क्ली अरण्यविशेषः
तस्योत्पत्तिर्यथा तेन चक्रेणानन्त
सैन्यमासुरं त्रैलोक्यं हताता नि
मिषान्तरमात्रेण भस्मवत्कृतया
कृतं एवं कृत्वा ततो देवो मुनिं।
गौरमुखं तदा उवाच निमिषेणेदं
निहतं दानवं बलं अरण्येऽस्मिन् स्त
तस्त्वेतन्नैमिषारण्यसंज्ञकं भवि
ष्यति यथार्थं वै ब्राह्मणानां वि
शेषतः इति वराहपुराणे गौरमु
खं प्रति भगवद्वाक्यं अपि च देशा
वः संप्रवक्ष्यामि यस्मिन्देशे चरिष्य
थ उत्कामनेमयं चक्रं ससृष्टान्ता
नुवावद् द्विमनेनन्मयाचक्रमनु
व्रजन्मा चिरं यत्रास्य नेमिः शीर्य्ये
त स देशः पुरुषर्षभ ततोमनोव
तच्चक्रं नेवतत् सममनुव्रजन् तस्य
वै व्रजतः क्षिप्रं यत्र नेमिरशीर्य्यत
नैमिषं तत् स्मृतं नाम्ना पुण्यं सर्वत्र
पूजितं सिद्धचारणसंकीर्णं यक्षगं
धर्व सेवितं स्थाने भगवतः शंभो।
रत्र नैमिषमत्तमं अत्र देवाः स ग
न्धर्वाः सयक्षोरगराक्षसाः तपस्त
प्त्वा पुरा देवा लेभिरे प्रवरान् वरान्
इति कौर्म्मे ४० अध्यायः षट्क

लीयान् पति त्वष्टा वाक्यं ॥
नैमयः पुं परिवर्त्तः विनिमयः
इत्यमरः ॥
नैयग्रोधं क्ली न्यग्रोधफलं इत्य
मरः न्यग्रोधजातं चमसादि ॥
इति वोपदेवरामतर्कवागीशौ
नैयङ्कवं त्रि न्यङ्कुमृगजातवस्त्र
चर्मादि इति वोपदेवरामतर्कवा
गीशौ नैयत्यं क्ली नियतत्वं नि
यतस्य भाव इत्यर्थे ष्यप्रत्यय नि
ष्पन्नं नैयायिकः पुं न्यायवेत्ता
न्यायाध्येता तत्पर्य्यायः स्याद्
वादः २ सांवादिकः ३ आह्निकः ४
इति जटाधरः ॥
नैरन्तर्य्यं क्ली निरन्तरत्वं निरन्तरस्य
भाव इत्यर्थे ष्यप्रत्यय निष्पन्नं ॥
नैराश्यं क्ली आशाया अभावः ।
यथा आशा हि परमं दुःखं नै
राश्यं परमं सुखं आशाया पिङ्ग
ला वेश्या कृत्वा जन्म निरर्थकं
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्म
खण्डे ५९ अध्यायः ॥
नैरुक्तं त्रि निरुक्तसंबन्धि यथा
षडङ्गपदक्रमशिक्षानिरुक्तज्ञः नरुः
इति नैरुक्तं इति रामतर्कवागी
शः नैर्ऋतः पुं राक्षसः पश्चिमद

दिशा कोणाधिपतिः इत्यमरः।
ज्योतिषमतेनतत्कोणाधिपतीरा
हुः यथा सूर्य्यः शुक्रः कुजः राहुः
सैंहिकेयः शनिः शशी सौम्यस्त्रि
दशमंत्रीच प्रागादि दिगधीश्वराः
इतिज्योतिस्तत्वं ॥
नैरृती स्त्री शवाची प्रतीच्योर्म
ध्यादिक् नैरृतकोणः इति रा
जनिर्घंटः जटाधरश्च ॥
नैर्गुण्य क्ली निर्गुणत्वं यथा प
रिनिष्ठितोपि नैर्गुण्ये उत्तमश्लोक
लीलया गृहीतचेता राजर्षे आख्या
नंतदधीतवान् इति श्रीभागव
ते द्वितीयस्कंधः ॥
नैर्मल्य क्ली निर्मलत्वं विषयवै
राग्यं यथा विषयेषु तिसंरागो
मानसो मल उच्यते तेष्वेव हि
विरागस्तु नैर्मल्यं समुदाहृतं
इति प्रायश्चित्ततत्वं ॥
नैल्य क्ली नीलस्य भावः नीलि
मा इति सुग्धबोध टीकायां राम
तर्कवागीशः ॥ नैविड्यं क्लीं वे
शाफुतकारगुणविशेषः यथा।
नैविड्यं शफलानामपि स्वस्वरूपंच।
शीघ्रता माधुर्य्यमिति पंचामीफ
लकेषु गुणास्मृताः इति संगीतदा
मोदरः निविड्तावा। नैवेद्यं त्रि निवे
दनीयद्रव्यं तत्पंचविधं यथा निवे
दनीयं यद्द्रव्यं प्रशस्तं प्रयतं तथा
तद्भेदात्पंचविधं नैवेद्यमिति क
थ्यते भक्ष्यं भोज्यंच लेह्यंच पेयं।
चोष्यंच पंचमं सर्वत्रचैतन्नैवेद्य
माराध्यास्यै निवेदयेत् तत्पात्रं
यथा तैजसेषुच पात्रेषु सौवर्णे
राजते तथा ताम्रे वा प्रस्तरे वापि
पद्मपत्रेथवा पुनः यज्ञ रूप्यपर्णे
नैवेद्यस्यार्पयेद्बुधः सर्वाभावेचमा
हेयेत्स्वहस्तघटितेनयदि इतितंत्रं।
सारः तद्दानफलं यथा नैवेद्येन
भवेत् स्वर्गो नैवेद्येनामृतं भवेत्
धर्मार्थकाममोक्षाश्च नैवेद्येषु प्र
तिष्ठिताः सर्वयज्ञफलं नित्यं नै
वेद्यं सर्वतुष्टिदं ज्ञानदं मानदं पुण्यं
सर्वभोग्यमयं तथा मनसापि महा
देव्यै नैवेद्यदानमिच्छति योनरो
भक्तियुक्तः सन् दीर्घायुः सस्वली
भवेत् महामायां कदा देवी सर्व्व
पिष्यामि शाक्तिनः नाना विधै
स्तैर्नैवेद्यैरिति चिंतयाकुलस्तु।
यः स सर्वकामान् संप्राप्य ॥
मम लोके महीयते इति
कालिका पुराणे ॥ ॥

१२८। १२८· अध्यायः तत्कालो य
था अर्वाक् विसर्जनाद्द्व्यं नैवेद्यं
सर्वमुच्यते विसर्जिते जगन्नाथे
निर्माल्यं भवति क्षणात् पंचरात्र
विदो मुख्या नैवेद्यं भुंजते सदा इ
ति गरुडपुराणे तत्स्थापन।
क्रमो यथा गौतमीये वामत
स्तु तथा धूप मग्रे वा न तु दक्षि
णे नैवेद्यं दक्षिणे भागे पुरतो
वान पृष्ठतः दक्षिण भागस्तु
देवताया एव न तु साधकस्य प
क्षेच देवता वामे आत्मनश्चैव द
क्षिणे पुरश्चरण चंद्रिकायां द
क्षिणेन परिसृज्य वामेचैव प
येत् अभोज्यं तद्भवेदन्नं पानी
यंच सुरोपमं इति तंत्रसारः।
तन्मुद्रा यथा नैवेद्य मुद्रा मं
गुष्ठ कनिष्ठाभ्यां प्रदर्शयेत् क
निष्ठानामिकांगुष्ठैर्मुद्रा प्राण
स्य कीर्तिता तर्जनीमध्यमाङ्गु
ष्ठैरपानस्य तु मुद्रिका अनामा
मध्यमांगुष्ठैः उदानस्य तु सा स्मृ
ता तर्जन्यनामामध्याभिः सांगु
ष्ठाभिस्तु नर्थिका सर्वाभिः सा
समानस्य प्राणाद्यात्र प्रयोजिता
ताः पूर्व्वोक्तपंचमुद्राः प्राणादीनां प्र
दर्शयेत् इति जामलः वल।
णाय तत् समर्पणं यथा स्वाता
त् स्वादति नैवेद्यं विप्ररूपी जनार्द
नः ब्राह्मणे परितुष्टे च संतुष्टाः
सर्वदेवताः देवाय दत्वानैवेद्यं
द्विजाय न प्रयच्छति भस्मीभूत
चनैवेद्यं तत्तं निष्फलं भवेत् ॥
देवदत्तं न भोक्तव्यं नैवेद्यंच विना
हरेः प्रशस्तं सर्वदेवेषु विष्णोर्नै
वेद्यभोजनं शूद्रस्य तद्ग्रहणे वि
पि यथा शूद्रश्चेद्धरिभक्तस्तु नैवे
द्यभोजनोन्मत्तकः आत्मार्थं हर
येदत्वा पाकं कृत्वा च खादति इति
श्रीकृष्णजन्मखंडे ४१ अध्यायः ॥
विष्णुनैवेद्य भोजन फलादि स्कांदे
कृत्वा चैवोपवासंतु भोक्तव्यं द्वादशी
दिने नैवेद्यं तुलसी मिश्रं हत्याकोटि
विनाशनं पापं हरति रूपं सुखे ना
म नैवेद्यमुद्धरेद्धरेः पादोदकेच नि
र्माल्यं मस्तके यस्य सोच्युतः स्कां
दे अग्निष्टोम सहस्रैश्च वाजपेय।
शतैस्तथा तत्फलं भवेद्देवि वि
ष्णो नैवेद्य भक्षणात् पादोदकंच
निर्माल्यं नैवेद्यंच विशेषतः महा
प्रसाद इत्युक्त्वा ग्राह्यं विष्णोः प्रय
त्नतः बहूंच गुह्यपरिशिष्टे यवि
चे विष्णोर्नैवेद्यं सह सिद्धर्षिभिः
स्मृतं। अन्यदेवस्य नैवेद्ये। भु

क्ता चान्द्रायणं चरेत् स्वदत्त मि। ति विशेषणीयं स्मृतो ब्रह्मचा रि गृहस्थैश्च वनस्थयतिभि स्त था भोक्तव्यं विष्णुनैवेद्यं नात्र। कार्या विचारणा इत्येकादशी तत्वं अपिच विष्णो र्निवेदितं। पुष्पं नैवेद्यं वा फलंजलं प्राप्ति मात्रेणभोक्तव्यं त्यागेनब्रह्महा। जनः भ्रष्टश्री र्भ्रष्टबुद्धिश्च भ्रष्ट ज्ञानो भवेन्नरः य स्त्यजेद्विष्णु नैवेद्यं भाग्येनोपस्थितंशुभं॥ प्राप्तिमात्रेणयो भुंक्ते भक्त्या वि ष्णु निवेदितं पुंसांपापानसमुद्धृत्य जीवन्मुक्तः स्वयं भवेत् विष्णुनैवे द्यभोजीयो नित्यंवाप्रणमेद्धरिं पू जयेत् स्तौतिवाभक्त्या सविष्णु सदृशो भवेत् पुंश्चल्यन्नमवीरान्नं शूद्रश्राद्धान्न मेवच यद्देवलनिवेद्यं चवृथामांस ममक्तकं शिवलिंग प्रदत्तान्नं यदन्नंपूर्ववाजिनो द्वि। कित् सक द्विजान्नंच देवलान्नंत थैवच कन्याविक्रयिणामन्नं यदन्नं योनिजीविनां यमुद्धान्नं पर्युषि तं सर्वभक्ष्यावशेषकं शूद्राप तिद्विजान्नंच वृषवाहद्विजान्नकं प्रदीक्षितद्विजान्नाच यदन्नंशव दाहिनो॥ ब्रह्मस्वागामिनाचैव

द्विजानामन्नमेवच मित्रद्रोहकृ तघ्नानामन्नं विश्वासघातिनां॥ मिथ्यासाक्ष्यप्रदानांचब्राह्मणा नां तथैवच एतत् सर्वविष्णुद त्तविष्णो र्नैवेद्यभक्षणात् इति ब्रह्मवैवर्त्ते प्रकृतिखंडे २४ अध्या यः विष्णो र्निवेदितान्नेन यष्टव्याः सर्वदेवताः पितरोतिथयश्चैव मिति वेदेषु विश्रुतं अमरं त स देवस्तेनोभिष्टमरस्तुदुर्लभं वि ष्णोर्निवेदितान्नस्यकलांनार्हन्ति षोडशीं यदृच्छया तन्नैवेद्यं यो भुंक्तेसाधुसंगतः षष्टिवर्षस हस्राणांप्राप्नोति तपसांफलं यो निवेद्यहरिंभुंक्तेभक्ष्याभक्ष्य विस्पृशः किंवा तपसा तस्य स हरेस्तेजसा समः इतिब्रह्म वैवर्त्ते श्रीकृष्णजन्मखंडे २१ अध्या यः शिव नैवेद्ये विशेषो यथा बहुचवृत्तपरिशिष्टे अग्राह्यं शिवनैवेद्यं पत्रं पुष्पं फलंजलं शालग्राम शिला स्पर्शात् सर्वं यातिपवित्रतां शालग्राम शि लायांशिवपूजने तद्ग्राह्यमित्या ह्निकतत्वे कालिकापुराणे यो यद्देवार्चनेरतः स तन्नैवेद्यभक्ष कः केवलंसौरशैवेनवैष्णवोनैव

भक्षयेत् वैष्णव पदमन्यदेवो पासक परे समानन्नन्य नैवेद्यं भक्षयेदन्य देवतः एतद्यात् स्पष्टपरं नंदिकेश्वर पुराणे दत्वा नैवेद्यवस्त्रादि नाददीत कथंचन त्यक्तव्यं शिवमुद्दिश्य नरादाने न तत्फलं इति शिवदत्ते विशेषः इत्येकादशीतत्वं स्वदत्त शिव नैवेद्यस्यापि भक्ष्याभक्ष्यत्वमु क्तं यथा रोगं हरति निर्माल्यं शो कंतु चरणोदकं अशेषं पातकं हंति शंभोर्नैवेद्य भक्षणं इतिशा क्तानंदतरंगिणी शिवनैवेद्य। स्याग्राह्यत्व कारणं यथा तथा। कोवाच एवम्भूतस्य च विभो म हेशस्य महात्मनः नशक्तकथम श्लिष्टं बुद्धिमन्देहभंजन श्रीकृष्ण उवाच शृणुदेवि प्रवक्ष्येहमितिहा सपुरातनं पापेघ्ननानादहनेज्व लदग्निशिखोपमं सनत्कुमारोवै कुंठ मेकदा च जगामह ददर्श भ क्तं वैनवनाथं नारायणं द्विजः त त्राव गृहे: स्तोत्रै श्चप्रणम्यभक्ति तो मुदा अवशेषं ददौतस्मै संतुष्टो भक्तवत्सलः प्राप्तमात्रेण तंचैव भुक्तेतेनैवकिंचन किंचिद्दत्वं पू।

नोभक्षणाय च दुर्लभं सिद्धाश्रमे चतद्दत्तं गुरवे शूलपाणिने भक्त्या देकाद्य तत्सर्वं भुक्तंच प्राप्तिमात्र तः भुक्त्वा सुदुर्लभं वस्तु ननर्तमेप मविह्वलः पुलकांचित सर्वांगः साश्रुनेत्रोमुदान्वितः गायत्न्मम गुणंभक्त्या सकंठः पंचवक्त्रतः रा गभेदकतानेन तालमानेन सुंद रं पपातउमहद्रस्तान् शूलंचव्या घ्रचर्मच स्वयंनिपतय पश्चाद्धृदेन क्तीमवाप च अतीव कमनीयेन रूप ध्यानेकमानसः सहस्रदल मध्यस्थमोपश्यत् तत्सरोरुहे एतस्मिन्नंतरे देवी दुर्गादुर्गतिना शिनी मुदाजगाम पीठं तत्प्र मेवदेतत्ताणि हृदंतमूर्छितं दृष्ट्वा सपत्नेतेचभक्तितः प्रहस्यवाबोप प्रच्छ कुमारं शूलपाणिनः सर्व तोकथयामास कुमारः संपुटां जलिः श्रुत्वा दुर्को प सा देवी शि वे प्रस्फुरिताधरा तां शशाप मुद्य तोदेवीमुस्थाय चत्रिलोचनः वो धयामास विविधं तुष्टाव संपुटां जलिः श्रुत्वा मनोहरं स्तोत्रेन शापा पशिवे शिवा दृष्टचके तदुच्छिष्टम भक्ष्यं विशेषा मपि पार्वत्युवाच स विरंच तप स्तमामया लब्धस्त्वमी

श्वरः त्वया विस्मोः प्रसादेन वंचिता
हं कथं विभो यतो नदत्त नैवेद्यं विश्वे
मेत्यनवाधुमा श्वतो मन्त्रो गृह्णाति
तत्फलमेवमहेश्वर अद्यप्रभृ
तियेलोकानैवेद्यं भुंजतेतव तेज
स्मैकेसारमेया भविष्यन्त्येव भाव
ते इत्युक्त्वा पार्वती मानाद्रुरोद
पुरतो विभोः हृष्टि: पपात तत्
कंठे नीलकंठो वभूव सः तदा
शिवः शिवां भक्त्या कृत्वा वत्स
सादरं तन्मानभंगं स्तोत्रेण वि
नयेन चकारह करेणवल्लवोनी
रेसंमस्ज्य च पुनः पुनः बोधयामा
स विविधैर्नीतिवाक्यैर्मनोहरैः।
परितुष्टा च सा देवी भर्तारं सम
वाच ह कलेवरं च मत्स्वामिनैवे
द्येन विना हरेः विभर्षि देहं स
ततं तव सौभाग्य वर्द्धितं कथं
वहासि सौभाग्य रहितं च कले
वरं यथैवं तव नैवेद्यं जनस्य स
जरा हरं कृतं हृष्टपत त्स्मात्
पषण्ठे हरत्वज्जामिव लिंगोपरि
च यद्दतं तदेवाग्राह्यमीश्वर स
पवित्रं भवेत्तव विश्वे नैवेद्यमि
श्रितं इत्येवमुक्त्वा सा देवी देहं
स्पृष्ट्वा सम्बयता यस्तो हर स्तनं
पुरतः स्नात्वा च सौचकार हइति

बल्लिवैवर्ते श्रीकृष्णजन्मखंडे ३२
अध्यायः तत्कारणान्तरे यथा
श्रीदेव्युवाच दुर्लभं तव निर्मा
ल्यं ब्रह्मादीनां कृपानिधे तत्का
र्यं परमेशान निर्माल्यं तव हृ
षिते ईश्वर उवाच माभैर्माभैर्महा
देवि ज्ञानसारं शृणु प्रिये यतज्ज्ञा
नं महादेवि सारात्सारं परात्परं
पंचभूतात्मके देवि मुखे मे परि।
कीर्तितं मध्यस्थाने स्थिते यत्र
तन्मुखं परमेश्वरि श्यामलं तव
ईशाने सर्दा कुर्वन्स विस्मिते का
लाग्निरूपिणं तत्र सर्वशक्तिम
यं सदा तेजोमयं महेशानि मुख
मद्देवनानने क्षीरोदमंथने देवि
उत्थितं गरलं विषं उत्थितं गरलं
यत्र ब्रह्माण्डनाशकारकं तदेव
गरलं देवि हस्तेकृत्वा नु तद्विषं
कृष्णांजन निभं दिव्यं गरलं जल
वक्त्रदा मम हस्ते महेशानि प्यावि
रासीत् मुखविस्मिते ततः करत
लीकृत तद्विषं परमेश्वरि निपी
य तद्विषं हृत्वं तीव्रं च ब्रह्माण्डना
शकं ततः प्रणमम मुखे विनयीभा
तद्विषं प्रिये तद्विषं कण्ठदेशात् स्थि
तेति सर्वदा मम ततः प्रभृति देवे
शि मुखे ज्वालायेत सदा ॥ ।

कंठेतत्कलंषभूता सदा तिष्ठति का
मिनि ततः प्रभृति देवेशि नीलकं
ठत्वमागया ईशानं मन्मुखं देवि
पवित्रं ब्रह्मवराननं प्रत्येतिरामयं
देवि मन्मुखं कमलाननं सात्वात्
ज्योतिर्मयी देवी सदा मे मुखे सं
स्थिता पत्रं वा यदि वा पुष्पं जलं
वा वरवर्णिनि अत्यद्विपरमेशा
नि उपचारं मनोहरं यो दद्यात्
परमेशानि मन्मुखोपरि पार्वति
अग्राह्यं तत्तु निर्माल्यं सात्वाद्रुत्व
मयं ततः यतत्परमेशानि निर्मा
ल्यं यत्तु धारयेत् सश्रेष्ठो जायते
देवि निष्कृति नास्ति तत्रैव अग्राह्यं
मम निर्माल्यं ज्वलएव आनने ॥
यद्दत्तं मन्मुखे देवि पुष्पं वा पत्र
मुत्तमं तन्निर्माल्यं महेशानि गृ
ह्णीयात् शिरसा सदा स ब्रह्म तेज
सा तस्य समतां याति सुंदरि न
दद्याद्यदि देवेशि उपचारं मुखे वि
स्मिते लिंगोपरि वरारोहे यश्च
तस्य मुखविस्मिते निगदामि शृणु
प्रोक्त वचनं मम कामिनि सएव
नारकी भूत्वा नरकं सर्वदा व्रया
त् अशेष नरकं भूत्वा अशेष यो
निमाव्रजेत् अशेष स्थावरं देवि
जंगमं च तथा प्रिये भुक्ता तस

र्वपापानां अशेषं क्रिमितां व्रजेत्
मुखे देवि प्रवक्ष्यामि उच्छिष्टंम
म पार्वति उपचारं स्थापयित्वा
शुभे पात्रान्तरे प्रिये कृत्वा तन्मंत्र
शुभे हि उपचारं निवेदयेत् वा
मदेवादि देवेशि मुखेषु वरवर्णि
नि भक्षणं मम देवेशि ब्रह्माण्ड
सृष्टिकारकं यतो हि परमेशानि
ब्रह्मादीनां सुदुर्लभं अशुचि।
ह्रीं मुखे वापि उच्छिष्टं भक्षयेद्य
दि स एव परमाराध्यः साक्षाद्ब्र
ह्म मुखविस्मिते उच्छिष्ट भक्षणे
कामी सएव श्री सदाशिवः नि
र्माल्यं दृढभक्तित्वाद्ग्रहणीयाद्य
त्न पार्वति प्रथमं विस्रवेद्देवि
विस्रुमंत्रेण सुंदरि निर्माल्यं
मम देवेशि विसर्जयेत् वराननेन
देवासुर मनुष्याश्च गंधर्वाः कि
न्नराद्यः ते सर्वे परमेशानि व
राकाः रुद्रदेवताः निर्माल्ये पुन
देवेशि अधिकारी कथं भवेत्
इति लिंगार्चनतंत्रे ... प
टलः ॥
नैवेद्यशिके क्ली निवेशनार्थं गा
र्हस्थाय यत्न कर्म्मा दीयते तत्
यथा भूतपाञ्चानवकामाखिल
सर्पिः प्रति आयात् नैवेद्यिकं वलि

पुण्यैर्दत्वा स्वर्गे महीयते इति
मिताक्षरा निवेशं संबंधिनित्रि।
नैशं } त्रि निशासंबंधि निशा
वैशिकं } भवं इति सिद्धान्त कौ
मुदी ॥
नैषधः पुं नलराजा इतित्रि।
काण्डशेषः निषध संबंधिनि
त्रि नैष्किन्यं त्रि निष्किंचनत्व निष्कि
तस्य भाव इत्यर्थे ष्य प्रत्यय।
निष्कत्वं ॥
नैष्किकः पुं टङ्काध्यक्षः इत्यम
रः टंककपतिः पुरुषाध्यक्षादिरू
पेणगठिते रजते त्वर्णे तस्याध्यक्षः
इति भरतः ॥
नैष्ठिकः पुं ब्रह्मचर्यकृत्वायाव
ज्जीवं गुरुकुलेयोवसतिसः यथा
नैष्ठिको ब्रह्मचारी च वसेदाचा।
र्यसन्निधौ तदभावेऽस्यतनयेप
त्न्यां वैश्वानरेपि वा अनेन विधिना
देहं साधयेद्विजितेंद्रियः ब्रह्म
लोकमवाप्नोति नचेह जायते
पुनः इति गरुडपुराणे ॥
नैसर्गिकः त्रि स्वाभाविकः य
था इच्छामस्त्वामिय भक्तिः
लब्ध्वापरमात्मनः कस्यचापि
त्रिनाराजन्वकिञ्चा नैसर्गिकीत
व इति कालिकापुराणे १२ अध्यायः

नैस्त्रिंशिकः त्रि खड्गधारी निस्त्रिं
शेन प्रहरतियः तत्पर्यायः ॥
असिहेतिः २ इत्यमरः आसिहे
तिकः ३ इतिशब्दरत्नावली नो
ऽनहि अभावः इत्यमरः ॥
नोधाः पुं ऋषिभेदः इत्युणादि
कोषः ॥ ऋ
नोपस्थाता त्रि हूस्व्यः न उप
समीपे तिष्ठतियः सः हीनार्थि
विशेषः यथा अन्यवादी क्रिया
द्वेषी नोपस्थाता निरुत्तरः आ
हूतप्रपलायी च हीनः पंचविधः
स्मृतः इति मिताक्षरायांव्यवहा
रमातृका ॥
नौः स्त्री नौका इत्यमरः। नौ
का स्त्री नद्यादिसंतरणार्थका
ष्ठादि निर्मितयान विशेषः तत्प
र्यायः नौः २ तरिका ३ तरणिः ४
तरणी ५ तरिः ६ तरी ७ तरंडी ८ इ
तिशब्दरत्नावली अथ निष्पद
यानोद्देशः नौकाद्यं निष्पदयानं त
स्य लक्षणमुच्यते अथादिकं तु यथा
तं स्थले सर्वं प्रतिष्ठितं जले नौ
कैव यानं स्यात् दतस्तां यत्नतो व
देत् अथकालः सवार वेला
तिथि चंद्रयोगे च रेविलग्ने नक्
रादिषट्के ॥ अतोन्य ॥ ।

सम्पत्तिरिक्तेतरे च वदंति नौका
घटनादि कर्म अपि खराम्बु
स्थानिधि पूर्वामित्र धनाढ्य
तमे प्रभलग्ने तारक योगति
थीड् विशुद्धौ नौगमनं शुभदं
शुभवारे इति युक्तिकल्पतरु ह
त्वजातिचतुर्विधा समासेनेव
दितं तेषां काष्ठं चतुर्विधं तदथा
लघु यत् कोमलं काष्ठं सुघटं
ब्रह्मजाति तत् दृढाङ्गं लघु यत्
काष्ठमघटं क्षत्रजाति तत् कोम
लं गुरु यत् काष्ठं वैश्यजाति तदु
च्यते दृढाङ्गं गुरु यत् काष्ठं शूद्र
जातितदुच्यते लक्षण द्वययो
गेन द्विजातिः काष्ठ संग्रहः स
त्रियकाष्ठैर्घटिता भोजमतेन सु
खसंपदं नौका अन्येलघुभिः सु
दृढैर्विदधति जलदुष्पदे नौकां
विभिन्न जातिद्वय काष्ठजाता न
श्रेयसे नापि सुखाय नौका नैषा
चिरं तिष्ठतिपच्यते च विभिद्यते वारि
णि मज्जते च न सिंधुगाद्याइतिलो
हबंधनलोहकांते र्नक्रियते हि लौहं
विपद्यते तन्न जलेषु नौका गुणेन
बंधं निजगाद भोजः अथ लक्ष
णानि सामान्य विशेष नौकाया

लक्षण द्वयं अत्र सामान्यं राजहस्त
मितायामा तत्पाद परिणाहिनी
तावदेवोन्नता नौका क्षुद्रेति गदि
ता बुधैः अतः सार्द्धमितायामा तद
र्द्धपरिणाहिनी त्रिभागेणोत्थिता
नौका मध्यमेति प्रचक्षते लघ्वीथ
मध्यमा भीमा चपला पटला भ
या दीर्घा पत्रपुटा चैव गर्भरा मंथ
रा तथा नौका दशक मित्युक्तं
राजहस्तैरनुक्रमं एकैक वृद्धैः
सार्द्धैश्च विजानीयात् द्वयं द्वयं
उन्नतिश्च प्रवीणाच हस्तादर्द्धांश
संमिता अत्र भीमा भया चैव गर्भ
रा चाशुभप्रदा मंथरा पर्वतोया
स्वतासामेवाद्युयोगतिः तासांतु
ण लक्षणदेषात् इत्थनाच प्रकीर्ण
ता अथ विशेषः दीर्घा चैवोन्नता
चेति विशेषद्विविधाभिदा तत्र दी
र्घा यथा राजहस्त द्वयायामा अ
ष्टांश परिणाहिनी नौकेयं दीर्घि
का नाम दशांशेनोन्नतापिच दी
र्घिका तरणी लोला गत्वरा गामि
नी तरिः जंघाला प्लाविनी चैव धा
रिणी वेगिनी तथा राजहस्तैकेक
वृद्धा नौका नामानि वेदशा उन्न
तिः परिणाह श्चदशांशांश मिताक्र
मात् अत्रलोला गामिनी च प्लावि।

नीचैः खराभवेत् लोलायामान-
मारभ्य यावद्भवति गत्वरा लोला-
याः फलमाधत्ते एवं सर्वासु निर्ण-
यः वेगिन्याः प्रवृत्तो यान सा शिवा-
योत्तरा यथा भोजोपि नौका दीर्घे-
यथैकस्यान्नवैतानि विवर्ज्जयेत् ह्र-
स्वसंख्यापरिन्यासा वसुवेदगुहो-
न्नरे बहुरत्नमिता नौका जलेहवि-
वलेधनं नवेन्द्रनरे यापि या च-
त्वारिंशान्नरा एतेन चत्वारिंश-
त्रिषष्टि नवति संख्या नत्र परेना-
पि यावदपर दशकं तावदेव न
फलमिति इति दीर्घा अथोन्नता
राजहस्त द्वयमिता तावत् प्रस-
रणोन्नता इय मुद्दीमिथा नौ-
का वेमाय पृथिवीभुजां ऊद्ध्वान्त-
द्वी स्वर्णगुरवी गर्भिणी मन्थरा न-
या राजहस्तैकैकहीनाम एव-
वंयं भवेत् अथोर्द्ध्वा गर्भिणीच
निंदितं नाम युग्मकं मन्थरायाः
परा यास्तु ताः प्रभाय यथोर्द्ध्वं
भोजोपि वारणस्तु नरतो मानं नौ-
कानां मस्तु भंवहेतू पंचाशत्तु हस्ता-
सेयनता शावयोर्द्ध्वंतः इत्युन्नता
धातादीन मतो वदो निर्णयंत
त्रिसंख्ययं कनकं रजतं ताम्रं त्रि-
तयं वा यथाक्रमं वलादिभिः प-
रिन्यस्ते नौका चित्रणकर्म्मणि चतुः-
श्रृंगा त्रिश्रृंगाभा द्विश्रृंगा चैकश्रृ-
ङ्गिणी सितरक्तापीतनीलवर्णान्
याद्यथाक्रमं केशरी महिषो ना-
गो द्विरदो व्याघ्र एव च पक्षी भे-
को मनुष्यश्च एतेषां वदनाष्टकं
नावां मुखे परिन्यस्य आदित्यादि-
दशाभुवां कलसो दर्पणश्चन्द्र-
सैवदशानां महीभुजां हंसः केकी
शुकः सिंहो गजो द्विसीच्च षट्प-
दो आदित्यादिदशाजात नौकोप-
रिपरिन्यसेत् नौकासमस्ति वि-
न्यासो विज्ञेया नवद एवत् मुक्ता-
स्तवकैर्युक्ता नौकास्यात् सर्वतोभ-
द्रा नत्संख्या वेदथरसवेदद्रुय से-
मिता क्रमशः कनकादीनां मा-
ला जयमालेति गद्यते सद्भिः ।
वलदेवेहितयेषकैकैवेषणमृद्-
योनी निर्दृह एवमुद्दिष्ट सगृहा-
णि यथास्थाणं सगृहा त्रिविधा
नौका सर्वमध्याग्रमंदिरा सर्वतो
मंदिरं यत्र सा ज्ञेया सर्वमंदिरा
राज्ञां कोशाश्व नारीणां यानं म-
त्रप्रशस्यते मध्यतो मंदिरं यत्र
सा ज्ञेया मध्यमंदिरा राज्ञां वि-
लास यात्रादि वर्षासुच ॥

1789

प्रशस्यते अग्रतो मंदिरं यत्र
सा ज्ञेया त्वग्रमंदिरा चिरप्रवा-
सयात्रायां रणे काले घनात्य-
ये मंदिरमाने नौका प्रसरत
एवार्द्ध भागतो न्यूने भोजस्तु
दीर्घद्भूनवसु षट् दिवाकरा
नेक दिनव मिता यथाक्रमं रा-
ज पंच भुजसम्मितोन्नति मंदि-
रे नरगिते महीभुजां भास्करा-
दिक दशाभुवां पुनर्धातु नि-
र्णयन मत्र पूर्ववत् पताका
कलसादीनां निर्णयोनवदंड-
वत् काष्ठज धातुजे चेति मंदि-
रं द्विविधं भवेत् काष्ठजं सर्वस-
यमे विलासे धातुजमत्र प्रशस्-
यासनादीनां मंथरोहावयोर-
पि अन्येषांचैव मुनिभिर्निर्णयः
पूर्ववन्मतः द्विमात्रमिदमुद्दिष्ट
नौकालक्षणमत्र प्रधानेषेव
नियमोत्र प्रधानेन निर्णयः ल-
घुता दप्यताचैव गामिता छिद्र-
ताल्पता समानेति गुणोद्देशो नौ-
कानां सम्प्रकाशितः एवं विविध-
यो राजा नौकायानं करोति च सवि-
शेषवमाप्नोति विजयस्समरे प्रिय-
योत्तानारस्यथा यानं नौकानाऊ-
हेतवः तस्यैतानि विनश्यन्तिय-
शोवीर्च्छवलेपनं इति निष्पादयानो-
द्देशे नौकायानं जलयानं जलयाना-
नि यथा नौकास्वेतज्जलेयानेज-
लयानमिति गद्यते तदेहा वद्दव स्ते-
तपाश्चात्यानां प्रकीर्तिताः द्रोणी-
दूपेन यथानं द्रोणीयानं तदुच्य-
ते घटीभिर्घटितं यानं घटीनौके-
तिगद्यते तंब्यादे स्तु फलेयानं
फलयानं प्रचक्ष्यते चर्मभिस्तू-
लपूर्णैर्यच्चर्मयानं तदुच्यते यानं
यलखुभिर्द्दहेद्दितयानं तदुच्यते
जंतुभिः सलिलेयानं जंतुयानं प्र-
चक्ष्यते वाऋभ्यांसंतरेद्वारिजयं स्व-
घु न निर्णयः इति युक्तिकल्प-
तरौ निष्पादयानोद्देशः नौकादंडः
पुं क्षेपणी चाइइ प्रतिधजी इतिनगी
इति च भाषा इत्यमरः नौतार्य्य
त्रिनाप्य नौकागम्य देशादि इत्य-
मरः न्यकारुका स्त्री शाकल्को-
टः विष्टाक्रिभिः इति हारावली
न्यक्कारः पु न्यक्करणं तत्पर्यायः
अवज्ञा २ परीहारः ३ परिहारः ४
पराभवः ५ अपमानं ६ परिभवः ७
तिरस्कारः ८ तिरस्क्रिया ९ अव-
हेला १० हेला ११ अवहेलनं १२ हे-
लनं १३ अनादरः १४ अभिभवः १५
सूत्म १६ सूत्मतं १७ रीढा १८।

अभिभूतिः १९ निकृतिः २० असूत
णं २१ असूर्क्षणं २२ नीकारः २३ अव
हेलं २४ अमाननं २५ क्षेपः २६ निका
रः २७ धिक्कारः २८ इति शब्दरत्ना
वली विमानना इति कालिदासः
न्यग्रोधः पुं वटवृक्षः व्याममपरि
माणं इत्यमरः शमीवृक्षः ।
इति मेदिनी विषपर्णी मोहना
ख्यौषधिः इति विश्वः ॥
न्यग्रोधपरिमंडलः पुं व्यामप।
रिमितोच्छ्रायपरीणाहः पुरुषः
पनाहपाः उरुषाह्वेना युगेवक
र्त्तिनश्चासन् यथा महापद्मधं
रा श्चैव त्रेतायां चक्रवर्त्तिनः सर्व
लक्षणसंपन्ना न्यग्रोधपरिमंडलाः
न्यग्रोधौ तु स्मृतौ बाहू व्यामो न्य
ग्रोध उच्यते व्यामेन उच्छ्रयो य
स्य अध ऊर्द्धं च देहिनः समोच्छ्र
य परीणाहो न्यग्रोधपरिमंडलः
इति मात्स्ये ११८ अध्यायः न्यग्रो
धपरिमंडला स्त्री अंगना विशे
षः यथा स्तनौ सकठिनौ य
स्या नितम्बे च विशालता मध्ये
क्षीणा भवेद्या सा न्यग्रोधपरिमं
डला इति शब्दमाला न्यग्रोधा स्त्री
न्यग्रोधी इति शब्दरत्नावली ॥
न्यग्रोधी स्त्री उपचित्रा इन्दुरकानी
इति भाषा घुलकुडी इति के
चित् इत्यमरभरतौ ॥
न्यङ् त्रि नीचः खर्व्वः इत्यम
रः निम्नः इति मेदिनी कार्त्त
स्न्य इति विश्वः ॥
न्यंकुः पुं मृगभेदः इत्यमरः
मुनिविशेषः इति मेदिनी
न्यंकुभूरुहः पुं शोणकवृ
क्षः इति त्रिकाण्डशेषः ॥
न्यचितं त्रि अधःक्षिप्तं इति
जटाधरः न्ययः पुं अपच
यः इति केचित् न्यस्तं त्रि नि
हितं स्थापितं तत्पर्यायः नि
सृष्टं २ इत्यमरः अस्य पर्य्या
यान्तरं निक्षिप्त शब्दे द्रष्टव्यं
न्यस्तशस्त्रः पुं पितृलोकः इति
त्रिकाण्डशेषः न्यस्तशस्त्रे त्रि ।
यथा न्यस्तशस्त्रे दिलीपे च तं
चप्पश्चक्षुषामभूत् राज्ञामुद्धृत
नाराचे हृदि शल्यमिवार्पितं ।
इति रघुः ॥
न्यक्षं क्ली कार्त्स्न्ये स्वरणे निकृ
ष्टे त्रि इति मेदिनी ॥
न्यक्षः पुं महिषः इति मेदिनी
जामदग्न्यः इति हेमचन्द्रः ॥
न्याकं क्ली भृष्टतण्डुल मुडी इ
ति भाषा तत्पर्यायः भृष्टान्नं २

ऊहरं १ इति शब्दचंद्रिका ॥
न्यादः पुं आहारः इत्यमरः न्या
यः पुं विल्लः यथा अग्रणीरा
मणीः श्रीमान्न्यायोनेतासमीर
णः इति तस्य सहस्रनाममध्येग
णितः उचितः तत्पर्यायः अ
भ्रेषः २ कल्पः ३ देशरूपं ४ स
मंजसं ५ इत्यमरः प्रतिज्ञा हेतू
दाहरणोपनय निगमनात्मक
पंचावयव वाक्यं तल्लक्षणं यथा
अनुमितिचरमकारणलिंगपरा।
मर्शप्रयोजक शाब्दज्ञानजनक ।
वाक्यत्वं इति चिंतामणिः उचिता
नुपूर्वीकप्रतिज्ञादिपंचकसमुदा
यत्वं इति शिरोमणिः तद्रूपं यथा
पर्वतो वह्निमान् धूमात् यो यो ।
धूमवान् स वह्निमान् यथा महा
नसं वह्निव्याप्यधूमवांश्चायं तस्मा
द्वह्निमान् इति जगदीशः ॥
षड्दर्शनान्तर्गतदर्शनविशेषः
तत्पर्यायः तर्कविद्या २ आन्वी
क्षिकी । इत्यमरभरतौ एतद्दर्श
न मते नित्यैश्वर्याकृतिमतिसहितः
परमात्मा ईश्वरः सत्व ब्रह्मपदा
र्थोजीवातिरिक्तः एतच्छास्त्रप्रयो
जनं चार्वाकादिमतनिराकरण पू
र्वकं जगत् कारणतया ईश्वरस्था
पनं संशयादि निरूपणेन वेदार्थ
निर्णयश्च न्यायदर्शनकारो गौतमः
तत्सूत्रे प्रमाणादि षोडश पदार्थ
निरूपणं तेषां तत्त्वज्ञानान्निःश्रेय
सं तस्य भाष्यकारो वात्स्यायनः
तद्वार्त्तिककारः कात्यायनः तट्टी
काकारो वाचस्पति मिश्रः तच्छात्र
उदयनाचार्य्यः कुसुमांजलिप्र
भृतिग्रन्थकारः कुसुमांजलिटी
काकारो हरिदास रामभद्रौ गंगे
शोपाध्यायः प्रत्यक्षानुमानोप
मानशब्दाख्यखंडचतुष्टयात्मक
चिंतामणिकारः तत्सुतो वर्द्ध ।
मानोपाध्याय स्तयोश्छात्रो मणि
मिश्र यज्ञपत्युपाध्यायो मणि
प्रभाकारो यज्ञपत्युपाध्याय
छात्रः पक्षधरमिश्रश्चिंतामणि
आलोककारः पक्षधरमिश्र
च्छात्रो रघुनाथशिरोमणिश्चिंता
मणिदीधितिकारः तच्छात्रो
मथुरानाथ तर्कवागीशश्चिं
तामणिदीधितिव्याख्याटीकाकारः
तच्छात्रो भवानंद सिद्धांतवागी
शो दीधितिटीकाकारः तच्छा
त्रौ जगदीशतर्कालंकारगदाध
रभट्टाचार्य्यौ दीधिति टीकाका
रौ एतद्व्यतिरिक्ता वादार्थकारा
बहवः पंडिता आसन् अथन्याय
प्रथम सर्वं लिख्यते प्रमाणप्रमे
यसंशयप्रयोजनदृष्टांतसिद्धांत

वयव तर्क निर्णय वाद जल्प वि
तंडाहेत्वाभास छल जाति निग्रह।
स्थानानां तत्वज्ञानान्निश्रेयसाधिग
मः एषां लक्षणानि यथा प्रत्यक्षा
नुमानोपमान शाब्दाः प्रमाणानि
१ आत्मशरीरेंद्रियार्थ बुद्धि मनः
प्रवृत्ति दोष प्रेत्यभावफलदुःखाप
वर्गास्तु प्रमेयं २ समानानेकधर्मो
पपत्ते र्विप्रतिपत्ते रुपलब्ध्यनुप
लब्ध्यवस्थातश्च विशेषापेक्षो।
विमर्शः संशयः ३ यमर्थमधिकृ
त्य प्रवर्तते तत्प्रयोजनं ४ लौकि
क परीक्षकाणां यस्मिन्नर्थे बुद्धि
साम्यं स दृष्टांतः ५ तंत्राधिक
रणाभ्युपगम संस्थितिः सिद्धां
तः ६ प्रतिज्ञा हेतूदाहरणोपन
य निगमनान्यवयवाः ७ अवि
ज्ञाततत्वेऽर्थे कारणोपपत्तितस्त
त्वज्ञानार्थमूह स्तर्कः ८ विमृश्य
पक्ष प्रतिपक्षाभ्या मर्थावधारणं
निर्णयः ९ प्रमाण तर्कसाधनो
पालंभः सिद्धांताविरुद्धः पंचा
वयवोपपन्नः पक्ष प्रतिपक्ष प
रिग्रहो वादः १० यथोक्तोपपन्न
छल जाति निग्रहस्थानोपा
लंभो जल्पः ११ स तत्प्रतिपक्ष
स्थापना हीनो वितंडा १२ सव्य
भिचार विरुद्ध प्रकरणसमसा
ध्यसमकालातीतायापदिष्टा हेत्वा
भासाः १३ वचनविघातोऽर्थवि
कल्पोपपत्त्या छलं १४ साधर्म्यवैध
र्म्याभ्यांप्रत्यवस्थानंजातिः १५
विप्रतिपत्तिरप्रतिपत्तिश्चनिग्रह
स्थानं १६ इतिगोतमसूत्रं ॥ न्या
यशास्त्रंच पंचाध्यायात्मकं त
त्र प्रत्यध्यायस्याह्निक द्वयं तत्र
प्रथमाध्यायस्य प्रथमाह्निके भ
गवतागोतमेन प्रमाणादि प
दार्थ नवकलक्षणनिरूपणं वि
धाय द्वितीयेवादादि सप्त पदार्थ
लक्षण निरूपणं १ द्वितीयस्य त
प्रथमे संशय परीक्षणं प्रमाणच
तुष्टयाप्रामाण्यशंका निराकरणं
च द्वितीये अर्थापत्त्यादे रंतर्भावनि
रूपणं २ तृतीयस्य प्रथमे आत्म
शरीरेंद्रियार्थपरीक्षणं द्वितीये बु
द्धिमनः परीक्षणं ३ चतुर्थस्य प्र
थमे प्रवृत्ति दोष प्रेत्यभाव फल।
दुःखापवर्ग परीक्षणं द्वितीये दो
ष निमित्तकत्व निरूपणं अवय
वादिनिरूपणंच ४ पंचमस्यप्रथ
मेजातिभेद निरूपणं द्वितीये नि
ग्रहस्थानभेद निरूपणं ५ इति स
र्वदर्शनसंग्रहः युक्ति मूलक दृ
ष्टांतविशेषः सचवक्ष्यते तेषां
मध्ये प्रसिद्धानामलक्षणा ॥
प्रमाणानि लिख्यन्ते ॥

न्यायनामानि	तल्लक्षणानि	तत्प्रमाणानि
ग्रंथगोलांगूलन्यायः १	कश्चिद्दुष्टात्मा महारण्यमार्गे पतितं मंधं स्ववंधु नगरं जिगमिषुं वभाषे किमत्रायुष्मता दुःखितेनस्थीयत इति सर्वोथः स्ववाणी माकर्ण्यतमाम मतोवाच अहो मद्भागधेयंयदत्र भवान् दीनं मां स्वाभीष्टनगरं प्रापयस्व र्थेमाषत इतिसच विप्रलिप्सुः ईष्ट गोयुवान मानीय तदीय लांगूल मंधं ग्राहयामास उपदिदेश चैनमंध मेषगोयुवात्वांनगरं नेष्यति मात्य जलांगूलमितिसचांधःश्रद्धालुतया तदजन स्वाभीष्ट मप्राप्यानर्थपरस्प रांप्राप्तः ॥१॥	हेत्वाभासमध्य रान्नाघटीकादयः १
ग्रंथवंशन्यायः २	ग्रंथस्कंधारूढः पगुयष्ट्या ग्रंथस्य प ञ्जांग्धातिक्रमसमर्थस्तथास्वांधः पंगोर्दृष्ट्यावत्तः स्थानिवभवति। २	काव्यप्रकाशेचंडीदास टीका २
ग्रंथहस्तीन्यायः ३	बहवोऽन्धा हस्ति निरूपणार्थप्रवृत्ताः केनचित् चरणंस्पृष्ट्वा स्तंभाकारत्वेन। केनापिलांगुलं स्पृष्ट्वा रज्वाकारत्वेन परेणश्रोत्रंस्पृष्ट्वा सूर्पाकारत्वेनापरेण शुंडंस्पृष्ट्वा सर्पाकारत्वेनगजो निर्णीतः	भागवतादयः ३।
अशोकवनिकान्यायः ४	तत्र गृहणादिशालिनामशोकादि नानावनानांअशोकवनगमने समस्त वन गमनापेक्षा न अपिच तत्र गुण शालिनि वने सत्यपि रावणेनाशोक वने सीतास्थापिता नच वनान्तरे। स्थापनानपेक्षा ४।	भाष्यसमस्त चव्याख्या ४।

न्यायनामानि	तल्लक्षणानि	तत्प्रमाणानि
उष्ट्रकंटकभोजनन्यायः ५	उष्ट्रस्य शमीकंटकलतनजन्य बहुदुःखसहनपूर्वकं किंचित्सुखजनकस्य पत्रशमीकंटकभक्षणं ५।	वेदान्तशंकरभाष्यटीका ५।
कदंबगोलकन्यायः ६	कदंबगोलकस्य सर्वावयवेषु युगपदेव पुष्पाणामुत्पत्तिः ६।	भाषपरिछेदादयः ६।
करकंकणन्यायः ७।	कंकणशब्देनैव करभूषणविशेष। बोधसंभवेऽपि करशब्दपूर्वकंकणशब्दः करसंलग्नकंकणबोधार्थकः ७	काव्यप्रकाशटीकादयः ७
काकाक्षिगोलकन्यायः ८।	एकमेव चक्षुर्गोलकमुभयचक्षुःसंबंधि सदुभयचक्षुःकार्यकारकं ८।	अमरकोषटीकादयः ८
कूर्मांगन्यायः ९	कूर्मः स्वेच्छया अंगानि प्रसारयति संकोचयति तद्वत् ९।	पंचदशीटीका ९।
कैमुतिकन्यायः १०॥	यद्भारवहने दुर्बलस्यापि साध्यं तद्भारवहनं सबलस्य साध्यं ॥ । १०।	व्याधिकरणधर्मावच्छिन्नाभाव जगदीशटीका १०
खलेकपोतन्यायः ११।	वृद्धा युवानः शिशवः कपोताः खले यथामी युगपत् पतंति तथैव सर्वे युगपत् पदार्थाः परस्परेणान्वयिनो भवंति ११।	सामान्यलक्षण जगदीश। टीका ११
गुडजिह्विका। न्यायः १२	गुडजिह्विकासंबंधेरसास्वादनमेवफलं १२।	भाष्यरत्नप्रभा १२।
गोबलीवर्दन्यायः १३	बलीवर्दशब्देन महोक्षबोधसंभवेऽपि गोशब्दपूर्वक बलीवर्दशब्दो फलितिबोधार्थकः १३।	साहित्यदर्पणादयः १३
चालनीन्यायः १४।	चालनी भ्रामणेन तंडुलादेः स्थानान्तरपतनं तद्वत् । १४ ।	व्याप्तिपंचके जगदीशः १४

न्यायनामानि।	तल्लक्षणानि	तत्प्रमाणानि
तृणारणिमणिन्यायः १५।	तृणारणिमणीनामेकतावच्छेदकाभिमतभिन्नानेकधर्मावच्छिन्नं प्रतिकारणत्वं किन्तु वह्निनिष्ठकार्य्यतावच्छेदकत्रयमवलम्ब्य कार्यकारणभावत्रयं १५	बाधग्रंथटीका १५
दग्धपत्रन्यायः १६	दग्धानां दग्धपत्राणामपि पूर्वाकारेणावस्थानज्ञानमात्रेण तद्वस्तुतः पत्रत्वं १६	वेदांतभाष्यटीका १६।
दंडचक्रादिन्यायः १७।	घटत्वाद्येकधर्मावच्छिन्नं प्रति दंडचक्रादीनां कारणत्वं १७।	परामर्शमथुरानाथटीका १७।
दंडापूपन्यायः १८।	मूषकभक्षितेनैकदेशेन दंडे पतितस्तदेकदेशसंलग्नपिष्टकभक्षणबुद्धिः।	दायभागादयः १८
पंकप्रक्षालनन्यायः १९	पंकलेपनपूर्वकक्षालनमपेक्ष्य पंकस्यालेपनं श्रेयः १९	अवयवस्य गादाधरीटीका १९।
मणिमंत्रादिन्यायः २०।	दाहं प्रति जलस्य प्रतिबंधकत्वं वह्निनाशकतया यौक्तिकं मणिमंत्रादीनां न तद्विलक्षणमपि बंधकत्वं	पक्षता जगदीशटीका २०।
राजपुरप्रवेशन्यायः २१।	स्वातंत्र्येण विशृंखलगमनासहिष्णुरक्षकसंकुले राजपुरे जनानां श्रेणीरूपेण प्रवेशः २१॥	न्यायशास्त्रखंड मथुरानाथटीका २१।
लूतातंतुन्यायः २२	लूता स्वतंत्रमुत्पाद्य जालं रचयति संहरति च तद्वत् २२।	वेदांतसारटीका। २२
विशेष्यविशेषणन्यायः २३	भूतले घटो केवलघटो विशेष्यः तत्र तत्र घटे जले विशेषणं तत्र जलविशिष्टघटप्रवादो विशेषणं २३।	सामान्यलक्षणमथुरानाथटीका २३।
वीचीतरंगन्यायः २४।	वीचीजनितस्तरंगस्तज्जनितोपितरंग इति क्रमेणान्तरंगोत्पत्तिः २४।	भाषापरिच्छेदः २४।

न्यायनामानि	तल्लक्षणानि	तत्प्रमाणानि
बीजांकुरन्यायः २५	आदौ बीजं ततोऽङ्कुरः किमादावङ्कुरस्ततो बीजमित्यनिर्णयेन बीजाङ्कुरप्रवाहोऽनादिः २५।	ऊसमोजल्लिटीकादयः २५।
घोरक्षेलान्यायः २६।	कस्यचित् घोरवशाहेनैव वेलाविशेषनिर्णयः २६।	मलमासतत्त्वादयः २६।
शतपत्रभेदन्यायः २७	उपर्युपरिस्थितशतसंख्याकपत्राणां सूच्या युगपद्भेदभ्रमविषयाणामपि वस्तुत एकभेदानन्तरमपरभेदः २७	प्रपन्नखंडम घुरानाथटीका २७
शृंगग्राहिकान्यायः २८।	इहैतहृषभादेः प्रथमतः कोशलेनैक शृंग ग्रहणं पश्चादपर शृंग ग्रहणं २८।	आख्यातवादकाव निरुक्तेर्जगदीशी टीका २८।
सन्देशमापित। न्यायः २९।	सन्देशः मोक्षदाशी यस्य प्रसिद्धिः। यथा तेनोभय पार्श्व धारणेन वस्तुप्राप्तिस्तथा तथाहि अयोध्यामथुरामाया काशी कांची अवन्तिका पुरीद्वारवती चैव सप्तैता मोक्षदायिकाः इत्यत्र काश्याः पुरत्रय पाठानन्तरं पुरत्रयपाठ एवं च पठितत्वेन तदितर षट्पुराणि काशीप्रापकाणि २९	काशीखंडटीका २९।
सर्वापेक्षान्यायः ३०।	बहुषु निमन्त्रितेषु एकस्मिन्नागतेऽपि भोज्यं न दीयते सर्वानपेक्षते तद्वत्।	भाषारत्नप्रभा ३०।
सर्वीकटाहन्यायः ३१	स्वल्पश्रमसाध्यसर्वी निर्माणानन्तरं बहुश्रमसाध्यकटाह निर्माणं ३१	
स्थविरलगुडन्यायः ३२।	वृद्ध हस्तस्य यष्टिः सहसा लक्ष्यस्थानेक्वचित् पतति क्वचिन्न पततीति तद्वत् ३२	कलापव्याकरणे दलहरीटीकादयः कलापटीका ३२।

न्यायसारिणी स्त्री युक्तिः पूर्वकर्म कारिणी तत्पर्यायः लेढी २ इति त्रिकाण्डशेषः॥ न्याय्यो त्रि न्यायवान् न्यायोऽस्त्यस्मिन् मत्वर्थे इन् प्रत्ययनिष्पन्नः॥ न्याय्यं त्रि न्यायादनपेतं न्यायागतं धनादि इति भरतः तत्पर्यायः युक्तं २ औपयिकं ३ लभ्यं ४ भजमानं ५ अभिनीतं ६ इत्यमरः॥ न्यासः पुं उपनिधिः स्यात् पदद्वये इत्यमरः अस्य विवरणं निक्षेपशब्दे द्रष्टव्यं विन्यासः अर्पणं यथा पदन्यासे राशीत् कमल परिहरणं वसुमती हर्गान्दोलं विन्दीवरमयममम्बर तलेऽर्थ दयोऽपि किंचिद्विरचय वचः स्मेरमधुरं यया मध्यालाविधुमुखि सुधायाः परिचयः इति कालिदासः त्यागः यथा काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः। सर्व कर्म फल त्यागं प्राहुस्त्यागं विचक्षणाः इतिश्रीभगवद्गीतायां १८ अध्यायः। काशिकाख्या पाणिनि सूत्रव्याख्यान ग्रन्थ विशेषः यथा अनन्त सूत्र पद। न्यासा सद्वृत्तिः सन्निबंधना शब्द विद्येव नो भाति राजनीतिरपस्पशा इति माघ द्वितीयसर्गः॥ संन्यासः यथा वद्येविविदिषा न्यास विद्वन्न्यासश्च भेदतः हेतु विदेह मुक्तेश्च जीवन्मुक्तेश्च तौ क्रमात् इति जीवन्मुक्ति प्रथमविवेकः। पूजा जपादेः प्राग्विहिता मन्त्रसिद्ध्यर्थं देहांत वर्णादि विन्यासः तत्र न्यासकालो यथा प्रातःकालेऽथवा पूजासमये होम कर्मणि जपकालेऽपि वा तेषां विनियोगः पृथक् पृथक् पूजाकाले समस्तं वा कुर्यात् साधक सत्तमः इति योगिनीहृदयं अथ मातृकान्यासः॥ अस्य मातृका मन्त्रस्य ब्रह्म ऋषि गायत्री छन्दो मातृका सरस्वती देवता हलो बीजानि स्वराः शक्तयो लिपिन्यासे विनियोगः शिरसि ॐ ब्रह्मणे ऋषये नमः मुखे ॐ गायत्री छन्दसे नमः गुह्ये ॐ व्यञ्जनेभ्यो बीजेभ्यो नमः पादयोः। स्वरेभ्यः शक्तिभ्यो नमः तथा च ज्ञानार्णवे मातृका स्मरणं देवि। ऋषिन्यसेत् पापनिकृन्तनी ऋषि ब्रह्मास्य मन्त्रस्य गायत्रीछन्द उच्यते।

देवता मातृकादेवी वीजं व्यंजन
संचयं शक्तयस्तु स्वरा देवि षडंगा
न्यासमाचरेत्. ततः षडंगन्यासो
अं कं खं गं घं ङं आं अंगुष्ठाभ्यां
नमः इं चं छं जं झं ञं ईं तर्जनीभ्यां
स्वाहा उं टं ठं डं ढं णं ऊं मध्यमा
भ्यां वषट् एं तं थं दं धं नं ऐं अना
मिकाभ्यां हुं ओं पं फं बं भं मं औं
कनिष्ठिकाभ्यां वौषट् अं यं रं
लं वं शं षं सं हं लं क्षं अः करत
लपृष्ठाभ्यां फट् एवं हृदयादि
षु अं कं पंचाशत् हृदयाय नमः इ
त्यादि। तथाच ज्ञानार्णवे अं आं
मध्ये कवर्गेन इं ईं मध्ये चवर्गकं
उं ऊं मध्ये पवर्गेन विंदु युक्तम
सेत् प्रिये अनुस्वार विसर्गान्त
येशवर्गो सलक्षको हृदयं त
शिरोदेवि शिखाकवचकं तथा
नेत्रमस्त्रन्यसेत् उं. तो नमः स्वा
हा क्रमेण तु वषट् हुं वौषडंतेच
फडन्तं योजयेत् प्रिये षडंगोऽयं
मातृकायाः सर्व पापहरः स्म
तः अथान्तर्मातृकान्यासः।
अकारादि षोडश स्वरान् सवि
न्दुन् षोडशदलकमले कंठम
ले न्यसेत् ककारादि द्वादशव
॥ ॥ ॥ ॥

र्णान् सविंदून् द्वादशदलकम
ले हृदये न्यसेत् डकारादि दश
वर्णान् सविंदून् दशदलकमले
नाभौ न्यसेत् बकारादि षड्वर्णा
न् सविंदून् षड्दलकमले लिं
गमूले न्यसेत् वकारादि चतु
रो वर्णान् सविंदून् चतुर्दलकम
ले मूलाधारे न्यसेत् हक्षवर्णौ
द्वौ सविंदू द्विदलकमले भ्रूमध्ये
न्यसेत् तथाच ज्ञानार्णवे द्वाष
पद्माम्बुजे कंठे स्वरान् षोडश वि
न्यसेत् द्वादशच्छद हृत्पद्मे का
दीन् द्वादश विन्यसेत् दशपत्रा
म्बुजे नाभौ डकारादीन् न्यसेद्दश षट्
पत्रमध्ये लिंगस्थे वकारादीन् न्यसे।
त् षट् आधारे चतुरो वर्णान् न्य
सेद्वादीन् चतुर्दले हक्षौ भ्रूमध्य
गपद्मे द्विदले विन्यसेत् प्रिये अंत
स्यसंहितायां एकैक वर्णमेकै
क पद्मेतु विन्यसेत् प्रिये एवमंतः
प्रविन्यस्य मनसा तु वहिर्न्यसेत्
वैलक्षेत् एकैक वर्णमूलाधारम
लाधारादिस्थितान्येक नमात्मनिविन्या
सधारान्तराः परिकीर्तिताः अथान्तर्मातृ
कान्यासे मूलाधारे चतुर्दले सवर्णा
मेव शषसचतुर्वर्णविभूषिते षड्द
ले वैद्युत निभे स्वाधिष्ठानेऽनल।

वि षि व भ मै यं र लं युक्ते वर्णैः
षड्भिश्च सवते मणिपूरे दशार
ले नीलजीमूतसन्निभे डादि फांत
दले युक्ते विंदुभूषित मस्तकैः
अनाहते द्वादशारे प्रवालरुचि
सन्निभे कादि ठान्त दलैर्युक्तेयो
गिनां हृदयंगमे विशुद्धे षोडश
दले धूम्राभे स्वरभूषिते आज्ञा
चक्रेतु चंद्राभे द्विदले ह क्षला
छिते सहस्रारे हिमनिभे सर्व
वर्णविभूषिते अ क थादि त्रि रे
खात्म ह ल क्ष त्रय भूषिते तन्म
ध्ये पर विंदु च सृष्टि स्थिति लया
त्मकं एवं समाहित मना ध्याये
द्राशेषः प्रमोत्तरः। अथ वाह्यमातृ
कान्यासः तस्या ध्यानं यथा पंचा
शल्लिपिभि र्विभक्त मुखदोःप
न्मध्यवक्षः स्थलां भास्वन्मौलि
निबद्ध चंद्रसकलामापीन तुंग
स्तनीं मुद्रामक्षगुणं सुधाढ्य क
लसं विद्यांच हस्ताम्बुजैर्विभ्राणां
विषद प्रभां त्रिनयनां वाग्देवता।
माश्रये एवं ध्यात्वा न्यसेत् तत्रांगुलि
नियमस्तंत्रे ललाटे नासिका मध्ये
विन्यसेत् मुखपंकजे तर्जनी मध्यमा
नामा वृद्धा नामेवनेत्रयोः अंगुष्ठक
र्णयोर्न्यस्य कनिष्ठांगुष्ठकोनसोः

मध्यास्तिस्रो गंडयोश्च मध्यमांवो
ष्ठयोर्न्यसेत् अनामांदंतयोर्न्यस्य
मध्य मामुत्तमांगके मुखेनामा
मध्यमांच हस्त पादेषु पार्श्वयोः
कनिष्ठा नामिका मध्यास्तास्तुपृ
ष्ठे च विन्यसेत् ताः सांगुष्ठा नाभि
देशे सर्वाः कुक्षौ च विन्यसेत् हृद
ये च तले सर्व मंशयोश्च ककुत्स्य
ले हृत्पूर्व हस्त पत्कुक्षिमुखेषु
तलेनैव च पतास्तु मातृका मु
द्राः क्रमेण परिकीर्तिताः अज्ञा
त्वा विन्यसेद्यस्तु न्यासः स्यात्त
स्य निष्फलः गौतमीये लला
ट मुख वृत्ताक्षि श्रुति घ्राणेषु
गंडयोः ओष्ठदंतोत्तमांगास्यः
दोः पत्संध्यग्रकेषु च पार्श्वयोः
पृष्ठतो नाभौ जठरे हृदये ऽंशके
ककुद्यंशे च हृत्पूर्व पाणिपा
दयुगे तथा जठराननयोर्न्यसे
न्मातृकार्णान् यथाक्रमात् त
यथा अं नमो ललाटे आं नमो
मुखवृत्ते इं ईं चक्षुषोः उं ऊं क
र्णयोः ऋं ॠं नसोः लृं लॄं गं
डयोः एं ओष्ठे ऐं अधरे ओं ऊर्ध्व
दंते औं अधोदंते अं मूर्ध्नि
अः मुखे कं दक्षबाहुमूले।
खं कूर्परे गं मणिबंधे घं
अंगुलिमूले ङं अंगुल्यग्रे।

पवंवं ५ वामबाहुमूले संध्यग्रके
षु पवं टं ५ दक्षिण पादमूल सं
ध्यग्रकेषु पवंतं ५ वामपादमूल
संध्यग्रकेषु पंदक्षिणपार्श्वे फंवा
मपार्श्वे बंपृष्ठे भं नाभौ मंउदरे
यंहृदि रंदक्षबाहुमूले लंक।
कुदि वं वामबाहुमूले शंहृदा
दि दक्षहस्ते षंहृदि वामहस्ते
संहृदादि दक्षपादे हंहृदादि
वामपादे लंहृदाद्युदरे क्षंहृ
दादिमुखे सर्वत्र नमोन्तेन न्य
सेत् तथाच उमाद्यन्ता नमोन्तो
वा सबिंदु र्विन्दु वर्जितः पंचाश
द्वर्णविन्यासः क्रमादुत्क्रमणी
रितिः इतिभद्रः अथसंहारमा
तृका न्यासः तस्या ध्यानं यथा
अक्षस्रजं हरिणपोतमुदग्र टं
कविद्याः करैरविरतं दधतीं
त्रिनेत्रां अर्द्धेन्दुमौलिमरुणाम
रविंदरामां वर्णेश्वरीं प्रणमत
स्तनभारनम्रां न्यासस्तु तृका।
द्यकारान्तः यथा तंनमोहृ
दादिमुखेइत्यादि अथपवं च व
र्णा मातृका प्रोक्ता केव
ला बिन्दुसंयुता सविसर्गा
सोभयाच रहस्यं स्मरणाक
ष्यते विद्याकरी केवला
च सोभया भुक्तिदायिनी षु

ब्दा सविसर्गा त सबिंदु र्विन दा
यिनी विष्णुदेश्वरे वाग्भवाद्याच
वाक् सिद्धै रमाद्या श्रीमहेद्ये
ह्लेखाद्या सर्वसिद्धै कामाद्या
लोकवश्यदा श्रीकंवाद्यानि माश्र
येन सर्वमंत्रः प्रसीदति श्रीवि
द्याविषये मंत्री वाग्भवाद्या नमो
तांश्च न्यसेद्वा मातृकाक्षराः
श्रीविद्या विषये मंत्री वाग्भवाद्य
पुसिद्धये जामले भूतशुद्धि लि
पिन्यासौ विना यस्तु प्रपूजयेत्
विपरीत फलं दद्यादभक्त्या पूज
नेयथा सामान्य न्यासे अंगुलि
नियमो गौतमीये मनसा विन्य
सेन्न्यासान् पुष्पेणैवाथ वा पुने
अंगुष्ठानामिकाभ्यां वा वान्यथा
विफलं भवेत् विशेषन्यासे त
न्त्रेयं नियमः अथ पीठन्यासः
ॐ आधारशक्तयेनमः ॐ प्रकृत
येनमः ॐ कूर्मायनमः ॐ अनंता
यनमः ॐ पृथिव्यैनमः ॐ क्षीरस
मुद्रायनमः ॐ श्वेतद्वीपायनमः पवं
मणिमंडपाय कल्पवृक्षाय मणिवे
दिकायै रत्नसिंहासनाय पत्तनसंवे
तत्रादि तन्तोदक्षिणस्कंधे ॐ धर्मा
यनमः वामस्कंधे ॐ ज्ञानायनमः
पवंवामोरौ वैराग्याय दक्षिणोरौ।

ऐश्वर्याय मुखे अधर्माय वाम
पार्श्वे अज्ञानाय नाभौ अवैराग्याय
दक्षिणपार्श्वे अनैश्वर्याय सर्वत्र
प्रणवादि नमोन्तेन न्यसेत् तथाच
शारदायां अंशोरू युग्मयो र्विद्वान्
प्रादक्षिण्येन साधकः धर्मज्ञानंच
वैराग्य मैश्वर्यं क्रमशः सुधीः मु
खपार्श्वनाभि पार्श्वेषु धर्मादीन्
प्रकल्पयेत् पुनर्हृदि ॐ अनंताय
नमः पवं पद्मायनमः अं सूर्यमं
डलाय द्वादशकलात्मनेनमः।
उं सोममंडलाय षोडशकलात्म
नेनमः मं वह्निमंडलाय दशक
लात्मनेनमः सं सत्वाय नमः
रं रजसे नमः तं तमसे नमः आं
आत्मनेनमः अं अंतरात्मने।
पं परमात्मने नमः ह्रीं ज्ञानात्म
ने नमः इत्यंतं विन्यस्य हृत्पद्म
स्य पूर्वादि केशरेषु तत्तत् कल्पा
क पीठशक्ती मध्ये पीठमनुंच।
न्यसेत् यथा शारदायां अनंते।
हृदये पद्मं तस्मिन् सूर्येन्दु पाव
कान् पश्चात् स्वस्वकलान्यस्य नाम
द्यक्षर पूर्वकैः सत्वादीन् त्रिगुणा
न्न्यस्य तथैवात्र गुरुतमः आत्मा
न मंतरात्मानं परमात्मानमेवच
ज्ञानात्मानं प्रविन्यस्य न्यसेत्पी

ठमनुं ततः अथऋष्यादिन्यासः
ऋषिस्तु महेश्वर मुखाज्ज्ञात्वा
यः साक्षात्तपसा मनुं संसाध
यति शुद्धात्मा स तस्य ऋषि
रीरितः गुरुत्वान्मस्तके चास्य
न्यासस्तु परिकीर्तितः सर्वेषां
मंत्रतत्वानां छादनाच्छंदउच्य
ते अक्षरत्वात् पदत्वाच्च मुखे
छंदः समीरितं सर्वेषामेव मंत्र
णां भाषणात् प्रेरणात्तथा हृ
दयांभोजमध्यस्था देवता तत्र
तां न्यसेत् ऋषिच्छंदोऽपरिज्ञाना
न्नमंत्रफलभाग्भवेत् दौर्बल्यं या
ति मंत्राणां विनियोगमजानतां
तत्रादौ ऋषिं न्यसेन्मूर्द्धि देशे
छंदस्तु मुखपंकजे देवतां हृ
दये चैव बीजंतु गुह्य देशके
शक्तिंच पादयोश्चैव सर्वांगे
कीलकं न्यसेत् अथ गान्या
सः तत्रांगुलिनियमः षडंगक
दशकृद्विसंख्यया शील सं
भवे अंगुलीनामिति वचनादि
ति सर्वसाधारणं जामले हृद
यं मध्यमानामा तर्जनीभिः
स्यात्शिरः मध्यमा तर्जनी॥
अंगुष्ठेन शिखास्यात्
दशभिः कवचं प्रोक्तं तिसृभिर्ने

त्रमीरितं प्रोक्तांगुल्लीभ्यामंत्रेस्या
देगात्क्रमितिर्येमता तिसृभिस्त
र्जनीमध्यमानामाभिः तर्जनीम
ध्यमानाम्या प्रोक्ता नेत्र त्रये क्रमा
त् यदि नेत्र द्वयं प्रोक्तं तदा तर्ज
निमध्यमे इति महदुक्त वचना
त् हृदयादिषु विन्यसेदंग मं
त्रोक्ततः सुधीः हृदयाय नमः
पूर्वं शिरसे वह्निवल्लभा शि
खायै वषडित्युक्तं कवचाय हुं
मीरितं नेत्रत्रयाय वौषट्स्याद
स्त्राय फडिति क्रमात् षडंग म
न्त्राणि न्यस्य क्रमात् षडंगेषु नियो
जयेत् पंचांगानि मनो यत्र
तत्र नेत्रं मनुं त्यजेत् इति शार
दावचनं वैलवेत्तु अनेगुष्ठा।
न्यजेवा हस्त शाखा भवेन्न
ह्मा हृदये शीर्षके च अर्थांगु
ष्ठा खलु मुष्टिः शिखायां क
वचे दोर्गुल्यो वर्मशिखः ना
राच मुष्टिहृतवाहुप्रमकां
गुष्ठ तर्जन्युदितो ध्वनिस्तु वि
षाक्तोकथितास्तु मुद्रा यासाति
णी तर्जनिमध्यमे च शारदा।
यो न्यासक्रमेण देहेषु पर्मादी
न् इत्ययेमनः पुष्पाद्यैः पीठमन्त
न् तस्मिंस्तु पदेवतां इति दर्पी

नात् शरीरे पीठपूजा अंगाही
नस्य मंत्रस्य स्वैर्नैवांगानि कल्प
येत् तथा ब्रह्मजामले स्वनामा
द्यक्षरबीजं सर्वेषामभिधीयते।
अथ व्यापकन्यासः नवधा सप्तधा
वापि मूलेन पंचधा त्रिधापि भैरव
तेत्र वचनात् नवधा करणे शिर
सः पादांतं पादतः शिरोतं पंचव
नवी सप्तधा करणे तादृशो त्रिधा
पंचधा करणे तादृशं द्विधा त्रिधा
करणेपि तादृशमेकधा हृदादि
मूर्धांतं शेषमेकधा सर्वत्रैव श
तथा करणे तत्तादृशं पंचाशद्वार
हृदादि मूर्धांतं नास्तीति व्यापक
न्यासः इत्यागमतत्वविलासः नि
त्यन्यासकरणफलं यथा आगमो
क्तेन विधिना नित्यं न्यासं करोति
यः देवताभावमाप्नोति मंत्रसिद्धिः
प्रजायते यो न्यासकवचच्छन्ने मं
त्रं जपति तं प्रिये विघ्ना दृष्ट्वापला
यंते सिंहं दृष्ट्वा यथा गजाः न्या
साकरणे दोषो यथा अकृत्वा
न्यासजालं यो मूढात्मा जप
त्येनतु सर्वविघ्नैः स बाध्यः स्या
द्व्याघ्रैः मृगशिशु यथा इति तं
त्रसारः एते न्यासाः सामान्यपू
जा प्रकरणोक्ताः अन्ये च देव।

पंचांग

ता विशेषवस्वः इति बाहुल्य
भिया तेषां प्रमाणादिकमलि।
खित्वा केवलं नामानि लिख्यते
तत्र विष्णु विषये केशवकीर्त्या
दि १ मूर्तिपंजर २ तत्व ३ मूर्ति
पंजर ४ दशांग ५ पंचांग ६ न्या
साः शिवविषये श्रीकंठादि १ ई
शानादिपंचमूर्ति २ मंत्र ३ मूर्ति
४ गोलक ५ सभगादि ६ भूषण
७ न्यासाः अन्नपूर्णा विषये पद
न्यासः १ श्रीविद्या विषये वशि
न्यादि १ नवयोन्यात्मक २ पीठ ३
तत्व ४ पंचदशी ५ षोडशी ६ सं
हार ७ स्थिति ८ सृष्टि ९ नाद १०
षोढा ११ गणेश १२ ग्रह १३ नक्ष
त्र १४ योगिनी १५ राशि १६ त्रिपुरा
१७ षोडशनित्या १८ कामरति १९
सृष्टिस्थिति २० प्रकटयोगिनी २१
आयुध २२ न्यासाः ताराविषये।
रुद्र १ ग्रह २ लोकपाल ३ न्यासाः
एतेषां प्रमाणानि तंत्रसारादौ द्र
ष्टव्यानि ॥
न्युब्जः पु सामवेदे नियतप्रणव
षट्कं दीर्घतानयमिति नयना
नंदः इत्यमरभरतौ सम्यक् मनो
ज्ञः इति मेदिनी न्युब्जस्त्री कर्मरंग

फलं इति मेदिनी श्राद्धादिपात्र
भेदः इति शब्दरत्नावली त
थाच गोभिलः प्रथमे पात्रे
संस्रवान् समवनीय पात्रं न्यु
ब्जं कुर्यात् पितृभ्यः स्थानम
सीति प्रथमे पात्रे पितृपात्रे
समान् पितामहादि पंचार्घ
पात्रस्य शेष जलानि समव
नीय क्रमेण स्थापयित्वा तस्मा
त्रस्य प्रपितामह पात्रेणाच्छा
दन माह शौनकः प्रपितामह
ह्यपात्रेण पिधाय प्रतिष्ठापय
तीति याज्ञवल्क्येनापि तस्मा
त्रस्यायः स्थतो अभिधानात् पा
त्रान्तरेण पिधानमाप्तिं तथा
च याज्ञवल्क्यः दत्वार्घ्यं संस्र
वांस्तेषां पात्रे कृत्वा विधानतः
पितृभ्यः स्थानमसीति न्युब्जं
पात्रं करोत्वधः विधानतः यथा
पूर्वं स्थापितं क्रमेण तेन प्रपि
तामह पात्रेणाधः कृते पितृपा
त्रे ऊर्ध्वमुखमवस्थितं न्युब्जक
रोति तथा सत्य पितृपात्रेति
धायथ न्युब्जमुत्तरतो न्यसेत्
इति मत्स्यपुराणवचनेन्यसे
दित्यत्राख्यातो प्रस्थापितकर्ते

वीमपार्श्वकर्णेभ्यः इतिश्राद्धत
ते स्तन्नः पु दर्भमयस्तक इ
ति मेदिनी ऊधाः स्तक इति
हेमचंद्रः स्तन्नः त्रि ऊन्नः स्रपो
मुखे: इतिमेदिनी स्तनाभुग्नः
इत्यमरः रोगेन वक्रीकृतस्त
नोधोमुखे पुरुषादिः इति
भरतः स्तन्नवेन्नः पु ऊन्न।
खन्नः वाकानरवार इतिभा
षा तत्पर्यायः कटी लः २
इति त्रिकाण्डशेषः ॥ ।

स्तनं त्रि गर्हे ऊने इत्यमरः
स्तनपंचाशत्रावः पुं ऊनप
चाशत्रावः पागल इत्यर्थः
यथा उदीरितेन्द्रियोघातावी
तौ चक्रे यदात्मजा तदेव स्तन
पंचाशत्रावा जाताः शरीरतः
इतिकालिकापुराणे द्वितीया
ध्यायः नृस्थिमाली पु शि
वः इति त्रिकाण्डशेषः।
नृस्थिमालाविशिष्टे ॥
त्रि ॥ ० ॥

द्वितीय

206

२०८

शब्दकल्पद्रुम

२०८

शब्द कल्पद्रुम